
2. or apply one of the criticisms already set forth in this work to other cases where new modes of defence are brought forward by the disputant ;

3. or else, take up any one of the many terms which make up a proposition enounced by the opposite side and begin another criticism of what it denotes on the lines already indicated, and when the opponent has exhausted his resources of an argument on that point, take to the examination of another concept in the same manner (SKh., p. 419). It goes without saying that this species of dialectics

leads the disputants nowhere and that is just what hyper-criticism aims at.

Sri Harsha's contention is that advaita need not be proved inasmuch as it is self-established. Since all items of dualistic systems stand self-condemned, it necessarily follows that Reality is advaita unaffected by the anirvacanīya phenomena.

(3) Citsukhācārya

Citsukha follows Sri Harsha's foot-steps in criticizing the categories of both the Naiyāyikas and the Vaiśeshikas. The lure of logical treatment of topics, however, tempted him so much that he attempted fresh definitions and proceeded to offer logical proofs—sometimes even adopting *Mahāvidyās*[1] or round-about syllogisms in favour of the anirvacanīyāvidyā and other doctrines of the neo-Śaṅkarites. He thus overshoots his mark forgetting his model Sri Harsha's warning that his dialectic is interested only in demolishing the definitious of the dualists and not in defining or proving anything, since the dialectic never presumes the reality or unreality of any definition or proof. Sri Harsha's strict position is that no proof can be demanded for defending advaita since proof may be right or wrong even when what is sought to be proved is real. It is enough for him that advaita is revealed by the Upanishads.

(4) Sarvajñātman

The hypothesis that Sarvajñātman was the disciple of Sureśvarācārya is now generally discredited. That

1. This species of sophistic syllogisms said to have been started by Kularka Pandita were first refuted by Vadindra in his *Mahavidya-Vidambana.*

this supposition — merely based on the flimsy evidence of the word 'Deves'vara', the name of the author's guru occuring at the beginning and the end of the *Saṅkshepa-Śārīraka* — lacks historical support, has been now proved upto the hilt. But even in the absence of such a proof, a cursory glance at the contents of the work would be enough to show that Sarvajñātman has no connection whatever with Sures'vara, for the *Saṅkshepa-Śārīraka* from his pen is no more than an exposition of the objective anirvacaniyāvidyā doctrine unknown to Sures'vara.

The procedure adopted here is mainly on the lines of the *Vivaraṇa*. Besides conducting a detailed examination of the relation between adhyāsa and avidyā, Sarvajñātman made certain contributions of out-standing importance to this school. The following deserve special mention :

1. He maintains that positive statements like '*Tat tvam asi*' (that thou art) are better suited to describe the nature of Ātman than negative texts like '*neti neti*' (SS. 1-250 to 262).

2. That Brahman through the medium of avidyā and not Brahman qualified by or reflected in avidyā - is the cause of the world (1-320 to 333).

3. That perception is a pramāṇa for *sanmātra* or pure being (1-45, 55) and Bādarāyaṇa rejects the *Ārambhavāda* (of the Vais'eshikas), the *Saṅghātavāda* (of the Buddhas), and the *Pariṇāmavāda* (of the Sāṅkhyas), and prefers the *Vivartavāda* alone. It is admitted, however, that from the arōpā stand-point, the Sūtrakāra teaches the *Pariṇāmavāda* for the use of the lowest grade of enquirers and *Vivarta* for the

mediocre minds while he reserves the *advaita-dṛshti* for the highest minds. Sarvajñātman is an *ekajīva-vādin* that is to say, he holds that Brahman alone has become the jīva and sees the world in the form of Ākāśa etc. The preceptor, the Veda and reason--all figments of avidyā--are the means of getting rid of this jīva-nature (2-162, 163). He therefore, rejects Maṇḍana's and Vācaspati Miśra's doctrine that the locus of avidyā is jīva (2-174). Pure Consciousness that knows no distnctions is alone the locus and object (aśrayatva-vishayatva-bhāginī nirvibhāga-citi-reva kevalā आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला). The knowledge of the true meaning of the mahāvākyas like 'that thou art', says Sarvajñātman, results from dispassion, the discrimination of the meaning of the words 'that' and 'thou' in the text, the determination of the true import of the text and practice of Sādhana or discipline, both external and internal.

In the course of the discussion of the meaning of the word 'thou' (in the Vedāntic text) Sarvajñātman argues that agency and enjoyment of the fruits of action do not really pertain to the nature of the self since they are both objectified by the conciousness of the self while in sleep all is merged in avidyā as may be verified by waking-memory. Śaṅkara's denial of avidyā in sleep should be interpreted only to mean that we do not conceive it clearly as distinct from us. Ignorance is of course unreal since it is known through intuition (3-113 to 131, 139). Sarvajñātman sets great store by the import of the *mahāvākyas* or texts that teach the identity of the individual and the Supreme-self. The Upādhis, the semblance of *cit* (consciousness), the reflection of cit and also the original cit itself are all the component factors that make up the object

denoted by the words 'that' and 'thou'. The author explains at length how the Śruti aims at teaching the absolute or secondless cit as the 'akhaṇḍārtha' as it is technically called. The original should be carefully studied before one is able to appreciate this complicated teaching (3-306 to 318).

The distinction of sadyōmukti and jīvanmukti is another special feature of Sarvajñātman's teaching. Ignorance is utterly burnt up by knowledge and so the knowing one is immediately released. Jīvanmukti taught by the scripture is not to be taken seriously (4-38, 39). An alternative opinion is also allowed that the apparent continuance (*bādhitānuvṛtti*) of avidyā even after it is blotted out is possible till the fructifying karma is exhausted (4-10 to 46). Sarvajñātman perfected the doctrines of anirvacanīya-bhāva-vidyā in many respects. He was mostly in favour of the Vivaraṇa school and therefore ruthlessly opposed many of the Maṇḍana and Vācaspati doctrines by adopting a dialectic of his own. As many as seven different theories about the locus of avidyā have been enumerated and confuted by this writer, thus showing that the monism of avidyā-speculators had been split up into several different sub-schools by that time.

Conclusion

This short sketch of the history of Vedantic thought from the remotest times up to the time of Sarvajñātman, is expected to give the reader an idea of the various attempts and failures of several Vedāntins at systematizing the Upanishadic doctrines. This epoch is marked by three principal turning points :

1. **The ancient period** presenting a phase comprising many divergent schools of monism along with the traditional school, the precursor of Gauḍapāda's, which was perhaps not very dominent then.

2. **The middle period** presenting the phase of vivid consciousness of the un-adulterated traditional method represented by Gauḍapāda, S'aṅkara and Sures'wara.

3. **The third period** presenting the phase of the objective-avidyā doctrine of many shades professing to follow and defend S'aṅkara's views against a solitary dissidence–that of Bhāskara-but casting the traditional method into the shade. This period is also marked by a tendency to speculate and ratiocinate, as well as a fondness for interpreting Vedantic texts in alternative ways in disregard of experience, quietly ignoring the principle that truth and reality are unalterably uniform in their nature.

The human mind has been, from time immemorial, in quest of universal and absolutely certain knowledge of truth and reality and the result has been the emergence of so many systems of philosophy in conflict with one another. Nevertheless, the intensity of the search is not abated a whit, and philosophers are sure and certain of getting at the truth some day. Neither empirical science which relies on the data supplied by the senses, nor speculation which hopes to build up a consistent system with the help of reason applied to partial experience can satisfy this hunger for truth or fulfil the hope for the simple reason that both are limited to partial views of reality. Moreover, the procedure of both science and speculation is circumscribed by time and

space, two factors that cast a doubt on the finality of the conclusion of either. Critical reason no doubt can espouse the claim of individual speculative systems or even show the hollowness of the pretensions of all reasoning as such, but can never land us in truth or reality for it is primarily a faculty of examining but not of creating or revealing views and facts. A critical philosopher can hastily conclude that the human mind is unable to know the real in itself, or can at best suspend his judgment. The mystic can indeed pride himself on the direct vision of Reality in a special trance not vouchsafed to ordinary mortals. But others may question the genuineness of that vision for the very reason that it is limited to a particular state of particular individuals and not universal as Reality ought to be.

The Upanishads, however, have found a way out of this labyrinth. They declare with one voice that truth and reality combined in one, can be intuited in one's own self when one transcends both the senses and the mind. This intuition of the Self is universal, for, as Śaṅkara says, everyone is conscious of one's own existence and can never conceive the opposite. And this Self is the Reality (SB. p.6). Again this intuition is limited neither by time nor by space for both of these belong to the region of the not-self and are conceivable only by the empirical me which again pre-supposes the true Self. The latter can be neither affirmed nor doubted, neither proved nor disproved to exist, neither accepted nor rejected, neither experienced as an object nor thought away, for it is the prius which supplies the very ground of these thought-processes. Only variant views of it are possible for speculators, whence it follows that the

SECTION FIVE

THE TRADITION BEFORE S'AṄKARA

1. GAUDAPĀDA

S'aṅkara is the earliest teacher whose extant Bhāshyas give us a picture of the unique method of Vedānta in all its working detail. But he is by no means the first discoverer of the method. In fact he remembers with great reverence the ancient teachers[1] who wrote commentaries on all the Upanishads even before him. Of such teachers, it is some satisfaction to know that there is at least one whose work is extant till today ; and that is Gaudapada who has summarized the teachings of the Upanishads in his kārikās or expository verses on the Māṇḍūkya. For a fuller information regarding this work, the reader is referred to my Sanscrit commentary, the Māṇḍūkya Rahasya-vivṛti. Here I shall merely indicate in outlines how Gouḍapāda was perfectly aware of this traditional method.

In the Āgama Prakaraṇa, or the first chapter of his work, so named because it expounds the traditional method adopted in the S'ruti, he shows how the three different aspects of Ātman—outwardly conscious, inwardly conscious or pure consciousness—are merely super-impositions on the *Turīya* or the Real Self which is forever untainted with *svapna-nidrā* (dream sleep or wrong knowledge) or *asvapna-nidrā* (dreamless sleep or absence of knowledge I-11 to 15) and closes his teaching with the observation " that

1. The second opening verse, Tai. Bh.

Many an attempt at interpretation of the Upanishads has become a failure just because the various systematizers were not aware of this unique method of procedure adopted in the s'rutis. While most of the systems, detailed in the present work were aware of the monistic tendency of the Upanishads, they uncritically presumed that the present state of the Jīva is a fall from the ideal Brahmic nature, and so some effort is necessary to re-transform it into its pristine glory. They never suspected for a moment that the essential nature of each one of us as well as of the whole world of duality is really Brahman or the Absolute, eternally unsullied by a second, except for the super-impositions of avidyā.

The credit of having drawn the attention of Vedāntins to the only traditional method of interpreting the Upanishads, which successfully reconciles all the apparently conflicting texts and points to a system in those sacred writings, belongs, as shown in the pages of this book, to Gauḍapāda, S'aṅkara and Sures'wara – the three resplendent stars that sparkle un-bedimmed in the Vedāntic heavens. Guided by them we can all listen to the heart-stirring teachings of the Upanishads which sing the glory of Brahman and exhort us to give up our mental aberrations due to avidyā, and return to our Brahmic nature which is really ours now and for ever.

भूमिका

—:०:—

वेदान्तेषु परमार्थतत्त्वोपदेशप्रकारः

सुप्रसिद्धमिदं श्रीगौडपादीयमाण्डूक्यकारिकासु श्रीशङ्करभगवत्पादीयप्रस्थानत्रयभाष्येषु च कृतपरिश्रमाणां सूक्ष्मदर्शां यत् प्रत्यस्तमितसर्वविशेषम् अद्वितीयम् अवाङ्मानसगोचरं परमार्थतत्त्वं कथं नु नाम बुभुत्सूनां स्वात्मत्वेनानुभवमारोहेदिति सद्ब्रह्मात्मादिशब्दैर्निर्दिश्य तस्मिन् अस्तित्वम्, ज्ञेयत्वम्, चैतन्यसुखात्मकत्वं शास्त्राचार्योपदेशगम्यत्वम्, प्रपञ्चात्मना परिणामित्वम्, स्वसृष्टप्रपञ्चे जीवात्मना अनुप्रवेशः – इत्येवमादीन् मिथ्याधर्मान् अध्यारोप्योपदिशन्ति वेदान्ताः 'सदेव सोम्येदमग्र आसीत्' (छां. ६-२-१), 'ब्रह्म वा इदमग्र आसीत्' (बृ. १-४-१०), 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १-१-१), 'एतज्ज्ञेयं नित्यमेवात्मसंस्थम्' (श्वे. १-१२), 'विज्ञानमानन्दं ब्रह्म' (३-९-२७-७), 'सर्वे वेदा यत्पदमामनन्ति' (का. १-२-१५), 'आचार्यवान् पुरुषो वेद' (छां. ६-१४-२), 'सच्च त्यच्चाभवत्' (तै. २-६), 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छां. ६-३-२) इत्येवमाद्या इति ॥

तदेवम् उपदेशार्थं प्रकल्पिता धर्माः परमार्थतत्त्वस्य वस्तुतोऽपि स्युरिति मा शङ्कीति प्रत्येकं तं तमारोपितं धर्मं विस्पष्टं अपह्नुवते उपदेशान्ते त एव वेदान्ताः 'अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः। अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति' (का. २-३-१३), 'स वेत्ति वेद्यं न च तस्यास्ति वेत्ता' (श्वे. ३-१९), 'न विज्ञातेर्विज्ञातारं विजानीयाः' (बृ. ३-४-२), 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' (तै. २-९), 'न जायते म्रियते वा' (का. १-२-१८), 'अजायमानो बहुधा विजायते' (तै. आ. ३-१३-३९), 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११), 'अपागदृश्येऽग्रहित्वं वाचारम्भणं विकारो नामधेयम्' (छां. ६-४-१), 'तत्सत्यं स आत्मा तत्त्वमसि' (छां. ६-८-७) इत्येवम् । विशिष्य च ज्ञेयधर्मान् द्रव्यत्वगुणत्वादीन् सर्वथा प्रतिषेधन्ति तस्मिन् अक्षराख्ये तत्त्वे 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन' (बृ. ३-८-८), 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं

तदपाणिपादम्' (मुं. १-१-६), 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवम्' (का. १-३-१५) इत्याद्याः – इति च ॥

वेदान्तानां प्रामाण्यम्

तदीदृशं ब्रह्मतत्त्वं प्रमातृवेषेण प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणादिव्यवहारात् सिद्धत्वात्, सर्वस्यात्मत्वादेवापरोक्षत्वात्, स्वयंप्रकाशानुभवरूपेण स्वतःसिद्धत्वाच्च नैव घटादिवत् स्वव्यतिरिक्तज्ञाप्यत्वमाकाङ्क्षत इति न पृथग् वक्तव्यम्। अत एव वेदान्ता अत्र न प्रत्यक्षादिवदज्ञातार्थज्ञापकत्वेन प्रामाण्यमात्मनः प्रतिपद्यन्ते, किं तर्हि, 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्....' (बृ. ४-५-१५) इत्यादिवदन्ततः प्रमाणप्रमेयव्यवहारातीतत्वेन तत्सतत्त्वं समर्पयन्तोऽध्यारोपितातद्धर्मनिवर्तकत्वमात्रेण प्रमाणमित्युपचर्यन्ते-इत्यभियुक्ताः ॥

अध्यारोपेण तदपनयनेन वा नातिशयो ब्रह्मणि

अत एव च लौकिकाध्यारोपैः शास्त्राचार्यप्रकल्पितोपदेशार्थाध्यारोपैस्तदपवादैर्वा न कश्चिदतिशयः स्याद् गुणलक्षणो दोषलक्षणो वा ब्रह्मणि। नित्यनिष्प्रपञ्चमेव हि सद् ब्रह्म लौकिकैरबुधैः सप्रपञ्चत्वेन संसारित्वेन च विकल्प्यते। तदनूद्य वेदान्तैराचार्यैश्च 'प्रत्यस्तमिताशेषप्रपञ्चम् एकाकारं ब्रह्मैवेदं सर्वम्' न त्वेव प्रपञ्चो नाम ब्रह्मव्यतिरेकेणास्ति, नापि जीवो नाम कश्चित् ततोऽन्योऽस्ति' इत्युपदिश्यते। 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११), 'आत्मैवेदं सर्वम्' (छां. ७-२५-२), 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाता' (बृ. ३-७-२३) इति हि श्रुतयः। न च विद्यमानः प्रपञ्चः श्रुतिभिराचार्यैर्वा स्वोपदेशेनापनीयते-इति शक्यं कल्पयितुम्। न च शास्त्रशिष्यादिभेदः, शिष्यगतमज्ञानं वा विद्यमानं सत् शास्त्राद्युपदेशेन विनिवर्त्यते – इत्युररीक्रियते क्वचिदपि वेदान्तेषु। सर्वमेवेदम् उपदेशार्थम् उपायत्वेन प्रकल्प्यते; न तूपदेशकाले, ततः प्राक्, ऊर्ध्वं वा जातुचिदस्ति – इत्येष एव हि परमार्थः। यथाहुरभियुक्ताः –

> प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
> मायामात्रमिदं द्वैतमद्वैतं परमार्थतः॥
> विकल्पो विनिवर्तेत कल्पितो यदि केनचित्।
> उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते॥ गौ. का. १-१७, १८.

इति ॥

एषैवैका वेदान्तप्रक्रियात्वेन सांप्रदायिकसंमता

सैषा प्रक्रिया सर्वोपनिषत्प्रसिद्धा शङ्करभगवत्पादेभ्यः प्राक्तनैरेव वेदान्त-

सम्प्रदायविद्भिरुपदिष्टा इति 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' (गी. भा. १३-१३) इति गीताभाष्योदाहृतवचनादवगम्यते ॥

स एष नेति नेतीति व्याख्यातं निह्नुते यतः ।
सर्वमग्राह्यभावेन हेतुनाऽज प्रकाशते ॥ गौ का. ३-२६.

इति कारिकायाम् 'स बाह्याभ्यन्तरेऽजे ह्यात्मतत्त्वे निर्विशेषेऽपि उपदेशार्थमेवाध्यारोप्यातद्धर्मान्, तत्त्वमुपदिश्य उपदेशकार्ये निर्वृत्ते तत्पूर्वं यद्यद् व्याख्यातं तस्य तस्यापरमार्थतां ज्ञापयितुं श्रुतिः स्वयमेव निह्नुते' - इति ब्रुवाणैर्गौडपादैरपि निर्दिष्टेयं सांप्रदायिकी प्रक्रियेत्यवगम्यते ॥

प्रकृतग्रन्थनिर्माणे हेतुः

सैषा प्रक्रिया सर्ववेदान्तेषुद्दिष्टा एकैव सती नानारूपाणि धत्ते । यतस्तत्र दरीदृश्यमाणाः कार्यकारणप्रक्रिया, सृष्टिप्रक्रिया, जीवेश्वरविभागप्रक्रिया, सामान्यविशेषप्रक्रिया, पञ्चकोशविवेकप्रक्रिया, अवस्थात्रयप्रक्रिया - इत्येवमादयः सर्वे एतस्या एवावान्तरभेदा भवन्ति । तदेतद् यथावदुपपाद्य वेदान्तोपदेशप्रकारतत्त्वं बुभुत्सूनां हृदयमागमयितुम्, भगवत्पादसमकालीनास्तत्प्राक्तनाश्चान्ये प्रस्थानान्तरावलम्बिन आचार्या एतस्याः प्रक्रियाया वेदान्तेषु परमं प्राधान्यं प्रत्यभिज्ञातुमसमर्थाः, 'विद्यमानमेव बन्धम् अज्ञानं वा साधनविशेषैः विनिवर्त्यैव कृतकृत्यो भवेन्मुमुक्षुः' इति मन्वानाः, नैकान् प्रक्रियाविधाभेदान् कल्पयामासुरिति विज्ञापयितुम्, शङ्करभगवत्पादानुयायित्वेनात्मानं ख्यापयन्तोऽप्यर्वाचीना व्याख्यातारः केचित् प्रक्रियातेनां साकल्येनाविमृश्यैव प्रस्थानान्तराणि परस्परं भाष्यप्रस्थानेन च विरुद्धान्येव भगवत्पादसंमतत्वेन प्रत्युपस्थापयन्तीति स्थापयितुम्, वेदान्तभाष्यान्तरकारा अपि भगवत्पादेभ्योऽवरकालीनाः, अस्याः प्रक्रियाया महिमानमसञ्जानाना एव व्याख्यानप्रस्थानविशेषनिराकरणमात्रेण भगवत्पादीयमेव प्रस्थानं निराकृतं मन्यमाना आत्मानं परानपि वञ्चयन्तीति निदर्शयितुम्, तथा अद्यतनाश्च वेदान्तविद्वांसः केचित् परमार्थशाङ्करप्रस्थाने कथमप्यवकाशमलभमानानां भाष्यान्तरकारोत्थापितानामाक्षेपाणां परिहारमात्रेण भगवत्पादसंमताद्वैतसंरक्षणं कृतमित्यभिमन्यमानाः स्वयमजानन्त एव भाष्यविरुद्धप्रस्थानसंरक्षणे बद्धपरिकरास्तिष्ठन्तीति प्रदर्श्य पुनरपि सांप्रदायिकीमेनां विशुद्धवेदान्तप्रक्रियां प्रत्यभिज्ञाप्य जिज्ञासुजनं निष्कण्टकेन वेदान्तार्थपरिशीलनराजमार्गेण प्रस्थापयितुं च अयं ग्रन्थो मया निरमायि ॥

प्रकृतग्रन्थे विशेषाः

अत्र न केवलं विशुद्धवेदान्तप्रक्रियामहत्त्वख्यापने, तदितरप्रक्रियाणां बह्वपायस्थानत्वेन प्रख्यापने च यत्नः कृतः, किं तर्हि, श्रुतिवचनानां केवलयुक्त्यवष्टम्भेन

स्वस्वमतानुसारेण व्याख्यानमात्रेण कृतार्थताभिमान एव वेदान्तिनां विवादविरोधग्राहग्रासगमने प्रधानं कारणमिति विविधप्रक्रियापरीक्षणव्याजेन वेदान्तविचारेतिहासदिग्दर्शनेन निर्दर्शितम् । तत्र प्राचीनवेदान्ताचार्या नियमेनाद्वैतमेव वेदान्तार्थत्वेनाभ्युपयन्तोऽपि यथा विवादपदकारणं निवारयितुं न प्रभवन्ति स्म तथा संग्रहेणोपपादितम् । भगवत्पादसमकालीनत्वेन संभाव्यमानानां भर्तृप्रपञ्चानां प्रस्थानशरीरं भाष्यवार्तिकोभयगतटीकामाश्रित्य यथासाध्यं साकल्येनोपप्रदर्श्य तत्खण्डनं भाष्यानुसारेण वार्तिकानुसारेण च संगृहीतम् । भगवत्पादेभ्योऽर्वाचीनेषु प्रस्थानेषु मध्ये वार्तिककारप्रस्थानं किञ्चिद्विस्तरेणैव विमृष्टम्, सुरेश्वराचार्या हि भगवत्पादसमादृतप्रक्रियां स्वीयेनैवासाधारणरीत्या प्रतिपादयन्तः परिपोषयन्ति स्मेति । तद्विरुद्धप्रक्रियया प्रस्थितेषु मध्ये मण्डनमिश्रभास्कराचार्ययोर्मते विशिष्य परीक्षिते ; ताभ्यां हि प्रभाविताः प्रायशः सर्वेऽपि अर्वाक्कालीना वेदान्तिनः स्वस्वविचारसरण्यनुसरणे इत्युपपादनार्थम् । एवं भगवत्पादीयानुयायिव्याख्यानप्रस्थानेषु पञ्चपादिकातद्विवरणप्रस्थाने, भामतीप्रस्थानं च– इत्येतानि प्रधानतया समुपन्यस्तानि व्याख्यानेष्वन्योन्यविरोधभाष्यविरोधकलङ्कितत्वनिदर्शनाय । इतराणि तु प्रस्थानानि आसर्वज्ञात्ममुनिप्रस्थानं वाक्यव्याख्यानकौशलप्रदर्शनकेवलयुक्त्यवष्टम्भव्यसनिताप्रकारप्रदर्शनार्थमेवानीतानि । भगवत्पादसंमतसांप्रदायिकप्रक्रियानुसरणेन तु निरपवादं वेदान्तविज्ञानसुनिश्चितार्था यथा मुमुक्षवः सिद्धार्था स्युः, तथा श्रुतियुक्त्यनुभवसङ्गानख्यापनपूर्वकमुपपादयितुमपि प्रयतितं यथाशक्ति ॥

विशेषेण चात्र श्रुतीनां प्रामाण्यं न केवलं वेदवाक्यत्वात्, अपि तु सर्वव्यवहारमूलस्य प्रमातृत्वस्याविद्यापुरःसरत्वप्रदर्शनपूर्वकं सर्वप्रमाणप्रमेयव्यवहारबाधनेनात्मानुभवपर्यवसायित्वात् (खं. २८, पा. ४२, ४३) इत्युपपादितम् । श्रुत्यादृततत्त्वोपदेशप्रकार आगमशब्दव्यपदेश्यः, अनुभवाङ्गत्वेन श्रुत्यनुगृहीतयुक्तिविशेषः, तदनुकूलो लौकिकतर्कश्च तर्कशब्दवाच्यः – इति वेदान्ताभियुक्तव्यबहुतागमतर्कशब्दयोः पारिभाषिकत्वमुपप्रदर्श्य, उत्प्रेक्षामात्रनिबन्धनस्य शुष्कतर्कस्यात्राप्रवेशः (खं. ३१, पा. ५०–५१) स्फुटितः । यदङ्गत्वेनैव च युक्तेः श्रौतत्वम्, तस्य सार्वत्रिकस्यैवानुभवस्येह प्रमाणत्वम् (खं. ३१, पा. ५०), विद्यया सर्वाध्यारोपापाकरणेन स्वरूपप्रतिष्ठितत्वस्यैवात्मनः फलरूपात्मानुभवत्वम् (खं. ३१, पा. ४९, ५१) इति वेदान्ताभिमतानुभवस्वरूपविशेषविवेचनं तन्त्रान्तराभिमतसमाध्यादीनां व्यावृत्त्यर्थं स्फुटीकृतम् ॥

यद्यपि प्रमाणप्रमेयव्यवहारस्य सर्वस्याप्यविद्याकृतत्वमेवाभ्युपगम्यते वेदान्ते, तथापि वैनाशिकमते इव न केवलयुक्तिबलाद् दृष्टापलापः क्रियतेऽत्र ; यत्कारणं कर्मणि ज्ञाने च लौकिकी दृष्टिः, शास्त्रदृष्टिश्च– इति दृष्टिद्वयमाश्रित्य यावच्छास्त्रदृष्टयवलम्बनेन लौकिकी दृष्टिर्न बाध्यते तावत् प्रत्यक्षादीनि प्रमाणानि, उपास्योपासकादिशास्त्रव्यवहाराः, विधिप्रतिषेधशास्त्राणि, मोक्षशास्त्रं च स्वस्वक्षेत्रे प्रामाण्यमश्नुवत एवेत्युपपादनेन मतान्तरसाङ्कर्यं विनिवारितम् (खं. ४८, पा. ८४, ८५ ; खं. ४९, पा. ८६, ८७,

८८, ८९)। यद्यपि च सर्वात्मभूतं ब्रह्म निर्विशेषम्, अद्वितीयम्, नित्यशुद्धबुद्धमुक्तस्वभावं च वेदान्तनये-इत्यतः

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ गौ. का. २-३२.

इत्येव भवितुं युक्तम्, तथाप्यविद्याव्यवहारदृष्ट्या मुमुक्षुभिरनुष्ठीयमानानि पाण्डित्यादीनि साधनानि. ज्ञानोत्पत्त्यनन्तरं ज्ञाननिष्ठा (खं. ५८, पा. १०८, १०९), अविद्यानिवृत्तौ सर्वकर्मसंन्यासपूर्वकं स्वात्मन्यवस्थानलक्षणो मोक्षः सद्योमुक्तिशब्दव्यपदेश्यः (खं. ५९, पा. १०९-११२; खं. ६०, पा. ११३), व्यवहारदृष्ट्या प्रारब्धकर्मफलभोगान्ते शरीरपाते आत्यन्तिकमुक्तिश्च (खं. ६०, पा. ११३); क्रममुक्तिः, 'सद्योमुक्तिः', 'विदेहमुक्तिश्च' इति त्रेधा विभज्य व्यवह्रियमाणाया अपि मुक्तेः स्वरूपे न कश्चन विशेषः, नित्यप्राप्तात्मस्वरूपत्वात् तस्याः (खं. ६१, पा. ११५ प्रभृति ११७ पर्यन्तम्) इत्येवं साधनफलविभागव्यवस्थाप्यत्र सुस्था – इति प्रदर्शितम् ॥

उपसंहारः

अयं च प्रयत्नो कियान् सफलः – इत्यत्र तु सहृदया वेदान्तार्थपरिशीलनचणा विद्वत्प्रकाण्डा एव प्रमाणम् । भगवत्पादचरणयुगलचिरस्मरणेन सांप्रदायिकप्रक्रियामहिमन्यवाप्तयत्किञ्चित्परिचयोऽहं तेभ्य एवान्वर्थजगद्गुरुभ्यो ग्रन्थमिमं समर्प्य तावतैव कृतार्थं धन्यं चात्मानं मन्ये । इमं च वेदान्तप्रक्रियाप्रत्यभिज्ञाग्रन्थस्य प्रथमं सम्पुटं मुद्राप्य प्रकाशनार्थं – मत्कृतीनां प्रकाशनपूर्वकं वेदान्तविषयकमदभिप्रायविशेषप्रचारणे बद्धादराये होळेनरसीपुरस्थायै अध्यात्मप्रकाशकार्यालयकार्यकारिसमित्यै – यथापूर्वं प्रत्तवानस्मि। सा च समितिरस्य सम्यगङ्कनप्रकाशनप्रचारणैः शङ्करभगवत्पादानुग्रहपात्रं भूत्वा यथा द्वितीयसम्पुटप्रकाशनेऽपि समुद्युक्ता भवेत्, तथा अनुगृह्णातु भगवान् नारायण इति मम हार्दिक्यः समाशिष इति

अध्यात्मप्रकाशकार्यालये शोभकृन्नामसंवत्सरस्य
माघकृष्णद्वितीयायाम् गुरुवासरे

श्रीशङ्करचरणस्मरणावलम्बी
सच्चिदानन्देन्द्रसरस्वतीभिक्षुः

विषयानुक्रमणिका

—:०:—

पत्रपार्श्वानि

१. वेदान्तप्रक्रियानिर्धारणावश्यकता

सांप्रदायिकवेदान्तप्रक्रिया ब्रह्माद्यविच्छिन्नगुरुपरम्परागता–प्रस्थानत्रये सुप्रख्यापिता प्रक्रिया विविधभाष्यकारैराकुलीकृता – नवीनप्रस्थानान्तरोदयादपि परमार्थप्रक्रियाभिज्ञानं कष्टसाध्यं जातम् – अद्यतनजिज्ञासुजनशङ्का – 'विविधप्रक्रियारचनम् अधिकारतारतम्यनिमित्तम्' इति समाधानमेकीयम् – एकीयसमाधानविमर्शः – प्रकारान्तरेण प्रस्थानाविरोधप्रदर्शनम् एकदेशिभिः– उक्तसमाधानविमर्शः – प्रक्रियाप्रत्यभिज्ञापनाय प्रयत्न आवश्यकः – प्रक्रियानिर्धारणे अनुसर्तव्या नियमाः ॥ (खं. १–१०) १–१७

२. प्रस्थानत्रययन्थशरीरपरीक्षणम्

प्रस्थानत्रयपरीक्षणस्य अप्रस्थानत्वे निमित्तम् – उपनिषत्सु प्रतिपादिता विषयाः – वेदान्तमात्रपरिशीलनेन प्रक्रिया स्थूलमतीनां दुरवधारणा – गीताप्रतिपाद्यविषयाः – गीतास्वपि न प्रक्रिया शक्यनिर्धारणा – सूत्रप्रस्थानविभागक्रमः – सूत्रप्रस्थानावलोकनेनापि प्रक्रिया दुरवधारणा ॥ (खं. ११–१७) १८–२५

३. श्रीशङ्करभगवत्पादभाष्यपरिशीलनम्

आचार्यभगवत्पादानां सत्संप्रदायस्थत्वम् – भगवत्पादसंमता सांप्रदायिकी प्रक्रिया – अध्यारोपापवादप्रक्रियैव इतरप्रक्रियाविशेषाणां मूलरूपम्– अध्यारोपितापवादेनैव ब्रह्म शक्यावगमनम्–सर्वाध्यारोपमूलम् अविद्याशब्दवाच्यम् –अविद्याहेतुस्वरूपकार्याणि – विद्याहेतुस्वरूपकार्याणि – प्रमातृत्वकर्तृत्वयोराविद्यकत्वोपपत्तिः – विधिप्रतिषेधशास्त्रस्य अविद्यापुरस्सरं प्रवृत्तिः – मोक्षशास्त्रस्याविद्यावद्विषयत्वेऽपि विशेषः – शास्त्रस्यान्यप्रमाणत्वम् – विद्याविद्यान्यवहारोऽप्यविद्याभूमावेव – विद्यया अविद्यात्रयापबाधः– आगमतर्कयोरनुभवपर्यवसायित्वम् – कार्यकारणवादादिप्रक्रिया मूलप्रक्रियावान्तरभेदा एव – कार्यकारणविवेकः – सृष्टेर्व्यावहारिकत्वस्वीकारोऽधिकारिभेदानुग्रहार्थम् – सत्कार्यवादो मायाजन्मवादश्च – उक्तवादयोः श्रौतत्वोपपत्तिः – सामान्यविशेषप्रक्रियाविमर्शः – द्रष्टृदृश्यप्रक्रियापरिशीलनम् – पञ्चकोशविवेक-

पत्रपार्श्वानि

प्रक्रियापरिशीलनम् – अवस्थात्रयविवेकप्रक्रियाविमर्शः – सद्ब्रह्मरूपत्वमेव स्वभावो जीवस्य–आत्मनश्चैतन्यस्वभावत्वम् – आत्मनो नित्यनिरवस्थत्वम् – आत्मनोऽवस्थात्रयवत्त्वं मायिकम् – अवस्थात्रयपरीक्षया जीवेश्वरविभाग-व्यवहारस्याप्यपबाधः – व्यवहारस्य सर्वथाप्यात्मासंस्पर्शित्वम् – द्वैतमिथ्यात्वं किञ्चिक्षणमभिप्रेतम् ? – व्यावहारिकावस्थायां प्रमाणादिविभागसत्यत्वम् – निरुपाधिकब्रह्मवाक्यं तत्प्रधानम्, सोपाधिकवाक्यं तु उपासनाविधिप्रधानम् – ब्रह्मवस्तुबोधकान्यपि वाक्यानि सन्ति – परापरब्रह्मणी – ज्ञानोपासनयो-र्वैलक्षण्यम् – **ज्ञानसाधनानि** – ज्ञानसाधनानां समुच्चयविकल्पगता चिन्ता–साधनानुष्ठानावधिः – उपासनानिदिध्यासनयोर्वैलक्षण्यम् – मुमुक्षुसंन्यासिना अनुष्ठेयानि पाण्डित्यादीन्यपि आविद्यकान्येव – ज्ञानोत्पत्त्यनन्तरम् आत्म-निष्ठैव – अविद्याबाधे सति स्वात्मन्यवस्थानमेव मोक्षः – मुक्तिद्वयम्, जीवन्मुक्तेर्मुख्यत्वं च – ज्ञानफले मुक्तौ न कश्चिद् विशेषोऽस्ति ॥
(खं. १८–६१) २६–११७

४. प्राचीनप्रस्थानपरीक्षा

काण्डसंबन्धः – कर्ममात्रस्य मोक्षसाधनत्वं कृत्स्नवेदार्थ इति मतम् – वेदान्ता आत्मादिप्रकाशनद्वारा कर्मसंबन्धिन इति मतम् – काम्यप्रतिषिद्धवर्जनान्मोक्ष इति मतम् – ज्ञानकर्मसमुच्चयवादः – ज्ञानोपासनयोरैक्ये सत्युपासनाविधि-शेषता ब्रह्मण इति वादः – ज्ञाने विधिमङ्गीकुर्वतां मतम् – ज्ञानाभ्यास-(प्रसङ्ख्यान)वादः – प्रपञ्चविलयवादः – कामविलयवादः – अवस्थात्रय-वासनानिरोधवादिमतम् – विज्ञानस्मृतिसंततिविधिवादः – चित्तवृत्तिनिरोध-विधिवादः – भागवतमतम् ॥ (खं. ६२–७५) ११८–१४७

५. भर्तृप्रपञ्चप्रस्थानपरीक्षा

भर्तृप्रपञ्चप्रस्थानपरिशीलनावश्यकता – द्वैताद्वैतप्रस्थाने कार्यकारणप्रक्रिया – ब्रह्मणोऽष्टावस्थाः – विज्ञानात्मनो विकारत्वम् – द्रष्टृदृष्टिविवेकः–'पश्यन् वै तन्न पश्यति' इत्यादिश्रुतिव्याख्यानम् – ब्रह्मविद्याधिकारी – अवस्थात्रय-परीक्षणम् – मोक्षविचारः – अन्तरालावस्था – श्रवणमननिदिध्यासनानि–ज्ञानकर्मसमुच्चयवादः – दैवाद् वित्ताद् व्युत्थानम् ॥ (खं. ७६–८८) १४८–१८२

६. मण्डनप्रस्थानपरीक्षा

व्याख्यानप्रस्थानपरीक्षावश्यकता – व्याख्यातृषु मध्ये वार्तिककारस्य प्रथमं स्थानम् – सुरेश्वरप्रस्थानावेक्षणार्थं मण्डनप्रस्थानविमर्शनमावश्यकम् – मण्डनप्रस्थाने

पत्रपार्श्वानि
अविद्यास्वरूपम्– अविद्याया अनिर्वचनीयत्वम्–अविद्याश्रयः–स्वाभाविकाविद्यानिवृत्तिः – ख्यातिबाधविचारः – प्रमाणव्यवहारः – शास्त्रप्रामाण्ये आक्षेपसमाधानानि – ब्रह्मणः शास्त्रप्रमाणकत्वे आक्षेपसमाधानानि – ध्यानाभ्यासकर्मसमुच्चयः – मोक्षप्राप्तिप्रकारः – अद्वैतप्रक्रियान्तराणाम् अनुमोदनम् – उपसंहारः ॥ (खं. ८९–१०३) १८३–२०९

७. वार्तिकप्रस्थानपरीक्षा

वार्तिकप्रस्थानस्याकरग्रन्थाः – ब्रह्मसिद्धिसंबन्धवार्तिकयोर्निकटसंबन्धः – वार्तिके परामृष्टानि वादान्तराणि – मण्डनप्रस्थानदूषणं वार्तिके – वार्तिके भर्तृप्रपञ्चमतविमर्शः – आत्मैकत्वस्य अनुभवस्वरूपत्वात् स्वतःसिद्धत्वम् – वार्तिकप्रस्थाने अविद्या – अज्ञानविषये आक्षेपपरिहाराः – भाष्यवार्तिककारयोरविद्याप्रक्रिये–अविद्याश्रयविषयविवेचनम्– प्रमाणव्यापारनिरूपणम् – ख्यातिबाधविचारः – श्रुतिवाक्यप्रामाण्यम् – प्रत्यक्षादिविरोधपरिहारः – कार्यकारणप्रक्रिया – सामान्यविशेषभावप्रक्रिया – पञ्चकोशविवेकप्रक्रिया – द्रष्टृदृश्यविवेकः – अवस्थात्रयप्रक्रिया – ज्ञानविधिचिन्ता – श्रवणादिविधिचिन्ता – श्रवणादिविषये भाष्यवार्तिकप्रस्थानतुलना – शमदमादिविधानम्–कर्मोपासनयोर्विनियोगः – अविद्यानाशव्यतिरेकेण मोक्षान्तरं नास्त्येव – द्वैतं समस्तमविद्याकल्पितम् – वार्तिकसंमताद्वैतम् ॥ (खं. १०४–१३०) २१०–२७६

८. पञ्चपादिकाप्रस्थानपरीक्षा

पञ्चपादिकाप्रस्थानविमर्शनावश्यकता – अविद्यास्वरूपं पञ्चपादिकायाम् – अविद्या किंप्रमाणिका ? – अविद्याकार्यम् – अविद्योपादानवादः किं पञ्चपादिकाकारोपज्ञः ? – पञ्चपादिकाप्रस्थाने अध्यासलक्षणम् – अध्यासे मतान्तरोपन्यासः – अध्यासस्वरूपविशदनार्थं भाष्योपात्तमुदाहरणद्वयम् – जीवभेदे अविद्यादोषो निमित्तम् – अध्यासव्यवहारयोरैक्यम् – अहमध्यासः – आत्मनोऽस्मत्प्रत्ययविषयत्वम् – अहमुल्लेखः – अध्यासदृष्टान्ताः पञ्चपादिकायाम् – अध्यासाविद्ययोरैक्यम् – प्रमाणव्यवहारः – प्रमेयापरोक्ष्यम् – वेदान्तशास्त्रप्रामाण्ये शङ्कापरिहाराः – आत्मसाक्षात्कारः – प्रतिपत्तिविधिनिराकरणम् – अनाद्यविद्यानिवृत्तिः कथम् ? – कार्यकारणप्रक्रिया–अवस्थात्रयप्रक्रिया – ज्ञानसाधनविचारः – उपसंहारः ॥ (खं. १३१–१५५) २७७–३३६

९. भास्करप्रस्थानपरीक्षा

भास्करमतस्थानं वेदान्तविचारेतिहासे–भास्करसंप्रदायः–भास्कराभिमतवृत्तिकारवाक्यकारौ–भास्कराभिमतः सूत्रार्थविभागः–अविद्यागता चिन्ता–प्रत्यक्षादि-

पत्रपार्श्वानि

प्रामाण्यं शास्त्रप्रामाण्यं च – शास्त्रतर्कयोः संबन्धः – भास्करमते कार्यकारणवादस्य प्रामुख्यम् – कार्यकारणप्रक्रिया – कार्यमिथ्यात्वनिरासः – आत्मपरिणामवादः – मायावादनिरासः – सत्कार्यवादः – जीवपरमेश्वरसंबन्धः – जीवस्य व्यवहारः – पञ्चकोशविवेकप्रक्रिया – अवस्थात्रयविवेकप्रक्रिया – मुक्तिसाधनविचारः – ज्ञानकर्मणोः फलम् – श्रवणाद्यावृत्तिः – ज्ञानयोगयोः संबन्धः – मुक्तिनिरूपणम् – भास्करप्रस्थानपरीक्षोपसंहारः ॥ (खं. १५६–१७८) ३३७–३९३

१०. भामतीप्रस्थानपरीक्षा

भाष्यव्याख्यातृपद्मपादसुरेश्वरवाचस्पतिसंबन्धः – वाचस्पतिमिश्रकृता ग्रन्थाः – भामतीप्रस्थानस्य स्थानं वेदान्ते–भामतीप्रस्थाने अविद्याद्वयम्–अध्यासलक्षणम् अर्थाध्यासविचारः – अध्यासलक्षणस्य लक्ष्येषु समन्वयः–अध्यासानादिता – अविद्याश्रयः – अविद्यानानात्वम् – अविद्यायाः कारणम् – प्रमाणप्रमेयव्यवहारस्याविद्यकत्वम् – शास्त्रप्रामाण्यम् – शास्त्रतर्कसंबन्धः – शास्त्रतात्पर्यम् – कार्यकारणप्रक्रिया – अव्यक्तम् – जीवत्वाध्यासः – ब्रह्मजीवसंबन्धः – भेदाभेदवादनिरासः – पञ्चकोशविवेकः – अवस्थात्रयविवेके स्वप्नविचारः – अवस्थात्रयविवेके सुषुप्तिविचारः – मोक्षस्य स्वरूपावस्थानलक्षणत्वान्नित्यत्वम् – जीवन्मुक्तिः – मोक्षसाधनविचारः – श्रवणमननिदिध्यासनानि – प्रतिपत्तिविधिनिरासः, साक्षात्कारवादश्च – वाक्यश्रवणमात्रान्न साक्षात्कार इति प्रस्थानम् – उपसंहारः ॥ (खं. १७९–२०६) ३९४–४६३

११. इष्टसिद्धिप्रक्रियापरीक्षा

मूलाविद्यावादोज्जीवनपूर्वकं भामतीप्रस्थाननिराकरणम् – इष्टसिद्धिकर्तृविमुक्तात्मसंस्तवः – अनिर्वचनीयाविद्यासिद्धिप्राधान्यं ग्रन्थस्य – ग्रन्थविषयविभागः – ग्रन्थार्थसंग्राहकः श्लोकः – तर्कस्य प्राधान्यम् – दृष्टदृश्यभेदनिरासः – ग्रन्थकारस्य तर्कसरणिः–जगतोऽनिर्वाच्यत्वान्नाद्वैतहानिः–जगतोऽनिर्वचनीयाविद्यामायाकार्यत्वे प्रमाणम् – ब्रह्ममायाजगतां संबन्धः – कार्यकारणप्रक्रियाप्रातिभासिकार्थस्य कारणमज्ञानम् – भ्रान्तिसंशयज्ञानाभावादिविलक्षणत्वमज्ञानस्य – ख्यातिबाधविचारः– शुक्त्यज्ञानसत्त्वम् शुक्तिविषयकाज्ञानमपि नास्त्येव वस्तुतः – प्रमाणव्यवहारः कथम् ? – अज्ञाननिवृत्तिः– अनिर्वचनीयाज्ञाननिवृत्तिः किंलक्षणा ? – ब्रह्मज्ञानं कर्मणैव निवर्त्यत इति प्रक्रिया – ब्रह्मज्ञानस्य तदज्ञाननिवृत्तिद्वारा साक्षात्कारहेतुत्वम् –अपरोक्षज्ञानिनोऽप्यविद्यालेशः – मण्डनादिप्रक्रियाखण्डनम् – शब्दब्रह्माद्वैतनिरासः – भावाद्वैतवादस्वीकारः – परमतोत्थापिताक्षेपपरिहारः – उपसंहारः ॥

(खं. २०७–२३४) ४६४–५३५

१२. विवरणप्रस्थानपरीक्षा

ग्रन्थसंबन्धः - मिथ्याज्ञानोपादानकोऽध्यासः - अविद्यास्वरूपसिद्धिः - आत्मन्यनात्माध्यासस्य कारणत्रितयजन्यत्वोपपत्तिः - अविद्याश्रयविषयौ-जीवब्रह्मविभागः - अहङ्काराध्यासः - जीवस्य ब्रह्मप्रतिबिम्बत्वम् - अवच्छेदवादनिराकरणम् - सुषुप्तेऽविद्या - जीवब्रह्मविभागस्य नाविद्योपादानकत्वम् - प्रमात्रादिव्यवस्थोपपादनम्- अध्याससिद्धिः-अध्यासदृष्टान्तभूतशुक्तिरजतादिविषये कल्पना - ख्यातिबाधविचारः - अविद्यामाययोरैक्यम् - अविद्यानिवृत्तिः-अविद्यासंस्कारवादः - शास्त्रकारणत्वं ब्रह्मणः - भूतवस्तुत्वेऽपि ब्रह्मणः शास्त्रप्रमाणकत्वम् - विचारस्तर्कश्च - अपरोक्षज्ञानं तत्साधनानि च - श्रवणादिविचारः - कर्मणां ज्ञानहेतुत्वम् - ब्रह्मणो जगत्कारणत्वम् - उपसंहारः ॥ (खं. २३५-२६०) ५३६-५९८

१३. न्यायमकरन्दप्रस्थानपरीक्षा

न्यायमकरन्दः - न्यायमकरन्दग्रन्थविभागक्रमः - भेदनिराकरणम् - अनिर्वचनीयार्थावभासलक्षणा भ्रान्तिः- अनाद्यनिर्वचनीयाविद्या-प्रपञ्चमिथ्यात्वम्, आत्मनः स्वप्रकाशत्वं च - प्रत्यक्षादिप्रमाणानां व्यावहारिकं प्रामाण्यम्, आगमस्य तु तत्त्ववेदकत्वेन - सिद्धे सङ्गतिग्रहसत्त्वाद् वेदान्तानां ब्रह्मणि प्रामाण्यम् - वेदान्तानामखण्डार्थता - मोक्षस्वरूपनिर्णयः - अविद्याश्रयस्य मोक्षसाधनविचारः - अविद्यानिवृत्तिः - उपसंहारः ॥ (खं. २६१-२७४) ५९९-६१८

१४. खण्डनप्रस्थानपरीक्षा

प्रक्रियासंबन्धः - श्रीहर्षसंस्तवः - ग्रन्थविषयविभागः - कथकाभ्यां प्रमाणादिसत्ता प्रथममेवाङ्गीकार्येति नियमो नास्ति - शून्यवादिनोऽपि कथायां प्रवेशाधिकारः - स्वप्रकाशविज्ञानवादः - अनिर्वचनीयत्वं प्रपञ्चस्य - अद्वैते किं प्रमाणम् ? - उपसंहारः ॥ (खं. २७५-२८३) ६१९-६३५

१५. चित्सुखाचार्यप्रस्थानपरीक्षा

खण्डनग्रन्थतो प्रदीपिकाया वैलक्षण्यम् - चित्सुखाचार्यनिर्मिता ग्रन्थाः - विषयविभागक्रमः - विषयप्रतिपादनरीतिः - चित्सुखाचार्याभ्युपगतानि कतिचिल्लक्षणानि प्रमाणानि च - वेदान्तेतिहासे चित्सुखाचार्यस्थानम् ॥ (खं. २८४-२८९) ६३६-६४३

पत्रपार्श्वानि

१६. सर्वज्ञात्मप्रक्रियापरीक्षा

कोऽयं सर्वज्ञात्मा नाम ?– ग्रन्थमहत्त्वम्– अविद्यैवाध्यासहेतुः– शास्त्रस्य प्रकरणस्य चानुबन्धः – महावाक्यविचारः – शास्त्रयोनित्वं ब्रह्मणः–समन्वयाध्यायार्थ-संग्रहः – जगत्कारणत्वं ब्रह्मणः – अवस्थात्रयपरीक्षा – चिन्मात्रस्यैवा-ज्ञानाश्रयविषयत्वम् – बद्धमुक्तादिव्यवस्था - ज्ञानसाधनानुष्ठानाज्ज्ञानोत्पत्तिः, मुक्तिश्च – जीवन्मुक्तिः – सर्वज्ञात्ममुनेः स्थानं वेदान्तेतिहासे ॥

(खं २९०–३०३) ६४४–६६३

१७. प्रथमसंपुटोपसंहारः ६६४

सङ्केताक्षरविवरणम्

अत्र उपनिषदः प्रायेण तत्तन्नामाद्याक्षरेण सङ्केतिताः । तद्भाष्यं च भा॰ इति । तद्यथा तै॰ = तैत्तिरीयोपनिषत्; तै॰ भा॰ = तैत्तिरीयोपनिषद्भाष्यम् । अतः स्फुटत्वात् उपनिषन्नामसङ्केतोऽत्र न विवृतः ॥

सङ्केतः	विवरणम्
अध्या॰ भा॰	अध्यासभाष्ये
अव॰	अवतरणिकायाम्
आ॰ गि॰ वा॰ अथवा वा॰ आ॰ गि॰	बृहदारण्यकभाष्यवार्तिकोपरि आनन्दगिरिकृतटीकायाम्
इ॰सि॰	इष्टसिद्धौ
उप॰ गद्य॰	उपदेशसाहस्र्यां गद्यभागे
उ॰ सा॰ अथवा उप॰ सा॰	उपदेशसाहस्र्याम्
क॰ प॰	कल्पतरुपरिमळे
कौ॰	कौषीतकिब्राह्मणोपनिषदि
खं॰	खण्डे
खं॰ खा॰	श्रीहर्षकृत खण्डनखण्डखाद्ये
गी॰	भगवद्गीतासु
गी॰ भा॰	भगवद्गीताभाष्ये
गौ॰ का॰	गौडपादीयकारिकासु
गौ॰ का॰ भा॰	गौडपादीयकारिकाभाष्ये
चि॰	चित्सुखाचार्यकृत तत्त्वप्रदीपिकायाम्
तै॰ वा॰	तैत्तिरीयोपनिषद्वार्तिके
तै॰ सं॰	तैत्तिरीयसंहितायाम्
न्या॰ म॰	न्यायमकरन्दे
न्या॰ सू॰	न्यायसूत्रे
नै॰ सि॰	नैष्कर्म्यसिद्धौ
पं॰ अथवा पं॰ पा॰	पञ्चपादिकायाम्

पं. वि. अथवा वि.	पञ्चपादिकाविवरणे
पा. अथवा पृ.	पत्रपार्श्वे, पत्रपृष्ठे
प्रा.	प्राचीनं प्रस्थानम्
बृ. वा. अथवा वा.	बृहदारण्यकोपनिषद्वार्तिके
ब्र. सि.	ब्रह्मसिद्धौ
भा. सू.	भास्कराचार्यकृत सूत्रभाष्ये
मं.	मण्डनमिश्रमते
मां. का. अथवा गौ. का.	गौडपादीयमाण्डूक्यकारिकासु
मां. भा.	माण्डूक्योपनिषद्भाष्यम्
मो. ध.	मोक्षधर्मपर्वणि महाभारते
वा. भा.	वाचस्पतिमिश्रकृत भामत्याम्
वे. सू.	वेदान्तसूत्रे
स.	सर्वज्ञात्ममुनिकृत सङ्क्षेपशारीरके

वाचकेषु विज्ञप्तिः

लेखकस्य मतिदोषात्, नयनदोषाच्च, तथा सीसकाक्षरसंयोजकस्य प्रमादाच्च नैके अशुद्धपाठाः सञ्जाताः। प्रूफ् शोधकदोषादपि केचिदवशिष्टाः। ते च एतत्पत्रापरपार्श्वत आरभ्य संस्कृताः। यदि क्षमावन्तः पाठकाः प्रथममेव तान् समीकृत्य पठ्येरन् तर्हि सर्वं निर्मलं भवेदिति शम्॥

ग्रन्थपाठसंस्करणम्

विशेषः—सङ्ख्ययोः प्रथमा पत्रपार्श्वम्, द्वितीया च पंक्तिं सूचयति। 'अ.' इति अधरोत्तरं परिगणितायाः पंक्तेः सङ्केतः। दृष्टिमात्रेण अशुद्धत्वेन सूह्या दोषा उपेक्षिताः। सर्वत्र शुद्धपाठा एव प्रदर्शिताः। संयोजनीयं पदं वाक्यं वा कृष्णतराक्षरैरङ्कितम् –

३–अ. ६ 'न कश्चन' इत्यतः प्राक् **मध्ये**; ४–अ. १ समुद्धृतम्; १२–१२ 'कथञ्चित्' इत्येतदनन्तरं '**परस्परम्**'; १३–अ. २ '**विवेक**'चूडामणी; १७–१ आचार्यकृतानुवादात्; २१–१३ 'तु' इत्यस्य स्थाने '**षष्ठे च**'; ३५–अ. ७ (उ)पादेय; ४३–१० प्रमेयादिव्यवहारः।; ४४– अ. ५ (इ)तरेतराध्यास; ४५–अ. ९ फल-मनुभवापरनामधेयम्; ४८–५ उत्पत्तिः; ५०–अ. ६ प्रकाशक इत्यतः प्राक् **तत्तद्विषय**; ५१–अ. ६ विशेषणद्वया; ५७–१२ धारादि; ५८–८ खण्डशीर्षिका '**उक्तवादयोः श्रौतत्वोपपत्तिः**'; ५९–अ. ५ **माने**; ६१–४ 'सर्वप्रमेयविशेषा' इत्यस्य स्थाने **द्रव्यादित्रिका**; ६१–१२ विशेषेष्वनु; ६२–अ. ५ 'रसयते' इत्यनन्तरं **तदितर**; ६७–३ तिस्रोऽवस्था; ७२–३ निवर्तयन्; ७७–अ. १३ बीज; ७८–४ वानात्म; ८१–१२ कंसान्तर्गतवाक्यस्य प्रथमवाक्यस्य स्थाने पठनीयम् – **अध्यासस्य कालाधारत्व-मुररीकृत्य अनादित्वम् अनन्तत्वं च नोच्यते, किं तु अनुभववेद्यस्यास्य आद्यन्तवत्त्वं चिन्तयितुमपि न शक्यते। कालस्यापि प्रमातृज्ञानविषयस्य सहैव प्रमातृत्वेनाध्यस्त-त्वादेव इति**; ८३–अ. ५ 'वास्तविकौ' इत्यस्य स्थाने '**वस्तुवृत्तेन**'; ८९–अ. १२ 'खण्डे' इत्यस्य स्थाने '**काण्डे**'; ९१–अ. १३ एकस्मिन्नेव; ९३–४ सामान्य-मप्युपासनानाम्; ९३–५ ज्ञानं प्रत्यन्तरङ्गत्वम्; ९४–अ. ९ क्रियारूपा; ९८–अ. ९ समुच्चयविकल्पगतचिन्ता; १०३–अ. १४ कर्ता; १०३–अ. ११ निग्रह इति; १०९–अ. १० विज्ञानं **यत्कालम्**; ११०–८ औपचारिक्येव; ११८–८ साधनत्वं; १२०–७ त्वोपपत्तिः; १२४–अ. १२ नियमात् तन्निवर्तकत्वानुपपत्तेः; १२५–१२ प्रकृतम् **इति चोक्तम्**; १२७–९ 'ज्ञानम्' इत्यधिकं परित्यक्तव्यम्; १३२–अन्तिम-पंक्तौ 'शास्त्रार्थानवधारण'; १४३–अन्त्यपंक्तौ 'नैकलभ्य' १५; १५२–५ ग्रहीता; १५२–१० तद्यदा (?); १६२–४ ब्रह्मणः; १६२–अन्त्यपंक्तौ 'परमात्मभावः'; १६३–२ गमितं; १६९–१० प्रकल्पय; १६९–११ सिद्धैव; १७०–१२ ज्ञानकर्म; १७७–८ वचनमात्मैक; १८८–अ. ३ तस्या; १९१–१० ख्याति-रनिच्छता; १९१–अ. ४ वर्जितात्म; १९३–१४ **ज्ञानजनकत्वे**; १९५–अ. २ व्यावहारिकत्व; १९६–१६ नित्यापरोक्ष्यात्; १९७–अ. १३ रूपमासादयति;

१९८-१० वाक्यात्; २०८-अ. २ सत्यन्यतर; २१५-अ. २ 'महीयसः', 'बहिष्कृताम्'; २१६-अ. २ सिद्धिम्; २२२-अ. ११ इतरेतराध्यासे इति; २२६-३ गम्यते; २२६-७ सिद्धमेव शुक्तिकाद्यम्; २२६-अ. ४ तु प्रमाणानि स्वस्वविषयकप्रमां; २२७-अ. १४ अत्र टिप्पणं संयोज्यमधस्तात्:

अयं च वार्तिकश्लोको यथामुद्रित इहोदाहृतः। टीकाकारस्य चात्र व्याख्यानम् 'प्रत्यक्षादीनि यस्मिन् आत्मनि प्रमामनुत्पाद्य शब्दादिकं विषयं प्रमापयितुं न प्रभवन्ति तस्मिन् वेदान्तवचो न कथञ्चिदपि प्रमानम्' इति। अस्माकं तु प्रतिभाति अत्र 'येनाप्रमीयमाणानि' इति पाठः स्वीकर्तव्यः। सुगमान्वयात्, अर्थविशेषोपपत्तेश्च। येन चिदात्मना प्रतिभासितान्येव प्रमाणानि स्वस्वविषयं प्रतिभासयन्ति, न त्वन्यथा, तस्मिन् स्वयंसिद्धेऽप्यज्ञानमात्रव्यवहिते वचनं कथमप्रमाणं भवेत्। तद् हि अज्ञानमात्रनिरासद्वारा आत्मनि प्रमाणम् – इत्यभिप्रायः। 'कथं तत्राप्रमावचः' इति वा समस्तपाठः। अस्मिंस्तु पक्षे अनुभवरूपे प्रमाणानामपि प्रतिभासके अप्रमावचः कथम्? स हि स्वयं प्रमास्वरूप इत्यर्थः॥

२३६-अन्तपंक्तौ 'तस्मिन्नप्यविद्या', 'इत्यवधेयम्' इत्यस्य स्थाने **इत्यभिप्रायकम्**; २४०-१० पूर्वमुपलब्धो; २४२-१ व्यापार्यैव; २४८-८ मिथ्यावभासः, तेनैव.... विषयभूतेन; २४८-१२ द्रष्टा; २५०-२ अनुभूतः; २५४-अ. ७ देशकालादिकं प्रत्यपि; २६१-३ उपादीयमानः, अ. ४ 'आत्मा'; २७७-१ प्रस्थानं यावदधिगतं; २७७-८ परिमित एव, अ. ३ निर्मितिस्तितः; २८१-अ. ४ 'स्फुटम्' इत्यस्यानन्तरम् "**अथवा 'जीवे अविद्या कल्प्यते' इत्युक्त्या मण्डनानुसार्येव मतमिदमित्यपि शक्यं वदितुम्। तत्र वाक्यार्थकोविदा एव प्रमाणम्॥**", अ. ४ ब्रह्मसिद्धिकारमताद्; २८४-५ अशक्यत्वात्। **असंप्रयुक्तावभासिनामपि तथैव पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्थस्वमन्तरेणापि स्वात्मलाभोपपत्तेः।**; ३०५-अ. ११ घटादिष्विव; ३०९-४ ग्राह्यन्तीति; ३१२-अ. ५ भाष्यं तु अविवेकेनाध्यासोऽविद्या; ३२१-अ. १२ **ब्रह्मणः** सर्वज्ञत्वादि; ३२६-अ. १३ समर्थनव्याजेन, अ. ११ वृत्तिकाराणां **मतम्**; ३४६-१२ वदविद्या इत्यस्यानन्तरम् (प्रमातृगता अविद्या?); ३५०-अ. ४ इमे 'तत्र तत्र'; ३५१-१ कारणवादस्य; ३५४-अ. १२ सतत्यच्छन्द; ३९९-९ प्रामुख्यम्; ४०५-९ स्थापकस्य **तत्प्रत्युपस्थापितदेहजीवत्वादीनां च**; ४०७-अ. ६ 'सिद्धेः' इत्यस्यानन्तरं '**अविद्यात्वमात्रेण चैतन्योपचारः, अव्यक्तमिति, अव्याकृतमिति चेति॥**'; ४१२-१ परिहारं; ४१७-२ गृहीततर्क; ४३४-७ मयट् प्रत्ययस्यापि **आनन्दमीमांसाश्रुतिमालम्ब्य प्राचुर्यार्थकस्वोपपादनेन**; ४३५-५ तेषु **प्रत्येकम्**; ४४१-अ.५ भाष्यस्य; ४४९-१ ब्रह्मभावानुभवाय; ४४९-२ **साक्षात्कारार्थं तज्ज्ञानाभ्यास इव प्रकृतशास्त्रार्थज्ञानाभ्यासोऽपेक्ष्यते** इति वर्णनम्; ४६४-अ.७ निबन्धार....तथोल्लिखित; ५०३-११ आत्माविद्ययैव; ५८४-अ. १३ श्रुतिजन्ये; ६५७-८ तिसृणामपि.

खण्डसङ्ख्याङ्कनसंस्करणम्

३९९ तम पत्रपार्श्वादारभ्य निरीक्षकप्रमादात् खण्डक्रमसंख्याः अशुद्धा जाताः। १८२ इत्यस्य स्थाने पठितव्यं १८३ इति। तदनु ४१४ तम पत्रपार्श्वपर्यन्तं एकाधिका करणीया। ४१५ तम पत्रपार्श्वे १८९ इत्यस्य स्थाने पठितव्यम् १९२ इति। तदनु आपरिसमाप्ति शोधितव्यम्। तथा च अन्त्या सङ्ख्या ३०५ इति संपद्यते॥

॥ ॐ ॥

वेदान्तप्रक्रियाप्रत्यभिज्ञा

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशर्षिभ्यो
नमो महद्भ्यो नमो गुरुभ्यः ॥

१. वेदान्तप्रक्रियानिर्धारणावश्यकता

सांप्रदायिकवेदान्तप्रक्रिया ब्रह्माद्यविच्छिन्नगुरुपरम्परागता –

१. सुप्रसिद्धमिदं वैदिकानां यद् वेदान्तप्रक्रिया नाम वेदान्तेषु ब्रह्मविद्योपदेशार्थम् आद्रियमाणः प्रकारविशेषः । ब्रह्मविद्या च कल्पादौ परमेश्वरानुगृहीतवेदस्य हिरण्यगर्भब्रह्मणो बुद्धौ स्फुरति । ततश्च ब्रह्मण आरभ्य आचार्यपरम्परया सन्तता इदानीन्तनाचार्यानपि प्राप्तासौ प्रक्रिया यदनुभावेन सद्गुरूपदिष्टवेदान्तविज्ञानसुनिश्चितार्थाः कृतार्था भवन्त्यद्यतना मुमुक्षवः । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाꣳश्च प्रहिणोति तस्मै । तꣳ ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥' (श्वे. ६–१८) इति श्रुतेरिति ॥

प्रस्थानत्रये सुप्रख्यापिता प्रक्रिया विविधभाष्यकारैराकुलीकृता –

२. सैषा वेदान्तप्रक्रिया भगवद्गीतादिभिरप्युपबृंहिता प्रवृत्ति-निवृत्तिधर्मतत्संबन्धतदधिकारिविवेचनपूर्वकम्, अधिकारिणि प्रमितिजनको

वेद इत्याशयेन । भगवता बादरायणाचार्येणापि न्यायैरुपष्टम्भिता प्रक्रिया वेदान्तवाक्यमीमांसात्मकशास्त्रं प्रणयता । अथ च दीर्घेण कालेन क्वचित् क्वचित् उच्छिन्नप्राये संप्रदायाध्वनि, प्रक्रियामेनां स्वान्तःकरणदोषाद् यथावन्निश्चितुमशक्नुवानैः शास्त्रान्तरप्रक्रियावासनादूषितान्तःकरणैः कैश्चित् स्वमतिकौशलादन्यथान्यथाध्यवसितवेदान्तार्थैः प्रस्थानान्तराण्येव सांप्रदायिकत्वेन स्वशिष्येभ्य उपदिष्टानि तत्र तत्र प्रचेरुः । अथैवं वाक्ययुक्तितदाभाससमाश्रयैर्विविधैर्वेदान्तप्रास्थानिकैराकुलीकृते वेदान्तार्थे, लोकानुग्रहैकरसिकैः श्रीगौडपादाचार्यैर्माण्डूक्योपनिषदर्थव्याख्यानव्याजेन कारिका उपनिबध्य सांप्रदायिकी प्रक्रिया पुनरपि विवेकतः प्रदर्शिता । श्रीशङ्करभगवत्पादैश्च तत्प्रशिष्यैः प्रस्थानत्रयस्यापि भाष्यमातन्वानैः सुस्फुटीकृता, सकलेतरप्रक्रियाभासपङ्कप्रमार्जनपूर्वकम् ; अविचार्य याङ्काश्चित् प्रक्रियामभ्यालिङ्गमानो निःश्रेयसात् प्रतिहन्येत, अनर्थं चेयात् इति ॥

नवीनप्रस्थानान्तरोदयादपि परमार्थप्रक्रियाभिज्ञानं कष्टसाध्यं जातम् –

३. अथैवं स्थिते, भगवत्पादीयभाष्याण्यपि गच्छता कालेन जिज्ञासूनां बुद्धिदौर्बल्याद् दुरवधारणानि बभूवुः । तदर्थाविष्करणाय भगवत्पादानां साक्षाच्छिष्यैः सुरेश्वराचार्यैः प्रणीता अपि ग्रन्थाः, ग्रन्थग्रन्थ्यादिकारणान्न पारयाम्बभूवुः प्रक्रियान्तरवासितान्तःकरणानामुन्मार्गप्रवृत्तिनिवारणे । मतान्तरसङ्कररविधूननासमर्थैः कैश्चिद् व्याख्यानान्यपि प्रणीतानि, यैर्भिन्नभिन्नप्रक्रियावष्टम्भैर्विशुद्धा वेदान्तप्रक्रिया अधिकमधिकमाकुलीकृता । असद्दौर्भाग्याद् द्वैतिवेदान्तिनोऽपि केचिदुत्तिष्ठन्ते स्म निसर्गत एवाद्वैतद्वेषिणो ये न्यभान्सुर्नवीनान्येव भाष्याणि, प्रचलितव्याख्यानप्रस्थानप्रक्रियामेव याङ्काश्चिद् भाष्यकारीयत्वेनानूद्य खण्डयन्तः । प्रचलन्ति चास्मदीयैरेव कैश्चिद् विरचितानि शतशः प्रकरणानि, आत्मनो भगवत्पादविरचितत्वमुद्घोषयन्ति । तदेवं प्रावादुककलहकोलाहलेन

व्याकुलचित्तानां कर्णकुहरं प्रविशन्तोऽपि भाष्यकारीयोपदेशा वेदान्तप्रक्रियां याथातथ्येन प्रत्यभिज्ञापयितुमशक्ताः सञ्जाता इत्यहो कलेर्वैभवम् !

अद्यतनजिज्ञासुजनशङ्का –

४. अत्र भवति बहुधा विप्रतिपन्नवादिविचालितचित्तस्य जिज्ञासुजनस्य शङ्का–अथैवंविधे व्यतिकरे कथङ्कारं वयं प्रत्यभिजानीयाम विशुद्धां वेदान्तप्रक्रियां विविच्य तद्दितरप्रक्रियाभासेभ्यः ? औपनिषद-पक्षावलम्बित्वेनात्मानं प्रख्यापयद्भिरेव हि चिरन्तनाधुनातनैर्बहुभिर्भाष्य-प्रणेतृभिरन्यथान्यथा प्रस्थानानि प्रत्युपस्थापितानि परस्परप्रक्रियादूषण-मुद्भावयद्भिः । शाङ्करभाष्यव्याख्यातॄणामपि विप्रतिपत्तिरेव दरीदृश्यते प्रक्रियारचने । उपव्याख्यानग्रन्थप्रणेतारश्च तथैव बहून् प्रक्रियाविधाभेदा-नुपाश्रिताः । यद्यपि सर्वसंप्रतिपन्नप्रामाण्यानामद्यापि सर्वेरप्यधिकारिभिः सममेवाधीयमानानां वेदान्तानाम् उपक्रमोपसंहारादिषड्विधलिङ्गैरध्यवसिते तात्पर्ये यैव प्रक्रिया तदध्यवसायानुगुणा भवति, सैवादर्तव्या नान्येति व्यवस्था सुस्था भविष्यतीति वेदान्तसमयः, तथापि उपक्रमादिलिङ्गैरेव स्मृतीतिहासपुराणाद्युपबृंहितानां वेदान्तानां तात्पर्यमध्यवसितं स्वस्वप्रक्रियानु-गुणं मन्यन्ते सर्वे भाष्यकारा, व्याख्यानप्रस्थानीयास्तदनुयायिनश्चान्ये इति सार्वजनीनमेतत्, सर्वे च ते स्वस्वप्रक्रियाविधाभेदेऽभिनिविशमानाः परप्रक्रियाखण्डनव्यसनिनश्चेति च । किञ्च, यथैवाद्यतनभाष्यतद्व्याख्यान-कर्तॄणां बहुत्र कथासु जल्पवितण्डान्यतराश्रयेण विवदमानानाम् अनल्प-संख्याकग्रन्थरचनव्यसनेनाप्यतुष्यतां न कश्चन सर्वप्रक्रियाविदामुत्तम इति सर्वैर्वेदान्तवादिभिरेककण्ठ्येन परिगृहीतो दृश्यते, तथैवातीतानामपीति किमीयां प्रक्रियां किंकारणं निर्दुष्टां प्रतिपद्येमहि ? न च प्राचीना बहवो वृत्तिकारा इदानीमेकत्र समाहर्तुं शक्यन्तेऽधुनातनवेदान्तिभिः सह, नापि तेषां वृत्तयः समुपलभ्यन्ते समग्रतः, येन सर्वाण्यपि प्रस्थानानि तुलनात्मकदृष्ट्या संविमृश्य इदमेव निर्दुष्टम् – इत्यवधारयेम तेष्वन्य-

तमम्। उपलभ्यमानेष्वपि नानाप्रक्रियापक्षपातिषु भाष्यव्याख्यानप्रकरण-लक्षणेष्वसंख्याकेषु ग्रन्थेषु वेदान्तार्थाविष्करणायैव विनिर्मितेषु कतमं किञ्जातीयकगुणविशेषेण प्रबलप्रमाणतया स्वीकृत्य तद्विरुद्धा इतीतरान् ग्रन्थान् दूरीकुर्याम ? तदेवं दुःशकैव विशुद्धवेदान्तप्रक्रियाभिज्ञेति नः प्रतिभातीति ॥

विविधप्रक्रियारचनमधिकारतारतम्यनिमित्तम्–इति समाधानमेकीयानाम् –

५. अत्र वदन्ति केचित्। नेयं शङ्का युक्ता। यत्कारणं श्रुतिस्मृतिपुराणानाम् एकवाक्यतामापाद्य श्रीशङ्करभगवत्पादैः प्रस्थानत्रय-भाष्यविरचनेनाद्वैत एव वेदान्तानां तात्पर्यं प्रदर्शयद्भिः सकलद्वैतमत-निरासात्, इदानीं नवीनत्वेन प्रणीतानां द्वैतिवेदान्तिभाष्याणां तु भगवत्पादीयाशयाध्यवसानासामर्थ्यनिबन्धनत्वात्, तत्प्रक्रियापरीक्षणमनावश्यकमेव तावत् सूक्ष्ममतीनां जिज्ञासूनां प्रामाणिकभाष्ये श्रद्दधानानाम्। मन्दमध्यमधियां त्वधिकारिणामुपकारार्थं सन्त्येव व्याख्यानानि भाष्यकारान्तरोहितदूषणनिराकरणपूर्वकम् अद्वैतदर्शनस्यानुत्तरश्रेयःसाधनतां दर्शयन्ति। तथा प्रकरणानि च भगवत्पादैस्तदनुयायिभिश्च समनुगृहीतानि नैकानि जाग्रति वेदान्तार्थं विशदयन्ति, सुकुमारमतीनामपि यथा निष्कण्टकः स्यात् वेदान्तश्रवणमननपन्थाः। यत्तूच्यते व्याख्यानप्रस्थानेषु बहुधा विप्रतिपत्तिर्दृश्यत इति, तत्रोक्तः परिहारोऽभियुक्तैरेव व्याख्यानप्रस्थान-भेदरहस्यविद्भिः 'अकल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमानेषु पदार्थेषु विरोधो न दोषावहः। यथा तात्त्विकारुन्धतीप्रतिपत्त्युपायतया नानापुरुषैः कल्प्यमानासु तत्प्राच्योदीच्यादिनक्षत्ररूपासु स्थूलारुन्धतीषु विरोधो न दोषावहः'[1] (क. प. ?) इति। एतेन प्रकरणेषु दृश्यमाना अपि

1. सिद्धान्तलेशसंग्रहव्याख्यायां कृष्णालङ्कारव्याख्यायां मूलग्रन्थद्वितीयश्लोक-व्याख्यानावसरे समुद्धृतमिदं वाक्यम् ॥

विप्रतिपत्तयः परिहृताः । सर्वत्रात्मैक्ये तात्पर्यात्, व्यवहारसिद्धविषयेष्वनादराच्च । अत एव परस्परप्रक्रियास्वण्डनमपि न दोषावहं भवति । प्रज्ञावैचित्र्यात् प्रतिपित्सूनां यथार्हं तु तत्तद्बुद्धिभूमिकानुगुणप्रक्रियायामेव स्थिरीकरणेन ब्रह्मात्मैक्यज्ञानमार्गे प्रतिष्ठापयिषयैव प्रवृत्तत्वात् तादृशखण्डनकाराणाम् । न ह्यमुकप्रक्रिययैवैकया आत्मैक्यज्ञानं प्राप्नुयादिति कश्चिन्नियन्तास्तीति । उक्तं च **वार्तिककारैः** 'यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता' (बृ. वा. १–४–४०२) इति । अतोऽसदेतद् यत्प्रक्रियाणाम् अन्यतमैवैका शुद्धा, अन्यास्तु परिहेया इति । तस्मात्, वेदान्तप्रक्रियाप्रत्यभिज्ञान्वेषणप्रयत्नोऽयम् अनन्तविलसत्तारकाविभूषिते गगने नक्षत्रान्वेषणप्रयत्नमनुहरतीति ॥

एकीयसमाधानविमर्शः –

६. वयं त्वत्र प्रतीमो न पर्याप्तमिदं समाधानं जिज्ञासुजनशङ्कापनोदायेति । किं कारणम् ? यतो भाष्यकारेभ्य एव न, परं श्रीगौडपादाचार्येभ्यः प्रागप्यद्वैते बद्धादरा वेदान्तिन आसन्नेव नैके, अन्यान्यप्रक्रियामातिष्ठमानाः । किं बहुना, वेदान्तसूत्रनिर्माणकालेऽप्यद्वैतिषु प्रक्रियाभेदाश्रयणमासीदित्यवगम्यते । यत्कारणं **वाक्यान्वयाधिकरणे** (वे. सू. १–४–१९तम सूत्रम् आरभ्य २२तमपर्यन्तम्) परामृष्टानाम् आश्मरथ्यौडुलोमिकाशकृत्स्नाचार्याणां ब्रह्मात्मैक्यवादिनामेव सताम् ऐक्योपपादनप्रक्रिया भिन्नभिन्ना एवादृता इति तद्गतभाष्यतो विज्ञायते । न च सर्वेऽद्वैते तात्पर्यवन्तस्ते वादिन इति सूत्रभाष्यवार्तिककारा मनःसमाधानमासाद्य तूष्णीं तस्थुः, किं तर्हि ते सर्वेऽपि परप्रणीतप्रक्रियां नायमद्वैतप्रतिष्ठापनमार्ग इति स्वाभिप्रायमुद्घुष्य स्वमतानुगुणश्रुतियुक्त्याद्यानयनेन खण्डयामासुरेव । न हि परस्परविरुद्धतया आभासमानानां श्रुतीनामेव

तावदेकवाक्यतामनापाद्य प्रामाण्यमभ्युपगन्तुं युज्यते, किमु युक्तीनामिति । अन्योन्यविरुद्धप्रस्थानानामेक एव हि सम्यग्मार्गो भवितुमर्हति । वस्तुनि विकल्पासंभवात्, विरुद्धदिक्कानां मार्गाणामेकस्मिन् स्थाने पर्यवसानासंभवात् । यथोक्तं व्यासेन 'पूर्वे समुद्रे यः पन्था न स गच्छति पश्चिमम् । एकः पन्था हि मोक्षस्य तन्मे विस्तरतः शृणु' (मो. ध. २७४–४) इति । न च स्थूलारुन्धतीन्याय इह क्रमते । तत्र हि बह्वीष्वपि तारास्वमुख्यारुन्धतीषु दर्शितासु य अन्या प्रदर्श्यते सा मुख्यैवारुन्धती भवति, तद्विज्ञाने च सत्यन्या अमुख्याः–मुख्यसंदर्शनोपायत्वमात्रेण तु प्राक् प्रदर्शिताः–इति प्रतिपत्त्रा निश्चीयते ; प्राच्योदीच्यादिनक्षत्ररूपास्वप्युक्तक्रमेणामुख्यत्वं नियमेनावसीयत इति न विरोधः । न च प्राच्यत्वादिरूपेण भिन्नत्वेऽपि भिन्नभिन्नपुरुषदर्शिततारणाम्, मुख्यसूक्ष्मारुन्धतीदर्शनोपायत्वे काचिद् विमतिरस्ति तद्दर्शकानाम् । इह पुनः प्रक्रियान्तरमास्थितैः प्रक्रियान्तरस्यातथात्वमेवाग्रहपूर्वकमुद्घोष्यत इति वैषम्यम् । न चाधिकारिभेदेन भाष्यव्याख्यानप्रस्थानयोरविरोधः शक्यसंपादनः । विरुद्धप्रतिपत्तीनां तुल्यवच्छ्रेयस्कारणतानुपपत्तेः । 'यया यया भवेत्पुंसां व्युत्पत्तिः' इत्यादिवार्तिकवचनं त्वनुदाहरणम् । तस्य वेदान्तप्रक्रियानिर्धारणार्थमप्रवृत्तत्वात् । सृष्टिप्रक्रियाविषयं हि तदिति प्रकरणात् अवगम्यते । 'उद्भूतिस्थितिहानीनां न क्वचित्संभवो यथा । मुख्यां वृत्तिं समाश्रित्य तथोदर्केऽपि वक्ष्यते ॥' (बृ. वा. १–४–४०३) इति समनन्तरोत्तरश्लोकाच्चैवमवगम्यते । न चात्र वादिभिः प्रक्रियाणां सर्वासामद्वैते तात्पर्यात्र विरोधोऽस्तीत्यभ्युपगम्यते ; प्रत्युत स्वेतरप्रक्रियादोषोद्घाटने परमोत्साह एव प्रदर्श्यत इत्यलमतिप्रपञ्चेन । एवं भाष्यप्रकरणयोरपि स्फुटो विरोधः । अतो यावदेतासां कयाचित् प्रणाड्या न संदर्श्यत एकवाक्यता, तावद्दूरत एव प्रत्याशा निर्दुष्टवेदान्तप्रक्रियासिद्धाविति स्थितम् ॥

प्रकारान्तरेण प्रस्थानाविरोधप्रदर्शनम् एकदेशिभिः –

७. अत्रापरे प्रकारान्तरेण भाष्यव्याख्यानप्रस्थानयोरविरोधं स्थापयितुमीहन्ते। कथम्? इहाविरोधो तन्त्रान्तरवत् भविष्यति। यथा व्याकरणे तन्त्रे 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति परिभाषा स्वीक्रियते, तद्वदिहापि भाष्ये सामान्यरूपेण स्थितस्यैव – यद्वा भाष्योक्तविचाराणां परस्परव्याहतत्वाभासपरिहारायापेक्षितस्यैव – विशेषस्य व्याख्यानग्रन्थतो प्रतिपत्तिरिति भविष्यति। तथा हि भाष्ये क्वचिदप्यनुक्ताः, अथ च वेदान्तसिद्धान्तज्ञानस्य कार्त्स्न्यार्थमपेक्षिता नैकेऽभिप्रायाः प्रसङ्गतः प्रपञ्चिता दृश्यन्ते व्याख्यानेषु– इति सोदाहरणं व्याख्यानप्रस्थानप्रामाण्यरक्षणाय प्रयतन्त इमे वावदूकाः। अन्ये तु वदन्ति– 'यथोत्तरं मुनीनां प्रामाण्यम्' इत्यप्यस्ति केषाञ्चिद् वैयाकरणानामभ्युपगमः। यत्र किल वार्तिककारेण सूत्रविषये काचिद्विप्रतिपत्तिः प्रदर्श्यते उपसंख्यानादिकं वा, तदा तस्यैव वचनं ग्राह्यं न सूत्रकारस्य। यत्र च वार्तिककारवचनानि खण्डयित्वा भाष्यकारेण कश्चित् प्रयोगः समर्थ्यते, तत्र तदीयमतमेवानुसृत्य प्रयोगसाधुत्वमनुसंधेयमिति तेषामाशयः। तथैव किलेह भाष्यतद्व्याख्यानयोर्विरोधे प्रतीयमाने सुरेश्वरपद्मपादयोरेव मतं स्वीकार्यम्। तेनैव च द्वैत्याक्षेपनिराकरणं पूर्णं भविष्यति भाष्यकारीयश्च सिद्धान्तः परिपोषित इति स्यादेषामाशयः। अपरे चाहुः। पद्मपादसुरेश्वरौ भगवत्पादानामेव साक्षाच्छिष्यौ इत्यस्ति सांप्रदायिकी प्रथा। तत् कथमेतौ व्याख्यातारौ भाष्यविरोधेनैव स्वयं प्रस्थानान्तरावलम्बनधार्ष्ट्यं स्वीकुर्याताम्? नूनं भाष्यप्रणयनानन्तरं प्रतिवादिकृताक्षेपाणां निरपवादपरिहारार्थं स्वगुरुभ्य एव तदीयाशयम् अवगत्य तौ विशदीचक्रतुर्यथा दूषणग्रासो न भवेदिति श्लिष्यत इति। सर्वथापि तु व्याख्यानप्रस्थानानामपि सर्वत्र लब्धप्रचाराणां प्रामाण्यमङ्गीकृत्यैव भाष्यकाराभिमतप्रक्रिया-

रक्षणे यत्नः करणीयः, न तु महाप्रभावाणां व्याख्यानग्रन्थनिबन्द्धूणां विरोधोद्भावनं कर्तुं युक्तमिति ॥

उक्तसमाधानविमर्शः –

८. इदमपि न साधु समाधानम् इत्यसन्मतिः । कस्मात् ? न तावत् तन्त्रान्तराभ्युपगतं सर्वमिहाप्यनुरोद्धव्यमिति कश्चिदस्ति निर्बन्धः । ननु भगवत्पादैरेव प्रदर्शितो न्यायोऽस्ति 'परमतमप्रतिषिद्धमनुमतं भवति' (सू. भा. २–४–१२) इति, तेनैवेहापि तन्त्रान्तराभ्युपगमोऽनुमतो भविष्यति । एवं तर्हि यत्रैवेह सावकाशत्वं परिभाषायाः, तत्रैव सा अनुमन्यताम्, न त्वन्यत्र । 'न हि संदेहादलक्षणम्' इति परिभाषाभागस्य तु न कथञ्चनेहास्त्यवकाशः । इत्थं हि वाक्यसंदर्भो व्याकरणमहाभाष्ये – 'वृद्धिरादैच्' इति सूत्रे 'असंदेहार्थस्तर्हि तकारः । 'ऐच्' इत्युच्यमाने संदेहः स्यात्–किमिमावैचावेव, आहोस्विदाकारोऽप्यत्र निर्दिश्यते ?' इत्येकदेशिनः समाधाने समानीते तत्प्रत्याचष्टे सिद्धान्ती 'संदेहमात्रमेतद्भवति । सर्वसंदेहेषु चेदमुपतिष्ठते – 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति । त्रयाणां ग्रहणम् इति व्याख्यास्यामः । अन्यत्रापि ह्ययमेवञ्जातीयकेषु संदेहेषु न कञ्चिद्बलं करोति' इति (महा. पृ. १७२)। तद्यदि नामेयं परिभाषा वेदान्तेऽप्यनुमन्येत, काममनुमन्यतां यत्र संदेहोऽस्ति व्याख्येये, न तु जातुचिदेतद्बलान्मूलविरुद्धव्याख्यानस्यापि प्रामाण्यमित्येतत्तः प्रापयितव्यम् । ननु यत्रापि विरोधोऽस्ति मूलमूलिनोः, तत्रापि 'यथोत्तरं मुनीनां प्रामाण्यम्' इति वैयाकरणाभ्युपगतो न्यायो भविष्यतीत्युक्तम् । सत्यमुक्तम् । एकान्तेन तदङ्गीकारे परं भवतामेव महदनिष्टं प्राप्नुयात् । न हि तावदुत्तरोत्तरत्वदर्शनमात्रेण पूर्वपूर्वस्य बाधः, उत्तरोत्तरस्य प्रामाण्यम् इतीष्यते भवद्भिरपि । तथा हि सति यत्र यत्र भाष्यतद्व्याख्यानयोः व्याख्यानतद्व्याख्यानयोर्वा विरोधः, तत्र तत्र व्याख्यानतद्व्याख्यानानामेव प्रामाण्यम्, तत्रापि

परमोत्तमस्य परमं प्रामाण्यम् तेन च भाष्यबाधः – इत्यापद्येत। न तु तथा अभ्युपगम्यते व्याख्यानप्रास्थानिकैरपि। स्वयमेव च व्याख्यान-तद्व्याख्यानकाराः सर्वे ऐककण्ठ्येन भगवत्पादान् निरपवादं प्रमाणयन्तीति सुप्रसिद्धमेतत्। ततश्च 'उत्तरोत्तरं प्रामाण्यम्' इत्यस्य भाष्यकृतामेव परमं प्रामाण्यमित्याशयो वर्णयितव्यः स्यात्। भाष्यव्याख्यानविरोधोऽपरिहृत एवावतिष्ठेतेति। न च यथा व्याकरणे तथा भाष्यकारोत्तरकालीनानां मूलविरुद्धग्रन्थप्रणेतॄणां संख्येयत्ता अस्ति। येनायमेवात्र परमोत्तम इति कश्चिदवधार्येतापि। किञ्चान्यत्, नैवैषा परिभाषा पूर्वैर्नियमेनादृता। तद्यथा – नञ्समासेन नित्येन भवितव्यं न वा इति विचारप्रसङ्गेनैवं लिखितमस्ति **श्रीशङ्करस्वामिभिः** – "नित्यो ह्यस्य नशब्दस्य सुबन्त-संबन्धेन समास इति वार्तिककारो भगवान् **कात्यायनो** मन्यते स्म। 'वावचनानर्थक्यं च स्वभावसिद्धत्वात्' इति। नेति भगवान् **पाणिनिः**। स हि 'विभाषा' (पा. २–१–११) इति प्रकृत्येदृशं समासमुक्तवान्। **सद्वादित्वाच्च पाणिनेर्वचनं प्रमाणम्। असद्वादित्वान्न कात्यायनस्य।** असद्वादी हि विद्यमानमप्यनुपलभ्य ब्रूयात्" (शा. भा. १०–८–४) इति। यद्यपि कात्यायनप्रामाण्यमपि रक्षितं **टुप्टीकायां तत्रैव भट्टैः** "अत्र राजपुरुष इति लिङ्गसंख्याविशिष्टे वाक्ये नित्यं समास एव साधुः। तद्युक्ते 'राज्ञः पुरुष' इति वाक्यमेव। अत आह – 'वावचनानर्थक्यं च स्वभावसिद्धत्वादिति" इति। तथापि यथोदितपरिभाषा न सर्वैः सर्वथा आदृतेत्यस्य नापबाधकमेतदित्यलमस्थाने तत्र सूक्ष्मेक्षिकया। अतो न साधूक्तमेतत् 'इहाविरोधो तन्त्रान्तरवद् भविष्यति' इति॥

यदप्युच्यते पद्मपादसुरेश्वरौ भगवत्पादानामेव शिष्यत्वेन प्रथितौ। अतस्तौ स्वगुर्वाशयमनवगत्य तद्विरोधेन व्याख्यां प्राणैष्टाम् इति न संभाव्यत इति, तत्रापि ब्रूमः। यद्यपि **श्रीपद्मपादाचार्याः** श्रीशङ्कर-भगवत्पादानां प्रियशिष्याः पञ्चपादिकाकर्तारश्च इत्यस्ति प्रथा, तथापि

माधवीयशङ्करविजयादिकाव्यप्रामाण्यमनुसृत्यैव सा प्रथा तथ्यत्वेन स्वीकर्तव्या, न तत्रान्यत् प्रमाणमस्ति । प्रचलितपञ्चपादिकायां तद्विवरणे वा ग्रन्थस्य पद्मपादकर्तृकत्वे नास्ति ज्ञापकम् । पुस्तकान्त-पुष्पिकायां 'पद्मपादविरचितायाम्' इति विशेषणमपि न सर्वेषु कोशेषु दृश्यते, भगवत्पादशिष्यत्वं तु न कुत्राप्युल्लिखितम् इत्यतोऽद्यापि सांशयिक-मेवैतत् किंकर्तृकोऽयं ग्रन्थ इति । विरोधस्तु भाष्यतद्व्याख्यानयोः व्याख्यानविवरणयोश्च स्फुटं चकास्ति । तत्रैकमुदाहरणमत्र वाचक-सविधे उपस्थापयामः । 'अध्यासं पण्डिता अविद्येति मन्यन्ते' (अध्या. भा.) इति, 'ईश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे....माया, शक्तिः, प्रकृतिः – इति च श्रुतिस्मृत्योरभिलप्येते' (सू. भा. २–१–१४) इति च भाष्यम् । "नामरूपम्, अव्याकृतम्, अविद्या, माया, प्रकृतिः, अग्रहणम्, अव्यक्तम्, तमः, कारणम्, लयः, शक्तिः, महासुप्तिः, निद्रा, अक्षरम्, आकाशम्' इति चाविद्या श्रुतिस्मृतिपुराणेतिहासेषु 'बहुधा गीयते' (पं. पा. २०)"[1] इति तु पञ्चपादिका । अत्र यदेव नामरूपम् 'अविद्या कल्पितम्' इति, मायाशब्दवाच्यम् इति च स्पष्टमुक्तं भाष्ये, तस्यै-वाविद्यात्वं मायात्वं च पञ्चपादिकायाम् उक्तम् इति स्फुटो विरोधः । "'न वा अरे पत्युः कामाय' इत्यादिश्रुत्या आत्मन ईप्सिततमत्वमुक्तम्; ततश्च 'ईप्सितश्चेद् द्रष्टव्यः श्रोतव्यः' इत्येषोऽर्थवादः" इति श्रवणादी-नाम् अर्थवादत्वमुक्त्वा "नैवायं विधौ कृत्यः । किं तर्हि 'अर्हे कृत्यतृचश्च' इत्यर्हकृत्यः" इति तदेवार्थवादत्वं दृढीकृतं पञ्चपादिकायाम् (पा.९४) । एतस्यैव व्याख्यानस्थले विवरणे तु 'मननिदिध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वमङ्गीकृत्य प्रथमसूत्रं प्रवृत्तमित्यर्थः ।....विधीनामपि सतां स्तावकत्वमुक्तम्' (वि. २७३) इति विरुद्धमेवोक्तम् । तत्र कथङ्कारमीदृशीविरुद्धोक्तीरेकप्रक्रियाङ्गत्वेनावधारयितुं शक्नुवीत कश्चिदपि ?

---

1. यत्रैवमेकैव संख्या दत्ता तत्र पत्रपार्श्वमेव परामृष्टमिति ज्ञेयम् ॥

तस्मादसदेवैतद् गीयते गुरुशिष्यभावाबलमात् शङ्करभगवत्पादपद्मपादाचार्ययोर्विप्रतिषेधो न संभावनीयः, व्याख्यानोपव्याख्यानयोर्वा इति ॥

यद्यपि श्रीसुरेश्वराचार्या भगवत्पादानां शिष्या इत्यत्र नैवास्ति काचन विप्रतिपत्तिः, 'श्रीमच्छङ्करपादपद्मयुगलं संसेव्य लब्धोचिवान्' (नै. ४–७४) इति तेषामेव विस्पष्टोक्तयुपलम्भात्। तथापि 'तैत्तिरीयकसारस्य वार्तिकामृतमुत्तमम्। मस्करीन्द्रप्रणीतस्य भाष्यस्यैतद्विवेचनम् ॥ मुमुक्षुसार्थवाहस्य भवनामभृतो यतेः। शिष्यश्चकार तद्वृत्त्या सुरेशाख्यो महार्थवित् ॥' (तै. वा. ३–९०, ९१) इति भाष्यवार्तिकनिर्माणं प्रतिजानानां मूलविरोधेनापि स्वाभिप्रायप्रकटनं नासंभावितम्, कात्यायनकुमारिलभट्टयोरिवेति 'उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते। तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः ॥' (?) इति पराशरोपपुराणवचनोक्तवार्तिकलक्षणवाक्यार्थसमालोचनात्तर्क्यते। दृढीक्रियते चेदं संभावनं स्पष्टमेव च तत्र तत्र भाष्यखण्डने प्रवृत्तेभ्यो वार्तिकश्लोकेभ्यः। तथा हि बृहदारण्यकभाष्ये 'सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोकः' इति श्रुतिरेवं व्याख्याता 'सोऽयं मनुष्यलोकः पुत्रेणैव साधनेन जय्यो, जेतव्यः साध्यः। .... । नान्येन कर्मणा विद्यया वा – इति वाक्यशेषः। कर्मणा अग्निहोत्रादिलक्षणेन केवलेन पितृलोको जेतव्यो न पुत्रेण, नापि विद्यया। विद्यया देवलोकः, न पुत्रेण नापि कर्मणा' (बृ. भा. १–५–१६, पा. ७०५[1]) इति। तत्र वार्तिककाराः–'पुत्रस्यैवावधृतय एवकारो भवेदयम्। पितृदेवलोकसंप्राप्तिः श्रुतेहान्यैश्च साधनैः ॥ व्याख्यानमिदमेवात्र विदोषं दोषवत् परम्। इदमेव ततो ग्राह्यं न तु यद्दोषवन्मतम् ॥ (बृ. वा. १-५-२८०, २८१) इति पितृदेवलोकयो साधनान्तरायत्तत्वसंभवात् तत्रैवकारं

1. उपनिषद्वचनस्थाननिर्देशस्थलेषु सर्वत्रापि काशीस्थवाणीविलाससंस्कृतपुस्तकालयप्रकाशितदशोपनिषत्संग्रहपुस्तकस्थानि पत्रपाइर्वानि परामृश्यन्ते ॥

प्रक्षिप्य व्याख्या न युक्ता – इति स्वव्याख्यानस्यैव निर्दुष्टत्वं ग्राह्यत्वं च न भाष्यकारस्येत्युक्तम् । एवं तैत्तिरीयेऽपि 'तस्यैष एव शारीर आत्मा । यः पूर्वस्य' (तै. २–३) इति वाक्यं भाष्ये व्याख्यातम् 'तस्य पूर्वस्य अन्नमयस्यैष एव शरीरेऽन्नमये भवः शारीर आत्मा । कः ? य एष प्राणमयः' इति । तत्रास्वारस्यं सूचयन्तो वार्तिककाराः 'सत्यादिलक्षणो वात्मा गौणो ह्यात्माऽमुतोऽपरः । सर्वान्तरत्वान्न्याय्यैव यः पूर्वस्येति हि श्रुतिः ॥' (तै. वा. २-२८४) इति स्वव्याख्यानमाख्याय भाष्यकारीयव्याख्यानेऽरुचिहेतुमाचचक्षिरे – 'न ह्यात्मवान् भवेत्सर्पो दण्डाद्यव्यासरूपिणा । आत्मनाऽवितथेनैव सर्पो रज्ज्वात्मनाऽऽत्मवान् ॥' (तै. वा. २–२८६) इति । अतश्चायुक्तमेवं वक्तुम्, भगवत्पादीय-शिष्याणां तद्विरुद्धोक्तिरसंभावितेति । अत्र सर्वत्र भाष्यव्याख्यानोक्तीः कथञ्चित् संगमयैव तदविरोधोऽङ्गीकर्तव्यः, तदशक्तौ त्यक्तव्य आग्रहः सर्वत्रैकैव प्रक्रिया समादृतास्ति विविधप्रस्थानेष्वितीत्येतावदिहोच्यत इति न प्रसर्तव्यम् । यत्र साक्षाच्छिष्यत्वेनाभिमतव्याख्यातृप्रस्थानेष्वेवैवं स्थितिः, तत्र का कथा ततोऽर्वाचीनत्वेन सर्वसंमतानां वाचस्पतिमिश्रादीनां प्रस्थानानामिति, न तत्र विरुद्धोक्तिप्रदर्शने प्रयत्यते ॥

वेदान्तप्रकरणानि खल्वपि परःशतं विद्यन्ते भगवत्पादीयत्वेन प्रख्यातानि, अन्यैश्च ग्रन्थकर्तृभिर्विरचितानि, येषामन्तरङ्गपरीक्षणे प्रवृत्ताः ग्रन्थपुरातत्त्वशोधका नाद्याप्यैकमत्यं प्राप्ताः कानि कानि प्रकरणानि सुनिश्चितं किङ्कर्तृकाणीत्यत्र । तत्रापि भगवत्पादरचितत्वेन प्रसिद्धेषु बहुत्रार्वाचीनव्याख्यानप्रस्थानीयानाम् अभिप्रायविशेषा बहुलम् उपलभ्यन्ते[1] परस्परविरुद्धप्रक्रियाविशेषा अपीति नैवोपयुज्यन्ते वेदान्त-

1. अत्र निदर्शनत्वेनेदं वाचकमहाशयसंनिधौ निवेदयितुमभिलषामि शङ्करीय-त्वेन निश्चप्रचतां गतोऽपि विवेकचूडामणिनाम्ना सुप्रसिद्धो ग्रन्थः, भाष्यकारपद्यशैलीतो विभिन्नशैलीसमादरणेन प्रस्थानत्रयानुपलब्धानामथ चार्वाचीनग्रन्थेषु लब्धप्राचुर्याणां

प्रक्रियानिर्धारण इति स्पष्टमेव । तस्मात्, द्वितीयोऽपि प्रकारो नालं जिज्ञासुजनशङ्कानिराकरणायेति स्थितम् ॥

प्रक्रियाप्रत्यभिज्ञापनाय प्रयत्न आवश्यकः –

९. इयता विचारेणेदं तावत् सिद्धम् – परिशुद्धप्रक्रिया अनादिकालात् प्रवृत्ता संप्रदायपरम्पराप्राप्ता यद्यपि वेदान्तेष्विदानीमपि चकास्त्येव 'तद्धैतद् ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः' (छां. ८–१५–१), 'अथ वंशः' (बृ. ६–५–१), 'मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा .... ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव ।' (का. २–३–१८), 'स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह .... परावराम्' (मुं. १–१–१, २) 'इमं विवस्वते योगम्' (गी. ४–१) इत्यादिश्रुतिस्मृतिलिङ्गेभ्यः । तथापि सा प्रक्रिया प्राचीनार्वाचीनभाष्यकारैस्तदनुयायिभिश्च बहुप्रकारं निर्दिष्टेति भवति जिज्ञासूनां संशयः – किं बहव एव स्युरमूः प्रक्रिया भिन्नभिन्नेषु वेदान्तेषु भिन्नभिन्नवंशकथनेन प्रतिपादिताः, भाष्यकारैश्च बहुधा निर्दिष्टाः, उत एकस्या एव प्रक्रियाया अवान्तरविधाभेदा एव या वेदान्तेषु गीतासु च दृश्यमानाः भिन्नभिन्नतया विभाव्यन्ते मन्दमतिभिरिति । किं विस्पष्टं परस्परं विवदद्भिर्विरुद्धतया प्रदर्शिताः सर्वा अपि प्रक्रियाः साध्व्य एव स्युः, एकपुरुषार्थप्रदर्शकत्वाद्, भिन्नभिन्नदिग्भ्यः प्रस्थिता इव मार्गा एकस्यैव नगरस्य प्राप्तये, आहोस्वित् अमूषां या काचिदेवैका समीचीना, इतरास्तु अनर्थायैवेति परिहातव्या मुमुक्षुभिरिति । यस्मा-

---

पारिभाषिकशब्दानां वचनव्यक्तीनां च बाहुल्येन प्रयोगेण, भाष्यकारैः कुत्राप्यनुदाहृतयोगवासिष्ठसूतसंहितादिग्रन्थवचनानां प्रमाणत्वेनाहरणाच्च न भगवत्पादीय इति, शैल्यादिसर्वांशेऽपि गीतातात्पर्यबोधिन्यनुकारात्, श्रीशङ्करानन्दकृतिरेवेयमिति मया संपादितकार्णाटवाण्यानुवादसहितचूडामणीटिप्पणपरिशिष्टाभ्यामुपपादितास्तीत्यहोऽविचाररमणीयता सर्वप्रकरणानां शाङ्करत्वेन विनिश्चितेः ।

दाकुलानीव प्रतिभान्ति वेदान्तवाक्यानि, स्मृतिवाक्यानि च; विप्रतिपत्तिश्च बहूनां वेदान्तार्थविशदीकरणाय प्रवृत्तानां बहुविदामपि, यस्माच्च न शक्यतेऽल्पमतिभिर्जिज्ञासुभिर्विवेकेनावधारयितुं तत्त्वम्, तस्मादेतेषां पक्षाणां सारासारविवेचनेन तत्त्वं विनिर्णीय परमार्थप्रक्रियाप्रत्यभिज्ञापनायावश्यं प्रयतितव्यं वेदान्तविद्भिरिति सिद्धम् ॥

प्रक्रियानिर्धारणेऽनुसर्तव्या नियमाः –

१०. अथैषा प्रक्रिया कुत्र कथं प्रत्यभिज्ञातव्या ? – इतीदं चिन्त्यते । असत्यां हि प्रक्रियान्वेषणक्रमव्यवस्थायां या काचिदपि येन केनचिदुपस्थापिता तथात्वेनोपादेया स्यात् । अथवा सर्वा अपि निर्हेतुकम् अतथात्वेन हेयाः स्युः । न चैतद्युक्तम्, इष्टं वा कस्यचित् । अतः कैर्लिङ्गैः 'इयमेव सा प्रक्रिया' इति विज्ञेया भवेदितीह दर्शयिष्यामः ॥

(१) प्रथमं तावत् वाक्यधर्ममनुसृत्य श्रुतितात्पर्यनिर्धारणसमर्था प्रक्रिया स्वीकार्या ॥

अतो वाक्यमीमांसाभियुक्तसमादृतोपक्रमोपसंहारादितात्पर्यलिङ्गैर्वाक्यार्थनिर्धारणम्, श्रुतिलिङ्गवाक्यप्रकरणादीनां पारदौर्बल्यम्, बहुश्रुतिविरोधे सत्येकस्य परित्यागः, तत्परातत्परार्णां मध्ये तत्परवाक्यस्यैव प्राबल्यम्, असति बाधके मुख्यार्थस्यैव स्वीकरणम्, श्रुतिस्मृत्योः श्रुतेरेव प्राबल्यम्, श्रुत्यनुसारिस्मृतीनामतदनुसारिस्मृतिवाक्यापेक्षया प्राबल्यम् – इत्यादिनियमानुल्लङ्घनेन या प्रवृत्ता सैव साध्वी प्रक्रिया भवितुमर्हति नान्या- इत्यभ्युपगन्तव्यं भवति ॥

(२) भाष्येषु मध्ये श्रीशङ्करभगवत्पादीयान्येवानुसृत्य प्रक्रिया निर्धार्या ॥

यद्यपि वेदान्तप्रक्रिया सर्वप्रथमं सर्ववेदान्तपरिशीलनेन निर्णेयेत्येव सर्वसंमतम् - तथापि परतन्त्रप्रज्ञानामस्मादृशानां स्वातन्त्र्येण श्रुत्यर्थमवगन्तुमशक्नुवतां प्रख्यातप्रणेतृकभाष्येषु बद्धादराणां तद्बलेनैव च श्रुत्यर्थं प्रतिपित्सूनां, तत्प्रदर्शितापि प्रक्रिया किं न स्यादिति शङ्कमानानां तत्त्वजिज्ञासूनां च कृते यथोक्तनियमोऽङ्गीकरणीय ॥

किं कारणं पुनः शाङ्करभाष्याणामनुसरणमेवात्र कर्तव्यमिति ? उच्यते –

(1) उपलभ्यमानपुरातनतमभाष्यत्वात् । पुरातनभाष्यकारा हि वेदान्तप्रक्रियां संप्रदायानुसारिणीमेव स्वीचकुरिति संभाव्यते । संनिकर्षात् । नेतरेऽत्यर्वाचीनाः । तेषां यथार्थद्वैतिसंसर्गरहित्याद् द्वैतिदर्शनप्रभावाभिभूतविचारशक्तितया तद्वासनावासितितया च स्वाभ्यूहितप्रक्रियान्तरप्रणयनव्यसनित्वस्यापि शक्यशङ्कत्वात् । शङ्करभगवत्पादानां समये हि नैव द्वैतिवेदान्तिन आसन् इत्यनुमातुं शक्यते । यतो भगवत्पादाः स्वीयभाष्येषु सांख्यादिदर्शनकारानेव द्वैतित्वेन पराकृश्याचखण्डन्, न द्वैतवेदान्तिनः । अपि च बृहदारण्यकभाष्ये एवं लिखितमस्ति – 'सर्वोपनिषत्सु हि विज्ञानात्मनः परमात्मनैकत्वप्रत्ययो विधीयत इत्यविप्रतिपत्तिः सर्वेषामुपनिषद्वादिनाम्' (बृ. २-१-२०) इति । सूत्रभाष्ये चेदं वाक्यं दृश्यते – 'सम्यग्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः' (सू. भा. २-१-११) इति । अतश्चेदमवगम्यते यत्तत्समये जीवात्मपरमात्मभेदमात्यन्तिकत्वेन स्वीकुर्वाणाः केवलभक्त्यादिसाधनान्तरप्राप्यं मोक्षमातिष्ठमाना वा द्वैतिवेदान्तिनो नासञ्जिति । तस्मात्, यावद् भगवत्पादानां समये ततः प्राग् वा द्वैतिवेदान्तिसद्भावं सैतिहासिकप्रमाणं नोपप्रदर्श्यते तावद् वेदान्तप्रक्रियाया अद्वैतपरत्वमेवेत्यवतिष्ठते । अत इहार्वाचीनभाष्याणि न विमर्शनीयानीति सिध्यति ॥

यत् सत्यम् श्रीशङ्करभगवत्पादेभ्यः पूर्वतरे अपि नैके भाष्यकारा आसञ्जिति । तेषां तु मतम् तदुण्दोषविमर्शप्रकारश्च भाष्यवार्तिकाभ्यामेवेदानीं शक्यते अवधारयितुमित्यतोऽपि शङ्करभाष्यमेव प्रथमतरं परिशीलनीयम् । तैर्विमृष्टा एव तु प्राचीनप्रक्रियास्तदनन्तरं परीक्षणीया भवन्तीति ॥

(2) व्याख्यानापेक्षया अभ्यर्हितत्वाच्च । भाष्यकाराणामभ्यर्हितत्वे हि सर्वेषां हि व्याख्याकर्तॄणां संप्रतिपत्तिः । न हि पञ्चपादिकातद्व्याख्यानेषु वा भामतीतद्व्याख्यानेषु वा जातुचिद् भाष्यकारप्रस्थानादन्यदेव प्रस्थानमिहास्थितमित्युक्तम् ; भाष्यकारीयाभिप्रायव्याख्यानमेव तु करिष्यत इति स्पष्टमुद्घोषितम् । अतो यत्र भाष्याभिप्रायत्वेनोपवर्णितं साक्षाद् भाष्याक्षरैर्विरुध्यते तत्र भाष्यत एव भाष्याभिप्रायो निर्णेयः तत एव च प्रक्रियास्वरूपं निर्धारणीयम् इति न पृथग्वक्तव्यम् ॥

(३) भाष्यव्याख्यानयोर्विरोधे श्रुतियुक्त्यभिमतं ग्राह्यम् ॥

यद्यपि वार्तिककारादयो भाष्यकारमभ्यर्हितप्रमाणत्वेनैव स्वीकृत्य स्वस्व-व्याख्यां प्रणेतुरिति तत्तद्वचनादेवावसीयते । तद्यथा वार्तिककारास्तावद् वार्तिकोपसंहारे –

यामस्मद्गुरुरेव वेदशिरसामैकात्म्यतात्पर्यतो ।
वृत्तिं सज्जनशङ्करीं सुविमलां नानानयोद्योतिताम् ।
चक्रे काण्वसमाश्रितोपनिषदो दुस्तर्कदोषापहाम् ।
श्रद्धामात्रबलेन वार्तिकमिदं तस्याः समासात् कृतम् ॥ इति ॥

पञ्चपादिकाकाराश्च –

पदादिवृन्तभारेण गरिमाणं बिभर्ति यत् ।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धयारभे ॥ इति (पं. पा. १),

'तस्माद् ब्रह्मविदामेकपुण्डरीकस्य लोकानुग्रहैकरसिकतया सम्यग्ज्ञान-प्रदर्शनप्रयोजनकृतशरीरपरिग्रहस्य भगवतो भाष्यकारस्य मतमागमयितव्यम् ॥' (पं. पा. २०) इति च ।

भामतीकाराश्च खल्वपि ग्रन्थादौ –

नत्वा विशुद्धविज्ञानं शङ्करं करुणाकरम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥ इति,

आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥ इति च ॥

तथापि तु वार्तिके तावत्, श्रुतियुक्तिभ्यां व्याख्यानान्तरमेव समीचीनमिति यत्राशयः तत्राचार्यव्याख्यानं प्रत्यक्षत एव निराकृतमस्तीत्यनपह्नवनीयमेतत् । तथा च दर्शितं प्राक्' (पृ. ११) । यत्रापि प्रत्यक्षवचनं नोपलभ्यते विरोधश्च स्फुटः, तत्रापि स्वव्याख्यानस्य वरीयस्त्वं भवत्वेव मार्गान्तरेण प्रस्थितं वार्तिककारै-रित्यनुमीयते । गत्यन्तराभावात् । तत्रैवंविधस्थलेषु श्रुत्यर्थनिर्णयस्यैवोभयोरपि लक्ष्ये स्थितत्वात्, यस्यैव रीत्या सा प्रक्रिया निःसन्दिग्धं परिपोषिता भवति सैव – भवतु सा भाष्यकारस्य व्याख्यानकारस्य वा – आदरणीयेत्यवश्यमभ्युपगन्तव्यं सर्वैरतत्त्वपक्षपातिभिः । तथा ह्याहुर्बृहदारण्यके भाष्यकारा अपि – 'तस्मात् श्रुत्यर्थ-कल्पनाकुशलाः सर्वे एवोपनिषदर्थमन्यथा कुर्वन्ति । तथापि वेदार्थश्चेत् स्यात् कामं भवतु न मे द्वेषः'[1] (बृ. भा. २-३-६) इति ॥

---

1. यद्यप्यत्र काक्वेदमभिप्रेतं वेदार्थस्तथा न भवतीति । तथापि वेदार्थश्चेद् भवति, तर्ह्यङ्गीकार्यमित्यप्युररीकृतमेव भवतीति ज्ञेयम् ॥

(४) शाङ्करमतनिर्धारणस्थले मतान्तराचार्यानूदिताद् व्याख्यानतो वा यत् सिद्धम्, ततोऽपि च साक्षाद् भाष्यकारवचनं प्रबलतरं प्रमाणमिति स्वीकार्यम् ॥

नात्रोपपादकयुक्त्यपेक्षास्ति । असति हि भाष्यकारस्य प्रत्यक्षवचने तदभिप्रायोऽन्यतोऽनुमेयो भवेदिति ॥

(५) प्रस्थानत्रयभाष्येष्वपि यत्र परस्परविगानमिव प्रतीयते तत्र तत्परातत्परवाक्यविवेचनपूर्वकं प्रक्रियापरिपोषकवचनमेव चरणीयम् ॥

यथोपवर्णितनियमानुसारेणैव यथामति वेदान्तप्रक्रियानिर्धारणप्रयत्नः करिष्यतेऽस्मिन्ग्रन्थसंदर्भेणेति शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचर्यावातवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां
वेदान्तप्रक्रियाप्रत्यभिज्ञायां प्रथमः काण्डः

---

२. प्रस्थानत्रयग्रन्थशरीरपरीक्षणम्

प्रस्थानत्रयपरीक्षणस्याग्रस्थानत्वे निमित्तम् –

११. अथैवं सिद्धायां वेदान्तप्रक्रियाविशेषनिर्धारणप्रयत्नस्य आवश्यकतायाम्, तदर्थं यथाभ्युपगतसमयानुरोधेन सर्वप्रथमं मूलप्रमाणभूता वेदान्ता अवलोकनीया भवन्ति ; तदुपबृंहकत्वेन सर्वसंप्रतिपन्ने गीताशारीरकमीमांसाप्रस्थाने अपि परिशीलयितव्ये । अत इदानीं प्रस्थानत्रयग्रन्थशरीरपरीक्षणं प्रारभ्यते, प्रकृतचिन्तायां ततः कियत् साहाय्यकं लभ्येतेत्येतदध्यवसानाय । तत्रापि विप्रतिपत्तिस्थानमनापन्नानां दशानामेवोपनिषदां परिशीलनमादौ क्रियते, ततो गीताप्रस्थानस्य, तदनन्तरं च सूत्रप्रस्थानस्य ॥

उपनिषत्सु प्रतिपादिता विषयाः –

१२. तत्र **वाजसनेयिसंहितोपनिषदि** तावत् कर्मत्यागः, नित्यकर्मानुष्ठानम्, विद्याविद्यासमुच्चयः, संभूत्यसंभूत्युपासनासमुच्चयश्चेति साधनप्रकारा उपदिष्टाः । साधकस्य सूर्यमण्डलद्वारा गतिश्च ॥

तलवकारीयोपनिषदि त्विमे विषयाः । आदौ सर्वकरणकलापव्यापारस्तेषां तत्सामर्थ्यनिमित्तयत्किञ्चित्तत्त्वप्रेरितः – इत्युक्त्वा तस्य तत्त्वस्य सर्वेन्द्रियागोचरत्वं विदिताविदिताभ्यामन्यत्वं वागादिविषयीकरणसामर्थ्यम् इदमित्यनुपास्यत्वं चाब्रवीत् । अनन्तरं तस्य असुवेद्यत्वं प्रतिबोधवेद्यत्वं चोक्त्वा इहैव तद्बोद्धव्यम् इत्याचचक्षे । अनन्तरम् अग्निवाय्वोरपि तत्स्वरूपनिर्धारणे सामर्थ्याभावम्, इन्द्रस्य तु उमादेव्यनुग्रहात् ब्रह्मत्वेन तद्ज्ञानं चाकथयत् । उपसंहारे च तपआदीनां तज्ज्ञाने साधनत्वमुवाच–इति ॥

काठके तु – अग्निविद्या स्वर्गलोकफला, ब्रह्मविद्या च साध्यात्मयोगा सद्योऽमृतत्वफला च–इति ॥

आथर्वणमुण्डकोपनिषदि परापरविभागेन विद्याद्वयं प्रस्तुतम् 'कस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति' इति प्रश्नोत्तरत्वेन। कर्मणा स्वर्गलोकः, कर्मसमुच्चितोपासनया ब्रह्मलोकः – इत्यपरविद्याफलमुपसंहृत्य, परविद्याधिगम्यं निर्विशेषं तत्त्वम् अक्षरपुरुषादिशब्दवाच्यं परमं ब्रह्मैव जगत्कारणत्वादद्वितीयम्, तद्वेदिता च सर्वज्ञं ब्रह्मैव भवति–इत्युक्तम्॥

आथर्वणप्रश्नोपनिषदि तु सुकेशादिशिष्येभ्यः पिप्पलादेन परब्रह्मविद्या समुपदिष्टेति वर्णितम्। प्रजापतेः प्राणादपि च विलक्षणं ब्रह्मैव पुरुषशब्दवाच्यं प्राणादिषोडशकलानामुत्पत्तिस्थानं लयस्थानं च। तद्विद्यया चाविद्यां तीर्णा भवन्ति–इति प्रतिपादितम्॥

माण्डूक्योपनिषदि तु – केवलम् अवस्थात्रयपरामर्शं कृत्वा, अवस्थारहितश्चात्मा इति निर्णीतम्। ओङ्कारात्मनोरैक्यं चोपदिष्टम्॥

तैत्तिरीयोपनिषदि पुनर्विविधान्युपासनान्युपक्रम्य व्याहृत्यात्मक-ब्रह्मोपासनेन स्वाराज्यफलम्, तस्यैव ब्रह्मणः पाङ्क्तरूपेणोपासनात् प्राजापत्य-फलं चोपदिश्य, कर्मणामवश्यकर्तव्यतामुक्त्वा, अधीतवेदाय शिष्यायाचार्य-कर्तृकमनुशासनं विधाय ततःपरं द्वितीयवल्ल्यां ब्रह्मविद्या समुपदिष्टा। तत्र ब्रह्मणो जगत्कारणत्वम्, तत्रैव जगति प्रविष्टस्य सत्त्यदादिसर्वभावापत्तिः, अन्नप्राणमनोविज्ञानानन्दमयोपसंक्रमणक्रमेण सर्वकामावाप्तिश्च–इतीमे विषया उक्ताः। तदनन्तरवल्ल्यां भृगुवरुणसंवादरूपेण चाख्यानेन भृगोरन्नप्राणादि-परीक्षणद्वारेणानन्दब्रह्मविज्ञानेन प्रतिष्ठाप्राप्तिरभिहिता। तदनु च कानिचिदुपासनान्युक्तानि॥

ऐतरेयोपनिषदि च प्राणविभूतिवर्णनप्राणोपासनाविधानानन्तरं परमात्मनः सर्वलोकसृष्टिः, तस्य मूर्धद्वारेण शरीरप्रवेशः, संसारगति-प्रकारः, ब्रह्मादिशरीरेषु प्रज्ञात्मना स्थितस्य ब्रह्मणः स्वात्मत्वेन बोधात् सर्वस्यामृतत्वप्राप्तिश्चेत्येते विषया अनुक्रान्ताः॥

अथ **छान्दोग्योपनिषदि** विविधोपासनोपदेशानन्तरं षष्ठे प्रपाठके श्वेतकेतूद्दालकसंवादरूपेणाख्यानकेन केनादेशेन सर्वमश्रुतं श्रुतं भवत्यमतं

मतमविज्ञातं विज्ञातम्-इत्येतत् प्रतिपादितम् । सद्ब्रह्मणः सर्वजगत्कारणत्वं, जीवात्मना तत्प्रवेशः, सृष्टभूतत्रिवृत्करणं च-इत्येतत्सर्वं प्रदर्शितम् । सुषुप्ति-मरणपरिशीलनेन विविधदृष्टान्तैश्च 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' इति पदे पदे उपदिश्य सर्वस्य जगतो जीवानां च सद्ब्रह्मात्मना ऐक्यं प्रदर्शितम् । तत्रैव सप्तमे नारदसनत्कुमारसंवादरूपेणाख्यानकेन नामादिप्राणान्तानामुत्तरोत्तरं भूयस्त्वं निर्दिश्य निरतिशयमहद्, भूमसंज्ञितं परमात्मतत्त्वमेव सुखम्, तत्र च नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानातीत्यद्वितीयं तत्-इत्युपसंहृतम् । अष्टमे च हृदयपुण्डरीके विद्यमानं दहराकाशं ब्रह्म-इत्युपदिष्टम् । तदुपासकस्य ब्रह्मलोके सर्वकामावाप्तिः फलम्-इत्युपदिष्टम् । तत्रैव चोत्तरेण ग्रन्थेन इन्द्रं प्रति प्रजापतिना अवस्थात्रयपरीक्षणपूर्वकम् अपहतपाप्मत्वादिगुणकम् अमृतमभयं च ब्रह्मैवात्मा सर्वस्येति निर्धारितम् ॥

अथ बृहदारण्यके प्रथमाध्याये अश्वमेधपरामर्शपूर्वकं प्रजापति-प्राणोपासनाविधिः, आत्मोपासनप्रशंसा, ब्रह्मविद्यया सर्वात्मभावफलम्, सप्तान्नसर्गः, वायुप्राणोपासने च - इतीमे विषया अनुक्रान्ताः । द्वितीये-गार्ग्याजातशत्रुसंवादरूपाख्यानेन सुप्तपुरुषोत्थापनदृष्टान्तेन सुषुप्तौ परमात्मनि जगतो लयस्तत एव चोत्पत्तिः, प्राणविषयोपनिषदः, मूर्तामूर्तयो-र्ब्रह्मरूपयोः सत्त्वादिरूपेण रूपिणश्च ब्रह्मण नेतिनेतीति रूपेण च सतत्त्व-निर्धारणम्, मैत्रेयीयाज्ञवल्क्यसंवादरूपाख्यानेन श्रवणमननिदिध्यासनाना-मात्मविज्ञानसाधनत्वम्, आत्मविज्ञानेनैव सर्वस्य विदितत्वम्, पृथिव्यादि-जगतः परस्परोपकार्योपकारकभावेन स्थितत्वं मधुदृष्टान्तेन, सर्वेषां भूतानां देवानां च लोकानां चारनाभिदृष्टान्तेनात्मनि समर्पितत्वम् - इत्येते विषया उक्ताः । तृतीये - जनकयज्ञे समागतानां ब्राह्मणानां याज्ञवल्क्येन सह जल्पन्यायेन विचारः कृतः । तत्र कर्मोपासनाफलम् अश्वमेधयाजिनां गतिः, सर्वान्तरात्मभूतब्रह्मणः स्वरूपम्, ब्रह्मविदामेषणात्यागः, ब्रह्मविदो

निरुपचरितब्राह्मण्यं चेति ज्ञानप्रशंसा, पृथिव्यादीनां ब्रह्मलोकान्तानामुत्तरस्मिन्नुत्तरस्मिन्नोतप्रोतत्वम् सूत्रान्तर्यामिणोस्तत्त्वम्, सर्वस्य चाकाशे, आकाशस्य च प्रत्यस्तमितसर्वविशेषे ब्रह्मण्यक्षरास्ये ओतप्रोतत्वम्, तस्यैव ब्रह्मणो नियन्तव्यभेदाः, सर्वप्रतिष्ठाभूतस्य ब्रह्मणो नेतिनेतीत्यात्मरूपत्वं जगत्कारणत्वेन विज्ञानानन्दरूपत्वं च–इतीमे विषयाः प्रतिपादिताः। अथ चतुर्थे – वागादिसविशेषब्रह्मोपासनानि, इन्द्रादिसंज्ञया स्थूलसूक्ष्मप्राणात्मक्रमेण नेतिनेतीत्यात्मदर्शनम्, पुनरपि जाग्रत्स्वप्नसुषुप्तिपरीक्षणेन आत्मनः कार्यकरणसंघातव्यतिरिक्तत्वं, शुद्धत्वं, स्वयंज्योतिष्ट्वम्, अलुप्तचैतन्यशक्तित्वं, निरतिशयानन्दरसत्वमद्वैतत्वं च–इत्यवगमितम्। जीवस्य जननमरणादिसंव्यवहारः, मुक्तस्य ज्ञानिनः प्राणानामनुत्क्रान्तिः, ब्रह्मण एव सतो ब्रह्मण्यप्ययश्च। सर्ववेदोक्तकर्मणां ज्ञाने उपयोगप्रकारः, कृतकृत्यस्य ज्ञानिनः प्रशंसा। पुनरप्येकवारं मैत्रेयीब्राह्मणेनात्मविज्ञानोपसंहारः–इति बहवो विषयाः समुदाहृताः। पञ्चमाध्याये तु खिलकाण्डरूपे पूर्वानुक्तानि कानिचिदुपासनान्युक्तानि ॥

अथ श्वेताश्वतरकौषीतकिब्राह्मणोपनिषदौ यद्यपि बहुशः भाष्येषूदाहृते प्रस्थानत्रयेऽपि, तथाप्याचार्यकृतभाष्यानुपलब्धेर्न तद्विषयानुक्रमणिका अत्र विव्रियते प्रत्येकशः ॥

वेदान्तमात्रपरिशीलनेन प्रक्रिया स्थूलमतीनां दुरवधारणा –

१३. यथोक्तविषयप्रतिपादनक्रमानुशीलनेन न तावत् स्थूलमतीनां सर्वत्रानुगता काचिदेका प्रक्रिया मनस्यारोहति। अन्यान्या एव तु प्रातिस्विकी प्रक्रिया तत्रतत्रादृता लक्ष्यते। केनोपनिषदि दृष्टदृश्यविवेकः; तैत्तिरीये पञ्चकोशविवेकः, जगद्ब्रह्मणोः कार्यकारणभावश्च; प्रश्नोपनिषदि स्थूलसूक्ष्मकारणानां पूर्वस्य पूर्वस्योत्तरस्मिन् प्रविलयः; माण्डूक्यच्छान्दोग्यबृहदारण्यकेषु, तत्र तत्रावस्थात्रयपरीक्षा – इत्येवम्। अतो वेदान्तानां

स्वातन्त्र्येण परिशीलनम् न काञ्चित् सर्वानुगतां प्रक्रियां विवृणुते इत्यापाततो भातीति स्थितम् ॥

गीताप्रतिपाद्यविषयाः –

१४. अथ साधनसिद्धान्तोभयतत्त्वावधारणार्थं प्रवृत्तत्वात् सर्ववेदसारसंग्रहत्वेन वेदान्तोपकारकं गीताप्रस्थानमपि विमर्शनीयम् । अतस्तत्र प्रतिपादिता विषया अध्यायानुक्रमशः संगृह्यन्ते ॥

तत्र प्रथमाध्याये ग्रन्थसंबन्धप्रदर्शनार्थम् अर्जुनविषादोपन्यासः, द्वितीये – सांख्ये बुद्धिर्योगे बुद्धिरिति च द्वे बुद्धी उपदिश्य, सांख्यदृष्ट्या निष्क्रियात्मतत्त्वोपदेशः कृतः ; योगदृष्ट्या च सङ्गफलत्यागपूर्वकं कर्मानुष्ठानम्, सांख्यानां ब्रह्मनिर्वाणारूपं फलं चोपदिष्टम् । तृतीये – निष्ठाद्वयमेतदधिकारिभेदेन प्रोक्तमिति, कर्मारम्भ एव तु नैष्कर्म्यनिष्ठोपायः इति चाभिहितम् । चतुर्थे –अजस्याव्ययस्यापि परमेश्वरस्य धर्मोद्धारार्थं मायया जन्म संभवतीत्युपपाद्य तत्त्वदर्शनसत्त्या ज्ञानप्राप्तिः, ज्ञानिनः कर्मबन्धाभाव इति चोक्तम् । पञ्चमे–कर्मानुष्ठानकर्मसंन्यासयोरुभयोरपि श्रेयःकारणत्वे सत्यपि साधकानां कर्मनिष्ठैव सुकरेत्युक्तम् । परमार्थसंन्यासिनामिह च प्रेत्य चेत्युभयतोऽपि ब्रह्मनिर्वाणमिति चाभाणि । षष्ठे – कर्मध्यानयोर्योगाङ्गत्वे विशेषः, ध्यानयोगानुष्ठानप्रकारः, तत्फलमात्मदर्शनम्, तस्य नियतफलत्वं च । सप्तमे – भगवतः परापरप्रकृतिस्वरूपम्, सर्वस्यापि जगतः तत्तद्गुणविशिष्टे भगवति प्रोतत्वम्, भगवत्प्रपत्तेर्मायातरणोपायत्वम्, भगवन्तं प्रपन्नानां मध्ये ज्ञानिभक्तश्रेष्ठत्वम्, नैसर्गिकद्वन्द्वमोहस्य ज्ञानप्रतिबन्धकत्वं च । अष्टमे – ओंकारोपासकानां धारणायोगेनाऽऽयुपलक्षितमार्गेण गतिः, क्रमेणाक्षरब्रह्मप्राप्तिश्च, तदन्येषां तु कृष्णगतिः पुनरावृत्तिश्च । नवमे–परमात्मतत्त्वाभिवर्णनपूर्वकं प्रत्यक्षावगमफल आत्मदर्शनप्रकार उक्तः । भगवद्भजनप्रकाराः, भगवद्विभूतयः काश्चिन् भगवदेकपरायणानां तत्प्राप्तिश्च । दशमे – उपासनार्थं विस्तरेण

भगवद्विभूतिकथनम् । कृत्स्नं जगद् भगवदंशत्वेन जानीयादित्युपदेशेनाध्यायोपसंहारश्च । एकादशे—अर्जुनप्रार्थितेन भगवता विश्वरूपप्रदर्शनम्, अर्जुनकर्तृका भगवत्स्तुतिः, भक्त्यैकलभ्यत्वाद् विश्वरूपभगवत्प्राप्तेः साधकेन भगवदेकपरायणेन भवितव्यमित्युपदेशश्च । द्वादशे – विश्वरूपोपासकानाम् अक्षरोपासकानां च मध्ये विश्वरूपोपासकानामेव युक्ततमत्वं साधने क्लेशाल्पत्वात् इत्युक्तिः, विश्वरूपोपासकानाम् उत्तरोत्तरं सुकरत्वेन विश्वरूपैकचिन्तनाभ्यासयोग-भगवत्कर्मानुष्ठान-सर्वकर्मफलत्यागानामुपदेशः, अक्षरोपासकानामद्वेष्टृत्वादिलक्षणानि च । त्रयोदशे तु—क्षेत्रक्षेत्रज्ञविवेचनपूर्वकं सर्वशरीरेष्वपि क्षेत्रज्ञस्य भगवदनन्यत्वम्, अमानित्वादिविज्ञानसाधनानि, ज्ञेयभूतब्रह्मस्वरूपनिर्देशः, प्रकृतिपुरुषविवेकः, आत्मदर्शनोपायविकल्पाः, सम्यग्दर्शनप्रपञ्चनं पुनरपीति । चतुर्दशे – सत्त्वरजस्तमसां प्रकृतिगुणानां बन्धनप्रकाराः, तत्तद्गुणविवृद्ध्यवस्थाविशेषज्ञानार्थं लिङ्गविशेषाः, तत्तद्गुणविवृद्धिफलम्, गुणातीतलक्षणं च । पञ्चदशे – संसारस्वरूपवर्णनम्, तदुच्छेदायासङ्गत्वोपदेशः, परमपदं प्राप्तस्यापुनरावृत्तिः, संसारिण्येवात्मदर्शनम्, परमात्मविभूतिसंक्षेपः, भगवतः क्षराक्षरविलक्षणत्वेनोत्तमपुरुषाख्यत्वम्, तज्ज्ञानस्तुतिश्च । षोडशे – दैवासुरसंपद्विभागः, कार्याकार्यव्यवस्थितौ शास्त्रस्यैव प्रामाण्यम् । सप्तदशे – आहारयज्ञतपोदानानां सात्त्विकत्वादिविभागकर्मसाद्गुण्यार्थं ओंतत्सदिति निर्देशोपदेशश्च । अष्टादशे तु – यज्ञदानतपसां सङ्गफलत्यागपूर्वकं कर्तव्यता, कर्मसंन्यासिनामनिष्टादिफलाप्राप्तिः, आत्मनोऽकर्तृत्वम् । ज्ञानकर्मकर्तृबुद्धिधृतिसुखानां सात्त्विकादिभेदाः, ब्राह्मणादीनां कर्माणि, स्वकर्मणा भगवदर्चनेन सिद्धिः, सिद्धिं प्राप्तस्य ब्रह्मप्राप्त्यर्थम् अनुष्ठेयसाधनम्, ब्रह्मभूतस्य भगवद्दर्शनम्, भगवच्छरणतोपदेशश्चेति ॥

गीतास्वपि न प्रक्रिया शक्यनिर्धारणा –

१५. गीताप्रतिपादितविषयानुशीलनेन यद्यपि कर्मज्ञानादीनां

परस्परसंबन्धो यत्किञ्चिदिव ज्ञायते, तथापि तत्त्वज्ञानस्वरूपनिर्धारणं तदुपायपरम्पराप्रणालिकानिर्धारणं वा कां प्रक्रियामवलम्ब्य क्रियतेऽनेति त्वस्मादृशानां न सुविज्ञानम् । सर्वत्र हि गीता उपदेशप्रधाना लक्ष्यन्ते न तूपपत्तिप्रधानाः । अतोऽत्रापि प्रक्रियाप्रत्यभिज्ञा स्वतन्त्रविचारेण न सुलभेति सुव्यक्तम् । यत्रापि खलूपनिषत्सु तत्र तत्रोपपत्तयोऽपि सदृष्टान्तमुपक्षिप्ताः, तत्रापि न प्रक्रियान्वेषणपथो निष्कण्टकः इति ज्ञातम्, का कथा पुनर्यत्रोपपत्तीनामत्यन्तविरलतेति ॥

सूत्रप्रस्थानविभागक्रमः –

१६. अथ वेदान्तमीमांसाग्रन्थशरीरं विभज्य विज्ञेयम् । मीमांसाशब्दशब्दितत्वादेव हि तर्कप्रधानमिदं शास्त्रमिति गम्यते । विषयविभागस्त्वत्रेत्थम् । प्रथमाध्याये प्रथमपादे–प्रथमसूत्रेण **'अथातो ब्रह्मजिज्ञासा'** इति जिज्ञासा कर्तव्यत्वेनोपदिष्टा, ब्रह्मणश्च लक्षणं **'जन्माद्यस्य यतः'** इति द्वितीयसूत्रेण कथितम् । **'शास्त्रयोनित्वात्'** इति तृतीयसूत्रेण च शास्त्रमेव प्रमाणं ब्रह्मणीति विज्ञापितम् । तच्च शास्त्रप्रमाणकत्वं ब्रह्मणः, **'समन्वयात्'** इति हेतूपदर्शनेन दृढीकृतं तुरीयसूत्रेण । **'ईक्षतेर्नाशब्दम्'** इति च पञ्चमाधिकरणेनाचेतनस्य जगत्कारणत्वं प्रतिक्षिप्तम् । अतःपरं प्रथमाध्याये ब्रह्मणि वेदान्तवाक्यानां समन्वयः प्रदर्शितः, आतृतीयपादपरिसमाप्तेः । चतुर्थपादे वेदान्तवाक्येषु कुत्रचित् साङ्ख्याभिमतप्रधानसमर्पणाभासत्वं लक्ष्यत इति तेषामन्यपरत्वव्याख्यानेन वेदान्तानां निरपवादो ब्रह्मणि समन्वय इति निगमनं कृतम् । द्वितीये त्वध्याये यथोक्तसिद्धान्तस्य स्मृतिन्यायाविरोधो दर्शितः परपक्षनिरासपूर्वकम् । तृतीये च जीवानां संसारप्रकारः, उपासनादिसाधनविचारश्च प्रतानितः । चतुर्थे पुनः प्रायेण विद्याफलाश्रयो विचारः कृतः – इति सामान्येन सर्ववेदान्तिसंप्रतिपन्नोऽयं विषयविभागक्रमः ॥

सूत्रप्रस्थानावलोकनेनापि प्रक्रिया दुरवधारणा –

१७. अत्र यद्यपि बादरायणीयानि सूत्राणि न्यायेन वेदान्तार्थ-तात्पर्यनिर्णयार्थं प्रवृत्तानीत्यत्र न काचन विमतिः, तथापि 'अल्पाक्षर-मसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः' (?) इत्युक्तेषु विशेषणेषु मध्ये– न ज्ञायते कस्मात् कारणादिति– असंदिग्धत्वं तावत् सूत्रेषु न तादृग्लक्ष्यते यादृशा विरुद्धनानाव्याख्यानानि न लब्ध-प्रसराणि भवेयुः । यावता दरीदृश्यन्ते औपनिषदपक्षावलम्बनत्वमात्मनः समुद्घोषयद्भिरेव श्रीशङ्करभगवत्पादेभ्यः प्राचीनैर्भर्तृप्रपञ्चादिभिरन्यथान्यथा-वृत्तयो निर्वर्तिताः । तास्त्विदानीं यद्यपि नोपलभ्यन्ते तथापि भाष्ये वार्तिके च परामृष्टाः समुपलभ्यन्ते । अर्वाचीनैश्च भास्कररामानुजश्रीकण्ठ-विज्ञानभिक्षुमध्ववल्लभबलदेवप्रभृतिर्बहुभिर्बहुधा व्याख्यातानीमान्येव सूत्रा-णीति सुप्रसिद्धमेतत् । सर्वोऽपि च भाष्यकारः स्वस्वप्रक्रियामेव सूत्रकाराभि-मताममिमन्यते, तदनुयायिभिरद्यापि प्रक्रियाविषये व्युद्यते परस्परमिति च सुविदितमेतत् । तस्मात् सूत्रमात्रविमर्शनेन प्रक्रियाप्रत्यभिज्ञाप्रत्याशा सुतरां दूरे स्थितेति सिद्धम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरण-
स्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्य-
सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां
वेदान्तप्रक्रियाप्रत्यभिज्ञायां द्वितीयः काण्डः

---

३. श्रीशङ्करभगवत्पादभाष्यपरिशीलनम्

आचार्यभगवत्पादानां सत्संप्रदायस्थत्वम् –

१८. केवलप्रस्थानत्रयविषयनिरूपणेन वेदान्तप्रक्रियाया दुरवधारणत्वात्, तन्निर्धारणार्थं शाङ्करभाष्यं प्रप्रथमं परिशीलनीयमित्यावेदितम्। भगवत्पादेभ्यः प्राचीनतराणां तत्समकालीनानां वा वृत्तिकृतां अभिप्रायास्तु भाष्यवार्तिकान्यतरस्थपरामर्शमात्रादनुमेयाः, न त्विदानीं तद्वृत्तयः क्वाप्युपलभ्यन्त इत्यतो भगवत्पादीयभाष्यविमर्शनमेव तत्रापि शरणं संप्रतीति च। इदमिदानीं चिन्त्यते किं भगवत्पादोपस्थापिता प्रक्रिया किं तत्स्वोपज्ञा उत संप्रदायागतेति । यदि हि भाष्यकारोपज्ञैवैषा, तर्हि वेदान्तेष्वादृता सैवेयम् आहो नेत्यत्र संशयोऽपि प्रादुर्भवेदिति ॥

तत्र **श्रीगौडपादास्तावत्** परमगुरवो भगवत्पादानां वेदान्तप्रपञ्चदिगन्तविश्रान्तकीर्तय इति सुप्रसिद्धमेतत्। तत्प्रणीता माण्डूक्योपनिषत्कारिका इदानीमपि सगौरवं सर्वत्र पठनपाठनयोरद्वैतिभिरादियन्त इति च। ते च संप्रदायवित्त्वेन महीकृताः सूत्रभाष्ये – 'तथा च **संप्रदायविदो** वदन्ति' (सू. भा. १–४–१४), 'अत्रोक्तं **वेदान्तार्थसंप्रदायविद्भिराचार्यैः**' (सू. भा. २–१–९) इति च । गौडपादैरपि प्राक्तनसांप्रदायिकाः सबहुमानं परामृष्टाः – '**वेदान्तेषु विचक्षणैः**' (मां. का. २–३१) इति, '**मुनिभिर्वेदपारगैः**' (मां. का. २–३५) इति च। किञ्च, भाष्यकारेण संप्रदाये परमश्रद्धा आविष्कृतास्ति तत्र तत्र। तद्यथा **गीताभाष्ये** 'संसारोपरमश्च मम कर्तव्यः क्षेत्रक्षेत्रज्ञविज्ञानेन, ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेन' इत्येकदेशिमतमनूद्य लिखितमस्ति 'एवं मन्वानो यः स पण्डितापसदः संसारमोक्षयोः **शास्त्रस्य** चार्थवत्त्वं करोमीत्यात्महा स्वयं मूढोऽन्यांश्च व्यामोहयति **शास्त्रार्थसंप्रदायरहितत्वात्** श्रुतहानिमश्रुतकल्पनां च कुर्वन्। तस्मात्, असंप्रदायवित्

सर्वशास्त्रविदपि मूर्खवदेवोपेक्षणीयः' (गी. भा. १३–२) इति । तत्रैवान्यत्रैवं लिखितम् – 'केचित्तु पण्डितंमन्या निराकारत्वादात्मवस्तु नोपैति बुद्धिः, अतो दुःसाध्या सम्यग्ज्ञाननिष्ठा–इत्याहुः । सत्यमेवम्, गुरुसंप्रदायरहितानाम् अश्रुतवेदान्तानाम्, अत्यन्तबहिर्विषयासक्तबुद्धीनां सम्यक् प्रमाणेष्वकृतश्रमाणाम्....' (गी.भा. १८-५०) इति । बृहदारण्यकभाष्ये चेदं वाक्यं दृश्यते – 'अत्र च संप्रदायविद आख्यायिकामाचक्षते' (बृ. भा. २–१–२०) इति । तदेवं संप्रदाये ख्यापितपरमादरत्वात्, विश्रुतसंप्रदायवित्परमपूज्यगौडपादप्रशिष्यत्वाच्च, अनतिशङ्कनीयं भगवत्पादानां सत्संप्रदायस्थत्वमिति सिद्धम् ॥

भगवत्पादसंमता सांप्रदायिकी प्रक्रिया –

१९. अथेदानीं का नु स्यादसौ वेदान्तप्रक्रिया आचार्याभीष्टा संप्रदायागतत्वेनेति विशये इदं वाक्यं समुपतिष्ठते – "तथा हि संप्रदायविदां वचनम् – 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति" (गी. भा. १३–१३) इति ॥

अस्याभियुक्तवचनस्याभिप्रायश्च बृहदारण्यकभाष्ये एवं विवृतोऽस्ति–

'य एवं यथोक्तमात्मानम् अभयं ब्रह्म वेद, सोऽभयं हि वै ब्रह्म भवति । एष सर्वस्या उपनिषदः संक्षिप्तोऽर्थ उक्तः । एतस्यैवार्थस्य सम्यक् प्रबोधाय, उत्पत्तिस्थितिप्रलयादिकल्पना क्रियाकारकफलाध्यारोपणा च आत्मनि कृता । तदपोहेन च नेति नेतीत्यध्यारोपितविशेषापनयद्वारेण पुनस्तत्त्वमावेदितम् । यथा एकप्रभृत्यापरार्धसंख्यास्वरूपपरिज्ञानाय रेखाध्यारोपणं कृत्वा 'एकेयं रेखा', 'दशेयं', 'शतेयं' 'सहस्रेयम्'–इति ग्राहयति । अवगमयति सङ्ख्यास्वरूपं केवलम्, न तु सङ्ख्याया रेखात्मत्वमेव । यथा च, अकारादीन्यक्षराणि विजिग्राहयिषुः पत्रमर्पीरेखादिसंयोगोपायमास्थाय वर्णानां सतत्त्वमावेदयति, न पत्रमप्याद्यात्मताम् अक्षराणां ग्राहयति, तथा चेहोत्पत्त्याद्यनेकोपायमास्थायैकं ब्रह्मतत्त्वम् आवेदितम् । पुनः तत्कल्पितोपायजनितविशेषपरिशोधनार्थं नेति नेतीति तच्चोपसंहारः कृतः' (बृ. भा. ४–४–२५, पा. ९३९) इति ॥

अध्यारोपापवादप्रक्रियैवेतरप्रक्रियाविशेषाणां मूलरूपम् –

२०. सैषा प्रक्रिया एकैव सती विविधप्रक्रियाविशेषवेषेण तत्र तत्रानीय प्रदर्श्यते वेदान्तेषु गीतासु, सूत्रेषु चेति तत्तत्प्रकरणनिरूपणेनावश्यं विज्ञायेत, यदि वाक्यतात्पर्याध्यवसाये प्रथमनियमोदाहृता विनिगमनाहेतवो (पा. १४) मनसि ध्रियेरन् । अत्र दिङ्मात्रं तावद् दर्शयिष्यामः, उत्तरत्र प्रस्तोष्यमाणभाष्यप्रस्थानप्रपञ्चे अनाकुलं बुद्धिस्थैर्यं यथा स्याज्जिज्ञासूनामिति ॥

प्रत्यस्तमितसर्वविशेषेऽपि, सर्वात्मत्वेन नित्यप्राप्तेऽपि च ब्रह्मणि आप्यत्वम् श्रुतिषु कुत्रचित् अध्यारोप्य ज्ञानातिरिक्तसाधनप्राप्यत्वाशङ्का अपोद्यते । एवं क्वचिज्ज्ञेयत्वमध्यारोप्य ब्रह्मातिरिक्ते वस्तुनि ज्ञेयत्वमपोद्यते, क्वचित्तस्मिन्नेव ज्ञातृत्वमध्यारोप्य ज्ञेयत्वमपह्नूयते । क्वचित्तु साक्षित्वमध्यारोप्य ज्ञातृत्वमपि निराक्रियते । क्वचित्पुनः स्वरूपमेवापेक्ष्य नेति नेति इति साक्षित्वमपि निराक्रियते । एवम् क्वचिद्वाक्यगम्यत्वमङ्गीकृत्य प्रत्यक्षाद्यगम्यत्वं बोध्यते, क्वचित्तु वाङ्मनसयोरप्यगोचरत्वं स्वरूपापेक्षया स्वीकृत्य वाक्यगम्यत्वं मनोगम्यत्वं च निराक्रियते । एवमेव जगत्कारणत्वं ब्रह्मण्यध्यारोप्य तस्य कार्यत्वमपह्नूयते, ततः कारणत्वमप्यपह्नुत्य स्वरूपमेवावेद्यते । पञ्चकोशात्मकत्वं क्रमक्रमेणाध्यारोप्य पूर्वपूर्वस्यात्मत्वं निराकृत्य पञ्चकोशातीतत्वमवगमय्य सर्वद्वैतातीतत्वं विज्ञाप्यते । तथा दृक्त्वारोपेण दृश्यत्वापह्नवः क्वचित्, ततो द्वैतराहित्यमवबोध्य तस्यापि निराकरणम् ; अवस्थात्रयवत्त्वमध्यारोप्य पूर्वपूर्वावस्थावत्त्वनिरासः, ततस्तुरीयत्वबोधनेनावस्थावत्त्वमात्रस्य निरासः । किं बहुना, ब्रह्मस्वरूपबोधनार्थं यद्यदध्यारोप्यते तत्तदपह्नूयते स्वरूपे एव बुद्धिविश्रान्तिर्यथा स्यादिति । तथा चोक्तं **वेदान्तार्थसंप्रदायविद्भिः श्रीगौडपादाचार्यैः** – 'स एष नेति नेतीति व्याख्यातं निह्नुते यतः । सर्वमग्राह्यभावेन हेतुनाजं प्रकाशते ॥' (गौ. का. ३-२६) यद्यत् परमार्थतत्त्वबोधोपायत्वेन व्याख्यायते, तस्य सर्वस्याप्यध्यारोपमात्र-

त्वात् पुनः पुनः स एष नेति नेत्यात्मा' (बृ. ३-९-२६, ४-२-४, ४-४-२२, ४-५-१५) इति निह्नुते, निर्विशेषात्मस्वरूपं तु सर्वनिह्नवात् परं स्वयमेव प्रकाशते इति कारिकार्थः ॥

अध्यारोपितापवादेनैव ब्रह्म शक्यावगमनम् –

२१. अथ यथोक्तप्रक्रिया प्रस्थानत्रयभाष्येषु सर्वत्रापि सिद्धान्तसाधननिरूपणप्रदेशेषु कथमनुस्यूयतेति ? एतत्प्रदर्शनाय प्रयत्यते। अध्यारोपप्रक्रियाया हि जीवितमिदं यन्मिथ्याविकल्पानपि ब्रह्मण्यध्यारोप्य तत्राध्यारोपितादन्यस्य प्रतिद्वन्द्विनः प्रतिषेधः, ततस्तस्याप्यध्यारोपितस्यापवाद इति। एवं यावन्निरवशेषेण सर्वमप्यध्यारोपितमपोह्यते तावदध्यारोपितापनये यत्नः कर्तव्य इति। एवं सर्वविधाध्यारोपप्रतिषेधेनैव ब्रह्मस्वरूपं शक्यावगमनम्, नान्यप्रकारोऽस्ति तस्यावगमनायेति विस्पष्टमुद्घोषितं प्रस्थानत्रयभाष्येषु। तद्यथा –

(१) ननु कथमाभ्यां नेति नेतीतिशब्दाभ्यां सत्यस्य सत्यं निर्दिदिक्षितमिति ? उच्यते – सर्वोपाधिविशेषापोहेन। यस्मिन् न कश्चिद् विशेषोऽस्ति नाम वा रूपं वा कर्म वा भेदो वा जातिर्वा गुणो वा। तद्द्वारेण हि शब्दप्रवृत्तिर्भवति। न चैषां कश्चिद्विशेषो ब्रह्मण्यस्ति। अतो न निर्देष्टुं शक्यत इदं तदिति। 'गौरसौ, स्पन्दते, शुक्लो, विषाणी' इति यथा लोके निर्दिश्यते, तथा अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते 'विज्ञानमानन्दं ब्रह्म', 'विज्ञानघन एव', 'ब्रह्म', 'आत्मा', इत्येवमादिशब्दैः। यदा पुनः स्वरूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषम्, तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुम्। तदा अयमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण 'नेति नेति' इति निर्देशः ॥ (बृ. भा. २-३-६, पा. ७५५-७५६)

(२) उपपत्तेश्च सदसदादिशब्दैर्ब्रह्म नोच्यत इति। सर्वो हि शब्दोऽर्थप्रकाशनाय प्रयुक्तः, श्रूयमाणश्च श्रोतृभिः, जातिक्रियागुणसंबन्धद्वारेण सङ्केतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति नान्यथा अदृष्टत्वात्। ... न तु ब्रह्म जातिमत्। अतो न सदादिशब्दवाच्यम्। नापि गुणवत्, येन गुणशब्देनोच्येत। निर्गुणत्वात्। नापि क्रियाशब्दवाच्यं निष्क्रियत्वात्। 'निष्कलं निष्क्रियं शान्तम्' (श्वे. ७-१९) इति

श्रुतेः । न च संबन्धी । एकत्वात्, अद्वयत्वात्, अविषयत्वात्, आत्मत्वाच्च न केनचिच्छब्देनोच्यत इति युक्तम् । 'यतो वाचो निवर्तन्ते' (तै. २-९) इत्यादि-श्रुतिभ्यश्च ॥ (गी. भा. १३-१२; पा २०३)

(३) दर्शयति च श्रुतिः पररूपप्रतिषेधेनैव ब्रह्म । निर्विशेषत्वात् । 'अथात आदेशो नेति नेतीति' (बृ. २-३-६), 'अन्यदेव तद्विदितादथो अविदितादधि' (के. १-४), 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (तै. २-९) इत्येवमाद्या । बाष्कलिना च बाध्वः पृष्टः सन् अवचनेनैव प्रोवाच इति श्रूयते 'स हो वाचाधीहि भो इति । स तूष्णीं बभूव । तं ह द्वितीये वा तृतीये वा वचन उवाच । ब्रूमः खलु त्वं तु न विजानासि । उपशान्तोऽयमात्मा' (सू. भा. ३-२-१७, पा. ३५८) इति । तथा स्मृतिष्वपि परप्रतिषेधेनैव उपदिश्यते – 'ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते' (गी. १३-१२) इत्येवमाद्यासु । तथा विश्वरूपधरो नारायणो नारदमुवाच इति स्मर्यते 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि' (मो. ध. ३३९-४५) इति ॥ (सू. भा. ३-२-१७, पा. ३५८.)

(४) उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत् परिकल्प्योच्यते 'सर्वतः पाणिपादम्' इति । तथा हि संप्रदायविदां वचनम् 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति । (गी. भा. १३-१३) उपाधिभूतपाणिपादादीन्द्रियाध्यारोपणाज्ज्ञेयस्य, तद्वत्ताशङ्का मा भूदित्येवमर्थः श्लोकारम्भः । (गी. भा. १३-१४ अवतरणिका).

सर्वाध्यारोपमूलमविद्याशब्दवाच्यम् –

२२. अथैवं परमार्थस्य सर्वाध्यारोपापवादेनैव विज्ञापयितव्यत्वे कदा नु खल्वन्तं गन्ता बोधकः सर्वाध्यारोपाणामिति ? न हि भ्रान्ति-बुद्धीनाम् इयत्ता समस्ति । निरङ्कुशत्वान्मिथ्यामतेः । तत्र कथङ्कारं वेदान्तैरध्यारोपापवादो निरवशेषः कृतः स्यादिति ? अत्रोच्यते । अस्ति कश्चिदध्यारोपो यः सर्वेषामध्यारोपाणां मूलहेतुः । यस्मिन् सत्येवेतरा भ्रान्तयो आत्मानं लभन्ते, अनर्थहेतवश्च भवन्ति स्वस्वजीवितकाले । अत एव तम् **अविद्याशब्देन** विशिंषन्ति वेदान्ताः, तद्बाधनेन तत्त्वस्वरूप-निर्धारणं ज्ञानं च **विद्याशब्देन** । तद्यथा –

(१) दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ।
विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त ॥
(का. १-२-४)

(२) त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति ॥
(प्र. ६-८)

(३) स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥
(मुं. १-१-१)

सा चेयमविद्या भाष्येष्वित्थं विवृता दृश्यते –

(१) अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम् ; तथाप्यन्योन्यस्मिन्नन्योन्यात्मकताम् अन्योन्यधर्माँश्चाध्यस्येतरेतराविवेकेन, अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्, ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः । .... तमेतम् एवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः ॥ (सू. भा. उपोद्घाते)

(२) सर्वव्यापारं तत्राध्यारोप्य नामरूपगतं ज्योतिर्धर्मं च नामरूपयोः, नामरूपे चात्मज्योतिषि सर्वो लोको मोमुह्यते अयमात्मा, नायमात्मा ; एवंधर्मा नैवंधर्मा ; कर्ता, अकर्ता ; शुद्धः, अशुद्धः ; बद्धः, मुक्तः ; स्थितः, गतः, आगतः ; अस्ति, नास्ति – इत्यादिविकल्पैः ॥ (बृ. भा. ४-३-७, पा. ८७०.)

(३) क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भिन्नस्वभावयोरितरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनो रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत् । सोऽयमध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणः । यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्राग्दर्शितरूपात् क्षेत्रात् मुञ्जादिवेषीकां यथोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य 'न सत्तन्नासदुच्यते' इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति, क्षेत्रं च मायानिर्मितहस्तिस्वप्नदृष्टवस्तुगन्धर्वनगरादिवत् असदेव सदिवावभासते इत्येवंनिश्चितविज्ञानो यः, तस्य यथोक्तसम्यग्दर्शनविरोधादपगच्छति मिथ्याज्ञानम् ॥ (गी. भा. १३-२६, पा. २१३)

अविद्याहेतुस्वरूपकार्याणि –

२३. अवगतमविद्यास्वरूपम्, आत्मानात्मनोरितरेतरतादात्म्य-तद्धर्माध्यास इति । अध्यासः, अध्यारोपः, विपर्ययः, विपर्यासः, मिथ्याज्ञानम्, मिथ्याप्रत्ययः, अन्यथाग्रहणम्, तमः, भ्रान्तिः, मोहः – इत्येवमादयोऽविद्याया एव वाचका इति भाष्ये तथा प्रयोगादवगम्यते । यद्यपि मिथ्याज्ञानलक्षणा अविद्या तन्त्रान्तरेष्वपि प्रसिद्धा । 'अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या' (यो. सू. २–५), 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या. सू. १–१–२) इत्यादिदर्शनात् । तथाप्यात्मानात्मनोरन्योन्यस्मिन्नन्योन्यात्मकताबुद्धिरन्योन्यधर्मवत्त्वबुद्धिश्चेत्येवंरूपा सत्यमिथ्यासंभेद-प्रत्ययरूपा च न क्वचिदप्यन्यत्र दर्शनेऽभ्युपगतेत्ययं विशेषो वेदान्त-प्रक्रियायाम् ॥

अस्याश्चाविद्याया आत्मानात्मस्वरूपविवेकाभावो हेतुरित्यप्यवगतं यथोदाहृतभाष्यवाक्येभ्य एव । यद्यप्यभावः स्वतो न हेतुर्भवितुं प्रभवति कस्यचित् । अभावत्वादेव, अभावस्य निर्विशेषत्वात् सिकताभावस्यापि तैलकार्यनिष्पादनसामर्थ्यं भवेदित्यतिप्रसङ्गाच्च । तथाप्यनिश्चितस्वरूपे वस्तुनि विविधविकल्पोत्थितिदर्शनात्, अनिश्चितमात्मतत्त्वमेव विविधा-नात्मरूपेण विकल्प्यत इति नैतच्चित्रम् । तथा ह्यभियुक्ताः

'अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥' (मां. का. २–१७) इति ॥

तस्माद्वस्तुस्वरूपविवेकाभावेन निमित्तेन मृषाविकल्पनरूपाध्यासस्य लोके दृष्टत्वात्, इहाप्यात्मानात्मस्वरूपविवेकाभावनिबन्धन एव तदन्योन्याध्यास इत्यवगम्यत इत्यनवद्यम् । सोऽयं विवेकाभावः, 'अज्ञानम्, अग्रहणम्, अनवबोधः, अनवगमः, अप्रतिबोधः'– इत्यादिपर्यायशब्दैरपि ज्ञानाभावबोधकैर्व्यपदिश्यते भाष्ये । क्वचिच्च मिथ्याज्ञानकारणत्वात् कारणं

बीजम्, निद्रा, सुप्तिः—इत्यपि। तदपेक्षया मिथ्याज्ञानमेव कार्यम्, फलम्, स्वप्न इति च व्यवहृतोऽभियुक्तैः। तद्यथा —

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥ ११ ॥
द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः।
बीजनिद्रायुतः प्राज्ञः स च तुर्ये न विद्यते ॥ १३ ॥
स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥ १४ ॥
अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ १५ ॥

इति चागमप्रकरणे श्रीगौडपादाचार्याः ॥

अथेदानीमविद्याकार्यं विवेक्ष्यते। बृहदारण्यके तावद् विद्याविद्ये एवं प्रदर्शिते दृश्येते —

अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥' बृ. ४-३-२०, पा. ८८९.

अत्र स्वप्नोदाहरणेन लोकसिद्धमेवेदमविद्याकार्यमिति दर्शितं भवति। न हि स्वप्ने ज्ञातृज्ञानज्ञेयविभागो वा क्रियाकारकफलविभागो वा वस्तुत एवास्ति, सृपावासनानिमित्तं भ्रान्तिमात्रमेव तु तत्सर्वमिति सर्वलोकप्रसिद्धमेतत्। अथ च तत्काले स्वप्नदृक् 'तथ्यत एव मां केचन घ्नन्ति, वशीकुर्वन्ति, हस्ती विद्रावयति च, अहो गर्ते पतितोऽहम्, हा कष्टं वर्तते!' इति मन्यते। एवं विद्यावासनावशतो 'देवः संवृत्तोऽहम्, राज्येऽभिषिक्तोऽहम्, सर्वात्मभावं गतोऽहम्' इति च मन्यते इति सर्वेषां नः प्रत्यक्षमेतत्। यथैव स्वप्ने तथैव जागरितेऽप्यध्यासकार्यं वेदितव्यमिति दर्शयति श्रुतिः। भाष्यवाक्यतोऽप्येतदेवमिति विज्ञायते —

(१) मृषैव वासनानिमित्तः प्रत्ययोऽविद्याख्यो जायते । तदेतदुच्यते एनं स्वप्नदृशं घ्नन्तीवेति । ... । अत इदमविद्यायाः सतत्त्वमुक्तं भवति । सर्वात्मानं सन्तमसर्वात्मत्वेन ग्राहयति । आत्मनोऽन्यद्वस्त्वन्तरमविद्यमानं प्रत्युपस्थापयति । आत्मानमसर्वमापादयति । ततस्तद्विषयः कामो भवति । यतो भिद्यते कामतः क्रियामुपादत्ते । ततः फलम् ॥ बृ. भा. ४-३-२०, पा. ८८९, ८९०.

अत एव सूत्रभाष्येऽपीत्थं लिखितमस्ति –

(२) तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि । .... अध्या. भा. पा. २.

(३) एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ॥ अध्या. भा. पा. ४.

(४) अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ॥ अध्या. भा. पा. ४.

विद्याहेतुस्वरूपकार्याणि –

२४. 'अस्यानर्थहेतोः' इत्याद्यधस्तादुदाहृतभाष्यवाक्ये विद्याहेतुस्वरूपकार्याण्यपि पुञ्जीकृत्य प्रदर्शितानि । अविद्या हि सर्वानर्थहेतुः, प्रमाणप्रमेयकर्तृत्वभोक्तृत्वव्यवहारजनकत्वात् । न ह्यसति प्रमाणव्यवहारे द्वितीयवस्तुसद्भावज्ञानं समस्ति । न च द्वितीयवस्तुज्ञानमन्तरेण तद्विषयः कामो भयं वा समुद्भवेत् । न च कामभयादिदोषसमुत्थानं विना इष्टानिष्टप्राप्तिपरिहारार्थं प्रवृत्तिनिवृत्ती प्रादुःष्याताम्, तन्निष्पन्नफलभोगो वा । तस्मादविद्यैव प्रमाणादिव्यवहारजनकत्वद्वारेण सर्वानर्थहेतुरिति गम्यते । इहार्थोऽप्यनर्थ एव । तस्य क्षयिष्णुत्वे सति, विनाशकृतदुःखापादकत्वात्, स्वलाभार्थं भूयो भूय आयासलक्षणप्रवृत्तिप्रयोजकत्वाच्चेति कृत्वा हि 'अस्यानर्थहेतोः' इति विशेषणादानम् । क्षयिष्णुत्वं च क्रियासाध्यस्य 'तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते' (छां. ८-१-६) इत्यादिन्यायोपबृंहितश्रुतिसिद्धम् । अविद्याप्रहाणहेतुत्वं च विद्यायाः प्रसिद्धमेव शुक्तिरजतरज्जुसर्पादिभ्रान्ति-

निरासकत्वदर्शनाच्छुक्तिरज्ज्वादिविद्यायाः । तथैवात्राप्यात्मैकत्वविद्याया आत्माविद्यानिवारकत्वेन कार्यवत्त्वमिति शिष्यते । तदेवं तावदुक्तं भवति 'अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये' इति यावदुक्तं भवति **विद्याकार्य**मविद्यानिवृत्तिः, **विद्यास्वरूपं** चात्मैक्यमेव परमार्थ इति **विज्ञानमिति** । **विद्याहेतुस्तु** 'सर्वे वेदान्ता आरभ्यन्ते' इत्यनेन **दर्शितः** । 'स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा **तत्त्वमसि** श्वेतकेतो' (छां. ६-८-७ ....) इत्यादिभिर्हि वेदान्तैः **सर्वविधविकल्पानाम्** आत्मैकास्पदत्वं जिज्ञासोः परमात्मतादात्म्यं च स्फुटं प्रतिपाद्यत इति ॥

प्रमातृत्वकर्तृत्वयोराविद्यकत्वोपपत्तिः –

अविद्यास्थ्यमध्यासं पुरस्कृत्य सर्वप्रमाणप्रमेयव्यवहाराणां सर्वशास्त्राणां च प्रवृत्तिरिति प्रतिज्ञातं पूर्वतनप्रघट्टकोदाहृतभाष्यवाक्ये । तच्चेदं व्यवहाराणामविद्याकृतत्वं नाम मिथ्याज्ञानापरपर्यायाध्यासनिमित्तकत्वमेवेत्यध्यासप्रतिज्ञावाक्य एव स्पष्टीकृतमस्ति भाष्ये – मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्', 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः' इत्यत्र ; अध्यासो नाम मिथ्याबुद्धिरिति च स्वाभिप्रायः स्फुटीकृतः **'अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम'** इति । न च मिथ्याबुद्धिरूपाविद्यायाः शब्दप्रत्ययादानलक्षणव्यवहारस्य च हस्तपुस्तकयोरिव संयोगः, मृद्घटयोरिवोपादानोपदेयभावलक्षणः संबन्धो वा चिन्तयितुमपि शक्यते । अतो मिथ्याबुद्धिनिबन्धन एव प्रमाणप्रमेयादिव्यवहार इत्येव भाष्यार्थ इति गम्यते । अत एव हि श्रुतिः कार्यकरणसंघातस्य नात्मना नित्यसंबन्ध इति द्योतयितुं वक्ति –

'स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव ।

स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि' (बृ. ४-३-७) इति । शरीरज्ञानेन्द्रियकर्मेन्द्रियसंबन्धाभावेऽपि तत्कर्म करोतीव चलतीव च;

वस्तुतस्तु स्वप्ने न किञ्चित् कर्म करोति—इति खलु श्रुत्यर्थः। 'अतिक्रामति मृत्यो रूपाणि' इति वाक्यं तु भाष्ये एवं व्याख्यातम् —

मृत्युः कर्माविद्यादिः, न तस्यान्यद्रूपं स्वतः, कार्यकरणान्येवास्य रूपाणि। अतस्तानि मृत्यो रूपाणि अतिक्रामति क्रियाफलाश्रयाणीति ॥ बृ. भा. ८७१.

एतादृशं श्रुत्यभिप्रायं मनसि कृत्वैव 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ?' इत्याशङ्कामुत्थाप्य प्रत्यवोचद् भाष्यकारः — '**उच्यते। देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः**' इति। अत्र प्रमाणव्यवहार-मात्रस्याविद्यावद्विषयत्वं प्रतिबुबोधयिषुर्भगवान् न किञ्चित् प्रमाणमुदाहरति इति स्पष्टमेव। अतः सार्वत्रिकानुभवमेवाश्रित्योच्यते यत् प्रमातृत्वमेव तावद्देहेन्द्रियाभिमानमन्तरा न स्वात्मानं लभत इतीति गम्यते। अत एव भगवान् देहादिभिः संबन्धम् आत्मनो मिथ्याभिमानकृतम्—इति पदे पदे प्राह —

(१) तस्मान्मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् ॥ सू. भा. १-१-४, पा. २२.

(२) विवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वं सशरीरत्वं च। मन्त्र-वर्णात् 'अशरीरं शरीरेषु' इति ॥ सू. भा. १-३-१९, पा. ११३.

(३) देहैः संबन्धो देहसंबन्धः। कः पुनर्देहसंबन्धः ? देहादि-रयं संघातोऽहमेवेत्यात्मनि विपरीतप्रत्ययोत्पत्तिः ॥ सू. भा. २-३-४८, पा. ३०१.

इति। 'तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रिया-प्रियाभ्याम्' (छां. ८-१२-१) इति श्रुतिव्याख्यानावसरे सुस्पष्टमाह—

(४) 'शरीरम्' इति अत्र सहेन्द्रियमनोभिरुच्यते। तच्छरीरम् अस्य संप्रसादस्य त्रिस्थानतया गम्यमानस्य अमृतस्य मरणादिदेहेन्द्रियमनो-धर्मवर्जितस्य इत्येतत्। .... आत्मनः भोगाधिष्ठानम्। .... यस्येदमीदृशं नित्यमेव मृत्युग्रस्तं धर्माधर्मजनितत्वात् प्रियाप्रियवदधिष्ठानम्, तदधिष्ठित-स्तद्वान् सशरीरो भवति। अशरीरस्वभावस्यात्मनः 'तदेवाहं शरीरम्,

शरीरमेव चाहम्' इत्यविवेकात्मभावः सशरीरत्वम् । अत एव सशरीरः सन् आत्तो ग्रस्तः प्रियाप्रियाभ्याम् ' (छां. ८-१२-१, पा. ५९५.)

इति । एतेन कर्तृत्वभोक्तृत्वाध्यासोऽपि व्याख्यातः । तत्रापि हि समानः कार्यकरणसंघाते आत्मत्वाभिनिवेशपूर्विकैव प्रवृत्तिरिति । तथा हि श्रुतयः स्मृतयश्च कार्यकरणव्यापारेणैव तत्तद्व्यापारवत्त्वमाहुरात्मनः, केवलस्य च तद्विविक्ततां च । भाष्यं च तत्र तत्र तदनुगुणम् इति । तद्यथा–

(१) प्राणन्नेव प्राणो नाम भवति । वदन् वाक्पश्यंश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव । स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीत ॥ बृ. १-४-७.

भाष्यम्– तान्येतानि प्राणादीन्यस्यात्मनः कर्मनामानि । कर्मजानि नामानि कर्मनामान्येव न तु वस्तुमात्रविषयाणि । .... यावदयमेवं वेद, पश्यामि शृणोमि स्पृशामीति स्वभावप्रवृत्तिविशिष्टं वेद, तावदज्ञसा कृत्स्नमात्मानं न वेद । कथं पुनः पश्यन् वेदेति ? आह– आत्मेत्येव । आत्मेति प्राणादीनि विशेषणानि यान्युक्तानि तानि यस्य स आमुवंस्तानि आत्मेत्युच्यते । स तथा कृत्स्नविशेषोपसंहारी सन् कृत्स्नो भवति । .... । तस्मादात्मेत्येवोपासीत ॥ बृ. भा. पा. ६६०.

(२) स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः संसृज्यते स उत्क्रामन् म्रियमाणः पाप्मनो विजहाति ॥ बृ. ४-३-८.

भाष्यम्– पाप्मभिः पाप्मसमवायिभिर्धर्माधर्माश्रयैः कार्यकरणैरित्यर्थः ।....तस्मात् सिद्धमस्यात्मज्योतिषोऽन्यत्वं कार्यकरणेभ्यः पाप्मभ्यः, संयोगवियोगाभ्याम् । न हि तद्धर्मत्वे सति तैरेव संयोगो वियोगो वा युक्तः ॥ बृ. भा. पा. ८७६.

(३) आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥ का. १-३-४.

भाष्यम्– आत्मेन्द्रियमनोयुक्तं शरीरेन्द्रियमनोभिः सहितं संयुक्तम् आत्मानं भोक्तेति संसारीत्याहुर्मनीषिणः विवेकिनः । न हि केवलस्यात्मनो भोक्तृत्वमस्ति,, बुद्ध्याद्युपाधिकृतमेव तस्य भोक्तृत्वम् ॥

का. भा. पा. ८०.

(४) अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥ गी १८–१४.
शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ गी. १८–१५.

भाष्यम् – इच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयोऽधिष्ठानं शरीरम् । तथा कर्ता उपाधिलक्षणो भोक्ता। करणं च श्रोत्रादिकं शब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं तद् द्वादशसंख्यम् । विविधाश्च पृथक्चेष्टा वायवीयाः प्राणापानाद्याः । दैवं चैव दैवमेव चात्रैतेषु चतुर्षु पञ्चमं पञ्चानां पूरणम् आदित्यादि चक्षुराद्यनुग्राहकम् ॥ गी. भा. पा. २६२.

(५) तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ गी. १८–१६.

भाष्यम्– एवं यथोक्तैः पञ्चभिर्हेतुभिर्निर्वर्त्ये सति कर्मणि । 'तत्रैवं सति' इति दुर्मतित्वस्य हेतुत्वेन संबध्यते । तत्र एतेषु आत्मानन्यस्त्वेन अविद्यया परिकल्पितैः क्रियमाणस्य कर्मणः 'अहमेव कर्ता' इति कर्तारम् आत्मत्वेन केवलं शुद्धं तु यः पश्यति अविद्वान् । कस्मात् ? वेदान्ताचार्योपदेशन्यायैरकृतबुद्धित्वात् असंस्कृतबुद्धित्वात् । ... अतोऽकृतबुद्धित्वात् न स पश्यत्यात्मनस्तत्त्वं कर्मणो वा इत्यर्थः । अतः दुर्मतिः कुत्सिता विपरीता दुष्टा अजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिः अस्येति दुर्मतिः ॥ गी. भा. पा. २६३.

(६) अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ गी. १३–३१.

भाष्यम्– शरीरस्थोऽपि शरीरेषु आत्मन उपलब्धिर्भवतीति शरीरस्थ उच्यते । तथापि न करोति, तदकरणादेव तत्फलेन न लिप्यते ।.... ... कः पुनर्देहेषु करोति लिप्यते च ? ....तत्रायं परिहारो भगवता स्वेनैवोक्तः 'स्वभावस्तु प्रवर्तते' (गी. ५–१४) इति । अविद्यामात्रस्वभावो हि करोति लिप्यते इति व्यवहारो– भवति । न तु परमार्थत एकस्मिन् परमात्मनि तदस्ति ॥ गी. भा. पा. २१६.

विधिप्रतिषेधशास्त्रस्याविद्यापुरःसरं प्रवृत्तिः–

२६. 'सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि' पुरस्कृत्यैवाध्यासं प्रवृत्तानीति भाष्यवाक्यार्थ इदानीं विवेचनीयोऽस्ति । अयमत्र

विशेषो लौकिकशास्त्रीयव्यवहारयोः यद्देहव्यतिरिक्तात्मज्ञानं लौकिकेषु कर्मसु नोपयुज्यते । एतज्जन्मदेहगतेष्टानिष्टप्राप्तिपरिहारमात्रदृष्टित्वा-ल्लौकिकानाम् । शास्त्रीये तु व्यवहारे जन्मान्तरलोकान्तरयोरपीष्टानिष्ट-प्राप्तिपरिहारोपायविशेषबुभुत्सूनामेवाधिकारित्वात् तत्रात्मास्तित्वज्ञानमा-वश्यकमिति । यथोक्तं बृहदारण्यकभाष्ये **'न चासति जन्मान्तर-संबन्ध्यात्मास्तित्वविज्ञाने जन्मान्तरेष्टानिष्टप्राप्तिपरिहारेच्छा स्यात् । स्वभाववादिदर्शनात् । तस्माज्जन्मान्तरसंबन्ध्यात्मास्तित्वे जन्मान्त-रेष्टानिष्टप्राप्तिपरिहारोपायविशेषे च शास्त्रं प्रवर्तते'** (बृ.भा.सं.१-१-१) तत्रेदृशः शास्त्रीयव्यवहारः किमविद्याकृत एव स्यादुत नेति भवति संशयः । शास्त्रकृतत्वाद् देहव्यतिरिक्तात्मज्ञानस्य । तत्र यदि तावद् भाष्यप्रतिज्ञा-सिद्ध्यर्थं द्वितीयः कल्प आश्रीयेत, तर्हि **'अध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः'** इति सामान्येनोपसंहारग्रन्थे प्रतिज्ञातं हीयेत । शास्त्रकृतकर्तृत्वादिव्यवहारस्यानाविद्यकत्वस्वीकरणात् । अथ पुनः सोऽप्य-विद्यापुरःसर एवेति प्रथमः कल्प एवोपादीयेत, तर्हि शास्त्रस्य विपरीत-बोधकत्वादप्रामाण्यं प्राप्नोतीति । तत्राविद्याकृतत्वपक्षमेवालम्ब्याह श्रुतिः—

> "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
> एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति ॥
> अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः ।
> जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥
>
> (मुं. १-२-७, ८)

इति । न च तर्हि शास्त्राप्रामाण्यम् । पुरुषार्थोपायज्ञापनमात्रपरत्वात् शास्त्रस्य । तदेतदभिसंधायाह भाष्यकृत् —

(१) शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धम् अधिक्रियते, तथापि न वेदान्तवेद्यम् अशनाया-द्यतीतम्, अपेतब्रह्मक्षत्रादिभेदम् असंसार्यात्मतत्त्वम् अधिकारेऽपेक्ष्यते ।

अनुपयोगात्, अधिकारविरोधाच्च । प्राक्च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रम् अविद्यावद्विषयत्वं नातिवर्तते । तथा हि 'ब्राह्मणो यजेत' इत्यादीनि शास्त्राणि, आत्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते ॥ सू. भा. उपो. पा. ३.

(२) यद्यपि शास्त्रावगतं नित्यं कर्म, तथाप्यविद्यावत एव भवति । यथा प्रतिषेधशास्त्रावगतमपि ब्रह्महत्यादिलक्षणं कर्मानर्थकारणम् अविद्या-कामादिदोषवतो भवति । अन्यथा प्रवृत्त्यनुपपत्तेः । तथा नित्यनैमित्तिक-काम्यान्यपीति ॥ गी. भा. १८-६६, पा. २९३.

(४) योऽपि देहादिव्यतिरिक्तात्मवादी आत्मानमेव केवलं कर्तारं पश्यति, असावप्यकृतबुद्धिः । अतोऽकृतबुद्धित्वान्न स पश्यत्यात्मनस्तत्त्वं कर्मणो वा- इत्यर्थः ॥ गी. भा. १८-१६, पा. २६३.

(४) यद्युपमृद्य कर्त्रादिकारकविशेषम् आत्मैकत्वविज्ञानं विधीयते । सर्पादिभ्रान्तिविज्ञानोपमर्दकरज्ज्वादिविषयविज्ञानवत्, प्राप्तः कर्मविधि-श्रुतीनां निर्विषयत्वाद् विरोधः । विहितानि च कर्माणि । स च विरोधो न युक्तः । प्रमाणत्वाच्छ्रुतीनाम् इति चेत् । न ।....यथाप्राप्तमेव कारकास्तित्व-मुपादाय उपात्तदुरितक्षयार्थं कर्माणि विदधच्छास्त्रं मुमुक्षूणां, फलार्थिनां फलसाधनं च, न कारकास्तित्वे व्याप्रियते ॥ तै.भा. शी. उपसं, पा. २७८.

(४) यत्तूक्तं वेदैकदेशस्याप्रामाण्यं कर्मविषये द्वैताभावात्, अद्वैते च प्रामाण्यम् इति । तन्न । यथाप्राप्तोपदेशार्थत्वात् । .... । तस्मात् यथा-प्राप्तमेव द्वैतमविद्याकृतं स्वाभाविकम् उपादाय स्वाभाविक्यैवाविद्यया युक्ताय रागद्वेषादिदोषवते यथाभिमतपुरुषार्थसाधनं कर्म उपदिशत्यग्रे । पश्चात् प्रसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवते तद्विपरीतौदासीन्यस्वरू-पावस्थानफलार्थिने तदुपायभूतात्मैकत्वदर्शनात्मिकां ब्रह्मविद्यामुपदिशति ॥ बृ. भा. ५-१-१, पा. ९५३.

उपासनानां शास्त्रविहितानामपि मानसकर्मत्वाविशेषात् यथाप्राप्तमेव क्रियाकारकादिद्वैतास्तित्वमादायैवाविद्यावत्पुरुषान् प्रत्युपदेश इति न तत्राधिकं वक्तव्यमस्ति । अत एवमाह भगवान् भाष्यकारः --

(५) तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः ॥ सू. भा. १-१-१२, पा. ३५.

मोक्षशास्त्रस्याविद्वद्विषयत्वेऽपि विशेषः—

२७. अथ क्रमप्राप्तं मोक्षशास्त्रं प्रति चिन्ता कर्तव्या। तत्रापि शास्तृशास्त्रशिष्यवेद्यवेदितृवेदनादिविभागरूपं यथाप्राप्तं द्वैतमूरीकृत्यैव ब्रह्मविद्योपदेशात्, समानमविद्यावद्विषयत्वं विधिप्रतिषेधशास्त्रैः। इयांस्तु विशेषः, विधिशास्त्रं पुरुषार्थोपायोपदर्शनमात्रेण विश्राम्यति, न तु क्रियाकारकफलभेदस्य सत्यतामसत्यतां वा ब्रूते; मोक्षशास्त्रं पुनः क्रियाकारकफलशून्यमात्मतत्त्वं जिज्ञासुं तदात्मनैवावस्थानलक्षणे मोक्षेऽभिषेचयतीति। अत एव विधिशास्त्रमोक्षशास्त्रयोरविरोधः। विधिशास्त्रस्य ज्ञानात् पूर्वमेवाविद्यावस्थायां प्रवृत्तेः, ज्ञाते तु तत्त्वे द्वैताभावाच्च। अपि च शास्त्रदृष्ट्या तदनुसारिण आचार्यस्य दृष्ट्या वा वस्तुतो कस्यचन द्वैतस्याभावात्, शिष्यजनोपदेशार्थमेव शास्त्रादिविकल्पाङ्गीकारात्, न कदापि द्वैताद्वैतविरोधः। तदेतदभिसंधायैव 'आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इत्युक्तम्। अत एव हि भाष्यकारः श्रुत्यनुरोधेनाविद्यावस्थायां द्वैतव्यवहारम् अद्वैते च तदभावं पदे पदे बोधयतीति सर्वमनाकुलम्॥

(१) पर एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते। यथा घटकरकाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते। तद्वत्। तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते प्राक् 'तत्त्वमसि' इत्यात्मैकत्वोपदेशग्रहणात्। गृहीते त्वात्मैकत्वे बन्धमोक्षादिसर्वव्यवहारपरिसमाप्तिरेव स्यात्॥

सू. भा. १-२-६, पा. ६७.

(२) अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः संततो वर्तते॥

सू. भा. १-४-३, पा. १४९.

(३) सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः, स्वप्नव्यवहारस्येव प्राक् प्रबोधात्॥ सू. भा. २-१-१४, पा. १९८.

(४) एको हि प्रत्यगात्मा भवति, न द्वौ प्रत्यगात्मानौ संभवतः। एकस्यैव तु भेदव्यवहारः उपाधिकृतो यथा घटाकाशो महाकाश इति। ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः प्रत्यक्षादीनि च प्रमाणानि संसारानुभवो विधि-

प्रतिषेधशास्त्रं च-इति सर्वमेतदुपपद्यते । तथा च श्रुतिः 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यविद्याविषये सर्वं व्यवहारं दर्शयति ; 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् ' (बृ. ४-५-१५) इति विद्याविषये सर्वं व्यवहारं वारयति ॥ सू. भा. १-२-२० पा. ८१.

(५) 'उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते' ॥ गौ. १-१८.

भाष्यम्- ननु शास्ता, शास्त्रं, शिष्यः-इति विकल्पः कथं निवृत्त इति ? उच्यते । विकल्पो विनिवर्तेत यदि केनचित् कल्पितः स्यात् । यथायं प्रपञ्चो माया रज्जुसर्पवत्, तथायं शिष्यादिभेदविकल्पोऽपि प्राक्प्रतिबोधादेव उपदेशनिमित्तः । अत उपदेशादयं वादः - शिष्यः शास्ता शास्त्रमिति । उपदेशकार्ये तु ज्ञाने निवृत्ते ज्ञाते परमार्थतत्त्वे द्वैतं न विद्यते ॥

गौ. का. भा. १-१८, पा. १९१.

शास्त्रस्यान्त्यप्रमाणत्वम् -

२८. अध्यारोपापवादप्रक्रियाया एतावता निरूपणेनेदं सिद्धम् यद् वेदान्तप्रमाणस्याविद्यानिरसनद्वारेणात्मैकत्वप्रतिपादन एव व्यापारो न त्वात्मनि कस्यचिदतिशयस्य संपादने इति । आत्मा हि न कस्यचित् प्रमाणस्य विषयः, परमार्थतोऽद्वयत्वात् ; नित्यापरोक्षस्वभावत्वाच्च स्वयंप्रसिद्धो नान्यत् किञ्चनापेक्षते स्वसाधनाय । यदाप्यविद्यासिद्धद्वैतप्रतिभासः, तदापि वाङ्मनसादिसर्वकरणसाक्षिस्वयंज्योतिश्चैतन्येनान्यत सर्वमवभासयन्नास्ते । **'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ '** (श्वे. ६-११) इति श्रुतेः । प्रत्यक्षादिप्रमाणानि तु नित्यशुद्धबुद्धमुक्तस्वभावमेव सन्तम् अविद्यया प्रमातारमापाद्यैव तमाश्रित्य प्राणान् धारयन्ति, तस्यैव च भासा विभान्ति च । 'न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयाः न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः' (बृ. ३-४-२), 'अदृष्टो द्रष्टा....' (बृ. ३-७-२३), 'यन्मनसा न मनुते येनाहुर्मनो मतम्' (के. १-६), 'तस्य भासा सर्वमिदं विभाति'

(मुं. २–२–११) – इत्यादिश्रुतिभ्यः । देहाद्यात्मत्वभ्रान्त्यवस्थायामपि सर्वस्यान्तरतमः सन् साक्षादपरोक्षतयैव स्वेन सर्वातिशायिस्वरूपेण वर्तत एव । 'यत् साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३–४–१) इति श्रुतेः । वेदान्तास्तत्स्वरूपसमर्पणे प्रमाणम् इति व्यवहारस्तु तस्मिन्नध्यारोपिताहंप्रत्ययविषयत्वापनयनमात्रेणेति ज्ञेयम् । प्रत्यक्षादिप्रमाणान्तरेण नैव ज्ञाप्यत इत्यभिप्रायेण चैवं व्यवहारः ॥

किञ्चान्यत् । यावदेव शास्त्रेण कल्पितप्रमातृत्वमपह्नुत्यास्य पारमार्थिकं ब्रह्मस्वरूपं न बोध्यते, तावदेव तु प्रत्यक्षादिप्रमाणानां विधिनिषेधशास्त्राणां–किं बहुना ? वेदान्तानामपि–प्रामाण्यं नाम । तत ऊर्ध्वं त्वद्वैतब्रह्मरूपेणैवावशेषात् तत्रात्मनि न कश्चन प्रमाणप्रमेयादिव्यवहारः, अत एव वेदान्तशास्त्रम् 'अन्त्यं प्रमाणम्' इति व्यपदिश्यते वेदान्तामियुक्तैः ॥

(१) [अ] रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरः । लिङ्गाद्यभावाच्च नानुमानादीनाम् ॥ सू. भा. २–१–७, पा. १८८.

[आ] अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत् न । अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदम् अपनयति ॥ सू. भा १–१–४, पा. १६.

(२) न ह्यात्मा आगन्तुकः कस्यचित् । स्वयंसिद्धत्वात् । न ह्यात्मा आत्मनः प्रमाणमपेक्ष्य सिध्यति । तस्य हि प्रत्यक्षादीनि प्रमाणान्यप्रसिद्धप्रमेयसिद्धये उपादीयन्ते ॥ सू. भा. २–३–७, पा २६८.

(३) न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा ॥ सू. भा. १–१–४, पा. २०.

(४) 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. ३–९–२६) इति चौपनिषदत्वविशेषणं पुरुषस्य, उपनिषत्स्वेव प्राधान्येन प्रकाश्यमानत्व उपपद्यते ॥ सू. भा. १–१–४, पा. २०.

(५) अपि च. अन्त्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकम्, नातःपरं किञ्चिदाकाङ्क्षणमस्ति ॥ सू. भा. २-१-१४. पा. १९९

(६) न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति । प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्त्यं प्रमाणम् । निवर्तयदेव चाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे ॥ गी. भा २-६९, पा ३९.

(७) न हि क्वचित् साक्षाद् वस्तुधर्मस्य अपोहो दृष्टः कर्ता वा ब्रह्मविद्या । अविद्यायास्तु सर्वत्रैव निवर्तिका दृश्यते । तथा इहापि अब्रह्मत्वम् असर्वत्वं चाविद्याकृतमेव निवर्त्यतां ब्रह्मविद्यया ॥ बृ. भा. १-४-१०, पा. ६६९.

(८) प्राक् प्रबोधात् संसारित्वाभ्युपगमात्, तद्विषयत्वाच्च प्रत्यक्षादिव्यवहारस्य, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ. २-४-१४) इत्यादिना हि प्रबोधे प्रत्यक्षाद्यभावं दर्शयति । प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्ग इति चेत् । न । इष्टत्वात् । 'अत्र पिताऽपिता भवति' (बृ. ४-३-२२) इत्युपक्रम्य 'वेदा अवेदाः' (बृ ४-३-२२) इति वचनात्, इष्यत एवास्माभिः श्रुतेरप्यभावः प्रबोधे ॥ सू. भा. ४-१-३. पा. ४६५.

(९) तस्मात्, 'अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः, सर्वाणि चेतराणि प्रमाणानि । न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्ति ॥ अपि चाहुः –

> अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः ।
> अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः ।
> देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
> लौकिकं तद्वदेवेदं प्रमाणं स्वात्मनिश्चयात् ॥ इति ॥

सू. भा. १-१-४. पा. २४.

विद्याविद्याव्यवहारोऽप्यविद्याभूमावेव –

२९. उक्तमेतद् यथा अविद्यापरपर्यायात्मानात्मेतराध्यास एवात्मनि सकलेतराध्यारोपमूलम् (२१), यथा च स एव सर्वप्रमाणप्रमेयव्यवहारप्रवृत्तिहेतुः, सर्वशास्त्रप्रवृत्तिहेतुश्चेति । उक्तं च यथा वेदान्ता अपि प्रमाणव्यवहारगोचरत्वात्, आत्मैकत्वावगतेरूर्ध्वमप्रमाणीभवन्ति । इत्थं च विद्याविद्याव्यवहारोऽप्यविद्याभूमावेव, अविद्याया आत्मनि

बन्धकारित्वं विद्यायाश्च तदपहारेण मोक्षकारित्वमित्यप्याविद्यकमेव — इत्यप्युक्तमेव भवति। अथैवं मिथ्याभूतस्य वेदान्तप्रमाणस्य मिथ्याभूताविद्याप्रहाणपूर्वकं मोक्षजनकत्वे, किमात्मैकत्वावगतिरपि मिथ्यैव, उत सत्या? यदि मिथ्या, मिथ्यैव स्यात् तत्कृतो मोक्षोऽपीति किं प्रयोजनं स्याद् वेदान्तशास्त्रम्? अथात्मावगतिः सत्येत्युच्यते, तत्र कथं मिथ्यावेदान्तवाक्येन सत्यावगतिजन्म?—इति चोदिते, द्वेधा विभज्य परिहारो वक्तव्यो भवति। कथम्? 'वाक्येनावगतिर्जायते' इत्यत्र यदि वृत्तिरेवावगतिः, तर्हि मिथ्यैव सापि। स्वाप्नखड्गेन स्वाप्नव्याघ्रसंहारवत् तयाप्यविद्याप्रहाणं भविष्यत्येव; साप्याविद्यकत्वाविशेषात् स्वयमपि नश्यति। खड्गव्याघ्राद्यसंस्पृष्टस्यैव सचेतस्ताप्राप्तिरिव मिथ्याविद्यातत्प्रहाणासंस्पृष्टस्यैव स्वात्मन्यवस्थानं मोक्ष इत्युपचरिष्यते। नन्वेतस्मिन् पक्षे बन्धस्य मिथ्यात्वात् मोक्षोऽपि मिथ्येत्येव प्राप्नोति। तदप्यस्तु। परमार्थस्य का हानिः? अथ परमार्थ एव कथं सिध्येत्? नैव तस्य सिद्धिं प्रति शङ्का। स्वतःसिद्धत्वादित्यवेहि। न ह्यध्यस्तविकल्पाः स्वास्पदपरमार्थं विना क्षणमपि स्वात्मानं बिभृयुः। अतस्तदपनयनेनैव परमार्थज्ञानं भविष्यतीत्यास्तां तावत्। अथ प्रत्यक्षादिप्रमाणेषु स्वस्वविषयावगत्यर्थं व्यापृतेषु या अन्ततो वृत्तिरुपजायते तस्या अन्ते नित्यसिद्धमेवात्मचैतन्यम् अभिव्यज्यते इत्यालोचनेन प्रमाणफलं नित्यसिद्धचैतन्यमेवेति वस्तुवृत्तमाश्रीयते, तर्हीहापि वेदान्तवाक्यप्रमाणजनितवृत्त्यन्ते संजायमानचैतन्याभिव्यक्तिरेव प्रमाणफलमित्युपचर्यतामिति न कुचोद्यावसरः॥

(१) न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥

गौ॰ का॰ २-३२, पा॰ २०४

भाष्यम् – यदा वितथं द्वैतम्, आत्मैवैकः परमार्थतः सन्, तदा इदं निष्पन्नं भवति – सर्वोऽयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति॥

(२) कथं पुनः स्वरूपे व्यापाराभावे शास्त्रस्य द्वैतविज्ञाननिवर्तकत्वम्? नैष दोषः। रज्ज्वां सर्पादिवदात्मनि द्वैतस्याविद्याध्यस्तत्वात्। .... आत्मा एतेष्वनुगतः, सर्वत्राव्यभिचारात्।....तस्मान्निर्विशेष एवात्मनि सुखित्वादयो विशेषाः कल्पिताः। यत्त्वसुखित्वादिशास्त्रमात्मनः, तत्सुखित्वादिविशेषनिवृत्त्यर्थमेवेति सिद्धम्। 'सिद्धं तु निवर्तकत्वात्' इत्यागमविदां सूत्रम्॥ गौ. का. भा. २-३२, पा. २०५.

(३) विद्याविद्ययोस्तद्धर्मत्वम् इति चेत्। न। प्रत्यक्षत्वात्। विवेकाविवेकौ रूपादिवत् प्रत्यक्षानुपलभ्येते अन्तःकरणस्थौ। न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम्। अविद्या च स्वानुभवेन रूप्यते 'मूढोऽहम्' अविविक्तं मम विज्ञानमिति। तथा विद्याविवेकोऽनुभूयते। उपदिशन्ति चान्येभ्य आत्मनो विद्यां बुधाः। तथा चान्येऽवधारयन्ति। तस्मात्, नामरूपपक्षस्यैव विद्याविद्ये। नामरूपे च नात्मधर्मौ। 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' (छां. ८-१४-१) इति श्रुत्यन्तरात्। ते च पुनर्नामरूपे सवितर्यहोरात्रे इव कल्पिते। न परमार्थतो विद्यमाने॥ तै. भा. २-८, पा. ३१०.

(४) कथं स्वसत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत? .... नैष दोषः। शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः। स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात्। तत्कार्यमप्यनृतमेवेति चेत् ूयात्, तत्र ब्रूमः। यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादिकार्यमनृतम्, तथापि तदवगतिः सत्यमेव फलम्। प्रतिबुद्धस्याप्यबाध्यमानत्वात्॥ सू. भा. २-१-१४, पा. १९९.

(५) अत्राह चोदकः – अवगतिः प्रमाणानां फलम्, कूटस्थनित्यात्मज्योतिःस्वरूपा इति च विप्रतिषिद्धम्। इत्युक्तवन्तमाह – न विप्रतिषिद्धम्। कथं तर्हि? कूटस्थनित्यापि सती प्रत्यक्षादिप्रत्ययान्ते लक्ष्यते। तादर्थ्यात्। प्रत्यक्षादिप्रत्ययस्य अनित्यत्वे अनित्येव भवति; तेन 'प्रमाणानां फलम्' इत्युपचर्यते॥ उ. सा. गद्य. पा. १००.

विद्यया अविद्यात्रयापबाधः –

३०. यद्यपि ज्ञानाभावसंशयविपर्ययज्ञानानां त्रयाणामपि विद्यातो भिन्नत्वात् वस्तुतत्त्वावरकत्वाविशेषत्वेन विद्योदयसमसमयमेव

विनाशाच्च समानमविद्याशब्दार्हत्वम्, व्यपदिश्यन्ते च तेऽपि क्वचि-दज्ञानाविद्यादिशब्दैः, तथापीह वेदान्तदर्शने यथोक्तं मिथ्याज्ञानमेव विशिष्य परिभाष्यते अविद्येति। तत्र निमित्तं तु यथोपपादितमेव प्रमाणादि-सर्वव्यवहारप्रवर्तकत्वेनानर्थहेतुत्वम्। यावद्धि स्वमात्मानं शरीरकरण-संहतं मन्यते, तावदयमात्मा 'शारीरः', 'जीवः', 'विज्ञानात्मा', 'विज्ञाता', 'द्रष्टा', 'श्रोता', 'कर्ता', 'भोक्ता' – इत्यादिभिस्तत्तदुपाधिसंबन्धद्योतकैः शब्दैर्व्यपदिश्यते। यावदेव चास्मिन्नध्यारोपितं प्रमातृत्वमनुवर्तते, तावदेव चायम् 'न जानामि', 'संशये', 'विपरीतं मे ज्ञानं जातम्', 'इदानीमनेन प्रमाणेन प्रमितोऽयमर्थः' – इति च ज्ञानाज्ञानव्यवहारस्याश्रयो भवति। अत एव च नैसर्गिकाविद्यावशात् स्वात्मन्यप्येवं व्यवहरति 'अहमज्ञो न जानाम्यात्मानम्', 'तत्र महान् संशयो मे कतमोऽयमात्मेति', 'पुत्रादीन् देहादिबहिर्भूतान्यप्यात्मत्वेन कदाचिद् विपर्यस्यामि'–इति। यदा तु स्वं पारमार्थिकं स्वरूपं विज्ञायते श्रुत्याचार्योपदेशलाभेनाविद्यामपास्य, तदा विवेकाभावसंशयरूपे अप्यविद्ये स्वयं व्यपगच्छत इति न तत्र पृथग् यत्नः कर्तव्यः। अविद्यापि समूला न विद्यया स्वव्यापारपूर्वकमपास्यते अवकर इव संमार्जन्या, किं तु स्वोत्पत्तिमात्रेणान्धकार इवादित्येन। विद्योत्पत्तिस्तु वेदान्ताचार्योपदेशमात्राद् विद्याविद्योदासीनर्नित्यसिद्धात्मस्वरूपज्ञापना-दित्यवोचाम॥

(१) भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥
मुं. २-२-८, पा. १६३.

(२) यदि ज्ञानाभावो, यदि संशयज्ञानम्, यदि विपरीतज्ञानं वा उच्यते 'अज्ञानम्' इति, सर्वं हि तत् ज्ञानेनैव निवर्त्यते॥
बृ. भा. ३-३-१, पा. ७९९.

(३) तामसो हि प्रत्ययः, आवरणात्मकत्वादविद्या, विपरीतग्राहकः, संशयोपस्थापको वा अग्रहणात्मको वा। विवेकप्रकाशभावे तदभावात्।

तामसे च आवरणात्मके तिमिरादिदोषे सति, अग्रहणादेरविद्यात्रयस्योपलब्धेः ॥ गी. भा. १३-२, पा. १९२.

(४) न हि 'अग्निरुष्णः, प्रकाशश्च' इति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये 'शीतोऽग्निः' 'अप्रकाशो वा' इति अविद्याया उपपत्तिः, नापि संशयः, अज्ञानं वा ॥ ईं. भा. १८. पा. १३.

(५) तमेतम् अविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः ॥ अध्या. भा. पा २०.

(६) यावद्धि अविद्या न निवर्तते तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते ॥ सू. भा. १-४-६, पा. १५४.

(७) यावदेव चायं बुद्ध्युपाधिसंबन्धः, तावज्जीवस्य जीवत्वं संसारित्वं च ॥ सू. भा. २-३-३०, पा. २८७.

(८) यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रम्, तथा ग्रहणं ज्ञानमात्रमेव । विपरीतज्ञानव्यपोहार्थत्वाज्ज्ञानस्य । एवमिहाप्यात्मनोऽलाभोऽविद्यामात्रव्यवधानम् । तस्मात्, विद्यया तदपोहनमात्रमेव लाभः ॥ बृ. भा. १-४ ७, पा. ६६६.

(९) यथा लोके द्रष्टुश्चक्षुष आलोकेन संयोगो यत्कालस्तत्काल एव रूपाभिव्यक्तिः, एवम् आत्मविषयं विज्ञानं यत्काले तत्काल एव तद्विषयज्ञानतिरोभावः स्यात् ॥ बृ. १-४-१०, पा. ६७६.

(१०) योऽयं लौकिको वैदिकश्च व्यवहारः, स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वादविद्यानिवृत्तौ निवर्तते, अविद्यायाश्च विद्याविरोधान्निवृत्तिः । .... विद्यायां हि सत्याम्, उदिते सवितरि शार्वरमिव तमः प्रणाशमुपैत्यविद्या ॥ गी. भा. २-६९, पा. ३८.

(११) सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चित् क्रमोऽभ्युपगम्यते ॥ सू. भा. ४-१-२, पा. ४६२.

(१२) अविद्यावतोऽविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यादिति चेत् । न । अविद्याकल्पनाविषयत्वाभ्युपगमात् रज्जूषरशुक्तिकागगनानां सर्पोदकरजतमलिनत्वादिवद्दोष इत्यवोचाम । तिमिरातिमिरदृष्टिवत्, अविद्याकर्तृत्वाकर्तृत्वकृतः आत्मनो विशेषः स्यादिति चेत् । न । 'ध्यायतीव लेलायतीव' इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् ॥ बृ भा. ४-४-६, पा ५१९.

आगमतर्कयोरनुभवपर्यवसायित्वम्—

३१. इयता विचारसंदर्भेणैतद् विज्ञातं यदात्मनि प्रमातृत्वाध्यासलक्षणा अविद्यैव सर्वसंसारानर्थमूलम्, सा च वेदान्तवाक्यप्रमाणजनितया विद्ययैवापबाध्यते व्यवहारविषये, परमार्थतस्तु विद्याविद्याव्यवहारातीतमेवात्मवस्त्विति। तत्र योऽसौ श्रुत्या समाद्रियमाण उपदेशक्रमविशेषः – नित्यशुद्धबुद्धमुक्तस्वभावे परमात्मन्यविद्याप्रत्युपस्थापितस्य प्रमातृत्वस्यापह्नवेन स्वरूपसमर्पणलक्षणः – सोऽसौ **'आगमः'** इति परिभाषितो वेदान्ताभियुक्तैः। यद्यपि वेदान्तशास्त्रमप्यागमशब्देनैव व्यपदिश्यते प्रायशः, भागवतादिपुराणेषु च पाञ्चरात्रादिमूलग्रन्थानाम् 'आगमा' इत्येव संज्ञा कृता, आप्तोपदेशादागता इति कृत्वा, तथापीह परमार्थस्यावाङ्मनसगोचरस्य सर्वाध्यारोपापवादेन यः स्वरूपसमर्पणसमर्थ उपदेशक्रमः, सोऽप्यागमशब्देन व्यवह्रियते संप्रदायविद्भिरिति बोध्यम्। तत्रेमानि भाष्यवाक्यान्युदाहरणम् –

(१) **रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरः। लिङ्गाद्यभावाच्च नानुमानादीनाम्। आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत्॥ सू. भा. २-१-६, पा. १८८.**

[अत्र प्रत्यक्षादिशब्दसाहचर्यात्, आगमशब्दो वेदान्तशास्त्रवचन इति गम्यते॥]

(२) **परस्यापि सर्वज्ञप्रणीतागमसद्भावात् समानमागमबलम् इति चेत्॥ सू. भा. २-२-३८, पा. २५७.**

[अत्र माहेश्वराणां प्रमाणग्रन्थानाम् आगमशब्देन व्यपदेशः॥]

(३) **आगमप्रधानेन मधुकाण्डेन ब्रह्मतत्त्वं निर्धारितम्। पुनस्तस्यैवोपपत्तिप्रधानेन याज्ञवल्कीयेन काण्डेन पक्षप्रतिपक्षपरिग्रहं कृत्वा विगृह्यवादेन विचारितम्। शिष्याचार्यसंबन्धेन च षष्ठे प्रश्नप्रतिवचनन्यायेन सविस्तरं विचार्योपसंहृतम्॥ बृ.भा. ४-५-१, संबन्धग्रन्थे, पा. ९३९.**

[अत्र वेदभागयोरेव मधुमुनिकाण्ड्योः, 'आगमप्रधानम्', 'उपपत्तिप्रधानम्' इति च विशेषकरणात्, आगमोऽत्रोपदेशक्रमविशेष एव विवक्षित इति गम्यते॥

तत्र यः कुशलबुद्धिर्वेदान्तवाक्यश्रवणमात्रेण स्वं सर्वव्यवहारातीतं स्वरूपं विज्ञातुं समर्थः, न तस्मिन् विषयेऽन्यत् प्रमाणं साधनं वा मृग्यमस्तीति स्पष्टमेव । सर्वाध्यारोपापाकरणपूर्वकं स्वरूपे प्रतिष्ठितत्वात्तस्य । यद्यप्यध्यारोपदशायामपि स्वरूपप्रतिष्ठ एवासौ । स्वरूपस्यानपायित्वात्, अध्यारोपितविकल्पेन तदानीमपीषन्मात्रेणाप्यसंबन्धाच्च तस्य । तथाप्यज्ञानतस्तत्काले स्वरूपात् प्रच्युत इवासीदिति तदपेक्ष्य विद्यया अध्यारोपापनयात् स्वरूपे प्रतिष्ठित इत्युच्यत इत्यवधेयम् । सेयं स्वरूपे प्रतिष्ठा **'आत्मानुभवः'** इति व्यपदिश्यते । विद्याप्रत्ययान्तेऽनुभवरूपस्यात्मचैतन्यस्य लक्ष्यमाणत्वात् इत्यवोचाम । तथा चात्र न केवलं वाक्यमित्येव श्रुतिवाक्यं प्रमाणं यथा कर्मकाण्डे, कथं तर्हि, नियमेनानुभवावसानज्ञानजनकत्वादिति बोध्यम् ॥

ये तु मन्दमध्यममतयो सकृत्कृतं शास्त्रोपदेशमर्थतः स्वसंवेद्यतामापादयितुमशक्ताः, तान् प्रति श्रुत्यनुगृहीतस्तर्कोऽप्युपायो भवति । तदनुकूला लौकिकतर्काश्च । 'श्रोतव्यो मन्तव्यः' (बृ. २–४–५) इति श्रुतेः । श्रुत्यनुगृहीतस्तर्कोऽप्यनुभवाङ्गत्वेनैव स्वीकार्य इति, तत्र सार्वत्रिकानुभवः प्रमाणतया तिष्ठति । स च **प्रमाणभूतोऽनुभवो** न प्रत्यक्षप्रमितिरूपः, नाप्युरःशिरोवेदनादिवन्मानसानुभवलक्षणः, किं तु सर्वबाह्याध्यात्मिकप्रपञ्चोपलम्भरूपः । स चात्मचैतन्यस्वरूपानतिरिक्त एव सन् वस्तुतः, स्वप्रकाश्यदृश्यापेक्षया 'अनुभव' इत्युच्यते । यथा प्रकाशस्वरूप एव सन् सविता प्रकाश्यापेक्षया प्रकाशक इत्युच्यते, तद्वत् । यः पुनर्निरागमोऽनुभवप्रमाणरहितश्च पुरुषाभ्यूहमात्रस्तर्कः, स **केवलतर्कः शुष्कतर्कः** – इति चाभिधीयते । तस्य तु नावकाशो वेदान्तविचारे ॥

(३) सत्यमेवं प्रत्यक्षादिभिः प्रमाणैर्न परः प्रत्याययितुं शक्यः, आगमेन तु शक्यत एव प्रत्याययितुम् । तदुपदेशार्थमागममाह– 'अन्यदेव तद्विदितादथो अविदितादधि' इति ॥ के. भा. १–४, पा. २०.

(४) एव व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः ॥ सू. भा. ४-१-२, पा. ४६२.

(५) श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात् ॥

सू. भा. १-१-२, पा. ८.

(६) न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किं तु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम् । अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य ॥ सू. भा. १-१-२, पा. ८.

(७) तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते ॥

सू. भा. १-१-१, पा. ६.

(८) भवेदानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात्; यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः ॥

सू. भा. ४-१-२, पा. ४६१.

(९) यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथाप्यध्यारोपितं तस्मिन् बहुंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम् । तत्रैकेनावधानेनैकमंशम् अपोहति, अपरेणापरम् इति युज्यते तत्र क्रमवती प्रतिपत्तिः । तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः ॥ सू. भा. ४-१-२, पा. ४६२.

[आत्मप्रतिपत्तेः – आत्मानुभवस्य]

(१०) यदपि श्रवणव्यतिरेकेण मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयतीत्युक्तम् । नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः संभवति । श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते ॥

सू. भा. २-२-६, पा. १८८.

(११) इतश्च नागमगम्येऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यम् । यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठिता भवन्ति । उत्प्रेक्षाया निरङ्कुशत्वात् ॥ सू. भा. २-१-११, पा. १९२.

[अत्र 'आगमगम्येऽर्थे', 'निरागमा पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्काः' इति च विशेषद्वयादानेनाचार्य एतज्ज्ञापयति – यत् केवलतर्कावष्टम्भिपरदर्शननिराकरणे, तदीयरीत्यैव केवलतर्कानुसरणं न दोषायेति । तत्र हि नागम उपयुज्यते, तत्प्रामाण्यानङ्गीकारात् प्रतिवादिना, न च तदीयतर्कस्य तदीयरीत्यैव निरासाभावे तद्दर्शने आस्तिकानामसारताबुद्धिरुदीयादिति । अत एव हि बौद्धादिमतनिराकरणे श्रीगौडपादाचार्यैः, भगवता भाष्यकारेण च केवलतर्कानुसरणमपि कृतं पश्यामः ॥]

कार्यकारणवादादिप्रक्रिया मूलप्रक्रियावान्तरभेदा एव –

३२. मन्दमध्यमाधिकारिणां कृतेऽनुभवाङ्गतर्कस्वीकरणेन कार्यकारणविवेकप्रक्रिया, सामान्यविशेषविवेकप्रक्रिया, द्रष्टृदृश्यविवेकप्रक्रिया, पञ्चकोशविवेकप्रक्रिया, अवस्थात्रयविवेकप्रक्रिया – इत्येवमादयोऽवान्तराः प्रक्रियाभेदाः स्वीकृता वेदान्तेषु। सर्वत्रानुगता त्वेकाप्रक्रिया एषैव यद् तत्र तत्राध्यारोपितापह्नवेनात्मैकत्वं प्रबोध्य जिज्ञासोः स्वात्मन्यवस्थापनमिति तत्तत्प्रक्रियाभेदपरिशीलनेनावगम्यते ॥

कार्यकारणविवेकः –

३३. तत्र **कार्यकारणविवेको** यथा – **छान्दोग्ये** सच्छब्दवाच्यादद्वितीयब्रह्मणस्तेजोबन्नादिसृष्टिमुपदिश्य, तस्या एव सदाख्यायाः परस्या देवताया जीवात्मरूपेणानुप्रवेशं नामरूपव्याकरणं च शिष्ट्वा मृल्लोहादिदृष्टान्तैः – कार्यस्य कारणानन्यत्वात् कारणविज्ञानेनैव सर्वं कार्यं विज्ञातं भवतीति यदादौ प्रतिज्ञातं तदुपपाद्य – 'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि' (छां. ६–८–७) इति सर्वस्यापि जगतः, श्वेतुश्च श्वेतकेतोर्ब्रह्मात्मकत्वं जगाद। तथा **मुण्डके**, अक्षरसत्यपुरुषापरनामधेयस्याद्वितीयब्रह्मण एव सर्वस्य चराचरस्य जगत उत्पत्तिमुपदिश्य 'ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' (मुं. २–२–१२) इति ब्रह्मात्मैकत्वं जगतो जगौ। **तैत्तिरीयके** च ब्रह्मण आकाशादिजगत्सृष्टिमुक्त्वा, अन्ते प्रतिषिद्धसर्वमूर्तामूर्तजगत्संबन्धे ब्रह्मण्येवात्मत्वेनाभयं प्रतिष्ठाम् (तै. २-७) अभ्यधात्। सर्वत्र चेदृशस्थलेषु कार्यकारणवादस्वीकरणम् आत्मैकत्वे चित्तावतारोपायत्वेनैव न तु कार्यसत्यतां वक्तुमिति श्रुतौ–यथैव दृष्टान्ते सर्वत्र कार्यस्य वाचारम्भणत्वेन नाममात्रत्वं प्रतिज्ञाय कारणस्यैव तु तदपेक्षया सत्यत्वावधारणम् तथैव–सर्वस्यापि विकारस्य नाममात्रत्व-

विज्ञापनपूर्वकं परमकारणस्यैव सत्यत्वावधारणात्, कार्यप्रपञ्चस्य च मूलकारणप्रतिपत्त्यर्थत्वमिति कण्ठरवेण विस्पष्टमुद्घोषणाच्चाध्यवसीयते । तद्यथा –

(१) यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्...॥ छां. ६-१-४, ५, ६. पा. ५०५

(२) अपागादग्नेरग्नित्वं वाचारम्भणो विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् .... ॥ ६-४-१, २, ३, ४, पा. ५१४-५१५.

भाष्यम् — प्राग् रूपत्रयविवेकविज्ञानाद् या अग्निबुद्धिरासीत् ते, साग्निबुद्धिरपगता, अग्निशब्दश्चेत्यर्थः । .... बुद्धिशब्दमात्रमेव ह्यग्निः, यत आह वाचारम्भणमग्निर्नाम विकारो नामधेयम्, नाममात्रमित्यर्थः । अतोऽग्निबुद्धिरपि मृषैव । किं तर्हि तत्र सत्यम् ? त्रीणि रूपाणीत्येव सत्यम् ; नाणुमात्रमपि रूपत्रयव्यतिरेकेण सत्यमस्तीत्यवधारणार्थः ॥

छां. भा. ६-४-१, पा. ५१४.

(३) अन्नेन सोम्य शुङ्गेनापोमूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ छां. ६-८-४, ५२४.

अत्र भाष्यम् –

मृदादिदृष्टान्तैश्च कार्यस्य कारणेनाभेदं वदितुं सृष्ट्यादिप्रपञ्चः श्राव्यत इति गम्यते । तथा च संप्रदायविदो वदन्ति – मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन (गौ. का. ३-१५) इति ॥ सू. भा. १-४-१४, पा. १६३.

एवं **गीताप्रस्थानेऽपि** भगवतः प्रकृतिद्वयद्वारेणैव जगदुत्पत्तिप्रलयकारणत्वमुक्तं स्वतःकारणत्वनिषेधार्थं कार्यस्य कारणानन्यत्वद्योतनार्थं च । एवं भगवतोऽपि कारणान्तरवत्त्वं मा शङ्कीति ततः परतरं तत्त्वं किमपि नास्तीत्युक्तं तस्यैव परमसत्यत्वदृढीकरणाय –

(१) एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ॥ गी. ७-६, ७.

एवं सर्वस्यापि जगतो भगवता व्याप्तत्वं तदाश्रयेणैव लब्धस्थितिकत्वं चोक्तम्, भगवतो जगत्स्थितिसमयेऽप्यद्वितीयत्वं जगतः स्वतन्त्रसत्ता-शून्यत्वं च यथा श्रोतृहृदयमागच्छेदिति । पुनश्च जगतो भगवति स्थितिरपि प्रतिषिद्धा । मृषावस्त्वाश्रयत्वेन परमात्मनि तत्संसर्गः सद्वितीयत्वं वा यादृशं तादृशमपि मा भूच्छङ्कितमिति –

(३) मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥ गी ९-४, ५.

सूत्रप्रस्थाने पुनः स्पष्टमेवाभिहितं कार्यस्य कारणानन्यत्वं तत्प्रदर्शनार्थमेव कार्यकारणविवेकप्रक्रिया प्रवृत्तेति –

(१) जन्माद्यस्य यतः ॥ वे. सू. १-१-२.
(२) प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ वे. सू. १-४-२३.
(३) तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ वे. सू. २-१-१४.

भाष्यम् – 'आरम्भणशब्दादिभ्यः' इति 'आदि'शब्दात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छां. ६-८-७). 'इदं सर्वं यदयमात्मा' (बृ. २-४-६), 'ब्रह्मैवेदं सर्वम्' (?), 'आत्मैवेदं सर्वम्' (छां. ७-२-१२), 'नेह नानास्ति किञ्चन' (बृ. ४-४-१९) इत्येवमाद्यास्मैकत्वप्रतिपादनपरं वचनजातमुदाहर्तव्यम् । न चान्यथा, एकविज्ञानेन सर्वविज्ञानं संपद्यते । तस्मात्, यथा घटकरकाद्याकाशानां महाकाशानन्यत्वम्, यथा च मृगतृष्णिकोदकादीनाम् ऊषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात्, स्वरूपे-णानुपाख्यत्वात्, एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यम् ॥ सू. भा. २-१-१४, पा. १९७.

सृष्टेर्व्यावहारिकत्वस्वीकारोऽधिकारिभेदानुग्रहार्थम् –

३४. तदेवं कार्यकारणविवेकप्रक्रियया श्रौत्या स्वीकृता सृष्टिर्न सृष्टिप्रतिपादनार्था, किं तर्हि, कार्यस्य जगतः कारणभूतब्रह्मानन्यत्वज्ञापनेन परमार्थस्याद्वैतत्वज्ञापनार्था – इति स्थिते, किमियं वेदान्तेषु श्रूयमाणा सृष्टिः सर्वथाप्यपरमार्थैव, उतास्ति तत्रापि यत्किञ्चित् तथ्यत्वमपि ? इति

विवेक्तव्यम् । यत्कारणं प्रमाणभूतासु श्रुतिषु तत्तादृशं सविस्तरेण प्रतिपाद्यमानायां सृष्ट्यां न परमार्थगन्धोऽप्यस्तीति न संभाव्यते ; किञ्च, प्रत्यक्षादिप्रमाणैरुपलभ्यमानं समर्थक्रियाकारित्वेन सर्वैरनुभूयमानमिदं जगत् कथङ्कारं मिथ्यैवेति प्रेक्षावतामनादरभाक्त्वं व्रजेत् ? – इति मन्दमतीन् कांश्चित् प्रतिभायात् । तत्राभियुक्ताः समाधानमभिदधते–प्रविभज्य विज्ञेयमेतत् । कथम् ? कर्मणामनुष्ठाने, उपासनाकर्मणि वा शेषत्वेनोपयुज्यन्त इति यदा कारकाणां पदार्थानां समर्थक्रियाक्षमत्वमनुलक्ष्यते, ब्रह्म च नामरूपकृतोपाधितो विविच्य न स्वरूपेण निश्चीयते, तदा भवत्यपि कार्यस्य सत्यत्वमपि । तत्सत्यत्वं परं व्यावहारिकमेवाङ्गीक्रियते अविद्याकृतनामरूपमायामनपबाध्य सृष्टेः सर्वस्य मायिकत्वाभ्युपगमात् । यदा पुनर्ब्रह्मणस्तत्त्वमेव निर्दिधारयिषितम्, तदा तु नामरूपयोः प्रतीतिदशायां ब्रह्मणस्तत्त्वेनान्यत्वेन वा निर्वक्तुमशक्यत्वात्, ब्रह्मदृष्ट्या च निरूप्यमाणयोर्वस्तुतोऽभावाच्च, ब्रह्मण एव तत्तच्छब्दबुद्धिगोचरत्वं व्यवहारे इत्यध्यवसीयते । तथा च ब्रह्मणोऽद्वितीयत्वं सर्वव्यवहारातीतं नित्यसिद्धमेवेति सेत्स्यति । अतो न विरोध इति ॥

(१) उपलम्भात्समाचारादस्ति वस्तुत्ववादिनाम् ।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥ गौ. का. ४-४२.

भाष्यम्-यापि बुद्धैरद्वैतवादिभिर्जातिर्देशिता उपदिष्टा । उपलम्भनम् उपलम्भः, तस्मात् । उपलब्धेरित्यर्थः । समाचारात्, वर्णाश्रमादिधर्मसमाचरणात् । ताभ्यां हेतुभ्याम् अस्तिवस्तुत्ववादिनाम्, अस्ति वस्तुभाव इत्येवं वदनशीलानां दृढाग्रहवतां श्रद्धधानानां मन्दविवेकिनाम् अर्थोपायत्वेन सा देशिता जातिः । तां गृह्णन्तु तावत् । वेदान्ताभ्यासिनां तु स्वयमेव अजाद्वयात्मविषयो विवेको भविष्यतीति । न तु परमार्थबुद्ध्या ॥

पा. २४०.

(२) उपलम्भात्समाचारान्मायाहस्ती यथोच्यते ।
उपलम्भात्समाचारादस्तिवस्तु तथोच्यते ॥ गौ. का. ४-४४.

(३) धर्मा य इति जायन्ते जायन्ते ते न तत्त्वतः ।
जन्म मायोपमं तेषां सा च माया न विद्यते ॥ गौ. का. ४-५८

भाष्यम् – येऽपि आत्मनोऽन्ये च धर्मा जायन्त इति कल्प्यन्ते ते इति एवंप्रकारा यथोक्ता संवृतिर्निर्दिश्यत इतीति। संवृत्यैव धर्मा जायन्ते। न ते तत्त्वतः परमार्थतो जायन्ते। यत् पुनस्तत् संवृत्त्या जन्म तेषां धर्माणां यथोक्तानां यथा मायया जन्म तथा तन्मायोपमं प्रत्येतव्यम्। माया नाम वस्तु तर्हि? नैवम्। सा च माया न विद्यते। 'माया' इत्यविद्यमानस्याख्या इत्यभिप्रायः॥ पा २४४. २५५.

(४) सूत्रकारोऽपि परमार्थाभिप्रायेण 'तदनन्यत्वम्' इत्याह। व्यवहाराभिप्रायेण तु 'स्याल्लोकवत्' इति महासमुद्रस्थानीयतां ब्रह्मणः कथयति। अप्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियां चाश्रयति सगुणेषूपासनेषूपयोक्ष्यत इति॥ सू. भा. २-१-१४, पा. २०१, २०२.

(५) नामरूपोपाध्यस्तित्वे 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इति श्रुतयो विरुध्येरन् इति चेत्। न। सलिलफेनदृष्टान्तेन परिहृतत्वात्, मृदादिदृष्टान्तैश्च। यदा तु परमार्थदृष्ट्या परमात्मतत्त्वात् श्रुत्यनुसारिभिरन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवत् वस्त्वन्तरे तत्त्वतो न स्तः, सलिलफेनघटादिविकारवदेव, तदा तदपेक्ष्य 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते। यदा तु स्वाभाविक्या अविद्यया ब्रह्मस्वरूपं रज्जुशुक्तिकागगनस्वरूपवदेव स्वेन रूपेण वर्तमानं केनचिदस्पृष्टस्वभावमपि सत्, नामरूपकृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते, नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी, तदा सर्वोऽयं वस्त्वन्तरास्तित्वव्यवहारः॥

बृ. भा. २-५-१, पा. ८१०, ८११.

सत्कार्यवादो मायाजन्मवादश्च –

३५. नामरूपजगतः प्रतीयमानरूपेण विकल्पमात्रत्वात् रज्जुसर्पादेरिव न जन्मस्थितिभङ्गम्। नापि पारमार्थिकरूपस्यात्मनस्तत्। तस्य कूटस्थनित्यस्वभावत्वात्। तथाप्यनिश्चितस्वरूपाया रज्ज्वाः सर्पादिरूपैर्विकल्पनवदनिर्धारितस्वरूपस्य ब्रह्मणो नामरूपजगद्रूपेणोत्पत्त्यादिकल्पनं नानुपपन्नम्। दृष्टत्वात्। स्वरूपनिश्चये सति तथैव बाध्यमानत्वाच्चेति मन्तव्यम्। इदमेव च वेदान्ते सत्कार्यवादवाचोयुक्त्या स्वीकृतम्।

कार्यस्य स्वेन रूपेण सर्वथा अस्तित्वाभावेऽपि, स्वविकल्पनास्पदब्रह्मरूपेण सदा सत्त्वमेव हि सत्कार्यवादस्येष्टम् । ब्रह्मणश्चाजाद्वयस्यैव सतः स्वात्मनि विकल्प्यमाननामरूपजगद्रूपेणावभासमानत्वमेव तस्य मायया जन्मेति च ॥

(१) न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ गौ. का. २-३२.

भाष्यम् – न हि मनोविकल्पनाया रज्जुसर्पादिलक्षणाया रज्ज्वां प्रलय उत्पत्तिर्वा । न च मनसि रज्जुसर्पस्योत्पत्तिः प्रलयो वा, न चोभयतो वा । तथा मानसत्वाविशेषाद् द्वैतस्य ॥ पा. २०४.

(२) नात्मभावेन नानेदं न स्वेनापि कथञ्चन ।
न पृथङ् नापृथक्किञ्चिदिति तत्त्वविदो विदुः ॥ गौ. का. २-३४.

(३) अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पदारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ गौ. का. २-१७.
निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते ।
रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः ॥ गौ. का. २-१८.

(४) असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ वे. सू. २-१-७.

भाष्यम् — यदि चेतनं शुद्धं शब्दादिहीनं च ब्रह्म तद्विपरीतस्य अचेतनस्य अशुद्धस्य शब्दादिमतश्च कार्यस्य कारणमिष्येत । असत्तर्हि कार्यं प्रागुत्पत्तेरिति प्रसज्येत, अनिष्टं चैतत् सत्कार्यवादिनस्तव–इति चेत् । नैष दोषः । प्रतिषेधमात्रत्वात् । प्रतिषेधमात्रं हीदं, नास्य प्रतिषेधस्य प्रतिषेध्यमस्ति । .... न हीदानीमपीदं कार्यं कारणात्मानमन्तरेण स्वतन्त्रमेवास्ति । 'सर्वं तं परादाद् योऽन्यत्रात्मनः सर्वं वेद' (बृ. २-४-६) इत्यादिश्रवणात् । कारणात्मना तु सत्यं कार्यस्य प्रागुत्पत्तेरविशिष्टम् । ननु शब्दादिहीनं ब्रह्म जगतः कारणम् । बाढम् । न तु शब्दादिमत् कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीं वा अस्ति ॥ सू. भा. २-१-७, पा. १८९.

(५) नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि ।
अजायमानो बहुधा मायया जायते तु सः ॥ गौ. का. ३-२४.

भाष्यम् – मायाभिः, इन्द्रियप्रज्ञाभिः, अविद्यारूपाभिः–इत्यर्थः । 'अजायमानो बहुधा विजायते' (तै. आ. ३-१२) इति श्रुतेः । तस्मान्माय-

यैव जायते तु सः । तुशब्दोऽवधारणार्थः, 'माययैव' इति । नह्यजायमानत्वं बहुधा जन्म चैकत्र संभवति । अग्नाविव शैत्यम्, औष्ण्यं च ॥ पा. २१८.

(६) अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतम् अवतिष्ठते ॥ सू. भा. २-१-२७, पा. २१३.

३६. स्यान्मनीषा केषाञ्चित् – नेमौ सत्कार्यवादमायाजातिवादवर्णनप्रकारौ श्रुत्यक्षरानुलोम्यं भजेते इव । यत्कारणं सर्वत्र वेदान्तेषु तत्त्वत एव ब्रह्मणो जगज्जन्मादि श्रूयमाणमुपलभामहे 'आत्मन आकाशः संभूतः' (तै. २-१), 'स प्राणमसृजत' (प्र. ६-४), 'अक्षरात् संभवतीह विश्वम्' (मुं. १-१-७), 'यतो वा इमानि भूतानि जायन्ते' (तै. ३-१), 'स इमाँल्लोकानसृजत' (ऐ. १-२), 'तत्तेजोऽसृजत' (छां. ६-२-३)-इत्यादिवचनैः । एवं गीतास्वपि 'अहं सर्वस्य प्रभवः' (गी. १०-८)-इत्यादिभिः । सूत्रं च ब्रह्मलक्षणसमर्पकम् 'जन्माद्यस्य यतः' (वे. सू. १-१-२) इति । तत् कथमिदं सर्वं पृष्ठतः कृत्वा जगन्निषेधः क्रियेत, मायाजातिवादश्चाङ्गीक्रियेत ? तस्मात् सर्वज्ञत्वात् सर्वशक्तित्वाच्च ब्रह्म तथ्यत एव जगत्कारणम् इत्येव युक्तमुत्पश्यामः । 'यः सर्वज्ञः सर्ववित्' (मुं. १-१-९), 'परास्य शक्तिर्विविधैव श्रूयते' (श्वे. ६-८) इत्यादिश्रुतिभ्य इति । नैषा शङ्का युक्ता । यतः सर्वत्र नियमेन पररूपप्रतिषेधेनैव ब्रह्मणो यथार्थं रूपं समर्प्यते तात्पर्यतः 'अथात आदेशो नेति नेति' (बृ. २-३-६), 'न सत्तन्नासदुच्यते' (गी. १३-१२) इति । न च तत्स्वरूपावगमादूर्ध्वं काचिदाकाङ्क्षा भवति । उत्पत्त्यादिश्रुतीनां तु, आत्मैकत्वप्रतिपत्त्यर्थता श्रूयते 'तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' (छां. ६-८-४) इति । तस्मात्, निराकाङ्क्षश्रुतीनां बलीयस्त्वमुपेत्य, जगज्जन्मादिश्रुतीनामन्यार्थानां मायिकजन्मादिपरत्वेन नयनं न्याय्यमेव 'इन्द्रो मायाभिः' (बृ. २-५-१९) इति श्रुतेः ।

सर्वशक्तित्वमपि ब्रह्मणो व्यावहारिकमेव । शक्तेरपि कारणानन्यत्वात् कार्यवदेव । 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-१२), 'आत्मैवेदं सर्वम्' (छां. ७-२५-२)-इत्यादिसावधारणश्रुतिभ्य इत्यनवद्यम् ॥

(१) स एष नेति नेतीति व्याख्यातं निह्नुते यतः ।
सर्वमग्राह्यभावेन हेतुनाजं प्रकाशते ॥ गौ. का. ३-२६.

(२) कस्मात् पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशेषत्वं न पुनरितरशेषत्वमितरासामिति ? उच्यते । विशेषनिराकरणश्रुतीनां निराकाङ्क्षार्थत्वात् । न ह्यात्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकाङ्क्षा उपजायते । पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ईं. ७), 'अभयं वै जनक प्राप्तोऽसि' (बृ. ४-२-४), 'विद्वान् न बिभेति कुतश्चन' (तै. २-९) - इत्यादिश्रुतिभ्यः । तथैव च विदुषां तुष्ट्यनुभवादिदर्शनात् । विकारानृताभिसंध्यपवादाच्च 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (बृ. ४-४-१९) इति । अतो न विशेषनिराकरणश्रुतीनामन्यशेषत्वमवगन्तुं शक्यते । नैवम् उत्पत्त्यादिश्रुतीनां निराकाङ्क्षार्थप्रतिपादनसामर्थ्यमस्ति । प्रत्यक्षं तु तासामान्यार्थत्वं समनुगम्यते । तथा हि 'तत्रैतच्छुङ्गमुत्पतितं सोम्य विजानीहि नेदममूलं भविष्यति' (छां. ६-८-३) इत्युपन्यस्योदर्के सत एवैकस्य जगन्मूलस्य विज्ञेयत्वं दर्शयति ॥ सू. भा. ४-३-१४, पा. ४९८, ४९९.

(३) एवमुत्पत्त्यादिश्रुतीनामेकात्म्यावगमपरत्वान्नानेकशक्तियोगो ब्रह्मणः ॥ सू. भा. ४-३-१४, पा. ४९९.

(४) तस्मात् कारणस्यात्मभूता शक्तिः, शक्तेश्चात्मभूतं कार्यम् ॥
सू. भा. २-१-१८. पा. २०४.
[अत्र कार्यस्य शक्तिद्वारेण, शक्तेश्च साक्षात्, कारणात्मत्वमुक्तम् ॥]

(५) भूततोऽभूततो वापि सृज्यमाना समा श्रुतिः ।
निश्चितं युक्तियुक्तं च यत्तद्भवति नेतरत् ॥ गौ. का. ३-२३.

भाष्यम् - अविद्यासृष्टिविषयैव सर्वा गौणी मुख्या च सृष्टिर्न परमार्थतः । 'स बाह्याभ्यन्तरो ह्यजः' (मुं.) इति श्रुतेः ॥ गौ. का. भा. ३-२३, पा. २१८.

(६) नेह नानेति चाह्नायादिन्द्रो मायाभिरित्यपि ।
अजायमानो बहुधा मायया जायते तु सः ॥ गौ. का. ३-२४.

(७) सतो हि मायया जन्म युज्यते न तु तत्त्वतः ।
तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥ गौ. का. ३-२७.

भाष्यम् – सतो विद्यमानस्य वस्तुनो रज्ज्वादेः सर्पादिवन्मायया जन्म युज्यते । न तु तत्त्वतो यथा, तथाऽग्राह्यस्यापि सत एवात्मनो रज्जु-सर्पवज्जगद्रूपेण मायया जन्म युज्यते । न तु तत्त्वत एवाजस्य आत्मनो जन्म । यस्य पुनः परमार्थसदजमात्मतत्त्वं जगद्रूपेण जायते वादिनः, न हि तस्याजं जायत इति शक्यं वक्तुम् । विरोधात् । ततस्तस्यार्थाजातं जायत इत्युपपन्नम् । ततश्चानवस्था जाताजायमानत्वेन ॥

गौ. का. ३-२७, पा. २२०.

सामान्यविशेषप्रक्रियाविमर्शः –

३७. तदेवं कार्यकारणविवेकप्रक्रिया कार्यस्वरूपनिर्धारणव्याजेन कार्यकारणभावप्रतिषेधपूर्वकं परमार्थतत्त्वनिर्धारणायेत्येतदवधारितम् । अधुना सामान्यविशेषप्रक्रिया परीक्ष्यते । तत्रेत्थं श्रुतिः–'स यथा दुन्दुभे-र्हन्यमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दु-भ्याघातस्य वा शब्दो गृहीतः ॥' (बृ. २-४-७) इति । अयमभिप्रायः । यथा ताड्यमानस्य दुन्दुभेरभिव्यज्यमानान् शब्दान् 'दुन्दुभिशब्दा' इति दुन्दुभ्याघातविशिष्टशब्दसामान्यविशेषत्वेनैव ग्रहीतुं शक्नुयात् कश्चित्, न तु त एव विशेषास्ततो निर्भिद्य ग्रहीतुत्, विशेषाणां स्वातन्त्र्येणा-भावादेव, एवं सर्वत्र विशेषेषु सञ्चारयितव्यो न्यायः । तत्तत्सामान्य-व्यतिरेकेण तत्तद्विशेषाभावश्चावसेय इति । अत एव हि 'स यथा शङ्खस्य ध्मायमानस्य' (बृ. २-४-८), 'स यथा वीणायै वाद्यमानायै' (बृ. २-४-९) इति विविधशब्दसामान्यविशेषदृष्टान्तोपादानं करोति । तस्मात्, यथैव सर्वे शब्दविशेषास्तत्तच्छब्दसामान्यविशेषव्यतिरेकेण न विद्यन्ते, एवं शब्दसामान्यविशेषा अपि स्वमहासामान्यशब्दव्यतिरेकेण

न विद्यन्ते, एवं स्पर्शरूपरसगन्धसामान्यविशेषाणामपि स्वस्वमहासामान्याव्यतिरिक्तम् । एवमेव च सत्सामान्याव्यतिरिक्तत्वं सर्वसामान्यविशेषाणां जगत्स्थितिकाले इत्यवगच्छामः ॥

अथ किमिदं सत्सामान्यमिति ? न तावत्तार्किकसंमतं सर्वप्रमेयविशेषानुगतं सत्ताख्यम् । यतस्तस्यापि स्वात्मसाक्षिचैतन्यव्याप्तत्वमस्तीति स्वव्यापकातिरेकेणाभाव एवानुभूयते । नन्वेवं चिद्रूपस्यात्मनः सद्व्यतिरिक्तत्वाभ्युपगमेऽसत्त्वापत्तिर्दुर्वारा स्यात् । न चात्मनोऽसत्त्वं कल्पयितुमिष्टं शक्यं वेत्यतोऽकामेनाप्यात्मनि सत्तासामान्यमभ्युपगन्तव्यम् । न । सुषुप्तप्रलयादावात्मनोऽवतिष्ठमानस्यापि सत्तासामान्याननुवृत्तेः । न हि प्रागुत्पत्तेर्द्रव्यादिविशेषास्तित्वमभ्युपयन्ति तार्किकाः । असत्कार्यवादहानप्रसङ्गात् । न च निर्विशेषं सामान्यं समस्ति क्वचिदिति । तस्मात्, आत्मन एवेदं सदात्मकं स्फुरणं सर्वत्र सामान्यविशेष्वनुगतं स्थितिकाले, तच्च स्वरूपमेव चिदात्मनो नान्यत् सत्तासामान्यं नामास्तीत्यवगम्यते । एवं च दुन्दुभ्यादिदृष्टान्तैः सामान्यविशेषभावोऽयं स्थितिकाले श्राव्यमाणो नात्मनि महासामान्यत्वं प्रतिबोधयितुम्, किं तर्हि सामान्यविशेषभावस्यैव चिद्व्यतिरेकेणाभावं श्रावयित्वा निःसामान्यविशेषे चिदात्मनि चित्तमवतारयितुम्—इति सामान्यविशेषप्रक्रियाप्यध्यारोपापवादप्रक्रियावान्तरभेद एवेति सिद्धम् ॥

(१) अनेकदृष्टान्तोपादानमिह सामान्यबहुत्वख्यापनार्थम् । अनेके हि विलक्षणाश्चेतनाचेतनरूपाः सामान्यविशेषाः । तेषां पारम्पर्यगत्या यथैकस्मिन् महासामान्येऽन्तर्भावः प्रज्ञानघने कथं नाम प्रदर्शयितव्य इति ॥
बृ. भा. २-४-९, पा. ७६२.

(२) शब्दसामान्यस्य ग्रहणेन तद्गता विशेषा गृहीता भवन्ति । न तु त एव निर्भिद्य ग्रहीतुं शक्यन्ते विशेषरूपेणाभावात् तेषाम् । तथा प्रज्ञानव्यतिरेकेण स्वप्नजागरितयोर्न कश्चिद् वस्तुविशेषो गृह्यते । तस्मात् प्रज्ञानव्यतिरेकेणाभावो युक्तस्तेषाम् ॥ बृ. भा. २-४-७, पा. ७६२.

(३) ननु वैशेषिकपक्षेऽपि सत्सामानाधिकरण्यं सर्वस्योपपद्यते । द्रव्यगुणादिषु सच्छब्दबुद्ध्यनुवृत्तेः । 'सद् द्रव्यम्', 'सन् गुणः', 'सत्

कर्म' – इत्यादिदर्शनात् । सत्यमेवं स्यादिदानीम्, प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः । प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात् । न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति । तस्मात्, वैशेषिकपरिकल्पितात् सतोऽन्यत् कारणमिदं सदुच्यते । मृदादिदृष्टान्तेभ्यः ॥

छां. ६-२-१, पा. ५०७.

द्रष्टृदृश्यप्रक्रियापरिशीलनम् –

३८. नैसर्गिकदृष्ट्या वीक्षितं जगदिदं 'अहमिदमनेन पश्यामि' इति द्रष्टृदर्शनदृश्यत्रिपुटीलक्षणं विभाव्यते । तत्र द्रष्टा करणव्यापारेण विषयान् व्याप्यानुभविता । दर्शनं करणं चक्षुःश्रोत्रादि । दृश्यं शब्द-स्पर्शरूपादि विषयलक्षणम् । करणव्यापारस्य फलमपि दर्शनशब्दवाच्यं यस्मिन् जाते 'पश्यति', 'शृणोति', 'मनुते', 'विजानाति' – इत्यादि-व्यवहारो भवति । तत्रैवं स्थिते दृश्यविषयाद् विविच्य द्रष्टारं यत्तत् स्वरूपनिर्धारणं तद् 'द्रष्टृदृश्यविवेक' इत्युच्यते । तत्र द्रष्टा तावत् 'अहं-प्रत्ययगम्यः', दृश्यं तु 'इदंप्रत्ययगम्यम्' इति द्रष्टृदृश्यविभागे अहमिदं प्रत्ययतन्त्रे स्थिते, यत्रैकान्ततोऽहंप्रत्ययगम्यत्वमेव न जातुचित् इदंप्रत्यय-गम्यत्वं, स एव परमार्थद्रष्टा ; तदितरे तु गौणा द्रष्टारः, मिथ्याद्रष्टारो वा भवितुमर्हन्ति । तत्र लोके 'राजा चारचक्षुषा पश्यति' इत्यत्र गौणं द्रष्टृत्वम् । राजचारयोर्भेदे प्रसिद्धे सति चारद्रष्टृत्वस्य राज्ञि उपचारात्, देहेन्द्रियादिषु द्रष्टृत्वबुद्धिशब्दौ तु न गौणौ, किं तु मिथ्यैव । तत्र सर्वत्र चक्षुरादौ अद्रष्टृभूतेऽपि 'अहं पश्यामि' इत्येवमादिबुद्धिशब्दयोर्निरुप-चरितयोरेवोत्पत्तिदर्शनात् । अत एव हि श्रुतिः "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते इतर-मभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति" (बृ. ४-५-१५) इत्याविद्यकद्वैतविषय एव द्रष्टृदृश्यविभाग इत्याह । सेयम् आविधिकी लौकिकी दृष्टिः, अन्तःकरण-वृत्तिरूपत्वादनित्या । वृत्तयश्च जायमाना एव चैतन्यव्याप्ता चिदाभासाश्च

जायन्त इति लौकिकैस्त एव ज्ञानशब्दवाच्या इति गण्यन्ते । या पुनर्नित्यचैतन्यस्वरूपा आत्मनः स्वभावभूता, सैव पारमार्थिकी दृष्टिः । नित्याविपरिलुप्तस्वाभाव्यात् । तत्र च सवितृतत्प्रकाशवदभिन्नत्वं द्रष्टृदृश्ययोः । एतयैव दृष्ट्या द्रष्टेत्युच्यते परमात्मा तत्प्रकाश्यत्वेन दृश्यभूतम् अन्तःकरणवृत्त्यापेक्ष्य । अयं तु द्रष्टैव न दृश्यं जातुचिदपीत्यतः परमार्थद्रष्टा । 'न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः । एष त आत्मा सर्वान्तरः' (बृ. ३-४-२) इति श्रुतेः । लौकिकं तु द्रष्टृत्वम् अस्मिन् तत्तदन्तःकरणवृत्त्यध्यारोपापेक्षम् । इदमेव हि प्रमातृत्वं नामात्मनः, यद्देहेन्द्रियमनआदिष्वहंममाभिमानकृतमित्यवोचाम प्राक् (खं. २५, पा. ३६) । अनयैव चानित्यदृष्टिव्यापृत्या स्वीयत्वेनाविद्याध्यारोपितया 'पश्यति', 'शृणोति' इत्यादिव्यवहारास्पदं भवत्यात्मा । अनयैव हि दृष्ट्या समन्वितत्वेन विभाव्यमानोऽयं प्राणभृत् 'द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' (प्र. ४-९) इति चोच्यते । वस्तुतस्तु नैव नित्यदृष्टिमतः सर्वसाक्षिणः परमात्मनोऽन्यो द्रष्टास्तीति कृत्वा श्रुतिर्विज्ञापयति 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (बृ. ४–३–२३) इति । 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाता' (बृ. ३–७–२३) इति च । यदा तु लौकिकीयं दृष्टिर्व्यभिचरत्स्वरूपत्वेन सुषुप्त्याद्यवस्थानुशीलनेन विनिश्चीयते, तदा द्रष्ट्रादित्रिपुटीरहितत्वेनाध्यवस्यते सर्वव्यवहारातीत एवेत्यध्यारोपापनयनेन विज्ञाप्यते 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् तत् केन कं जिघ्रेत् तत् केन कं रसयेत् तत् केन कमभिवदेत् तत् केन कं शृणुयात् तत् केन कं विजानीयाद् येनेदं सर्वं विजानाति तं केन विजानीयात् स एष नेति नेत्यात्मा' (बृ. ४–५–१५) इति ॥

(१) यत्र यस्मिन्नविद्याकल्पिते कार्यकरणसंघातोपाधिजनिते विशेषात्मनि खिल्यभावे हि यस्माद् द्वैतमिव (भवति) परमार्थतोऽद्वैते ब्रह्मणि...तत् तत्र

यस्माद् द्वैतमिव तस्मादेव, इतरोऽसौ परमात्मनः खिल्यभूत आत्मा अपरमार्थः चन्द्रादेरिवोदकचन्द्रादिप्रतिबिम्बः, इतरो घ्राता इतरेण घ्राणेन, इतरं घ्रातव्यं जिघ्रति । इतर इतरमिति कारकप्रदर्शनार्थम्, जिघ्रतीति क्रियाफलयोरभिधानम्। यथा छिनत्तीति ॥ बृ.भा. २-४-१४, पा. ७६८.

(२) न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः । एष त आत्मा सर्वान्तरः ॥ बृ. ३-४-२.

भाष्यम् – दृष्टिरिति द्विविधा भवति लौकिकी पारमार्थिकी चेति । तत्र लौकिकी चक्षुःसंयुक्ता अन्तःकरणवृत्तिः । सा क्रियत इति जायते विनश्यति च । या तु आत्मनो दृष्टिः – अद्युष्णप्रकाशादिवत् – सा च द्रष्टुः स्वरूपत्वान्न जायते न विनश्यति च । सा क्रियमाणया उपाधिभूतया संसृष्टेव इति व्यपदिश्यते 'द्रष्टा' इति, भेदवच्च 'द्रष्टा', 'दृष्टिः'–इति च । यासौ लौकिकी दृष्टिः, चक्षुर्द्वारा रूपोपरक्ता जायमानैव नित्यया आत्मदृष्ट्या संसृष्टेव तत्प्रतिच्छाया, तया व्याप्तैव जायते तथा विनश्यति च । तेनोपचर्यते द्रष्टा सदा पश्यन्नपि 'पश्यति' 'न पश्यति' चेति । न तु पुनः द्रष्टुर्दृष्टेः कदाचिदप्यन्यथात्वम् । तथा च वक्ष्यति षष्ठे 'ध्यायतीव लेलायतीव' (४-३-७), 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (४-३-२३) इति च ॥ बृ. भा. ३-४-२, पा. ८०७.

(३) 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते', (बृ. ४-३-२३), 'न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यते', 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' (बृ. ४-३-२४ प्रभृति ३० पर्यन्तम्) ॥

भाष्यम् – 'यदस्य जाग्रत्स्वप्नयोश्चक्षुराद्यनेकोपाधिद्वारं चैतन्यात्मज्योतिःस्वाभाव्यम् उपलक्षितं दृष्टाद्यभिधेयव्यवहारापन्नम्, सुषुप्ते उपाधिभेदव्यापारनिवृत्तौ अनुज्ञात्यमानत्वादनुपलक्ष्यमाणस्वभावमपि उपाधिभेदेन भिन्नमिव यथाप्राप्तानुवादेनैव भिद्यमानत्वमुच्यते' ॥

बृ. भा. ४-३-३०, पा. ८९९.

(४) अथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माभिव्याहाराय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रम् । अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः ॥ छां. ८-१२-४, ५.

भाष्यम् – 'यो वेद स आत्मा' इत्येवं सर्वत्र प्रयोगाद् वेदनमस्य स्वरूपमित्यवगम्यते । यथा 'यः पुरस्तात् प्रकाशयति स आदित्यः, यो दक्षिणतो यः पश्चाद् य उत्तरतो य ऊर्ध्वं प्रकाशयति स आदित्यः' इत्युक्ते प्रकाशस्वरूप इति गम्यते ॥ छां. भा. ८-१२-५, पा. ६०२.

(५) आत्मनः सत्तामात्र एव ज्ञानकर्तृत्वम्, न तु व्यापृततया । यथा सवितुः सत्तामात्र एव प्रकाशनकर्तृत्वम्, न तु व्यापृततयेति तद्वत् ॥ छां. भा. ८-१२-५, पा. ६०२.

(६) अकृत्स्नो हि स प्राणश्चैव प्राणो नाम भवति । वदन् वाक् पश्यंश्चक्षुः शृण्वञ्श्रोत्रं मन्वानो मनस्तान्यस्यैतानि कर्मनामान्येव । स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो ह्येषोऽत एकैकेन भवत्यात्मेत्येवोपासीतात्र ह्येते सर्वं एकं भवन्ति ॥ बृ. १-४-७.

भाष्यम् – तान्येतानि प्राणादीनि, अस्यात्मनः कर्मनामानि कर्मजानि नामानि । कर्मनामान्येव, न तु वस्तुमात्रविषयाणि । अतो न कृत्स्नात्मवस्त्ववद्योतकानि ।.... यावदयमेवं वेद 'पश्यामि', 'शृणोमि', 'स्पृशामि' इति वा स्वभावप्रवृत्तिविशिष्टं वेद तावदञ्जसा कृत्स्नमात्मानं न वेद । कथं पुनः पश्यन् वेदेति ? आह । आत्मेत्येव । आत्मेति प्राणादीनि विशेषणानि यान्युक्तानि तानि यस्य स आप्नुवंस्तानि आत्मेत्युच्यते । स तथा कृत्स्नविशेषोपसंहारी सन् कृत्स्नो भवति ॥ बृ. भा. पा. ६६०.

[अत्र द्रष्टृत्वादिकम् औपाधिकत्वात् कृत्स्नं न भवति, परिच्छिन्नमेव त्वात्मरूपम् । चैतन्यरूपेण स्वरूपेण चक्षुराद्युपाधिविशेषजनितानि द्रष्टृत्वादिविशेषणानि व्याप्नुवंस्तु कृत्स्नतां प्राप्नोतीति ज्ञस्वरूपेण आत्मेत्येव परमार्थद्रष्टा वेदितव्य इत्युक्तम् ॥]

पञ्चकोशविवेकप्रक्रियापरिशीलनम् –

३९. अथ पञ्चकोशविवेकप्रक्रियामधिकृत्य किञ्चिद् विचारयामः । तैत्तिरीयके 'सत्यं ज्ञानमनन्तं ब्रह्म' इति ब्रह्मलक्षणमभिधाय तद् 'यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह' इति बुद्धिगुहायां वेदितव्यत्वं श्रावयति । तद्वेदनप्रकारविशदीकरणाय ब्रह्मात्मनः सकाशादाकाशादिक्रमेण पञ्चभूतसृष्टिं ततो भौतिकान्नरसमय-

देहोत्पत्तिं चानुशास्ति 'अन्नात्पुरुषः' इति। तस्मिन्नात्मत्वं प्राकृतजनैरध्यारोप्यमाणमनूद्य तस्मात् 'अन्योऽन्तर आत्मा प्राणमयः' इति प्राणे आत्मबुद्धिं संक्रामयति। तदनु च 'अन्योऽन्तर आत्मा मनोमयः', 'अन्योऽन्तर आत्मा विज्ञानमयः', 'अन्योऽन्तर आत्मा आनन्दमयः' इति चान्यमन्यमन्तरात्मत्वेन ग्राहयित्वा आनन्दमयस्य पुच्छत्वेन ब्रह्मान्ते श्रावयतीति तदेव परमार्थतः सर्वाभ्यन्तरतम आत्मा सर्वस्येति मन्यत इति गम्यते। न ह्येकस्य पुरुषस्य पञ्चात्मानः संभवन्तीति। 'स य एवंवित्। अस्माँल्लोकात् प्रेत्य। एतमन्नमयमात्मनमुपसंक्रामति'। एवं प्राणमयम्, मनोमयम्, विज्ञानमयम्, आनन्दमयमात्मानं चोपसंक्रामति – इति सर्वेषामप्यानन्दमयान्तानामुपसंक्रमितव्यत्वेनैवोपसंहाराच्चैवमिति गम्यते। अतोऽत्राप्युत्तरस्मिन्नुत्तरस्मिन् कोशे आत्मबुद्ध्यध्यारोपणं पूर्वस्मिन् पूर्वस्मिंस्तदपोहनेन परमार्थात्मभूते ब्रह्मण्येवात्मबुद्धिस्थिरीकरणार्थमुपायः प्रक्रियेति गम्यते॥

(१) रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके।
तेषामात्मा परो जीवः खं यथा संप्रकाशितः॥

गौ. का. ३-११.

(२) अन्नमयादिभ्य आनन्दमयान्तेभ्य आत्मभ्योऽभ्यन्तरतमं ब्रह्म विद्यया प्रत्यगात्मत्वेन दिदर्शयिषु शास्त्रम् अविद्याकृतपञ्चकोशापनयनेन अनेकतुषकोद्रववितुषीकरणेनेव तदन्तर्गततण्डुलान् प्रस्तौति 'तस्माद्वा एतस्मादन्नरसमयात्' इत्यादि॥ तै. भा. २-२, पा. २८९.

(३) अतश्च नान्नमयेनैव परिच्छिन्नेनात्मना आत्मवन्तः प्राणिनः, किं तर्हि, तदन्तर्गतेन प्राणमयेनापि साधारणेनैव सर्वपिण्डव्यापिना आत्मवन्तो मनुष्यादयः। एवं मनोमयादिभिः पूर्वपूर्वव्यापिभिरुत्तरोत्तरैः सूक्ष्मैरानन्दमयान्तैराकाशादिभूतारब्धैरविद्याकृतैरात्मवन्तः सर्वे प्राणिनः। तथा स्वाभाविकेनाप्याकाशादिकारणेन नित्येनाविकृतेन सर्वगतेन सत्यज्ञानानन्तलक्षणेन पञ्चकोशातिगेन सर्वात्मना आत्मवन्तः। स हि परमार्थत आत्मा सर्वेषाम् इत्येतदप्यर्थादुक्तं भवति॥ तै. भा. २-३, पा. २९१.

अवस्थात्रयविवेकप्रक्रियाविमर्शः –

४०. अथेदानीम् अवस्थात्रयविवेकप्रक्रिया विमृश्यते। प्रसिद्धास्तावत् तिस्र अवस्था जीवस्य, जागरितं स्वप्नः सुषुप्तं चेति। तत्र स्वप्नजागरितयोर्दर्शनवृत्तित्वात्, सुषुप्तस्य चादर्शनवृत्तित्वात्, दर्शनादर्शनवृत्तिभ्यामतिरिक्तस्यान्यस्य चिन्तयितुमप्यशक्यत्वात्, एतासु तिसृष्वेव विचारितासु सर्वासामवस्थानां तदन्तर्गतज्ञेयस्य च सतत्त्वं विचारितं भवतीति स्पष्टम्। तत्रावस्थानां चैतन्यरूपात्माश्रयेणैवात्मलाभात्, तासामन्योन्यव्यभिचारेऽपि चैतन्यस्य तद्धर्मासंसृष्टस्यैव सर्वत्रानुवृत्तेः, जाग्रत्स्वप्नयोस्तदन्तर्गतप्रपञ्चयोश्च आत्मचैतन्यव्यतिरेकेणानुपलब्धेः, मिथ्यात्वम् अवस्थानाम्, सत्यत्वं सर्वमहत्त्वं चात्मनः सिध्यति। सुषुप्तौ सदात्मना संपत्तेश्च निष्प्रपञ्चसदात्मत्वमेवात्मनः स्वभाव इति गम्यते॥

(१) ज्ञेयमेतान्येव त्रीणि। एतद्व्यतिरेकेण ज्ञेयानुपपत्तेः॥
गौ. का. भा. ४-८८, पा. २५२.

(२) स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥ का. २-१-४.

(३) स वा एष एतस्मिन् स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः॥ बृ. ४-३-१६.

स वा एष एतस्मिन् बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव॥ बृ. ४-३-१७.

(४) प्रज्ञानव्यतिरेकेण स्वप्नजागरितयोर्न कश्चिद् वस्तुविशेषो गृह्यते। तस्मात् प्रज्ञानव्यतिरेकेण अभावो युक्तस्तेषाम्॥
बृ. भा. २-४-७, पा. ७६२.

(५) यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति॥
छां. ६-८-१.

(६) कथं पुनरन्तःप्रज्ञत्वादीनामात्मनि गम्यमानानां रज्ज्वादौ सर्पादिवत् प्रतिषेधादसत्त्वं गम्यत इति? उच्यते। ज्ञस्वरूपाविशेषेऽपि इतरेतरव्यभिचारादसत्यत्वं रज्ज्वादाविव सर्पधारादिविकल्पितभेदवत्। सर्वत्राव्यभिचाराज्ज्ञस्वरूपस्य सत्यत्वम्॥ मां. भा. ७, पा. १८७.

सद्ब्रह्मरूपत्वमेव स्वभावो जीवस्य –

४१. जागरिते कार्यकरणाभिमानित्वेन प्रमातृत्वमिव भवति। सुषुप्ते तु तदुपशमात् प्रमातृत्वस्यापि निवृत्तिरिव भवतीति तदा सद्ब्रह्मसंपत्तिः स्वरूपेऽप्ययश्च भवतीति श्राव्यते। स्वरूपात् कस्यचित् कदाचिदपि प्रच्युत्वसंभवात्, योऽसौ जागरिते प्रमातृभावः सोऽसौ मिथ्याभासमात्रमिति गम्यते। तदेतत् स्वप्नावस्थागतप्रमातृत्वविमर्शनेन स्फुटीभवति। न हि तत्र वास्तविकशरीरेन्द्रियसंबन्धो भवतीति कश्चन मन्यते। अथ च तत्रापि जागरिते इव श्रोतृत्वमन्तृत्वविज्ञातृत्वादिलक्षणप्रमातृत्वं प्रतिभासत आत्मनीति सुप्रसिद्धमेतत्। एवं जागरितकालेऽपि प्रतिभासमानं प्रमातृत्वं मिथ्यैवोपाधिकृतमिति गम्यते। स्वप्नजागरितयोरुभयोरपि तत्तत्काले जागरितवदेव भासमानत्वात्, केनचिदप्यसाधारणेन लिङ्गेन 'जागरितमिदम्' इति प्रत्यभिज्ञातुमशक्यत्वाच्च। यत एवम्, अतः स्वरूपापत्तिः श्रूयमाणा सुषुप्ते, जीवस्य स्वाभाविक्येव सती, जाग्रत्स्वप्नयोरविद्याकल्पितप्रमातृत्वलक्षणपररूपापत्त्यपेक्षयेत्यवसीयते॥

(१) एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः। स परेऽक्षर आत्मनि संप्रतिष्ठते॥ प्र. ४-९.

भाष्यम् – कार्यकरणसंघातोक्तोपाधिपूरणात् पुरुषः। स च जलसूर्यकादिप्रतिबिम्बस्य सूर्यादिप्रवेशवज्जलाद्याधारशोषे परेऽक्षर आत्मनि संप्रतिष्ठते॥ पा. १२७.

(२) अविद्याप्रत्युपस्थापितद्वैतसंवृत आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति। स तच्छ्रमापनुत्तये स्वमात्मानं परं ब्रह्म प्रविश्य विमुक्तकार्यकरणसंघातोऽकर्ता सुखी भवति संप्रसादावस्थायाम्॥

सू. भा. २-३-४०, पा. २९३.

(३) अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति स्वरूपस्यानपायित्वात्। स्वप्नजागरितयोस्तूपाधिसंपर्कवशात् पररूपापत्तिमिवापेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्वर्ण्यते॥ सू. भा. ३-२-७, पा. ३५१.

(४) निमित्तान्यपि च स्वप्ने न बुद्धये कर्मणे वा उचितानि विद्यन्ते। करणोपसंहाराद्धि नास्य रथादिग्रहणाय चक्षुरादीनि सन्ति। रथादिनिर्वर्तनेऽपि कुतोऽस्य निमेषमात्रेण सामर्थ्यं दारूणि वा॥ सू.भा. ३-२-३. पा. ३४५.

(५) तथा च श्रुतिरविकारानुबद्धमेव स्वप्नव्यापारं वर्णयति – 'उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन्' (बृ. ४-३-१२) इति। लौकिका अपि तथैव स्वप्नं कथयन्ति 'आरुक्षमिव गिरिशृङ्गम्, अद्राक्षमिव वनराजिम्' इति॥ सू. भा. २-३-४०, पा. २९४.

(६) स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना॥ गौ. का. २-५.

(७) बुद्ध्याद्युपाधिस्थानविशेषयोगात् उद्भूतस्य विशेषविज्ञानस्योपाध्युपशमे य उपशमः, स परमात्मना संबन्धः – इत्युपाध्यपेक्षयैवोपचर्यते न परिमितत्वापेक्षया॥ सू. भा. ३-२-३४, पा. ३७१.

(८) उपपद्यते चात्रेदृश एव संबन्धो नान्यादृशः, 'स्वमपीतो भवति' (छां. ६-८-१) इति हि स्वरूपसंबन्धमेनमामनन्ति। स्वरूपस्य चानपायित्वात्॥ सू. भा. ३-२-३५, पा. ३७१, ३७२.

आत्मनश्चैतन्यस्वभावत्वम् –

४२. स्यादेतत्। चैतन्यमप्यस्य व्यभिचरत्येव, यथा सुषुप्ते। यथैव हि बहिष्प्रज्ञत्वमस्य जागरिते, स्वप्ने त्वन्तःप्रज्ञत्वम्–इत्यवस्थयोस्तयोः परस्परव्यभिचारो भवति, तदन्तर्गतप्रपञ्चयोस्तद्विषयप्रज्ञयोरपि; एवं ज्ञस्वरूपस्यापि व्यभिचारो भवत्येव सुषुप्ते। प्रसिद्धं ह्येतत् सर्वस्य लोकस्य यत् सौषुप्तानुस्मरणम् 'न किञ्चिदवेदिषम्' इति। श्रुतिश्चात्र भवति 'नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति' (छां. ८-११-२) इति। अपि चेदमेव खलु सुषुप्तस्य सुषुप्तत्वं नाम यन्न किञ्चित्तत्र विजानातीति। यदि हि किञ्चिद् विजानीयात्, तर्हि तत एव स्वप्नजागरितयोरिव दर्शनवृत्तित्वमेव तस्यापीत्यवस्थान्तरत्वमेव हीयेतेति। अतो ज्ञस्वरूपमपि व्यभिचार्येवेति

न किञ्चिदप्यात्मनस्तत्त्वं सुषुप्तपरिशीलनाद् विज्ञातं भवति ; अथवा तत्रोपलम्भनैष्किञ्चन्यात्, शून्यं परमार्थ इत्येव युक्तं भवेदध्यवसातुमिति ॥

नैतदस्ति । अनुभवस्यानपलपनीयत्वात् । सुषुप्ते 'न किञ्चिदवेदिषम्' इति परामर्शः सौषुप्तानुभववतः खलु स्यात् । अनुभूतिरेव तु ज्ञस्वरूपमात्मन इति न तस्यापलापः शक्यः कर्तुं केनचित् । अत एव न शून्यवादस्यावसरोऽत्र । यत्तु श्रुत्युदाहरणम् 'नाह खल्वयमेवं संप्रत्यात्मानं जानाति' इत्यादि, तच्चेत् सुषुप्तौ विशेषविज्ञानाभावाभिप्रायेण, कामं भवतु तथा, न तेन नः किञ्चिच्छिद्यते । न हि सुषुप्तौ विशेषविज्ञानं दर्शनश्रवणादिरूपमस्तीति वयं प्रतिजानीमहे ; तदुपशमलक्षणं हि सुषुप्तमिष्टम् । विशेषविज्ञानाभावे कारणं तु नात्मनो ज्ञस्वरूपवियोगात्, किं तर्हि ज्ञेयाभावादेव तत्र । तथा ह्याह श्रुतिः 'यद् वै तन्न विजानाति विजानन् वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते अविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात्' (बृ. ४–३–३०) इति । तस्मात् चैतन्यं स्वरूपमेवात्मनः, प्रकाश इव सवितुः । सुषुप्तावचेतयमानता तु तत्र सर्वस्यापि चिदनन्यत्वेनावस्थितत्वात्, ततो विभक्तत्वाभावादेवेतरावस्थयोरिवेति सिद्धम् । अत एव हि श्रुतिः 'सति संपद्य न विदुः' (छां. ६–९–२), 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' (बृ. ४–३–२१) इति ॥

(१) सुषुप्ते व्यभिचरतीति चेन्न । सुषुप्तस्यानुभूयमानत्वात् ॥
गौ. का. ७, पा. १८७.

(२) यत्तु तत्र विनाशमेवापीतो भवति इति । तदपि विशेषविज्ञानविनाशाभिप्रायमेव, न विज्ञातृविनाशाभिप्रायम् ॥
सू. भा. १–३–१९, पा. ११४.

(३) एतदुक्तं भवति – विषयाभावादियमचेतयमानता न चैतन्याभावादिति । यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न स्वरूपाभावात्, तद्वत् ॥ सू. भा. २–३–१८, पा. २८१.

(४) विशेषविज्ञानोपशमलक्षणं तावत् सुषुप्ते न क्वचिद् विशिष्यते। तत्र सति संपन्नस्तावत् तदेकत्वान्न विजानातीति युक्तम् ॥

सू. भा. ३-२-७, पा. ३५१.

(५) सोऽयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा संपरिष्वक्तः सम्यक् परिष्वक्तः एकीभूतो निरन्तरः सर्वात्मा न बाह्यं किञ्चन वस्त्वन्तरं नाप्यान्तरम् आत्मनि 'अयमहमस्मि सुखी दुःखी वा' इति वेद। तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीः, तत्रायं हेतुर्मयोक्त एकत्वम् ॥ बृ. भा. ४-३-२१, पा. ८९२.

आत्मनो नित्यनिरवस्थत्वम् –

४३. योऽसौ सुषुप्ते प्राज्ञेनात्मनैकीभाव उक्तः, सोऽसावस्य स्वभाव एव, न पुनः सुषुप्तेऽपूर्ववत् प्राप्य इत्यावेदितम् । प्राज्ञत्वं च नित्यचैतन्यलक्षणप्रज्ञावत्त्वमेवेति स्वप्नजागरितयोरप्यनेनानुवृत्तेन भवितव्यमिति श्लिष्यते। अतो यथैवास्य सुषुप्तौ परमेश्वरत्वम्, तथैव स्वप्नजागरितयोरपीत्याप्नोति। तयोरवस्थयोः परम् अविद्याप्रत्युपस्थापितकार्यकरणसंघाताभिमानित्वलक्षणप्रमातृत्वावभासोऽप्यस्तीति तद्व्युदासेनास्य परमेश्वरत्वमपि पृथग् ज्ञाप्यते श्रुत्या 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥' (मुं. ३-१-२) इत्यादिवचनैः । तथा च तिसृष्वप्यवस्थासु अस्यात्मनोऽविद्याध्यारोपितप्रमातृत्वमपोह्य समं परमेश्वरत्वमेव बोध्यत इत्यतः सर्वावस्थारहितत्वमेव विवक्षितमवस्थात्रयप्रक्रिययेत्यवगम्यते । एवं हि तुरीयत्वोपदेशोऽवकल्पत इति ॥

(१) सुषुप्तोऽपि हि भूतपूर्वगत्या प्राज्ञ उच्यते। अथवा प्रज्ञप्तिमात्रमस्यैवासाधारणं रूपमिति प्राज्ञः। इतरयोर्विशिष्टमपि विज्ञानमस्तीति ॥

मां. भा. ५, पा. १८१.

[विशिष्टमपि विज्ञानमिति प्रमातृरूपाश्रितं विज्ञानमपीत्यर्थः। अपिशब्दात् स्वरूपभूतं प्रज्ञानमप्यस्तीति गम्यते ॥]

(२) प्राज्ञः परमेश्वरः । सर्वज्ञत्वलक्षणया प्रज्ञया नित्यमवियोगात् ॥
सू. भा. १-३-४२, पा. १४३.

(३) यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयद् कूटस्थनित्यदृक्स्वरूपमात्मानम् 'अहं ब्रह्मास्मि' इति न प्रतिपद्यते, तावज्जीवस्य जीवत्वम् । यदा तु देहेन्द्रियमनोबुद्धिसंघाताद् व्युत्थाप्य श्रुत्या प्रतिबोध्यते 'नासि त्वं देहेन्द्रियमनोबुद्धिसंघातः. नासि संसारी, किं तर्हि तद्यत् सत्यं स आत्मा चैतन्यमात्रस्वरूपः तत्त्वमसि' इति, तदा कूटस्थनित्यदृक्स्वरूपमात्मानं प्रतिबुध्य अस्माच्छरीराद्यभिमानात् समुत्तिष्ठन् स एव कूटस्थनित्यदृक्स्वरूप आत्मा भवति ॥ सू. भा. १-३-१९, पा. ११२.

(४) द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥
मुं. ३-१-१.

भाष्यम् – तयोः परिष्वक्तयोः, अन्यः एकः क्षेत्रज्ञो लिङ्गोपाधिः, वृक्षमाश्रितः पिप्पलं कर्मनिष्पन्नं सुखदुःखलक्षणं फलं स्वादु अनेकविचित्रवेदनास्वादरूपं स्वादु, अत्ति भक्षयति, उपभुङ्क्ते अविवेकतः । अनश्नन् अन्यः इतर ईश्वरो नित्यशुद्धबुद्धमुक्तस्वभावः सर्वज्ञः सर्वसत्त्वोपाधिरीश्वरः, नाभाति । प्रेरयिता ह्यसौ उभयोर्भोज्यभोक्त्रोः नित्यसाक्षित्वसत्तामात्रेण । स त्वनश्नन् अन्योऽभिचाकशीति, पश्यत्येव केवलम् ॥ मुं.भा. पा. १६५.

(५) यदा यस्मिन् काले पश्यति ध्यायमानोऽन्यं वृक्षोपाधिलक्षणाद् विलक्षणमीशम् असंसारिणम् अशनायापिपासाशोकमोहजरामृत्व्यतीतं सर्वस्य जगतः । 'अयमहमस्म्यात्मा सर्वस्य समः सर्वभूतस्थो नेतरोऽविद्याजनितोपाधिपरिच्छिन्नो मायात्मा'-इति । विभूतिं महिमानं च जगद्रूपम् 'अस्यैव मम परमेश्वरस्य' इति यदैवं द्रष्टा, तदा वीतशोको भवति ॥
मुं. भा. ३-१-२, पा. १६६.

(६) जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ मां. ३.

भाष्यम् – इष्यते च सर्वोपनिषदां सर्वात्मैक्यप्रतिपादकत्वम् । अतो युक्तमेवास्य आध्यात्मिकस्य पिण्डात्मनो द्युलोकाद्यङ्गत्वेन विराडात्मना आधिदैविकेनैकत्वमभिप्रेत्य सप्ताङ्गत्ववचनम् । ... विराजैकत्वमुपलक्षणार्थं हिरण्यगर्भाव्याकृतात्मनोः ॥ मां. भा. पा. १८०.

[अत्र जागरितात्मनः पिण्डाभिमानाद् व्युत्थापनेन प्रमातृत्वमपोह्य वैश्वानरात्मत्वं बोध्यते । एवं स्वप्नात्मनोऽपि तैजसत्वं नाम हिरण्यगर्भात्मत्वम् उपदिश्यते ॥]

(७) विश्वस्य सविषयत्वेन प्रज्ञायाः स्थूलाया भोज्यत्वम् । इह पुनः केवला वासनामात्रा प्रज्ञा भोज्येति प्रविविक्तो भोगः ॥

मां. भा. ४, पा. १८०.

[अत्र स्थूलप्रज्ञायाः, सूक्ष्मप्रज्ञायाश्च आत्मभोज्यत्वेनोपस्थापनात् प्रमातृत्वमपोह्य तत्साक्षिभूतपरमेश्वरत्वमेव ज्ञाप्यत इति गम्यते ॥]

(८) एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ मां. ६.

भाष्यम् – यथा प्राणलये परिच्छिन्नाभिमानिनां प्राणोऽव्याकृतः, तथा प्राणाभिमानिनोऽप्यविशेषापत्तौ अव्याकृतता समाना, प्रसवबीजात्मकत्वं च । तदध्यक्षश्चैकोऽव्याकृतावस्थः । परिच्छिन्नाभिमानिनामध्यक्षाणां च तेनैकत्वमिति पूर्वोक्तं विशेषणम् 'एकीभूतः प्रज्ञानघनः' इत्यादि उपपन्नम् ॥ पा. १८३.

[अत्र प्राज्ञस्य प्राणापराभिधानस्य जीवप्रसवबीजात्मकत्वमभ्युपगम्य सुषुप्तावस्थोपहितत्वमव्याकृतानन्यत्वं चोक्तम् । जीवप्रसवबीजात्मकत्वं च स्वप्नप्रबोधयोः प्रमातृत्वावभासलक्षणविकल्पस्यास्पदत्वात् ॥]

आत्मनोऽवस्थात्रयवत्त्वं मायिकम् –

४४. 'सुषुप्ताव्याकृतात्मनोरेकत्वम्, निर्विशेषत्वात्' इति सार्वत्रिकानुभवानुसारेण भाष्योक्तं किञ्चित् सूक्ष्मेक्षिकया विमर्शनीयमस्ति । यथा हि प्रलयावस्थायां नामरूपयोरव्याकृतावस्थयोरात्मैकत्वादात्मैकशब्देन व्यपदिशन्ति 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १-१) इत्याद्याः श्रुतयः, तथैव सुषुप्तावस्थायामपि नामरूपयोरव्याकृतावस्थयोरात्मनैकत्वमभिप्रेत्यैव 'एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्' (मां.५), 'सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य

परमो लोक एषोऽस्य परम आनन्दः' (बृ. ४-३-३२) इत्यादयः। तथा सुषुप्तात्मनः सकाशात् प्राणलोकदेवभूतानामुत्पत्तिं कथयन्ति 'स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति' (बृ. २-१-२०) इति। अत एव माण्डूक्येऽपि 'प्रभवाप्ययौ हि भूतानाम्' (मां. ६) इत्युक्तम्। एवं चात्रावस्थात्रयप्रक्रियाजगत्कारणप्रक्रिययोरुभयोरप्येकवाक्यता संजाता – उभयत्रापि परमेश्वरादेव जगज्जन्मस्थित्यप्यया उच्यन्ते तदनन्यत्वद्योतनार्थमिति। नामरूपयोश्च स्वप्नजागरितयोः परस्परव्यभिचारात्, सुषुप्ते च स्वरूपेणापि व्यभिचारात्, आत्मन्यविद्यारोपितत्त्वमेवेति, वस्तुतो मायामात्रमेवेदमात्मनोऽवस्थात्रयवत्त्वं नामेत्यवसीयते॥

(१) स्वापप्रबोधयोश्च प्रलयप्रभवौ श्रूयेते – 'यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' (कौ. ३-३) इति॥

सू. भा. १-३-३०, पा. १२८, १२९.

(२) श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते – स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनोऽनन्यागतत्वम्, संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना संपत्तेर्निष्प्रपञ्चसदात्मत्वं प्रपञ्चस्य ब्रह्मप्रभवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेकः – इत्येवञ्जातीयकः॥

सू. भा. २-१-७, पा. १८९.

(३) सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति। परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा॥

सू. भा. १-४-१८, पा. १६८.

(४) 'इदं सर्वं यदयमात्मा' (बृ. २-४-६), 'आत्मैवेदं सर्वम्' (छां. ७-२५-२), 'ब्रह्मैवेदममृतं पुरस्तात्' (मुं. २-२-१२), 'सर्वं

खल्विदं ब्रह्म' (छां. ३-१४-१) इत्येवमाद्याभिर्हि श्रुतिभिरविशेषेण त्रिष्वपि कालेषु कार्यस्य कारणानन्यत्वं श्राव्यते, तत्र यः परिहारः कार्यस्य तद्धर्माणां चाविद्याध्यारोपितत्वान्न तैः कारणं संसृज्यत इति । अपीतावपि स समानः । अस्ति चायमपरो दृष्टान्तः - यथा स्वयंप्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते, अवस्तुत्वात्, एवं परमात्मापि संसारमायया न संस्पृश्यत इति । यथा च स्वप्नदृगेकः स्वप्नदर्शनमायया न संस्पृश्यते, प्रबोधसंप्रमादयोरनन्वागतत्वात्, एवम् अवस्थात्रयसाक्ष्येकोऽव्यभिचारी अवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते । मायामात्रं ह्येतत् यत् परमात्मनोऽवस्थात्रयात्मनावभासनं रज्ज्वा इव सर्पादिभावेनेति । अत्रोक्तं वेदान्तार्थसंप्रदायविद्भिराचार्यैः-' अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ ' (गौ. का. १-१६) इति ॥

सू. भा. २-१-९, पा. १९१.

(५) यस्तु मध्ये बुद्धान्ताद्यवस्थोपन्यासात् संसारिस्वरूपविवक्षां मन्यते, स प्राचीमपि दिशं प्रस्थापितः प्रतीचीमपि दिशं प्रतिष्ठेत । यतो न बुद्धान्ताद्यवस्थोपन्यासेनावस्थावत्त्वं संसारित्वं वा विवक्षति, किं तर्हि, अवस्थारहितत्वम् असंसारित्वं च ॥ सू. भा. १-३-४२, पा. १४४.

[एतद् बृहदारण्यकस्थं ' कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः ' इति वाक्यमधिकृत्योक्तम् । माण्डूक्ये तु जागरितादिस्थानस्थस्य तत्र तत्रैव वैश्वानराद्यभेदप्रतिपादनात्, अन्ते च ' नान्तःप्रज्ञं न बहिःप्रज्ञम् ' इत्यादिना अवस्थासंस्पर्शराहित्यस्यैवोद्घोषणात्, अवस्थात्रयोपन्यासोऽवस्थावत्त्वप्रतिषेधार्थ एवेति निःसंशयं निश्चीयत इति बोध्यम् ॥]

अवस्थात्रयपरीक्षया जीवेश्वरविभागव्यवहारस्याप्यपबाधः -

४५. इदं चापरमत्रावस्थात्रयप्रक्रियया प्रसिध्यति यद् यथैव जागरितस्थयोर्नामरूपयोस्तत्कृतकार्यकरणसंघातानां चाविद्याकल्पितत्वेन मायिकत्वात्, मायिकमेव तत्र प्रतिभासमानं चेतनाचेतननानात्वं जीवानां प्रमातृत्वं कर्तृत्वं भोक्तृत्वं भोक्तृभोगविभागव्यवहारादिकं च; तथैव तदपेक्षया प्रतिभासमानमीश्वरस्येश्वरत्वं तथा जगत्कारणत्वं जीवानामीशितव्यत्वं च मायिकमेव, तथैव च नामरूपयोर्बीजशक्त्यात्मना

सावशेषत्वव्यवहारः सुषुप्तप्रलययोः। अविद्याकल्पितत्वाविशेषात् तत्रानुमेय-बीजशक्तेरिति । अत एव हि श्रुतिर्विज्ञानमयस्याजाद्वितीयब्रह्मानन्यत्वमाह, अविद्याकल्पितविषयसापेक्षान्तःप्रज्ञत्वादिविशेषनिराकरणपूर्वकम् अवस्था-त्रयतद्गतप्रपञ्चसंस्पर्शविधुरं तुरीयत्वमप्यामन आचष्ट इति ॥

(१) सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्या-मनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते । ताभ्यामन्यः सर्वज्ञ ईश्वरः 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' (छां. ८-१४-१) इति श्रुतेः ॥

सू. भा. २-१-१४, पा. २०१.

[अत्र नामरूपयोस्तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वमुक्तं व्यवहारे यथा-प्रतिभासमानमायिकशरीरमपेक्ष्य । परमार्थतस्तु तयोरात्मत्वमेवेति प्रागुक्तम् (३५), तन्न प्रसर्तव्यम् ॥]

(२) एवमविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति ; व्योमेव घटकरकाद्युपाध्यनुरोधि । स च स्वात्मभूतानेव घटाकाशस्थानीयान् अविद्या-प्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान् विज्ञाना-त्मनः प्रतीष्टे व्यवहारविषये । तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्ष-मेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च न परमार्थतो विद्यया अपास्त-सर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते । तथा चोक्तम् 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छां. ७-२४-१) इति, 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिना च । एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदन्ति वेदान्ताः सर्वे ॥ सू. भा. २-१-१४, पा. २०१.

(३) सूत्रकारोऽपि परमार्थाभिप्रायेण 'तदनन्यत्वम्' इत्याह । व्यव-हाराभिप्रायेण तु 'स्याल्लोकवत्' इति महासमुद्रस्थानीयतां ब्रह्मणः कथयति । अप्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियां चाश्रयति सगुणेषू-पासनेषूपयोक्ष्यत इति ॥ सू. भा. २-१-१४, पा. २०१, २०२.

(४) यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन् कूटस्थनित्यटङ्कस्वभावमात्मानम् 'अहं ब्रह्मास्मि' इति न प्रतिपद्यते तावज्जीवस्य जीवत्वम् । यदा तु देहेन्द्रियमनोबुद्धिसंघाताद् व्युत्थाप्य श्रुत्या

प्रतिबोध्यते ... तदा कूटस्थनित्यदृक्स्वरूपमात्मानं प्रतिबुद्धयास्माच्छरीराद्यभिमानात् समुत्तिष्ठन् स एव कूटस्थनित्यदृक्स्वरूप आत्मा भवति ॥
सू. भा. १-३-१९. पा. ११२.

(५) अपि च यदा 'तत्त्वमसि' इत्येवञ्जातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति, अपगतं तदा भवति जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वम् ॥ सू. भा. २-१-२२. पा. २०९.

(६) यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिष्वनुपलभ्यमानान्यविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवन्ति नाविद्यमानान्युत्पद्यन्ते, षण्डानामपि तदुत्पत्तिप्रसङ्गात्, एवमयमपि बुद्धिसंबन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति ॥
सू. भा. २-३-३१, पा. २८९.

(७) प्रलीयमानमपि चेदं जगच्छक्त्यवशेषमेव प्रलीयते । शक्तिमूलमेव च प्रभवति ॥ सू. भा. १-३-३०, पा. १३०.

(८) यथा ह्यविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवद्व्याहतः स्थितौ दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते ॥ सू. भा. २-१-९, पा. १९१-१९२.

[सुप्तिप्रलययोरनुमीयमानं बुद्धिसंबन्धविभागशक्त्यादिकं मिथ्याज्ञाननिमित्तमेवेत्युक्तम् ॥]

(९) निर्बीजतयैव चेत् सति प्रलीनानां संपन्नानां सुषुप्तिप्रलययोः पुनरुत्थानानुपपत्तिः स्यात् । मुक्तानां च पुनरुत्पत्तिप्रसङ्गः । बीजाभावाविशेषात् । ज्ञानदाह्यबीजाभावे च ज्ञानानर्थक्यप्रसङ्गः । तस्मात् सबीजत्वाभ्युपगमेनैव सतः प्राणतव्यपदेशः, सर्वश्रुतिषु च कारणत्वव्यपदेशः । अत एव 'अक्षरात्परतः परः' (मुं. २-१-२), 'स बाह्याभ्यन्तरो ह्यजः' (मुं. २-१-२), 'यतो वाचो निवर्तन्ते' (तै. २-९), 'नेति नेति' (बृ. २-३-६) इत्यादिना बीजत्वापनयनेन व्यपदेशः ॥
गौ. का. १-२, पा. १८३.

(१०) सतां विद्यमानानां स्वेन अविद्याकृतनामरूपमायास्वरूपेण, सर्वभावानां विश्वतैजसप्राज्ञभेदानाम् उत्पत्तिः ॥
गौ. का. भा. १-६. पा. १८४.

(११) नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥
मां. ७.

व्यवहारस्य सर्वथाप्यात्मासंस्पर्शित्वम् –

४६. दिङ्मात्रमिह दर्शितं जगत्कारणवादादिप्रक्रियापञ्चकस्य यथाध्यारोपापवादप्रक्रियावान्तरभेदत्वोपपत्तिस्तथा । एवमेवान्यासामपि प्रक्रियाणामत्रैव तात्पर्यमूह्यं जिज्ञासुभिः । सर्वत्र तु यद्यत् परमार्थतत्त्वबोधनोपायत्वेनात्मन्यध्यारोप्यते तत्तदपोद्यतेऽन्ततः – इत्येतावत्तु शरीरं प्रक्रियायाः । तत्र लोकसिद्धं जीवत्वमध्यारोप्य तस्य शरीरादिमत्त्वं, जन्मादिविक्रियावत्त्वं, कर्तृत्वं, भोक्तृत्वं, जन्मान्तरलोकान्तरगतिः, फलभोगावसाने पुनः शरीरान्तरग्रहणमित्येत्सर्वं वर्ण्यते शास्त्रे । तथा संसारे विरक्तस्य गुरुपादोपसर्पणं, तदुपदेशश्रवणं, श्रुतार्थमननं, तदर्थविज्ञानेन च संसारबन्धनान्मोक्ष – इत्येवंविधोऽपि शास्त्रीयव्यवहारोऽविद्याभूमामेवेत्युक्तं प्राक् (२७) । तदेवं सर्वविधव्यवहारभाक्त्वेऽप्यात्मनि न कश्चिद्विशेषोऽध्यारोप्तितरजतसर्पतलमलिनवस्त्वादिव्यवहारैः शुक्तिरज्जुव्योमादीनामिवेति च । अत्र नित्यशुद्धबुद्धमुक्तब्रह्मानन्यत्वेन नित्यं स्थितस्यैवात्मनोऽविद्याश्रयत्वविषयत्वव्यवहार इति न तत्स्वरूपे तेन कश्चिद्विशेषो भवतीत्येतद्विज्ञापनाय श्रुतिषु 'तत्त्वमसि', 'अहं ब्रह्मास्मि' – इत्यादीनि ब्रह्मात्मनोरितरेतरत्वबोधकानि वचनान्युपन्यस्यन्ते । अत एव च रज्जुशुक्त्यादिषु सर्पत्वरजतत्वादिसंव्यवहारकालेऽपि यथा सर्परजतादयो नैव सन्ति तत्र वस्तुतः, एवं संसारित्वप्रत्ययकालेऽपि नास्त्येवात्मनि वास्तविकं संसारित्वमिति रज्जुसर्पादिदृष्टान्तप्रणयने आशयोऽभियुक्तानामित्यवगम्यते । इयांस्तु दृष्टान्तदार्ष्टान्तिकयोर्विशेषः । दृष्टान्ते रज्ज्वादिषु सर्पादयो यद्यपि वस्तुवृत्तेन न सन्ति, ज्ञात्रैव केवलं भ्रान्तेन तत्र निश्चितसर्पादिबुद्धिशब्दप्रयोगौ क्रियेते ; दार्ष्टान्तिके पुनर्ब्रह्मात्मनि यद्यपि विपरीतज्ञानकृतमेवात्मसंबन्धनमिति संव्यवहारोऽस्ति, तथाप्याविद्यकमेव तत्र विपरीतप्रत्ययाश्रयत्वं तदपबाधश्चेति । यद्यपि यथैव सर्परजताद्यध्यारोपस्थले तत्तदध्यारोपो मिथ्याप्रत्ययत्वेन व्यवह्रियते, तथैवात्मन्यनात्माध्यारोपोऽपि मिथ्या-

प्रत्ययत्वेनैव व्यवह्रियते, तथापि तु यथा काचित्काः सर्पादिप्रत्ययाः सत्येव प्रमातुः प्रमातृत्वे जायन्ते विनिवर्तन्ते च न तथा अनात्माध्यारोपः ; प्रमातृत्वस्यैव तादृशाध्यारोपपुरःसरत्वात्, प्रमातृत्वेन सहैव च विनिवृत्तेस्तस्याध्यारोपस्य । अत एव चास्य मूलाध्यारोपस्य न सति काले आदिरन्तो वा शक्यकल्पनः, कालस्याप्यध्यारोपपुरःसरमेवात्मलाभादिति, अनादिरनन्तश्चायमित्यभियुक्ताः संव्यवहरन्ति । सर्वोऽपि विद्याविद्या-व्यवहारोऽयमविद्याभूमावेवेति प्रागावेदितम्, तन्न प्रस्मर्तव्यम् ॥

(१) आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च संघातैर्जातावेतद्विदर्शनम् ॥ गौ॰ का॰ ३-३.

(२) मरणे संभवे चैव गत्यागमनयोरपि ।
स्थितौ सर्वशरीरेषु ह्याकाशेनाविलक्षणः ॥
सङ्घाताः स्वप्नवत्सर्वे आत्ममायाविसर्जिताः ।
आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥
गौ॰ का॰ ३-९, १०.

(३) न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद्विशेषोऽस्ति । यथा कश्चित् संतमसे पतितां काञ्चिद् रज्जुमहिं मन्यमानो भीतो वेपमानः पलायते, तं चापरो ब्रूयात् 'मा भैषीः ; नायमहिः, रज्जुरेव' इति । स च तदुप-श्रुत्याहिकृतं भयमुत्सृजेत्, वेपथुं पलायनं च, न त्वहिबुद्धिकाले तदप-गमकाले च वस्तुनः कश्चिद्विशेषः स्यात् ; तथैवैतदपि द्रष्टव्यम् ॥
सू॰ भा॰ १-४-६, पा॰ १५४.

[अत्र यथा रज्ज्वामहिबुद्धिकाले तदपगमकाले च नास्ति वस्तुनि कश्चिद्विशेषः, एवमविद्यावत्त्वकाले तदपगमकाले च नात्मनि कश्चिद्विशेषोऽस्ति इत्युक्तम् ॥]

(४) ब्रह्मण्यविद्यानुपपत्तिरिति चेत् । न । ब्रह्मणि विद्याविधानात् । न हि शुक्तिकायां रजताध्यारोपणेऽसति शुक्तिकात्वं ज्ञाप्यते चक्षुर्गोचरा-पन्नायाम् 'इयं शुक्तिका, न रजतम्' इति । तथा 'सदेवेदं सर्वम्', 'ब्रह्मैवेदं सर्वम्', 'आत्मैवेदं सर्वम्', 'नेदं द्वैतमस्त्यब्रह्म' – इति ब्रह्मण्येकत्वविज्ञानं न विधातव्यं ब्रह्मण्यविद्याध्यारोपणायाम् असत्याम् ॥
बृ॰ भा॰ १-४-१०, पा॰ ६७०.

[अत्र विद्योपदेशश्रुत्यन्यथानुपपत्त्या ब्रह्मण्यविद्याविषयत्वं स्वीकर्तव्यमित्युक्तम् ॥]

(५) न ब्रूमः शुक्तिकायामिव ब्रह्मण्यतद्धर्माध्यारोपणा नास्तीति ; किं तर्हि, न ब्रह्म स्वात्मन्यतद्धर्माध्यारोपनिमित्तमविद्याकर्तृ चेति । भवत्वेवं नाविद्याकर्तृ भ्रान्तं च ब्रह्म । किं तु, नैवाब्रह्माविद्याकर्ता चेतनो भ्रान्तोऽन्य इष्यते । 'नान्योऽतोऽस्ति विज्ञाता', 'नान्यदतोऽस्ति विज्ञातृ', 'तत्त्वमसि', 'आत्मानमेवावेत्', 'अहं ब्रह्मास्मि', 'अन्योऽसावन्योऽहमस्मीति न स वेद' इत्यादिश्रुतिभ्यः ॥ बृ भा. १-४-१०, पा. ६७०.

[अत्र ब्रह्मण्यविद्याश्रयत्वम् अविद्यादृष्ट्या, अविद्याराहित्यं च परमार्थतः इत्युच्यते, श्रुतिप्रामाण्यात् ॥]

(६) [अ] न चायं व्यवहारभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुम् । 'तत्त्वमसि' इति ब्रह्मात्मभावस्यानवस्थाविशेषनिबन्धनत्वात् ॥ सू. भा. २-१-१४, पा. १९८.

[संसारित्वाध्यारोपणावस्थायामपि संसारित्वं नास्तीत्यवगम्यत इत्येतत् ॥]

[आ] स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद ॥ बृ. ४-४-२५.

भाष्यम् – एष सर्वस्या उपनिषदः संक्षिप्तोऽर्थ उक्तः । एतस्यैवार्थस्य सम्यक् प्रबोधाय उत्पत्तिस्थितिप्रलयादिकल्पना क्रियाकारकफलाध्यारोपणा च आत्मनि कृता । तदपोहेन च नेतिनेतीत्यध्यारोपितविशेषापनयद्वारेण पुनस्तत्त्वमावेदितम् ॥ पा. ९३७, ९३८.

(७) भावैरसद्भिरेवायमद्वयेन च कल्पितः ।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥ मां. का. २-३३.

भाष्यम् – अतोऽसद्भिरेव प्राणादिभावैरद्वयेन च परमार्थसता आत्मना रज्जुवत् सर्वविकल्पास्पदभूतेन अयं स्वयमेवात्मा कल्पितः सदैकस्वभावोऽपि सन् । ते च प्राणादिभावा अप्यद्वयेनैव सता आत्मना विकल्पिताः । न हि निरास्पदा काचित् कल्पनोपपद्यते । अतः सर्वकल्पनास्पदत्वात् स्वेनात्मना अद्वयस्याव्यभिचारात् कल्पनावस्थायामप्यद्वयता शिवा । कल्पना एव त्वशिवाः ॥ पा. २०५.

(८) तिमिरातिमिरदृष्टिवदविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यादिति चेन्न । 'ध्यायतीव लेलायतीव' (बृ. ४-३-७) इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् । अनेकव्यापारसंनिपातजनितत्वाच्चाविद्याभ्रमस्य । विषयत्वोपपत्तेश्च । यस्य चाविद्याभ्रमो घटादिवद्विविक्तो गृह्यते स नाविद्याभ्रमवान् ॥ बृ. भा. ४-४-६, पा. ९१९.

(९) शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः। रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः। प्रत्येत्येव हि केवलं रजतमिति न तु तत्र रजतमस्ति ॥ सू. भा. ४-१-५, पा. ४६७.

(१०) प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्यं प्रमाणम्। निवर्तयदेव च अप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे। लोके च वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य ॥ गी. भा. २-६९, पा. ३९.

[अत्र यथा शुक्तिकाज्ञानादूर्ध्वमपि तदधिगमाय प्रमाणप्रवृत्तिर्नास्ति, एवं प्रमातृत्वरहितस्वात्मतत्त्वाधिगमादूर्ध्वम् आत्मनि प्रमातृत्वं वा, तत्तत्त्वाधिगमाय पुनरपि प्रमाणप्रवृत्तिर्वा नास्तीत्युच्यते ॥]

(११) एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ॥ अध्यासभाष्यम्, पा. ४.

[अत्राध्यासस्य सति प्रमातृत्वे कालानुवृत्तौ चानादित्वमनन्तत्वं चोक्तम्, अनुभववेद्यत्वं च। अस्य चात्मैकत्वविद्या बाधिकेति समनन्तरवाक्ये बोध्यते। अतो न पूर्वापरविरोधः ॥]

द्वैतमिथ्यात्वं किलँक्षणमभिप्रेतम् ? –

४७. एतावता विचारसंदर्भेणेदमपि स्पष्टीकृतं वेदितव्यम् – यदेतद् द्वैतस्य मिथ्यात्वं बोध्यते ज्ञानबाध्यत्वं च, तदपि द्वैतस्य न ब्रह्मव्यतिरेकेण वस्त्वन्तरत्वमङ्गीकृत्य, किं तु वस्तुतः परमार्थानन्यत्वमभिप्रेत्यैव। अतः 'सत्यानृतमिथुनीकरणमध्यासः, तन्निमित्तश्च सर्वो व्यवहारः' इति वाचोयुक्त्या तथ्यत एवाध्यासः कृतोऽस्तीति, ज्ञानेन वस्तुत एवापबाध्या भवेदिति वा न भ्रमितव्यम्। अध्यारोपापवादयोरप्यध्यासभूमावेव लब्धप्राणत्वात्। तस्मात्, परमार्थदृष्ट्या नाद्वैतिनो जगन्मिथ्यात्ववादित्वेन व्यवहार्याः, किं त्वात्मैकत्ववादित्वेनेत्यवधेयम्। न हि जातु मिथ्याविकल्पस्य प्रतीतिकाले सत्त्वं बाधकाले तु निवृत्तिरिति युज्यते। अतो यथा रज्ज्वादिकं स्वरूपेण स्थितमेव सर्पादिबुद्ध्या विकल्प्यते, एवं एकरूपेण स्वरूपेणावस्थितमेव ब्रह्म जगज्जीवादिरूपेण विकल्प्यत इत्येव सिद्धान्तः ॥

(१) असदेव तर्हि सर्वं यद् गृह्यते रज्जुरिव सर्पाद्याकारेण। न। सत एव द्वैतभेदेनान्यथागृह्यमाणत्वान्नासत्त्वं कस्यचित् क्वचिदिति ब्रूमः। यथा सतोऽन्यद्वस्त्वन्तरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वमसत्त्वं ब्रुवते तार्किकाः, न तथा अस्माभिः कदाचित् क्वचिदपि सतोऽन्यदभिधानमभिधेयं वा वस्तु परिकल्प्यते। सदेव तु सर्वमभिधानम् अभिधीयते च यदन्यबुद्धया। यथा रज्जुरेव सर्पबुद्धया सर्प इत्यभिधीयते, यथा वा पिण्डघटादि मृदोऽन्यबुद्धया पिण्डघटादिशब्देनाभिधीयते लोके, रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी; तद्वत् सद्विवेकदर्शिनाम् अन्यविकारशब्दबुद्धी निवर्तेते। 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' इति 'अनिरुक्तेऽनिलयने' इत्यादिश्रुतिभ्यः॥ छां. ६-१-३. पा. ५१०.

[रज्ज्वादौ सर्पादिशब्दबुद्धी यथा भ्रान्तानाम्, एवं जगच्छब्दबुद्धी ब्रह्मणि ब्रह्मपारमार्थ्यज्ञानरहितानामित्युक्तं भवति॥]

(२) यथा मन्दान्धकारे 'स्थाणुरयम्' इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायाम् अकस्माद्रजतमिति निश्चितौ शब्दप्रत्ययौ, तदत् देहादिसंघातेऽहमिति निरुपचारेण शब्दप्रत्ययौ आत्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्? आत्मानात्मविवेकिनामपि पण्डितानाम् अजाविपालानामिव अविवेकिनौ शब्दप्रत्ययौ भवतः। तस्मात्, देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः। तस्मात्, मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्॥ सू. भा. १-१-४, पा. २२.

[देहादिसंघाते जायमानौ अहमिति शब्दप्रत्ययौ स्थाणुशुक्तिकादिषु जायमानपुरुषरजतादिशब्दप्रत्ययवत्, देहादिविकल्पास्पदात्मविषयावेवेत्युक्तमत्र। सर्वत्राप्येवंविधस्थले तत्तदास्पदव्यतिरेकेणारोप्यमाणं वस्त्वन्तरमप्यस्तीति न भ्रमितव्यमित्युक्तं भवति। रज्जुसर्पादिविकल्पस्य वस्तुवृत्तेनाप्युपपत्त्यादिकं कल्पयतां स्थूलबुद्धीनां निरासः प्रागेव (३५) कृतः॥]

(३) प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः॥ मां. का. १-१७.

भाष्यम् - रज्ज्वां सर्प इव कल्पितत्वान्न तु स विद्यते। विद्यमानश्चेन्निवर्तेत न संशयः। न हि रज्ज्वां भ्रान्तिबुद्धया कल्पितः सर्पो

विद्यमानः सन् विवेकतो निवृत्तः । नैव माया मायाविना प्रयुक्ता तद्दर्शिनां चक्षुर्बन्धापगमे विद्यमाना सती निवृत्ता । तथेदं प्रपञ्चाख्यं मायामात्रं द्वैतम्, रज्जुवन्मायाविवच्चाद्वैतं परमार्थतः । तस्मान्न कश्चित् प्रपञ्चः प्रवृत्तो निवृत्तो वास्तीत्यभिप्रायः ॥ मां. १-१७, पा. १९०, १९१.

[अत्रापि विकल्पितस्य प्रपञ्चस्य - रज्जुसर्पादिरिव - विद्यमानत्वं निवृत्तिश्च प्रतिक्षिप्येते ॥]

(४) तस्माद्यदविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपं कर्तृभोक्तृ-रागद्वेषादिदोषकलुषितमनेकानार्थयोगि, तद्विलयनेन तद्विपरीतमपहत-पाप्मत्वादिगुणकं पारमेश्वरं स्वरूपं विद्यया प्रतिपाद्यते, सर्पादिविलयनेनेव रज्ज्वादि ॥ सू. भा. १-३-१९, पा. ११५.

[अत्राप्यविद्यमानमेव भ्रान्त्या कल्पितं जीवत्वं सर्पादिवदपनुद्यते विद्येत्युच्यते ॥]

(५) यथा च मृगतृष्णिकोदकादीनाम् ऊषरादिभ्योऽनन्यत्वं दृष्टनष्ट-स्वरूपत्वात्, स्वरूपेणानुपाख्यत्वात्; एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यम् ॥ सू. भा. २-१-१४, पा. १९७.

(६) न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु संपद्यते । न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति । अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रति-पद्यते । पारमार्थिकेन च रूपेण सर्वव्यवहारातीतम् अपरिणतमवतिष्ठते ॥

सू. भा. २-१-२७, पा. २१३.

[अत्र यथा तैमिरिकदृष्टचन्द्रस्यानेकत्वं नास्त्येव, तथा अविद्याकल्पितो व्याकृताव्याकृतात्मकरूपभेदो वा, तेनापाद्यमानपरिणामादिव्यवहारास्पदत्वं वा ब्रह्मणि वास्तविको न भवतीत्युक्तम् ॥]

व्यावहारिकावस्थायां प्रमाणादिविभागसत्यत्वम् –

४८. यद्यपि यथोक्तनीत्या ब्रह्मात्मातिरिक्तं वस्तुसत्तास्त्येव वेदान्ते 'ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' (मुं. २-२-१२), 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा'

(छां. ७-२४-१), **'आत्मैवेदं सर्वम्'** (छां. ७-२५-२), **'इदं सर्वं यदयमात्मा'** (बृ. २-४-६), **'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि'** (छां. ६-८-७), **'नेह नानास्ति किञ्चन'** (बृ. ४-४-१९) इत्यादिश्रुतिभ्यः। तथापि प्रागेतस्मात् तत्त्वविज्ञानादिष्यत एव सर्वो लौकिको वैदिकश्च प्रमाणादिव्यवहारो यथादृष्टः। तेन न दृष्टापलापः शक्यापादनो वेदान्तनये यथा महावैनाशिकपक्षे। अशुष्यां च व्यावहारिकावस्थायां लोकदृष्टिः, शास्त्रदृष्टिश्चेति दृष्टिद्वयमवलम्ब्य प्रमाणादिविभाग आस्थीयते। तत्र स्वाभाविकी रागद्वेषादियुक्ता **लौकिकी दृष्टिः**, यया स्वाभाविकज्ञानानुसारेण क्रियमाणं कर्मानर्थाय भवति। यदा त्विन्द्रियनिग्रहं कृत्वा शास्त्रानुसारेणैव प्रवर्तते, तदा अवलम्ब्यमाना **शास्त्रदृष्टि**र्भवतीति कर्मणि लौकिकशास्त्रदृष्टिविवेकः। एवं ज्ञानविषयेऽपि विवेक्तव्यम्। यया नैसर्गिकबुद्ध्या, केवलप्रत्यक्षादिप्रमाणबलाद् वा शरीरेन्द्रियसंघात एवाहंममाभिमानं करोति सा **लौकिकी दृष्टिः**। यया पुनः शास्त्रमनुसरन् देहेन्द्रियाद्यसंपृक्ते कर्तृत्वभोक्तृत्वरहिते शुद्धात्मन्येवात्ममतिं करोति सा **शास्त्रदृष्टि**रिति। शास्त्रदृष्टिः, आर्षदर्शनम्, पारमार्थिकदृष्टिश्चेति पर्यायाः। लौकिकदृष्टिः, स्वाभाविकदृष्टिः, व्यावहारिकदृष्टिः—इति च। शास्त्रदृष्टिश्चेयं परमार्थतत्त्वदर्शनलक्षणा सती तत्त्वदर्शिन आचार्यस्यापि भवतीति **'आचार्यदृष्टिः'** इत्यपि व्यपदेशमर्हति। अत एव शास्त्राचार्योपदेशमनुसृत्य यदनुभवारोपणं तत् 'अनुदर्शनम्' इति व्यवह्रियते क्वचित्। अत एव 'तमात्मस्थं येऽनुपश्यन्ति धीराः' (का. २-२-१२) इति श्रुतिवाक्यं भाष्यकारो व्याचष्टे **'तमेतमीश्वरं ये निवृत्तबाह्यवृत्तयोऽनुपश्यन्ति आचार्यागमोपदेशमनु साक्षादनुभवन्ति'** इति। तत्र स्वाभाविकीं लौकिकदृष्टिं व्युदस्य शास्त्रदृष्ट्या श्रेयोमार्गेऽभ्युदयनिःश्रेयसफले प्रस्थातव्यमिति वेदेन बोध्यते, अविद्याभूमौ (२६, २७)। अत एव चात्मज्ञानात् प्रत्यक्षादीनां शास्त्रोपदेशस्य च न तत ऊर्ध्वं प्रवृत्तिरित्युक्तं पुरस्तात् (२८)। तत् स्मर्तव्यम्॥

(१) न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुम् । अपवादाभावे उत्सर्गप्रसिद्धेः ॥

सू. भा. २-२-३१, पा. २५२.

(२) यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥

गी. १६-२३, २४.

(३) या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्ये पुरुषं प्रवर्तयति । तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति । यदा पुनः, रागद्वेषौ तत्प्रतिपक्षेण निगमयति, तदा शास्त्रदृष्टिरेव पुरुषो भवति न प्रकृतिवशः ॥ गी. भा. ३-३४, पा. ५७.

(४) 'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि' (वे. सू. २-१-२४) इत्यत्र तु बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवतीत्येतल्लोकदृष्ट्या निर्दर्शितम् । शास्त्रदृष्ट्या तु पुनः सर्वत्रैवेश्वरापेक्षत्वम् आपद्यमानं न परागुद्यते ॥ सू. भा. २-२-३, पा. २२३.

(५) शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ वे. सू. १-१-३०.

भाष्यम् – इन्द्रो नाम देवतात्मा स्वमात्मानं परमात्मत्वेन 'अहमेव ब्रह्म' इत्यार्षेण दर्शनेन यथाशास्त्रं पश्यन्नुपदिशति स्म 'मामेव विजानीहि' इति ॥ सू. भा. १-१-३०, पा. ५९.

(६) ननु 'हत्वापि न हन्ति' इति विप्रतिषिद्धमुच्यते यद्यपि स्तुतिः । नैष दोषः । लौकिकपारमार्थिकदृष्ट्यपेक्षया तदुपपत्तेः, देहाद्यात्मबुद्ध्या हन्ताहम् इति लौकिकीं दृष्टिमाश्रित्य 'हत्वापि' इत्याह । यथादर्शितां पारमार्थिकीं दृष्टिमाश्रित्य 'न हन्ति न निबध्यते' इति ॥

गी. भा. १८-१७, पा. २६४.

(७) नन्वैकत्वैकान्ताभ्युपगमे नानात्वाभावात् प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन् । स्थाण्वादिष्विव पुरुषादिज्ञानानि । तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात् तदभावे व्याहन्येत । मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात् तदभावे व्याघातः स्यात् । .... अत्रोच्यते – नैष दोषः । सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः,

स्वप्नव्यवहारस्येव प्राक् प्रबोधात् । यावद्धि न सत्यात्मैकत्वप्रतिपत्तिः, तावत् प्रमाणप्रमेयफललक्षणेषु विकारेष्वनृतत्वबुद्धिर्न कस्यचिदुत्पद्यते । विकारानेव तु 'अहं मम' इत्यविद्यया आत्मात्मीयेन भावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा । तस्मात् प्राग् ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः । यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्ने उच्चावचान् भावान् पश्यतो निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति प्राक् प्रबोधात्, न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति । तद्वत् ॥

सू. भा. २-१-१४, पा. १९८.

निरुपाधिकब्रह्मवाक्यं तत्प्रधानम्, सोपाधिकवाक्यं तूपासनाविधिप्रधानम् –

४९. उपनिषत्सु प्रतिपाद्यमानं ब्रह्म सोपाधिकं निरुपाधिकं चेति द्विविधं प्रदर्श्यते । तत्र सोपाधिकं साकारं सगुणं वा समुपदिश्यते । यथा 'हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः' (छां. १-६-६), 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' (छां. ३-१४-२)-इत्यादिरूपम् । निरुपाधिकं च यथा 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वे. ६-१९), 'नेति नेति' (बृ. २-३-६)-इत्यादिरूपम् । तत्र निरुपाधिकं ब्रह्म यथावर्णितरीत्या अध्यारोपापवादप्रक्रियया समर्प्यत इति भवेत् । सोपाधिकं तु कथमेतत्प्रक्रियागोचरं भवेदिति शङ्का समुन्मिषेज्जिज्ञासूनाम् । किञ्च, नैकमेव वस्तु सोपाधिकं निरुपाधिकं च भवेत्तत्त्वतः । सोपाधिकत्वनिरुपाधिकत्वयोर्विरोधात् । श्रुतेर्विरुद्धार्थबोधकत्वेनाप्रामाण्यमपि प्राप्नोति तथात्वे । अतः किं निरुपाधिकवाक्यानां सोपाधिकैकैकार्थार्थाय गौणार्थता कल्प्यताम्, किं वा सोपाधिकवाक्यानामेव निरुपाधिकवाक्यानुगुण्येन गौणार्थता स्वीक्रियताम् ? – इत्यपि भवेद् विषयः । किञ्चान्यत्, तथैव सोपाधिकब्रह्मज्ञानस्यापि फलं श्रूयते 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद (छां. १-६-७), 'सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्तांश्चाप्नोति देवकामांश्च' (छां. १-७-७),

'अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्तांश्चाप्नोति मनुष्यकामांश्च' (छां. १-७-८), यथैव निरुपाधिकानां श्रूयते 'तत्र को मोहः कः शोकः' (ई. ७), 'परामृताः परिमुच्यन्ति सर्वे' (मु. ३-२-६) इत्यादिना। एवं चान्यतरहानेनान्यतरादाने हेतुर्नोपलभ्यते इत्यतोऽपि कथमिदं श्रद्दध्याम यदेकैव प्रक्रिया वेदान्तेषु सर्वत्रेत्यपि भवेत् केषाञ्चिन्मतिः। अत्र भगवान् बादरायणः प्राह-'अरूपवदेव हि तत्प्रधानत्वात्' (वे. सू. ३-२-१४) इति। निरुपाधिकरूपमेव ब्रह्म प्रतिपत्तव्यम्, न रूपाद्याकारविशेषवत् सोपाधिकम्। कुतः? निरुपाधिकवाक्यानां वस्तुस्वरूपावधारणप्रधानत्वादित्यर्थः। सोपाधिकवाक्यानां तु गतिं स एवाह-'प्रकाशवच्चावैयर्थ्यम्' (वे. सू. ३-२-१५) इति। आकारबोधकवाक्यानामवैयर्थ्यम्, उपासनार्थमुपदेशे प्रवृत्तत्वात्। न ह्याकारविशेषोपदेशमात्रेणाकारवदेव परमार्थतो भवति ब्रह्म। न हि प्रकाशोऽङ्गुल्याद्युपाधिवशाद् वक्रादिभावं प्रतिपद्यमानमिव भासमानं वक्रादिस्वभावमेवेति भवति, तद्वत् इत्यर्थः। उपाधीनामनिद्याकल्पितनामरूपविशेषत्वं ह्यधिगतम् (सू. भा. ३-२-११)। अपि च 'यद्वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥' (के. १-५, ६) इति च वाङ्मनसागोचरं निरुपाधिकमेव ब्रह्मस्वरूपं परमार्थतः, नोपासनागोचरमिति स्पष्टमेव सोपाधिकस्वरूपस्यापरमार्थत्वमुद्घोषितं श्रुत्या। अतोऽपि निरुपाधिकरूपमेव ब्रह्म प्रतिपत्तव्यमिति सिध्यति। यत्तु फलोक्तिरुभयत्रापि समाना दृश्यत इति। तत्र सोपाधिकवाक्येष्ववविद्याविषयाण्येवोच्चावचानि फलानि श्रूयन्ते, सद्योमुक्तिलक्षणमेकरूपमेव तु निरुपाधिकविद्यावाक्येष्विति वैषम्यमस्तीत्यदोषः॥

(१) सति तु विशेषे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्तीत्येष विनिगमनायां हेतुः, येनोभयीष्वपि श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते। न पुनर्विपरीतमिति॥ सू. भा. ३-२-१४, पा. ३५८.

(२) नन्वेवमपि यत् पुरस्तात् प्रतिज्ञातं नोपाधियोगादप्युभयलिङ्गत्वं ब्रह्मणोऽस्तीति, तद्विरुध्यते । नेति ब्रूमः । उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः । उपाधीनां चाविद्याप्रत्युपस्थापितत्वात् । सत्यामेव च नैसर्गिक्यामविद्यायां लोकवेदव्यवहारावतार इति तत्र तत्रावोचाम ॥

सू. भा. ३-२-१५, पा. ३५७, ३५८.

[सोपाधिकब्रह्मण उपासनार्थमेवोपदिष्टत्वात्, अविद्याविषयत्वान्न प्रक्रियाविरोध इत्युक्तमत्र ॥]

(३) यैर्वागाद्युपाधिभिः 'वाचो ह वाक् चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रं मनसो मनः', 'कर्ता, भोक्ता, विज्ञाता', 'नियन्ता प्रशासिता', 'विज्ञानमानन्दं ब्रह्म'– इत्येवमादयः संव्यवहारा असंव्यवहार्ये निर्विशेषे परे साम्ये ब्रह्मणि प्रवर्तन्ते, तान् व्युदस्यात्मानमेव निर्विशेषं ब्रह्म विद्धि – इत्येवशब्दार्थः । नेदं ब्रह्म यदिदमित्युपाधिभेदविशिष्टम् अनात्मेश्वराद्युपासते ध्यायन्ति ॥ के. भा. १–५, पा. २२.

(४) ये पुनरुपासनाधिकारे प्रपञ्चा उच्यन्ते यथा 'मनोमयः प्राणशरीरो भारूपः' (छां. ३-१४-२) इत्येवमादयः, न तेषां प्रविलयार्थत्वं न्याय्यम् । 'स क्रतुं कुर्वीत' इत्येवञ्जातीयकेन प्रकृतेनैवोपासनाविधिना तेषां संबन्धात् । श्रुत्या चैवञ्जातीयकानां गुणानामुपासनार्थत्वेऽवकल्पमाने न लक्षणया प्रविलयार्थत्वमवकल्पते ॥

सू. भा. ३-२-२१, पा. ३६१.

[उपासनावाक्यानां विधिप्रधानत्वात्, नाध्यारोपापवादप्रक्रिया तेष्वपेक्षा–इत्युक्तमत्र ॥]

(५) तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः ॥ सू. भा. १-१-१२, पा. ३५.

(६) अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणोर्भेदव्यपदेशो न पारमार्थिकः । एको हि प्रत्यगात्मा भवति । न द्वौ प्रत्यगात्मानौ संभवतः । एकस्यैव तु भेदव्यवहार उपाधिकृतः । यथा 'घटाकाशो, महाकाश' इति । ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः, प्रत्यक्षादीनि च प्रमाणानि, संसारानुभवः, विधिप्रतिषेधशास्त्रं च – इति सर्वमेतदुपपद्यते ॥

सू. भा. १-२-२०, पा. ८१.

[अत्र कार्यकरणोपाध्यभिमानकृतो जीवस्य परमेश्वराद् भेदः, तत एव च ईशजीवयोरुपास्योपासकभावः, उपासनाविधिवाक्यप्रामाण्यम्, जीवस्योपासना-फलभोगः-इत्येतत्सर्वं व्यावहारिकदृष्ट्या अवकल्पत इत्युक्तं भवति ॥]

(७) फलमप्येषां यथोपदेशं क्वचिद् दुरितक्षयः, क्वचिदैश्वर्यप्राप्तिः, क्वचित् क्रममुक्तिः – इत्यवगम्यत एवेत्यतः पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं नैकवाक्यत्वम् ॥ सू. भा. ३-२-२१, पा. ३६१.

ब्रह्मवस्तुबोधकान्यपि वाक्यानि सन्ति –

५०. विधिप्रधानेभ्यो विलक्षणानि वस्तुमात्रपर्यवसायीनि ब्रह्मवाक्यानि ; तेष्वेवैषा अध्यारोपापवादप्रक्रिया व्याप्रियत इत्युक्तम् । उपासनावाक्यैर्निर्देश्यस्य तु ब्रह्मणोऽविद्याकल्पितनामरूपोपाधियुक्तत्वा-दुपासनाविधिशेषत्वाच्च न तत्रैतत्प्रक्रियापेक्षेति च । केचित्तु क्रियाविधि-परत्वाभावे वस्तुस्वरूपान्वाख्यानमात्रपरस्य वाक्यस्याप्रामाण्यप्रौव्यात्, अर्थवादत्वम्, कर्तृदेवतादिप्रकाशनेन क्रियाविधिशेषत्वम्, उपासनादि-क्रियाविधिपरत्वम्, प्रतिपत्तिनियोगशेषत्वेन ब्रह्मसमर्पणात् तत्रापि प्रामाण्यं वा अभ्युपगन्तव्यम् इति मेनिरे । तेषां मतान्यागामिनि खण्डे परीक्षिष्यन्ते । भूतवस्तुनः प्रमाणान्तरविषयत्वमेवेति तत्स्वरूपसमर्पणमात्र-पर्यवसन्नं वेदवाक्यं नास्त्येवेति ये मन्यन्ते तेषां पक्षस्त्वत्र पराणुद्यते । सन्ति वाक्यानि 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' इत्येवंरूपाणि ब्रह्मबोधकानि । न चैषां विधिपरत्वं नियोगपरत्वं वा शक्य-कल्पनम् । वाक्यस्थानां पदानां ब्रह्मस्वरूप एव निश्चितसमन्वयावगमात् । न च कर्त्रादिप्रकाशकत्वम् । उक्तहेतोरेव । नापि प्रमाणान्तरगोचर-वस्त्वन्वाख्यानानि तानि । ब्रह्मणि सर्वविशेषनिराकरणेनैवोपक्षीणत्वात् । नच नास्त्येव तत्प्रतिपाद्यं वस्तु । सर्वस्याप्यात्मत्वेन समर्प्यमाणत्वात् । आत्मनश्चाप्रत्याख्येयत्वात् । न चानर्थक्यं वाक्यजन्यज्ञानस्य । प्रत्यक्ष-त्वादविद्यादिक्लेशप्रहाणेस्तत्फलस्य । तस्मादध्यारोपापवादप्रक्रियासमर्प्यमाणं ब्रह्मात्मवस्तु ; तज्ज्ञानं च पुरुषार्थ इति सिद्धम् ॥

(१) यदपि केचिदाहुः प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवल-वस्तुवादी वेदभागो नास्तीति, तन्न । औपनिषदस्य पुरुषस्यानन्यशेषत्वात् । योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्य-विलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम् । 'स एष नेति नेत्यात्मा' (बृ. ३-९-२६) इत्यात्मशब्दात् । आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवात्मत्वात् । ... 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. ३-९-२६) इति चौपनिषदत्व-विशेषणं पुरुषस्योपनिषत्स्वेव प्राधान्येन प्रकाश्यमानत्वे उपपद्यते । अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम् ॥

सू. भा. १-१-४, पा. १९, २०.

[भूतं परिनिष्ठितं परिनिष्पन्नमिति च पर्यायः । सिद्धवस्तुवाचका एते शब्दाः ॥]

(२) न च तेषां कर्तृस्वरूपप्रतिपादनपरता अवसीयते । 'तत् केन कं पश्येत्' (बृ. २-४-१३) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः । न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः । 'तत्त्वमसि' (छां. ६-८-७) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यत्वात् । यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति, नैष दोषः । हेयोपादेयशून्य-ब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः ॥

सू. भा. १-१-४, पा. ११.

[अत्र कर्त्रादिपरत्वं प्रमाणान्तरविषयत्वं निष्फलत्वं च वस्तुबोधक-वाक्यानां प्रत्युक्तम् ॥]

(३) न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽव-गम्यमानेऽर्थान्तरकल्पना युक्ता । श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् ॥

सू. भा. १-१-४, पा. ११.

(४) अविधिप्रधानैर्हि वस्तुपर्यवसायिभिर्ब्रह्मवाक्यैर्ब्रह्मविज्ञानं जन्यत इत्यवोचदाचार्यः ; 'तत्तु समन्वयात्' (वे. सू. १-१-४) इत्यत्र ॥

सू. भा. ३-३-१, पा. ३८५

(५) वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि न नियोगोपदेशीनी-त्येतद् विस्तरेण प्रतिष्ठापितं 'तत्तु समन्वयात्' (वे.सू. १-१-४) इत्यत्र ॥

सू. भा. ३-२-२१, पा. ३६१.

(६) आत्मस्वरूपान्याख्यानपरेषु वाक्येषु फलवन्निश्चितं च विज्ञान-मुत्पद्यते, न वा ? उत्पद्यते चेत् कथमप्रामाण्यमिति ? किं वा न पश्यसि

अविद्याशोकमोहभयादिसंसारबीजदोषनिवृत्तिं विज्ञानफलम् ? न शृणोषि वा किं तत्र 'को मोहः कः शोक एकत्वमनुपश्यतः', मन्त्रविदेवास्मि नात्मवित् सोऽहं भगवः शोचामि तं मा भगवाञ्शोकस्य पारं तारयतु' इत्येवमाद्युपनिषद्वाक्यशतानि ? एवं विद्यते किं 'सोऽरोदीत्' इत्यादिषु निश्चितं फलवच्च विज्ञानम् ? बृ. भा. १-४-७, पा. ६६४.

[अत्र फलवन्निश्चितज्ञानजनकत्वात् ब्रह्मवाक्यस्य प्रामाण्यमेव नार्थवादत्वमित्युक्तम् ॥]

परापरब्रह्मणी–

५१. तदेवं ब्रह्मात्मवस्तुप्रधानैर्वाक्यैः समर्प्यमाणं निरुपाधिकं ब्रह्म । उपासनाविधिप्रधानैश्च वाक्यैः समर्प्यमाणं सोपाधिकं ब्रह्मेति च द्विरूपं ब्रह्म वेदान्तेषूपदिश्यते । तत्र ब्रह्मवाक्यानां तत्प्रधानत्वात् तद्बलेन निरुपाधिकमेव परमार्थतो ब्रह्मेत्यवधारणीयमित्यवगतम् । निरुपाधिकं, निष्प्रपञ्चं, निर्विशेषं, निर्गुणं कारणं मुख्यं परम्–इत्येकार्थकाः शब्दाः । एवं सोपाधिकं, सप्रपञ्चं, सविशेषं, सगुणम्, कार्यम्, अमुख्यम्, अपरम्–इति च । एतस्मिन्नेव ब्रह्मणि परापरविभागोऽयं 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः' (प्र. ५–२) इत्यादिश्रुतिप्रमाणतः । तत्रोपाधीनामविद्याप्रत्युपस्थापितत्वान्न ब्रह्मणोऽद्वितीयत्वं विहन्यते । अविद्याप्रत्युपस्थापितानामप्याकारगुणादीनां व्यावहारिकदृष्ट्या पुरोदितनीत्या (४–४) सत्यत्वमपि भवति । ब्रह्मणः सर्वशक्तेः सर्वनामरूपकारणत्वात् तदनन्यत्वन्यायेन (सू. भा. २–१–२४) सर्वात्मत्वोपपत्तेः । एवं चोपासकानामर्चिरादिमार्गेण ब्रह्मप्राप्तिः, तत्रैश्वर्यप्राप्तिः, ईश्वरेण साम्यं फलभोगे इत्येतत्सर्वमपि श्रूयमाणमवकल्पते ॥

(१) किं द्वे ब्रह्मणी परम् अपरं चेति ? बाढं द्वे 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः' (प्र. ५–२) इत्यादिदर्शनात् । किं पुनः परं ब्रह्म किमपरमिति ? उच्यते । यत्राविद्याकृतनामरूपादिविशेषप्रतिषेधादस्थूलादिशब्दैर्ब्रह्मोपदिश्यते तत् परम् । तदेव यत्र नामरूपादिविशेषेण केनचिद्विशिष्टम् उपासनायोपदिश्यते 'मनोमयः प्राणशरीरो भारूपः'

(छां. ३-१४-२) इत्यादिशब्दैः, तदपरम्। नन्वेवम् अद्वितीयश्रुतिरुपरुध्येत। न। अविद्याकृतनामरूपोपाधिकतया परिहृतत्वात् ॥

सू. भा. ४-३-१४, पा. ५०१. ५०२.

(२) परमेव हि ब्रह्म विशुद्धोपाधिसंबन्धं क्वचित् कैश्चिद्विकारधर्मैर्मनोमयत्वादिभिरुपास्यतयोपदिश्यमानम् अपरम् इति स्थितिः ॥

सू. भा. ४-३-९, पा. ४९५.

['परं चापरं च ब्रह्म यदोङ्कारः' (प्र. ५-२) इत्यत्रोङ्कारस्यैवालम्बनत्वेनोपासनं परब्रह्मदृष्ट्या, इति नैतद्वाक्यविरोध इति मन्तव्यम्। द्रष्टव्यमत्र वे. सू. १-३-१३, पा. १०५.]

(३) यत्तूक्तं हिरण्यश्मश्रुत्वादिरूपश्रवणं परमेश्वरे नोपपद्यत इति, अत्र ब्रूमः। स्यात् परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थम्। 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि' (मो. ध. ३३९-४५) इति स्मरणात्। अपि च यत्र तु निरस्तसर्वविशेषं पारमेश्वरं रूपमुपदिश्यते, भवति तत्र शास्त्रम् 'अशब्दमस्पर्शमरूपमव्ययम्' (क. १-३-१५) इत्यादि। सर्वकारणत्वात्तु विकारधर्मैरपि कैश्चिद्विशिष्टः परमेश्वर उपास्यत्वेन निर्दिश्यते 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' (छां. ३-१४-२) इत्यादिना। तथा हिरण्यश्मश्रुत्वादिनिर्देशोऽपि भविष्यति ॥ सू. भा. १-१-२०, पा. ४५.

(४) कार्यमेव सगुणमपरं ब्रह्मैनान् गमयति अमानवः पुरुषः – इति बादरिराचार्यो मन्यते। कुतः? अस्य गत्युपपत्तेः। अस्य हि कार्यब्रह्मणो गन्तव्यत्वम् उपपद्यते प्रदेशवत्त्वात्। न तु परस्मिन् ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वा अवकल्पते। सर्वगतत्वात्, प्रत्यगात्मत्वाच्च गन्तॄणाम् ॥

सू. भा. ४-३-७, पा. ४९५.

(५) सर्वगतत्वेऽपि चात्मन आकाशस्येव घटादिगमने बुद्ध्याद्युपाधिगमने गमनप्रसिद्धिरित्यवादिष्म 'तदुपसारत्वात्' (२-३-२९) इत्यत्र ॥

सू. भा. ४-३-१४, पा. ५०२.

(६) जगदुत्पत्त्यादिव्यापारं वर्जयित्वा अन्यदणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति। जगद्व्यापारस्तु नित्यसिद्धस्यैवेश्वरस्य ॥

सू. भा. ४-४-१७, पा. ५१०.

(७) इतश्च न निरङ्कुशं विकारालम्बनानामैश्वर्यम्; यस्माद्भोगमात्रमेवैषाम् अनादिसिद्धेनेश्वरेण समानमिति श्रूयते ॥

सू. भा. ४-४-२१, पा. ५११.

ज्ञानोपासनयोर्वैलक्षण्यम् –

५२. अविद्याविषयत्वेऽप्युपासनानां ज्ञानकाण्डे तेषां विधानं न विरुद्धम् । विद्यात्वाविशेषात्, मनोवृत्तित्वसामान्याच्च । यद्यपि कर्मसमृद्ध्यर्थत्वम् अभ्युदयार्थत्वं चास्ति कर्मसामान्यमप्यस्त्युपासनानाम्, तथापि मानसत्वम्, प्रत्यक्प्रवणतासंपादकत्वेन ज्ञानस्यान्तरङ्गत्वं क्रममुक्तिफलत्वं चेत्येतत् कर्मवैलक्षण्यभूयस्त्वमालक्ष्याद्वैतज्ञानप्रकरणे तेषामुपादानम् । यद्यपि मानसत्वाविशेषादेवाद्वैतज्ञानमुपासनं चेत्युभयमपि समं ज्ञानविद्योपासनाशब्दैर्व्यपदिश्यते श्रुतिस्मृत्योः, तथापि तयोः स्वरूपभेदोऽस्ति । यतो ध्यानापराभिधानमुपासनं कर्तृव्यापारायत्तनिष्पत्ति मानसं कर्म, चोदनालक्षणं च कर्मवत् । ज्ञानं तु प्रमाणजन्यं प्रमेयवस्त्वनुसारेण जायमानं मनोवृत्तिलक्षणमिति । अत एव ह्युपासनमध्यारोपितकारकफलापेक्षः कर्मविशेषः, ज्ञानं तु सर्वाध्यारोपापह्नवात्मवस्त्ववगतिरित्युच्यत इति ॥

(१) ध्यानं चिन्तनं यद्यपि मानसं तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम् । पुरुषतन्त्रत्वात् । ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम् । केवलं वस्तुतन्त्रमेव तत् । न चोदनातन्त्रं नापि पुरुषतन्त्रम् । तस्मात्, मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम् । यथा च 'पुरुषो वाव गौतमाग्निः', 'योषा वाव गौतमाग्निः' (छां.) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति । केवलचोदनाजन्यत्वात् क्रियैव सा, पुरुषतन्त्रा च । या तु प्रसिद्धेऽग्नावग्निबुद्धिः, न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा; किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतन्न क्रिया । एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम् ॥ सू. भा. १–१–४, पा. १८.

(२) उपासनं नाम उपास्यार्थवादे यथा देवतादिस्वरूपं श्रुत्या ज्ञाप्यते तथा मनसा उपगम्य आसनं चिन्तनं लौकिकप्रत्ययाव्यवधानेन यावत्तावद्देवतादिस्वरूपात्माभिमानाभिव्यक्तिर्लौकिकात्माभिमानवत् ॥

बृ. १–३–९, पा. ६३३, ६३४.

(३) तत्रैतस्मिन्नद्वैतविद्याप्रकरणे अभ्युदयसाधनान्युपासनान्युच्यन्ते। कैवल्यसंनिकृष्टफलानि चाद्वैतादीषद्विकृतब्रह्मविषयाणि 'मनोमयः प्राणशरीरः' इत्यादीनि. कर्मसमृद्धिफलानि च कर्माङ्गसंबन्धीनि । रहस्यसामान्यान्मनोवृत्तिसामान्याच्च ॥ छां संबन्ध भा, पा. ३५२.

(४) कस्तर्ह्यद्वैतज्ञानस्य उपासनानां च विशेषः? उच्यते। स्वाभाविकस्य आत्मन्यक्रियेऽध्यारोपितस्य कर्त्रादिकारककियाफलभेदविज्ञानस्य निवर्तकम् अद्वैतविज्ञानम् । रज्ज्वादाविव सर्पाद्यध्यारोपलक्षणज्ञानस्य रज्ज्वादिस्वरूपनिश्चयः प्रकाशनिमित्तः। उपासनं तु यथाशास्त्रसमर्पितं किञ्चिदालम्बनम् उपादाय तस्मिन् समानचित्तवृत्तिसंतानकरणं तद्विलक्षणप्रत्ययानन्तरितम्–इति विशेषः ॥ छा. संबन्ध भा., पा. ३५२.

(५) तान्येतान्युपासनानि सत्त्वशुद्धिकरत्वेन वस्तुतत्त्वावभासकत्वात् अद्वैतज्ञानोपकारकाणि आलम्बनविषयत्वात् सुसाध्यानि, चेति पूर्वम् उपन्यस्यन्ते ॥ छां. संबन्ध भा., पा. ३५२.

(६) सर्वत्र हि शास्त्रप्रापिता एव धर्मा उपास्याः, न विद्यमाना अप्यशास्त्रीयाः ॥ छां. २-२-१, पा. ३८८.

(७) न च प्रमाणान्तरेणान्यथा प्रसिद्धेऽर्थेऽन्यथा ज्ञानं नियुक्तस्याप्युत्पद्यते। यदि पुनः 'नियुक्तोऽहम्' इत्यन्यथा ज्ञानं कुर्यात्, न तु तज्ज्ञानं किं तर्हि मानसी सा क्रिया। स्वयमेव चेदन्यथोत्पद्येत, भ्रान्तिरेव स्यात् ॥ सू. भा. ३-२-२१, पा. ३६३.

[अत्र प्रमाणान्तरनिश्चितेऽर्थे नियुक्तस्याप्यन्यथाज्ञानमुत्पद्यते–इत्यनेन शास्त्रनियुक्तस्यापि वस्तुविषयकं ज्ञानं तथैवानुवर्तते इत्युक्तं भवति। न हि प्रतिमायां विष्णुबुद्धिनियोगेऽपि प्रतिमाबुद्धिर्निवर्तते। विष्णुबुद्धिस्तु पुरुषप्रयत्नकृता इति ध्यानमात्रत्वात् मानसक्रियारूपम् । प्रतिमायामेव केनचिदन्धकारादिदोषनिमित्तेन चेन्मनुष्यादिबुद्धिरुत्पद्येत तर्हि भ्रान्तिरेव सेति मन्तव्यम् ॥]

(८) विद्युपास्त्योश्च वेदान्तेष्वव्यतिरेकेण प्रयोगो दृश्यते। क्वचिद् विदिनोपक्रम्योपासिना उपसंहरति यथा 'यस्त्वेद यत्स वेद स मयैतदुक्तः' (छां. ४-१-४) इत्यत्र 'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से' (छां. ४-२-२) इति। क्वचिच्चोपासिनोपक्रम्य विदिनोपसंहरति। यथा – 'मनो ब्रह्मेत्युपासीत' (छां. ३-१८-१) इत्यत्र 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' (छां. ३-१८-३) इति ॥

सू. भा. ४-१-१, पा. ४६०.

(९) 'तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम् ॥
छां. ८-१-१, पा ५६६.

[अत्र तस्मिन्नाकाशाख्ये ब्रह्मणि यदन्तस्तदन्वेष्टव्यं विजिज्ञासितव्यम् इत्युपासनमेव विधीयते । उत्तरत्र 'य इहात्मानमनुविद्य व्रजन्ति' (छां. ८-१-६) इति परत्र प्राप्यफलसंकीर्तनात् ॥]

'यथेयं न प्राक्त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति ॥ छां. ५-३-७. पा. ४७८.

[अत्र विद्याशब्देन पञ्चाग्निविद्याख्योपासना परामृष्टा ॥]

'स यो नाम ब्रह्मेत्युपास्ते, यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति ॥' छां. ७-१-५, पा. ५४३.

[अत्र नाम्नि ब्रह्मबुद्धिकरणं पुरुषतन्त्रं विधीयत इत्युपासनमेवैतत् ॥]

'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' ॥ बृ. २-४-५, पा. ७६०.

[अत्रात्मदर्शनम्, वस्तुतन्त्रं ज्ञानम् । एकविज्ञानेन सर्ववेदनफलकीर्तनात् ॥]

'आत्मेत्येवोपासीतात्र ह्येते सर्व एकं भवन्ति' ॥
बृ. १-४-७, पा. ६५४.

[अत्र वेदनं वस्तुतन्त्रज्ञानमेव, दृष्टफलकीर्तनात् ॥]

(१०) साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ ७-३०.
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ गी. ८-३.
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ गी. १२-६, ७.

[अत्र सर्वत्र पुरुषतन्त्रमुपासनं परामृष्टम् ॥]

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥
गी. ४-३७, पा. ८०.

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ गी. ९-२.

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ गी १२-३.

[अत्र सर्वत्र निर्विशेषब्रह्मवस्तुज्ञानमेव परामृष्टम् ॥]

ज्ञानसाधनानि –

५३. सर्वस्यात्मभूतं ब्रह्म, साक्षादपरोक्षस्वभावत्वात् अविद्यामात्रव्यवहितं च–इत्यतः सर्वविधाध्यारोपापसारि वेदान्तवाक्यज्ञानमेव नान्यत् इति सेत्स्यति । अत एव हि 'औपनिषदः पुरुषः' (बृ. ३-९-२६) इति ब्रह्मविशेषणम्, 'आचार्यावान् पुरुषो वेद' (छां. ६-१४-२) इति वेदान्तसंप्रदायविदाचार्योपदेशगम्यत्वं ब्रह्मण इति च । बाह्यविषयाहृतबुद्धीनां विषयवासनाकलुषितचित्तत्वात्तु न वेदान्तवाक्यमाचार्योपदेशनं वा ब्रह्मात्मता ज्ञापनायालमिति, चित्तशुद्धये प्रत्यक्प्रावण्याय च कर्माण्युपासनानि च श्रुतिस्मृत्योरुपदिश्यन्ते । तत्रापि दुराचाराद्विरतस्यैव कर्माणि पावनानि भवन्ति 'आचारहीनं न पुनन्ति वेदाः' (१) इति स्मरणात् । यस्तु कर्मभिः शुद्धबुद्धिः प्रत्यङमुखश्च तस्यैवोपासनकर्मण्यधिकार इति स्पष्टम् । मानससाधनत्वादुपासनस्य । अन्तर्मुखस्य च शमदमादीनि श्रौतान्यमानित्वादीनि च स्मार्तानि ज्ञानस्यान्तरङ्गसाधनानि भवन्ति । ज्ञानसाधनत्वेन श्रुतत्वात् । श्रवणमनननिदिध्यासनानि च साक्षात् साधनानि । तेषां साक्षाज्ज्ञेयविषयत्वेन तत्प्रकाशनस्वाभाव्यस्य प्रसिद्धत्वात् । एवं च कर्मादीनां बाह्यप्रतिबन्धकापनयनेन, श्रवणादीनां च साक्षाद्विषयप्रकाशनेन ज्ञानसाधनत्वमिति स्थितम् ॥

(१) 'तं त्वौपनिषदं पृच्छामि' (बृ. ३-९-२६) इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्स्वेव प्राधान्येन प्रकाश्यमानत्व उपपद्यते ॥
सू. भा. १-१-४, पा. २०.

(२) यदि हि सदस्मीति बुद्धिमात्रं कर्तव्यतया विधीयते न तु त्वंशब्दवाच्यस्य सद्रूपत्वमेव, तदा न 'आचार्यवान् वेद' इति ज्ञानोपायोपदेशो वाच्यः स्यात् । यथा 'अग्निहोत्रं जुहुयात्' इत्येवमादिष्वर्थप्राप्तमेवाचार्यवत्त्वमिति तद्वत् ॥ छां. ६-१६-३, पा. ५४०.

(३) अत एव च येयमागमप्रभूता स्मृतिः, तार्किकादन्यैर्नैवागमाभिज्ञैराचार्यैर्वा प्रोक्ता सती सुज्ञानाय भवति ॥ का. १-२-९, पा. ७२.

(४) ये सम्यग्दर्शिनः, तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरत् इति भगवतो मतम् । तथा च स्मृतीदमपि समर्थं वचनम् — यज्ज्ञात्वा यज्ज्ञानं तैरुपदिष्टम् अधिगम्य प्राप्य पुनर्भूयो मोहम् एवं यथेदानीं मोहं गतोऽसि, पुनरेवं न यास्यसि हे पाण्डव ॥

गी. भा. ४-३४, ३५. पा. ७९.

(५) सत्यमेतत् । विद्यासंयुक्तं कर्माग्निहोत्रादिकं विद्याविहीनात् कर्मणोऽग्निहोत्रादिविशिष्टम्, विद्वानिव ब्राह्मणो विद्याविहीनाद् ब्राह्मणात् । तथापि नात्यन्तमनपेक्षं विद्याविहीनं कर्माग्निहोत्रादिकम् । कस्मात् ? 'तमेतमात्मानं यज्ञेन विविदिषन्ति' इत्यविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात् । .... विद्यासहायस्य अग्निहोत्रादेर्विद्यानिमित्तेन सामर्थ्यातिशयेन योगात् आत्मज्ञानं प्रति कश्चित् कारणत्वातिशयो भविष्यति, न तथा विद्याविहीनस्येति युक्तं कल्पयितुम् । .... तथा हि श्रुतिः 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छां. १-१-१०) इति विद्यासंयुक्तस्य कर्मणोऽग्निहोत्रादेर्वीर्यवत्तरत्वाभिधानेन स्वकार्यं प्रति कञ्चिदतिशयं ब्रुवाणा विद्याविहीनस्य तस्यैव तत्प्रयोजनं प्रति वीर्यवत्त्वं दर्शयति ॥ सू. भा. ४-१-१८, पा. ४७७, ४७८.

[अत्र केवलस्य कर्मणः, उपासनासमुच्चितस्य च ज्ञानसाधनत्वमुपपादितम् ॥]

(६) कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥ गी. ५-११.

भाष्यम् – आत्मशुद्धये सत्त्वशुद्धय इत्यर्थः ॥

(७) शमदमाद्युपेतः स्याद् विद्यार्थी 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति' (बृ. ४-४-२२) इति विद्यासाधनत्वेन शमदमादीनां विधानात्, विहितानां चावश्यानुष्ठेयत्वात् ॥

.... यज्ञादीन्यपि त्वपेक्षितव्यानि यज्ञादिश्रुतेरेव । .... स्मृतिष्वपि भगवद्गीतायासु अनभिसंधाय फलमनुष्ठितानि यज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवन्तीति प्रपञ्चितम् । ....तत्रापि 'एवंवित्' इति विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यम् ॥ सू. भा. ३-४-२७, पा. ४४६.

(८) नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥ क. १-२-२४.

भाष्यम् - यस्तु दुश्चरिताद्विरत इन्द्रियलौल्याच्च, समाहितचित्तः, समाधानफलादप्युपशान्तमानसश्च, आचार्यवान्, प्रज्ञानेन यथोक्तमात्मानं प्राप्नोतीत्यर्थः ॥ पा. ७८.

(९) शास्त्राचार्योपदेशशमदमादिसंस्कृतं मनः आत्मदर्शने करणम् ॥
गी. भा. २-२१. पा. २०.

शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुं सहकारिकारणं बुद्धिविशुद्ध्याद्यमानित्वादि चापेक्ष्य जनितस्य क्षेत्रज्ञपरमात्मैकत्वज्ञानस्य कर्तृत्वादिकारकभेदबुद्धिनिबन्धनसर्वकर्मसंन्यासमहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानम्, सा 'परा ज्ञाननिष्ठा' इत्युच्यते ॥
गी. भा. १८-५५. पा. २८४.

(१०) श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ॥ गी. ४-३९.

(११) श्रद्धाप्रभृतीनाम् अधर्मादिनिमित्तवियोगहेतुत्वात्, वेदान्तश्रवणमनननिदिध्यासनानां च साक्षाज्ज्ञेयविषयत्वात् । पापादिप्रतिबन्धक्षये चात्ममनसोः भूतार्थज्ञाननिमित्तस्वाभाव्यात् ॥ बृ. भा. १-४-२, पा. ६४९.

(१२) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेनेदं सर्वं विदितम् ॥
बृ. २-४-५.

ज्ञानसाधनानां समुच्चयविकल्पः -

५४. तत्र कर्मादीनि ज्ञानसाधनान्यधिकृत्येदं विचारणीयमस्ति । किमेतानि सर्वाणि सर्वैरविशेषेणानुष्ठेयानि, किं वा कानिचिदेव कैश्चिदिति व्यवस्थाप्यस्तीति । तत्र त्रैवर्णिकैरधिकृतैर्विद्यासहितानि केवलानि वा वेदोक्तकर्माण्यनुष्ठाय चित्तशुद्धिं प्रत्यक्प्रवणतां चासाद्य श्रवणमनननिदिध्यासनपूर्वकं ज्ञानं संपादयितव्यमित्युत्सर्गः । चित्तशुद्धिमुपागतानां यमप्रधानानि शमादीनि सुलभानीति तदभ्यासोऽपि सहकारिकारणं भवति ज्ञानोत्पत्तेः । येषां तु जन्मान्तरानुष्ठितकर्मभिश्चित्तशुद्धिराप्ता न तान् प्रति निर्बन्धोऽस्ति कर्माण्यवश्यं कर्तव्यानीति । तेषां हि श्रद्धातात्पर्याद्यन्तरङ्ग

साधनयुक्तान्येव श्रवणादीनि कार्यकराणि भवेयुः । वेदार्थज्ञानानुष्ठानयोरनधिकृतानां च स्ववर्णोचितैर्नियमैर्यमैश्च युक्तानाम् इतिहासपुराणश्रवणमननादिनैव ज्ञानोत्पत्तिः । देवादीनामुत्कृष्टजन्मनां पुनः स्वयंभातवेदानां विनैवाध्ययनकर्मानुष्ठानं श्रवणादिष्वधिकारो भवेत् । प्रजापतेश्चात्यन्तविशुद्धकार्यकरणसंयुक्तस्य श्रवणाद्यन्तरेणापि ज्ञानं जातमिति शास्त्रादवगम्यते । एवमधिकारतारतम्येन श्रद्धातात्पर्यगुरुसेवादिविकल्पः समुच्चयश्च श्रवणाद्यधिकारे ज्ञानोत्पत्तौ च निमित्तं भवतीति ज्ञेयम् ॥

(१) ज्ञानस्यैव हि प्रापकं सत् कर्म प्रणाड्या मोक्षकारणमित्युपचर्यते ॥
सू. भा. ४-१-१६, पा. ४७६.

(२) तस्मात्, विद्यासंयुक्तं नित्यमग्निहोत्रादि, विद्याविहीनं चोभयमपि मुमुक्षुणा मोक्षप्रयोजनोद्देशेन इहजन्मनि जन्मान्तरे वा प्राग्ज्ञानोत्पत्तेः कृतं यत्, तद् यथासामर्थ्यं ब्रह्माधिगमप्रतिबन्धकारणोपात्तदुरितक्षयहेतुत्वद्वारेण ब्रह्माधिगमकारणत्वं प्रतिपद्यमानं श्रवणमननश्रद्धातात्पर्याद्यन्तरङ्गकारणापेक्षं ब्रह्मविद्यया सहैककार्यं भवतीति स्थितम् ॥
सू. भा. ४-१-१८, पा. ४७८.

(३) येषां पुनः पूर्वकृतसंस्कारवशाद्विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिः, तेषां न शक्यते फलप्राप्तिः प्रतिषेद्धुम् । ज्ञानस्यैकान्तिकफलत्वात् । 'श्रावयेच्चतुरो वर्णान्' (मो. ध. ३२७-४५) इति चेतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात् । वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणाम् इति स्थितम् ॥ सू. भा. १-३-३८, पा. १३९.

(४) तत्रार्थित्वं तावन्मोक्षविषयं देवादीनामपि संभवति । विकारविषयविभूत्यनित्यत्वालोचनादिनिमित्तम् । तथा सामर्थ्यमपि तेषां संभवति । मन्त्राद्यर्थवादेतिहासपुराणेभ्यो विग्रहवत्त्वाद्यवगमात् । न च तेषां कश्चित् प्रतिषेधोऽस्ति । न चोपनयनशास्त्रेणैषामधिकारो निवर्त्येत । उपनयनस्य वेदाध्ययनार्थत्वात्, तेषां च स्वयंप्रतिभातवेदत्वात् । अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्यादि दर्शयति ॥ सू. भा. १-३-२६, पा. १२०.

(५) प्रजापतेर्धर्मज्ञानवैराग्यैश्वर्यविपरीतहेतुसर्वपाप्मदाहाद् विशुद्धैः कार्यकरणैः संयुक्तमुत्कृष्टं जन्म । तदुद्भवं चानुपदिष्टमेव युक्तमेकत्वदर्शनं प्रजापतेः ॥ बृ. १-४-२, पा. ६४८.

(६) निमित्तविकल्पसमुच्चयगुणवद्गुणवत्त्वभेदोपपत्तेः । .... एवमेवात्मैकत्वज्ञानेऽपि क्वचिज्जन्मान्तरकृतं कर्म निमित्त भवति । यथा प्रजापतेः। क्वचित् तपोनिमित्तम् । 'तपसा ब्रह्म विजिज्ञासस्व' इति श्रुतेः । क्वचित् 'आचार्यवान् पुरुषो वेद', 'श्रद्धावाँल्लभते ज्ञानम्', 'तद्विद्धि प्रणिपातेन', 'आचार्याद्धैव', 'द्रष्टव्यः श्रोतव्यः' इत्यादिश्रुतिस्मृतिभ्य एकान्तज्ञानलाभनिमित्तत्वम् ॥ बृ. १-४-२. पा. ६४९.

साधनानुष्ठानावधिः–

५५. साधनानुष्ठानकालेयत्ताविषयेऽपि चिन्तनीयम् – किं सकृत् कृत्वा शास्त्रचारितार्थ्यं संपादनीयम्, आहोस्वित् साधनान्यावर्तयेदपीति । यद्यावर्तनमावश्यकम्, तर्हि कियन्तं कालमावर्तयेदिति च । तत्र साधनानां दृष्टार्थत्वात् कर्माणि तावच्चित्तशुद्धिविरक्तिजन्मपर्यन्तं कर्तव्यानि फलाभिसंधिवर्जनपूर्वकम् – 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' (गी. १८–४६) इति स्मृतेः । विरक्तैस्तु पारमहंस्यं स्वीकार्यम् । 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' (जा. ४) इति श्रुतेः । अनुत्पन्नायां तु विरक्तौ कर्माण्यनुवर्तयेदेव । 'तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते' (गी. ५–२) इति स्मृतेः । 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः' (गी. ५–६) इति च कर्मयोगस्यैव परमार्थसंन्यासोपायत्वस्मरणाच्च । श्रवणादीनां तु साक्षाज्ज्ञानसाधनानां त्वधिकारभेदादनुष्ठानविकल्पसमुच्चयौ ज्ञेयौ । तद्यथा–ये तावदुत्तमाधिकारिणः सकृच्छ्रुतवेदान्तवाक्यादेव ब्रह्मात्मत्वमनुभवितुं शक्नुयुः, तेषां श्रवणमात्रादेव कृतार्थतेति न तदूर्ध्वं किञ्चित् कर्तव्यमवशिष्यते । न ह्युदिते सूर्ये पुनरपि तमोऽपनयनाय प्रयत्नोऽपेक्ष्यत इति । ये तु तथा वाक्यार्थमनुभवितुं न शक्नुवन्ति तान् प्रति वाक्यश्रवणाभ्यासः, तदर्थग्रहणप्रतिबन्धकशङ्कानिवृत्त्यर्थं मननं च कर्तव्यं यावज्ज्ञानोत्पत्ति । अभ्यासेन मन्दप्रज्ञानां प्रतिपत्तिदर्शनान् । मननं चात्र यथावर्णितश्रुत्यनुगृहीततर्कानुसंधानं तदनुकूललौकिकतर्कानुसरणं च । तेन ह्यात्मन्यध्यारो-

पितस्तत्तदंशोऽपनीयत इति । ये पुनः श्रवणमननमात्रेण तत्त्वं प्रतिपत्तुमशक्ताः, तान् प्रति निदिध्यासनमप्यपेक्ष्यते । सर्वथापि तु यावत् तत्त्वानुभवो न भवेत्, तावदावर्तनीयानि श्रवणादीनि । अनुभवार्थत्वात्तेषाम् । 'आत्मा वा अरे द्रष्टव्यः' इति दर्शनं कर्तव्यतयावधार्य तदर्थं 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) श्रवणादीनामुपायत्वेनोपदेशात् । शमदमामानित्वादिसहकारिसाधनानां तु नास्त्यनुष्ठानावधिः । तेषां ज्ञानपरिपाकार्थत्वात्, तत्परत्वस्यैव ज्ञाननिष्ठालक्षणत्वाच्चेति साधनानुष्ठानावधिविवेकः ॥

(१) 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' ॥ बृ. ४-४-२२.

यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ १८-५ ॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ १८-६ ॥

भाष्यम् - सासङ्गस्य फलार्थिनो बन्धहेतव एतान्यपि कर्माणि मुमुक्षोः कर्तव्यानि - इति अपिशब्दार्थः ॥ पा. २५८.

(२) 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' ॥
बृ. ४-४-२२.

(३) भवेदादृष्यानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वम् अनुभवितुं शक्नुयात् । यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः॥
सू. भा. ४-१-२, पा. ४६१.

(४) दृश्यन्ते हि सकृच्छ्रुताद् वाक्यान्मन्दप्रतीतं वाक्यार्थमावर्तयन्तस्तत्तदाभासव्युदासेन सम्यक्प्रतिपद्यमानाः ॥
सू. भा. ४-१-२, पा. ४६२.

(५) येषामेतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां 'तत्त्वमसि' इत्येतद् वाक्यं स्वार्थे प्रज्ञां नोत्पादयितुं शक्नोति पदार्थज्ञानपूर्वकत्वाद् वाक्यार्थज्ञानस्येत्यतस्तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः ॥ सू. भा. ४-१-२, पा. ४६२.

(६) यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथाप्यध्यारोपितं कस्मिन् ब्रह्मशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम् । तत्रैकेन अवधानेनैकमंशमपोहति, अपरेणापरमिति युज्यते तत्र क्रमवती प्रतिपत्तिः ॥

सू. भा. ४-१-२, पा. ४६२.

(७) मनसो निग्रहायत्तमभयं सर्वयोगिनाम् ।
दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च ॥

गौ. का. ३-४०, पा. २२५.

भाष्यम् – येषां पुनर्ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत् कल्पितमेव मन इन्द्रियादि च न परमार्थतो विद्यते, तेषां ब्रह्मस्वरूपाणाम् अभयं मोक्षाख्या च अक्षया शान्तिः स्वभावत एव सिद्धा नान्यायत्ता 'नोपचारः कथञ्चन' (३-३६) इत्यवोचाम । ये त्वतोऽन्ये योगिनो मार्गगा हीनमध्यमदृष्टयो मनोऽन्यदात्मव्यतिरिक्तमात्मसंबन्धि पश्यन्ति, तेषामात्मसत्यानुबोधरहितानां मनसो निग्रहायत्तम् अभयं सर्वेषां योगिनाम् । किञ्च, दुःखक्षयोऽपि । न ह्यात्मसंबन्धिनि मनसि चलिते दुःखक्षयोऽस्त्यविवेकिनाम् । किञ्च, आत्मप्रबोधोऽपि मनोनिग्रहायत्त एव । तथा अक्षयापि मोक्षाख्या शान्तिस्तेषां मनोनिग्रहायत्तैव ॥ पा. २२५.

[अत्र मनोनिग्रहशब्देन निदिध्यासनं विवक्षितम् ॥]

(८) दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति ॥ सू. भा. ४-१-१, पा. ४६०.

(९) परिव्राजकस्य तु सर्वकर्मसंन्यासात् प्रत्यवायो न संभवत्यननुष्ठाननिमित्तः । शमदमादिस्तु तदीयो धर्मो ब्रह्मसंस्थताया उपोद्बलको न विरोधी । ब्रह्मनिष्ठत्वमेव हि तस्य शमदमाद्युपबृंहितं स्वाश्रमविहितं कर्म, यज्ञादीनि चेतरेषाम् । तद्व्यतिक्रमे च तस्य प्रत्यवायः ॥

सू. भा. ३-४-२०, पा. ४४२.

(१०) यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानादमृतत्वं भवति । तं 'ज्ञेयं यत्तत् प्रवक्ष्यामि' (गी. १३-२) इत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान् । अधुना तु तज्ज्ञानसाधनगणम् अमानित्वादिलक्षणं – यस्मिन् सति तज्ज्ञेयविज्ञाने योग्योऽधिकृतो भवति, यत्परः संन्यासी ज्ञाननिष्ठ उच्यते – तम् अमानित्वादिगणं ज्ञानसाधनत्वाज्ज्ञानशब्दवाच्यं विदधाति भगवान् ॥ गी. भा. १३-७, पा. १९९.

(११) ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यस्य नानधिकृतविषयत्वम् ॥

सू. भा. ३-४-२०, पा. ४४२.

उपासनानिदिध्यासनयोर्वैलक्षण्यम् –

५६. वैराग्येण प्राप्तपारिव्राज्यस्य भिक्षोरवश्यकर्तव्या श्रवणमननावृत्तिर्वावदात्मानुभवम् इत्युक्तम्। यस्य श्रवणमात्रादेव नानुभवः, तस्य मननसंयुता श्रवणावृत्तिः कर्तव्या भवति, मन्दमध्यमाधिकारिणां तु निदिध्यासनमप्यावश्यकं भवेदिति च। तत्र यद्यपि निदिध्यासनमपीतरोपासनवन्निरन्तरध्यानलक्षणा क्रियैव – अत एवोपासनशब्देनापि व्यपदिश्यते क्वचित् – तथाप्युपासनातस्तस्य लक्षणभेदोऽस्ति। यत उपासनं नाम यथाचोदितं क्रियमाणा प्रत्ययसंततिः; निदिध्यासनं त्वैकाग्र्येण वस्तुतत्त्वनिश्चयाय तत्रैव चित्तं स्थापयित्वा निरीक्षणं रत्नपरीक्षकवत्। तत्रेश्वरप्राप्त्यर्थेषूपासनेष्वन्यतममुपादाय ध्येयसाक्षात्कारपर्यन्तं यथाशास्त्रं समानवृत्तिं संतनुयात् साधकः। साक्षात्कारसाध्यत्वादुपासनाफलप्राप्तेः। फलं त्वपरब्रह्मप्राप्तिः कालान्तरे ब्रह्मलोके, तत्रेश्वरसमानभोगः, कल्पान्ते च ज्ञानोत्पत्त्या सह ब्रह्मणा क्रममुक्तिरिति च शास्त्रेषु निर्दिष्टम्। निदिध्यासनकर्त्रा तु वस्तुदर्शनायैव प्रयतेत वस्त्वन्तरान्मनोव्यावृत्त्या। ज्ञानोत्पत्त्यनन्तरं कर्तव्यं नावशिष्यत इति विशेषः। इदं च निदिध्यासनम् **अध्यात्मयोग**नाम्ना समुपदिष्टं **काठके**। **ध्यानयोग**शब्देन व्यवहृतं **गीतासु**। **मनोनिग्रह**मिति च व्यपदिष्टं **माण्डूक्यकारिकासु**। तत् प्रकारश्च तत्रैव वर्णितः। सर्वत्र च फलं सम्यग्दर्शनमित्येव कीर्तितम्, ततः सद्योमुक्तिरिति च॥

(१) एकेन चोपासनेन साक्षात्कृत उपास्ये विषये ईश्वरादौ द्वितीयमनर्थकम्। अपि चासंभवः। साक्षात्कारणस्य समुच्चयपक्षे चित्तविक्षेपहेतुत्वात्। साक्षात्करणसाध्यं च विद्याफलं दर्शयन्ति श्रुतयः। 'यस्य स्यादद्धा न विचिकित्सास्ति' (छां. ३-१४-४) इति, 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) इति चैवमाद्याः। स्मृतयश्च 'सदा तद्भावभावितः' (गी. ८-६) इत्येवमाद्याः। तस्मात्, अविशिष्टफलानां विद्यानाम् अन्यतममादाय तत्परः स्याद् यावदुपास्यविषयसाक्षात्करणेन तत्फलं प्राप्तमिति॥ सू. भा. ३-३-५९, पा. ४३०.

(२) कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तः, तदध्यक्षेण हिरण्यगर्भेण सहाताः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्त इति। इत्थं क्रममुक्तिरनावृत्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या॥
सू. भा. ४-३-१०, पा. ४९६.

(३) 'अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥'
का. १-२-१२.

भाष्यम् – विषयेभ्यः प्रतिसंहृत्य चेतस आत्मनि समाधानमध्यात्मयोगः, तस्याधिगमः। तेन मत्वा देवमात्मानं धीरो हर्षशोकौ, आत्मन उत्कर्षापकर्षयोरभावात् – जहाति॥ पा. ७४.

(४) 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' (का. १-३-१२) इति वैष्णवस्य परमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति – 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि' (का. १-३-१३) इति। एतदुक्तं भवति– वाचं मनसि संयच्छेत्, वागादिबाह्येन्द्रियव्यापारम् उत्सृज्य मनोमात्रेणावतिष्ठेत। मनोऽपि विषयविकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धौ अध्यवसायस्वभावायां धारयेत्। तामपि बुद्धिं महत्यात्मनि भोक्तरि अव्यायां वा बुद्धौ – सूक्ष्मतापादनेन नियच्छेत्। महान्तं स्वात्मानं शान्त आत्मनि प्रकरणवति परस्मिन् पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेत् इति च॥ सू. भा. १-४-१, पा. १४७.

(५) ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥ गी. १८-५२.

भाष्यम् – ध्यानम् आत्मस्वरूपचिन्तनम्, योगः आत्मविषय एवैकाग्रीकरणम्। तौ ध्यानयोगौ परस्त्वेन कर्तव्यौ यस्य स ध्यानयोगपरः। नित्यम्। नित्यग्रहणं मन्त्रजपाद्यन्यकर्तव्याभावप्रदर्शनार्थम्॥ पा. २८२.

[अत्र ज्ञाननिष्ठा कथं कार्या? – इत्येतद्विवक्षुर्भगवान् 'बुद्ध्या विशुद्धया युक्तः' (गी. १८-५१) इत्यारभ्य 'ब्रह्मभूयाय कल्पते' (१८-५२) इत्येतत्पर्यन्तं ध्यानयोगं सान्तरङ्गसाधनमुक्त्वा 'ब्रह्मभूतः प्रसन्नात्मा' इत्याद्याभ्यां द्वाभ्यां सद्योमुक्तिं तत्फलमाह॥]

(६) स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥ गी. ६-२३.
संकल्पप्रभवान् कामाँस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ ६-२४.
शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ ६-२५.
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ ६-२६.
प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ ६-२७.
युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ ६-२८.
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ ६-२९.

भाष्यम् – 'सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्र समदर्शनः ॥
गी भा. पा. ११०.

[अत्र ध्यानयोगानुष्ठानप्रकारं विवृत्यान्तिमश्लोकेन तत्फलं ज्ञानमित्युक्तम्]

(७) उत्सेक उदधेर्यद्वत् कुशाग्रेणैकबिन्दुना ।
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥
उपायेन निगृह्णीयाद् विक्षिप्तं कामभोगयोः ।
सुप्रसन्नं लये चैव यथा कामो लयस्तथा ॥
दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् ।
अजं सर्वमनुस्मृत्य जातं नैव तु पश्यति ॥
लये संबोधयेच्चित्तं विक्षिप्तं शमयेत् पुनः ।
सकषायं विजानीयात् समप्राप्तं न चालयेत् ॥
नास्वादयेत् सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।
निश्चलं निश्चरच्चित्तमेकीकुर्यात् प्रयत्नतः ॥
यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत् तदा ॥ गौ. का. ३-४१....४६.

[अत्र मनोनिग्रहप्रकारो वितत्य दर्शितः, अन्ते च मनसो ब्रह्मरूपापत्ति-लक्षणं तत्फलं च दर्शितम् ॥]

(८) आवृत्तिः सर्वोपासनेष्वादर्तव्येति स्थितम् आद्येऽधिकरणे। तत्र यानि तावत् सम्यग्दर्शनार्थान्युपासनानि तान्यवघातादिवत् कार्यपर्यवसनानीति ज्ञातमेवैषामावृत्तिपरिमाणम्। न हि सम्यग्दर्शने कार्ये निष्पन्ने यत्नान्तरं किञ्चित् शासितुं शक्यम्। अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्याविषयत्वात्॥ सू. भा. ४-१-१२, पा. ४७१.

[अत्र श्रवणाद्यावृत्तिरेवोपासनशब्दवाचोयुक्त्या व्यपदिष्टा। आत्मज्ञानं तदन्यस्यानुपयोगात्। निदिध्यासनं तु विशेषतोऽत्र उपासनत्वेनानुसंधेयम्। 'अपि चोपासनं निदिध्यासनं चेत्यन्तर्गीतावृत्तिगुणैव क्रिया अभिधीयते' (४-१-१) इत्याद्यसूत्रभाष्ये स्थितत्वादिति ध्येयम्॥]

मुमुक्षुसंन्यासिनानुष्ठेयानि पाण्डित्यादीन्यप्याविद्यकान्येव –

५७. मुमुक्षुर्विवेकी पुत्रैषणा, वित्तैषणा, लोकैषणा चेति तिसृभ्योऽप्येषणाभ्यो व्युत्थायात्मज्ञानलक्षणं पाण्डित्यं निःशेषीकुर्यात्। ततो 'बाल्येन तिष्ठासेत्' ज्ञानादिभिरात्मानमप्रस्थापयन्नात्मबलभावेनैव स्थातुं यतेत। अथ मुनिर्बुभूषेत्, आत्मानुसंधानेनैव ज्ञानातिशयं संपादयेत्; अन्यथा हि पराग्दृष्टिप्राबल्यात् कदाचिद् बहिर्हियेत मन इति। तेन चानात्मप्रत्ययतिरस्करणं निःशेषं कृत्वा निरपवादं ब्रह्मप्रत्ययनिष्ठो भवतीति मुख्यवृत्त्या ब्राह्मणो भवति–इति श्रुत्युपदेशः। एतदपि साधनं कर्मोपासनादिवत् कर्तृत्वबुद्ध्यध्यारोपपूर्वकमेव क्रियते इत्यविद्याभूमावेव। तदेवं जीवस्य जीवत्वं वैराग्यप्राप्तिः, मुमुक्षुत्वं, मुक्तिप्राप्तिश्चेत्येतत्सर्वमपि व्यवहारदृष्ट्यैव; परमार्थस्त्वजाद्वितीयब्रह्मात्मैक्यमेवेति ज्ञेयम्॥

(१) तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः॥

बृ. ३-५-१.

भाष्यम् – 'यस्मात् पूर्वे ब्राह्मणा एतमात्मानम् असाधनफलस्वभावं विदित्वा सर्वस्मात् साधनफलस्वरूपादेषणालक्षणाद् व्युत्थाय भिक्षाचर्यं चरन्ति स्म, दृष्टादृष्टार्थं कर्म तत्साधनं च हित्वा, तस्मात् अद्यत्वेऽपि ब्राह्मणो ब्रह्मवित् पाण्डित्यं पण्डितभावं एतदात्मविज्ञानं पाण्डित्यं निर्विद्य निःशेषं

विदित्वा । आत्मविज्ञानं निरवशेषं कृत्वा-इत्यर्थः । आचार्यत आगमतश्च । एषणाभ्यो व्युत्थाय । एषणाव्युत्थानावसानमेव हि तत् पाण्डित्यम् । ... तस्मादेषणाभ्यो व्युत्थाय ज्ञानबलभावेन बाल्येन तिष्ठासेत् स्थातुमिच्छेत् । ... बलं नाम आत्मविद्यया अशेषविषयदृष्टितिरस्करणम् । अतस्तद्भावेन बाल्येन तिष्ठासेत् । .... अथ मननान्मुनिर्योगी भवति । .... अमौनं चात्मज्ञानानात्मप्रत्ययतिरस्कारात् पाण्डित्यबाल्यसंज्ञकौ निःशेषं कृत्वा । मौनं नाम अनात्मप्रत्ययतिरस्करणस्य पर्यवसानं फलम् । तच्च निर्विद्य, अथ ब्राह्मणः कृतकृत्यो भवति । ब्रह्मैव सर्वमिति प्रत्यय उपजायते ॥ पा. ८१६.

(२) 'बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं ज्ञानातिशयरूपं विधीयते । .... ननु सति विद्यावत्त्वे प्राप्नोत्येव तत्रातिशयः किं मौनविधिना ? इत्यत आह 'पक्षेण' इति । एतदुक्तं भवति – यस्मिन् पक्षे भेददर्शनप्राबल्याच्च प्राप्नोति तस्मिन्नेष विधिरिति ॥

सू. भा. ३-४-४७, पा. ४५५.

[सूत्रभाष्ये विद्यावतोऽपि व्यवहारदृष्ट्या भेददर्शनप्राबल्यमाशङ्क्य तन्निवारणार्थं मौनं विधीयत इत्युक्तम् । 'आत्मानं विदित्वा' इति पूर्वस्मिन् वाक्ये विद्यावदधिकारात् । तेनैव विविदिषोरपि मौनं कार्यं भवतीत्यविरोधो द्रष्टव्यः ॥]

(३) 'ज्ञानाध्ययनधार्मिकत्वादिभिरात्मानम् अविख्यापयन् दम्भदर्पादिरहितो भवेत् । यथा बालोऽप्ररूढेन्द्रियतया न परेषाम् आत्मानमाविष्कर्तुमीहते तद्वत् ॥ सू. भा. ३-४-५०, पा. ४५६.

[बृहदारण्यकभाष्ये ज्ञानबलभावो बाल्यम् – इत्युक्तम् । सूत्रभाष्ये तु बालस्य भावो दम्भादिराहित्यमित्युक्तम् । उभयमप्यविरुद्धतया संग्राह्यमेव ॥]

(४) हेयज्ञेयाप्यपाक्यानि विज्ञेयान्यग्रयाणतः ।
तेषामन्यत्र विज्ञेयादुपलम्भस्त्रिषु स्मृतः ॥ गौ. का. ४-९०.

भाष्यम् – हेयानि च लौकिकादीनि त्रीणि जागरितस्वप्नसुषुप्तानि । आत्मन्यसत्त्वेन रज्ज्वां सर्पवद् हातव्यानीत्यर्थः । ज्ञेयम् इह चतुष्कोटिवर्जितं परमार्थतत्त्वम् । आप्यानि आप्तव्यानि त्यक्तबाह्यैषणात्रयेण भिक्षुणा पाण्डित्यबाल्यमौनाख्यानि साधनानि । पाक्यानि रागद्वेषमोहादयो दोषाः, कषायाख्यानि पक्तव्यानि । सर्वाण्येतानि हेयज्ञेयाप्यपाक्यानि विज्ञेयानि भिक्षुणोपायत्वेन इत्यर्थः । अग्रयाणतः प्रथमतः । तेषां हेया-

दीनाम् - अन्यत्र विज्ञेयात् परमार्थसत्यं विज्ञेयं ब्रह्मैकं वर्जयित्वा - उपलम्भनम् उपलम्भः, अविद्याकल्पनामात्रं हेयाप्यपाक्येयु त्रिष्वपि स्मृतो ब्रह्मविद्भिः न परमार्थसत्यता त्रयाणाम् इत्यर्थः ॥ पा. २५३.

(५) न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥ गौ. का. ३-४८.

भाष्यम्- सर्वोऽप्ययं मनोनिग्रहादिः मृल्लोहादिवत् सृष्टिः, उपासना चोक्ता परमार्थस्वरूपप्रतिपत्त्युपायत्वेन न परमार्थसत्येति । परमार्थसत्य तु न कश्चित् जायते जीवः कर्ता भोक्ता च नोत्पद्यते केनचिदपि प्रकारेण । .... पूर्वेषूपायत्वेनोक्तानां सत्यानाम् एतदुत्तमं सत्यम्, यस्मिन् सत्यस्वरूपे ब्रह्मणि अणुमात्रमपि किञ्चिन्न जायत इति ॥ पा. २२७.

ज्ञानोत्पत्त्यनन्तरम् आत्मनिष्ठैव कर्माभावः -

५८. यद्यपि श्रुतिस्मृत्योर्ज्ञानसाधनानि विहितानि, तथापि तान्यनुतिष्ठतः कस्य कदा भवति ज्ञानोत्पत्तिरिति नियन्तुं न शक्यते । ज्ञानसाधनानुष्ठानस्यासतिप्रतिबन्धके तस्मिन्नेव जन्मनि ज्ञानपरिपाको भवेत् । सति तु कस्मिंश्चित् प्रतिबन्धके जन्मान्तरेऽप्युत्पद्येत ज्ञानम् । अस्मादेव च हेतोर्ब्रह्मचर्ये, गार्हस्थ्ये, वानप्रस्थे वा यथायोगं ज्ञानोत्पत्तिरवकल्पते, तस्य तस्य साधनपरिपाकानुगुण्येन । तत्र यस्य यदैव च ज्ञानमुत्पन्नम्, तस्य तदैवार्थप्राप्तः संन्यासः । न तु ज्ञानकर्मणोः सहभाव उपपद्यते कथञ्चित् । अत एव हि ब्रह्मचर्याद्यन्यतमादप्याश्रमात् पारिव्राज्यमनुजानाति श्रुतिः-'गृहाद् वनी भूत्वा प्रव्रजेद्, यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद् वा वनाद् या' (जा. ४) इति । यस्य तु ज्ञानोत्पत्त्यनन्तरं, कुतश्चित् कारणात् पारिव्राज्यासंभवः, तस्य लोकदृष्ट्या कर्म कुर्वतोऽपि परमार्थदृष्ट्या कर्मासंसर्ग एव । अहङ्कारफलाभिसंध्योरभावात् तत्कर्मणः कर्मत्वापायात्, स्वदृष्ट्या सर्वस्यापि कर्मणो ज्ञानसमकालमेव क्षीणत्वात्, सर्वथापि कर्तृत्वाभावबुद्धेरेव ज्ञानत्वाच्च ॥

(१) आत्मानं चेद् विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥ बृ. ४-४-१२.

(२) यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ गी. ३-१७.

(३) यदा प्रक्रान्तस्य विद्यासाधनस्य कश्चित् प्रतिबन्धो न क्रियत उपस्थितविपाकेन कर्मान्तरेण. तदा इहैव विद्या उत्पद्यते ; यदा तु खलु तत्प्रतिबन्धः क्रियते, तदा अमुत्रेति । ....यानि चैकस्य कर्मणो विपाचकानि देशकालनिमित्तानि, तान्येवान्यस्यापि – इति न नियन्तुं शक्यते । यतो विरुद्धफलान्यपि कर्माणि भवन्ति ॥ सू. भा. ३-४-५१. पा. ४५७.

(४) यस्तु त्वकर्मादिदर्शी. सोऽकर्मादिदर्शनादेव निष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः सन् कर्मणि न प्रवर्तते, यद्यपि प्राग्विवेकतः प्रवृत्तः । यस्तु प्रारब्धकर्मा सन् उत्तरकालमुत्पन्नात्मसम्यग्दर्शनः स्यात्, स सर्वकर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव । स कुतश्चिन्निमित्तात् कर्मपरित्यागासंभवे सति कर्मणि तत्फले च सङ्गरहिततया स्वप्रयोजनाभावा-ल्लोकसंग्रहार्थं पूर्ववत् कर्मणि प्रवृत्तोऽपि नैव किञ्चित् करोति । ज्ञानाग्नि-दग्धकर्मत्वात् तदीयं कर्माकर्मैव संपद्यते ॥ गी. भा. ४-२०, पा. ७०.

(५) यस्यैवं पुरुषस्योपमर्दितः प्रत्ययो ब्रह्मक्षत्राद्यात्मविषयः, तस्य तत्प्रत्ययसंन्यासात् तत्तत्कार्याणां कर्मणां कर्मसाधनानां चार्थप्राप्तश्च संन्यासः ॥ बृ. भा. २-४-१, पा. ७५८.

(६) यथा लोके द्रष्टुश्चक्षुष आलोकेन संयोगो यत्कालः तत्काल एव रूपाभिव्यक्तिः ; एवम् आत्मविषयं विज्ञानं तत्काल एव तद्विषयाज्ञान-तिरोभावः स्यात् । .... ॥ बृ. भा. १-४-१०, पा. ६७६.

(७) पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि क्रियापि कालेष्वकर्तृत्वा-भोक्तृत्वस्वरूपं ब्रह्माहमस्मि. नेतःपूर्वमपि कर्ता भोक्ता वाऽहमासम्, नेदानीम्, नापि भविष्यत्काले – इति ब्रह्मविद्वगच्छति । एवमेव च मोक्ष उपपद्यते ॥ सू. भा. ४-१-१३, पा. ४७४.

अविद्याबाधे सत्यात्मन्यवस्थानमेव मोक्षः –

५९. एतावद्विचारसंदर्भेण सर्वोऽपि बन्धमोक्षव्यवहार आत्मानात्मान्यो-न्याध्यासलक्षणाविद्याव्यवहारक्षेत्र ऐवेत्यवगतम् । इत्थं च शास्त्राचार्यो-पदेशजनितविज्ञानेनाविद्यादिसंसारधर्मनिवृत्तावद्वैतात्मन्यवस्थानं मोक्षः इति

व्यवहारोऽप्यविद्ययैवेति सिध्यति । इदं च कैवल्यम् 'स्वस्थता' (मां. अव.) 'स्वात्मन्यवस्थानम्', 'स्वरूपावस्थानम्', 'प्रत्यगात्मस्वरूपावस्थानम्', 'स्वात्मप्रतिष्ठा', 'स्वरूपेणाभिनिष्पत्तिः', 'ब्राह्मी स्थितिः', 'अशरीरत्वम्'— इत्यादिशब्दैर्व्यपदिश्यते । सेयं मुक्त्यवस्था ब्रह्माव्यतिरिक्तत्वात् ब्रह्मणश्च जिज्ञासोरात्मस्वाभाव्यात् न कयाचित् क्रियया निष्पाद्या, विकार्या, संस्कार्या, प्राप्या वा । अविद्यामात्रव्यवधानापनयनेन तु स्वस्वरूपत्वेन विज्ञेया । अत एव मोक्षस्य ज्ञानकार्यत्वमप्यौपचारिकम् । दशमज्ञानेन दशमप्राप्तेरिव, ब्रह्मप्राप्तिश्चौपचारिकमेव । एतादृशज्ञानिनो बाधितानुवृत्त्या मिथ्याज्ञानानुवृत्तेः सत्त्वेऽपि तज्ज्ञानस्य न काचित् क्षतिः । यथैव तस्य कर्मणो लोकसंग्रहार्थत्वेऽपि तस्य कर्मबन्धाभावः, तद्वत् तत्कृतोपदेशेन मुमुक्षुजनानुग्रहेऽपि न तस्मिन्नपि तस्य वास्तविकं कर्तृत्वमस्ति ॥

(१) किं पुनस्तत् प्रयोजनमिति ? उच्यते । रोगार्तस्येव रोगनिवृत्तौ स्वस्थता, तथा दुःखात्मकस्यात्मनो द्वैतप्रपञ्चोपशमे स्वस्थता, अद्वैतभावः प्रयोजनम् ॥ मां. अव. पा. १७७.

(२) अतोऽविद्यानिवृत्तौ स्वात्मन्यवस्थानं परप्राप्तिः ॥

तै. अव., पा. २५८.

(३) केवलज्ञानमप्यनर्थकं तर्हि । न । अविद्यानिवर्तकत्वे सति दृष्टकैवल्यफलावसानत्वात् । अविद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वम् रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदीपप्रकाशफलवत् । विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानं हि प्रकाशफलम् । तथा ज्ञानम् ॥

गी. भा. १८-६६, पा. २८९.

(४) पतितेऽस्मिन् शरीरे देहान्तरोत्पत्तौ कारणाभावादात्मनः, रागादीनां चाकरणात् स्वरूपावस्थानमेव कैवल्यमित्ययत्नसिद्धं कैवल्यम् ॥

गी. भा., पा. २९०.

[केवलनित्यकर्मानुष्ठानात् कैवल्यमिति वादिनां मतस्यानुवादप्रसङ्गेनेदं वाक्यं लिखितम् । एवं सूत्रभाष्येऽपीदमेव मतमनुवदद्भाष्यवाक्यमस्ति 'देहान्तरप्रतिसंधानकारणाभावात् स्वरूपावस्थानलक्षणं कैवल्यम्' (पा. ४९९) इति । पूर्वं वाक्यं स्वावसर एवोत्तरस्मिन् काण्डे उदाहरिष्यते ॥]

(५) देवाद्यमृतत्वं ह्यध्रुवम्, इदं तु प्रत्यगात्मस्वरूपावस्थानलक्षणं ध्रुवम् ॥ का. २-१-२. पा. ८६.

(६) संसारोऽनादिरनन्तो दुःखस्वरूपत्वात् हातव्यः प्रत्येकं शरीरिभिः। नदीस्रोतोवदविच्छेदसंबन्धः। तदुपशमलक्षणो मोक्षः परविद्याविषयोऽनाद्यनन्तोऽजरोऽमरोऽमृतोऽभयः शुद्धः प्रसन्नः स्वात्मप्रतिष्ठालक्षणः परमानन्दोऽद्वय इति ॥ मुं. भा. १-२-१, अव., पा. १४७, १४८.

(७) देहाद्युपाध्यविविक्तस्येव सतो जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात् समुत्थानं विवेकविज्ञानफलम् स्वरूपेणाभिनिष्पत्तिः, केवलात्मस्वरूपावगतिः ॥ सू. भा. १-३-१९, पा. ११३.

(८) एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥

भाष्यम् – ब्राह्मी ब्रह्मणि भवा इयं स्थितिः सर्वं कर्म संन्यस्य ब्रह्मरूपेणावस्थानम् इत्येतत् ॥ भी. भा. २-७२, पा. ४०.

(९) तद्यथाहिनिर्ल्वयिनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते ॥ बृ. ४-४-७.

भाष्यम् – इदं शरीरं सर्पस्थानीयेन मुक्तेनानात्मभावेन परित्यक्तं मृतमिव शेते। अथेतरः सर्पस्थानीयो मुक्तः सर्वात्मभूतः सर्पवत् तत्रैव वर्तमानोऽप्यशरीर एव. न पूर्ववत् पुनः सशरीरो भवति। कामकर्मप्रयुक्तशरीरात्मभावेन हि पूर्वं सशरीरो मर्त्यश्च। तद्वियोगादथेदानीम् अशरीरोऽत एवामृतश्च ॥ पा. ९२१.

(१०) तस्मात्. मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् ॥ सू. भा. १-१-४, पा. २२.

(११) ब्रह्मैव हि मुक्त्यवस्था ॥ सू. भा. ३-४-५२, पा. ४५८.

(१२) यस्य तूत्पाद्यो मोक्षः, तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्। तथा विकार्यत्वे च। तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्यम्, उत्पाद्यं वा घटादि नित्यं दृष्टं लोके। न चाप्यस्वेनापि कार्यापेक्षा। स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्। .... नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत। संस्कारो हि संस्कार्यस्य गुणाधानेन वा स्यात्, दोषापनयनेन वा। न तावद्गुणाधानेन संभवति। अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य। नापि दोषापनयनेन। नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य ॥ सू. भा. १-१-४, पा. १६, १७.

(१३) अज्ञानव्यवधाननिवर्तकत्वाज्ज्ञानस्य मोक्षो ज्ञानकार्यमित्युपचर्यते। न तु कर्मणा निवर्तयितव्यमज्ञानम्। न चाज्ञानव्यतिरेकेण मोक्षस्य

व्यवधानान्तरं कल्पयितुं शक्यम् । नित्यत्वान्मोक्षस्य, साधकस्वरूपाव्यतिरेकाच्च । यत् कर्मणा निर्वर्त्येत ॥ बृ. भा. ३-३ अव., पा. ७९९.

(१४) तस्यैवमविद्ययानात्मब्रह्मस्वरूपस्य – प्रकृतसङ्ख्यापूरणस्यात्मनोऽविद्ययानात्मस्य सतः केनचित् स्मारितस्य पुनस्तस्यैव विद्यया आत्मिर्यथा तथा–श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदात्मिरुपपद्यत एव ॥ तै. भा. २-१, पा. २८२.

(१५) अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति । बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित्कालमनुवर्तत एव ॥ सू. भा. ४-१-१५, पा. ४७५.

(१६) न च विपरीतप्रत्ययो विद्यावत उत्पद्यते । निर्विषयत्वात् । अनवधृतविषयविशेषस्वरूपं हि सामान्यमात्रमाश्रित्य विपरीतप्रत्यय उत्पद्यमान उत्पद्यते । यथा शुक्तिकायां रजतमिति । स च विषयविशेषावधारणवतोऽशेषविपरीताश्रयस्य उपमर्दितत्वान्न पूर्ववत् संभवति । शुक्तिकादौ सम्यक्प्रत्ययोत्पत्तौ पुनरदर्शनात् । क्वचिद् विद्यायाः पूर्वोत्पन्नविपरीतप्रत्ययजनितसंस्कारेभ्यो विपरीतप्रत्ययावभासाः स्मृतयो जायमाना विपरीतप्रत्ययभ्रान्तिम् अकस्मात् कुर्वन्ति । यथा विज्ञातदिग्विभागस्याप्यकस्माद्दिग्विपर्ययविभ्रमः ॥ बृ. भा. १-४-१०, पा. ६७८.

(१७) अथ ज्ञानवतः क्षीयन्ते कर्माणि, तदा ज्ञानप्राप्तिसमकालमेव ज्ञानस्य सत्संपत्तिहेतुत्वान्मोक्षः स्यादिति शरीरपातः स्यात् । तथा च आचार्याभाव इति 'आचार्यवान् पुरुषो वेद' इत्यनुपपत्तिः, ज्ञानान्मोक्षाभावप्रसङ्गश्च । देशान्तरप्राप्त्युपायज्ञानवदनैकान्तिकफलत्वं वा ज्ञानस्य । न । कर्मणां प्रवृत्ताप्रवृत्तफलवत्त्वविशेषोपपत्तेः ॥

छां. ६-१४-२, पा. ५३६.

[अत्र कर्मणो बाधितानुवृत्त्यैव सत्त्वं तेन च आचार्याभावदोषवारणं चोक्तम् ॥]

(१८) परकर्मणां च परस्मिन्नात्मन्यविद्यया अध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते । उत्पन्नविवेकज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेह इव देह एव नवद्वारे पुरे आसनं प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या देह एव विशेषविज्ञानोत्पत्तेः 'देह एव आस्ते' इत्यस्यैव विशेषणफलम् । विद्वदविद्वत्प्रत्ययभेदापेक्षत्वात् ॥

गी. भा. ५-१३, पा. ९०, ९१.

[अत्र निवृत्तसर्वकर्मणोऽपबाधितानुवृत्त्या देहे आसनमुक्तम् । तस्योपदेशकर्मण्यपि नैव किञ्चित् करोमीत्यनुसंधानं चोपपन्नमित्यवगम्यते ॥]

मुक्तिद्वयम्, जीवन्मुक्तेर्मुख्यत्वं च–

६०. येयं मुक्तिर्विद्यासमवाप्या, सा ज्ञानसमकाललब्धात्मभावत्वात् **सद्योमुक्तिरित्युच्यते**ऽभियुक्तैः। सैव च **जीवन्मुक्ति**शब्दव्यपदेश्या; व्यवहारदृष्ट्या जीवतैव लभ्यत्वात्, यावज्जीवमनुवर्तनाच्च। शरीरपाते तु या ब्रह्मण्येव ब्रह्मरूपेणावस्थितिः, सापि **विमुक्तिः, ब्रह्मण्यय्यः, ब्रह्मनिर्वाणम्, ब्रह्मभूयम्, ब्रह्मसंपत्तिः, क्षेमम्, अपुनरावृत्तिः** – इत्यादिशब्दैरुपचर्यते, शरीरान्तरादानहेतोः कर्मशेषस्याभावमालक्ष्य। मुख्या मुक्तिस्तु सद्योमुक्तिरेवेति सर्वं शिवम्॥

(१) न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिरागतिर्वा क्वचिदस्ति। 'न तस्य प्राणा उत्क्रामन्ति' (बृ. ४-४-६) इति श्रुतेः। ब्रह्मसल्लीनप्राणा एव ते। ब्रह्ममया ब्रह्मभूता एव ते॥

गी. भा. ८-२४, पा. १३४.

(२) ब्रह्मैव सन् ब्रह्माप्येति॥ बृ. ४-४-६.

भाष्यम् – 'विद्वान् स इहैव ब्रह्म – यद्यपि देहवानिव लक्ष्यते स ब्रह्मैव – सन् ब्रह्माप्येति। यस्माच्च हि तस्याब्रह्मत्वपरिच्छेदहेतवः कामाः सन्ति, तस्मादिहैव ब्रह्मैव सन् ब्रह्माप्येति न शरीरपातोत्तरकालम्। न हि विदुषो मृतस्य भावान्तरापत्तिर्जीवतोऽन्यो भावः। देहान्तरप्रतिसंधानाभावमात्रेणैव तु ब्रह्माप्येति–इत्युच्यते॥ पा. ९१७.

(३) अनुष्ठाय न शोचति। विमुक्तश्च विमुच्यते॥ का. २-२-१.

भाष्यम् – अनुष्ठाय ध्यात्वा। ध्यानं हि तस्यानुष्ठानं सम्यग्विज्ञानपूर्वकम्। .... इहैवाविद्याकृतकामकर्मबन्धनैर्विमुक्तो भवति। विमुक्तश्च सन् विमुच्यते। पुनः शरीरं न गृह्णातीत्यर्थः॥ पा. ९१.

(४) स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥ गी. ५-२४.

भाष्यम् – य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन्नेव ब्रह्मभूतः सन् अधिगच्छति प्राप्नोति॥ पा. ९५.

(५) अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्॥ गी. ५-२६.

भाष्यम् – 'जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते॥ पा. ९६.

(६) प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ गी. भा. ६-२७.

भाष्यम्-ब्रह्मभूतं जीवन्मुक्तं 'ब्रह्मैव सर्वम्'-इत्येवंनिश्चयवन्तम् ॥
पा. १०९.

(७) अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ गी. १८-५३.

भाष्यम् - 'ब्रह्मभूयाय ब्रह्मभवनाय कल्पते समर्थो भवति' ॥
पा. २८३.

(८) यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ गी. १३-३०.

भाष्यम् - शास्त्राचार्योपदेशमनु आत्मानं प्रत्यक्षत्वेन पश्यति 'आत्मैवेदं सर्वम्' इति । तत एव च तस्मादेव च विस्तारम् उत्पत्तिं विकासम् 'आत्मतः प्राणः आत्मत आशा आत्मतः स्मर आत्मत आकाश आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावौ आत्मतोऽन्नम्' (छां.) इत्येवमादिप्रकारैर्विस्तारं यदा पश्यति ब्रह्म संपद्यते, ब्रह्मैव भवति तदा तस्मिन् काले ॥ पा. २१५, २१६.

(९) तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥ गी. ५-१७.

भाष्यम् - तस्मिन् ब्रह्मणि गता बुद्धिर्येषां ते तद्बुद्धयः । तदात्मनः । तदेव परं ब्रह्म आत्मा येषां ते तदात्मानः । तन्निष्ठाः । निष्ठा, अभिनिवेशः, तात्पर्यम् । सर्वाणि कर्माणि संन्यस्य तस्मिन् ब्रह्मण्येवावस्थानं येषां ते तन्निष्ठाः । तत्परायणाश्च । तदेव परम् अयनं परा गतिर्येषां भवति ते तत्परायणाः । केवलात्मरतय इत्यर्थः । येषां ज्ञानेन नाशितम् आत्मनोऽज्ञानं ते गच्छन्ति, एवंविधा अपुनरावृत्तिम् अपुनर्देहसंबन्धं ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतो नाशितः कल्मषः पापादिसंसारकारणदोषो येषां ते ज्ञाननिर्धूतकल्मषाः । यतय इत्यर्थः ॥ पा. ९२.

[अत्र 'तन्निष्ठाः' इत्यनेन जीवन्मुक्तिमुक्त्वा 'अपुनरावृत्तिम्' इति विदेहमुक्तिरप्युक्ता द्रष्टव्या ॥]

(१०) अप्रवृत्तफले एव पूर्वे जन्मान्तरसंचिते अस्मिन्नपि च जन्मनि प्राग् ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते ; न त्वारब्धकार्ये

स्वामि भुक्तफले याभ्यामेतद् ब्रह्मज्ञानायतनं जन्म निर्मितम्। कुत एतत्? 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छां. ६-१४-२) इति शरीरपातावधिकरणात् क्षेमप्राप्तेः। इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात्, ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत। तत्र शरीरपातप्रतीक्षां नाचक्षीत॥ सू. भा. ४-१-१५, पा. ४७५.

[अत्र व्यावहारिकदृष्ट्या ज्ञानिनः शरीरित्वं प्रारब्धकर्मविशेषत्वं चोररीकृत्य शरीरपातानन्तरं क्षेमप्राप्त्युक्तेः, क्षेमशब्देन विदेहकैवल्यमुच्यत इति स्पष्टम्॥]

ज्ञानफले मुक्तौ न कश्चिद् विशेषोऽस्ति–

६१. यद्यपि ब्रह्मलोकं गतानाम् उपासकानां तत्रैव सम्यग्ज्ञानोत्पत्तौ तल्लोकप्रलये प्रत्युपस्थिते ब्रह्मणा सहावाप्यमाना **क्रममुक्तिः**, इहैवजन्मनि जन्मान्तरे वा विद्यासाधनविपाके उत्पद्यमानाया विद्यायाः समसमयं अधिगम्यमाना **सद्योमुक्तिः**, प्रारब्धफलकर्मक्षये सति शरीरपातानन्तरं भविष्यन्ती **विदेहमुक्तिः** – इति च त्रेधा विभज्य दर्श्यते मुक्तिर्वेदान्तेषु, तथापि न कश्चिदपि मुक्तिस्वरूपे कश्चिद् विशेषः समस्ति। नित्यप्राप्तात्मस्वरूपत्वान्मुक्तेः, तत्साधनभूतायां विद्यायां भेदाभावाच्च। न हि मुक्तिर्नाम उत्पाद्या, विकार्या, आप्या, संस्कार्या वा येन तत्तत्साधनानुगुणं भिद्येत। नित्यप्राप्तात्मस्वरूपत्वात्, आत्मनश्च निरवयवत्वात्, कूटस्थनित्यत्वात्, अनाधेयातिशयरूपत्वात्, सर्वक्रियाश्रयत्वानुपपत्तेश्च। 'शरीरपाते मोक्षः' इति व्यवहारस्तु देहान्तरग्रहणाभावापेक्षया इत्युक्तम् (खं. ६०)। तस्मात्, न ज्ञानफले कश्चिद्विशेषप्रतिनियम आशङ्कितव्यः, एकरूपात्मस्वभावत्वात् तस्या इति शिवम्॥

(१) कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तः, तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्ते। इत्थं क्रममुक्तिः, अनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या। न ह्यज्ञस्यैव गतिपूर्विका परप्राप्तिः संभवतीत्युपपादितम्॥

सू. भा. ४-३-१०, पा. ४५६.

(२) तस्मिन् मार्गे प्रयाता मृता गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासका ब्रह्मोपासनपरा जनाः । 'क्रमेण' इति वाक्यशेषः । न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिः, आगतिर्वा क्वचिदस्ति ॥

गी. भा. ८-२४, पा. १३४.

(३) एवं धर्माधर्मयोर्बन्धहेत्वोः, विद्यासामर्थ्यादश्लेषविनाशसिद्धेः, अवश्यंभाविनी विदुषः शरीरपाते मुक्तिः - इत्यवधारयति ॥

सू. भा. ४-१-१४, पा. ४७४.

(४) यथा मुमुक्षोर्विद्यासाधनावलम्बिनः साधनवीर्यविशेषाद् विद्यालक्षणे फले ऐहिकामुष्मिकफलत्वकृतो विशेषप्रतिनियमो दृष्टः, एवं मुक्तिलक्षणेऽपि उत्कर्षापकर्षकृतः कश्चिद् विशेषप्रतिनियमः स्यात् इत्याशङ्क्याह- 'एवं मुक्तिफलानियमः' इति । न खलु मुक्तिफले कश्चिदेवंभूतो प्रतिनियम आशङ्कितव्यः । कुतः ? तदवस्थावधृतेः । मुक्त्यवस्था हि सर्ववेदान्तेषु एकरूपैवावधार्यते । ब्रह्मैव हि मुक्त्यवस्था । न च ब्रह्मणोऽनेकाकारयोगोऽस्ति । एकलिङ्गत्वावधारणात् ॥

सू. भा. ३-४-५२, पा. ४५८.

(५) विद्याभेदाभावादपि तत्फलभेदनियमाभावः कर्मफलवत् । न हि मुक्तिसाधनभूताया विद्यायाः कर्मणामिव भेदोऽस्तीति । सगुणासु तु विद्यासु 'मनोमयः प्राणशरीरः' इत्याद्यासु गुणावापोद्वापवशात् भेदोपपत्तौ सत्याम् उपपद्यते यथास्वं फलभेदनियमः कर्मफलवत् .... नैवं निर्गुणायां विद्यायाम् । गुणाभावात् ॥ सू. भा. ३-४-५२, पा. ४५९.

(६) अशरीरत्वमेव धर्मकार्यमिति चेत् । न । तस्य स्वाभाविकत्वात् । 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥' (का. १-२-२१) .... इत्यादिश्रुतिभ्यः ॥

सू. भा. १-१-४, पा. १४.

[अत्राशरीरत्वलक्षणस्य मोक्षस्य स्वाभाविकत्वमुक्तम् ॥]

(७) तस्मात्, मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् ॥ सू. भा. १-१-४, पा. २२.

[सशरीरत्वस्य मिथ्याप्रत्ययनिमित्तत्वोक्त्या, शरीरपातप्रतीक्षोक्तिः अविद्याकृतव्यवहारमपेक्ष्य-इति गम्यते ॥

(८) इदं तु पारमार्थिकम्, कूटस्थनित्यम्, व्योमवत् सर्वव्यापि, सर्वविक्रियारहितं, नित्यतृप्तं, निरवयवं स्वयंज्योतिःस्वभावम् । यत्र

धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते; तदेतदशरीरत्वम् मोक्षाख्यम् ॥
सू. भा. १-१-४, पा. १४.

(९) यस्य तूत्पाद्यो मोक्षः, तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति उक्तम् । तथा विकार्यत्वे च । तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम् । .... न चाप्यत्वेन कार्यापेक्षा । स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् ॥ सू. भा. १-१-४. पा. १७.

(१०) नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत । संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात्, दोषापनयनेन वा । न तावद् गुणाधानेन संभवति । अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य । नापि दोषापनयनेन । नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य ॥ सू. भा. १-१-४, पा. १७.

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-
वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन
भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां
श्रीशङ्करभगवत्पादभाष्यपरिशीलनं नाम
तृतीयः काण्डः

---

४. प्राचीनप्रस्थानपरीक्षा

काण्डसंबन्धः–

६२. अथेदानीं श्रीशङ्करभगवत्पादेभ्यः प्राक् स्थितानां वेदान्तप्रक्रियाणां परीक्षा क्रियते । ताश्च प्रक्रियाः श्रीगौडपादकारिकासु, प्रस्थानत्रयभाष्येषु, सुरेश्वरवार्तिके च तत्र तत्र परामृश्य दूषिता इति तत एवोद्धृत्येह समालोच्यन्ते । मूलान्तरानुपलम्भात् । समालोचनस्य फलं तु भाष्यकारसंप्रदायानुमतप्रक्रियाया वैशिष्ट्यबुद्धिदार्ढ्यमेव ॥

कर्ममात्रस्य मोक्षसाधनं कृत्स्नवेदार्थ इति मतम्–

६३. प्रक्रियारचयितारश्च प्राचीनाः कर्मकाण्डेऽभिनिविष्टा वेदान्तविद्वेषिणः, वेदान्तप्रामाणिका अपि विधिरसिका इति च द्वेधा वर्गीकरणमर्हन्ति । तत्र कर्मकाण्डीयेषु मध्ये कर्मणामेव केवलं पुरुषार्थसाधनत्वं मन्यमानाः केचित् तावदूचिरे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. १–२–१) इति यथाश्रुतार्थावलम्बनेन–वेदान्तानामक्रियार्थत्वादानर्थक्यमेव । तेषाम् अध्ययनमात्रादेव तु पुण्यम् । स्वर्गस्यैव निरतिशयप्रीतिरूपस्य मोक्षापराभिधानत्वात् कर्मभ्य एव मोक्ष इति । सर्ववेदार्थज्ञानवत एव कर्मण्यधिकारात्, कृत्स्नस्य च वेदस्य कर्मार्थत्वात्, कर्मभ्यो मोक्षाभावे वेदस्यानर्थक्यप्रसङ्गाच्चेति तेषामाकूतम् ॥

तदिदं न युक्तिमत् । मोक्षस्य नित्यत्वाभ्युपगमात् सर्वैर्मोक्षवादिभिः, कर्मसाध्यस्य चानित्यत्वध्रौव्यात् – इत्याचार्यैः प्रत्युक्तम् । कर्माधिकारे वेदज्ञानस्यावश्यकत्वेऽपि वेदोक्तोपासनस्य श्रावणज्ञानादर्थान्तरत्वात्; वस्तुतस्त्वात्मज्ञानस्य कर्माधिकारेऽनपेक्षितत्वात्, अध्ययनमात्रवत एव कर्मण्यधिकारसंभवात्, औपनिषदात्मज्ञानस्य सर्वविधद्वैतोपमर्दकत्वाच्च ततः परं कर्माधिकारानुपपत्तेरिति ॥

(१) यच्चोक्तं निरतिशयप्रीतेः स्वर्गशब्दवाच्यायाः कर्मनिमित्तत्वात् कर्मभ्य एव मोक्ष इति । तन्न । नित्यत्वान्मोक्षस्य । न हि नित्यं किञ्चिदारभ्यते लोके । यदारब्धं तदनित्यमिति ॥ तै. अव., पा. २५९.

(२) यदुक्तं 'समस्तवेदार्थज्ञानवतः कर्माधिकारात्' इत्यादि । तच्च न । श्रुतज्ञानव्यतिरेकादुपासनस्य । श्रुतज्ञानमात्रेण हि कर्मण्यधिक्रियते, नोपासनमपेक्षते । उपासनं च श्रुतज्ञानादर्थान्तरं विधीयते मोक्षफलम् । अर्थान्तरप्रसिद्धिश्च स्यात् । 'श्रोतव्यः' – इत्युक्त्वा तद्व्यतिरेकेण 'मन्तव्यो निदिध्यासितव्यः' इति यत्रान्तरविधानात् । मनननिदिध्यासनयोश्च प्रसिद्धं श्रवणज्ञानादर्थान्तरत्वम् ॥ तै. श्री. उपसं., पा. २७६.

[अत्र श्रावणज्ञानं कर्मण्यपेक्ष्यत इत्युक्तेः, अध्ययनमात्रं श्रवणमित्यङ्गीकृत्येदमुच्यत इति गम्यते ॥]

(३) 'आचार्यकुलाद्वेदमधीत्य' (छां. ८-१५-१) इत्यत्र अध्ययनमात्रस्य श्रवणात्, अध्ययनमात्रवत एव कर्मविधिरित्यध्यवस्यामः । नन्वेवं सत्यानित्यत्वादनधिकारः कर्मसु प्रसज्येत । नैष दोषः । न वयम् अध्ययनप्रभवं कर्मावबोधनम् अधिकारकारणं वारयामः. किं तर्हि, औपनिषदमात्मज्ञानं स्वातन्त्र्येणैव प्रयोजनवत् प्रतीयमानं न कर्माधिकारकारणतां प्रतिपद्यत इत्येतावत् प्रतिपादयामः । यथा च न क्रत्वन्तरज्ञानं क्रत्वन्तराधिकारेणापेक्ष्यते, एवमेतदपि द्रष्टव्यमिति ॥

सू. भा. ३-४-१२, पा ४३७.

(४) अपि च कर्माधिकारहेतोः क्रियाकारकफललक्षणस्य समस्तस्य प्रपञ्चस्याविद्याकृतस्य विद्यासामर्थ्यात् स्वरूपोपमर्दमामनन्ति – 'यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्' (बृ. २-४-११) इत्यादिना । वेदान्तोदितात्मज्ञानपूर्विकां तु कर्माधिकारसिद्धिं प्रत्याशासानस्य कर्माधिकारोच्छित्तिरेव प्रसज्येत ॥ सू भा. ३-४-१६, पा. ४३८.

[वेदान्तानामर्थवत्त्वेऽपि तज्ज्ञानस्य कर्माधिकारकारणत्वमेवेति मतं निरसितुमेवमुक्तम् ॥]

वेदान्ता आत्मादिप्रकाशनद्वारा कर्मसंबन्धिन इति मतम्–

६४. कर्तृभूतमात्मानं देवतास्वरूपं ब्रह्म च प्रकाशयद् वेदान्तज्ञानं कर्मसंबन्ध्येव । अतस्तज्ज्ञाने फलश्रुतिरर्थवादमात्रम्, पर्णमयजुह्वादि-

वाक्यवत् । अथवा स्ववाक्यगतोपासनार्थत्वमेवास्तु वेदान्तानाम् इति केचिन्मेनिरे । परिनिष्ठितवस्तुनः प्रमाणान्तरगोचरत्वनियमात्, शास्त्रस्य च विधिसंस्पर्शं विना प्रामाण्याभावात्, विधेश्च क्रियैकविषयत्वात्, वस्तुपरत्वासंभवः, तत्प्रतिपादने प्रयोजनाभावाच्च– इति तेषामाशयः ॥

अयं च मीमांसकपक्ष इत्थं परिहृत आचार्यैः । कर्तृत्वादिरहितस्य ब्रह्मण एवोपनिषत्सु वेद्यत्वेनोपदेशात्, न तस्य तज्ज्ञानस्य वा कर्मशेषत्वानुपपत्तिः । उपासनावाक्यगतदेवतादीनां तदर्थत्वेऽपि तात्पर्येण ब्रह्मात्मबोधकानां वेदान्तानां (४९) न तदर्थता कल्पनीया । वेदान्तोपदिष्टस्य ब्रह्मात्मत्वस्य प्रमाणान्तरागोचरत्वात्, अत एव निश्चितफलवद्विज्ञानजनकत्वान्नानर्थक्यम्, अर्थवादत्वं विधिसंस्पर्शाभावादप्रामाण्यं वा शक्यशङ्कं वेदान्तानाम् इति मुक्तावप्यभ्युदयवद् विधिलक्षणत्वमिति शङ्का भाष्ये वार्तिके च प्रत्युक्ता ॥

(१) यदि संसार्येवात्मा शारीरः कर्ता भोक्ता च शरीरमात्रव्यतिरेकेण वेदान्तेषूपदिष्टः स्यात् ततो वर्णितेन प्रकारेण फलश्रुतेरर्थवादत्वं स्यात् । अधिकस्तावच्छारीरादात्मनोऽसंसारी, ईश्वरः, कर्तृत्वादिसंसारिधर्मरहितोऽपहतपाप्मत्वादिविशेषणः परमात्मा वेद्यत्वेनोपदिश्यते वेदान्तेषु । न च तद्विज्ञानं कर्मणां प्रवर्तकं भवति, प्रत्युत कर्माण्युच्छिनत्ति ॥

सू. भा. ३-४-८, पा. ४३५.

(२) देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद् विरोधः । न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति । एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः ॥

सू. भा. १-१-४, पा. ११.

(३) सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि । .... न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वये अवगम्यमाने अर्थान्तरकल्पना युक्ता । श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । न च तेषां कर्तृस्वरूपप्रतिपादनपरता अवसीयते । 'तत् केन कं पश्येत्' (बृ. २-४-१३) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः ॥

सू. भा. १-१-४, पा. ११.

(४) न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः। 'तत्त्वमसि' (छां. ६-८-७) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेण अनवगम्यमानत्वात् ॥ सू. भा. १-१-४, पा. ११.

(५) आत्मस्वरूपान्वाख्यानपरेषु वाक्येषु फलवन्निश्चितं च विज्ञानमुत्पद्यते न वा? उत्पद्यते चेत्। कथमप्रामाण्यमिति? किं वा न पश्यसि, अविद्याशोकमोहभयादिसंसारबीजदोषनिवृत्तिं विज्ञानफलम्? .... एवं विद्यते किम्, 'सोऽरोदीत्' (तै. सं. १-५-१) इत्यादिषु निश्चितं फलवच्च विज्ञानम्? न चेद् विद्यते, अस्त्वप्रामाण्यम्। तदप्रामाण्ये फलवन्निश्चितविज्ञानोत्पादकस्य किमित्यप्रामाण्यं स्यात्?

बृ. भा. १-४-७, पा. ६६४.

(६) यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्, तथाप्यात्मविज्ञानस्य फलपर्यन्तत्वात्, न शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्। न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्षेत ॥ सू. भा. १-१-४, पा. १२.

(७) अभ्युदयफलं धर्मज्ञानम्। तच्चानुष्ठानापेक्षम्। निःश्रेयसफलं तु ब्रह्मविज्ञानम्, न चानुष्ठानान्तरापेक्षम्। भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति। पुरुषव्यापारतन्त्रत्वात्। इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम्। चोदनाप्रवृत्तिभेदाच्च। या हि चोदना धर्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति। ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्। अवबोधस्य चोदनाजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते। यथाक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत् ॥

सू. भा. १-१-१, पा. ४, ५.

(८) नन्वभ्युदयवत्साध्या मुक्तिरप्राप्तरूपतः।
मैवं साध्यापि नो मुक्तिर्न त्वभ्युदयवद्यतः ॥ २६ ॥
चिकित्सयेव संप्राप्यं स्वास्थ्यं रोगार्दितस्य तु।
आत्माविद्याहतेर्बोधात्तत्कैवल्यमवाप्यते ॥ २८ ॥
किमत्र विधिना कार्यं अनृतन्त्रस्वहेतुतः।
श्रुतोऽप्यनर्थकोऽत्र स्याद्विध्यर्थासंभवत्वतः ॥ ३० ॥

संबन्धवार्तिक, पा. १५, १६

काम्यनिषिद्धवर्जनान्मोक्ष इति मतम्–

६५. अन्ये तु काम्यप्रतिषिद्धयोरनारम्भात्, आरब्धस्य च कर्मण उपभोगेन क्षयात्, नित्यानुष्ठानाच्च प्रत्यवायानुत्पत्तेः, ज्ञाननिरपेक्ष एव मोक्षः– इति स्वीकृत्याप्यात्मन्यवस्थानरूपं मोक्षं कर्मत्यागादेव साधयन्ति स्म । तदिदं ज्ञानात् कैवल्यमिति श्रुतिसिद्धान्तमविगणय्य तर्कमात्रकल्पितं मतम् आचार्यास्तर्केणैव श्रुत्युपबृंहितेन वारयामासुः । अनन्तत्वात्कर्मणां सर्वकर्मक्षपणासंभवात्, नित्यानां चानुष्ठानादवश्यं फलप्राप्तेः, तदकरणात् प्रत्यवायोत्पत्तेरनुपपन्नत्वाच्च न समीचीनमिदं मोक्षप्राप्तिमार्गवर्णनम् । कर्मशेषनिमित्तशरीरग्रहणस्य वारणाभावाच्चेति । अस्य मतस्यानुवादः, तत्खण्डनं च तैत्तिरीयोपनिषद्भाष्ये, गीताभाष्ये, सूत्रभाष्ये च दृश्यते ; संबन्धवार्तिकेऽपि व्याख्यातमेतत् ॥

(१) न । कर्मानेकत्वात् । अनेकानि हि, आरब्धफलानि, अनारब्धफलानि चानेकजन्मान्तरकृतानि विरुद्धफलानि कर्माणि संभवन्ति । अतस्तेष्वनारब्धफलानामेकस्मिन् जन्मन्युपभोगेन क्षयासंभवात्, शेषकर्मनिमित्तशरीरारम्भोपपत्तिः । कर्मशेषसद्भावसिद्धिश्च । 'तद्य इह रमणीयचरणाः' (छां. ५–१०. ७), 'ततः शेषेण' (गौ. ध. २–२९) इत्यादिश्रुतिस्मृतिशतेभ्यः ॥ तै. भा. अव., पा. २५८, २५९.

(२) न । 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे. ३–८) इति श्रुतेः, चर्मवदाकाशपरिवेष्टनासंभववद्विदुषो मोक्षासंभवश्रुतेः, 'ज्ञानात्कैवल्यम्' इति च पुराणस्मृतेः, अनारब्धफलानां पुण्यानां कर्मणां क्षयानुपपत्तेश्च ॥ गी. भा. १८–६६, पा. २९०.

(३) न ह्येतच्छास्त्रेण केनचित् प्रतिपादितम् 'मोक्षार्थी इत्थं समाचरेत्' इति । स्वमनीषिकया त्वेतत् तर्कितम् 'यस्मात् कर्मनिमित्तः संसारः, निमित्ताभावान्न भविष्यति' इति । न चैतत्तर्कयितुमपि शक्यते । निमित्ताभावस्य दुर्ज्ञानत्वात् ॥ सू. भा. ४–३–१४, पा. ४९९, ५००.

(४) न च नित्यनैमित्तिकानुष्ठानात् प्रत्यवायानुत्पत्तिमात्रम्, न पुनः फलान्तरोत्पत्तिः–इति प्रमाणमस्ति । फलान्तरस्याप्यनुत्पादिनः

संभवात् । स्मरति ह्यापस्तम्बः – 'तद् यथाग्ने फलार्थे निमिते छायागन्धावनूत्पद्येते एवं धर्मं चर्यमाणम् अर्था अनूत्पद्यन्ते' (आ. ध. १-७-२०-३) इति । न चासति सम्यग्दर्शने सर्वात्मना काम्यप्रतिषिद्धवर्जनं जन्मप्रयाणान्तराले केनचित् प्रतिज्ञातुं शक्यम् । सुनिपुणानामपि सूक्ष्मापराधदर्शनात् । संशयितव्यं तु भवति । तथापि निमित्ताभावस्य दुर्ज्ञानत्वमेव ॥

सू. भा. ४-३-१४, पा. ५००.

(५) नित्यानां चाकरणमभावः, ततः प्रत्यवायानुपपत्तिरित्यतः पूर्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियाया नित्याकरणं लक्षणम् इति 'अकुर्वन् विहितं कर्म' (मनु.) इति हि शतुर्नानुपपत्तिः ॥

तै. भा. अव. २५९.

(६) नित्यानि प्रत्यवायपरिहारार्थमनुष्ठेयानीति चेत् । न । असंन्यासिविषयत्वात् प्रत्यवायप्राप्तेः । न हि, अग्निकार्याद्यकरणात् संन्यासिनः प्रत्यवायः कल्पयितुं शक्यः, यथा ब्रह्मचारिणामसंन्यासिनामपि कर्मिणाम् । न तावन्नित्यानां कर्मणामभावादेव भावरूपस्य प्रत्यवायस्योत्पत्तिः कल्पयितुं शक्या युक्ता च । 'कथमसतः सज्जायेत' (छां. ६-२-२) इत्यसतः सज्जन्मासंभवश्रुतेः ॥ गी. भा. ३-१०, पा. ४३.

(७) एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः । 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते' (गौ. ध. २-२-२३) इत्यादिस्मृतिभ्यः । पुराणे च वर्णिनामाश्रमिणां च लोकफलभेदविशेषस्मरणात् ॥ गी. भा. १८-४५, पा. २७४, २७५.

[अत्र 'ततः शेषेण' इति आमुष्मिकफले कर्मजाते उपभुक्तेऽवशिष्टमैहिकफलं कर्मान्तरजातम् अनुशयशब्दवाच्यम् – इति सूत्रभाष्ये (३-१-८) निर्णीतम् ॥ सू. भा. पा. ३३३.]

(८) संबन्धवार्तिके (सं. ४७तमश्लोकमारभ्य १०१तमपर्यन्तम्) विस्तरेण मतमिदं प्रत्याख्यातम् ॥

ज्ञानकर्मसमुच्चयवादः –

६६. स्वतः कर्मणां मोक्षारम्भकत्वासामर्थ्येऽपि विद्यासहितानां तादृशसामर्थ्योपपत्तिः । विषदध्यादीनां मरणज्वरादिकार्यारम्भकाणामपि

मन्त्रशर्करादिसंयुक्तानां कार्यान्तरारम्भसामर्थ्यदर्शनादिति केचित् कल्पितवन्तः । 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छां.१-१-१०) इति श्रुतिं च तत्रोदाजहुः प्रमाणत्वेन । विद्याकर्मणोः समप्राधान्येन समुच्चितयोर्वा तत्सामर्थ्यमिति केषाञ्चिदूहः । 'तं विद्याकर्मणी' (बृ. ४-४-२) इति श्रुतेः । गृहस्थानामपि विद्यासंप्रदायप्रवर्तकत्वं श्रूयत इत्येतदपि स्वमतोपोद्बलकं लिङ्गं मन्यन्ते ते । तदेतदुभयमप्यसत् । कर्मणो हि सफलस्य व्याकृतनामरूपाश्रयत्वमेव दृश्यते श्रूयते च, न तु तद्विलक्षणे मोक्षेऽपि तद्व्यापारः शक्यशङ्कः । कृतकस्यानित्यत्वध्रौव्यात् । कर्मफलत्वे च मोक्षस्य तत्फलेष्वेवान्यतमत्वमवश्यं प्राप्नोति । अतो 'यदेव विद्यया करोति' इत्यादिश्रुतिवचनानि गृहस्थेष्वपि विद्यासंप्रदायकर्तृत्वदर्शनं चान्यथैव प्रतिनेतव्यानि । अन्यथा यथोक्तन्यायविरोधप्रसङ्गात् । अज्ञानमात्रव्यवधानाच्च मोक्षस्य कर्मकार्यत्वानुपपत्तिः । न हि ज्ञानव्यतिरिक्तेन केनचिदपि निवर्त्यमज्ञानम् । तद्व्यतिरिक्तस्याज्ञानकार्यत्वनियमात् । न हि तमस्तमसो निवर्तकम् । न च नित्यानां फलविशेषस्याश्रवणात्, विहितत्वान्यथानुपपत्त्यैव तत्फलत्वेन कल्प्यो भवति मोक्ष इति वाच्यम् । उत्पत्त्याप्तिविकारसंस्काराणामन्यतमस्य कर्मफलत्वदृष्टेस्तदनुगुणस्यैव कस्यचित् फलत्वकल्पनेनाप्युपपत्तेर्नित्यविधानस्य । न च विद्याकर्मणोः सहभावः समस्ति, येन तत्समुच्चयः कल्प्येतापि । स्वभावत एव तयोर्विरोधात् । मुमुक्षोः सर्वकर्मसंन्यासविधानाच्च समुच्चयाभावोऽवगम्यते । सगुणविद्यासु तु संभवत्येव कर्मणा समुच्चयः । उपासनादशायामपि कर्तृत्वानुवृत्तेः । निर्गुणविद्यायामपि कर्मण आरादुपकारकत्वान्मोक्षे क्रमसमुच्चयो भविष्यतीति भाष्ये संबन्धवार्तिके च (सं. वा. ३५७-३७७) प्रत्याख्यातोऽयं समुच्चयवादः ॥

(१) ज्ञानसहितस्य च प्रकृष्टस्य कर्मण एतावती गतिः । व्याकृतनामरूपास्पदत्वात् कर्मणस्तत्फलस्य च । न त्वकार्ये नित्येऽव्याकृतधर्मिणि,

अनामरूपात्मके क्रियाकारकफलस्वभाववर्जिते कर्मणो व्यापारोऽस्ति ॥

बृ. भा. ३-३-१, अव-, पा. ७९८.

(२) परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ॥ मुं. १-२-१२.

भाष्यम् - सर्व एव हि लोकाः कर्मचिताः कर्मकृतत्वान्नित्याः । न नित्यं किञ्चिदस्तीत्यभिप्रायः । सर्वं तु कर्मानित्यस्यैव साधनम् ॥ पा. १५२.

(३) 'यदेव विद्यया करोति' (छां. १-१-१०) इत्येषा श्रुतिर्न सर्वविद्याविषया । प्रकृतविद्याभिसंबन्धात् । प्रकृता चोद्गीथविद्या 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छां. १-१-१) इत्यत्र ॥

सू. भा. ३-४-१०, पा. ४३७.

[अत्रोद्गीथविद्यायाः कर्मशेषत्वम्, कर्मणो वीर्यवत्त्वाय च विद्यासमुच्चय इत्युक्तम् । वस्तुतन्त्रज्ञानं नैव प्रकृतम् इत्युक्तम् ॥]

(४) यदप्युक्तम् 'तं विद्याकर्मणी समन्वारभेते' (बृ. ४-४-२) इत्येतत् समन्वारम्भवचनमस्वातन्त्र्ये विद्याया लिङ्गमिति, तत् प्रत्युच्यते - विभागोऽत्र द्रष्टव्यः, विद्यान्यं पुरुषमन्वारभते, कर्मान्यमिति । यथा 'शतमाभ्यां दीयताम्' इत्युक्ते विभज्य दीयते पञ्चाशदेकस्मै, पञ्चाशदपरस्मै-तद्वत् ॥ सू. भा. ३-४-११, पा. ४३७.

[अभ्युपगमवादोऽयमिति भाष्यवाक्यशेषादवगम्यते । तद् यथा-]

न चेदं समन्वारम्भवचनं मुमुक्षुविषयम् । 'इति नु कामयमानः' (बृ. ४-४-६) इति संसारिविषयत्वोपसंहारात् । 'अथाकामयमानः' इति च मुमुक्षोः पृथगुपक्रमात् । तत्र संसारिविषये विद्या विहिता प्रतिषिद्धा च परिगृह्यते । विशेषाभावात् । कर्मापि विहितं प्रतिषिद्धं च । यथाप्राप्तानुवादित्वात् । एवं सत्यविभागेनापीदं समन्वारम्भवचनम् अवकल्पते ॥

सू. भा. ३-४-११, पा. ४३७.

(५) न चाज्ञानव्यतिरेकेण मोक्षस्य व्यवधानान्तरं कल्पयितुं शक्यम् - नित्यत्वान्मोक्षस्य । साधकस्वरूपाव्यतिरेकाच्च - यत् कर्मणा-निवर्त्येत ॥ बृ. भा. ३-३, अव., पा. ७९९.

(६) नापि ज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षा । अविद्या-निवर्तकत्वेन विरोधात् । न हि तमस्तमसो निवर्तकम् ॥

गी. भा. १८-६६, पा. २८९.

(७) उत्पत्त्याप्तिविकारसंस्काराणाम् अन्यतममपि नित्यानां कर्मणां फलम् उपपद्यत इति क्षीणा श्रुतार्थापत्तिः ॥

बृ. भा. ३-३-१ अव., पा. ८००.

(८) 'ब्रह्मैवेदं सर्वम्' इति शास्त्रजन्यः प्रत्ययो विद्यारूपः स्वाभाविकं क्रियाकारकफलभेदप्रत्ययं कर्मविधिनिमित्तम् अनुपमृद्य न जायते। भेदाभेदप्रत्यययोर्विरोधात्। न हि तैमिरिकद्विचन्द्रादिभेदप्रत्ययमनुपमृद्य तिमिरापगमे चन्द्राद्येकत्वप्रत्यय उपजायते। विद्याविद्याप्रत्यययोर्विरोधात् ॥ छां. २-२३-१, पा. ४०६.

(९) सिद्धस्तर्हि सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयः। न। मुमुक्षोः सर्वकर्मसंन्यासविधानात् ॥ गी. भा. ३-१ अव., पा. ४२.

(१०) ऊर्ध्वरेतःसु च शब्दे हि ॥ वे. सू. ३-४-१७.

भाष्यम् - ऊर्ध्वरेतःसु चाश्रमेषु विद्या श्रूयते। न च तत्र कर्माङ्गत्वं विद्याया उपपद्यते। कर्माभावात्। न ह्यग्निहोत्रादीनि वैदिकानि कर्माणि तेषां सन्ति ॥ पा. ४३८, ४३९.

(११) ज्ञानस्यैव हि प्रापकं सत् कर्म प्रणाड्या मोक्षकारणमित्युपचर्यते। अत एव चातिक्रान्तविषयमेतत् कार्यैकत्वाभिधानम्। न हि ब्रह्मविद् आगाम्यग्निहोत्रादि संभवति। अनियोज्यब्रह्मात्मत्वप्रतिपत्तेः शास्त्रस्य अविषयत्वात्। सगुणासु तु विद्यासु कर्तृत्वानतिवृत्तेः संभवत्यागाम्यग्निहोत्रादि। तस्यापि निरभिसंधिनः कार्यान्तराभावाद् विद्यासंगत्युपपत्तिः॥

सू. भा. ४-१-१६, पा. ४७६.

ज्ञानोपासनयोरैक्ये सत्युपासनाविधिशेषता ब्रह्मण इति वादः—

६७. अपरे तु वादिनो ब्रह्मज्ञानस्योपासनात्मकतामेवाभ्युपयन्तो मन्यन्ते स्म। 'आत्मा वा अरे द्रष्टव्यः' (बृ.२-४-५), 'सोऽन्वेष्टव्यः', (छा. ८-७-१), 'आत्मेत्येवोपासीत' (बृ. १-४-७)-इत्याद्युपासनाविधिषु सत्सु तत्रोपास्यस्वरूपविशेषसमर्पणेनैव वस्तुबोधकान्यपि वेदान्तवाक्यानि, कर्मविधिशेषभूतयूपाहवनीयाद्यलौकिकवस्तुसमर्पकवाक्यवत्। तथा चोपासनाफलमदृष्टो मोक्षः। स्वर्गादिवत्। अथवा अविद्यानिवृत्तिरेवास्तूपासनाफलमिति। तदेतन्मतमित्थं प्रत्याख्यातमाचार्यैः—ब्रह्मात्मवस्तुसमर्पका-

णामेव वाक्यानां श्रवणमात्रात् आत्मदर्शनस्य सिद्धत्वात् न द्रष्टव्यादि-विधेः कर्तव्यान्तरमवशिष्यते । ज्ञानसमनन्तरमेव मोक्षं श्रावयन्त्यः श्रुतयस्तदूर्ध्वं कर्तव्यान्तरमनवकाशीकुर्वन्ति । मोक्षस्याशरीरत्वलक्षणस्य प्रियाप्रियसंस्पर्शनिषेधश्रुतेः, स्वाभाविकत्वज्ञापकश्रुतेश्च तस्य धर्मकार्यत्वं निषिध्यत इति गम्यते । मोक्षस्य कूटस्थनित्यस्योत्पाद्यादिचतुर्विधवस्तु-विलक्षणत्वाच्च कार्यत्वानुपपत्तिः । अत एव ब्रह्मातिरिक्तस्यास्य यूपादिसाध्य-वस्तुतो वैलक्षण्यम् । न चोपासनमेव ज्ञानमिति सांप्रतम् । यतो वस्तु-मात्रबोधकस्यापि ज्ञानस्य श्रौतत्वं पूर्वमेव (५०) प्रसाधितम् । तस्य च ज्ञानस्य मोक्षप्रतिबन्धभूताविद्यादिनिवृत्तिमात्रं कृत्यम् । न चेदं ज्ञानं ब्रह्मात्मैकत्वविज्ञानं संपदादिरूपम् । निराकाङ्क्षत्वेन वस्तुप्रतिपादनमात्रेणोप-क्षीणत्वात् तद्वाक्यस्य । न चोपासनया अविद्यानिवृत्तिरिति युक्तम् । तस्या अपि क्रियात्वाविशेषादविद्याकार्यत्वे सति तन्निवर्तकत्वानुपपत्तेरिति ॥

(१) द्रष्टव्यविधेर्विषयसमर्पकाण्येतानि इति चेत् । न । अर्थान्तरा-भावादित्युक्तोत्तरत्वात् । आत्मवस्तुस्वरूपसमर्पकैरेव वाक्यैः 'तत्त्वमसि' इत्यादिभिः श्रवणकाल एव तद्दर्शनस्य कृतत्वात् द्रष्टव्यविधेर्नानुष्ठानान्तरं कर्तव्यम् इत्युक्तोत्तरमेतत् ॥ बृ. भा. १-४-७, पा. ६६२.

(२) न च 'आत्मेत्येवोपासीत' इत्यपूर्वविधिः । कस्मात् ? आत्म-स्वरूपकथनानात्मप्रतिषेधवाक्यजनितविज्ञानव्यतिरेकेणार्थान्तरस्य कर्तव्यस्य मानसस्य बाह्यस्य वा अभावात् । तत्र हि विधेः साफल्यं यत्र विधिवाक्य-श्रवणमात्रजनितविज्ञानव्यतिरेकेण पुरुषप्रवृत्तिर्गम्यते ॥

बृ. भा. १-४-७, पा. ६६२.

(३) अपि च 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९), 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मुं. २-२-८), 'आनन्दं ब्रह्मणो विद्वान्, न बिभेति कुतश्चन' (तै. २-९), 'अभयं वै जनक प्राप्तोऽसि' (बृ. ४-२-४), 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (बृ. १-४-१), 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई. ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति ॥ सू. भा. १-१-४, पा. १४; १५.

(४) 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति यथावर्णितं संसाररूपमनुवदति। 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां. ८-१२-१) इति प्रियाप्रियस्पर्शनप्रतिषेधात्, चोदनालक्षणधर्मकार्यत्वं मोक्षस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। .... अशरीरत्वमेव धर्मकार्यमिति चेत्। न। तस्य स्वाभाविकत्वात् 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् ...।' इत्यादिश्रुतिभ्यः॥ सू. भा. १-१-४, पा. १४.

(५) न हि दध्यादि विकार्यम्, उत्पाद्यं वा घटादि नित्यं दृष्टं लोके। न चाप्यत्वेनापि कार्यापेक्षा। स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्। ... नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत, ... ॥ सू.भा. १-१-४, पा. १७.

(६) न च यूपादिवच्छक्यं वेदेनैव समर्पणम्।
ऐकात्म्यस्य स्वतः सिद्धेः साध्यत्वाद्यूपवस्तुनः॥
सं. वा. ६५७.

(७) ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्, पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुविषयम्। अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुम् अशक्यम्। केवलं वस्तुतन्त्रमेव तत्॥ सू. भा. १-१-४, पा. १८.

(८) 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' (प्र. ६-८), 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु' (छां. ७-१-३), 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' (छां. ७-२६-२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति॥ सू. भा. १-१-४, पा. १५.

(९) संपदादिरूपे च ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने 'तत्त्वमसि', 'अहं ब्रह्मास्मि', 'अयमात्मा ब्रह्म' – इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत॥ सू.भा. १-१-४, पा. १५, १६.

(१०) यदि ज्ञानाभावो, यदि संशयज्ञानं, यदि विपरीतज्ञानं वा उच्यते अज्ञानमिति, सर्वं हि तज्ज्ञानेनैव निवर्त्यते न तु कर्मणा। अन्यतमेनापि विरोधाभावात्॥ बृ. भा. ३-३-१, पा. ७९९.

(११) तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वो व्यवहारः॥ सू. भा. १-१-१२, पा. ३५.

ज्ञाने विधिमङ्गीकुर्वतां मतम् –

६८. केचित्तु ज्ञानेऽपि विधिरस्तु, अन्यथा चोदनालक्षणार्थत्वाभावे अवेदार्थत्वप्रसङ्गादिति मन्यन्ते स्म। तत्तु न विचारसहम्। कुतः? न हि शब्दजन्यज्ञानं नियोगमपेक्षते। ब्रह्मवाक्यं हि पुरुषमवबोधयत्येव, न तु स्वार्थबोधने नियोजयत्यपि। वाक्यश्रवणकाले एव ज्ञानस्य जातत्वात्। न हि वाक्यं प्रमाणं सत्, स्वार्थबोधने विधिमपेक्षत इति युज्यते। प्रमाणान्तरेषु तादृशापेक्षाया अदर्शनात्। तस्मात्, 'विजिज्ञासस्व', 'द्रष्टव्यः' – इत्यादिवाक्येषु श्रूयमाणा अपि विधिविभक्तयो – ज्ञानस्य स्वयं नियोगविषयत्वाभावात्, ज्ञानविषयस्य ब्रह्मात्मनो हेयोपादेयत्वाभावात्, स्वात्मनि कस्यचिदपि प्रवर्तकप्रमाणापेक्षाभावाच्च – कथञ्चिदन्यथैव नेयाः, प्रत्यगात्माभिमुखीकरणत्वेन प्रवर्तकत्वोपपत्तेरिति, अनात्मविमुखीकरणेन निवर्तकत्वोपपत्तेरिति वा। बोधकज्ञानेऽपि विध्यपेक्षाङ्गीकारे ह्यतिप्रसङ्गो दुर्वारः स्यात् सर्वत्रापि विध्यपेक्षापत्तेरिति भाष्यकारैः प्रत्युक्तोऽयं पक्षः॥

(१) या हि चोदना धर्मस्य लक्षणम्, सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति। ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वान्न पुरुषोऽवबोधे नियुज्यते। यथाक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत्॥ सू. भा. १-१-१, पा. ५.

(२) या तु प्रसिद्धेऽज्ञाबुद्धिर्न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा; किं तर्हि, प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतत्, न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात् कुण्ठीभवन्ति, उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्। अहेयानुपादेयवस्तुविषयत्वात्॥ सू. भा. १-१-४, पा. १८, १९.

(३) किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति

ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्य अहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते॥

सू. भा. १-१-४, पा. १९.

(४) द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठिताः, तत्त्वाभिमुखीकरणप्रधाना न तत्त्वावबोधविधिप्रधाना भवन्ति। लोकेऽपि 'इदं पश्य'-'इदमाकर्णय' इति चैवञ्जातीयकेषु निर्देशेषु 'प्रणिधानमात्रं कुरु' इत्युच्यते, न साक्षाज्ज्ञानमेव कुर्विति॥ सू भा. ३-२-२१, पा. ३६२.

(५) बुद्ध्याद्युपाधिकृतं तु विशेषमाश्रित्य ब्रह्मैव सन्, जीवः कर्ता भोक्ता चेत्युच्यते। तस्योपाधिकृतविशेषपरित्यागेन स्वरूपं ब्रह्म दर्शयितुं 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' इत्यादिना प्रत्यगात्माभिमुखीकरणार्थमुपदेशो न विरुध्यते॥ सू भा. १-१-३१, पा. ६१.

(६) आत्मस्वरूपान्वाख्यानमात्रेणात्मविज्ञाने विधिमन्तरेण न प्रवर्तत इति चेत्। न। आत्मवादिवाक्यश्रवणेनात्मविज्ञानस्य जनितत्वात्; किं भोः कृतस्य करणेन? तच्छ्रवणेऽपि न प्रवर्तत इति चेत्। न। अनवस्थाप्रसङ्गात्। यथा आत्मवादिवाक्यार्थश्रवणे विधिमन्तरेण न प्रवर्तते, तथा विधिवाक्यार्थश्रवणेऽपि विधिमन्तरेण न प्रवर्तिष्यत इति विध्यन्तरापेक्षा। तथा तदर्थश्रवणेऽपीत्यनवस्था प्रसज्येत॥ बृ. भा. १-४-७, पा. ६६२.

(७) न ह्यात्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षता। आत्मत्वादेव। तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य। न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति॥ गी. भा. २-६९, पा. ३९.

ज्ञानाभ्यास(प्रसंख्यान)वादः –

६९. यद्यपि ज्ञाने न विधिरवकल्पते, तथापि तु तदभ्यासे विधिरपेक्ष्यत एव वेदान्तेषु। सकृच्छ्रवणमात्रेणात्मज्ञानजन्मानुपपत्तेः। अथवा युक्तिं विना वाक्यमात्रेणात्मज्ञानासंभवात् तदर्थं ज्ञानाभ्यासः। यद्वा वाक्ययुक्तिभ्यां सामान्यज्ञानमात्रलाभात्, विशेषरूपेणानुभवार्थं ज्ञानाभ्यासः कार्यः। अथवा पुनरस्तु सकृज्ज्ञानजन्मना भवत्येवाविद्याध्वंस

इति । तथापि हि नैसर्गिकत्वात् सा विषयविषयकागन्तुकाविद्येव नात्यन्ताय निवर्तते, अनेकजन्मवासनावशात् तु पुनरप्युद्भवत्येवेति तन्निवृत्त्यर्थं ज्ञानाभ्यासः कार्यः । 'विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' (बृ. ४-४-२१) इति श्रुतेः । अथवा वाक्यात् पदार्थसंसृष्टमेव ज्ञानमुत्पद्यते, नासंसृष्टम् । अतोऽसंसृष्टज्ञानार्थं ज्ञानाभ्यासः कार्यः । अतः शब्दयुक्तितदावृत्त्यात्मारूयपादचतुष्टयोपेतं प्रमाणमैकात्म्ये इति 'शब्दयुक्तिप्रसंख्यानैरात्मना च मुमुक्षवः । पश्यन्ति मुक्तमात्मानं प्रमाणेन चतुष्पदा ॥' इति **प्रसंख्यानवादिनः** प्राहुः ॥

तदेतत् सर्वमयुक्तम् । वाक्येन ज्ञानानुत्पत्तौ तस्य प्रामाण्यहानप्रसङ्गात्, युक्तेः प्रामाण्याभावात्; सकृत्प्रवृत्तवाक्ययुक्तिभ्यामजातं ज्ञानम् आवृत्त्यापि जायत इति प्रत्याशानुपपत्तेः । आवृत्तेः प्रसंख्यानसंज्ञितस्य श्रुतौ कुत्रापि विधानादर्शनात्, सकृत्प्रयुक्तशास्त्रयुक्तिभ्यामसंजातस्य विशेषानुभवस्यावृत्त्याप्युत्पत्त्यसंभवात् । ज्ञानसन्ततेश्चेयत्तानवधारणात् शास्त्रार्थानवधारणदोषप्रसङ्गाच्च । ज्ञानेन ध्वस्तस्याप्यज्ञानस्य पुनरुद्भवकल्पनानुपपत्तेः, उद्भवे वा प्रसंख्यानेनापि तदुच्छेदप्रत्याशानुपपत्तेः। प्रमाणभूतवाक्यात् संसृष्टपरोक्षज्ञाने संजाते तदेव परमार्थभूतं ज्ञानमित्यङ्गीकर्तव्यत्वात्, प्रमाणानामभ्यासेन कारकाणामिव प्रमातारतम्यजनकत्वासंभवात्, प्रमाणान्तराज्ज्ञातेऽज्ञाते वा असंसृष्टब्रह्मणि तज्ज्ञाने विध्यसंभवात्, मिथ्याज्ञानाभ्यासात् सम्यग्ज्ञानोत्पत्त्यसंभवात् प्रत्युत तस्यैव दार्ढ्यापत्तेश्च— इति भाष्यवार्तिकयोः प्रत्याख्यातं ज्ञानाभ्यासवादिमतम् ॥

(१) स्वयं प्रबोधितेऽप्यर्थे यदि युक्त्याद्यपेक्षते ।
शास्त्रं सापेक्षमेवं स्यात् स्वतःप्रामाण्यवर्जनात् ॥ सं. वा. ८०९.

(२) संभूय यदि सर्वाणि फलमेकं प्रतन्वते ।
प्रत्येकं प्रमितेर्वृद्धिरित्येतत् स्यात्तदा मृषा ॥ सं. वा. ८१२.

[प्रमाणस्यैकैकस्मात्पादादभिवृद्धिः प्रमितेरित्येतेषां वादिनां मतम् ॥]

(३) स्वप्नादियुक्तिभिश्चेत्तल्लौकिकीभिः प्रसाध्यते ।
अवैदिकं भवेद्वस्तु स्याच्च शास्त्रानुवादता ॥
वैदिकत्वेऽपि युक्तीनामागमार्थप्रबोधतः ।
अनुवादत्वमेव स्यात् स्याच्च शास्त्रादभिन्नता ॥
सं. वा. ८१६, ८१७.

[एवं च युक्तीनां शब्दासहायत्वमित्यर्थः ॥]

(४) यदि हि 'तत्त्वमसि' इत्येवञ्जातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत्, ततस्तदेवावर्त्यमानमुत्पादयिष्यतीति का प्रत्याशा स्यात् ? अथोच्येत, न केवलं वाक्यं कञ्चिदर्थं साक्षात्कर्तुं शक्नोति, अतो युक्त्यपेक्षं वाक्यमनुभावयिष्यति ब्रह्मात्मत्वमिति । तथाप्यावृत्त्यानर्थक्यमेव ॥ सू. भा. ४-१-२, पा. ४६१.

(५) आवृत्तिश्च प्रसंख्यानं कुर्यात्सातिशयं कथम् ।
न ह्यावृत्तौ प्रमाणस्य प्रमेयेऽतिशयो यतः ॥ सं. वा. ८१८.

(६) प्रमातात्मा न मानांशो यद्ययं व्यावहारिकः ।
परश्चेत्स प्रमेयः स्यात् कथं चानुभवः फलम् ॥ सं. वा. ८२४.

[एवमुभयथाप्यात्मा न मानांशो भवेत् – इत्यर्थः ॥]

(७) अथापि स्यात्, युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते न विशेषविषयम् । ..... विशेषानुभवश्चाविद्याया निवर्तकः । ततस्तदर्था आवृत्तिरिति चेत् । न । असकृदपि तावन्मात्रे क्रियमाणे विशेषविज्ञानोत्पत्त्यसंभवात् ॥ सू. भा. ४-१-२, पा. ४६१.

(८) एवं तर्हि विद्याप्रत्ययसंतत्यभावात्, विपरीतप्रत्ययतत्कार्ययोश्च दर्शनात्, अन्य एवात्मप्रत्ययोऽविद्यानिवर्तको न तु पूर्व इति । न । प्रथमेनानैकान्तिकत्वात् । यदि हि प्रथम आत्मविषयः प्रत्ययोऽविद्यां न निवर्तयति तथान्योऽपि, तुल्यविषयत्वात् । एवं तर्हि सन्ततोऽविद्या निवर्तको, न विच्छिन्न इति । न । जीवनादौ सति संतत्यनुपपत्तेः । न हि जीवनादिहेतुके प्रत्यये सति विद्याप्रत्ययसंततिरुपपद्यते, विरोधात् । अथ जीवनादिप्रत्ययतिरस्करणेनैव आमरणान्ताद्विद्यासंततिरिति चेत् । न । प्रत्ययेयत्तासंतानानवधारणात् शास्त्रार्थानवधारणादोषात् ॥
बृ. भा. १-४-१०, पा. ६७७.

(९) अविद्या पूर्ववच्चेत्स्यात्सम्यग्ज्ञातेऽपि वस्तुनि ।
भूयोऽपि सा मृतेरूर्ध्वं नेष्यतीत्यत्र का प्रमा ॥
अविद्याविद्ययोर्यस्माद्बाध्यबाधकसंगतिम् ।
मुक्त्वाऽन्यो नास्ति संबन्धो दाह्यदाहकयोरिव ॥
बाध्याऽविद्या कथं विद्यां बाधिकां बाधते वद ।
दाहकस्य न दाहोऽस्ति वह्नेर्दाह्येन वस्तुना ॥
विद्यमानाप्यविद्येयं विद्यां चेन्नावधीत्पुरा ।
ध्वस्ता बाधिष्यतेऽविद्या विद्यामित्यत्र का प्रमा ॥
बृ. वा. ४-४-९१४, ९१५, ९१६, ९१७.

(१०) प्रमाणादेव यत्प्राप्तं कथं तदतिशङ्क्यते ।
ब्रह्म संसर्गरूपं वा यदि वाऽतोऽन्यथा श्रुतेः ॥
न चापि स्वप्रमेयेऽस्ति मानानां बोधहेतुतः ।
तारतम्यं यथा कार्ये कारकाणामसंभवात् ॥
न च प्रमान्तरैः साक्षादज्ञाते ब्रह्मवस्तुनि ।
अयथावस्त्विति ज्ञानं वक्तुं शक्यं विपश्चिता ॥
अपि मानान्तराज्ज्ञाते तद्विरुद्धस्वभावके ।
न चैवं युज्यते वक्तुं द्वयोरपि मितित्वतः ॥
प्रमान्तरेण चेज्ज्ञातं ब्रह्मासंसर्गरूपकम् ।
कृतत्वात्तर्हि प्रज्ञाया निष्फलोऽयं पुनर्विधिः ॥
वाक्यमानोद्भवं ज्ञानमयथावस्त्विवतीर्यते ।
यथावस्त्वप्रमोत्थं च चित्रं सर्वज्ञचेष्टितम् ॥
सम्यग्ज्ञानप्रसूतेश्च विघातायैव जायते ।
मिथ्याज्ञानाभ्यासहेतुः संस्कारो न तु जन्मने ॥
अपि चाभ्यस्यमानस्य दार्ढ्यं दृष्टं जगत्यपि ।
तदभ्यासवशादेवमत्राप्यध्यवसीयताम् ॥
बृ. वा. ४-४-८१३, ८१५...८१८, ८२०, ८२३, ८३०.

प्रपञ्चविलयवादः–

७०. केचित्तु प्रपञ्चविलयनमेव वेदार्थं मन्यमाना वदन्ति स्म । सर्वत्रापि यथायथं कस्यचिद् भेदस्य लय एव नियुज्यते पुरुषः । तद्यथा 'स्वर्गकामो यजेत' इत्यत्र देहात्मवादविलयः, 'गोदोहनेन पशुकामस्य', इत्यत्रान्नादिकामविलयः, निषेधवचनानां रागाद्युत्थप्रवृत्तिप्रविलयः, नित्य-

नैमित्तिकेषु स्वाभाविकप्रवृत्तिप्रविलयश्च नियोगविषयः। एवं च भेदविलय-मार्गेणात्मज्ञानाधिकारितासंपादनार्थं वाक्यानि भवन्तीति कर्मकाण्डस्य विनियोगः। एवं ब्रह्माकारवादिन्योऽपि श्रुतयः प्रपञ्चप्रविलयमुखेनानाकार-प्रतिपत्त्यर्था एव न पृथगर्थाः। ब्रह्मवाक्येषु च प्रपञ्चप्रविलापनं स्पष्टमेव। इत्येवं सर्वोऽपि वेदः प्रपञ्चप्रविलयनिष्ठ इति ॥

तत्र ब्रह्मवाक्येषु तावन्नियोगादर्शनात्, अविद्याध्यारोपितस्य तु प्रपञ्चस्य ब्रह्मस्वरूपावेदकवाक्यैरेव स्वयंविलयात्, अनावेदिते च ब्रह्मणि नियोगमात्रेण प्रपञ्चविलयस्याशक्यसंपादनत्वात्, जीवस्य प्रपञ्चकुक्षि-निक्षिप्तत्वे प्रपञ्चप्रविलयेन तस्यापि प्रविलयप्रसङ्गात्, ब्रह्मपक्षत्वे तु तस्य ब्रह्मस्वरूपत्वावेदकवाक्यैरनियोज्यस्वरूपत्वावगमात्, न प्रपञ्चप्रविलय-नियोगस्यावकाशः। उपासनाधिकारश्रुतानां प्रपञ्चानां मनोमयत्वादीनां तु प्रविलयार्थत्वं न शक्यशङ्कम्। प्रकृतोपासनाविधिनैव तेषां संबन्धात्, प्रविलयनियोगादर्शनात्, सगुणनिर्गुणवाक्येषु प्रयाजादिष्विवाधिकारांशे-नाभेदानवगमाच्च। कर्मकाण्डवाक्येषु पुनः प्रपञ्चप्रविलयविधेः कथमपि नावकाशः। न हि 'ग्रामकामो यजेत' इत्यादिश्रुतीनां प्रपञ्चप्रविलयेन मोक्षार्थता अवगन्तुं शक्यते। ग्रामादीनां फलानां प्रपञ्चान्तर्गतानां प्रत्यक्षग्रहणात्। कर्मश्रुतीनां नियमेन तदर्थत्वे संसारस्यैवादर्शनप्रसङ्गात्, मोक्षार्थानामपि कर्मणां ग्रामादिफलस्यानुनिष्पादितत्वकल्पने प्रमाणाभावात्। सोपानमार्गेण हर्म्यारोहणवत् स्वर्गादिद्वारा मोक्षार्थत्वकल्पनमप्यशक्यम्। स्वर्गादीनां पुरुषार्थत्वे सति दृष्टान्तवैषम्यात्, न च कुल्याप्रणयनादिवत् उभयनिष्ठता। प्रमाणाभावात्, प्रवृत्तिनिवृत्त्योर्विरोधाच्च। प्रतिषेधवाक्यानां रागादिनिवृत्त्युपकारकत्वेऽपि विधीनां तथात्वे गमकाभावात्, प्रवृत्तीनां स्वभावत एव प्रपञ्चाभिनिवेशपूर्वकत्वात्, देहादिलयस्यास्थूलादिवचनैः साक्षात् सिद्धत्वाच्च। कर्मणां परस्परानपेक्षया स्वस्वकार्यजननेनोपक्षयात्, परम्परया ज्ञानाधिकारहेतुत्वसंभवाच्चैतदेवम्। अपि च नियोगपरत्वेनैवोपक्षीणे

वेदे जीवस्यानियोज्यब्रह्मात्मत्वाभ्युपगमहानिः, शास्त्रस्याप्रामाण्यप्रसङ्गश्च । मोक्षस्यादृष्टफलत्वमनित्यत्वं चेत्यादयो दोषा दुर्निवारा स्युः–इति भाष्ये (सू. भा. ३–२–२२, वृ. भा. पा. ७९१), वार्तिके च (सं. वा. ३८४–४२३) वितत्य निरस्तोऽयं वादः ॥

(१) पार्थगर्थ्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं नैकवाक्यत्वम् । कथं चैषाम् एकवाक्यतोपेक्ष्यत इति वक्तव्यम् । एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवद् इति चेत् । न । ब्रह्मवाक्येषु नियोगाभावात् ॥ सू. भा. ३–२–२१. पा. ३६१.

(२) यदि तावद्विद्यमानोऽयं प्रपञ्चो देहादिलक्षण आध्यात्मिको बाह्यश्च पृथिव्यादिलक्षणः प्रविलापयितव्य इत्युच्येत, स पुरुषमात्रेणाशक्यः प्रविलापयितुमिति तत्प्रविलयोपदेशोऽशक्यविषय एव स्यात् । एकेन चादिमुक्तेन पृथिव्यादिप्रविलयः कृत इतीदानीं पृथिव्यादिशून्यं जगदभविष्यत् । अथाविद्याध्यस्तो ब्रह्मण्येकस्मिन्नयं प्रपञ्चो विद्यया प्रविलाप्यत इति ब्रूयात्, ततो ब्रह्मैवाविद्याध्यस्तप्रपञ्चप्रत्याख्यानेनावेदयितव्यम् 'एकमेवाद्वितीयं ब्रह्म, तत्सत्यं स आत्मा तत्त्वमसि' इति; तस्मिन्नावेदिते विद्या स्वयमेवोत्पद्यते. तया चाविद्या बाध्यते, ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत् प्रविलीयते। अनावेदिते तु ब्रह्मणि 'ब्रह्मविज्ञानं कुरु. प्रपञ्चविलयं च इति शतकृत्वोऽप्युक्ते न ब्रह्मविज्ञानं प्रपञ्चप्रविलयो वा जायते ॥ सू. भा. ३–२–२१. पा. ३६२.

(३) नियोज्योऽपि च प्रपञ्चावस्थायां योऽवगम्यते जीवो नाम स प्रपञ्चपक्षस्यैव वा स्यात्, ब्रह्मपक्षस्यैव वा । प्रथमे विकल्पे निःप्रपञ्चब्रह्मतत्त्वप्रतिपादनेन पृथिव्यादिवज्जीवस्यापि प्रविलापितत्वात् कस्य प्रपञ्चविलये नियोग उच्येत, कस्य वा नियोगनिष्ठतया मोक्षोऽवाप्तव्य उच्येत ? द्वितीयेऽपि ब्रह्मैवानियोज्यस्वभावं जीवस्य स्वरूपम्, जीवत्वं त्वविद्याकृतमेवेति प्रतिपादिते ब्रह्मणि नियोज्याभावान्नियोगाभाव एव ॥

सू. भा ३–२–२१. पा. ३६२.

(४) ये पुनरुपासनाधिकारे प्रपञ्चा उच्यन्ते यथा 'मनोमयः प्राणशरीरो भारूपः' (छां. ३–१४–२) इत्येवमादयः, न तेषां प्रविलयार्थत्वं न्याय्यम् । 'स क्रतुं कुर्वीत' (छां. ३–१४–१) इत्येवञ्जातीयकेन प्रकृतेनैवोपासनविधिना तेषां संबन्धात् ॥ सू भा ३–२–२१, पा. ३६१.

(५) श्रुत्या चैवज्ञातीयकानां गुणानाम् उपासनार्थत्वेऽवकल्पमाने न लक्षणया प्रविलयार्थत्वमवकल्पते ॥ सू. भा. ३-२-२१, पा. ३६१.

(६) प्रयाजदर्शपूर्णमासवाक्येषु त्वधिकारांशेनाभेदाद् युक्तमेकत्वम्। न त्विह सगुणनिर्गुणचोदनासु कश्चिदेकत्वाधिकारांशोऽस्ति। न हि भारूपत्वादयो गुणाः प्रपञ्चप्रविलयोपकारिणः, नापि प्रपञ्चप्रविलयो भारूपत्वादिगुणोपकारी। परस्परविरोधित्वात्। न हि कृत्स्नप्रपञ्चप्रविलापनं प्रपञ्चैकदेशापेक्षणं चैकस्मिन् धर्मिणि युक्तं समावेशयितुम् ॥
सू. भा. ३-२-२१. पा. ३६३.

(७) ननु सर्वैकत्वं मोक्षः। 'तस्मात् तत् सर्वमभवत्' इति श्रुतेः। बाढम्, भवत्येतदपि। न तु 'ग्रामकामो यजेत', 'पशुकामो यजेत' इत्यादिश्रुतीनां तादर्थ्यम्। यदि ह्यद्वैतार्थत्वमेवासाम्, ग्रामपशुस्वर्गाद्यर्थत्वं नास्तीति ग्रामपशुस्वर्गादयो न गृह्येरन्। गृह्यन्ते तु कर्मफलवैचित्र्यविशेषाः। यदि च वैदिकानां कर्मणां तादर्थ्यमेव, संसार एव नाभविष्यत् ॥
बृ. भा. ३-२, अव. पा. ७९१.

(८) अथ तादर्थ्येऽपि, अनुनिष्पादितपदार्थस्वभावः संसार इति चेत्, यथा च रूपदर्शनार्थं आलोके सर्वोऽपि तत्रस्थः प्रकाश्यत एव। न। प्रमाणानुपपत्तेः। अद्वैतार्थत्वे वैदिकानां कर्मणां विद्यासहितानाम् अन्यस्यानुनिष्पादितत्वे प्रमाणानुपपत्तिः। न प्रत्यक्षम्, नानुमानम्, अत एव च नागमः ॥ बृ. भा. ३-२, अव. पा. ७९१, ७९२.

(९) स्वर्गादिकार्यमार्गेण मन्यसे यदि कर्मणाम्।
सोपानपङ्क्तिगत्येव हर्म्यपृष्ठाधिरोहणम्।
आत्मज्ञानाधिकारानुप्रवेशित्वं भविष्यति ॥ सं. वा. ४००.
स्वर्गादेर्न तु शेषत्वं पुरुषार्थत्वहेतुतः ॥ सं. वा. ४०२.

(१०) उभयमेकेन वाक्येन प्रदर्श्यत इति चेत्, कुल्याप्रणयनालोकादिवत्। तन्नैवम्, वाक्यधर्मानुपपत्तेः। न चैकवाक्यगतस्यार्थस्य प्रवृत्तिविवृत्तिसाधनत्वमवगन्तुं शक्यते। कुल्याप्रणयनालोकादौ अर्थस्य प्रत्यक्षत्वाददोषः ॥ बृ. भा. ३-२, अव. पा. ७९२.

(११) जायापुत्रवित्तादिलक्षणं पाङ्क्तं कर्माविद्याविषयं यत्साक्षात्मप्राप्तिसाधनम्। अन्यसाधनं ह्यन्यस्मै फलसाधनाय प्रयुज्यमानं प्रतिकूलं भवति। न हि बुभुक्षापिपासानिवृत्त्यर्थं धावनं गमनं वा साधनम् ॥
बृ. भा. २-४, अव. पा. ७५७.

(१२) सुविचारितं चैतत्. यदेव प्रवृत्तिकारणं तदेव निवृत्तिकारणं न भवतीति ॥ बृ. भा. ३-२ सं., पा. ७९१.

(१३) रागाद्याक्षिप्तदृष्टार्थप्रवृत्तिप्रतिषेधतः ।
अस्त्वेवं प्रतिषेधेषु निवृत्तेरुपकारतः ॥
विधयस्तु कथं रागं निरुन्धन्तीति भण्यताम् ।
न हि ते परिसंख्यार्था नापि चैते नियामकाः ॥
दृष्टादृष्टप्रवृत्त्योश्च न विशेषोऽस्ति कश्चन ।
उपायत्वेन काम्यानां रागाद्याक्षिप्तहेतुतः ॥
प्रपञ्चाभिनिवेशित्वहेतौ तुल्येऽपि चानयोः ।
कं विशेषमपेक्ष्यैका चेष्टा मुक्त्यनुरोधिनी ॥
सं. वा. ४११, ४१२, ४१८, ४१९.

(१४) श्रुतेऽपि स्वर्गतात्पर्ये कल्पना चेल्लयेऽर्थतः ।
तन्न प्रत्यक्षवचनाद्देहादिलयसिद्धितः ॥
साक्षाद्धस्तिनि दृष्टेऽपि न हि हस्तिपदानुमा ।
अस्थूलादिवचः साक्षाद्देहादिप्रतिषेधकृत् ॥
सं. वा. ४२५, ४२६.

(१५) स्वकार्योपक्षयादेव विधीनां च परस्परम् ।
कुत एवाधिकारस्वमपेक्षाभावतो वद ॥ सं. वा. ३९८.

(१६) किञ्चान्यत्, नियोगनिष्ठतयैव पर्यवस्यत्याम्नाये यदभ्युपगतम् अनियोज्यब्रह्मात्मत्वं जीवस्य, तदप्रमाणकमेव स्यात्, अथ शास्त्रमेवानियोज्य-ब्रह्मात्मत्वमप्याचक्षीत, तदवबोधे च पुरुषं नियुञ्जीत, ततो ब्रह्मशास्त्रस्यैकस्य द्व्यर्थापरता विरुद्धार्थपरता च प्रसज्येयाताम् । नियोगपरतायां च श्रुतहानि-रश्रुतकल्पना, कर्मफलवन्मोक्षस्यादृष्टफलत्वम्, अनित्यत्वं च-इत्येवमादयो दोषा न केनचित् परिहर्तुं शक्याः ॥ सू. भा. ३-२-२१, पा. ३६३.

[यद्यप्यविद्याकृतक्रियाकारकफलात्मकप्रपञ्चस्य विद्यया प्रविलयः सिद्धान्तेऽ-पीष्टः, तथापि सर्वस्य शास्त्रस्य प्रपञ्चविलयनियोगपरतामास्थितवतां दूषणानी-मानि समन्वयाधिकरणन्यायेन वस्तुमात्रनिष्ठं ज्ञानकाण्डमास्थाय कर्मवाक्यानां-मुपासनावाक्यानां च तत्तद्विधिपरत्वं स्थापयितुमिति बोध्यम् ॥]

कामविलयवादः –

७१. अपरे तु वदन्ति स्म कामदूषितान्तःकरणानां परमाद्वैत-ज्ञानाधिकाराभावात्, द्वैतैकत्वबुद्धिसमुच्चितकर्मभिः प्राजापत्यं पदं प्राप्य प्रविलीनसर्वकामः परमाद्वैतं प्रपद्यत इति । तदप्यसारम् । कामोपभोगेन कामशान्त्यनुपपत्तेः, अनुपशान्तकामेन श्रुतोऽपि ब्रह्मानन्दो न विषयविषयं कामं मन्दीकुर्यादित्यतो न कर्मसमुच्चितया द्वैतैकत्वधिया परमपुरुषार्थ-लाभः स्यात् । कर्मणां कामविवृद्धिहेतुत्वात् । न च प्राजापत्यस्य नियमेन द्वारत्वं युक्तेः । सर्वभूतेषु च समत्वात् परमानन्दरूपस्य ब्रह्मणः । न हि प्राजापत्योपाधौ तदितरस्माद् कश्चन विशेषोऽस्ति, न च तस्यैवात्मज्ञानेन मुक्तिरिति श्रुतिरस्ति– इति वार्तिके प्रत्याख्यातमिदं मतम् । भाष्ये च यदेव प्राजापत्यप्राप्तिसाधनं तदेव न विरक्तिसाधनं भवेदित्युक्तम् ॥

(१) नैवं न कामसंप्राप्त्या तद्वाशोऽब्दशतैरपि ।
तत्स्वेवाशोऽतिवृद्धिः स्याद्विवृत्तिर्दोषदर्शनात् ॥

(२) अथानन्दः श्रुतः साक्षान्मानेनाविषयीकृतः ।
ब्रह्मानन्दाभिलाषं स न मन्दीकर्तुमप्यलम् ॥

(३) कामप्रविलयायातस्तद्विपक्षार्थभावनम् ।
विधयस्तत्क्रियाणां स्युस्तद्विपर्ययहेतवः ॥

(४) द्वारं न नियतं मुक्तेः प्राजापत्यं परं भवेत् ।
न ह्युपाधिषु तत्त्वस्य विशेषः कश्चिदीक्ष्यते ॥
अतः प्रजापतौ तत्त्वं कृमौ वा न विशिष्यते ।
तर्कादागमतश्चापि तद्यो य इति हीदृशात् ॥

सं. वा. ३४५. ३४८-३५०, ३५४

(५) 'हिरण्यगर्भप्राप्तिसाधनं चेन्न ततो व्यावृत्तिसाधनम् । परमात्माभिमुखीकरणस्य भोज्याद्व्यावृत्तेः साधनं चेन्न हिरण्यगर्भप्राप्ति-साधनम् । न हि यद्गतिसाधनं तद्गतिनिवृत्तेरपि । अथ मृत्वा हिरण्यगर्भं प्राप्य ततः समवनीतप्राणो नामावशिष्टः परमात्मज्ञानेऽधिक्रियते, ततोऽस्म-दाद्यर्थं परमात्मज्ञानोपदेशोऽनर्थकः स्यात् । सर्वेषां हि ब्रह्मविद्या पुरुषार्था-योपलिप्यते 'तद्यो यो देवानाम्' (बृ. १-४-१०) इत्याद्यया श्रुत्या ॥

बृ. भा. ३-२-१३, पा. ७९६.

अवस्थात्रयवासनानिरोधवादिमतम् –

७२. केचित् तु पदार्थत्वादात्मनः प्रमाणान्तरगम्यत्वमेवेति मन्वानाः प्रवदन्ति स्म – अन्वयव्यतिरेकाभ्यामात्मनो जाग्रत्स्वप्नसुषुप्तिभ्यो विवेकेन प्रत्यभिज्ञानात्, न तत्र शास्त्रप्रमाणापेक्षा । अतो जाग्रदादिवासनानिरोधे श्रुत्या पुरुषो नियुज्यते । आत्मा च स्वयंसिद्धत्वाद् वासनानिरोधमात्रात् स्वयं प्रकाशते । एवं च कार्यमुखेनैव ज्योतिष्टोमादिवाक्यवदेव वेदान्तानां प्रामाण्यं न तु प्रत्यक्षादिवद् वस्तुनि । अतः सत्यसति वा अन्योपाये निरोधादेव मुक्तिर्भवित्रीति ॥

तदेतदयुक्तम् । यतोऽयमात्मा स्वयंसिद्धो मानान्तरगम्यः पदार्थत्वादित्यनुपपन्नम् । पदार्थत्वादिविशेषप्रत्याख्यानेनैव तत्तत्त्वावबोधनदर्शनात्, नैवायं पदार्थः, नापि वाक्यार्थ–इत्यवसीयते । अपि च मानान्तरगम्यत्वाभ्युपगमे तत एवानर्थतद्धेतुभूतवासनानां सद्ध्वंसेनानर्थनिवृत्तेश्चावगमाद् वैदिकवचनस्य ध्रुवमानर्थक्यं प्राप्नुयात् । नियोगमन्तरेणैव पुरुषार्थप्राप्तेः । अनेकजन्मोपचितवासनानां चैकस्मिन्नेव जन्मनि निरोधः स्यादिति च न संभाव्यमेतत् । यदि च साक्षाज्ज्ञानेन न विनाश्या वासना, तद्भावनया सा नश्येदिति का प्रमा ? अतो ज्ञानभावनायां पुरुषो नियुज्यत इति न सम्यक् । सुषुप्त्याद्यवस्थासु वासनानामभावेऽपि नास्ति मुक्तत्वम्, तत्र शास्त्रप्रमाणव्यापारानवकाशाच्चात्मसाक्षात्कारोऽपि नास्ति । अतोऽपि वासनानिरोधमात्रान्मुक्तिरिति न साधुः पक्षः । किञ्च, आत्मनोऽज्ञानप्रमाणोभयसाक्षिणस्ताभ्यां सिद्ध्यसिद्धिशङ्कानुपपत्तौ तस्य नियोगाद्यपेक्षया सिद्धिरित्युपहास्यम् । न च स्वयंसिद्धस्य बोधने वाक्यस्यानुवादकत्वेनाप्रामाण्यप्रसङ्गः । यतो व्युत्पत्तेः प्रागज्ञातत्वस्य व्युत्पत्तिमात्रेण च ज्ञानोत्पत्तेश्चानुभवसिद्धत्वात्, न द्वेष्टेऽप्यनुपपत्तिः शक्यशङ्का । यच्चोच्यते ज्योतिष्टोमादिवाक्यवत् कार्यमुखेनैव वेदान्तवाक्यानामपि प्रामाण्यम् इति, तदसत् । यत्र हि कार्यतां बुद्ध्वा तदनन्तरं प्रवृत्तिः स्यात्, तत्र नियोगः स्यादपि ;

इह पुनर्बोधमात्रात् पुरुषार्थसिद्धेः कार्यं नावशिष्यत इति वैषम्यम् । किञ्चान्यत्, इष्टसाधनमबुद्धं बोधयन् वेदः प्रेरक इत्युच्यते, न तु तदन्या प्रेरणा वेदे संभवति । अतश्चात्रापि वस्तुतत्त्वज्ञापनेनैव वेदस्य प्रामाण्यं न प्रवर्तकत्वेन, प्रत्यक्षादिष्वेवमेव प्रामाण्यदर्शनादिति युक्तम् । अपि च वासनानामनर्थकारित्वेऽप्यविद्यैव कारणम् । न ह्यविद्याया ऋतेऽसङ्गस्य वासनासंबन्धोऽवकल्पते । अवस्थात्रयव्यतिरिक्तत्वरूपाल्लिङ्गाज्ज्ञातेऽप्यात्मनि तस्य ब्रह्मत्वं नैव ज्ञातं भवेदित्यतोऽप्यविद्याविनाश एवैषितव्यः । अतो नित्यनिवृत्तस्य संसारस्य निवृत्तिः, नित्यप्राप्तस्य ब्रह्मात्मत्वस्य च प्राप्तिरज्ञानमात्रव्यवहितत्वात् 'तत्त्वमसि' इत्यादिवेदवाक्यजन्यज्ञानादेवाज्ञाननिवर्तकात्, न निरोधादिति सिद्धम् । न च श्रुत्याप्यवस्थात्रयसाक्षिणः कथं ब्रह्मत्वं बोध्यत इति शङ्क्यम् । सर्वप्रमाणसर्वावस्थाभावाभावसाक्षी हि स्वार्थो निष्प्रपञ्चचैतन्यात्मस्वरूपः साक्ष्यापेक्षयैव साक्षी नाम । तस्याविद्यामात्रव्यवहितस्य व्यवधाननिरसनेनैव तत्त्वमस्यादिवचसा ब्रह्मत्वेन शक्यज्ञापनात् – इति वासनानिरोधवादः प्रत्युक्तो वार्तिके ॥

(१) न पदार्थो न वाक्यार्थ आत्माऽयं वस्तुतो यतः ।
तत्प्रत्याख्यानश्रुत्यैव तद्याथात्म्यावबोधनात् ॥ सं. वा. ४६२.

(२) तस्मात्संसारसंबन्धनिदानस्य प्रसिद्धितः ।
लिङ्गादेव तत्तस्य ध्वंसेऽनर्थो निवर्तते ।
अन्तरेणापि वचनं बौद्धादेरिव सिद्धितः ।
मोक्षस्य पुरुषार्थस्य वचोऽतो निष्फलं भवेत् ॥ सं. वा. ४५७, ४५८.

(३) व्यतीतानेकजन्मोत्थवासनानामनन्ततः ।
तासां निरोधोऽसंभाव्यो जन्मन्येकत्र मानवैः ॥ सं. वा. ४५९.

(४) साक्षादात्मावबोधेन प्रत्यग्ध्वान्तच्छिदा न चेत् ।
दुःखादिभावना ध्वस्ता कथं तद्भावना नुदेत् ॥ सं. वा. ४६०.

(५) वासनानामभावेऽपि सुषुप्त्यादौ न मुक्तता ।
मानव्यापारविरहात्प्रधानं वा दृगात्मनः ॥ सं. वा. ४६३.

(६) यस्याप्रसिद्धिर्नाज्ञानात्प्रसिद्धिर्नापि मानतः ।
तस्यानुभवतत्त्वस्य कुतः सापेक्षतोच्यते ॥ सं वा ४६७.

(७) ननु प्रमाणविरहात्स्वतःसिद्धो यदीष्यते ।
वचसो बुद्धबोधित्वादप्रामाण्यं प्रसज्यते ॥
मैवमप्रतिषेधत्वादनुभूत्यैव वस्तुनः ।
तद्व्युत्पत्तेः पुरा साक्षाद्बोधो व्युत्पत्तिमात्रतः ॥
सं. वा. ५४६, ५४७.

[अज्ञानमनुभवमात्रगम्यम्, ज्ञानं तु प्रमाणजनितं सद् स्वतःसिद्धत्वेन व्युत्पादयत्यात्मानं तदज्ञानपरिहारेण । अतो नानुवादत्वम् शास्त्रस्य-इत्यर्थः ॥]

बोधाबोधौ यतो दृष्टौ स्वानुभूत्यनुसारतः ।
दृष्टे चानुपपन्नत्वं किंबलादभिधीयते ॥ सं. वा. ५४८.

[अनाद्यज्ञानं कादाचित्कं च ज्ञानम्-इत्यनुभवबलादाश्रीयते । न हि दृष्टेऽनुपपन्नं नामेत्यर्थः ॥]

(८) न्याय्यो नियोगस्तत्रैव यत्र बुद्ध्वास्य कार्यताम् ।
अनन्तरं प्रवृत्तिः स्याद्विषये तस्य सिद्धये ॥
इह त्वैकात्म्यवाक्येषु तत्त्वमात्रावबोधतः ।
सद्यः पुमर्थसंसिद्धेः कार्यसिद्धिर्न वीक्ष्यते ॥
सं. वा. ५८६, ५८७.

(९) अतः समीहितोपायतया वस्त्ववबोधयन् ।
अबुद्धं प्रेरको वेदो ज्ञापना प्रेरणा मता ॥
तया च वस्तुयाथात्म्यज्ञापनेन प्रमाणता ।
न प्रेरकतया सा स्यात्प्रत्यक्षादेरनीक्षणात् ॥
सं. वा. ६३७, ६३८.

(१०) सर्वानर्थाभिसंबन्धे ह्यविद्यैवास्य कारणम् ।
वासनानामपि युतौ सैव यस्मादपेक्ष्यते ॥
जाग्रत्स्वप्नसुषुप्तेभ्यो यदि नामातिरेकतः ।
व्यक्तिभ्यो गोत्ववद् दृष्टं ब्रह्मत्वेऽस्य किमागतम् ॥
सं. वा ४६४, ४८५.

(११) अज्ञानान्तरितत्वेन संप्राप्तत्यक्तयोः पुनः ।
याथात्म्यज्ञानतो नान्यत्पुरुषार्थाय कल्पते ॥
अशेषानर्थविच्छेदं वाञ्छतः श्रुतितः श्रुतेः ।
त्वं ब्रह्मेति हताशेषक्लेशो मोहप्रहाणतः ॥ सं. वा. ८८८, ८८९.

(१२) यतो मानानि सिध्यन्ति जाग्रदादित्रयं तथा ।
भावाभावविभागश्च स ब्रह्मास्मीति बोध्यते ॥
यतोऽसिद्धानि सिध्यन्ति भावाभावौ यदाश्रयौ ।
योऽनन्यार्थो यदर्थं च सर्वं योऽनन्यदृक्सदा ॥
प्रमेयादित्रयं यस्मात्परस्परविलक्षणम् ।
आत्मानं लभते सत्यः सोऽध्यक्षोऽत्राध्युपेयताम् ॥
असंकुचितचिद्रूपः प्राज्ञे स्वप्नप्रबोधवत् ।
तथाऽप्रकुल्लबोधाब्जः प्राज्ञवत्स्वप्नबोधयोः ॥
साक्ष्यसंबन्धतः साक्षी न स्वतः साक्षितात्मनः ।
प्रत्यङ्मात्रैकदृष्टित्वाद्धिया वाचामगोचरः ॥
एवंभूतोऽप्यर्थ प्रत्यक्स्वात्मानुभवसंश्रयात् ।
व्युत्पत्तेः प्रागविज्ञातः सर्वाज्ञानादिसाक्ष्यपि ॥
तत्त्वमस्यादितस्तस्मादागमादेव नान्यतः ।
ऐकात्म्यवस्तुनः साक्षाद् व्युत्पत्तिरविचालिनी ॥

स. वा १०८२-१०८६, १०९०, १०९१.

विज्ञानस्मृतिसंततिविविवादः –

७३. अन्ये पुनरेवं मन्यन्ते स्म – श्रवणविज्ञानमात्रान्न पुरुषार्थः सिध्येत्, तद्व्यतिरेकेण विज्ञानस्मृतिसंतानोऽपि कार्यः । तत एव तु पुरुषार्थप्राप्तिरिति । तत्रोदिते आत्मविज्ञाने तत्स्मृतिसंततेरवश्यंभावान्नैषा विधेयेत्याचार्यैः प्रत्याख्यातस्तेषां पक्षः । अस्तु वा विधिरपि नियमार्थो, प्रारब्धकर्मवशात् प्राप्ते ज्ञानसंततिदौर्बल्ये–इति प्रौढिवादेन विधिमप्यङ्गीचक्रुर्भाष्यकाराः । अपूर्वविधित्वं तु सर्वथा निराकृतं तैः ॥

(१) वाक्यजनितात्मज्ञानस्मृतिसन्ततेः श्रवणविज्ञानमात्रादर्थान्तरत्वमिति चेत् । न । अर्थप्राप्तत्वात् । यदैवात्मप्रतिपादकवाक्यश्रवणादात्मविषयं विज्ञानमुत्पद्यते, तदैव तदुत्पद्यमानं तद्विषयं मिथ्याज्ञानं निवर्तयदेवोत्पद्यते । आत्मविषयमिथ्याज्ञाननिवृत्तौ च तत्प्रभवाः स्मृतयो न भवन्ति स्वाभाविक्योऽनात्मवस्तुभेदविषयाः । अनर्थत्वावगतेश्च । आत्मावगतौ हि सत्याम् अनात्मवस्तु अनर्थत्वेनावगम्यते । अनित्यदुःखाशुद्ध्यादिबहुदोषवत्त्वात्,

आत्मवस्तुनश्च तद्विलक्षणत्वात् । तस्मात् - अनात्मविज्ञानस्मृतीनामात्मावगतेरभावप्राप्तिः । पारिशेष्यात् आत्मैकत्वविज्ञानस्मृतिसंततेरर्थत एव भावाच्च विधेयत्वम् । शोकमोहभयायासादिदुःखदोषनिवर्तकत्वाच्च तत्स्मृतेः । विपरीतज्ञानप्रभवो हि शोकमोहादिदोषः । तथा च 'को मोहः' (ईं), 'विद्वान् न बिभेति कुतश्चन' (तै.), 'अभयं वै जनक प्राप्तोऽसि' (बृ.), 'भिद्यते हृदयग्रन्थिः' (मुं.) इत्यादिश्रुतयः ॥

बृ. भा. १-४-७, पा. ६६२, ६६३.

(२) यत्तूक्तं 'विज्ञाय प्रज्ञां कुर्वीत' इत्यादिवचनानां वाक्यार्थविज्ञानव्यतिरेकेणोपासनार्थत्वमिति सत्यमेतत् ; किं तु नापूर्वविध्यर्थता । पक्षे प्राप्तस्य नियमार्थतैव । कथं पुनरुपासनस्य पक्षप्राप्तिः ? यावता पारिशेष्यादात्मविज्ञानस्मृतिसन्ततिर्नित्यैवेत्यभिहितम् । बाढम् । यद्यप्येवं शरीरारम्भकस्य कर्मणो नियतफलत्वात्, सम्यग्ज्ञानप्राप्तावप्यवश्यंभाविनी प्रवृत्तिर्वाङ्मनःकायानाम् । लब्धवृत्तेः कर्मणो बलीयस्त्वात् । मुक्तेष्वादिप्रवृत्तिवत् । तेन पक्षे प्राप्तं ज्ञानप्रवृत्तिदौर्बल्यम् । तस्मात्, त्यागवैराग्यादिसाधनबलावलम्बनेनात्मविज्ञानस्मृतिसन्ततिर्नियन्तव्या भवति ; न त्वपूर्वा कर्तव्या, प्राप्तत्वात् - इत्यवोचाम । तस्मात्, प्राप्तविज्ञानस्मृतिसंताननियमविध्यर्थानि 'विज्ञाय प्रज्ञां कुर्वीत' इत्यादिवाक्यानि । अन्यार्थासंभवात् ॥

बृ. भा. १-४-७, पा. ६६४.

[मौनविधिसमर्थकं सूत्रं भाष्यं चैवमर्थकमिति प्रतीयते ॥]

चित्तवृत्तिनिरोधविधिवादः –

७४. एके तु श्रावणविज्ञानादर्थान्तरं चित्तवृत्तिनिरोधरूपं विधित्सितं वेदान्तेष्विति मन्यन्ते स्म । उपनिषत्सु योगविधानदर्शनात् । तन्त्रान्तरे च सम्यग्दर्शनोपायत्वेन तस्याङ्गीकारात् । उपनिषदि च 'तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः' (श्वे. ६-१३) इति योगदर्शनस्य श्रौतलिङ्गोपबृंहितत्वाच्च–इति ॥

एतदपि निराकृतमाचार्यैः । ब्रह्मात्मज्ञानादन्यस्य मोक्षस्य साधनत्वेनानवगमात् । 'सांख्ययोगाभिपन्नम्' इत्यत्र वैदिकयोरेव ज्ञानध्यानयोः परामर्शात्, सर्वथाचित्तवृत्तिनिरोधस्य ज्ञानस्मृतिसंतानैरलभ्यत्वाच्चेति ॥

(१) श्रुतिर्हि वैदिकात्मैकत्वविज्ञानादन्यन्निःश्रेयससाधनं वारयति 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे. ३-८) इति ॥
सू. भा. २-१-३, पा. १८३.

(२) न हि वेदान्तेषु ब्रह्मात्मविज्ञानादन्यत् परमपुरुषार्थसाधनत्वेनावगम्यते । 'आत्मानमेवावेत् तस्मात्तत्सर्वमभवत्' (बृ.), 'ब्रह्मविदाप्नोति परम्' (तै.), 'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति' (मुं.) ... इत्येवमादिश्रुतिशतेभ्यः ॥ बृ. भा. १-४-७, पा. ६६३.

(३) यत्तु दर्शनमुक्तं 'तत्कारणं सांख्ययोगाभिपन्नम्' इति, वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्यते । प्रत्यासत्तेः -इत्यवगन्तव्यम् ॥ सू. भा. २-१-३, पा. १८३.

(४) अनन्यसाधनत्वाच्च निरोधस्य । न ह्यात्मविज्ञानतत्स्मृतिसंतानव्यतिरेकेण चित्तवृत्तिनिरोधस्य साधनमस्ति ॥
बृ. भा. १ ४-७, पा. ६६३.

भागवतमतम् –

७५. भागवतानुयायिनस्तु मेनिरे– जगत्कारणब्रह्मणो नित्यशुद्धबुद्धमुक्तस्वभावत्वात्, जीवस्य च ततःसृष्टिवचनात्, संसारिणो ब्रह्मविपरीतस्वाभाव्याच्च 'अहं ब्रह्मास्मि' इति न गृह्णीयात् । तथा ग्रहणे दोषभाक्त्वप्रसङ्गात् । अत एव ब्रह्मापि संसार्यात्मत्वेन नैव गृह्णीयात् । पुष्पोदकाञ्जलिस्तुतिनमस्कारबल्युपहारस्वाध्यायाध्ययनयोगादिभिस्त्वारिराधयिषेत । आराधनेन च विदित्वा सर्वेशितृ ब्रह्म भवतीति ॥

तदेतन्मतं जातब्रह्मवादत्वेनानूद्य खण्डितं श्रीगौडपादाचार्यैः । श्रौतसंप्रदायविरुद्धमिति च गीताभाष्ये दूषितम् । सृष्टिकर्तुरेव हि सृष्टशरीरप्रवेशं दर्शयन्ति मन्त्रब्राह्मणवादाः । सर्वश्रुतिषु च ब्रह्मण्यात्मशब्दः प्रयुज्यते, जीवस्य चाजाद्वयब्रह्मणा एकत्वं शिष्यते । 'तत्त्वमसि' इति च सिद्धवद् ब्रह्मात्मैक्यं ज्ञाप्यते । जीवेश्वरभेदश्च निन्द्यते । जीवानाम् उत्पत्तिश्रवणं त्वेकत्वप्रत्ययदार्ढ्यार्थं घटाकाशोत्पत्तिवदौपचारिकं भविष्यति । आराधनं तु मन्दमध्यमाधिकारिविषयोपासनाविध्यनुसारीत्यनुमतमाचार्यैः ॥

(१) उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते ।
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥ गौ. का. ३-१.

(२) 'अहं तु संसारी सुखी दुःखी च । संसारोपरमश्च मम कर्तव्यः, क्षेत्रक्षेत्रज्ञविज्ञानेन, ध्यानेन चेश्वरं क्षेत्रज्ञं साक्षात्कृत्वा तत्स्वरूपावस्थानेन – इति । यश्चैवं बुध्यते, यश्च बोधयति 'नासौ क्षेत्रज्ञ' इति ; एवं मन्वानो यः स पण्डितापसदः संसारमोक्षयोः शास्त्रस्य चार्थवत्त्वं करोमीति, आत्महा स्वयं मूढोऽन्यांश्च व्यामोहयति शास्त्रार्थसंप्रदायरहितत्वात् श्रुतहानिमश्रुतकल्पनां च कुर्वन् । तस्मात्, असंप्रदायवित् सर्वशास्त्रविदपि मूर्खवदेवोपेक्षणीयः ॥ गी. भा. १३-२, पा. १९५.

(३) न । मन्त्रब्राह्मणवादेभ्यस्तस्यैव प्रवेशश्रवणात् । 'पुरश्चक्रे' इति प्रकृत्य 'पुरः पुरुष आविशत्' (बृ. २-५-१८), 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय' (बृ. २-५-१९), 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते' (तै. आ. ३-१२-७) – इति सर्वशाखासु सहस्रशो मन्त्रवादाः सृष्टिकर्तुरेवासंसारिणः शरीरप्रवेशं दर्शयन्ति । तथा ब्राह्मणवादाः 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै. २-६), 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' (ऐ. १-३-१२), 'सेयं देवतेमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य.....' (छां. ६-३-२), 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते' (का. १-३-१२) इत्याद्याः ॥
बृ. भा. २-१-२०, पा. ७३६.

(४) सर्वश्रुतिषु च ब्रह्मण्यात्मशब्दप्रयोगात्, आत्मशब्दस्य च प्रत्यगात्माभिधायकत्वात्, 'एष सर्वभूतान्तरात्मा' (मुं. २-१-४) इति च श्रुतेः । परमात्मव्यतिरेकेण संसारिणोऽभावात्, 'एकमेवाद्वितीयम्' (छां. ६-२-१), 'ब्रह्मैवेदम्' (मुं. २-२-११), 'आत्मैवेदम्' (छां. ७-२५-२) इत्यादिश्रुतिभ्यो युक्तमेव 'अहं ब्रह्मास्मि' इत्यवधारयितुम् ॥ बृ. भा. २-१-२०, पा. ७३६.

(५) स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद ॥ बृ. ४-४-२५.

भाष्यम्-अभयं वै ब्रह्म । प्रसिद्धमेतल्लोकेऽभयं ब्रह्मेति ; तस्मादुक्तम् एवंगुणविशिष्ट आत्मा ब्रह्मेति ॥ बृ. भा. पा. ९३८.

(६) न चायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुम् । 'तत्त्वमसि' इति ब्रह्मात्मभावस्यानवस्थाविशेषनिबन्धनत्वात् ॥
सू. भा. २-१-१४, पा. १९८.

अनुभवारूढं तु ज्ञानफलम् । 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ. ३-४-१) इति श्रुतेः । 'तत्त्वमसि' (छा. ६-८-७) इति च सिद्धवदुपदेशात् ॥
सू. भा. ३-३-३२, पा. ४०७.

(७) जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते ।
नानात्वं निन्द्यते यच्च तदेवं हि समञ्जसम् ॥ गौ. का. ३-१३.

(८) आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः ।
घटादिवच्च संघातैर्जातावेतन्निदर्शनम् ॥ गौ. का. ३-३.

भाष्यम् – यदा मन्दबुद्धिप्रतिपिपादयिषया श्रुत्या आत्मनो जातिरुच्यते । जीवादीनाम्, तदा जातावुपगम्यमानायाम्, एतन्निदर्शनं दृष्टान्तो यथोदिताकाशवदित्यादिः ॥ पा. २०९.

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥ गौ. का. ३-१५.

भाष्यम् – तस्मादुत्पत्त्यादिश्रुतय आत्मैकत्वबुद्ध्यवतारायैव नान्यार्थाः कल्पयितुं युक्ताः । अतो नास्त्युत्पत्त्यादिकृतो भेदः कथञ्चन ॥ पा. २१५.

(९) अत्र राजपुत्रस्य राजप्रत्ययवद् ब्रह्मप्रत्ययो दृढीभवति विस्फुलिङ्गवदेव त्वं परस्माद्ब्रह्मणो भ्रष्ट इत्युक्ते । विस्फुलिङ्गस्य प्रागग्नेर्भ्रंशादश्येकत्वदर्शनात् । तस्मादेकत्वप्रत्ययदार्ढ्याय सुवर्णमणिलोहाग्निविस्फुलिङ्गदृष्टान्ता नोत्पत्त्यादिभेदप्रतिपादनपराः ॥ बृ. भा. २-१-२०, पा. ७३९.

(१०) न वासुदेवसंज्ञकात् परमात्मनः संकर्षणसंज्ञकस्य जीवस्योत्पत्तिः संभवति । अनित्यत्वादिदोषप्रसङ्गात्, उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन् । ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात् । कारणप्राप्तौ कार्यस्य प्रविलयप्रसङ्गात् ॥ सू. भा. २-२-४२, पा. २६०.

(११) यदपि तस्य भगवतोऽभिगमनादिलक्षणमाराधनम् अजस्रमनन्यचित्ततयाभिप्रेयते, तदपि न प्रतिषिध्यते । श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात् ॥ सू. भा. २-२-४२, पा. २६०.

(१२) आश्रमाश्त्रिविधा हीनमध्यमोत्कृष्टदृष्टयः ।
उपासनोपदिष्टेयं तदर्थमनुकम्पया ॥ गौ॰ का॰ ३-१६.

भाष्यम् - उपासनोपदिष्टेयं तदर्थं मन्दमध्यमदृष्ट्याश्रमाश्चार्थं कर्माणि च। न चात्मैक एवाद्वितीय इति निश्चितोत्तमदृष्ट्यर्थम् । दयालुना वेदेन, अनुकम्पया सन्मार्गगाः सन्तः कथमिमम् उत्तमाम् एकत्वदृष्टिं प्राप्नुयुरिति ॥ पा॰ २१५-२१६.

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

प्राचीनप्रस्थानपरीक्षा नाम

चतुर्थः काण्डः

---

५. भर्तृप्रपञ्चप्रस्थानपरीक्षा

भर्तृप्रपञ्चप्रस्थानपरिशीलनावश्यकता–

७६. भगवत्पादीयकालं यावत् प्रचलितानि विविधवेदान्त-प्रस्थानानि जीवब्रह्मसंबन्धनिरूपणमपेक्ष्य त्रेधा राशीकृत्य परिशीलनीयानि भवन्ति – भेददर्शनम्, अभेददर्शनम्, भेदाभेददर्शनं चेति । तत्र भेद-दर्शनं तावद् बादरायणाचार्येणोपस्थापितम् औडुलोमिमतत्वेन 'उत्क्रमिष्यत एवंभावादित्यौडुलोमिः' (वे. सू. १–४–२१) इति । देहेन्द्रियमनोबुद्धि-संघातोपाधिसंपर्कात् कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य देहादिसंघातादुत्क्रमिष्यतः परमात्मैक्यं भविष्यतीति भेदवादिनां मतम् । तत्र भागवतानां मतं भेददर्शनमेवेति स्पष्टम् । परमेश्वरं भगवन्तम् अभिगमनादिना वर्षशतमिष्ट्वा क्षीणक्लेशस्तमेव प्रतिपद्यते जीव इति खलु तेषामभ्युपगम इति । ज्ञानकर्मसमुच्चयवादिनः (खं. ६६), उपासना-वादिनः (खं. ६७), कामविलयवादिनश्च (खं. ७१) भेदवादपक्षाव-लम्बिन एव । मोक्षस्य साधनविशेषायत्तादृष्टफलत्वेन स्वीकारात् तैः । ज्ञानविधिवादिनः (खं. ६८), ज्ञानाभ्यासवादिनः (खं. ६९), प्रपञ्च-विलयवादिनः (खं. ७०), वासनानिरोधवादिनः (खं. ७२), विज्ञान-स्मृतिसंततिवादिनः (खं. ७३), चित्तवृत्तिनिरोधवादिनश्च (खं. ७४) – इत्येते तु यद्यपि मोक्षं दृष्टफलत्वेनैवाभ्युपयन्ति, तथापि निःश्रेयसस्यादृष्ट-फलत्वं वदन्त इव शास्त्रविहितसाधनायत्तामेव पुरुषार्थसिद्धिं काङ्क्षन्तीति यावन्मोक्षं जीवेश्वरभेद एव प्रकारान्तरेण कक्षीकृतस्तैरपीति पर्यवस्यति । अभेददर्शनं तु 'अवस्थितेरिति काशकृत्स्नः' (वे.सू. १-४-२२) इति काशकृत्स्नमतत्वेन सूत्रितमनुसृतं श्रीगौडपादाचार्यादिभिराचार्यैः। परमात्मन एव व्यवहारावस्थायां मायिकजीवभावेनावस्थितिरित्यभिमतमेषाम् । इदमेव तु वेदान्तप्रक्रियानुसारीति भगवत्पादैः प्रतिपाद्यते । एतच्च मतं

विस्तरेण परिशीलितं तृतीयकाण्डे । अथ तृतीयं भेदाभेददर्शनं 'प्रतिज्ञा-सिद्धेर्लिङ्गमाश्मरथ्यः' (वे. सू. १–४–२०) इति सूत्रितम् **आश्मरथ्य-मतत्वेन** । तस्यास्य प्रातिनिध्यं भर्तृप्रपञ्चानामेव देयं भगवत्पादसमकालिकत्वेन संभाव्यमानानाम् । ततः प्राच्यतराणां भेदाभेदवादावलम्बिनाम् आचार्याणां श्रवणपथेऽद्यापि केनाप्यनानीतत्वात् । भर्तृप्रपञ्चानां वृत्तयोऽपि न समग्रतयोपलभ्यन्ते । प्रक्रियातत्त्वं निश्चिचीषूणां सौभाग्यवशात्तु बृहदारण्यकभाष्यतद्वार्तिकयोस्तट्टीकयोश्च परामृष्टा अभिप्रायाः सन्ति, खण्डशो वाक्यानि च वृत्तित उद्धृतानि–यैर्विचारितैरेतस्य भेदाभेददर्शनस्य प्राचीनतमं रूपम् ईषदनावृतं भवेत् । अतस्तादृशानि वाक्यानि संकलय्य, भाष्यवार्तिकोपजीवनेन यत्किञ्चिदभ्यूह्य च प्रस्थानमिदं यथा-साध्यमनुशील्यते । अनुशीलिते हि तस्मिन् प्रायशः सर्वे समुपलभ्यमानाः प्राचीनवेदान्तप्रक्रियाः परिशीलिता भवन्ति । तथा च वेदान्तादृता प्रक्रिया यथावर्णितैवेत्येतन्निराबाधं स्थास्यतीति ॥

द्वैताद्वैतप्रस्थाने कार्यकारणप्रक्रिया–

७७. कार्यकारणप्रक्रिया भर्तृप्रपञ्चाभिमता तावत् संग्रहेण वर्ण्यते । बृहदारण्यके पञ्चमाध्यायस्य प्रथमकण्डिकाया ऐदम्पर्यमिदं यद् द्वैताद्वैतात्मकमेव ब्रह्म न त्वेकान्तेन द्वैतम्, नाद्वैतमेव वा इति । तथा हि – यद्यद्वैतमेव परमार्थतः, द्वैतं तु मृगतृष्णिकोदकादिवदनृतम्, तदा कर्मकाण्डमनर्थकं स्यात् । तथा सृष्टिस्थितिप्रलयवर्णनं श्रवणादिविधानं च व्यर्थमेव स्यात् । अथ द्वैतं स्वेन रूपेणैव सत्यम्, तदा अद्वैतदर्शनस्य मृषात्वं प्राप्नोति–इति प्राप्ते शङ्कापरिहाराय प्रकृताध्यायगता 'पूर्णमदः' इति कण्डिका प्रारब्धा । तत्र 'पूर्णमदः' इति कारणस्य परमार्थत्वमाह, 'पूर्णमिदम्' इति च कार्यस्यापि । कार्यं ह्युत्पन्नं कारणाव्यतिरिक्तत्वेन पूर्णमेव, पुनरपि प्रलयकाले पूर्णमेव भविष्यति कारणरूपेणेति । एवं च

त्रिष्वपि कालेषु कार्यकारणयोः पूर्णतैव मन्तव्या । सा चेकैव पूर्णता कार्यकारणयोर्भेदेन व्यपदिश्यते । एवं च द्वैताद्वैतात्मकं ब्रह्म । यथा किल समुद्रो जलतरङ्गफेनबुद्बुदाद्यात्मक एव, यथा च जलं सत्यम् तदुद्भवाश्च तरङ्गफेनबुद्बुदादयः समुद्रात्मभूता एव, आविर्भावतिरोभावधर्मिणः परमार्थसत्या एव, एवं सर्वमिदं द्वैतं परमार्थसत्यमेव जलतरङ्गस्थानीयम् । समुद्रजलस्थानीयं तु परं ब्रह्म । एवं च किल द्वैतस्य सत्यत्वे कर्मकाण्डस्य प्रामाण्यम्—इति 'पूर्णमद' इति कण्डिकाभाष्यवार्तिकयोरियं प्रक्रिया-नूदिता । सूत्रभाष्येऽपीयमनूदिता (सू. भा. २-१-१४) । "नन्वनेकात्मकं ब्रह्म । यथा वृक्षोऽनेकशाखः, एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म । अत एकत्वं नानात्वं चोभयमपि सत्यमेव । यथा 'वृक्ष' इति एकत्वं 'शाखाः' इति नानात्वम् ; यथा च समुद्रात्मना एकत्वम्, फेनतरङ्गाद्यात्मना नानात्वम् । तत्रैकत्वांशेन ज्ञानान्मोक्षव्यवहारः सेत्स्यति । नानात्वंशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यतः" इति ॥

अत्र क्रियायामिव वस्तुन्युत्सर्गापवादविकल्पानामसंभवात्, द्वैताद्वैतयोर्विरोधात्, प्रज्ञानघनैकरसश्रुतेरप्रामाण्यप्रसङ्गात्, ब्रह्मणः समुद्रादिवद् द्वैताद्वैतात्मकत्वे सावयवस्यानित्यत्वप्रौढ्यात्, द्वैताद्वैतस्याध्येयत्वात्, भेददृष्ट्यपवादश्रुतेः कारणस्यैव सत्यत्वावधारणश्रुतेश्च प्रामाण्यहानाच्च न युक्तमिदं मतम् । श्रुत्युपदिष्टनित्यसिद्धब्रह्मात्मताज्ञानेन शारीरत्वे बाधिते तदर्थं नानात्वांशकल्पनानवसरात्, प्राग्ब्रह्मात्मताबोधाद् सर्वव्यवहाराणामपि सत्यत्वोपपत्तेस्तदर्थं नानात्वसत्यत्वकल्पनावश्यकताभावात्, अङ्गीकृतेऽपि द्वैताद्वैतात्मकत्वे शास्त्रोपदेशानुपपत्तिपरिहाराभावाच्च न युक्तं द्वैताद्वैतात्मकब्रह्मकल्पनमिति भाष्यवार्तिकयोर्निरस्तमिदं मतम् ॥

(१) यथा क्रियाविषये उत्सर्गप्राप्तस्य एकदेशे अपवादः क्रियते—यथा 'अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः' (छां. ८-१५-१) इति हिंसा सर्वभूतविषया उत्सर्गेण निवारिता तीर्थे विशिष्टविषये ज्योतिष्टोमादौ अनुज्ञायते, न च तथा वस्तुविषये इह अद्वैतं ब्रह्म उत्सर्गेण प्रतिपाद्य पुनस्तदेकदेशो अपवदितुं

शक्यते। ब्रह्मणोऽद्वैतत्वादेव एकदेशानुपपत्तेः। तथा विकल्पानुपपत्तेश्च यथा 'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाति' (?) इति ग्रहणाग्रहणयोः पुरुषाधीनत्वात् विकल्पो भवति। न त्विह तथा वस्तुविषये द्वैतं वा स्यात्, अद्वैतं वा – इति विकल्पः संभवति। अपुरुषतन्त्रत्वादात्मवस्तुनः। विरोधाच्च द्वैताद्वैतयोरेकत्वस्य॥

बृ. भा. ५-१-१, पा. ९५२.

(२) श्रुतिन्यायविरोधाच्च। 'सैन्धवघनवत् प्रज्ञानैकरसघनं निरन्तरम्' (२-४-११), 'पूर्वापरबाह्याभ्यन्तरभेदविवर्जितम्' (२-५-१९) 'बाह्याभ्यन्तरमजम्'(मुं. २-१-५) 'नेति नेति'(२-३-६), 'अस्थूलमनण्वह्रस्वम्' (३-८-८) 'अजमजरमभयममृतम्' (४-४-२५) – इत्येवमाद्याः श्रुतयो निश्चितार्थाः संशयविपर्यासाशङ्कारहिताः सर्वाः समुद्रे प्रक्षिप्ताः स्युः। अकिञ्चित्करत्वात्। तथा न्यायविरोधोऽपि। सावयवस्य अनेकात्मकस्य, क्रियावतो नित्यत्वानुपपत्तेः। नित्यत्वं चात्मनः स्मृत्यादिदर्शनादनुमीयते। तद्विरोधश्च प्राग्नोत्पत्तेः॥ बृ. भा. ५-१-१, पा. ९५२.

(३) भवत्कल्पनानर्थक्यं च। स्फुटमेव चास्मिन् पक्षे कर्मकाण्डानर्थक्यम्। अकृताभ्यागमकृतविप्रणाशप्रसङ्गात्॥

बृ. भा. ५-१-१, पा. ९५२.

(४) ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे समुद्रादिदृष्टान्ता विद्यन्ते। कथमुच्यते भवता, एकस्य द्वैताद्वैतत्वं विरुद्धमिति? न अन्यविषयत्वात्। नित्यनिरवयववस्तुविषयं हि विरुद्धत्वम् अवोचाम द्वैताद्वैतत्वस्य, न कार्यविषये सावयवे। तस्मात्, श्रुतिस्मृतिन्यायविरोधात्, अनुपपन्नेयं कल्पना॥

बृ. भा. ५-१-१, पा. ९५२.

(५) अध्येयत्वाच्च न शास्त्रार्थेयं कल्पना। न हि जननमरणाद्यनर्थशतसहस्रभेदसमाकुलं समुद्रवनादिवत् सावयवम् अनेकरसं ब्रह्म ध्येयत्वेन विज्ञेयत्वेन वा श्रुत्या उपदिश्यते, प्रज्ञानघनतां चोपदिशति 'एकधैवानुद्रष्टव्यम्' इति च। अनेकधादर्शनापवादाच्च 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति। यच्च श्रुत्या निन्दितं तन्न कर्तव्यम्॥

बृ. भा. ५-१-१, पा. ९५२, ९५३.

(६) यदापि समुद्रादिवत् द्वैताद्वैतात्मकमेव ब्रह्म अभ्युपगच्छामो नान्यद् वस्त्वन्तरम्, तदापि भवदुक्ताच्छास्त्रविरोधान्न मुच्यामहे। कथम्?

एवं हि परं ब्रह्म द्वैताद्वैतात्मकम् । तच्छोकमोहाद्यतीतत्वात् उपदेशं न काङ्क्षति । न चोपदेष्टाऽन्यो ब्रह्मणः । ..... न च समुद्रोदकैकत्ववद् विज्ञानैकत्वे ब्रह्मणोऽन्यत्र उपदेशग्रहणादिकल्पना संभवति । न हि हस्तादि-द्वैताद्वैतात्मके देवदत्ते वाक्कर्णयोर्देवदत्तैकदेशभूतयोः वाक् उपदेष्टी, कर्णः केवल उपदेशस्य गृहीता, देवदत्तस्तु नोपदेष्टा नाप्युपदेशस्य गृहीता – इति कल्पयितुं शक्यते । समुद्रैकोदकात्मत्ववदेकविज्ञानवत्त्वाद् देवदत्तस्य । तस्मात् श्रुतिन्यायविरोधश्च, अभिप्रेतार्थासिद्धिश्च एवं कल्पनायां स्यात् ॥

बृ. भा. ५-१-१, पा. ९५४.

(७) अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वम् अवगम्यमानं स्वाभाविकस्य शरीरात्मत्वस्य बाधकं संपद्यते । रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनाम् । बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति, यत्प्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत ॥

सू. भा. २-१-१४, पा. १९७.

(८) न चास्मिन् दर्शने ज्ञानान्मोक्ष इत्युपपद्यते । सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेन अनभ्युपगमात् । उभयसत्यतायां हि कथम् एकत्वज्ञानेन नानात्वज्ञानम् अपनुद्यत इत्युच्यते ॥

सू. भा. २-१-१४, पा. १९८.

(९) अतः, अदःशब्दवाच्यं पूर्णं ब्रह्म । तदेवेदं पूर्णं कार्यस्थं नामरूपोपाधिसंयुक्तम् अविद्यया उद्रिक्तम्, तस्मादेव परमार्थस्वरूपादन्यदिव प्रत्यवभासमानम् । तद्यदा आत्मानमेव परं पूर्णं ब्रह्म विदित्वा 'अहमदः पूर्णं ब्रह्मास्मि' इत्येवं पूर्णमादाय तिरस्कृत्य अपूर्णस्वरूपताम् अविद्याकृतां नामरूपोपाधिसंपर्कजाम् एतया ब्रह्मविद्यया पूर्णमेव केवलम् अवशिष्यते ॥

बृ. भा. ५-१-१, पा. ९५१.

ब्रह्मणोऽष्टावस्थाः–

७८. परस्य महासमुद्रस्थानीयस्य ब्रह्मणोऽप्रचलितावस्था अक्षरम्, ईषत्प्रचलितावस्था अन्तर्यामी, अत्यन्तप्रचलितावस्था क्षेत्रज्ञः– इति तिस्रो अवस्थाः, तथा विराडादयोऽन्याः पञ्च[1]– इत्येवम् अष्टौ अवस्था ब्रह्मण इति भर्तृप्रपञ्चाः । अन्ये त्वेता ब्रह्मणः शक्तय इति वदन्ति स्म, तस्य विकारा इत्यपि केचित् ॥

1 पिण्डो, जाति, विराट्, सूत्रं, दैवम्–इति आ॥ गि॥ (पा. ४१२)

तदेतन्मतं प्रत्याख्यातं बृहदारण्यकभाष्ये –

'अवस्थाशक्ती तावन्नोपपद्येते । अक्षरस्य अशनायादिसंसारधर्मातीतत्वश्रुतेः । न हि अशनायाद्यतीतत्वम्, अशनायादिधर्मवद्वस्थावत्त्वं चैकस्य युगपदुपपद्यते । तथा शक्तिमत्त्वं च । विकारावयवत्वे च दोषाः प्रदर्शिताश्चतुर्थे । तस्मादेता असत्यः सर्वाः, कल्पनाः ॥

बृ. ३-८-१२, पा. ८३२.

इति । वार्तिककारैश्च तत्र तत्र निराकृतोऽष्टावस्थावादः ॥

(१) अतत्त्वज्ञस्य तमसो रज्ज्वज्ञानोरगादिवत् ।
अष्टावस्थाप्रभेदेन मिथ्याज्ञानं प्रजायते ॥ वा. १-३-३१४.

(२) ईश्वराव्याकृतप्राणविराड्भूतेन्द्रियादिकम् ।
नाविद्योपाश्रयं मुक्त्वा संभाव्यं प्रत्यगात्मनि ॥ वा. १-४-४८७.

(३) यस्य त्वष्टास्ववस्थासु प्रत्यक्त्वं सममिष्यते ।
तस्यान्तरतम इति दुर्घटं वचनं भवेत् ॥ वा. १-४-१०४३.

['सर्वस्मादन्तरतरं यदयमात्मा' (बृ. १-४-८) इति वाक्यमिह परामृष्टम् । अन्नानन्दगिरिः – अन्तरतरवचनं स्वमतेनोपपाद्य भर्तृप्रपञ्चमते न युक्तम् इत्याह यस्येति । पिण्डो जातिर्विराट् सूत्रम्, दैवम्, अव्याकृतम्, अन्तर्यामी, साक्षी–इत्यष्टावस्थानां न बाह्याभ्यन्तरभावः । यथा घटशरावादीनां मृद्विकाराणां मृदेव तत्त्वम्, तथा सामान्यमात्मतत्त्वम्, अतस्तासु प्रत्यक्त्वं समम् – इति पक्षे नात्मनोऽन्तरतमत्वसिद्धिरित्यर्थः ॥ पा. ६४३.]

(४) कस्तर्हि भेद एषाम् ? उपाधिकृत इति ब्रूमः । न स्वत एषां भेदः: अभेदो वा । सैन्धवघनवत् प्रज्ञानघनैकरसस्वाभाव्यात् । 'अपूर्वमनपरमनन्तरमबाह्यम्' (२-५-१९), 'अयमात्मा ब्रह्म' (२-५-१९) इति च श्रुतेः । 'स बाह्याभ्यन्तरो ह्यजः' (मुं. २-१-२) इति चाथर्वणे । तस्मात्, निरुपाधिकस्य आत्मनो निरुपाख्यत्वात्, निर्विशेषत्वात्, एकत्वाच्च 'नेति नेति' इति व्यपदेशो भवति । अविद्याकामकर्मविशिष्टकार्यकरणोपाधिरात्मा संसारी जीव उच्यते । नित्यनिरतिशयज्ञानशक्त्युपाधिरात्मा अन्तर्यामी ईश्वर उच्यते । स एव निरुपाधिः केवलः शुद्धः स्वेन स्वभावेन अक्षरं पर उच्यते । तथा हिरण्यगर्भाव्याकृतदेवताजातिपिण्डमनुष्यतिर्यक् प्रेतादिकार्यकरणोपाधिभिर्विशिष्टस्तदाख्यस्तद्रूपो भवति । ... ... तस्मात् उपाधिभेदेनैवैषां भेदो नान्यथा ॥ बृ. ३-८-१२, पा. ८३२.

विज्ञानात्मनो विकारत्वम्–

७९. भर्तृप्रपञ्चानां मतमिदं यत् परमात्मा न साक्षाद् भूतेष्वनुप्रविष्टः स्वेन रूपेण, किं तर्हि, विकारभावमापन्नो विज्ञानात्मत्वं प्रतिपेदे । स च विज्ञानात्मा, परस्मादन्योऽनन्यश्च । येनान्यः, तेन संसारित्वसंबन्धी, येनानन्यः तेन 'अहं ब्रह्म' इत्यवधारणार्हः । एवं सर्वमविरुद्धं भविष्यति–इति (बृ. भा. २–१–२०, पा. ७३६)। यद्यपि वार्तिके टीकायां वा इदं मतं भर्तृप्रपञ्चनाम्ना संबध्य नोल्लिखितं दृश्यते , तथापि अन्यत्र समुद्रदृष्टान्ते कार्यकारणयोः सत्यत्ववर्णनं, ब्रह्मणोऽष्टावस्थात्ववर्णनं च तदीयत्वेनोक्तमालक्ष्य एतदपि तदीयमेवेत्युन्नीयते ॥

इतश्च । मूर्तामूर्तब्राह्मणे भाष्ये भर्तृप्रपञ्चप्रक्रिया 'औपनिषदंमन्या अपि केचित् प्रक्रियां रचयन्ति' इति सोपहासम् एवमनूदिता–

> "मूर्तामूर्तराशिरेकः, परमात्मराशिरुत्तमः, ताभ्यामन्योऽयं मध्यमः किल तृतीयः, कर्त्रा भोक्त्रा विज्ञानमयेन अजातशत्रुप्रतिबोधितेन सह विद्याकर्मपूर्वप्रज्ञासमुदायः । प्रयोक्ता कर्मराशिः, प्रयोज्यः पूर्वोक्तो मूर्तामूर्तभूतराशिः, साधनं चेति । तत्र च तार्किकैः सह सन्धिं कुर्वन्ति । 'लिङ्गाश्रयश्चैष कर्मराशिः' इत्युक्त्वा पुनस्तत्स्वस्यन्तः साङ्खत्यत्वभयात् 'सर्वः कर्मराशिः पुष्पाश्रय इव गन्धः पुष्पवियोगेऽपि पुटतैलाश्रयो भवति । तद्वल्लिङ्गवियोगेऽपि परमात्मैकदेशमाश्रयति । स परमात्मैकदेशः किलान्यत आगतेन गुणेन कर्मणा सगुणो भवति निर्गुणोऽपि सन्, स कर्ता भोक्ता बध्यते मुच्यते च विज्ञानात्मा' इति वैशेषिकचित्तमप्यनुसरन्ति । स च कर्मराशिः, भूतराशेरागन्तुकः स्वतो निर्गुण एव परमात्मैकदेशत्वात्" (बृ. भा. २–३–६, पा. ७५२–७५३.) ॥

इति । किञ्च 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु' (बृ. ४–३–७) इति वाक्यव्याख्यानसमये भर्तृप्रपञ्चैः कण्ठरवेणैवोक्तं 'विज्ञानं परं ब्रह्म तत् प्रकृतिको जीवो विज्ञानमयः' (आ. गि. पा. ५६०) इति । तदेतदपि भाष्ये अनूदितं दृश्यते 'येषां परमात्मविज्ञप्तिविकार इति व्याख्यानम्' (पा. ८६८) इति ॥

तत्र विकारत्वं परमात्मन एकदेशविपरिणामो वा, समानजातीयकानेकद्रव्यसमूहस्य घटादिवत् पृथिव्याः, अथवा अवयविनः परमात्मनस्तथावस्थितस्यैवैकदेशपरिणाम केशोपरादिवत्, आहोस्वित् सर्वस्यैव परिणामः क्षीरस्येव दधि – इति त्रेधा विकल्प्य प्रथमे कल्पे समुदायस्य समुदायिना ऐक्यं गौणमेव स्यात्, न परमार्थतः। तथा सति सिद्धान्तविरोधः; द्वितीये अवयविन एव स्यादवयवगतो गुणो वा दोषो वा; तृतीये तु निरवयवत्वश्रुतिविरोध इति न परस्य विकारो विज्ञानात्मा– इत्युक्तं भाष्ये (पा. ७३७) ॥

मूर्तामूर्तादिराशित्रयकल्पना तु एवं प्रत्याख्याता –

उक्ता एव तावत् सावयवत्वे परमात्मनः संसारित्वसवणत्वकर्मफलदेशसंसरणानुपपत्त्यादयो दोषाः। नित्यभेदे च विज्ञानात्मन परेणैकत्वानुपपत्तिः। लिङ्गभेदेति चेत् परमात्मन उपचरितदेशत्वेन कल्पितं घटकरकाभूच्छिद्राकाशादिवत्, तथा लिङ्गवियोगेऽपि परमात्मदेशाश्रयणं वासनायाः, अविद्यायाश्च स्वत उत्थानम् ऊषरवत् – इत्यादिकल्पना अनुपपन्नैव। न च वास्यदेशव्यतिरेकेण वासनाया वस्त्वन्तरसञ्चरणं मनसापि कल्पयितुं शक्यम्। न च श्रुतयोऽनुगच्छन्ति 'कामः संकल्पो विचिकित्सा' (बृ. १–५–६), 'हृदये ह्येव रूपाणि' (बृ. ३–९–२०), 'ध्यायतीव लेलायतीव' (बृ. ४–३–७). 'कामा येऽस्य हृदि श्रिताः' (बृ. ४–४–७), 'तीर्णो हि तदा सर्वान् शोकान् हृदयस्य' (बृ. ४–३–२२) इत्याद्याः। .... अथ मूर्तामूर्ते एव परमात्मनो रूपे, वासनास्तु विज्ञानात्मनः–इति चेत्। तदा 'विज्ञानात्मद्वारेण विक्रियमाणस्य परमात्मन' इतीयं वाचोयुक्तिरनर्थिका स्यात्। वासनाया अपि विज्ञानात्मद्वारत्वस्य अविशिष्टत्वात्। न च वस्तु वस्त्वन्तरद्वारेण विक्रियत इति मुख्यया वृत्त्या शक्यं कल्पयितुम्। न च विज्ञानात्मा परमात्मनो वस्त्वन्तरम्, तथा कल्पनायां सिद्धान्तहानात्' ॥

बृ. भा. २–३–६, पा. ७५३–७५४.

मयटो विकारार्थत्वमेवं निराकृतम् –

'येषां परमात्मविज्ञप्तिविकार इति व्याख्यानम्, तेषां 'विज्ञानमयो मनोमयः' (४–४–५) इत्यादौ विज्ञानमयशब्दस्य अन्यार्थदर्शनात् अश्रौतार्थता अवसीयते। .... 'सधीः' इति चोत्तरत्र पाठात्, 'हृद्यन्तः' इति वचनाद् युक्तं विज्ञानप्रायत्वमेव ॥ बृ. ४–३–७, पा. ८६८.

वार्तिके तु एवं स्थितम् –

'व्याचख्युर्मयटं ये तु विकारार्थे महाधियः ।'
स्वव्याख्यानविरोधः स्यात् तेषां चानर्थसंगतिः ॥
आत्मनश्चापि निःशेषविकारप्रतिषेधतः ।
न जायत इति स्पष्टे श्रुतिमन्त्रोक्तिसंश्रयात् ॥
अनिर्मोक्षप्रसक्तिश्च विकारश्चेत् परात्मनः ।
मयण नातो विकारे स्यात् प्रायार्थस्त्वत्र युज्यते ॥
बृ. वा. ४–३–३१८, ३१९, ३२०, पा. १४३२–१४३३.

एवं च भर्तृप्रपञ्चप्रस्थाने विज्ञानात्मा ब्रह्मविज्ञप्तिविकार इत्येवाभ्युपगम इति स्थितम् ॥

द्रष्टृदृष्टिविवेकः –

८०. 'कतमो याज्ञवल्क्य सर्वान्तरः' इत्युपस्तेन पृष्टो याज्ञवल्क्य आचष्टे 'न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः' (बृ. ३–४–२) इति । तदेतत् प्रतिवचनं भर्तृप्रपञ्चा एवं व्याचक्रुः 'दृष्टिः क्रिया । तस्या यद्रूपं तत् कर्म । तद्धि ईप्सिततमम् । चक्षुः, मनः, बुद्धिः इति करणानि । विज्ञानात्मा कर्ता । विज्ञानात्मनिर्वृत्ताया दृष्टिक्रियायाः फलं रूपोपलब्धिः । कर्ता क्रियासाधनत्वेन विनियुक्तः, क्रियासिद्ध्युत्तरकाले फलं कस्यापि भविष्यति । तद्दर्शयितव्यं न कर्ता' (वा. आ. गि. पा. १२३६–१२३७)[1] इति ॥

तदेतदेवं प्रत्युक्तं भाष्ये –

तृजन्तेनैव दृष्टिकर्तृत्वस्य सिद्धत्वात्, 'द्रष्टेः' इति निरर्थकम् । तदा 'द्रष्टारं न पश्येः' इत्येतावदेव वक्तव्यम् । यस्माद् धातोः परस्तृच् श्रूयते । तद्धात्वर्थकर्तरि हि तृज् स्मर्यते । 'गन्तारं भेत्तारं वा नयति' इत्येतावानेव हि शब्दः प्रयुज्यते· न तु 'गतेर्गन्तारम्', 'भिदेर्भेत्तारम्' इति

1. भर्तृप्रपञ्चवाक्यानि टीकायां तत्र तत्रोदाहृतानि समाहृत्य प्रायशस्तथैवोद्धृतानि बृहदारण्यकभाष्यतद्वार्तिकान्यतरपृष्ठसंख्यया परामृश्यन्ते इति सर्वत्रात्र बोध्यम् ॥

असति अर्थविशेषे प्रयोक्तव्यः । न चार्थत्वादत्वेन हातव्यं सत्यां गतौ । न च प्रमादपाठः । सर्वेषाम् अविगानात्' (बृ. भा. ३-४-२, पा. ८०८) इति ॥

वार्तिके च—

यथा प्रश्नमियं तावत् प्रत्युक्तिर्नोपपद्यते ।
यतो द्रष्टर्यसंभाव्यं कृत्स्नं प्रश्नविशेषणम् ॥
साक्षादित्यादिकं यस्माच्च मनागपि युज्यते ।
विशेषणं यथोक्तं तत् कारके दृष्टिकारिणि ॥

वा. ३-४-१७७, १७८ इति ॥

उषस्तप्रश्नो विज्ञानात्मविषयकः, कहोलप्रश्नस्तु परमात्मविषयकः— इति भर्तृप्रपञ्चमतम् । यतो माध्यन्दिनपाठमनुसृत्योपनिषदं व्याकुर्वद्भिस्तैर्लिखितं 'पूर्वः प्रश्नः परमात्मविषयकोऽयं विज्ञानात्मविषयः । अस्य हि विज्ञानात्मनः परमात्मन्यध्ययो वक्तव्यः । एकस्मिन् प्रकरणे द्वयोरुक्तेरन्तरतमत्वं परमात्मन्युच्यमानं विज्ञानात्मनि सिद्धं भविष्यति .... शोकमोहाद्यतीतता प्रकाशमात्ररूपता च विज्ञानात्मन्युच्यमाना परमात्मनि सिद्धा भविष्यति । पञ्चमाध्यायशेषेण परमात्मनो निर्णयो वक्ष्यमाणः, षष्ठेन विज्ञानात्मनः । अपुनरुक्तेन हि द्वितीयेन प्रश्नेन भवितव्यम्' (वा. आ. गि. पा. १२४१–१२४२) इति ॥

"अत्र 'दृष्टेर्द्रष्टा' इति वाक्यस्य भाष्यसंमताभिप्रायः प्रागेव (खं. ३८) वर्णितः । प्रश्नयोर्भिन्नविषयत्वं त्वेवं निराकृतम् —

" तत्र । 'ते' इति प्रतिज्ञानात् । 'एष त आत्मा' इति हि प्रतिवचने प्रतिज्ञातम् । न चैकस्य कार्यकरणसंघातस्य द्वौ आत्मानौ उपपद्येते । एको हि कार्यकरणसंघात एकेनात्मना आत्मवान् । न च उषस्तस्यान्यः, कहोलस्यान्यो जातितो भिन्न आत्मा भवति । द्वयोरगौणत्वात्मत्वसर्वान्तरत्वानुपपत्तेः । यद्येकम् अगौणं ब्रह्म द्वयोः, इतरेण अवश्यं गौणेन भवितव्यम्, तथा आत्मत्वं सर्वान्तरत्वं च । विरुद्धत्वात् पदार्थानाम् । यद्येकं सर्वान्तरं ब्रह्म आत्मा मुख्यः, इतरेण असर्वान्तरेण अनात्मना अमुख्येन अवश्यं भवितव्यम् । तस्मादेकस्यैव द्विः श्रवणं विशेषविवक्षया " बृ. भा. ३-५-१, पा. ८१० ॥

पुनरुक्तिदोषस्तु, एवं परिहृतः –

"पूर्वस्मिन् प्रश्ने अस्ति व्यतिरिक्त आत्मा, यस्यायं सम्प्रयोजको बन्ध उक्तः–इति । द्वितीये तु तस्यैव आत्मनोऽशनायादिसंसारधर्मातीतत्वं विशेष उच्यते, यद्विशेषपरिज्ञानात् संन्याससहितात् पूर्वोक्ताद् बन्धनाद् विमुच्यते । तस्मात् प्रश्नप्रतिवचनयोः 'एष त आत्मा' इत्येवमन्तयोस्तुल्यार्थतैव" ॥ पा. ८१०.

'पश्यन् वै तन्न पश्यति' इत्यादिश्रुतिव्याख्यानम् –

८१. 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद् द्वितीयमस्ति ततोऽन्यद् विभक्तं यत्पश्येत्' (बृ. ४–३–२३) इत्यारभ्य 'यद् वै तन्न विजानाति ....' (बृ. ४–३–३०) इत्यन्तं सुषुप्तमधिकृत्याम्नातम् । तत्र स्वयंज्योतिःस्वभावोऽप्यात्मा किमिति तत्रावस्थायां न पश्यति ? –इत्याशङ्कापरिहारत्वेन भर्तृप्रपञ्चा एवं व्याचख्युः –

"पश्यन्नेवायं तस्मिन् काले भवति । न चास्य विशेषज्ञानं प्रादुरस्ति । द्रष्टायं पुरुषो दृष्टिक्रियायाः कर्ता दृष्टिक्रियाभिव्यक्तस्य रूपस्य बुद्ध्या उपहृतस्य विज्ञाता । तत्रापि बुद्धिप्रत्ययस्य घटादेश्च ग्राह्यग्राहकभावेन संबन्धात् क्रियान्तरनिर्वृत्तौ द्रष्टैव । तत्र यस्मिन् पुरुषे दृक्शक्ती रूपग्रहणादिसंबन्धिनी, विज्ञानात्माधीनो यो दृशिक्रियाभावः, स कर्तृगतः । यावद्गुणिभाविनो हि गुणाः, यावदग्निस्तावदौष्ण्यम् । तस्माद् यावद्द्रष्टा तावद् दृष्टिरित्यपरिलोपः । नित्यो हि द्रष्टा । न ह्यस्य विनष्टुं शीलं विद्यते । सर्वात्मभावात्, अद्वैतत्वाच्च । येन ह्यस्यान्येन द्वितीयेन नाश आशङ्क्यते न तदस्ति, तेनाविभक्तत्वात्तस्य । न च तेनैव तस्य विनाशोऽस्ति । अविनाशित्वान्नित्यः । तस्य नित्यस्य द्रष्टुर्नित्यो गुणो दृष्टिरवस्थितैवास्ते । स तया दृष्ट्या अविपरिलुप्तया पश्यन्नेवास्ते इति स्थितम् । यदि पश्यन्नेवास्ते कथं न पश्यतीति ? शृणु यथा पश्यति, न पश्यति च । तत्तु द्वितीयं नास्ति यत्संबन्धात् विशेषविज्ञानं प्रादुःष्यात् । ननु च द्वैताद्वैतविषयत्वे स्यादेव विभक्तं द्रष्टव्यम् । स्याद्विभक्तम्; न त्वन्यत्वतः । यदि हि ततोऽन्यद् विभक्तं स्यात्, पश्येत्, न तु तद्द्वितीयमस्ति । तस्मात्,

दृक्शक्तेर्विद्यमानत्वात् पश्यन्नेवास्ते, न तु द्रष्टव्यं प्राप्नोति यतोऽतो नोपलभते । तद्यथा. अग्निर्ज्वलन्नपि नानभ्याहितं दहति तद्वत् । " (वा. पृ. १६५२-१६५६) ॥

अत्र दृष्टिश्रुत्यादीनां भिन्नधर्मत्वं विज्ञानात्मनो धर्मित्वं चाङ्गीकृत्य व्याख्यातमिति स्पष्टम् । तत्र धर्मभेदपक्ष इत्थमनूदित आचार्यैः –

' किं पुनर्दृष्ट्यादीनाम् अग्नेरौष्ण्यप्रकाशज्वलनादिवद् धर्मभेदः, आहोस्वित् अभिन्नस्यैव धर्मस्य परोपाधिनिमित्तं धर्मान्यत्वमिति ? अत्र केचिद् व्याचक्षते । आत्मवस्तुनः स्वत एवैकत्वं नानात्वं च । यथा गोर्गोद्रव्यतया एकत्वम्, सास्नादीनां धर्माणां परस्परतो भेदः । यथा स्थूलेष्वेकत्वं नानात्वं च तथा निरवयवेष्वमूर्तवस्तुषु एकत्वं नानात्वं चानुमेयम् । सर्वत्राव्यभिचारदर्शनात् आत्मनोऽपि तद्वदेव दृष्ट्यादीनां परस्परं नानात्वम्, आत्मना चैकत्वम्–इति (बृ. भा. पा. ८९८) ॥

इति । निरसनं त्वित्थं कृतम् –

न । अन्यपरत्वात् । न हि दृष्ट्यादिधर्मभेदप्रदर्शनपरमिदं वाक्यं किं तर्हि, ' यदि चैतन्यात्मज्योतिः, कथं न जानाति सुषुप्ते ? नूनमतो न चैतन्यात्मज्योतिः – इत्येवमाशङ्काप्राप्तौ तन्निराकरणायैतदारब्धं यद्वैत-तदित्यादि । .... तत्र दृष्ट्यादिधर्मभेदकल्पना विवक्षितार्थानभिज्ञतया । सैन्धवघनप्रज्ञानैकरसघनश्रुतिविरोधाच्च .... न च निरवयवेष्वनेकात्मता शक्यते कल्पयितुम् । दृष्टान्ताभावात् । यदप्याकाशस्य सर्वगतत्वादिधर्मभेदः परिकल्प्यते परमाण्वादीनां च गन्धरसाद्यनेकगुणत्वम्, तदपि निरूप्यमाणं परोपाधिनिमित्तमेव भवति । .... तस्मान्न निरवयवस्यानेकधर्मवत्त्वे दृष्टान्तोऽस्ति । एतेन दृगादिशक्तिभेदानां पृथक् चक्षूरूपादिभेदेन परिणाम-भेदकल्पना परमात्मनि प्रत्युक्ता ॥ " बृ. भा. पा. ८९८–९००.

[अत्र भाष्यकारमतं तु पूर्वमेव द्रष्टृद्रष्टव्यविवेकप्रकरणे प्रदर्शितम् (खं. ३८) तत एवानुसंधेयम् ॥]

वार्तिकेऽपि भर्तृप्रपञ्चव्याख्यानमिदं विस्तरतो निरस्तम् । तत्रैष सारः । 'पश्यन्' इति यदि द्रष्टुर्याथात्म्यमुच्यते, तर्हि न तस्य दृष्टिक्रिया उच्येत । दृष्टिः क्रिया चेत् तस्य क्रियात्वादेव विपरिलोपः स्यादेव ।

द्रष्टा क्रियते न चासौ दृष्टिर्विपरिलुप्यत इत्येतद् वचो व्याहतम्, श्रुत्य-प्रामाण्यावहम्, कृतकमनित्यमित्यनुमानविरुद्धं च। न पश्यतीत्यनुवाद-मात्रत्वात् नैतद्धर्मान्तरवाचकम्। न च कूटस्थस्य दृष्टिकर्तृत्वं रूपादि-विज्ञातृत्वं वा घटते। न च गुणिस्थित्यनुरोधित्वं गुणानाम्। केशकृष्ण-त्वादिनाशदर्शनात्; अङ्गीकृतेऽप्यनुरोधित्वे अगुणभूताया दृष्टिक्रियाया नात्मानुरोधित्वं भवति। द्रष्टुर्निर्विशेषत्वे तद्धर्मस्यालोप इत्ययुक्तम्, कारक रूपश्चेत् न तस्यापि नित्यत्वम्। द्रष्टव्याभावात् दृष्टयभाव इत्यप्ययुक्तम्; यस्माद्द्रष्टृदृष्ट्योरप्यभाव एव तदानीमवगम्यते। तद्भावे हि तयोः सुप्तावप्यनुभवः स्यात्। सुप्तौ दृश्यसत्त्वेऽपि न तदन्यत्वतोऽस्ति, अतो न पश्यति–इत्यफव्याख्यानम्। यतो जागरितेऽपि भेदाभेदसत्त्वात् तन्नात्यन्तं विभक्तमस्ति। अन्यद् विभक्तं द्रष्टव्यं नास्तीति द्वैताद्वैतवादे पुनरुक्तिरेव स्यात्। अस्मन्मते साक्ष्यं द्रष्टव्यम्, द्रष्टादि त्वकल्पितात्मापेक्षया विलक्षणमित्यन्यत्; द्रष्टृदृश्यदर्शनार्थास्तु मिथो विभक्ताः – इत्यपौनरुक्त्य-मिति। भेदाभेदवादोऽपि विस्तरशोऽत्र वार्तिके निरस्तः। (वा. पा. १६४७ प्रभृति)॥

ब्रह्मविद्याधिकारी –

८२. 'आत्मेत्येवोपासीत' इति सूत्रिताया ब्रह्मविद्यायाः प्रयोजनाभिधित्सया 'किमु तद्ब्रह्मावेद् यस्मात् तत्सर्वमभवत्' इति चोदनामुत्थाप्य प्राह श्रुतिः – 'ब्रह्म वा इदमग्र आसीत् तदात्मान-मेवावेत् अहं ब्रह्मास्मीति। तस्मात्तत् सर्वमभवत्' (बृ. १–४–१०) इति। तत्र ब्रह्मशब्दस्य भर्तृप्रपञ्चानां व्याख्यानम् 'ब्रह्मभावी पुरुषो ब्राह्मण' इति। द्वैतैकत्वापरब्रह्मविद्यया कर्मसहितया अपरब्रह्मभावमुपसंपन्नो भोज्यादपावृत्तः, सर्वप्राप्त्या उच्छिन्नकामकर्मबन्धनः परब्रह्मभावी ब्रह्म-विद्याहेतोः ब्रह्मेत्यभिधीयते' (बृ. भा. पा. ६६९) इति तेषां मतमनूदितं भाष्ये॥

खण्डितं च–'तन्न । सर्वभावापत्तेरनित्यत्वदोषात् । न हि सोऽस्ति लोके परमार्थतः, यो निमित्तवशात् भावान्तरमापद्यते, नित्यश्च–इति । तथा ब्रह्मविज्ञाननिमित्तकृता चेत्(च ?) सर्वभावापत्तिः, नित्या च इति विरुद्धम् (पा. ६६९) इति । अविद्याकृतम् अब्रह्मत्वम् असर्वत्वं च ब्रह्मविद्यया निवर्त्यते, न तु वस्तुधर्मभूतम्–इति भाष्यकाराणामाशयो वाक्यशेषे आविष्कृतः । तथा चात्रापि अध्यारोपापवादप्रक्रियैवाश्रयितव्या इति फलिष्यति ॥

वार्तिके तु–भर्तृप्रपञ्चानाम् उपोद्घातभाष्यम् इत्थं वर्णितम् –

"द्वैतैकत्वात्मकं कर्मज्ञानफलमनुभूय तस्मादप्युत्कृष्टसाधनं बुभुत्सवः पृच्छन्ति 'किमु तद्ब्रह्मावेद् यस्माद् तत्सर्वमभवत्' इति । सर्वैकत्वं परं ब्रह्म परमात्मा यः, स आत्मा । अनेनात्मनात्मवन्ति भूतानि । ततः प्रच्युतानाम् अविद्याकृतो हिरण्यगर्भ आत्मा सर्वसाधारणः ; तेनात्मना सर्वसत्त्वान्यात्मवन्ति । यावत् किञ्चिदन्यत् विराड्देवतादि तत्सर्वमविद्याकृतम् । एते सर्वेऽप्येकैकस्यात्मनो यथादर्शनमनुभूयन्ते । तत्फलं ता एता दर्शनावस्थाः, एतदेव चासां कार्यम् । तद्यथा पिण्डात्मदर्शी पिण्डात्मानमेवाभिसंपद्यते प्रेत्य । एवं दैवम्, एवं विराजम्, एवं सूत्रं च । एवं परमात्मदर्शनावस्थायाः परमात्मभाव एव कार्यम् । तत्र परमात्मा नित्यः । कदाचिद्दर्शनमनित्यम् । कदाचिदविद्यातिरस्कृतं भवति । सा अविद्या 'अहमेवेदं सर्वम्' इत्येतस्यार्थस्यासंबोधः । स एष संबोधो नित्यः परमात्मनि, अनित्य इतरस्मिन् तिरस्कृतविज्ञाने सांसारिके । तन्नैवं सति योऽविद्यया असर्वभावमित्वा विद्यया सर्वात्मदर्शनेन सर्वभावमभिसंपन्नः, स पुरापि ब्रह्मैवाभूदित्यतः संबोधाद् ब्रह्म संपद्यते" ॥ आ.गि. वा. ११२४–११६२, पा. ६५८–६६६.

अत्र टीकाकृता यानि यानि भर्तृप्रपञ्चवाक्यानि उद्धृतानि, तानि तानि प्रायशस्तथैव विलिख्य वार्तिकाक्षरैः शेषपूरणं कृतम् । अत्रैतद् विचिन्त्यम् – किं भर्तृप्रपञ्चा यथावार्तिकव्याख्यानं भगवत्पादसंमताविद्याध्यारोपितद्वैतनिवृत्तिर्विद्यया भवतीत्यभिप्रयन्ति, अथवा अविद्यया जीवत्वं प्राप्तस्य ब्रह्मोपासनारूपविद्यया विनिवृत्तिं ततो ब्रह्मप्राप्तिं चेच्छन्तीति ? तत्र वार्तिकोक्तप्रकारेणाधस्ताद्वर्णितनीत्या 'सर्वैकत्वावबोधोऽयं ब्रह्मविद्या-

गिरोच्यते । द्वैतस्याद्वैतयाथात्म्यात् क्लृप्तसर्पादितत्त्ववत् ॥ ' (वा. १२३८, पा. ६६१) इति सदृष्टान्तं यद्यमीभिराचार्यैः ब्रह्माध्यारोपितमेव तु सर्वमविद्यया इत्यभ्युपगतमभविष्यत् तदा 'पूर्णमदः' इति वाक्यस्य कार्यकरणोभयसत्यत्वपरत्वेन व्याख्यानम्, सर्वथा द्वैताद्वैतात्मकत्वं च ब्रह्म, अन्यत्रोपवर्णितं व्यरोत्स्यत इत्यतस्तदीयं भाष्यं वार्तिककारैरेवेत्थं नीतमिति वयं युक्तमुत्पश्यामः । तथा सतीदमपि वार्तिकं संगच्छते ' भर्तृप्रपञ्चप्रस्थानमेवमेतद्यथोदितम् । इतोऽन्यत्रापि तद्भाष्यं गमयेदेवमेव तु ॥ ' (वा. १९६४ पा. ६६६) इति । टीका च– 'कथमुपोद्घातसंबन्धि तद्भाष्यं विवर्तानुसारि व्याख्यातम् ? तदीयभाष्यान्तरस्य परिणामानुसारित्वाद्– इत्याशङ्क्याह' इति ॥

ननु च 'ब्रह्मभाविरवं श्रुत्वा ये तु व्याचक्षतेऽन्यथा । तानुद्दिश्य विचारोऽयं प्रारब्धो गुरुभिः स्फुटः ॥ (वा. ११६५, पा. ६६६) इति समनन्तरोत्तरवार्तिके भर्तृप्रपञ्चमतमन्यथाव्याचक्षाणा एव भाष्यकारैर्निराकृता इति स्पष्टमभिहितम् । टीकाकारोऽप्याह ' विवर्तवादं ते नेच्छन्तीति ये भ्राम्यन्ति तानुद्दिश्य तद्भ्रान्तिध्वस्त्यर्थं विचारो भाष्यकारैरवतारितः ' इति । तत् कथं संगमनीयम् अस्मिन् पक्षे इति चेत् । अत्र विभज्योत्तरं देयम् । ' सा अविद्या अहमेवेदं सर्वम् इत्यस्यार्थस्यासंबोधः ' इतीहोक्तं भर्तृप्रपञ्चैः, 'ब्रह्म वा इदमग्र असीत्' इत्यादिवाक्यव्याख्यानेऽपि लिखितम् " 'इदम्' इति नामरूपव्याकृतं जगन्निर्दिश्यते । स इदं जगदात्मत्वेनाभिसंपन्नोऽभूदविद्यया । अयं पुनः समतीत्य स्वयमेवात्मानम् अवेत् " (पा. ६६९) इति । अतोऽविद्यया यो नामरूपजगदात्मत्वं प्रपेदे इव, स एव ब्रह्मात्मविद्यया सर्वमभवत्–इत्यपि तदीयभाष्यार्थो वर्णयितुं शक्यत एव । तथा चेदस्मदभिमतसिद्धिः । यदा पुनः ' तत्फलं ता एता दर्शनावस्थाः, एतदेव चासां कार्यम् । पिण्डदैवविराट्सूत्रादि यथा । एवं परमात्मदर्शनावस्थायाः परमात्मभावकार्यम् ' इति तद्भाष्याक्षरालोचनया परमात्मभावस्य उपासना-

रूपविद्याकार्यत्वं स्वीक्रियते । तदा भाष्यकारोक्तखण्डनमुपतिष्ठते 'सर्वभावापत्तेरनित्यत्वदोषात्' इत्यादि । अतो भर्तृप्रपञ्चमतमेवं गमयितं श्रुतियुक्तिसंमतं भवेत्–इत्यभिप्रायकं वार्तिकम् । अत एव हि उत्तरत्र 'भर्तृप्रपञ्चभाष्यस्य प्रचारोऽयं प्रदर्शितः । श्रुत्यक्षरानुसारेण तथानुभववर्त्मना ॥ ' (वा. ११८८, पा. ६७१) इत्याह । टीकाकृदप्याह 'प्रचारः, विवर्तवादानुसारेण प्रवृत्तिप्रकारः । किमित्येवं तदीयभाष्यस्य गतिरुच्यते ? तत्राह– श्रुतीति ॥ ' इति ॥

अत एव भाष्यकारैः वार्तिककृद्भिश्च सममेव मूर्तामूर्तब्राह्मणवाक्यव्याख्यानावसरे भर्तृप्रपञ्चमतम् 'अविद्या स्वत उत्थिता अनागन्तुकाप्यूषरवदनात्मधर्मः' (बृ. भा. पा. ७५३) इति कल्पना निरस्ता दृश्यते । इहाप्युक्तम् –

> "अनित्यत्वे च कर्मफलतुल्यता-इत्युक्तो दोषः । अविद्याकृतासर्वत्वनिवृत्तिं चेत् सर्वाभावापत्तिं ब्रह्मविद्याफलं मन्यसे, ब्रह्मभाविपुरुषकल्पना व्यर्था स्यात् । ... तदा युक्तं यत् परमार्थत आसीत् परं ब्रह्म ब्रह्मशब्दस्य मुख्यार्थभूतम्, 'ब्रह्म वा इदमग्र आसीत्' इत्यस्मिन् वाक्ये उच्यते इति वक्तुम् । यथाभूतार्थवादित्वाद् वेदस्य । न त्वियं कल्पना युक्ता ब्रह्मशब्दार्थविपरीतो ब्रह्मभावी पुरुषो ब्रह्मेत्युच्यत इति । श्रुतहान्यश्रुतकल्पनाया अन्याय्यत्वात् ॥ " बृ. भा. १-४-१०, पा. ६६९.

इत्यादि । ततः सर्वमनवद्यम् ॥

अवस्थात्रयपरीक्षणम्–

८३. अस्मिन् प्रस्थाने जाग्रत्स्वप्नाद्यवस्थापरीक्षणस्य स्थानं निर्णिनीषूणां कृते वार्तिकटीकायां तत्र तत्र प्रकीर्णतयोदाहृतानि वाक्यानि संकलय्यात्र प्रदर्श्यन्ते ॥

(१) तत्र गार्ग्याजातशत्रुसंवादरूपग्रन्थस्य सुप्तपुरुषविचारगर्भितस्य संबन्धोक्तिरियम् –

> प्रवेशवाक्ये सूत्रितो विज्ञानात्मा । अत्रेतिहासे तस्य निर्णयः क्रियते । तत्र भोक्त्र्यश्च देवताः, करणाधिष्ठात्र्यश्च, किमन्यद्विज्ञानात्मना कार्यमस्ति ?

– इत्येतस्मिन् दर्शने स्थितो गार्ग्यः पूर्वपक्षपरिग्रहायोत्थाप्यते । काश्यात्मना श्रुतिः सिद्धान्तमुक्तवती ॥ वा. पा. ८९०, ८९१.

सेयं संबन्धोक्तिरयुक्ता । आत्मज्ञानान्मुक्तिरिति प्रकृतार्थासंगतेः । देवतास्तित्वनिरासश्रमस्य निष्फलत्वाच्च । देवतास्तित्वपक्षेऽपि देहाद्भिन्नस्य विज्ञातुरस्तित्वादेरिष्टत्वात् – इति वार्तिके खण्डितमिदं व्याख्यानम् (वा. २–१–२४, २५) ॥

(२) सुप्तोत्थितं पुरुषं प्रति काश्यस्यायं प्रश्नः –

यत्रैष एतत् सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागात् (बृ. २–१–१६) ॥

इति प्रश्नाभिप्राय एवं व्याख्यातो भर्तृप्रपञ्चैः ॥

चोद्यगर्भप्रश्नोक्तिरियम् । भोक्तुर्ज्ञानस्वभावत्वे करणेषु विद्यमानेषु कथं कदाचित् प्रतिबोधः ? अथ पुनर्विहायैतच्छरीरम् असंनिहितोऽभूत्, विनष्टो वा, कुतः प्रत्यागमनम् ? ॥ वा. पा. ९१९.

अस्य व्याख्यानस्य निरास एवं वार्तिके कृतः । भोक्तुर्ज्ञानस्वभावत्वे कथं कादाचित्कः प्रतिबोधः – इति प्रश्नार्थवर्णनम् असंगतम् । 'प्रत्यगात्मन्येवाभूत्, तत एव चागात्' इति वक्ष्यमाणप्रत्युक्तिप्रतिकूलत्वात् । 'अथ पुनर्विहायैतच्छरीरम् असंनिहितः' इत्यपि न प्रश्नो युक्तिमान् । यतो गत्यादिसाधनानां देह एव स्थितेः कुतो देशान्तरगतिर्भवेत् ? ज्ञानस्वरूपस्य, पुनरुत्थाप्यमानस्यास्य कुतो विनाशशङ्का ? (वा. २–१–२०३, २०४) इति ॥

(३) यत्रैष एतद् सुप्तोभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते । तानि यदा गृह्णात्यथ हैतत् पुरुषः स्वपिति नाम ॥ बृ. २–१–१७.

इत्यादिवाक्यशेषम् एवं व्याचक्रुर्भर्तृप्रपञ्चाः –

बुद्धिविज्ञानेन वागादिविज्ञानम् आदाय हृदयाकाशे शेते। ततो नाडीभिः प्रसृत्य स्वप्नं पश्यति। अतोऽत्र 'विज्ञानेन विज्ञानम्' इत्युभयत्रापि करणसाधन एव विज्ञानशब्दः। तस्य हि ज्ञानात्मनो या च स्वप्रकाशवृत्तिः, सा हृदयद्वारेण व्युच्चरतीति हृदयं विशेषाश्रयतनम्। तत्र हि भावनाविज्ञानं विशेषेणाभिव्यक्तमास्ते यतः, एवं कृत्वा 'तस्मिन् शेते' इत्युच्यते॥ वा. पा. ९२८–९२९.

अस्य विमर्शनावसरे वार्तिककारैरेवमुक्तम्। 'गृहीतं मनः' इति वाक्यशेषे सवासनस्य मनसः स्वापे उपसंहारश्रुतेः, बुद्धिविज्ञानेनेति कल्पना व्यर्था। अयं वागादीनि स्वयं गृह्णाति तदैनं स्वपितीत्याचक्षते– इत्येव सुव्याख्यानम्। 'स्वमपीतो भवति' (छां. ६–८–१) इति समाख्यावशात्, 'गृहीत एव प्राणो भवति' इत्यादियुक्तिप्रदर्शनाच्च' इति (वा. २–१–२५६, २५७)। **भाष्येऽपि** 'सत्यम्, स्वपितीति-नामप्रसिद्ध्या आत्मनः संसारधर्मविलक्षणं रूपमवगम्यते, न त्वत्र युक्ति-रस्तीत्याशङ्क्याह .... तस्मादुपसंहृतेषु वागादिषु क्रियाकारकफलात्मता-भावात् स्वात्मस्थ एवात्मा भवतीत्यवगम्यते' (बृ. भा. २–१–१७) इत्युक्तम्॥

(४) सुषुप्तावस्थायां किमित्यात्माद्वितीयं न पश्यति? – इत्यत्र भर्तृप्रपञ्चानामभिप्रायः प्रागेव (खं ८१) अनूद्य विमृष्टमिहाप्यनुसंधेयम्॥

(५) **कूर्चब्राह्मणे** याज्ञवल्क्यः पृच्छति जनकम् **'इतो विमुच्यमानः क्व गमिष्यसि'** इति (बृ. ४–२–१)। जनकस्योत्तरम् **'नाहं तद्भगवन् वेद यत्र गमिष्यामीति'** अस्य ग्रन्थस्याभिप्राय एवमभिहितो भर्तृप्रपञ्चैः –

'यज्जनको वेद तत्त्वम्, न तत्प्रतिपत्तौ मार्गम्, स तु तद्दर्शनेन परिशोध्यः। जनकस्तु जानन्नपि परमात्मानं दर्शनमार्गस्य परोक्षत्वादाह नाहं तद्भगवन् वेदेति'॥ वा. पा. १३६१–१३६२.

एतस्य वार्तिके निराकरणं त्वित्थम् – पूर्वस्मिन् ग्रन्थे नात्मज्ञानमुक्तम्, अतो राज्ञो ब्रह्मवित्त्वे प्रमाणं न पश्यामः। न च 'क्व गमिष्यसि ?' इति गत्यर्थः प्रश्नः। गन्तव्यमेव हि पृच्छ्यते, न गतिरिति। न च ब्रह्मणि 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा' (बृ. ३–४–१) इत्यात्मानन्यत्वेनावगते गतिरवकल्पते। 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-६), 'गतिरत्र नास्ति' (का. १–२–८), 'आत्मैवेदं सर्वम्' (छां. ७–२५–२), 'ब्रह्मैवेदं विश्वम्' (मुं २–२–११)–इत्यादिश्रुतिविरुद्धा चेयं कल्पना। मुक्तेरविद्यामात्रव्यवहितत्वाच्च (वा. ४–२–२० प्रभृति २९ पर्यन्तम्, पा. १३६२–१३६३) इति ॥

एतेन वैश्वानरादितुरीयान्तमुक्तमत्रोपासनार्थमेवेति स्याद् भर्तृप्रपञ्चमतमित्युन्नीयते। उत्तरत्र 'ज्ञानादन्या गतिश्चेत् स्यात् प्राप्स्यसीत्येव तं वदेत्' (बृ. ४–२–९५) इति वार्तिकदर्शनात् 'अभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः' (बृ. ४–२–४) इति वाक्यव्याख्यानावसरे ॥

(५) उत्तरस्मिन्नपि ब्राह्मणे जाग्रत्स्वप्नादिपरीक्षा वितानिता। तत्र 'स समानः सन्नुभौ लोकावनुसञ्चरति' (बृ. ४–३–७) इत्यादि विषयवाक्यम्। तत्र भर्तृप्रपञ्चव्याख्या –

> मिथो विलक्षणानामपि चक्षुरादीनां एकदेहस्थत्वेन सालक्षण्यमाप्यस्ति। एवं सालक्षण्येऽपि सत्येव बुद्धेरेव धर्मो विलक्षणोऽस्य भोक्तृत्वम्। तत्र कथं व्यतिरिक्ततोपपद्यते ? – इति शङ्कां निरसितुं वाक्यम्। स एष यदि व्यतिरिक्तो न स्यात्, उभयोरपि लोकयोर्भूतसमुदायाविशेषात्, उभयत्रापि भोग उत्पद्येत। न तु भवतीत्यतोऽवगम्यते अस्ति किञ्चिन् व्यतिरिक्तं यद्भावाद् भवति, यदभावाच्च भवतीति ॥ वा. ४–३–४२४ प्रभृति ४२९ पर्यन्तम्, पा. १४५०, १४५१.

तदेतदनुमोदितं वार्तिके ॥

(७) 'तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने' (बृ. ४-३-९) इत्यादिवाक्यस्य भर्तृप्रपञ्चोक्तः संबन्धः –

'कतम आत्मेति, योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः' (बृ. ४-३-७), 'स समानः सन्' (४-३-७), 'स वा अयं पुरुषो.... म्रियमाण पाप्मनो विजहाति' (बृ. ४-३-८) इति च तान्येतानि त्रीणि वस्तून्युपन्यस्तानि। एतेषां निर्णयः स्वप्नदृष्टान्तेन वाच्यः॥ वा-पा. १५३१.

वार्तिके नैतत्तिरस्कृतम्; टीकायां चोक्तम् उक्तं 'संबन्धमनुजानाति' इति॥ आ. गि. वा. ८३४, पा. १५३२.

(८) स यत्तत्र किञ्चित् पश्यत्यनन्वागतस्तेन भवति ह्यसङ्गो ह्ययं पुरुषः॥ (बृ. ४-३-१६) इत्यत्र अनन्वागतत्वम् असङ्गत्वं च कीदृशम्? – इत्यत्र भर्तृप्रपञ्चाः –

अनन्वागतवाक्येन कर्मविवेकः कृतः, असङ्गवाक्येन कामनिर्मोक उच्यते। ननु जागरितदेशेऽप्युपचयापचये न क्रियैव हेतुः, किं तर्हि कामो हेतुः। स चास्योपचयमूलम् अनुच्छिन्नः कामः स्वप्ने; तस्माद्भवितव्यमुपचयेन स्वप्नेऽपि। न। यं काममासङ्गम् उपचयमूलं वृत्तिरूपं पश्यसि, तेन विमुक्तश्चायमस्मिन् काले। मनसः स्वप्ने ग्रस्तत्वात्, वासनामात्रशेषत्वात्। शरीरसंबन्धिनश्च कामा मृत्यो रूपाणि, प्रविभक्तश्चायं शरीरेण भवति। यथैव रथादीनाम् असतां निर्माणं बाह्यानाम्, तथा शरीरेन्द्रियाणां चाऽऽन्तराणाम्; यथैव सर्वस्यासतो विनिर्माणम्, असतो दर्शनम् – एवमासङ्गस्यापि शरीरेन्द्रियपक्षभूतस्य असतो दर्शनम्। अतो निरासङ्गः शुद्धोऽयं पुरुषः। भावना हि कर्मगुण एव सती पुरुषं भावयति। यथा पुष्पगन्धः पुटं भावयति, स पुष्पगुण एव न पुटगुणः, एवं भावना कर्मगुण एव नात्मगुणः। भावनानुरञ्जिते विज्ञानात्मविज्ञाने कर्तृत्वोपचारः। तामेवानुरञ्जनां कर्तृत्वेनाङ्गीकुरुते कर्म उत्पत्तिभोगकालयोः। कर्मणोऽप्यत्यन्तं प्रयोगाश्रितत्वाद् बुद्ध्यादिसंनिकर्षपक्षतैव न कदाचनात्मगुणता। बुद्ध्यादिक्षयेऽपि कर्मप्रयोगापेक्षमेवास्ते स्वात्मलाभाय, नात्मानमपेक्षते। तस्मात् अयमेकस्मिन् स्वप्ने कर्मगुणस्यैवासङ्गस्य कर्मस्थस्य द्रष्टा प्रविविक्त आत्मा निरासङ्गः। यस्माच्चासङ्गः, अतो न कर्मोपचयः स्वप्ने इति॥ (वा. १०१५-१०४२, पा. १५६३-१५६४

इदमपि व्याख्यानमनिराकृतत्वादङ्गीकृतमिति भाति । पुष्पगन्धवत् अन्यगुणस्य अन्यजातीयवस्तुभावयितृत्वं परम् एवं निराकृतमन्यत्र –

पुष्पादिवासनानां हि वस्त्रादिष्वेव संगतिः ।
सजातीयेषु नियता दृश्यते नान्यजातिषु ॥
द्रव्येऽपि न खलु व्योम्नि वासना काचिदीक्ष्यते ।
अद्रव्ये चासजातीये चैतन्ये वासना कुतः ॥
वासनाकारतां गच्छेच्चैतन्यं चेत् कपालवत् ।
वासनानिःफलत्वं स्याच्चैतन्यादपृथक्स्थितेः ॥
न हि श्रोत्रोत्थविज्ञानं रूपवासनयाञ्च्यते ।
विषयत्वाविशेषेऽपि कुतोऽसङ्गत्वतश्चितेः ॥

बृ. वा. २-३-१०५ प्रभृति १०८ पर्यन्तम् , पा. १०१०.

(९) 'तद्यथा महामत्स्य उभे कूले अनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥' इत्यारभ्य 'तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपम् । तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् ॥ (बृ. ४-३-१८ ....४-३-२१) इत्यन्तवाक्यस्य भर्तृप्रपञ्चोक्तः संबन्धः –

अस्य हि पुरुषस्य बाह्यं कर्म बुद्ध्यादिप्रयोगाश्रितम् । ततः कर्मणो भावना समेत्यैवम् आस्कन्दति । तयोर्विवेको व्याख्यातः । अविद्या पुनः स्वविज्ञानाश्रयैव ; तदेव विज्ञानं विकृत्य विपरीतग्रहाय प्रकल्पयति । स विज्ञानविशेषो बुद्ध्यादिपरंपरया स्थूलीभूतो बाह्यः प्रकाशो व्यवहाराय कल्पते । य आसङ्गकृतः संसर्गः, तेन विवेको व्याख्यातः । यस्त्वविद्याकृतः संसर्गः, तेन विवेको व्याख्यातव्यः । आसङ्गस्तु विषयेन्द्रियद्वारेण बहिष्ठः समागम्य आत्मानमनुप्रविशति । तमेवानुसृत्य विज्ञानं निर्गम्य बाह्यतो व्यवतिष्ठते । अविद्याद्वारा तस्यात्मसंबन्धः, तत्रानर्थाधायकत्वं च ।

तस्मान्निरासङ्गस्याविद्यारहितस्य मुक्तिः ; रोगादिसंगत्यभावे स्वास्थ्यवत् । अतोऽविद्याप्रविवेकार्थमेतावदुक्तम् । सुषुप्तौ ह्यविद्याकामकर्मविनिर्मुक्तः स्वस्थो लक्ष्यते ॥ वा. पा. १५७३–१५७५.

तदेतन्मतमेवं निराकृतं वार्तिके – आत्मातिरिक्तं यदि नास्त्येवेत्यभ्युपगम्यते, तर्हि विषयेन्द्रियादि नास्त्येवाविद्याव्यतिरिक्तमिति सिध्यति। अत आसङ्गो विषयेन्द्रियद्वारा आगच्छतीति कल्पना अयुक्ता। न चाविद्या तमानयेत्, मिथ्याज्ञानमात्रं हि तत्कार्यं नान्यत्। न चाविद्या आत्मसंश्रितेति युक्तिमत्। अविद्याप्रसिद्ध्यैव हि सा आत्मनीष्यते । अतो न स्वतो नापि परत अविद्या प्रत्यगात्मन्याश्रयितव्या । आत्मन्यशेषविकारप्रतिषेधश्रुतेः, आत्मविज्ञानं विकृत्याविद्या विपरीतज्ञानं प्रकल्पतीत्यपि न युक्तम् । अतोऽविचारितसिद्ध्यैवाविद्या चिदाभासव्याप्ता – इति स्वीकार्यम् (वा. ४–३–११०५ प्रभृति ११११ पर्यन्तम्, पा. १५७६–१५७७) ॥

(१०) महामत्स्यदृष्टान्तस्तु भर्तृप्रपञ्चैरेवं व्याख्यातः –

यथैव बाह्यचक्षुषः प्रकाशार्थयोः संसर्गाद् विशेषप्रकाशनाभिव्यक्तिः, एवं बुद्धीन्द्रियसंसर्गादुपलब्धिविज्ञानाभिव्यक्तिः ; तस्माद् व्यतिरिक्तविज्ञातृविज्ञाने न किञ्चित् प्रयोजनमिति चेत्, यदि व्यतिरिक्तो विज्ञाता न स्यात् तेन स्वप्नकाले भौतिकस्यैव ज्योतिषोऽविशेषारम्भे सति स्वप्नबुद्धान्तयोर्भूतमात्राणामविशेषेण विद्यमानत्वाद् यौगपद्येनोभयत्रोपलब्धिः स्यात्, न तु भवति । अत उभयोरप्यनयोः कुलाययोः स्वप्नबुद्धान्तयोरन्यो व्यतिरिक्तः परिद्रष्टा । ननु चात्मनोऽपि व्यापित्वे स्वप्नबुद्धान्तयोः सांनिध्याद् यौगपद्येनोपलब्धिविज्ञानेन भवितव्यम् । अतो देवताहेतुक एवास्तु क्रमः । तासां चाधिष्ठात्रीणां पर्यायेण वृत्तिरुपपद्यत इति । तदपि न । यतो देवताया विभुत्वात् प्रयत्नकार्येषु यौगपद्यं न तु विज्ञानात्मनः । अधिष्ठेयेन्द्रियाणां स्वप्नभूमावसंभवाच्च । धर्माद्यपेक्षया स्वात्मनस्तत्संभवः । अनेन भोक्तृत्वप्रयुक्तत्वेन हेतुना प्रयत्नायौगपद्येन व्यतिरिक्तद्रष्टृग्रहणसिद्धिः। तस्य हि स्वप्नान्तबुद्धान्तयोर्व्यापित्वेऽपि, योऽसौ द्रष्टृत्वेन कर्तृत्वं प्रति यत्नः, न स यौगपद्येन संभवति ; तस्मात् तस्य पर्यायेण द्रष्टृत्वे

प्रवृत्तिरित्यवस्थितं भवति । तदेवम् उपलब्ध्ययौगपद्यम् आत्मास्तित्वे लिङ्गम् । न हि देवतानां स्वप्नकाले स्वव्यापारः, ता उच्चिक्रमिषोर्लोकान्तरं प्रति विशेषकार्याण्याध्यात्मिकानि हित्वा स्वानि स्थानानि प्रतिपद्यन्ते । 'अग्निं वागप्येति' (बृ. ३-२-१३) इत्यादिश्रुतेः । तथा स्वप्नकार्यं प्रतिपिप्सोर्देवता अपक्रान्ता भवन्ति । न हि देवता कदाचिल्लिङ्गं जहाति ; सा त्वनभिव्यक्ते लिङ्गे नालं विशेषकार्याय । उभयोः कालयोर्व्यतिरेकात् व्यतिरिक्तो द्रष्टा ; न भौतिकं दर्शनम् , नापि देवताकृतम् ॥ वा. पा. १५७८-१५८३.

अत्र भौतिकदर्शननिराकरणं न प्रत्युक्तं वार्तिके । देवतायास्तु भूतेभ्यो व्यतिरिक्तत्वेऽव्यतिरिक्तत्वे वा पृथङ्निराकरणं व्यर्थमित्युक्तम् (वा. ४-३-११४७) । टीकायामप्युक्तम् 'महामत्स्यवाक्यस्य भर्तृप्रपञ्च-व्याख्या उक्ता । तत्र देहात्मवाद्यपोहार्थं तत्प्रवृत्तिमङ्गीकृत्य देवताया ज्ञानक्रमहेतुत्वमाशङ्क्य निराकरणमुक्तमित्याह' (आ. गि. वा. पा. १५८३) इति ॥

(११) सुषुप्तप्रवेशमात्मनो दर्शयन्ती श्रुतिर्दृष्टान्तमाह –

तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ सल्लीयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति (बृ. ४-३-१९) इति ॥

तत्र भर्तृप्रपञ्चभूमिका –

अस्य हि द्वैतविषये विशेषविज्ञानम् आदित्यरश्मिवद् विकीर्णं जागरित-देशवत् समन्तादवभासते । तत्र कामः कर्मणः फलम् , कर्मण एव तु वासना । यथालक्षणयैव भावनया तत्कर्म कृतम् , तथालक्षणमेव फलं तस्य विज्ञानात्मनः । सा भावना तदेव स्वप्रयुक्तं फलं प्रत्येकीभूता भवति । तदनुरञ्जितो विज्ञानात्मा कामं कामयत इत्येतद् भवति । तत्र कामतः स्वप्ननिर्माणं सुखदुःखं दर्शयति । विज्ञानं पुनर्भावनापरिच्छेदविनिर्मातृ ; विज्ञानानुविधायिनी हि कर्मणो विक्रिया । विज्ञानमप्येतद् विपरीतदर्शन-मविद्या । सापि सति द्रष्टव्ये विपरीतं ग्राहयेत् । स एष बाह्यो विज्ञानात्मन इत्युक्तम् । तत्र प्रयोक्तो भावना, कर्म विकर्तृ । एवं कामकर्मभावनाविज्ञानानां

परस्परापेक्षत्वादेकार्थता । तत्र भावनया कामयते (अ ?)विद्यया पश्यति द्वैतविषयम् । अद्वैतविषये पुनः सुषुप्तिस्थाने बाह्यस्य प्रयोज्यस्याभावात् कर्म निस्पन्दमास्ते ; विज्ञानात्मगतापि भावना कार्याभावाच्छाम्यति । विद्यापि विपरीतस्य प्रविभक्तस्य ग्राहयितव्यस्याभावान्न विशेषविज्ञानाय कल्पते, दग्धेन्धनवह्निवत् । एवं कृत्वा श्रुतिराह 'न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति' इति कामकर्मादिनिर्मुक्तरूपमात्मनो वक्तुम् ॥ वा. पा. १५९०-१५९३.

अत्र वार्तिके खण्डनं न कण्ठरवेणोक्तम्, 'इदं व्याख्यानं युक्तमयुक्तं वेति पक्षपातरहितैः स्वयमेव विचार्यताम्' (वा. ४-३-१२०३, १२०४) – इत्येतावदुक्तम् । टीकाकारेण तु लिखितम् 'जाग्रत्स्वप्नयोर्द्वैतविषयत्वम्, सुषुप्तस्याद्वैतविषयत्वम् – इति विभागोऽयुक्तः । अवस्थात्रयस्य वस्तुत्वे अवस्तुत्वे वा तदयोगात् ; आद्ये द्वैतस्यैव भावात्, द्वितीये अद्वैतस्यैव सत्त्वात्, समस्तव्यस्तताया निरस्तत्वादिति भावः' इति ॥ (आ. गि. वा. पा. १५९३).

(१२) सुषुप्ते दृष्ट्याद्यभावमुपपादयन्ती श्रुतिः –

'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' (बृ. ४-३-२३) इत्याद्या ॥

अस्य भर्तृप्रपञ्चव्याख्यानं वार्तिककारकृततद्दूषणं च प्रागेव (खं. ८१) संगृहीतमिति तत एवावगन्तव्यम् । तत्र संबन्धोक्तिस्त्वित्थं वर्तते –

अशोकान्तरम् (बृ. भा.) इत्युक्तम् । तदेवास्मिन् काले स्वेनात्मना ज्योतिर्मात्रेण भवति । आदित्यादिव्यतिरेकेण स्वयंज्योतिष्ट्वम् । ननूक्तं तद्विशेषज्ञानमविद्यापक्षस्यैवेति । तस्मात् 'अहमेवेदं सर्वम्' इत्यपि तथैव स्यात् । न । सर्वोऽस्मीति ज्ञानं विशेषवद्विज्ञानमपि नाविद्यापक्षस्य । नानात्वदर्शनकार्यरूपं हि भयमविद्येत्युक्तम् । अहमेवेदम् सर्वमिति प्रतिपक्षभूता विद्येति च । तदेतदेकत्वदर्शनं मथ्यमानं सदा शुद्धं प्रसन्नं भवति । विशेषदर्शनोत्पत्त्यभावात्तदा आत्मनोऽसंबोधः । स्वेन विशेषविज्ञानात्मना

देदीप्यमानो भवति । विज्ञाने सति कथमसंबोध इति चेत्, अनाशङ्क्यैवा । परिष्वक्तदृष्टान्तेन प्रत्युक्तत्वात् । ननु विषमो दृष्टान्तः । तत्र हि विद्यमानेषु विशेषज्ञानकार्येषु अप्रविभक्तो भवति; एवमसंबोधस्तत्र । इह तु न तदस्तित्वम् । अतः सति ज्ञाने कथमसंबोध इति ? अतस्तम एवैतद्रूपं स्यान्न ज्योतिरिति । नैवम् । ज्योतीरूपत्वस्य महता प्रयत्नेन विभावितत्वात्, स्थितत्वाच्च सिद्धान्तस्य । सुप्तोत्थितस्य स एवाहमिति प्रत्यभिज्ञानात् । तस्मादस्यान्न स्यात्, नैव ज्योतिषावस्थानमिति ॥ वा. पा. १६२५–१६२९.

अत्र वार्तिकखण्डनं न दृश्यते । अतोऽत्रानिष्टांशः प्रागुदाहृत (खं. ८१) व्याख्यानविमर्शत ऐवोह्यः । टीकायां चोक्तम् – 'परेष्वसंबन्ध उक्तः । तत्रानिष्टमंशमग्रे निरसिष्यति' (आ. गि. वा. १४०८, पा. १६२९) ॥

मोक्षविचारः–

८४. विश्वतैजसप्राज्ञतुरीयात्मनां पूर्वपूर्वस्योत्तरस्मिन्नुत्तरस्मिन् प्रविलयं कृत्वा 'स एष नेति नेत्यात्मा' इत्यादिप्रकारेण तुरीयमुपदिश्य 'अभयं वै जनक प्राप्तोऽसि' इत्युक्तं याज्ञवल्क्येन । ततो जनकोऽपि प्रत्युवाच 'अभयं त्वा गच्छताद् याज्ञवल्क्य' इति (बृ. ४–२–४) । अत्र शङ्का भवति स्वयं प्राप्ताभय एव गुरुः; कथमेवमाशीस्तं प्रतीर्यत इति ? तत्र भर्तृप्रपञ्चानां परिहारः –

प्राप्तमभयं याज्ञवल्क्येन नाप्राप्तम्, न तु साक्षात्कृतम् । अत एव-मुच्यते । अथवा द्विविधो मोक्षः, अस्मिन्नेव शरीरे साक्षात्कृतब्रह्म मुक्तः इत्युच्यते न ब्रह्मणि लीनः । तस्य शरीरपातोत्तरकाले ब्रह्मणि लयो द्वितीयो मोक्षः । स त्वाशास्तितव्यः ॥ वा. पा. १३७५.

अस्य वार्तिके खण्डनमित्थं कृतम् – आत्मज्ञानमात्रमुक्त्वा 'अभयं प्राप्तोऽसि' इति याज्ञवल्क्येनोक्तत्वान्न ततोऽन्यः साक्षात्कारः लयो वा अपेक्ष्यत इति गम्यते । न चाब्रह्मनिष्ठस्य गुरुत्वं समस्ति नापि 'अभयं त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे' इति युक्तं राज्ञो वचनं गुरोः शाब्दमात्रपरिज्ञाने कल्प्यमाने । नापि साक्षात्कृततत्त्वस्य

ब्रह्मणि लयं प्रत्याकाङ्क्षा काचिदस्ति, येनेत्थमाशीः संप्रयुज्येत । तस्मान्नेदं सम्यग्व्याख्यानमिति ॥ वा. ४-२-१०४ आरभ्य १०८.

एतेन जीवन्मुक्तिविदेहमुक्तिलक्षणमुक्तिद्वयं भर्तृप्रपञ्चसंमतं न वार्तिकाभिमतमिति गम्यते । जीवन्मुक्तिरेव मुख्यो मोक्ष इति यथा वार्तिककाराणां तथाऽऽचार्याणां भगवत्पादानामपीत्येतत् पूर्वमेव (खं. ६०) प्रादर्शि ॥

अन्तरालावस्था –

८५. आर्तभागप्रश्ने इदमाम्नातम् –

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति (बृ. ३-२-१२) ॥ याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्तभागावामेवैतस्य वेदिष्यावो न नावेतत्सजन इति । तौ होत्क्रम्य मन्त्रयाञ्चक्राते तौ ह यदूचतुः कर्म हैव तदूचतुरथ यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम (बृ. ३-२-१३) इति च ॥

अस्य त्रयोदशकण्डिकास्थप्रश्नस्यायं भाष्यकृद्दर्शितः संबन्धः –

ग्रहातिग्रहरूपं बन्धनमुक्तं (नवमकण्डिकापर्यन्तम्) **मृत्युरूपम् । तस्य च मृत्योर्मृत्युसद्भावान्मोक्षश्चोपपद्यते** (इति दशमकण्डिकयोक्तम्) । **स च मोक्षो ग्रहातिग्रहरूपाणाम् इहैव प्रलयं प्रदीपनिर्वाणवत्** (इत्येकादश-

द्वादशाभ्यामुक्तम्)। यत् तद् ग्रहातिग्रहाख्यं बन्धनं मृत्युरूपं, तस्य यत् प्रयोजकम्, तत्स्वरूपनिर्धारणार्थम् इदमारभ्यते 'याज्ञवल्क्येति होवाच' (बृ. ३-२-१३, पा. ७९६) ॥

भर्तृप्रपञ्चसंमतसंबन्धस्तु भाष्यकृद्भिरेवम् अनूदितः –

अत्र केचिद् वर्णयन्ति। ग्रहातिग्रहस्य सप्रयोजकस्य विनाशेऽपि किल न मुच्यते। नामावशिष्टोऽविद्यया ऊपरस्थानीययाऽ स्वात्मप्रभवया परमात्मनः परिच्छिन्नो भोज्याच्च जगतो व्यावृत्तः उच्छिन्नकामकर्मा अन्तराले व्यवतिष्ठते। तस्य परमात्मैकत्वदर्शनेन द्वैतदर्शनम् अपनेतव्यमित्यतः परं परमात्मदर्शनमारब्धव्यम् – इत्येवम् अपवर्गाख्याम् अन्तरालावस्थां परिकल्प्योत्तरग्रन्थसंबन्धं कुर्वन्ति' (बृ. भा. पा. ७९६) ॥

तत्र भर्तृप्रपञ्चवाक्यानि टीकोपात्तानीह संगृह्यन्ते –

'द्वैतदर्शनेन कृत्स्नद्वैतकार्यमुच्छिन्नम्, न भूतमात्रोपादाने बीजम्। तेनैवापावृत्तः पुरुषः कृतार्थः शास्त्रात्, नेदानीम् अद्वैतदर्शने प्रयोजनमस्ति' इत्याशङ्क्य परिहार उच्यते 'द्वैतदर्शनेन आसङ्गकार्यमुच्छिन्नम्, आसङ्ग उपादानं भूतानाम्। स एष कामपक्ष उच्छिन्नः। कामश्च कर्मपक्षस्यैव। विज्ञानात्मनः किमवशिष्यते? विज्ञानम् (अविद्यैव) अवशिष्यते। अविद्याकर्मणोरारम्भेऽप्यन्तं हि कर्म विकर्त्रैव केवलमाकारपरिणामावस्था-विशेषेषु; विज्ञानं परिच्छेत्तृ। सैषा अविद्या परिच्छेदकं विज्ञानम्। यस्मात् परिच्छिन्नः परमात्मनः पृथग्भूत आस्ते स एष संसारविषयस्य एव द्वैतात्मा। अस्य ब्रह्मणि लयः कर्तव्यः। 'तस्य प्रलयः कर्तव्य' इत्यनव-सितार्थमेव वाक्यं प्रवर्तते आप्रलयात् – इत्येकवाक्यता द्वैताद्वैतार्थ-वाक्ययोः। अविद्योच्छेदे हि परिच्छेदकं स्यान्निवृत्तम्, न तु कर्मणो विकर्तृत्वम् आसङ्गश्च। ते आसङ्गकर्मणी अनिवृत्ते पुनर्विज्ञानं प्रयुञ्जीयाताम्, तेषां परस्परेणाविनिर्भागवृत्तित्वात्। न चाशुद्धे द्वैतार्थे, अद्वैतदर्शनं शक्यम् ॥ वा. पा. ११५५-११५८.

तत्र द्वैतक्षयोक्तिस्तावत् श्रुतिविरुद्धा स्वव्याख्यानविरुद्धा च 'पुरुषो वा अक्षितिः .... यद्द्वैतन्न कुर्यात् क्षीयेत ह' (बृ. १-५-२)। 'असाद्धयेवात्मनो यद्यत्कामयते तत्तत्सृजते' (बृ. १-४-१५) इत्यादि-वाक्यैर्हि द्वैताक्षयो बोध्यते। 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृ. १-४-७)

इति व्याकृताव्याकृतसामानाधिकरण्यश्रुतेरपि द्वैताक्षयो ज्ञाप्यते । तस्मान्न सूत्रप्राप्त्या कामकर्मोच्छित्तिराद्यसमुच्चयबलात् । अव्याकृतरूपास्तिस्तु सुषुप्तेऽप्यस्तीति न तन्मात्रेण पुरुषार्थता ॥

अज्ञानमन्यथाज्ञानं वा अविद्या ? उभयथापि न तस्याः परिच्छेत्तृत्वम् । अज्ञानस्याच्छादनत्वात्, मिथ्यारूपस्य नीलज्ञानादेर्व्योमादिपरिच्छेदादर्शनाच्च । 'क्षितेरूपरवदविद्या परस्मात् स्वतो जायते ; कामकर्मणी तु सवासने पूर्वपूर्वकामादिवशादुत्तरोत्तरे प्रतीच्युत्पद्येते, नाविद्याकृते' इति भर्तृप्रपञ्चैरेवोच्यते । तस्मान्नाविद्या जगदुपादानम् ॥

न च नष्टामविद्यां कामकर्मणी पुनर्विज्ञानं प्रयुञ्जीयाताम् – इति सम्यक् । तदकारणत्वात् । कारणत्वेऽपि न नष्टां कर्तुमलम् । न हि सुवृष्ट्यापि भूमिं विना आकाशात् पद्मिनीजन्मास्तीति । ब्रह्मैव चेदविद्योपादानम्, तस्मिन् सति तस्याः समुच्छित्तिः कथं भवेत् ? तस्मिन् सत्येव नश्वरी चेदविद्या न साधनैः प्रयोजनं स्यात् । यदि विद्यमानां रक्षितुमपि कामकर्मणी न प्रभवतः, ततो विनष्टामुत्पादयितुं कथं शक्नुयाताम् ?

कामकर्मनाशेऽप्यविद्या अवशिष्यत इत्येतत् भर्तृप्रपञ्चानां नेति नेति वाक्यव्याख्याविरुद्धमपि । प्रथमनेतिशब्दो मूर्तामूर्तनिषेद्धा, द्वितीयस्तु भावनाप्रतिषेद्धा । भावनादिसर्वविशेषशान्तौ यदवशिष्यते तत्परं ब्रह्म निष्कलं 'नेति नेति' इत्युपदिश्यत–इति हि ते व्याचख्युः ॥

नेतिवाक्यज्ञानेऽपि ब्रह्मणि नापैत्यविद्या – इति कथमविरुद्धं स्याद्वचः ? 'अविशुद्धे द्वैतार्थे अद्वैतदर्शनं न शक्यम्' इत्यत्र च कीदृशी विशुद्धिर्द्वैतस्य विवक्षितेति ; किमद्वैतानभिसंबन्धः, नाशो वेति वक्तव्यम् । एकं वस्तु समस्तव्यस्तात्मकमिति भर्तृप्रपञ्चमते न तावदनभिसंबन्धः शक्यो वक्तुम्, द्वैतनाशे तु नैव स्यात् समस्तव्यस्तदर्शनमिति सिद्धान्तहानिः स्यात् ॥

समस्तव्यस्तैव तावदेकत्र नोपपद्यते, शीतोष्णयोरिव परस्परविरोधात्तयोः। 'अपूर्वमनपरम्' (बृ. २–५–१९) इत्यादिश्रुतिविरोधाच्च। आत्मनि विज्ञाते सर्वं विज्ञातं भवतीति श्रुतिरप्रमाणं च स्याद् यदि समस्तदर्शनेनैव व्यस्तदर्शनमपि न समवाप्येत। न च समस्तदर्शने जाते किञ्चिदप्यवशिष्यते ज्ञातव्यम्, रज्जौ ज्ञातायां सर्पादिविकल्पानवशेषवत्। न च सर्वान् द्वैतभेदान् द्रष्टुं कोऽपि शक्नुयात्, दृष्टेष्वपि भेदेषु ब्रह्मण आनन्त्यं न घटेत। आत्मानात्मदृष्टी हि परस्परं विरुध्येते। 'पराञ्चि खानि' (का. २-१-१) इत्यादिश्रुतेः – इत्यादियुक्त्युपन्यासेन विस्तरेण भर्तृप्रपञ्चमतं वार्तिके प्रत्याख्यातम् ॥ वा. ३–२–६३ प्रभृति १२० पर्यन्तम्।

भाष्ये (बृ. भा. ३–२–१२) त्वेवमधिकं दृश्यते खण्डनम् –

तत्र वक्तव्यं विशीर्णेषु करणेषु विदेहस्य परमात्मदर्शनश्रवणमननिदिध्यासनानि कथम् इति ? समवनीतप्राणस्य हि नाममात्रावशिष्टस्य (अधिकारो विद्यायाम्) इति हि तैरुच्यते। 'मृतः शेते' (बृ. ३–२–११) इति ह्युक्तम्। न मनोरथेनाप्येतदुपपादयितुं शक्यते। अथ जीवन्नेवाविद्यामात्रावशिष्टो भोज्यादपावृत्तः – इति परिकल्प्यते, तत्तु किञ्चिन्मित्तम् ? – इति वक्तव्यम्। समस्तद्वैतैकत्वात्मप्राप्तिनिमित्तमिति यद्युच्येत, तत्पूर्वमेव निराकृतम्। कर्मसहितेन द्वैतैकत्वात्मदर्शनेन संपन्नो विद्वान् मृतः समवनीतप्राणो जगदात्मत्वं हिरण्यगर्भस्वरूपं वा प्राप्नुयात्, असमवनीतप्राणो भोज्याज्जीवन्नेव वा व्यावृत्तो विरक्तः परमात्मदर्शनाभिमुखः स्यात्। न चोभयम् एकप्रयत्ननिष्पाद्येन साधनेन लभ्यम्। हिरण्यगर्भप्राप्तिसाधनं चेत्, न ततो व्यावृत्तिसाधनम्; परमात्माभिमुखीकरणस्य भोज्याद् व्यावृत्तेः साधनं चेत् न हिरण्यगर्भप्राप्तिसाधनम्। न हि यद् गतिसाधनं तद् गतिनिवृत्तेरपि। अथ मृत्वा हिरण्यगर्भं प्राप्य ततः समवनीतप्राणो नामावशिष्टः परमात्मज्ञानेऽधिक्रियते, ततोऽस्मदाद्यर्थं परमात्मज्ञानोपदेशोऽनर्थकः स्यात्। सर्वेषां हि ब्रह्मविद्या पुरुषार्थायोपदिश्यते 'तद् यो यो देवानाम्' (बृ. १–४–१०) इत्याद्यया श्रुत्या। तस्मादत्यन्तनिकृष्टा शास्त्रबाह्येयं कल्पना ॥ बृ. भा. पा. ७९६.

श्रवणमनननिदिध्यासनानि –

८६. यथैव ब्रह्मस्वरूपविषये द्वैताद्वैतवादमास्थिताः, तथैव मुक्तिसाधनविषयेऽपि शङ्करभगवत्पादसंप्रदायतो भिन्नामेव सरणिम् अनुसृतवन्तो भर्तृप्रपञ्चाः ॥

तद्यथा–'**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि**' (बृ. २–४–५) इत्यत्र दर्शनप्रकारा उक्ताः। तत्र श्रोतव्यः आचार्यागमाभ्याम्, मन्तव्यस्तर्कतः। तत्र च तर्क उक्तः 'आत्मैवेदं सर्वम्' इति प्रतिज्ञातस्य हेतुवचनात्मैकसामान्यत्वम्, आत्मैकोद्भवत्वम्, आत्मैकप्रलयत्वं च। तत्रायं हेतुरसिद्ध इत्याशङ्क्यते आत्मैकसामान्योद्भवप्रलयाख्यः। तदाशङ्कानिवृत्त्यर्थं मधुब्राह्मणम् (बृ. भा. ७६९) – इति भाष्यकारीयः संबन्धः; प्रतिज्ञातस्य हेतुमुक्त्वा निगमनार्थम् – इति वा (पा. ७७०) ॥

भर्तृप्रपञ्चैस्तु व्याख्यातम् –

'आ दुन्दुभिदृष्टान्तात् श्रोतव्यार्थमागमवचनम्, प्राङ्मधुब्राह्मणात् मन्तव्यार्थमुपपत्तिप्रदर्शनेन, मधुब्राह्मणेन तु निदिध्यासनविधिरुच्यते' इति ॥ बृ. भा. २–५, पा. ७७०.

तदेतदनूद्य भाष्यकारैरुक्तम् –

'सर्वथापि तु यथा आगमेनावधारितम्, तर्कतस्तथैव मन्तव्यम्। यथा तर्कतो मतम्, तस्य तर्कागमाभ्यां निश्चितस्य तथैव निदिध्यासनं क्रियत इति पृथङ्निदिध्यासनविधिरनर्थक एव। तस्मात् पृथक्प्रकरणविभागोऽनर्थक इत्यस्मदभिप्रायः श्रवणमनननिदिध्यासनानाम् इति ॥' बृ. भा. पा. ७७०.

अत्र विधिमात्रं वार्यते भाष्ये न तु श्रवणमनननिदिध्यासनोपदेशविभाग इति भाति। अन्यथा श्रीगौडपादाचार्यैरागमप्रकरणे श्रुत्यर्थं व्याख्याय, वैतथ्यप्रकरणे तर्कतो द्वैतमिथ्यात्वमुपपाद्य, अद्वैते पुनरपि आत्मसत्यानुबोधेनैवोत्तमाधिकारिणाम् अमनस्तासिद्धिमुक्त्वा, तदनु हीन-

मध्यमदृष्टीनां तदर्थमेव मनोनिग्रहो विभक्त उपदिष्टो व्यर्थ इत्यपि शङ्क्येत। इहापि मधुकाण्डे आगमप्राधान्येनोक्तस्य पुनरप्युपपत्तिप्रधानमुनिकाण्डेन प्रतिपादनम्, तस्यैवोपासनाप्रणाड्या परमफलत्वेनोपन्यासश्चेत्येषोऽपि विभागो व्यर्थ एवेति शङ्क्येत। तस्मात्, भर्तृप्रपञ्चोक्तनिदिध्यासनविधिनिरास एवायं भाष्यकृतामित्युत्पश्यामः। निदिध्यासनं चैतद् अस्यां कण्डिकायां विहितमित्यभिनिवेशः स्याद् वृत्तिकाराणामित्यप्युन्नीयते॥

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः॥ बृ. २-५-१५.

अस्याः कण्डिकाया भर्तृप्रपञ्चव्याख्यानमित्थं वार्तिके संगृहीतम् –

स्वमात्मानम् अक्षरे परमात्मन्येकीकृत्य, तं चात्मानं चक्रनाभिस्थानीयं देवतादि जगत् सर्वमरवत् तत्रार्पितं कल्पयित्वा तद्भावभावितो निदिध्यासेत्। तस्यैवं सततं ध्यायमानस्य तप्तलोहवत्तस्मिन्नेकत्वं पुनरावृत्तिरहितमाप्यते। ध्यातृत्ववर्जितं ध्येयत्वं चाधिगम्यते। यद्यप्येतद् ब्रह्मचक्रं सर्वप्राणिष्वपि संस्थितम्, तथापि तदसंबोधात्तैर्न तदनुभूयते॥

वा. २-५-६८ प्रभृति ७३; पा. ११२३, ११२४.

नैतद् युक्तं व्याख्यानम्। यश्चार्थादर्थो न स चोदनार्थः–इति न्यायविरोधात्। दृष्टान्तबलाद्धि सर्वमिदं कल्प्यते। न तु यथोक्तं चक्रकल्पनमत्र श्रुत्यक्षरगम्यं, नापि 'निदिध्यासेत्' इत्येवं विधिः कुत्राप्यस्मिन् ब्राह्मणे श्रुतोऽस्ति। नाभिनेमिदृष्टान्तेन सर्वमात्मनि समर्पितम्-इत्येतावन्मात्रं श्रुतम्। एवं च श्रुतहानं अश्रुतकल्पनं च स्याद् विधिं कल्पयताम्। किञ्च "तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्" (बृ. २-५-१९) इत्यत्रैव ब्राह्मणे आत्मनि बहिरन्तर्विभागः कार्यकारणभावश्च निवार्यते। "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति

न स वेद" (बृ. १-४-१०) इति भेददृष्टिरपोद्यते ; 'नेदं यदिदमुपासते' (के. १-५) इति चोपासिक्रियाविषयत्वं ब्रह्मणो निषिध्यते। 'दृश्यते त्वग्र्यया बुद्ध्या' (का. १-३-१२) इति त्वात्मविद्याविधानं नोपासनाविधानम्, शुद्धचित्तेन विज्ञेयं ब्रह्मेत्यर्थकत्वात् ; अथवा अनात्मसंबन्धात् प्रागेवात्मबुद्धिः स्थिता- इत्यर्थोऽस्य वाक्यस्य। तस्मात् चक्रकल्पनं समस्तव्यस्तादिप्रतिज्ञार्थसिद्ध्यर्थमुक्तमयुक्तमिति वार्तिके खण्डितमिदम् ॥ वा. २-५-७४ प्रभृति ८९ पर्यन्तम् ॥

[एतेन निदिध्यासनं नाम काचिदुपासना भर्तृप्रपञ्चमते इत्यवगम्यते। भाष्यकारमते निदिध्यासनलक्षणं प्राक् (खं ५६) कथितम्। वार्तिककारमतं तु स्वावसरे वक्ष्यते ॥]

ज्ञानकर्मसमुच्चयवादः –

८७. भर्तृप्रपञ्चा ज्ञानशब्दस्योपासनाशब्दार्थत्वम् अङ्गीकुर्वाणा ज्ञानकर्मसमुच्चयं मोक्षसाधनं मन्यन्ते, यथैवान्ये ज्ञानविधिवादिनः। अत एव तत्र तत्र कर्मणो मोक्षसाधनत्वं तैरुक्तं भाष्यवार्तिकयोर्निराकृतं दृश्यते। तद्यथा –

(१) तदेतद् ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद् ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्यां हि रूपाभ्यां ब्रह्माभवत्। अथ यो ह वा अस्माल्लोकात् स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाऽननुक्तोऽन्यद्वा कर्माकृतं यदिह वा अप्यनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते अस्माद्ध्येवात्मनो यद्यत् कामयते तत्तद् सृजते ॥ बृ. १-४-१५.

अत्र भर्तृप्रपञ्चानामित्थं ग्रन्थावतरणिका –

न तावत् कर्म मोक्षकारणम् । मोक्षस्यानित्यत्वापत्तेः । न देवताः । ता हि कर्माधिकृताः कर्मस्वेवैनं नियच्छन्ति । न च ताभ्यो व्युत्थायात्मदर्शनमुपपद्यते । आत्मापि त्वसंदृश्यमान आत्मत्वेन नोपतिष्ठते । देवताज्ञाकरत्वेन तु ब्रह्मविद्या विरुध्यते । अतो न समुच्चयतो, नापि विकल्पतो, मुक्तिः । न च ऋणत्रयमनपाकृत्य कर्मत्यागः । तस्मात्, न कर्मणः, न ज्ञानात्, न उभाभ्यां मोक्षः- इति प्राप्ते परा श्रुतिः प्रवृत्ता । ज्ञानकर्मसमुच्चयसाध्या द्वैतैकत्वावस्था । सा द्वैतत्वात् क्षयात्मिका । या त्वविशेषावस्था अनभिव्यक्ता परमात्मावस्थैव सा इत्यविनश्वरी । तत्रैवं सति यो द्वैतावस्थामुपास्ते तस्य लोकः क्षीयत एव । यस्तु तामव्यक्तावस्थामापाद्य उपास्ते तस्यात्मैव कर्म भवति, न हास्य कर्म क्षीयते । एवं कर्माप्यनुष्ठितं स्यात्, ब्रह्माप्युपासितम् । तदेवं सूत्रोपास्तिकर्मसमुच्चय आद्यः, द्वितीयस्तु व्यक्तसूत्रात्मविद्याया अव्यक्तब्रह्मविद्याया समुच्चयः ॥ वा. पा. ७६७–७७०.

अत्र भाष्यकृद्भिरेवं भर्तृप्रपञ्चमतं प्रत्याख्यातम् –

अत्र तु (अग्नौ हुत्वा ब्राह्मणे च दत्वा परमात्मलक्षणं लोकमाप्तुमिच्छन्तीति) परमात्मलोकमग्नौ ब्राह्मणे चेच्छन्ति केचित् । तदसत् । अविद्याधिकारे कर्माधिकारार्थं वर्णविभागस्य प्रस्तुतत्वात्, परेण च (स्वं लोकम् इति) विशेषणात् । ..... विदुषो विद्यासंयोगात् कर्मैव न क्षीयत इत्यपरे । .... भवतीयं शोभना कल्पना, न तु श्रौती । स्वलोकशब्देन प्रकृतस्य परमात्मनोऽभिहितत्वात् । 'स्वं लोकम्' इति प्रस्तुत्य स्वशब्दं विहाय, आत्मशब्दप्रक्षेपेणैव पुनस्तस्यैव प्रतिनिर्देशात् 'आत्मानमेव लोकमुपासीत' इति । तत्र कर्मसमवायिलोककल्पनाया अनवसर एव । परेण च केवलविद्याविषयेण विशेषणात् 'किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः' (बृ. ४-४-२२) इति । पुत्रकर्मापरविद्याकृतेभ्यो हि लोकेभ्यो विशिनष्टि 'अयमात्मा नो लोकः' इति । 'न हास्य केनचन कर्मणा लोको मीयत' (कौ. ३-१), 'एषोऽस्य परमो लोकः' (बृ. ४-३-३२) इति च । तैः सह सविशेषणैरस्यैकवाक्यता युक्ता । इहापि 'स्वं लोकम्' इति विशेषणदर्शनात् ।....यदि हि पर एवात्मा संपद्यते तदा युक्तो 'अस्माद्धयेवात्मनः' इत्यात्मशब्दप्रयोगः, स्वस्मादेव प्रकृतादात्मनो लोकात् – इत्येवमर्थः । अन्यथा हि 'अव्याकृतावस्थात् कर्मणो लोकात्' इति सविशेषणमवक्ष्यत्, प्रकृतपरमात्मलोकव्यावृत्तये, व्याकृता-

वस्थाव्यावृत्तये च । न ह्यस्मिन् प्रकृते विशेषिते अश्रुतान्तरालावस्था प्रतिपत्तुं शक्यते' इति ॥ बृ. भा. पा. ६८४, ६८५, ६८६.

दैवाद् वित्ताद् व्युत्थानम् –

८८. कर्मज्ञानसमुच्चयाङ्गीकारादेव भर्तृप्रपञ्चाः सर्वकर्मसंन्यासं नानुमन्यन्त इति व्यक्तम् । अत एव भाष्ये एवं लिखितं दृश्यते –

(१) केचित्तु ब्रह्मविदोऽप्येषणासंबन्धं कल्पयन्ति । बृ. भा. पा. ७५७.

(२) दैवाद् वित्ताद् व्युत्थानमेव नास्तीति केचित् । यस्मात् तद्बलेन हि किल व्युत्थानमिति ॥ बृ. भा. पा ८१२.

(३) 'व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति वर्तमानापदेशादर्थवादोऽयम् । ..... परिव्राजकधर्मेषु च गुरूपासनस्वाध्यायभोजनाचमनादीनां कर्मणां श्रुतिस्मृतिषु कर्तव्यतया चोदितत्वात्, गुर्वाद्युपासनाङ्गत्वेन यज्ञोपवीतस्य विहितत्वात्, तत्परित्यागो नैवावगन्तुं शक्यते । यद्यप्येषणाभ्यो व्युत्थानं विधीयत एव, तथापि पुत्राद्येषणाभ्यस्तिसृभ्य एव व्युत्थानम् । न तु सर्वस्मात्कर्मणः कर्मसाधनाच्च व्युत्थानम् । सर्वपरित्यागे चाश्रुतं कृतं स्यात्, श्रुतं च यज्ञोपवीतादि हापितं स्यात् । तथा च महानपराधो विहिताकरण-प्रतिषिद्धाचरणनिमित्तः कृतः स्यात् । तस्मात्, यज्ञोपवीतादिलिङ्ग-परित्यागोऽन्धपरम्परैव ॥ बृ. भा. पा. ८१३.

इति चैवमादिस्थलेषु संन्यासविरोधित्वेन परामृष्टा इमे एव वृत्तिकाराः स्युरित्यनुमीयते ॥

(४) 'ये तु प्रत्यवायपरिहारार्थं कर्म कल्पयन्ति ब्रह्मविदोऽपि' (पा. ९१७) ॥

इति च । त्रिदण्डसंन्यासमात्राङ्गीकर्तारश्च एते एव स्युः । यानुद्दिश्य भाष्यकारैर्लिखितम् –

(५) 'यद्धि तदेषणाभ्यो व्युत्थानलक्षणं पारिव्राज्यं तदात्मज्ञानाङ्गम् । आत्मज्ञानविरोध्येषणापरित्यागरूपत्वात् । अविद्याविषयत्वाच्चैषणायाः । तद्व्यतिरेकेण चास्त्याश्रमरूपं पारिव्राज्यं ब्रह्मलोकादिफलप्राप्तिसाधनम्. यद्विषयं यज्ञोपवीतादिसाधनविधानं लिङ्गविधानं च' (बृ. भा. पा. ८१५) ॥

इति ॥

'अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठस्तस्माद् विद्यां प्रशंसन्ति' (बृ. १–५–१६)

–इत्येतत् कण्डिकार्थमवतारयन्तो भर्तृप्रपञ्चा आहुः –

'यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित्' (बृ. १-५-१५) इत्युक्तम् । एवंवित्त्वेनैव प्राजापत्यप्राप्तिश्चेत्, नार्थो पुत्रकर्मभ्यां नापि पाङ्क्तवर्कणा – इति प्राप्ते समुच्चितानि पुत्रवित्तदर्शनानि सर्वात्मभावायेति वक्तुं त्रयो वादेति वचनम् इति सिद्धान्तः । तत्र शङ्का-न तावत् स्वफले मिथो निरपेक्षाणाम् एकत्र समुच्चयः संभवति, तन्तु-वीरणादीनामिव । सापेक्षाणां तु फलहेतुत्वे कर्मैकत्वमेव स्यान्न समुच्चयः । अत एवं समुच्चयायोगाद् विद्ययैव सर्वभावाप्त्या लोकत्रयावाप्तिरिति निश्चीयत इति । तन्न । पृथक्कारणत्वात् । पुत्रादेर्हि पृथक्फलसंबन्धं हि वक्ति । 'सोऽयं मनुष्यलोकः पुत्रेणैव जय्यः' इति हि साधनान्तरं निह्नुत इति । ननु नैवमवधारणं युक्तम् 'ज्योतिषेमं लोकं जयति' (?) इति मनुष्यलोकजये हेत्वन्तरश्रवणात् – इति चेत् । न । विषयविभागात् । न हि पुत्रोत्पादादन्येन मनुष्यलोकजयोऽस्ति । तत् किमिदानीं तत् – ज्योतिषेमं जयतीति वचनं – प्रतिषिध्यते ? न । तत्र मनुष्यलोकप्राप्ति-जयोऽभिप्रेतः, इह तु ततो व्यावृत्तिरिति विशेषः ॥ वा. पा. ८३८–८४०.

एवं चात्र लोकत्रयव्यावृत्तिद्वारेण पुत्रादीनां ज्ञानेन क्रमसमुच्चय –इत्युक्तं भवति । एवं चेत् (१) 'केचित्तु सर्वमेव निवृत्तिकारणं मन्यन्ते । अतः कारणात् पूर्वस्मात्पूर्वस्मान्मृत्योर्मुच्यते उत्तरमुत्तरं प्रतिपद्यमानो व्यावृत्त्यर्थमेव प्रतिपद्यते न तु तादर्थ्यम्–इत्यतः, आ द्वैतक्षयात् सर्वं मृत्युः । द्वैतक्षये तु परमार्थतो मृत्योरातिम् अतिमुच्यते । अतश्च आपे-क्षिकी गौणी मुक्तिरन्तराले' (बृ. ७९१) इत्यनूद्य भाष्ये तिरस्कृतः पक्षः, (२) 'यत्तु कैश्चिदुच्यते विद्यासहितं कर्म निरभिसंधि विषदध्यादिवत् कार्यान्तरमारभते इति' (पा. ७९८) इति चानूद्य परिहृतः समसमुच्चय-वादश्च न भर्तृप्रपञ्चानां संमतः, वृत्त्यन्तराभिमतावेवैतौ पक्षौ–इत्यापद्यते । अत्र तत्त्वं निपुणमतिभिर्ग्रन्थरहस्यान्वेषकैर्विचार्य निश्चेयमस्ति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

भर्तृप्रपञ्चप्रस्थानपरीक्षा नाम पञ्चमः काण्डः

---

६. मण्डनप्रस्थानपरीक्षा

व्याख्यानप्रस्थानपरीक्षावश्यकता –

८८. अथेदानीं शाङ्करभाष्यव्याख्यातृप्रस्थानानि विमृश्यन्ते। ग्रन्थादौ दिङ्मात्रेण दर्शितो व्याख्यानप्रस्थानानां परस्परं भाष्येण च विसंवादः, कथं नाम सर्वत्र प्रक्रियाभेदः स्फुटं विज्ञायेतेति। अत्र नायमभिप्रायोऽस्माकमवसेयो यद् व्याख्यानानि सर्वथा भाष्याशयग्रहणे नैवोपकुर्वन्तीति; यतो भूयांसोऽशा व्याख्यानकर्तृभिः प्रकटीकृताः सन्ति, ये भाष्ये सूचिता अपि स्थूलमतीनां न सुविज्ञेयाः। भाष्येऽविचारितानामपि विषयाणामावापश्च व्याख्यानेषु दृश्यते जिज्ञासुजनमतिवैशद्यकारीति प्रसिद्धमेवैतत्। तथापि यत्र यत्र क्वचिद् व्याख्याने भाष्योपात्तप्रक्रियापथात् प्रच्युतिरिव, विरुद्धप्रक्रियालिङ्गनमिव च प्रतीतिः, यत्र यत्र वा व्याख्यानप्रस्थानेषु परस्पराभ्युपगतविरुद्ध एवाभ्युपगम इति प्रतीतिः, तत्र तत्र व्यक्तम्, विमृश्यैव तत्तद्ग्रन्थसंदर्भम् एकवाक्यता तदभावो वा निर्धारणीय इति। विद्यन्ते चैतादृशि नैकानि संदेहस्थानानि – इत्यत आवश्यको यत्नः सविस्तरं व्याख्यानप्रस्थानानां प्रत्येकं विमर्शने॥

व्याख्यातृषु मध्ये वार्तिककारस्य प्रथमं स्थानम् –

९०. तत्र सर्वप्रथमतो भगवत्पादानां साक्षाच्छिष्यत्वेन सुनिश्चितानां श्रीमत्सुरेश्वराचार्याणामेव प्रस्थानं तावद् विमर्शनीयम्। ते हि भगवत्पादीयसंप्रदायपरिरक्षणार्थं सर्वानपि प्राक्तनप्रक्रियाभेदान् श्रुतियुक्त्यनुभवावष्टम्भेन स्वीयबृहदारण्यकसंबन्धभाष्यवार्तिके निराकृत्य जिज्ञासुजनानधमर्णानकार्षुः। सुप्रथितपूर्वमीमांसाभाष्यवार्तिककारेभ्यः कुमारिलभट्टेभ्योऽन्यूनयशःसंपादकं बृहदारण्यकभाष्यवार्तिकं च प्राणैषुरिति॥

सुरेश्वरप्रस्थानावेक्षणार्थं मण्डनप्रस्थानविमर्शनमावश्यकम् –

९१. वार्तिकप्रस्थानविमर्शप्रस्तावात् प्रागेव तु तत्र वाचकानां प्रवेशसौकर्यार्थं प्रथमतो ब्रह्मसिद्धिप्रस्थानविमर्शनमपेक्ष्यते । यस्माद् ब्रह्मसिद्धिकृता अनेका विचारसरण्यो वार्तिके तथैवानुसृताः, तत्रत्यशब्द-वाक्ययुक्तिजातानि च तत्र तत्र तथैवानुकृतानि लक्ष्यन्ते । अतः किमनयो-रेकैव प्रक्रिया संमता, उत भिन्ने एव प्रक्रिये? यदापि भिन्ने, तदा कतरः कतरस्मात् कस्य हेतोः शब्दयुक्त्यादीन् गृहीतवान् स्वप्रक्रियापोषणार्थम्– इत्येतौ प्रश्नौ निर्णेयौ भवतः ॥

तत्र केचिद् वदन्ति – **ब्रह्मसिद्धिकारो मण्डनमिश्रः** भट्टकुमारिलशिष्यः श्रीशङ्करभगवत्पादैर्वादे पराजितः सन् तुरीयाश्रमं स्वीकृत्य सुरेश्वराचार्यनाम्ना तदीयशिष्यतां प्राप्तः – इति । अन्ये तु विश्वरूपास्योऽन्य एवैवमाचार्यैर्वादे जितः सुरेश्वराचार्यः संवृत्त इति । तिष्ठतु तावदयं विवादग्रस्त ऐतिहासिकविषयः । ग्रन्थशैलीप्रक्रियारचन-वैलक्षण्यमालक्ष्यापि मण्डनसुरेश्वरयोरैक्यं दुरध्यवसायमिति भाति । यत्कारणं ब्रह्मसिद्धिगद्यपद्यशैली तावन्नैष्कर्म्यसिद्धिगतगद्यपद्यशैल्यपेक्षया ललिततरा लक्ष्यते ; प्रक्रियारचने, अद्वैतात्मप्राप्तिसाधनप्रकारपरिशीलने चोभयोर्भेद एव हृदयमागच्छति । यदि हि मण्डन एव सुरेश्वरा-चार्योऽभवदिति निश्चयः, यदि वा भिन्नावेतौ, ब्रह्मसिद्धिरचनादूर्ध्वमेव च नैष्कर्म्यसिद्धेर्वार्तिकयोश्च निर्माणमासीदित्यभ्युपगम्यते, तर्हि मण्डनप्रक्रि-यायां दृश्यमाणविशेषाः सर्वे भगवत्पादीयप्रक्रियाविरुद्धा अवश्यं खण्डनीया भवेयुः सुरेश्वराचार्यैः । न चैतदस्ति । अथ सुरेश्वरवार्तिकप्रणयनात् परस्तादेव ब्रह्मसिद्धिर्विरचितेत्यभ्युपगम्यते, तदापि वार्तिकप्रस्थानगता वादाः किमिति न कटाक्षिता मण्डनेनेत्येषोऽपि दुरुत्तर एव भवति प्रश्नः – इत्युभयथापि जटिलोऽयं विचारविषयः । अतोऽयं पुरातनग्रन्थतत्त्वशोधन-कोविदैरेव निर्णेय इति मण्डनं सांप्रदायिकमतेन सुरेश्वराचार्येभ्यः

पूर्वकालिकमुपेत्यैव तत्प्रक्रियापरीक्षामत्र वर्तयिष्यामः । तावतैव प्रकृत-ग्रन्थोद्देशपरिपूर्त्युपपत्तेरिति विदाङ्कुर्वन्तु जिज्ञासवः ॥

मण्डनप्रस्थाने अविद्यास्वरूपम्–

९२. ब्रह्मणो वेदान्तैकगम्यत्वं प्रसाधयितुं ब्रह्मसिद्धिः प्रणीतेति भाति । ब्रह्मज्ञानं तूपनिषद्वाक्यजन्यज्ञानाभ्यासजसाक्षात्काररूपमिति मण्डनाचार्यस्य मतम् । तत्तूपरिष्टाद् विमृश्यते । तत्र

आनन्दमेकममृतमजं विज्ञानमक्षरम् ।
असर्वं सर्वमभयं नमस्यामः प्रजापतिम् ॥ ब्र. १–१.

इति मङ्गलश्लोकेन ब्रह्मस्वभावो वर्णितः । ईदृशेऽपि ब्रह्मणि जीवभावोऽविद्यया कृत इति प्रतिपादयितुम् अविद्याविचार आनीतः । अविद्यालक्षणं विस्पष्टतया नाचार्यमण्डनेन कुत्रापि निष्कृष्योक्तं दृश्यते । परं त्वग्रहणं विपर्ययग्रहणं चेत्यविद्याद्वैविध्यं पदे पदे (ब्र. सि. 9, 20, 32, 33, 122) तेन प्रदर्शितम् । तत्रापि 'न खल्वग्रहणमभावः कस्यचिन्निमित्तम् । मूर्छादिषु प्रसङ्गात् । किं तर्हि निमित्तम्? अनादिरप्रयोजना चाविद्या – इत्युक्तम् । तत्र च हेत्वनुयोगो निरवकाशः । विपर्यासतत्संस्कारयोश्च परस्परहेतुफलभावेन व्यवस्थानान्न दोषः ।' (ब्र. सि. 33) इति विपर्यासस्यैव विशेषतोऽविद्यात्वमुपपादितं मण्डनेन ॥

अत्राविद्या भगवत्पादैः आत्मानात्मनोः सत्यानृतयोरितरेतराध्यास-रूपत्वेन सूत्रभाष्यस्योपोद्घात एव सूत्रिता, गीताबृहदारण्यकयोरपि परामृष्टा, किमिति न कटाक्षेणापि वीक्षिता ब्रह्मसिद्धिकारेणेति तु न विज्ञायते । अध्यासरूपेयमविद्येति न ज्ञातमाचार्यमण्डनेनेति त्वसंभावितम् । यतः स एवान्यत्रैवं लिखति स्म (ब्र. सि. 20) 'भावो हि यथावदप्रकाशमानोऽध्यस्ताविद्यमानरूपः प्रकाशते, शून्ये तु क्वाध्यासः, किं प्रकाशताम्? – इति निर्बीजतैव स्यात्' इति ॥

अविद्याया अनिर्वचनीयत्वम् –

९३. अविद्या किं सती, असती वा? – इति विषये ब्रह्मसिद्धिकारेणोक्तम् –

> " नाविद्या ब्रह्मणः स्वभावः, नार्थान्तरम्; नात्यन्तमसती, नापि सती। एवमेवेयम् 'अविद्या', 'माया', 'मिथ्यावभास' इत्युच्यते। स्वभावश्चेत् कस्यचित्, अन्योऽनन्यो वा परमार्थ एवेति नाविद्या। अत्यन्तासत्त्वे खपुष्पसदृशी न व्यवहाराङ्गम्। तस्मादनिर्वचनीया। .... स्यादेतत्- अवभासमानं रूपं मा भूत्; अवभासस्तु सन्नेव, स चाविद्येति गीयते। नैतत् सारम्। अवभासमानेऽसति तदवभासोऽपि सत्यतो दुर्निरूपः। अवभासमात्रं तु स्यात्; तदवभास इत्यपि भ्रान्तिरेव। तस्मान्नाविद्या सती, नाप्यसती, अत एव चास्या निवृत्तिरदृढस्वभावायाः। मायामात्रत्वात्। अन्यथा स्वभावे दृढे व्यवस्थितायाः कथमन्यथात्वम्? स्वभावाहानात्, शून्यत्वे त्वयं निवृत्तत्वात्। एवं च नाद्वैतहानम् न निवर्तनीयस्याभावो वा॥" ब्र सि. 9.

अत्र सच्छब्दवाच्यं चेद् ब्रह्म, ततस्तद्व्यतिरिक्तमसन्नाम किञ्चिदस्तीति कथं निश्चितमिति न विज्ञायते। सर्वोऽपि हि सदसद्व्यवहारोऽविद्याभूमावेव। स्वतस्तु न सत्तन्नासदुच्यते परमार्थवस्तु – इति हि (गी. १३–१२) सिद्धान्तः। अत एव हि तत्त्वं निर्विशेषत्वात् परप्रतिषेधेनैव बोध्यते, श्रुत्यन्तेष्विति। तस्मात्, सदसत्त्वाभ्यामनिर्वचनीयेयमविद्येति न सम्यक्। एवमियम् 'अविद्या', 'माया', 'मिथ्यावभास' इत्युच्यते इत्यपि न वेदान्तप्रक्रियासंमतम्। 'अविद्या हि नाम अध्यसनम्, विपर्ययग्रहणम्–इति स्वेनैवोक्तम्। माया त्वविद्याध्यस्ता नामरूपबीजभूता प्रकृतिः। 'मायां तु प्रकृतिं विद्यात्' (श्वे.) इति श्रुतेः। सा च प्रतीयमानरूपेण परमात्मनस्तत्त्वान्यत्वाभ्यामनिर्वचनीया (सू. भा. २–१–१४, पा. २०१) व्यवहारतः। तत्त्वे स्वभावाहानादनिवृत्तिप्रसङ्गात्, अन्यत्वे तु स्वातन्त्र्येण सत्त्वप्रसङ्गान्नाविद्याकल्पितत्वं स्यादिति। परमार्थरूपेण तु परमात्मानन्यत्वमेव नामरूपयोरिति नाद्वैतहानिः। "यदा तु परमार्थदृष्ट्या परमार्थतत्त्वात् श्रुत्यनुसारिभिरन्यत्वेन निरूप्यमाणे नामरूपे

मृदादिविकारवद् वस्त्वन्तरे तत्त्वतो न स्तः–सलिलफेनघटादिविकारवदेव–तदा तदपेक्ष्य 'एकमेवाद्वितीयम्' (छां. ६–२–१), 'नेह नानास्ति किञ्चन' (का. २–१–११) इत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते" (बृ.भा. ३-५-१, पा. ८११) इति भगवत्पादीयपक्ष एवाश्रयणीयोऽत्र ॥

अविद्याश्रयः –

९४. अविद्याया आश्रयः कः ? - इत्यत्र सिद्धिः –

"यत्तु – कस्याविद्येति ; जीवानामिति ब्रूमः । ननु न जीवा ब्रह्मणो भिद्यन्ते । एवं ह्याह–'अनेन जीवेनात्मनानुप्रविश्य' (छां. ६–३–२) इति । सत्यं परमार्थतः । कल्पनया तु भिद्यन्ते । कस्य पुनः कल्पना भेदिका ? न तावद् ब्रह्मणः । तस्य विद्यात्मनः कल्पनाशून्यत्वात् । नापि जीवानाम् । कल्पनायाः प्राक् तदभावात् । इतरेतराश्रयप्रसङ्गात्, कल्पनाधीनो हि जीवविभागः जीवाश्रया कल्पनेति । अत्र केचिदाहुः – वस्तुसिद्धावेष दोषः, नासिद्धं वस्तु वस्त्वन्तरनिष्पत्तयेऽलम् । न मायामात्रे, न हि मायायां काचिदनुपपत्तिः । अनुपपद्यमानार्थैव हि माया । उपपद्यमानार्थत्वे यथार्थभावान्न माया स्यात् । अन्ये तु – अनादित्वादुभयोरविद्याजीवयोर्बीजाङ्कुरसंतानयोरिव नेतरेतराश्रयत्वप्रक्लृप्तिमावहतीति वर्णयन्ति । तथा चोक्तमविद्योपादानभेदवादिभिः – 'अनादिरप्रयोजना चाविद्या' इति । तत्रानादित्वाच्चेतरेतराश्रयत्वदोषः, अप्रयोजनत्वाच्च भेदप्रपञ्चसर्गप्रयोजनपर्यनुयोगावकाशः ॥ ब्र. सि. 10.

अत्र जीवानामविद्येति यदुच्यते तद्युज्यते, अनुभवानुसारित्वात् । यत्त्वाक्षेपः 'कस्य पुनः कल्पना भेदिका ?' इति, जीवानामित्युत्तरमाशङ्क्य चेतरेतराश्रयप्रसञ्जनम्, यश्चात्र समाधानप्रयासः, तदुभयं शुष्कतर्कमात्रमित्युपेक्ष्यम् । न हि कल्पनाश्रयो जीवविभागः पूर्वमात्मानं लभते जीवानां च कल्पना पश्चादिति, विपर्ययेण वा, कालकृतं क्रमं स्वीकृत्य कल्पनाजीवविभागयोः सिद्धिरुपपादनीया, येन चोद्यस्यावकाशो भवेदपि । अविद्या हि सर्वव्यवहारप्रयोजिका, सर्वोऽपि व्यवहारोऽविद्ययैव अप्रविहायाविद्याव्यवहारमपीति (खं. २९) स्थिते किं कुत्र चोद्येत ?

एतेनाविद्याजीवयोर्बीजाङ्कुरसंतानयोरिवानादित्वमित्यपि प्रत्युक्तम् । जीवस्य तदविद्यायाश्च कालाधिकरणकत्वानङ्गीकाराद्बीजाङ्कुरयोरिव ।इतश्चाविद्याश्रयो न चोद्यः । अद्वैततत्त्वमभ्युपगम्य हि तावन्न चोद्यमवतरति । तत्राविद्यादि-दोषगन्धस्याप्यनाशङ्कनीयत्वात् । 'तत्केन कं पश्येत्' (बृ. २-४-१४) इति श्रुतेः । व्यवहारे तु यत्र यथा दृष्टा अविद्या, तत्र तथैवाङ्गीकर्तव्येति न चोदयितव्या परिहर्तव्या वेति । अत एव हि सूत्रभाष्ये 'कस्य पुनरयमप्रबोध इति चेत्' इति चोद्यमुद्भाव्य प्रतिसमाहितम् 'यस्त्वं पृच्छसि, तस्य ते इति वदामः' इति । ततः परम् 'नन्वहमीश्वर एवोक्तः श्रुत्या' इति प्रतिवादिशङ्कामुद्भाव्योक्तम् 'यद्येवं प्रतिबुद्धोऽसि, नास्ति कस्य-चिदप्रबोधः' (सू. भा. ४-१-३, पा. ४६५) इति ॥

एवं गीताभाष्येऽपि – 'अत्राह सा अविद्या कस्येति? यस्य दृश्यते तस्यैव । .... ननु ममैवाविद्या । जानासि तद्धि विद्यां तद्वन्तं चात्मानम्' इत्यादि (गी. भा. १३-२, पृ. १९६) ॥

स्वाभाविकाविद्यानिवृत्तिः –

९५. ननु स्वाभाविकमपि किञ्चिद्विलक्षणप्रत्ययोपनिपातान्निवर्तताम् । ऐकात्म्यवादिनस्त्वनागन्तुकार्थस्य तदभावात् कुतो निवृत्तिः?– इत्याशङ्क्य प्राह सिद्धिः –

'अत्रोच्यते उक्तमेतज्जीवानाम् अविद्याकलुषितत्वम्, न ब्रह्मणः । तद्धि सदा विशुद्धनित्यप्रकाशमनागन्तुकार्थम् । अन्यथा ब्रह्मभूयं गतस्यापि नाविद्या निवर्तेत । तत्रानिर्मोक्षः । अथ ब्रह्मैव संसरति ब्रह्मैव मुच्यते, एकमुक्तौ सर्वमुक्तिप्रसङ्गः । .... तस्मादविद्यया जीवाः संसारिणः, विद्यया मुच्यन्ते । तेषां च निसर्गजाविद्याकलुषाणां विलक्षणप्रत्ययविद्योदयेनोप-पद्यतेऽविद्यानिवृत्तिः । न हि जीवेषु निसर्गजा विद्यास्ति । अविद्यैव हि नैसर्गिकी । तस्य आगन्तुक्या विद्यया प्रविलयः । अव्यतिरेकेऽपि च ब्रह्मणो जीवानां बिम्बप्रतिबिम्बवद्विद्याविद्याव्यवस्था व्याख्याता ॥ (ब्र. सि. 12) विद्यैव चाविद्यानिवृत्तिः, यद्यग्रहणमविद्या । यतो भाव एवाभावव्यावृत्तिः ।

अथ विपर्यासः, तथापि विरोधितत्त्वज्ञानोदय एव तन्निवृत्तिः। न हि शुक्तिकाज्ञानोत्पादादन्या रजतज्ञाननिवृत्तिस्तत्साध्या, प्रयत्नान्तरसाध्या वा। तयोर्योगपद्यात् प्रयत्नान्तरानपेक्षणाच्च ॥ ब्र सि. 121, 122.

अत्र यदुच्यते जीवानामेवाविद्याकलुषितत्वं न ब्रह्मणः – इति, तत्र यद्यप्यमभिप्रायः, 'व्यवहारे जीवस्य परमात्माभासमात्रत्वात् सूर्यकादिगतदोषस्य परमार्थसूर्येऽभाव इव कल्पितजीवगता अविद्यादिदोषाः परमात्मनि नित्यशुद्धबुद्धमुक्तस्वभावे न जातु सन्तीति। तत्रोमिति ब्रूमः। 'आभास एव चैष जीवः परमात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः। न स एव साक्षात्। नापि वस्त्वन्तरम् (सू. भा. २–३–५०, पा. ३०२), 'जलगतं हि सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते, जलह्रासे ह्रसति, जलचलने चलति, जलभेदे भिद्यत – इत्येवं जलधर्मानुविधायि भवति; न तु परमार्थतः सूर्यस्य तथात्वमस्ति' (सू. भा. ३–२–२०, पा. ३५९) इति च भाष्यवचनानुसारित्वात्। अथ ब्रह्मणो नित्यासंसारित्वम्, जीवस्यैव त्वविद्यादिसंसारः – इत्याग्रहः, न तत् साधूच्यते। संसारिदशायामपि जीवस्य ब्रह्मणः सकाशादव्यतिरेकात्। ब्रह्मण्येव जीवत्वस्याप्यध्यासात्, अविद्यादिव्यवहारस्यापि तदतिरेकेणान्यत्र कल्पनानुपपत्तेः। तथा हि बृहदारण्यकभाष्यवचनम् 'परस्यादुःखित्वेऽन्यस्य च दुःखिनोऽभावे दुःखोपशमनाय शास्त्रारम्भानर्थक्यमिति चेत्। न। अविद्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वात्। आत्मनि प्रकृतसङ्ख्यापूरणभ्रमापोहवत्। कल्पितदुःख्यात्माभ्युपगमाच्च' (बृ. भा. १–४–७, पा. ६५८) इति ॥

यदप्युच्यते, 'यदि ब्रह्मैव संसरति मुच्यते च, एकमुक्तौ सर्वमुक्तिप्रसङ्ग' इति। तदपि न चारु। यतः परमार्थतो ब्रह्मैव जीवोऽपि न संसरति मुच्यते वा। अङ्गीक्रियते हि भवतापि–कल्पितविषयावेव संसारमोक्षौ, न परस्मिन् परमार्थतो विद्येते (ब्र. सि. 15) इति। अथोच्येत–मम तावत् कल्पितजीवविषयौ संसारमोक्षौ, प्रतिबिम्बविषय इव श्यामतादिः;

प्रतिवादिनस्तु ब्रह्मण्येव तावुच्येते इति वैषम्यमिति । अहो विस्मृतिः ! ननु जीवत्वमपि ब्रह्मण्येव कल्पितम् । न हि हित्वा ब्रह्मान्यद् वस्तुसदस्ति यदास्पदं स्याज्जीवत्वादिविकल्पानामित्यविद्याश्रयत्वमपि ब्रह्मण्येव विकल्पितमिति बलादायाति । यथोक्तं बृहदारण्यकभाष्य एव–"ब्रह्मणि साधकत्वकल्पना अस्मदादिष्विवापेशला 'तदात्मानमेवावेत्तस्मात्तत्सर्वमभवत्' इति चेत् । न । शास्त्रोपालम्भात् । न ह्यसत्कल्पनेयम् । शास्त्रकृता तु" (बृ. भा. १–४–१०, पा. ६७२) इति । न चैतस्मिन् पक्षे एकमुक्तौ सर्वमुक्तिप्रसङ्गः । व्यवहारे हि यस्य दृश्यतेऽविद्यानिवृत्तिस्तस्यैव मुक्तिरपि भविष्यति, न त्वितरेषाम् । परमार्थतस्तु ब्रह्मणि नैव बन्धो मोक्षो वेति कः प्रसङ्गः सर्वमुक्तेर्नानात्वरहिते वस्तुनीति । तथा ह्यभियुक्तवचनम् 'न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता' (गौ. का. २–३२) इति । भाष्यवचनं च 'भवत्येवं नाविद्याकर्तृ भ्रान्तं च ब्रह्म, किं तु नैवाब्रह्माविद्याकर्तृ चेतनो भ्रान्तोऽन्य इष्यते' (बृ. भा. १–४–१०, पा. ६७०) इति । अतोऽप्राप्तनिषेधोऽयं ब्रह्मणि नास्त्यविद्या बन्धमोक्षौ वेतीत्यवधेयम् ॥

ख्यातिबाधविचारः –

९६. अस्मिन् ग्रन्थे नियोगकाण्डे 'प्रतिपत्तिर्हि विषयविशेषविशिष्टा प्रमीयमाणा न विषयविशेषस्य सद्भावं गमयति । अन्यथाभूते तथाभावसमारोपेणापि संभवात् । असौ वाव लोको गौतमाग्निः' (छां. ५–४–१) इति यथा द्युप्रभृतिष्वग्निदृष्टेः' (ब्र. सि. 136) – इत्युक्तमस्ति । तत्र विपरीतख्यातिमसहमानो नियोगवादी शङ्कते शुक्तौ रजतबुद्धिर्नास्ति, किं तु रजतस्मृतिरेवेयम् । प्रत्यक्षस्मर्यमाणयोर्विवेकग्रहणासमर्थानां भेदाग्रहणेऽभेदग्रहणाभिमान एव चायमिति । शुक्तौ रजतार्थिप्रवृत्त्यन्यथानुपपत्तेः' (ब्र. सि. 137), 'रजतबाधानुपपत्तिप्रसङ्गाच्च' (ब्र. सि. 142) न युक्तमिदं दर्शनम् । सर्वत्राख्यात्यङ्गीकारे लयविक्षेपसंज्ञकाविद्याद्वयस्य

(ब्र. सि. 149) दुरुपपादत्वप्रसङ्गाच्चास्ख्यातिवादिमतमिदमयुक्तमिति विपरीतख्यातिरेव स्वीकार्येत्युक्तं ब्रह्मसिद्धौ ॥

अत्रेदमवधेयम् । अनेनैव ग्रन्थकर्त्रा **स्वीये विभ्रमविवेकेऽपि** आत्मख्यातिः, असत्ख्यातिः, अख्यातिः – इति ख्यातित्रितयमपि प्रत्याख्याय विपरीतख्यातिवादः प्रतिष्ठापितः । भगवत्पादैरपि मिथ्याज्ञानमध्यास ब्रुवाणैः 'सर्वथापि तु त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति इत्यध्यासलक्षणं स्वाभिमतं सर्वतन्त्रसिद्धान्ततया प्रतिष्ठापितमस्ति । तथा चोभयाचार्यसंमतेयं विपरीतख्यातिरिति यद्यप्युभयोः साम्यमापाततः प्रतिभाति, तथापि अख्यातिवादिना भेदाग्रहणेऽग्रहणाभिमानलक्षणान्यथाख्यातिमनिच्छताप्यङ्गीकृता भवतीति यथाचार्यैस्तथा मण्डनाचार्येण नोद्घाटितः परपक्षे प्रतिज्ञाहानिदोषः । 'प्रत्येत्येव हि केवलं रजतमिति, न तु तत्र रजतमस्ति' (सू. भा. ४-१-५, पा. ४६७) इति रजताद्यभावं शुक्तिकादौ दर्शयित्वा दार्ष्टान्तिकेऽपि 'यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ' (सू.भा. २-१-९, पा. १९१) इत्यादिस्थलेष्वात्मनि प्रपञ्चाभावः, 'अविद्याकामकर्मविनिर्मुक्तमेव तद्रूपं यत् सुषुप्ते गृह्यते प्रत्यक्षतः' (बृ.भा. ४-३-२२, पा. ८९३) इत्यात्मनि संसाराभावश्च यथा स्पष्टं प्रदर्शितः, न तथाचार्यमण्डनेनानुभवमारोपितः । प्रत्युत 'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः' (गौ. का. १-११) इति गौडपादीयकारिकाया यथाश्रुतार्थं स्वीकृत्य 'सुषुप्ते तु विक्षेपमात्रं निवृत्तम् । तत्संस्कारोऽग्रहणं च नैव निवृत्ते । अन्यथा न तुरीयाद् भिद्येत । विक्षेपमात्राभावात्तु ब्रह्मप्राप्त्यभिधानम्' (ब्र. सि. 22) इति श्रुतियुक्त्यनुभवविरुद्धमुक्तम् । तुरीयं हि नामजागरितादिविकल्पवर्जितात्मा स्वभाव एव, न त्ववस्थान्तरम् – इति संप्रदायोऽपि तेन विस्मृतः । 'अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः । विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते' इत्यभियुक्तोक्तिरहस्यमप्यविगणितमिति ॥

प्रमाणव्यवहारः –

९७. केन पुनः प्रमाणेनास्यार्थस्य समधिगमः ? न तावत् प्रत्यक्षेण । तस्यैतद्विपरीतभेदविषयत्वात् । नाप्यनुमानेन । तत्पूर्वकत्वात् । नोपमानेन । सादृश्याविषयत्वात्, तस्य च भेदाधिष्ठानत्वात् । अर्थापत्तिस्तु विपर्यये । न भेदमन्तरेण कश्चिद् व्यवहार उपपद्यते यतः । अभेदोऽपि हि प्रमात्रादिविभागाद् ऋते दुरवगमः । अभावोऽपि नाभावरूपतत्त्वावगमायालम्; नापि प्रपञ्चाभावावगमाय, प्रत्यक्षादिषु सत्सु तदसंभवात् । आगमोऽपि न तावदाप्तप्रणेतृकोऽत्र क्रमते । प्रमाणान्तराधिगतगोचरत्वात् । नापि स्वतन्त्रः । विधिनिषेधरूपत्वात् । तयोश्च स्थिते तत्त्वेऽसंभवात् । नापि तदनपेक्षं व्यवस्थितवस्तुविषयमेव प्रामाण्यम् । भूतानुवादत्वे प्रमाणान्तरापेक्षत्वात्' (ब्र. सि. 22, 23) इत्याद्याक्षेपमुद्भाव्य

आम्नायतः प्रसिद्धिं च कवयोऽस्य प्रचक्षते ।
भेदप्रपञ्चविलयद्वारेण च निरूपणाम् ॥ (१-२)

इति ब्रह्मसिद्धिः ॥

तथा **तर्ककाण्डे** 'प्रत्यक्षादिभिर्व्यावृत्तानां भावस्वभावानामवगमात् नैकस्मिन्नद्वये शब्दः प्रमाणम् । प्रत्यक्षादिविरोधात्, आवप्लवनाद्यर्थवचोवत्' इत्याक्षेपमुत्थाप्य प्रत्यक्षादिविरोधे आम्नायस्य दौर्बल्यम्, उभयोरपि तुल्यबलत्वम् – इति पक्षद्वयमुदस्य सिद्धावुक्तम् –

आम्नाय एव बलवांस्तद्विरोधे 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' (जै. सू. ६-५-५४), 'पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यति' (श्लो. वा. १-१-२, ५७) । तथा हि – सर्वस्य निसर्गजः प्रत्यक्षादिनिबन्धनः किल विभक्तवस्तुपरिच्छेदः । तदपेक्षस्तु तत्पूर्वकोऽनिसर्गजः कस्यचिदेवागन्तुरद्वैतावगमः । न पूर्वमनुपमृद्योदेतुमशक्नुवंस्तदपबाधात्मा उदीयते । इतश्च । संभवद्विचित्रविभ्रमहेतुत्वात् प्रत्यक्षादीनाम्, विगलितनिखिलदोषाशङ्कत्वाच्च आम्नायस्य । पुरुषाश्रयाणां हि दोषाणां शब्दे पुरुषाभावे असंभवात् । शक्यो ह्याम्नायादेवानादिरविद्यासंस्कारो विभ्रमहेतुः प्रत्यक्षादिषु संभावयितुम्, निश्चेतुं च देहात्माभिमान इव । न चैवमपौरुषेये

शब्दे काचिद्दोषाशङ्का । सत्यां वा प्रमाणस्येव न स्यात् । प्रत्यक्षादीनां तु व्यावहारिकं प्रामाण्यम् । अविद्यासंस्कारस्य स्थेम्ना व्यवहारविपर्ययाभावात् । यत्र च व्यवहारविपर्ययो न तत्र प्रामाण्यम् । .... । प्रत्यक्षादीनां तु व्यवहारे संवादाच्च शक्यते व्यवहारविसंवादिज्ञानहेतुर्दोषः कल्पयितुम् । व्यवहारविपर्ययाद्धि स कल्प्येत । तत्त्वदर्शनस्य तु वेदान्तजन्मनः प्रतिपक्षत्वात् तत्त्वप्रतिहतिमात्रहेतुरेवानादिरविद्यानुबन्धः कल्प्यते । ततो दोषानुबन्धः प्रामाण्यं चेति न विरोधः ॥ ब्र. सि. 40.

इति ॥

अत्र यत् पूर्वपक्षिणा चोद्यते प्रत्यक्षाद्यविषयत्वं ब्रह्मण इति, यच्च सिद्धान्तिना मण्डनाचार्येणोच्यते तस्याम्नायमात्रसिद्धत्वम्, तदुभयमपि सम्यगेव । 'रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षगोचरः, लिङ्गाद्यभावाच्च नानुमानादीनाम् । आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत् (सू. भा. २–१–६, पा. १८८) – इति युक्तयुपबृंहितभाष्यवचनात् । यदपि प्रत्यक्षादिप्रमाणानां व्यवहाराविसंवादिजनकत्वे व्यावहारिकं प्रामाण्यमिति, तदपि सम्यगेव । यावद्व्यवहारं प्रमाणत्वेन ग्रहणात्, बाधाभावाच्च प्रत्यक्षादीनाम् । स्वाप्नप्रत्यक्षादिप्रमाणवत् । तथा ह्याहुर्भाष्यकाराः – 'सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः । स्वप्नव्यवहारस्येव प्राक् प्रबोधात् । .... यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्न उच्चावचान् भावान् पश्यतो निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति प्राक् प्रबोधात्, न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति – तद्वत्' (सू.भा.२-१-१४, पा. १९८) इति । यत् पुनः प्रत्यक्षादिविरोधे आगमस्यैव प्राबल्यमिति । तदसत् । प्रमाणानां पृथक्पृथग्विषयत्वेन मिथोविरोधस्यैवासंभवात् । यथोक्तं बृहदारण्यकभाष्ये 'स्वविषयशूराणि हि प्रमाणानि श्रोत्रादिवत्' (बृ. भा. २–१–२०, पा. ७४३) इति । यदपि प्रत्यक्षादिविरोधे आगमस्यैव प्राबल्याय तस्यापौरुषेयत्वात्, तज्जन्यज्ञानस्यानिसर्गजत्वाच्च दोषाभावसंभावना, तादृशागमबलादेव चानाद्यविद्यासंस्कारदोषसंसर्गसंभावना च प्रत्यक्षादिष्विति, तदपि संभावनामात्रत्वात्

वैदिकेष्वास्तिकेषु श्रद्धोत्पादकं भवदपि नागमस्य निःसंशयं प्राबल्यावधारणे प्रभवेत् सर्वत्रेति नायं पन्थाः । सर्वेषामप्यविशेषेण प्रमाणप्रमेयव्यवहाराणामविद्यापुरःसरत्वं सार्वत्रिकानुभवावष्टम्भेनोपपादितमस्त्यध्यासभाष्ये भगवत्पादैः । 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ? उच्यते । देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः' इत्यत्र । तत् किमित्युपेक्ष्यते ? विवृतं चेदमस्माभिः पुरस्तात् (खं. २४, २५) ; मोक्षशास्त्रस्य चाविद्यापुरःसरत्वेऽप्यन्त्यप्रमाणत्वादस्ति विशेषः । सोऽपि प्रदर्शितः प्राक् (खं २८, २९) । न चोत्पन्ने शास्त्रजन्येऽद्वितीयज्ञाने पुनरबाधितः प्रत्यक्षादिव्यवहारोऽवशिष्यते, येन तत्प्राबल्यं दौर्बल्यं वा विचारणीयं भवेत् । 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति .... यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' (बृ. ४–५–१५) इति श्रुतेरिति ॥

शास्त्रप्रामाण्ये आक्षेपसमाधानानि –

९८. ब्रह्मणि शास्त्रप्रामाण्यमधिकृत्य विविधानाक्षेपान् अनूद्याचार्यमण्डनेन परिहारा उक्ताः । ते च प्रायशो वार्तिकानूदिताः, परिहारार्थं समावेशिताश्च । अतस्तत्र केचिदेवाक्षेपा अत्र संगृह्यन्ते –

(१) शास्त्रस्य स्वरूपसिद्ध्यर्थं प्रत्यक्षाद्यपेक्षणात् तदपबाधनेनाद्वितीयब्रह्मबोधनमप्रामाण्यकारणमित्याक्षेपः ; 'न प्रमितावपेक्षावत्ता शब्दस्य प्रत्यक्षादिषु, किं तु स्वरूपसिद्धौ । अन्यथा प्रमाणमेव न स्यात् । तथा च स्वकार्येऽनपेक्षत्वान्न प्रत्यक्षादिभ्यो हीयते' (ब्र. सि. 40) इति परिहारः ॥

(२) नाभेदो भेदमन्तरेण शक्योऽवसातुम् । भेदोपाया हि तस्य प्रतिपत्तिः । तत्राभेदः समाक्षिप्तभेद एव प्रतीयत इति व्याघातः' इत्याक्षेपः ; 'उपायमाक्षिपति प्रतिपत्तिः, नोपायस्य परमार्थताम् , मिथ्याज्ञानादपि तत्त्वप्रतिपत्तेः' (ब्र. सि. 41) इति परिहारः ॥

(३) 'कर्मविधयो भेदाश्रयाः, अभेदाश्रयाश्च वेदान्ताः परस्पराहताः' इत्याक्षेपः ; स्याद्याकुलत्वं यदि कर्मविधयो भेदप्रतिपादनपराः स्युः,

ते तु सिद्धं भेदमुपाश्रित्य इदमनेनेत्थं साधयेत् – इति पुरुषहितानुशासनप्रधानाः ' (ब्र. सि. 43) इति समाधानम् ॥

(४) कार्य एवार्थे कृत्स्नस्य वेदस्य प्रामाण्यम् ; अतः कार्यमर्थमवगमयन्ती चोदनैव भूतादिकमर्थमप्यवगमयति । ' चोदना हि भूतं भवन्तम् ' (शा. भा. १-१-२) इत्याद्यभियुक्तोक्तेः । न तु साक्षाद्वस्तुनि प्रामाण्यमासां भवितुमर्हति, अनुवादकत्वप्रसङ्गात्–इत्याक्षेपः ॥

यच्छब्दादेव ज्ञानं तदविधेयम् । विधिमन्तरेण भावात्, कर्मावबोधवत् (ब्र. सि. 74), न च भूतार्थविषयकत्वादनुवादकत्वम् । अपौरुषेयवेदमात्रगम्यस्य ब्रह्मणः पूर्वाधिगमसंस्पर्शेन प्रतिपत्तेरभावात् (ब्र. सि. 79) । न च साक्षात्काररूपप्रतिपत्तौ विधिरपेक्ष्यते । फलरूपा हि सा ; ' न च पुरुषार्थे फले विधायकस्य व्यापारः । स्वयं प्रवृत्तेः (ब्र. सि. 116) । शाब्दज्ञानसंतानरूपप्रतिपत्तौ विधिरिति चेत् । ' भवतु न कश्चिद्विरोधः ' (ब्र. सि. 154) । तदपि वा व्यर्थमेव प्राप्तार्थत्वात् । साक्षात्करणफलं हि तत्तदनुचिन्तनं दृष्टार्थम् । न ततोऽन्यफलमाकाङ्क्षते । अभूतत्त्वं हि न स्वरूपाविर्भावादन्यदिति प्राग् वर्णितम् । दृष्टा च ज्ञानाभ्यासस्य स्वग्यज्ञानप्रसादहेतुता लोके । भावनाविशेषाद्धि अभूतमप्यनुभवमापाद्यते, किं पुनर्भूतम् ' (ब्र.सि. 154) इति परिहारः ॥

अत्र यदुक्तं मिथ्याज्ञानेनापि तत्त्वप्रतिपत्तेर्वाक्यस्य प्रत्यक्षापेक्षत्वं न दोषायेति, यच्च कर्मवाक्यानि न भेदप्रतिपादनपराणि किं तु पुरुषार्थोपायप्रदर्शनपराणीति–तदुभयमपि साध्वेव । तथा दृष्टत्वात् । असत्येन वेदान्तवाक्येनापि सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिर्भवेदित्यप्यनेनैव न्यायेनानुमन्तव्यम् । आहुर्हि भाष्यकाराः ' शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः । स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात् । (सू.भा. २-१-१४, पा. १९९) इति । ब्रह्मसिद्धिकृताप्युक्तम् 'नायं नियमः–असत्यं न कस्मैचित् कार्याय भवतीति । भवति हि माया प्रीतेर्भयस्य च निमित्तम् । असत्यं च सत्यप्रतिपत्तेः यथा रेखागवयः, लिप्यक्षराणि चेति (ब्र. सि. 13, 14) इति । इदं चोपायोपेययोर्व्यावहारिकसत्यत्वमादाय । परमार्थदृष्ट्या तूभयमपि सत्यमेवेत्यवधेयम् । यदाह ब्रह्मसिद्धिकारोऽपि

'अपि च–अभेददर्शनोपाया अपि न स्वरूपेण मिथ्या, यतो ब्रह्मैवैषां स्वरूपम्। तत्र ब्रह्मैवाविद्यानुबद्धब्रह्मप्राप्त्युपायः' (ब्र. सि. 14) इति। यच्चेदमुच्यते वाक्यजन्यबोधो न विधेय इति। तदपि युक्तमेव। एवं दृष्टत्वाल्लोकेऽपि॥

यत्तु शाब्दज्ञानसंततिः साक्षात्कारार्थं विधेयेति। न तद् ग्राह्यम्। शाब्दज्ञानाभ्यासवादस्य प्रागेव (खं. ६९) निरस्तत्वात्। केवलेनैव शाब्दज्ञानेन दशमज्ञानेनेव तदसाक्षात्कारभ्रमनिवृत्त्युपपत्तेश्च। यथोक्तं तैत्तिरीयभाष्ये 'तस्यैवमविद्यया अनासब्रह्मस्वरूपस्य–प्रकृत-सङ्ख्यापूरणस्यात्मनोऽविद्ययानासस्य सतः केनचित् स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा तथा – श्रुत्युपदिष्टस्य सर्वात्मब्रह्मणः आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव' (तै. २–१, पा. २८२) इति। या तु मनीषा 'साक्षात्करणफलं तत्तदनुचिन्तनम्। दृष्टा च ज्ञानाभ्यासस्य सम्यग्ज्ञानप्रसादहेतुता लोके' इति, तत्र षड्जादिष्वागमबलात् प्रत्यक्षमिति दृष्टत्वादस्त्वनात्मविषये लोके तथा; इह पुनर्ब्रह्म न भिन्नमात्मनः, विषयीकरणयोग्यं परोक्षं वा 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ. ३–४–१) इति श्रुतेर्नित्यापरोक्षात्तस्येति विषमो दृष्टान्तः। यदपि भावनाविशेषादभूत-मप्यनुभवमापाद्यते इति तदपि लौकिकं चेत् प्रातिभमात्रं न वस्तुतन्त्रं ज्ञानमित्यनुदाहरणम्। चोदनावशेन प्राप्तं साक्षात्काररूपं चेत्, तत्तथैवे-त्यनुमन्यते; तत्र तु न प्रमाणज्ञानावृत्तिः, किं तु मानसक्रियालक्षण-ध्यानावृत्तिः। न च तथा वस्तुतन्त्रज्ञाने चोदना समस्ति, नापि प्रमाणावृत्त्या प्रमेयेऽतिशयः क्वचिदपि दृष्टो वेत्यलमस्थाने आवृत्त्या साक्षात्कारगवेषणेन॥

ब्रह्मणः शास्त्रप्रमाणकत्वे आक्षेपसमाधानानि –

९९. वाक्यधर्मपर्यालोचनया शास्त्रप्रमाणकत्वं ब्रह्मणो युज्यते न वेति चिन्तां प्रक्रम्याक्षेपत्रयमत्र समुद्भाव्य समाहितं ब्रह्मसिद्धिकारेण –

(१) ब्रह्मवाक्येष्वाख्यातपदादर्शनात् – आख्यातपदार्थमन्तरेण च नामपदार्थानां संसर्गासंभवात् तदभावे च साकाङ्क्षत्वात् सिद्धोऽर्थो ब्रह्मादिः न शास्त्रगोचर इत्याक्षेपः (ब्र. सि. 85)

"क्रिया सर्वत्र सुलभैवाश्रूयमाणाप्यस्त्यादिः । 'अस्तिर्भवन्ती परः प्रथमपुरुषोऽप्रयुज्यमानोऽपि गम्यते' (पा. भा. २-३-१, वा. १४६६) इति तत्र ब्रह्मस्वरूपप्रतिपत्तिपरं वाक्यप्रस्तुत्यर्थनिष्ठम् । तच्चिबन्धनस्तत्र पदार्थसंश्लेषः । सत्तायाश्च प्रकृत्यैव सत्प्रधानत्वात् तद्द्वारेण विशिष्टवस्तुसिद्धिः' (ब्र. सि. 85) । अन्तरेणापि क्रियां 'राज्ञोऽयं पुरुषः', 'फलिता एते वनस्पतयः' इति संसर्गप्रतीतेश्च नायमाक्षेपः (ब्र.सि. 99) ; क्रियारहितं वाक्यं नास्त्येव, अस्तिक्रियायां च प्रमाणान्तरसापेक्षता-इत्याग्रहेऽपि जनिक्रियानिष्ठादपि वाक्यात् जगत्कारणसत्ता शक्यते प्रतिपत्तुम् (ब्र. सि. 100) । अतो नायं दोषः - इति समाधानम् ॥

(२) न शब्दो ब्रह्मणि प्रमाणम् । तथा हि । न तावद् ब्रह्मान्तर्याम्यादि पदं प्रमाणम् । संबन्धज्ञानापेक्षया पूर्वसिद्धे प्रत्ययहेतुत्वेन । नापि वाक्यम् । पदार्थ एव हि विशिष्टो वाक्यार्थो भवतीति । तत्रात्यन्तापरिदृष्टब्रह्माद्यर्थप्रमाणाभिमतेषु वाक्येषु तद्वाचीनि पदानि स्युः, न वा । यदि न सन्ति, न त इतरैः संसृज्येरन् न भिद्येरन् इति न तेषां प्रमेयाः । अथ तु सन्ति, तथापि तैरनधिगतसंबन्धैर्न प्रतिपाद्येरन् । अप्रतिपन्नाश्च न विशिष्टवाक्यार्थप्रतिपत्तिहेतवः - इत्याक्षिप्ते -

सिद्धिकारसमाधानम् - कारणसामान्यं वा सत्सामान्यं वा 'यतो वा इमानि भूतानि जायन्ते' (तै.) इति, 'अस्थूलमनण्वह्रस्वम्' इत्यादिपदार्थैः संसर्गाद्भेदाच्च प्रमाणान्तरानधिगतं विशेषरूपमलादयति, वाक्यस्य च प्रमेयं भवति । तदेवं लोकसिद्धपदार्थान्वयेनैवापूर्वार्थप्रतिपत्तेर्नानवबोधकत्वम्, अनुवादकत्वं वा । अथवा न लोकेऽत्यन्तमप्रसिद्धं ब्रह्म सर्वप्रत्ययवेद्यत्वात् ब्रह्मणो व्यतिरेकेण प्रत्येतव्यस्याभावात् । विशेषप्रत्ययानां च सामान्यरूपानुगमात् । भेदोपसंहारावशिष्टं च सत्यं ब्रह्म - इति प्रतिपादनात् । 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां.) इति दृष्टान्तात् । किं तर्हि शब्देन प्रतिपाद्यते ? प्रपञ्चाभावः । तत्र प्रपञ्चपदार्थोऽपि सिद्धः । निषेधोऽपि सिद्धः । तयोः संसर्गात्तदभावप्रतिपत्तिः । आम्नायैकनिबन्धनत्वं तु तस्योच्यते प्रत्यक्षादीनामविचारसंभिन्नत्वात् प्रत्यस्तमितनिखिलभेदेन रूपेणाविषयीकरणात्, भेदप्रत्यस्तमयस्याम्नायावगम्यत्वात् - इति ॥ ब्र. सि. 157.

अत्रास्तिक्रियाध्याहारः संसर्गार्थं क्रियतामिति समाधानं तावत् सम्यगेव । 'अस्तिपदसहितानां परमात्मेश्वरादिप्रतिपादकवाक्यपदानां

विशेषणविशेष्यभावेन संहतिः केन वार्यते' (बृ.भा. १-३-१, पा. ६२७) इति बृहदारण्यकभाष्यवचनात् । 'अहं ब्रह्मास्मि', 'तत्त्वमसि' इत्यादिषु प्रत्यक्षं तथा प्रयोगदर्शनाच्च श्रुत्यन्तेषु । क्रियापदरहितानामपि पदसंहति-प्रतीतिरित्यपि साधु । 'अयमात्मा ब्रह्म' (बृ. २-५-१९) इत्यादिषु तथैव पदसमन्वयदर्शनात् । न चात्र कार्यवाचिपदाध्याहारेण पूर्ववाक्यमिभतसिद्धिः शङ्क्या । 'संपदादिरूपे ब्रह्मात्मैकत्वविज्ञाने अभ्युपगम्यमाने 'तत्त्वमसि', 'अहं ब्रह्मास्मि', 'अयमात्मा ब्रह्म' इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तु-प्रतिपादनपरः पदसमन्वयः पीड्येत' (सू. भा. १-१-४, पा. १६) इति भाष्यप्रत्याख्यातत्वादस्य पक्षस्य ॥

यत्तूच्यते जनिक्रियानिष्ठादपि वाक्यादपि जगत्कारणसत्ता शक्यते प्रतिपत्तुमिति, न तद्वेदान्तविदां हृदयंगमम् । न हि 'यतो वा इमानि भूतानि जायन्ते' इत्यादीनि वाक्यानि जनिक्रियानिष्ठानि, किं तर्हि, 'तद् ब्रह्म' इत्यत्रैव समन्वितानीति ब्रह्मस्वरूपनिष्ठान्येव । अत एव 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां.) इत्यादिश्रुत्यवगतस्य ब्रह्मात्म-नोऽद्वितीयस्याविद्यातत्कार्यातीतस्याविद्यामात्रगोचरभेदसंसर्गानर्हत्वे सति पदार्थत्ववाक्यार्थत्वयोरयोगात्, सर्वथा सामान्यविशेषकार्यकारणभावरहिते निर्विशेषे 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' (तै. २-९) इति मनोवागगोचरे तस्मिन् पदार्थत्ववाक्यार्थत्वयोश्चिन्तयितुमप्यशक्यत्वात्, न युक्तं वक्तुं कारणसामान्यं वा सत्सामान्यं वा श्रुतिः पदार्थैः संसर्गा-द्वेदाच्च विशेषरूपमापादयतीति । प्रपञ्चपदार्थतन्निषेधसंसर्गात् प्रपञ्चाभावं बोधयतीति वा। यदा पुनरुच्यते 'सामान्यं तूक्तं ब्रह्मवादिभिर्विशेषप्रत्यस्त-मयमुखेन निरूपणादुपचारतः' (ब्र. सि. 38), न तदा वाक्यार्थत्वमिति । किञ्च, प्रपञ्चाभावो ब्रह्मणीति नैव साधूक्तम् । न हि प्रपञ्चव्यतिरिक्तस्त-दभावस्तदधिकरणत्वं वा ब्रह्मणि समस्तीति । एतेन यदुक्तमनेनाचार्येण "'तत्तु समन्वयात्' इति चोदनालक्षणाद्धर्मात् तुशब्देन विशेष्यं ब्रह्म समन्वयगम्यमुक्तम् । समन्वयो हि पदार्थानां संसर्गो विनियोगः, ततो

गम्यते" (ब्र. सि. 155) इति, तदपि प्रत्याख्यातं भवति । न हि ब्रह्मणि संसर्गोऽस्तीति । तस्मात्, न संसर्गद्वारेण भेदद्वारेण वा पदार्थविशिष्टवाक्यार्थत्वेन ब्रह्म प्रतिपादयन्ति श्रुतयः, किं तु तत्तद्वाच्यान्निवर्तयन्तो लक्षयन्त्येव तत् । यथोक्तं तैत्तिरीयभाष्यकारैः – "एवं सत्यादिशब्दा इतरेतरसंनिधानादन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यात्तन्निवर्तका ब्रह्मणो लक्षणार्थाश्च भवन्तीत्यतः सिद्धं 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' 'अनिरुक्तेऽनिलयने' इति चावाच्यत्वम्, नीलोत्पलवदवाक्यार्थत्वं च ब्रह्मणः (तै.भा. २-१, पा. २८५) इति । तदेवं शब्दाविषयत्वेऽप्याम्नायैकनिबन्धनत्वं तु ब्रह्मणः प्रत्यगात्मत्वेनाविषयीकरणादितरप्रमाणैः, आम्नायेन च तस्मिन् कल्पितवेद्यत्वादिभेदापनयनेनात्मत्वेन समर्पणात् । यथोक्तं सूत्रभाष्ये – 'अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत् । न । अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हि शास्त्रमिदंतया विषयीभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि, प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति' (सू.भा. १-१-४, पा. १६) इति ॥

ध्यानाभ्यासकर्मसमुच्चयः –

१००. मण्डनाचार्यो कर्मध्यानाभ्यासयोः समुच्चितानुष्ठानेन मिथ्याज्ञानसंस्कारनिवृत्तिं मनुते । तत्रैतानि तद्वचनानि –

> योऽयं श्रवणमननपूर्वको ध्यानाभ्यासः प्रतिषिद्धाखिलभेदप्रपञ्चे 'स एष नेतिनेत्या'त्मनि, स व्यक्तमेव भेददर्शनप्रतियोगी तन्निवर्तयति । स च सामान्येन भेददर्शनं प्रविलापयन् आत्मनापि प्रविलीयते ।....यथा पयः पयो जरयति स्वयं च जीर्यति, यथा च विषं विषान्तरं शमयति स्वयं च शाम्यति ॥ (ब्र. सि. 12-13) । निश्चितेऽपि प्रमाणात् तत्त्वे, सर्वत्र मिथ्यावभासा निवर्तन्ते, हेतुविशेषादनुवर्तन्तेऽपि । यथा द्विचन्द्रदिग्विपर्यासादय आप्तवचनविनिश्चितदिक्चन्द्रतत्त्वानाम् । तथा निर्विचिकित्सादाम्नायादवगतात्मतत्त्वस्यानादिमिथ्यादर्शनाभ्यासोपचितबलवत्संस्कारसामर्थ्यान्मिथ्यावभासानु-

वृत्तिः । तन्निवृत्तयेऽस्त्यन्यदपेक्ष्यम् । तच्च तत्त्वदर्शनाभ्यासो लोकसिद्धः । यज्ञादयश्च शब्दप्रमाणकाः । अभ्यासो हि संस्कारं द्रढयन् पूर्वसंस्कारं प्रतिबद्ध्य स्वकार्यं संतनोति । यज्ञादयश्च केनाप्यदृष्टेन प्रकारेण । श्रेयः-परिपन्थिकलुषनिबर्हणद्वारेणेत्यन्ये । नित्यानां कर्मणां दुरितक्षयार्थत्वात् । ..... जातेऽपि तत्त्वदर्शने, अनाहिते च पटौ संस्कारे, द्रढीयसि च मिथ्यादर्शनजे संस्कारे निश्चया अपि मिथ्यार्था भवन्ति । यथा दिङ्मूढस्या-ननुसंहिताप्तवचसः प्रागिव प्रवृत्तिदर्शनात् । तथा प्रमितरज्जुभावाया अपि रज्ज्वाः प्रमाणाननुसंधाने सर्पभ्रान्त्या भयदर्शनम् । ....तस्माज्जातेऽपि प्रमा-णात् तत्त्वदर्शने, अनादिमिथ्यादर्शनाभ्यासपरिनिष्पन्नस्य द्रढीयसः संस्कार-स्याभिभवाय, उच्छेदाय वा तत्त्वदर्शनाभ्यासं मन्यन्ते । तथा च 'मन्तव्यो निदिध्यासितव्यः' इत्युच्यते । शमदमब्रह्मचर्ययज्ञादिसाधनविधानं च । अन्यथा कस्तदुपदेशार्थः (ब्र. सि. 35) ? ननु विद्यारूपं ब्रह्मैव । न विद्या ब्रह्मणोऽन्या । तच्च नित्यमकार्यम् । तत्र कथं किञ्चिदपेक्ष्येत ? उच्यते । यथोपधानतिरोहितरूपस्फटिकमणिरुपधानावकर्षणं स्वरूपाभिव्यक्तयेऽपेक्षते, तथेहापि द्रष्टव्यम् ॥ ब्र. सि. 37.

अत्र ध्यानाभ्यासेन यदाशास्यते भेददर्शनतत्संस्कारयोः प्रविलापनं पयोविषादिवदिति तत्र ध्यानस्य क्रियारूपत्वात् तत्कार्यस्याप्यनित्यत्वं दुर्वारमिति नालोचितम् । 'नास्त्यकृतः कृतेन' (मुं.) इति हि न्यायोप-बृंहिता श्रुतिः । दिङ्मोहद्विचन्द्रादिमिथ्यावभासानुवृत्तिः, रज्ज्वादिनिश्चया-नामपि संस्कारबलीयस्त्वान्मिथ्यार्थावभासश्चेत्येतदनात्मभूतेषु, दोषप्रयुक्तेषु, प्रमातृत्वानुवृत्तियुक्तेषु दर्शनेषु संभवदपि भयं 'स एष नेतिनेत्यात्मा' (बृ.), 'तत्त्वमसि' (छां.), 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ.) इत्यादिवाक्यजन्ये नित्यापरोक्षात्मविषयके दर्शने कथमपि न संभावितमिति न चिन्तितम् । नेति नेतीति सर्वविकल्पापह्नवसमकालमेव सकलद्वैतनिवृत्तिफलस्य प्राप्तत्वात् पुनरपि प्रमाणान्तरापेक्षणं किमर्थमिति च न मनसि कृतम् । अत्रानुसंधेय-मिदं भाष्यवचनम् —

रज्जुरिव सर्पादिभिर्विकल्प्यमाना स्थानत्रयेऽप्यात्मैक एवान्तःप्रज्ञ-त्वादिरूपेण विकल्प्यते यदा, तदा अन्तःप्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणसम-कालमेव आत्मन्यनर्थप्रपञ्चनिवृत्तिलक्षणफलं परिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम्' ॥ मां. भा. ७, पा. १८६.

यदप्युच्यते शाब्दज्ञानस्य क्षणिकत्वमिति, अस्त्येव तत् । न हि ज्ञातृज्ञानादिद्वैतं द्वैतनिवृत्तेरूर्ध्वमप्यवशिष्यते । 'ज्ञानस्य द्वैतनिवृत्तिक्षणव्यतिरेकेण क्षणान्तरानवस्थानात्, अवस्थाने चानवस्थाप्रसङ्गाद् द्वैतानिवृत्तिः' (मां. भा. ७, पा. १८७) इति भाष्यात् । यस्तु न शक्नोति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुम्, तं प्रत्यनुमन्यत एवास्माभिः पदार्थविवेकार्थं शास्त्रयुक्त्यभ्यासः । नन्वेतदेव मयाप्युच्यमानं श्रवणमननपूर्वकं ध्यानाभ्यास इत्येतदेव तर्हि मयोक्तमुपासनं त्वयापि वाचोयुक्त्यन्तरेणानुज्ञातमिति चेत् । न । त्वदुक्तोपासनस्य शाब्दज्ञान संतानस्य कर्तृतन्त्रभावनारूपत्वेन, तेन वास्तवज्ञानोत्पत्त्यनुपपत्तेः, तत्फलस्य स्थैर्यासंभवाच्च । अपि च परोक्षज्ञानस्यावृत्त्या साक्षाज्ज्ञानमाविर्भवतीति लोकविरुद्धमेवाङ्गीक्रियते त्वया । अस्मदभिमतज्ञानस्य तु वस्तुतन्त्रत्वात्, शास्त्रयुक्त्यभ्यासस्य चाध्यारोपितांशापनयनेनानुभवजननार्थत्वात् । ज्ञानस्मृतिसंतानस्य चार्थप्राप्तत्वात्, संस्काराभिभवाय यत्नान्तरगवेषणं व्यर्थप्रयासमात्रमिति प्रागेवावेदितत्वाच्च (खं. ७३) न किञ्चित्कृत्यमिह ध्यानाभ्यासस्य ॥

कस्तर्हि निदिध्यासनशमदमाद्युपदेशार्थ इति ? उक्तमेतत् पदार्थज्ञानप्रयोजनः श्रवणमननाभ्यास इति । निदिध्यासनं तु यथा शास्त्रोपदेशं स्वसंवेद्यतापादने प्रयत्नविशेषः, अध्यात्मयोगाद्यपराभिधानः । स च वर्णितः प्राक् (खं. ५६) । शमादीनि च यमप्रधानानि प्रत्यक्प्रवणतापादनेन ज्ञानोत्पत्त्यर्थानि । 'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति' (बृ. ४-४-२३) इति श्रुतेः । ननु नाम्नायोऽवाचकः, नाप्यनिश्चायकः प्राक् साधनविशेषेभ्यः । किं तत्र साधनैः ? न । देहेन्द्रियादिष्वहंममाभिमानवतो बहिर्मुखस्य प्रत्यक्पदार्थज्ञानाशक्तौ वाक्यार्थज्ञानानुदयात् । शमादिसंस्कृतान्तःकरणस्तु प्रत्यङ्मुखो भूत्वा पदार्थं जानाति वाक्यार्थं चानुभवतीति न चित्रम् । तदुक्तं

गीताभाष्ये–'शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणम्' (गी. भा. २–२१, पा. २०) इति ॥

अनुवृत्तमिथ्याभ्यासोच्छेदाय यज्ञादयः शब्दग्रमाणका इति त्वत्यन्तोपहास्यम्। यज्ञाद्यनुष्ठानं हि कर्तृत्वलक्षणमिथ्याज्ञानदार्ढ्यायैव भवति, कुतस्तेन मिथ्यावभासोच्छित्तिप्रत्याशा? न हि संतमसेन तमउच्छेदो भवेदिति। एतेनेदमप्यपहस्तितम् – 'यज्ञेन दानेन' इति श्रवणात् कर्माण्यपेक्ष्यन्ते विद्यायामभ्यासलभ्यायामपि। यथा अन्तरेणाप्यश्वं ग्रामप्राप्तौ सिद्धयन्त्यां शैघ्र्यायाक्लेशाय वा अश्वोऽपेक्ष्यते (ब्र. सि. 37)– इति। न हि स्वयं खञ्जस्य शृङ्खलाबन्धः शीघ्रगमनायेति। यदप्युच्यते यज्ञादयः केनाप्यदृष्टेन प्रकारेण मिथ्यावभासानुवृत्तिनिर्बर्हणाय सहायीभवेयुरिति, तदप्यनुचितमनुपपन्नं च। ज्ञानेनाज्ञाननिवृत्तौ तत्संस्कारेणैव त्वसंभावितबाधकेन अज्ञानसंस्कारस्य तत्कार्यस्य च निवृत्त्युपपत्तेः। यदुक्तं **बृहदारण्यकभाष्ये** 'ज्ञानेनाज्ञाननिवृत्तौ गम्यमानायाम् अदृष्टनिवृत्तिकल्पनानुपपत्तेः। यथा अवघातेन व्रीहीणां तुषनिवृत्तौ गम्यमानायाम् अग्निहोत्रादिनित्यकर्मकार्या अदृष्टा न कल्प्यते तुषनिवृत्तिः, तद्वदज्ञाननिवृत्तिरपि नित्यकर्मकार्या अदृष्टा न कल्प्यते ....' (बृ. भा. सं. ३–३, पा. ८००) इति। किमर्थस्तर्हि तेषामुपदेश इति? तदेतच्छ्रुत्यैवाभिहितम् 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ. ४–४–२२) इति। बुद्धिशुद्धिद्वारा विद्योत्पत्तिसाधनत्वमेषामिति स्मर्यते 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' (गी. १८–५) इत्यादिस्थलेषु। उक्तं च भाष्ये 'स्मृतिष्वपि भगवद्गीताद्यास्वनभिसंधाय फलम् अनुष्ठितानि यज्ञादीनि मुमुक्षोर्ज्ञानसाधनानि भवन्तीति प्रपञ्चितम्' (सू.भा. ३–४–२७, पा. ४४६) इति। "तस्मात्, यज्ञादीनि शमदमादीनि च यथाश्रमं सर्वाण्येवाश्रमकर्माणि विद्योत्पत्तावपेक्षितव्यानि। तत्रापि 'एवंवित्' इति विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषा-

संयोगात्तु बाह्यतराणि यज्ञादीनि–इति विवेक्तव्यम्" (सू. भा. ३-४-२७, पा. ४४६) इति च ॥

मोक्षप्राप्तिप्रकारः –

१०१. ब्रह्मसिद्धिकारेण यद्यप्यविद्यैव बन्धः, तदस्तमय एव मोक्षः – इति स्पष्टमुदीर्यते, तथाप्यविद्याकर्मक्षयस्य यत्किञ्चिद् वस्तुवृत्तत्वमपि स्वीक्रियत एवेति भाति । अत्रानुसंधेयानि वाक्यानि –

(१) अविद्यास्तमय एव मोक्षः, यतोऽविद्यैव संसारः । अविद्यास्तमयस्तु विद्योदय एव नान्यः (ब्र. सि. 119) । स्फटिकस्येव रागाद्यपकर्षेण स्वरूपाविर्भावो ब्रह्मप्राप्तिः । ब्रह्मरूपत्वाद् विज्ञानात्मनः । तत्र यथा मलापगमे शुक्लमेव सद् वस्त्रं 'शुक्लं जातम्' इत्युच्यते, तथा मोहावरणविगमे स्वरूपाविर्भावे 'स्वेन रूपेणाभिनिष्पद्यते' (छां.) इत्युच्यते । तथा 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ.) इति । विद्यैव चाविद्यानिवृत्तिः, यद्यग्रहणमविद्या; यतो भाव एवाभावनिवृत्तिः । अथ विपर्यासः, तथापि विरोधितत्त्वज्ञानोदय एव तन्निवृत्तिः । न हि शुक्तिकाज्ञानोत्पादादन्या रजतज्ञाननिवृत्तिस्तत्साध्या, प्रयत्नान्तरसाध्या वा । तयोर्योगपद्यात् ॥ ब्र. सि. 121, 122.

(२) यतश्चाविद्योच्छेदेनैव कर्मोच्छेदः, अतस्तुल्यवत् संशयविपर्यासाभ्यां प्रसंख्यातानि कर्माणि 'क्षीयन्ते चास्य कर्माणि' (मुं. २-२-९) इति । न च कर्मक्षये तत्त्वदर्शनसमनन्तरमेव मुक्तिः स्यात् । तथा च 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये ।' (छां.) इति श्रुतिविरोधः–इति शङ्क्यम् । यत्र इयं श्रुतिः क्षिप्रेव मुक्तिरित्याह, न देहपातप्रतीक्षाम् । अथवा यदि कस्यचिच्चिरम्, तावदेव यावन्न विमोक्ष्यत इत्याह । अतः कस्यचित् सद्य एव देहपातेन तत्कालिकोऽपवर्गः, कस्यचित् कियांश्चित् क्षेपः । द्वितीयो आरब्धकर्मक्षयं भोगेन प्रतीक्षत इति । न च प्रथमपक्षे स्थितप्रज्ञलक्षणाभिधानायोगः । यतः स्थितप्रज्ञो नाम साधक एवावस्थाविशेषं प्राप्तः । द्वितीयस्मिंस्तु पक्षे आरब्धविपाकसंस्काराद् भोक्तारमिवात्मानं प्रत्येत्याभासमात्रेण विद्वान् । न त्वविद्वानिवारूढाभिनिवेशः (ब्र. सि. 130, 131) । स च संस्कारोऽल्पकालस्थायि, न च तन्निवृत्तये हेत्वन्तरमपेक्ष्यते । तत्त्वदर्शनादेव, स्वयमेव वा तस्यापि निवृत्तेः । सा चेयमवस्था जीवन्मुक्तिरिति गीयते । कारणविगमेऽपि कार्यशेषानुवृत्तिः संस्कारात्, अतो लब्धवृत्तिकर्मसंस्कारात्, तद्विपाकसंस्काराद् वा विदुषोऽपि शरीरस्थितिः ॥ ब्र. सि. 132.

अत्र यदुक्तं विद्योदय एवाविद्यास्तमय इति । तदप्रतिषेध्यम् । 'आनन्दं ब्रह्मणो विद्वान् न बिभेति' (तै.), 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई.) इत्यादिश्रुतिप्रमाणावगतत्वात् । 'यथा लोके द्रष्टुश्चक्षुष आलोकेन संयोगो यत्कालस्तत्काल एव रूपाभिव्यक्तिः, एवम् आत्मविषयं विज्ञानं यत्कालं तत्काल एव तद्विषयाज्ञानतिरोभावः स्यात्' (बृ. भा. १-४-१०, पा. ६७६) इति भाष्यवचनाच्च। यत्तु स्फटिकस्येव रागाद्यपकर्षणेन स्वरूपाविर्भावो ब्रह्मप्राप्तिरिति, तदपि युज्यते यदि दृष्टान्ते रागाद्यपकर्षणशब्देन निवृत्तिमात्रं विवक्षितम् । यदि तु दृष्टान्तगतरागादिरिव वस्तुवृत्तेनैवापबाध्यतेऽविद्यादिरिति, तन्नानुमन्यते । यदपि शुक्तिकाज्ञानमेव रजतज्ञाननिवृत्तिरिति। तदपि युज्यत एव । तथा दृष्टत्वात् । परं यद्यात्मज्ञानमपि, शुक्तिकामिव तज्ज्ञानम्, आत्मानं प्रत्यक्षीकरोतीत्युच्यते, तदा तदप्यसदेवेति ब्रूमः । न हि स्फटिके रागाद्यपकर्षणमेवापेक्ष्यते, तत्स्वच्छत्वावगमाय, किं तर्हि विवेकज्ञानमात्रमिति । अत्र भाष्यम् –

"यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राग् विवेकग्रहणाद्गतनीलाद्युपाधिभिरविविक्तमिव भवति, प्रमाणजनितविवेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वरूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन्, तथा देहाद्युपाध्यविविक्तस्येव सतो जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात् समुत्थानं विवेकविज्ञानफलं स्वरूपेण निष्पत्तिः केवलात्मावगतिः । तथा विवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वं सशरीरत्वं च । मन्त्रवर्णात् 'अशरीरं शरीरेषु' (का. १-२-२२), 'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते' (गी. १३-३१) इति च सशरीरत्वाशरीरत्वविशेषाभावस्मरणात् ॥" सू. भा. १-३-१९, पा. ११३.

स्थितप्रज्ञत्वं सिद्धिरेवेति भगवतैवोक्तम् 'एषा ब्राह्मी स्थितिः पार्थ' (गी. २-७२) इति । अतोऽसमीचीन एष वादः कर्मक्षये सद्यः शरीरपात इति । द्वितीयस्तु पक्षः साधीयान् जीवन्मुक्त एव स्थितप्रज्ञ इति । 'स चक्षुरचक्षुरिव' (?), 'अशरीरं वाव सन्तम्' (छा.) इत्यादिश्रुति-

प्रमाणकत्वात् । शरीरधारणं संस्कारानुवृत्तिश्च व्यवहारदृष्ट्या चेदभ्युपगम्यते, तदप्यस्तु ।

(१) अपि च नैवात्र विवदितव्यं ब्रह्मविदा कञ्चित् कालं शरीरं ध्रियते न वा ध्रियत इति । कथं ह्येकस्य स्वहृदयग्रन्थयं ब्रह्मवेदनं देहधारणं च परेण प्रतिक्षेप्तुं शक्येत ? श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरुच्यते ॥ सू. भा. ४-१-१५, पा. ४७५.

(२) 'बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित्कालमनुवर्तत एव ॥ सू. भा. ४-१-१५, पा. ४७५.

इति च भाष्येऽभ्युपगमात् । अत एवात्मज्ञानबाधितः प्रपञ्चावभासो नात्मसंस्पर्शीति न स बन्ध इति कृत्वा शब्दादेव तादृशज्ञानोत्पत्तेरत ऊर्ध्वं ज्ञानाभ्यासकल्पनं मुधेत्यवोचाम (खं. १००) प्राक् । यस्तु 'परोक्षरूपं शब्दज्ञानं प्रत्यक्षरूपश्च प्रपञ्चावभासः । तेन तयोरविरोधेन प्रपञ्चावभासो नात्मसंस्पर्शी । .... उपासनादिना साक्षात्कृतात्मतत्त्वस्य तु विरोधात् सन्नपि प्रपञ्चावभासो नात्मसंस्पर्शीति दुराग्रहव्याधिः (ब्र. सि. 134) सोऽपि तत एव (खं. १००) चिकित्सित इति नात्र वक्तव्यमवशिष्यते । उक्तं च मुण्डकभाष्ये –

(1) 'यथा विधिविषये कर्त्राद्यनेककारकोपसंहारद्वारेण वाक्यार्थज्ञानकालादन्यत्रानुष्ठेयोऽर्थोऽस्त्यग्निहोत्रादिलक्षणः, न तथेह परविद्याविषये । वाक्यार्थज्ञानसमकालमेव तु पर्यवसितो भवति । केवलशब्दप्रकाशितार्थज्ञानमात्रनिष्ठाव्यतिरिक्ताभावात् ॥ मुं. भा. १-१-६, पा. १४५.

इति । तदेवं व्यवहारदृष्ट्या यथैव शरीरित्वं सेन्द्रियत्वं चात्मनः, तथैवास्याविद्याकामकर्मयोगोऽविद्यादृष्ट्यैवेति कृत्वा अविद्यादीनां क्षयः श्रूयते – 'भिद्यते हृदयग्रन्थिः' (मुं.) इत्यादिना । विद्वद्दृष्ट्या तु नित्यनिरविद्यो निष्कामो निष्कर्मा चास्यात्मा । अतः परमार्थतो देहपाताविद्याक्षयविदेहमुक्त्यादि वार्ता मृषैवेति ज्ञेयम् । तदुक्तम् –

(2) 'अविद्यावतोऽविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यादिति चेत् । न । अविद्याकल्पनाविषयत्वाभ्युपगमात् रज्जूषरशुक्तिगगनानां मिथ्या-

सर्पोदकरजतमलिनत्वादिवद्दोष इत्यवोचाम । तिमिरातिमिरदृष्टिवद्विद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यादिति चेन्न । 'ध्यायतीव लेलायतीव' (बृ. ४-३-७) इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् । अनेकव्यापारसंनिपातजनितत्वाच्चाविद्याभ्रमस्य । विषयत्वोपपत्तेश्च " (बृ.भा. ४-४-६, पा. ९१९)

इति । अतो यत्किञ्चिदेतत् ॥

अद्वैतप्रक्रियान्तराणामनुमोदनम् –

१०२. ब्रह्मसिद्धौ कर्मसमुच्चितशाब्दज्ञानाभ्यासजनितब्रह्मसाक्षात्काररूपज्ञानेनाद्वैताधिगम इत्येषा मुख्या प्रक्रिया । शब्दप्रामाण्यनिर्वाहप्रसङ्गेन प्रपञ्चप्रविलयप्रक्रियाया अप्यंशतः प्रवेशोऽत्र लम्भितः । तथा अध्यारोपापवादप्रक्रिया च –

(१) अनधिगतमपि प्रमाणान्तरेणानधिगतसंबन्धं च स्वशब्देन शक्यं शब्देन निरूपयितुं विशेषप्रतिषेधमुखेन । विशेषशब्दानां नञश्च यथायथमर्थैर्विदितसंगतित्वात् । तथा च, इत्थमेव तदुपदिश्यते 'अस्थूलम्' इति सर्वविशेषरहितम् । एतत् कथयति – भेदप्रपञ्चविलयेनेति ॥ ब्र. सि. 26.

(२) विशेषनिवृत्त्यैव तत् शब्देन बुद्धौ निधीयते । सुवर्णतत्त्ववत् । न हि सुवर्णतत्त्वं पिण्डरुचकादिसंस्थानभेदोपप्लवरहितं दृश्यते । न च त एव सुवर्णतत्त्वम् । तत्परित्यागेऽपि भावात् संस्थानान्तरे । अथ चादृष्टसंस्थानभेदोपप्लवविवेकमपि बुद्ध्या भेदापोहद्वारेण स्वयं प्रतीयते । परस्मै च प्रतिपाद्यते । स एष प्रतिपत्तिक्रमः श्रुत्यैव दर्शितः 'स एष नेति नेति' इति । तथान्यैः 'सत्यमाकृतिसंहारे यदन्ते व्यवतिष्ठते ।' तथा परैः 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति ॥ ब्र. सि. 26.

[अत्राध्यारोपितस्य मिथ्यात्वं नोपपादितमिति भगवत्पादसंमताध्यारोपापवादप्रक्रियातो वैलक्षण्यं द्रष्टव्यम् ॥]

ब्रह्मस्वरूपप्रतिपादनप्रसङ्गेन तु शब्दाद्वैतसत्ताद्वैतभावाद्वैतप्रक्रिया अपि किञ्चित्किञ्चिद्रूपान्तरीकृता स्वीकृता उपलभ्यन्ते । तत्र शब्दाद्वैतवादो[1] यथा –

1. अत्र सर्वत्र सिद्धिग्रन्थो न यथावदुदाहृतः, किं तु तत्तद्वादः सङ्क्षेपेणैव संगृहीत इति बोध्यम् ॥

(३) 'परं चापरं च ब्रह्म यदोङ्कारः' (प्र.) इत्यादिश्रुतिषु ध्यानविधेरश्रवणात्, तच्छ्रवणस्थलेऽपि सर्वात्मभावप्रतिपादनपूर्वकत्वात्, शाब्दैकगम्यरूपस्य प्रत्यक्षाद्यविरोधात्, रूपजगतो वाग्रूपात्यागात्, वाक्सूक्ते वाचः सर्वात्मत्वसर्वेशित्वयोः प्रदर्शनात्, वागुपरागविज्ञानवेदनीयस्य जगतो वाग्रूपान्वितत्वावगमात्, शब्दसंस्पर्शेऽर्थे बोधोत्कर्षदर्शनात्, तत्प्रतिसंहारे संचेतितानामप्यसंचेतितकल्पत्वात्, वाग्रूपाधीनमेव चितश्चितित्वम्, वाक्छक्तिरेव वा चितिः। सर्वथापि वाग्रूपाधीनो ज्ञेयबोध इति सर्वं ज्ञेयं वाग्रूपान्वितं गम्यते इति तद्विकारस्तद्विवर्तो वेति सिद्धम् ॥

ब्र. सि. 17-19.

सत्ताद्वैतं यथा –

(४) सर्वभेदप्रत्यस्तमयमुखेन श्रुतिषु निरूपणाद् ब्रह्म सत्तासामान्यमित्युच्यते। निर्विशेषस्य सामान्यस्याभाव एव शशविषाणवदिति ये मन्यन्ते मीमांसकाः, तेषां निर्विशेषविशेषैरेव हेतोर्व्यभिचारो दर्शयितव्य इति ॥

ब्र. सि. 37.

भावाद्वैतं यथा –

(५) द्विविधा धर्माः-भावरूपा, अभावरूपाश्चेति। तत्राभावरूपा नाद्वैतं विघ्नन्ति। 'विज्ञानमानन्दम्' (बृ.) इत्यत्र यद्यानन्दो भावः, तस्य धर्मित्वे विज्ञानं धर्मः स्यात्, विज्ञानस्य धर्मित्वे आनन्दो धर्मः स्यात्। तथा च धर्मधर्मिणोर्भेदाद्द्वैतविघातः। एवमेकस्य रूपद्वयप्रतिपत्तौ। तस्मात्, विज्ञानात्मनो ब्रह्मणो दुःखाभावोपाधिरेवानन्दशब्दः ॥ ब्र. सि. 4.

तत्र 'नामरूपे व्याकरवाणि' (छां.) इति श्रुतेः, 'ओमित्येतदक्षरं सर्वम्', 'सर्वं ह्येतद् ब्रह्म' इति च पर्यायेणाभिधानप्राधान्येनाभिधेयप्राधान्येन च निर्देशात्, तुरीयात्मन ओंकारस्य च सममेव प्रपञ्चोपशमाद्वैतात्मत्वेनैवोपसंहारात् शब्दार्थयोरुभयोरपि तत्त्वं ब्रह्मेत्यवसीयते। तथैव सुषुप्तावनुभूयते चेति शब्दब्रह्मवाद्युदाहृतश्रुतयो युक्तयश्चैतदविरोधेन नेया–इति स्पष्टम् ॥

सत्ताद्वैतवादे सन्मात्रं ब्रह्म सर्वत्र भेदेष्वनुगतम् इति कृत्वा सामान्यमित्युच्यते चेत्, न कोऽपि दोषः। सन् घटः, सन् पटः, सन् हस्तीति

सर्वत्रानुगमादेव । उक्तं हि मण्डनाचार्येणापि वाक्यशेषेण 'सामान्यं तूक्तं ब्रह्मवादिभिर्विशेषप्रत्यस्तमयमुखेन निरूपणादुपचारात् (ब्र. सि. 38) इति । यदि तु वैशेषिकाभिमतसत्तासामान्याभेदोऽपीष्टः, तर्हि नेति वक्तव्यम् । काणादकल्पितायाः सत्तायाः प्रागुत्पत्तेः कार्यसमवायादर्शनात् । यथोक्तं छान्दोग्यभाष्ये – 'नैवेदं कार्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः । प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात् । न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति' (छां. ६-२-१, पा. ५०७) इति । अधिकं तु सामान्यविशेषप्रक्रियाप्रकरणतो(खं. ३७)ऽवगन्तव्यम् ॥

सिद्धिकाण्डे 'किं तर्हि शब्देन प्रतिपाद्यते ? प्रपञ्चाभावः' (ब्र. सि. 157) इति लिखितं दृष्ट्वा केचिदाहुर्भावाद्वैतवादोऽपि ग्रन्थकारस्य सम्मत एवेति । नैतत् साधु लक्ष्यते । यत्कारणम् भावाद्वैतमतमनूद्य ब्रह्मकाण्डे सिद्धान्तं प्रक्रमते मण्डनाचार्यः – 'अत्रोच्यते । विशिष्टस्याह्लादात्मनः प्रकाशस्य चान्द्रमसस्येव शब्दद्वयेन प्रतिपादनान्न दोषः' इति । उपसंहरति च 'विज्ञानमानन्दं ब्रह्म' इत्यानन्दभेदो विज्ञानभेदो वा ब्रह्मरूपमिति शब्दद्वयेनावगम्यते । .... तस्मादात्मप्रकाशप्रकृष्टानन्दस्वभावमेव ब्रह्मेति युक्तम्' (ब्र.सि. 5) इति । सिद्धिकाण्डवाक्यं तु संसृष्टार्थतामाह शब्दस्य । शाब्दज्ञानाभ्यासजन्यसाक्षात्कारेणैव तु परमपुरुषार्थप्राप्तिमङ्गीकुरुते ग्रन्थकारः (ब्र. सि. 35, 36, 154) इत्युक्तम् । साक्षात्कृतात्मतत्त्वस्यापि तु प्रपञ्चावभासमनुमन्यतेऽसाविति (ब्र. सि. 134) च । अतो भावाद्वैतवाद पक्षपात्येव ग्रन्थकार इतीदं विमृश्य निर्णेयं विद्वद्भिरिति भाति ॥

उपसंहारः –

१०३. अनुशाङ्करवेदान्तप्रास्थानिकेषु प्रायशो नैव सन्ति तादृशा ये मीमांसानिष्णातमण्डनाचार्यविचारसरण्या न प्रभाविताः । ख्यातिबाधविचारः, प्रमाणस्वभावनिरूपणम्, प्रत्यक्षागमयोर्विरोधे सत्यतरस्वीकारे विनिगमना, पदार्थवाक्यार्थतत्त्वम्, ब्रह्मणि शास्त्रप्रामाण्यम्,

प्रतिपत्तिविधिपरीक्षा, ज्ञानकर्मसंबन्धनिर्णयः, श्रवणादीनां विधेयत्वाविधेयत्वे निर्णयः, अविद्यास्वरूपाश्रयविषयविमर्शनम्, वेदान्ते तर्कस्थानपरीक्षा, भेदनिरासः, शाब्दज्ञानाभ्यासविचारः, ब्रह्मसाक्षात्कारविमर्शः, जीवन्मुक्ति-विदेहमुक्तिविवेकः – इत्यादिषु विचारगोचरेष्वद्य यावन्मण्डनमिश्राभिमत-रीतिरेव प्रीत्यावहा वेदान्ततत्त्वपरिशीलनरसिकानामित्येषा नैवातिशयोक्तिः। अत एव ब्रह्मसिद्धिरर्वाचीनसर्ववेदान्तप्रस्थानप्रवेशिकास्थानीयेति कृत्वेह तदादृतप्रक्रिया वितत्य परिशीलितेति क्षन्तव्यं ग्रन्थपरिमाणवैरूप्यमुत्तर-ग्रन्थार्थवैशद्यमभिलक्षयद्भिर्जिज्ञासुभिः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

मण्डनप्रस्थानपरीक्षा नाम षष्ठः काण्डः

---

७. वार्तिकप्रस्थानपरीक्षा

वार्तिकप्रस्थानस्याकरग्रन्थाः –

१०४. अथ वार्तिकप्रस्थानसमालोचनं प्रारभ्यते। तत्र तैत्तिरीय-बृहदारण्यकभाष्यवार्तिके नैष्कर्म्यसिद्धिश्चेत्येते श्रीमत्सुरेश्वराचार्यकृतत्वेन सर्वग्रन्थशोधकसंप्रतिपन्नाः – इति तानेवाश्रित्येह चिन्ता प्रतायते। मानसोल्लासाख्यं दक्षिणामूर्तिस्तोत्रव्याख्यानम्, याज्ञवल्क्यस्मृतिव्याख्या बालक्रीडाख्या च विश्वरूपाचार्याभिधैर्विरचितत्वेन ख्याते न केवलमैतिहासिकविप्रतिपत्तिहेतोः, किं तु वार्तिकाभिप्रायविसंवादख्यापनादपि नात्र वार्तिकप्रस्थानाकरत्वेन स्वीक्रियेते। पञ्चीकरणवार्तिकमप्यत एव कारणादत्र नालम्ब्यते विचारणे। तदत्राधस्तान्निर्दिष्टग्रन्थत्रयमेव तूपजीव्य वार्तिक-प्रस्थानतत्त्वनिर्णयश्चिकीर्ष्यते ॥

ब्रह्मसिद्धिसंबन्धवार्तिकयोर्निकटसंबन्धः –

१०५. तत्र ब्रह्मसिद्धिसुरेश्वरवार्तिकयोः – विशिष्य च सिद्धि-बृहदारण्यकसंबन्धवार्तिकयोः – परमतखण्डने विचारानुक्रमसाम्यं च बहुशो दरीदृश्यते इत्यवोचाम (खं. ९१) मण्डनप्रस्थानपरीक्षारम्भे। तदत्र किञ्चित् प्रपञ्च्यते उभयप्रस्थानतुलनाकुतूहलिनां सौकर्यार्थम् ॥

तत्र ब्रह्मसिद्धौ ब्रह्मकाण्डे ब्रह्मण आम्नायैकसमधिगम्यत्वप्रतिपादन-प्रस्तावेन कर्मज्ञानकाण्डयोः संबन्धे विविधानि प्रस्थानान्यनुक्रम्य दूषितानि। वार्तिकेऽपि तानि तथैव प्रायशोऽक्षरशोऽपि तदनुक्रमेणैव दूषणायानु-क्रान्तानि। तद्यथा –

(१) भेदप्रपञ्चविलयवादः – सर्वत्रैवाम्नाये क्वचित् कस्यचिद् भेदस्य प्रविलयो गम्यते। तथा च भेदविलयद्वारेण दृष्टेनैव कर्मविधय आत्म-ज्ञानाधिकारोपयोगिन इति मतम् ॥ ब्र. सि. 27; सं. वा. ३७८–३८३, तत्खण्डनं च (ब्र. सि. 28–30; वा. ३८४, ३९८, ४२४–४२६)[1].

1. अत्र दत्ताः सङ्ख्या सिद्धिपत्रपार्श्वसूचकाः, वार्तिकसूचकाश्च ॥

(२) कामविलयवादः – सर्वकामावाप्तिद्वारा आत्मज्ञानेऽधिकारं प्रापयति कर्मकाण्ड इति मतम् ॥ (ब्र. सि. 27; वा. ३४३–३४४), तद्दूषणं च (ब्र. सि. 30; वा. ३४५–३५४) ॥

(३) ऋणत्रयापाकरणवादः – देवर्णादिऋणत्रयापकरणादधि ज्ञानाधिकारमवतारयन्ति कर्मविधय इति मतम् । तद्दूषणं च (ब्र. सि. 36; वा. ४३६) ॥

(४) आत्मज्ञानं कर्तृसंस्कारतया कर्माधिकारानुप्रवेशीति मतम् (ब्र. सि. 28); तद्दूषणं च (ब्र. सि. 31; वा. ४२७–४३५) ॥

(५) अखिलस्याप्याम्नायस्य कार्यैकनिष्ठत्वम् (ब्र. सि. 23, नियोगकाण्डश्च; वा. ४७७–५४१)। तत्प्रत्याख्यानं च (ब्र. सि. 25–26; वा. ५४२–७६०) ॥

(६) संयोगपृथक्त्वेन ज्ञानोत्पत्त्यर्थतया.

(७) पुरुषसंस्कारतया वा विद्याङ्गभावः कर्मणाम् इति पक्षद्वयम्, तदङ्गीकरणं च (ब्र. सि. 27–28, 36; विविदिषार्थं कर्माणि ब्रह्मावाप्त्यर्थं तत्त्याग इति तु वा. १४, ३२२, संस्कारापक्षाङ्गीकारः वा. ८७, १९२, ३०१) ॥

(८) भेदनिराकरणम् (ब्र. सि. तर्ककाण्डः, सं. वा. ९१७–९८६)–

इत्येतेषु प्रस्थानान्तरविमर्शनेषु भूरिशः शब्दतोऽर्थतश्च साम्यं लक्ष्यते उभयोरपि ॥

वार्तिके परामृष्टानि वादान्तराणि –

१०६. तत्र संबन्धवार्तिके ब्रह्मसिद्धावलक्षितानि एतानि मतान्तराणि दूषणायानूदितानि दृश्यन्ते –

(१) मुक्त्यर्थम् उपासना विधीयत इति वादः (सं. वा. २०), (२) कर्मभ्य एवात्मन्यवस्थानलक्षणो मोक्षः प्राप्यत इति वादः (सं. वा. ३२), (३) ज्ञानकर्मणोस्त्रेधा समुच्चयेन मोक्ष इति वादभेदाः (सं. वा. ३५७), (४) प्रसंख्यान(ज्ञानाभ्यास)विधिवादः (सं. वा. ७६१), (५) भावनार्थं ज्ञानमिति वादः (सं. वा. ४३८), (६) ऐकात्म्यज्ञानं सांपादिकमिति वादः (सं. वा. ४३९), (७) जागरितादिवासनानिरोधवादः (सं. वा. ४४१–४४२), (८) मनोनिरोधवादः (सं. वा. ४४३) – इत्यादयः । ते ब्रह्मसिद्धिकारेण किमिति नानूदिता इति न ज्ञायते ॥

मण्डनप्रस्थानदूषणं वार्तिके –

१०७. मण्डनसुरेश्वरयोरैक्यमिदानीं वादग्रस्तमेव वर्तते । भेदेऽपि तयोः, अद्वैतित्वाविशेषाद् द्वैतिविरुद्धयुक्तीरन्योन्येनान्योन्यस्य ग्रन्थादाहृत्य स्वग्रन्थे निवेशनं नाशक्योहनम् । यस्मान्मण्डनग्रन्थेऽपि क्वचित् क्वचिद् भाष्यकारीययुक्तयो वचनव्यक्तयश्च उपलभ्यन्त एव । तस्माद्द्वैतिनो द्वैतिखण्डनार्थं ता एव युक्तीर्थैत्किञ्चिद्विकृत्य प्रयुञ्जते स्म बहोः कालात्–इत्यपि शक्यं कल्पयितुम् । तदानीं सुरेश्वराचार्याः परमतखण्डनाय मण्डनादियुक्तीर्यावदविरोधम् अङ्गीकृत्य स्वप्रक्रियाविरुद्धानि तु स्वयूथ्यकल्पनान्यपि खण्डयामासुः, तदर्थमेव च ते नियुक्ताः स्वगुरुभिरिति संभाव्यते ॥

नैष्कर्म्यसिद्धिग्रन्थस्थविषयसमालोचनयाऽपि एतद् दृढीभवति –

> वेदान्तोदरसंगूढं संसारोत्सारि वस्तुगम् ।
> ज्ञानं व्याकृतमप्यन्यैर्वक्ष्ये गुर्वनुशिक्षया ॥ नै. १–३.
> न ख्यातिलाभपूजार्थं ग्रन्थोऽस्माभिरुदीर्यते ।
> स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषाश्मसु ॥ नै. १–६.

– इति श्लोकयोरवलोकनादिदं भाति यन्मण्डनाचार्यस्य ख्यातिर्यदा विप्रसृता, तदा ज्ञानकर्मणोः समुच्चयं (ब्र. सि. 154) मोक्षार्थमिच्छतस्तस्य पराभवार्थं ज्ञानकर्मणोरत्यन्तविरोधं केवलज्ञानेनैव निष्क्रियात्मन्यवस्थानं च तिष्ठापयिषयैव नैष्कर्म्यसिद्धिं नामान्वर्थाभिधानं प्रकरणं सुरेश्वराचार्याः प्राणैषुरिति ॥

परोक्षरूपं शाब्दज्ञानम्, उपासनादिना साक्षात्कृतात्मन एव तु मुक्तिः (ब्र. सि. 134), तत्त्वदर्शनाभ्यासाद् यज्ञाद्यनुष्ठानसमुच्चितादेव च मिथ्यावभासानुवृत्तिनिवृत्तिः (ब्र. सि. 35) इति चैतत् प्रत्याख्यातम् –

> नित्यमुक्तत्वविज्ञानं वक्याद्भवति नान्यतः ।
> वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ॥

अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् ।
एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥
सदेवेत्यातिवाक्येभ्यः प्रज्ञा स्फुटतरा भवेत् ।
दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि ॥

उ. सा. १८–१८२ प्रभृति १८४.

–इति स्वगुरुवाक्यप्रमाणोदाहरणेनैव (नै. ४–३१, ३२, ३३; सं. वा. २०६, २०७, २०८) प्रसंख्यानवादश्च दूषितः, समुच्चयवादोऽपि निरस्तो वार्तिके, नैष्कर्म्यसिद्धौ च । समुच्चयनिषेधार्थमेवोक्तं वार्तिककारैः–

पराचः कामानित्येवं कामानित्यपरं तथा ।
योऽकाम इति तद्वच्च श्रुतिः कामनिषेधनी ॥

इति इहामुत्रार्थभोगविरक्तस्यैव मोक्षेऽधिकारमुक्त्वा –

अविद्याया न चोच्छित्तौ ज्ञानादन्यदपेक्ष्यते ।
ज्ञानोत्पत्तौ न चैवान्यच्छमादिभ्यो ह्यपेक्ष्यते ॥
शमाद्युत्पत्तये नान्यद् बुद्धिशुद्धेरपेक्ष्यते ।
बुद्धिशुद्धौ च नित्यादि कर्मभ्यो नान्यदिष्यते ॥
आत्मज्ञानैकहेतुत्वाद् वाङ्मनःकायकर्मणाम् ।
आत्मज्ञानेन तद्बाधात् कर्मापेक्षा कुतो भवेत् ॥

वा. १–३–९७, ९८, ९९, १००.

इति । एवम्–सर्वस्यैव वाक्यस्यानधिगतो विशेष एव प्रमेयः । ब्रह्मवाक्येषु कारणसामान्यं वा सत्सामान्यं वा 'यतो वा', 'अस्थूलम्' इत्यादिपदार्थैः संसर्गाद् भेदाच्च प्रमाणान्तरानधिगतं विशेषरूपमासादयति, वाक्यस्य च प्रमेयं भवति (ब्र. सि. 157)–इति, अथवा शब्देन प्रपञ्चप्रविलयः प्रतिपाद्यते । तत्र प्रपञ्चाभावोऽपि सिद्धः निषेधोऽपि सिद्धः, तयोः संसर्गात्तदभावप्रतिपत्तिः (ब्र. सि. 157) इति मतद्वयमपि वार्तिककारैः खण्डितम् । ब्रह्मात्मैकत्ववाक्येषु पदार्थसंसर्गो भेदो वा नोच्यते, अद्वितीय-प्रत्यगात्मनोऽवाक्यार्थत्वात् इति पदे पदे ब्रुवाणैः (नै. ३–२५, २६, ७६; सं. वा. ९०२, ९०९, ९१०; वा. १–४–१४०६, १४०७,

१४०८, १४३१ ; वा. ३–४–२९, ३३, ४६ ; वा. ३–५–१००, १८४, १९०), 'पूर्णमेवावशिष्यते' इति वाक्यव्याख्यानावसरे च –

> क्षेत्रज्ञेश्वरभेदेन ह्यभिन्नं वस्त्वविद्यया ।
> भिन्नं बोधात्तमोध्वस्तौ नेतीत्यात्माऽवशिष्यते ॥
> न भेदो न च संसर्गो नाप्यभावोऽवसीयते ।
> तन्मूलाज्ञानविध्वस्तेर्यथोक्तागममानतः ॥ वा. ५–१–२१, २२.

इति ॥

वार्तिके भर्तृप्रपञ्चमतविमर्शः –

१०८. इतीदं सर्वमुच्यते मण्डनमतमेव प्राधान्येन नैष्कर्म्यसिद्धौ वार्तिकयोश्च निराचिकीर्षितमिति कृत्वा । भर्तृप्रपञ्चनिराकरणाभिप्रायेऽपि कल्प्यमाने सर्वमिदं यथोपवर्णितम् उपनेतुं शक्यत एवेति तु न प्रसर्तव्यम् । तस्मिन् हि कल्पने जाग्रति नैकाः प्रबलतरा युक्तयः । यतो भर्तृप्रपञ्चा अपि द्वैताद्वैतवादित्वात् संसर्गं भेदं चाङ्गीकुर्वन्त्येव वाक्यार्थत्वेन । तदीयमेव हि व्याख्यानं 'पूर्णमदः' इति वाक्यस्यानूद्य प्रतिविधानावसरे उपस्थापितं यथोदाहृतं वार्तिकं 'न भेदो न च संसर्गो नाप्यभावोऽवसीयते' (वा. ५–१–२२) इत्यादि । भर्तृप्रपञ्चा ज्ञानकर्मसमुच्चयवादिन एव (खं. ८७) मण्डनवत्, शाब्दज्ञानव्यतिरेकेण साक्षात्कारूपं ज्ञानान्तरमप्यपेक्षितव्यमिति तैरप्यङ्गीकृतमेव (खं. ८४) । नैष्कर्म्यसिद्धौ यद्यपि 'वाक्यजनितम् अहं ब्रह्मेति विज्ञानं संसर्गात्मकत्वादात्मवस्तुयाथात्म्यावगाह्येव न भवति' इति वादिनामपि मतमनूदितम् (नै. १-६७ सं.), तथापि तद् 'विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' (बृ. ४–४–२१) इति विधिमङ्गीकुर्वाणानामेव, न तु 'तदपि वा (विधानं) व्यर्थमेव, प्राप्तार्थत्वात् । साक्षात्करणफलं हि तत्तदनुचिन्तनं' दृष्टार्थम् (ब्र. सि. 154) इति मण्डनसंमतं विकल्पान्तरं क्वापि विमृष्टं सुरेश्वराचार्यैः । किञ्चान्यत् बृहदारण्यकभाष्यप्रणयनमेव कृत्स्नं भर्तृप्रपञ्चनिराकरणपूर्वकं

स्वप्रक्रियास्थापनाय, तदर्थमेव तु भाष्यवार्तिकनिर्माणम् इत्यपि कल्पयितुं शक्यतेतराम् । यस्मात् प्रतिपदं भाष्ये वार्तिके च तन्मतदूषणं प्रदर्श्यैव स्वाभिमतः श्रुत्यर्थ उपस्थाप्यत इत्येतदाविष्कृतमस्माभिः पञ्चमे काण्डे विस्तरशः । न त्वेवंविधो मण्डनखण्डनप्रपञ्चो दृश्यते भाष्ये वार्तिके वा । अपि चेदं वाक्यं लिखितमुपलभ्यते भाष्ये भर्तृप्रपञ्चानुद्दिश्य – 'तस्मात्, श्रुत्यर्थकल्पनाकुशलाः सर्वे एवौपनिषदर्थमन्यथा कुर्वन्ति । तथापि वेदार्थश्चेत् स्यात् कामं भवतु न मे द्वेषः' (बृ. भा. पा. ७५३) इति । वार्तिककारैश्च –

सामान्येन समस्तं तद्विशेषैर्व्यस्तमेव च ।
कृत्स्नमेवं परं ब्रह्म सदोपासीत यत्नतः ॥
अवस्थावदवस्थाभिः क्वचित्कार्त्स्न्यं प्रचक्षते ।
कार्यकारणरूपेण क्वचिद्व्याचक्षते तथा ॥
भागभागिविभागेन नाभिनेम्यरवत्तथा ।
व्याचक्षते महात्मानः संप्रदायबलात् किल ॥

वा. १-४-९४८ प्रभृति ९५०, पा. ६२३-६२४.

संप्रदायविदस्त्वत्र नानात्वैकत्ववादिनः ।
भिन्नाभिन्नात्मकं ब्रह्म नामरूपादिवज्जगुः ॥

वा. १-६-४६, पा. ८७६.

'अन्ये त्वत्राभिसंबन्धमेवं व्याचक्षते बुधाः' (वा. २-१-२१, पा. ८९०), 'परीक्ष्यैतद् द्वयं ग्राह्यं स्वयमेव परीक्षकैः' (वा. २-१-२५५, पा. ९२९), 'अप्यौपनिषदंमन्याः केचिदत्यन्तनैपुणात् । प्रक्रियां रचयित्वाहुर्वेदान्तार्थाविपश्चितः ॥' (वा. २-२-९०, पा. १००७), व्याचक्षतेऽन्यथैवेमं दृष्टान्तं केचिदात्मनः । समस्तादिप्रतिज्ञार्थसिद्धये ब्रह्मवादिनः ॥ (वा. २-५-६७, पा. ११२३), 'वैश्वानरवरादत्र केचिदाहुर्महाधियः । देहद्वयविमोकेऽपि नैव मुक्तः पुमानिति ॥' (वा. ३-२-४१, पा. ११५४), 'समस्तव्यस्ततावाख्या तस्मादन्धपरम्परा । वैश्वानरवरादेव न तु न्यायानुसारतः ॥' (वा. ४-३-११८७, पा. १५९०), 'हुतभुग्वरसंश्रयात्' (वा. पा. १७८५), 'इति श्रीमन्महाभर्तृप्रपञ्चस्य महीयतः । व्याख्यामधीयते धीरा न्यायागमबहिष्कृतम्' (वा. ४-४-४१२, पा. १७८९), 'व्याचख्युरतिनैपुणात्' (वा. पा. १९५३) –

इत्यादिस्थलेषु शतशः खेदरहितं नानारसब्रह्मवादो समुच्चयवादश्चोपहास-पूर्वकं विनिन्दितः। अव्यावृत्ताननुगतं ब्रह्मात्मस्वरूपम् इति पदे पदे (वा. पा. ५४०, ५६५, ७२०, ९०१, ९४७, ९९४, १०३७, ११०२, १११११, १३४२, १४४१, १८१४, १८५९, १८६०, १९३६, १९५०) विशिंषन्तो वार्तिककाराः समस्तव्यस्तब्रह्मवादिन एव भर्तृप्रपञ्चान् मनसि निधापितवन्त इति संभाव्यते। तदेतत् सर्वमालोच्य भर्तृप्रपञ्चा एव प्राधान्येन व्युदसनीयतया समुद्दिष्टा इति कल्पयितुं युक्ततर-मिति प्रतिभाति। अत्रैतदपि प्रसक्तानुप्रसक्तं चिन्तनीयम्, यदि मण्डनकाले भर्तृप्रपञ्चवृत्तिरेतादृशं सुप्रसिद्धा आसीत्, तत्किमिति स विद्वान् नैव तन्मतं कटाक्षेणापि वीक्षितवानिति? अत्र तत्त्वं निर्णेतुमशक्ता वयं ग्रन्थ-पुरातत्त्वशोधकानां सविधे विनिर्णयायेमं संशयग्रस्तविचारमुपस्थाप्य प्रकृतमेवानुवर्तामहे॥

आत्मैकत्वस्यानुभवस्वरूपत्वात् स्वतःसिद्धत्वम् –

१०९. यथैव भाष्यकारैरात्मनः स्वतःसिद्धत्वमुपक्षिप्तम् 'न ह्यात्मा आगन्तुकः कस्यचित्, स्वयंसिद्धत्वात्। न ह्यात्मा आत्मनः प्रमाण-मपेक्ष्य सिध्यति' (सू. भा. १–१–७, पा. २६८) इति ब्रुवाणैः, एवमेव वार्तिककारैरपि 'न हि वयं प्रमाणबलेनैकात्म्यं प्रतिपद्यामहे। ऐकात्म्यस्य स्वत एवानुभवमात्रात्मकत्वात्। अत एव सर्वप्रमाणावतारासंभवं वक्ष्यति, प्रमाणव्यवस्थायाश्चानुभवमात्राश्रयत्वात् (नै. १–८९)–इति वदद्भिः। प्रमाता च प्रमाणं च प्रमेयो निश्चितिस्तथा। यत्सांनिध्यात् प्रसिध्यन्ति तत्सिद्धौ किमपेक्ष्यते॥ (वा. १–४–८७०, पा. ६०७.) इत्यादि-स्थलेषु (पा. ९७८, १२२३, १४१०, १५३९, ...) प्रमाण तद्भावादीनामप्यनुभवरूपात्मनैव सिद्धम् आत्मनश्च स्वयंसिद्धतां भूरिश आहुर्वार्तिककृतः॥

वार्तिकप्रस्थाने अविद्या –

११०. भाष्यकारैस्तावत् 'तमेतमेवंलक्षणम् अध्यासं पण्डिता अविद्येति मन्यन्ते' (सू. भा. पा. २) इत्युक्तम्। ब्रह्मसिद्धिकारेण तु जीवेषु 'नैसर्गिकी अविद्या' (ब्र. सि. 12) इत्युक्त्वा 'अग्रहणम् विपर्ययग्रहणं वा' (ब्र. सि. 9) इति विकल्प्य 'विभ्रम एवाविद्या' (ब्र.सि. 11) इति पक्षे आदरः कृतः, 'अनादित्वादुभयोरविद्याजीवयोर्बीजाङ्कुरसंतानयोरिव नेतरेतराश्रयत्वप्रक्लृप्तिमावहति' (ब्र. सि. 10)-इति चोक्तम्। भर्तृप्रपञ्चैस्तु– 'अहं सर्वोऽस्मीत्यसंबोधोऽविद्या (खं. ८२, पा. १६१), सा च भूम्येकदेशोत्थोषरवत् आत्मनः स्वत उत्थिता' (खं. ७९, पा. १५५)[1] इत्युक्तम्। वार्तिककाराः पुनर्ज्ञानाभावं तत्कार्यं चाविद्येत्याचक्षते। सा च स्वानुभवैकसिद्धा, न प्रमाणसिद्धेति च। एवमनुभवमात्रसिद्धत्वात् प्रमाणादपैति सा सकार्यम्, अविचारितसिद्धत्वात् – इतीदं चासकृदुक्तं तैः 'ऐकात्म्याप्रतिपत्तिर्या स्वात्मानुभवसंश्रया। साविद्या संसृतेर्बीजं तन्नाशो मुक्तिरात्मनः॥' (नै. १–७), 'अविचारितसंसिद्धि तमोवत्स्यात्तदुद्भवम्। कृत्स्नं जगदतो मोहध्वस्तौ ध्वस्तं भवेच्चितिः॥' (वा. १–४–१३२९, पा. ६९८), 'यतोऽनुभवतोऽविद्या ब्रह्मास्मीत्यनुभूतिवत्। अतो मानोत्थविज्ञानध्वस्ता साप्येत्यथात्मताम् (सं. वा. १७७)–इति च प्रमाणबाध्यत्वं तस्यास्तत्र तत्रोच्यते। अत्र वार्तिकश्लोका विलिख्यन्ते यथोक्तार्थप्रकाशनाय–

(१) **न जानामीत्यविद्यैका नित्या तत्कारणं मता।**
स्वप्रसिद्ध्यैव सा सिध्येन्निशौलूकीव वासरे॥ तै. वा. २–१७६.

[तत्कारणम् – आत्मावच्छेदकारणम्, स्वप्रसिद्ध्यैव – स्वानुभवेनैव।]

---

1. भर्तृप्रपञ्चमतविमर्शावसरे भाष्येऽनूदितं वाक्यमिह कंसे परामृष्टम्। **वार्तिके तु स्पष्टं परामृष्टं टीकायां चोल्लिखितं वाक्यमित्थमस्ति –**

(a) **भगवतः शक्तिरविद्या नैसर्गिक्यपि तस्मादेव व्यक्ता सती तदेकदेशं विकृत्य तस्मिन्नेव जीवे तिष्ठति॥**

(b) **यथोषरादिर्भूम्येकदेशधर्मो न सर्वभूधर्मः, तथा अविद्या परस्य धर्मो न॥ वा. २–३–१२२, १२३, पा. १०१३.**

(२) प्रमाणोत्पन्नया दृष्ट्या योऽविद्यां द्रष्टुमिच्छति ।
दीपेनासौ ध्रुवं पश्येद् गुहाकुक्षिगतं तमः ॥ तै. वा. २-१७७.

(३) अनात्मेतीह यद्भाति तदविद्याविजृम्भितम् ।
तस्मादविद्या साप्युक्ता विद्या त्वात्मैकरूपिणी ॥ तै.वा. २-१७८.

(४) आत्माग्रहातिरेकेण तस्या रूपं न विद्यते ।
अमित्रवदविद्येति सत्येवं घटते सदा ॥ तै. वा. २-१७९.

[आत्माग्रहणमेव तस्या अनात्मरूपाया रूपम् । अत एव विद्याविरुद्धत्वात् अविद्येति तस्या अपि व्यपदेश इत्यर्थः ॥]

(५) उत्थानं चाप्यविद्यायाः परस्यादात्मनः स्वतः ।
ऊषरादिवदित्यादिकल्पना नोपपद्यते ॥
अनिर्मोक्षप्रसक्तिः स्याद्यद्यविद्या परात्मनः ।
निरात्मवादसक्तिश्च मोहोच्छेदे भवेदिह ॥
बृ. वा. २-३-१३०, १३१.

[भर्तृप्रपञ्चमतनिरासार्थमिदं श्लोकद्वयम् ।]

अज्ञानविषये आक्षेपपरिहाराः –

१११. (१) ब्रह्मसिद्धौ अविद्यानिवृत्तिविचारप्रसङ्गादिदं चोद्यमुत्थापितम् –

'नित्यस्य ब्रह्मणः स्वभावस्यानुच्छेदः । अथाविद्या न तत्स्वभावः, अर्थान्तरं ब्रह्मण आपद्येत, न वा स्यात् । तत्र किं निवर्त्यम् ? अथाग्रहणमविद्या । सा कथमर्थान्तरं स्यात् ? विद्या तु तन्निवर्तिका नित्या ब्रह्मणि, न च ब्रह्मणोऽन्योऽस्ति । यदि विपर्ययग्रहणमविद्या, तर्हि कथं तस्या निवृत्तिः ? तस्या ब्रह्मस्वभावत्वेऽस्वभावत्वे वा कथितदोषात् इति ॥
ब्र. सि. 8-9.

[अत्राक्षेपसारमात्रं संगृहीतम् ।]

अस्य च परिहारः –

'नाविद्या ब्रह्मणः स्वभावः, नार्थान्तरम्, नात्यन्तमसती, नापि सती । एवमेवेयम् अविद्या, माया, मिथ्याभास इत्युच्यते । स्वभावश्चेत् कस्यचित्, अन्योऽनन्यो वा परमार्थ एवेति नाविद्या । अत्यन्तासत्त्वे खपुष्पसदृशी न व्यवहाराङ्गम् । तस्मादनिर्वचनीया (ब्र. सि. 9) इति कल्पनया ब्रह्मभिन्नानामेव जीवानामविद्येति च मोक्षो दोषः ॥ ब्र. सि. 10.

इह चोद्यमनूदितं श्लोकवार्तिकात् –

स्वाभाविकीमविद्यां तु नोच्छेत्तुं कश्चिदर्हति ।
विलक्षणोपपाते हि नश्येत् स्वाभाविकं क्वचित् ।
न त्वैकात्म्याभ्युपायानां हेतुरस्ति विलक्षणः ॥ श्लो. वा. पा. ६६३.

इति । परिहारस्त्वविद्याया अनिर्वचनीयत्वाभ्युपगमेन । वार्तिके तु नाविद्याया अनिर्वचनीयत्वमुपदिष्टं दृश्यते क्वचिदपि । 'न जानामीत्यविद्या' इत्यग्रहणरूपत्वं च तस्याः स्वीकृतम् । अतोऽस्य चोद्यस्य तत्र कथं परिहारोऽभीष्ट इति विचारणीयम् । तत्रेमे श्लोका परिभावनीयाः –

स्वाभाविक्यप्यविद्येयमनुभूत्याऽवभासिता ।
तमः सूर्योदयेनेव ज्ञानेनोत्कृत्य नाश्यते ॥
अनादिकालमज्ञानं ज्ञानेनादिमता क्षणात् ।
दृश्यते नाश्यमानं हि न चास्यावृत्तिरीक्ष्यते ॥
एवंभूतोऽप्ययं प्रत्यक्स्वात्मानुभवसंश्रयात् ।
व्युत्पत्तेः प्रागविज्ञातः सर्वाज्ञानादिसाक्ष्यपि ॥
सं. वा. १०८८–१०९०.

अयमभिप्रायः । अविद्या हि स्वाभाविकी, न जानामीत्यनुभवदर्शनात् । ज्ञानप्रागभावस्य आगन्तुकेन ज्ञानेनावृत्तिशङ्कारहितं विनाश्यत्वदर्शनात् सर्वत्र । न च विद्यास्वभावे ब्रह्मणि कथमज्ञानमिति शङ्क्यम् । सर्वज्ञानाज्ञानादिसाक्षिणोऽपि प्रागागमाद् व्युत्पत्तेरज्ञत्वाज्ञातत्वयोः संभवात्–इति । एवं च स्वाभाविक्येवेयमविद्या आगन्तुकेन श्रुतिवाक्यजनितेन ज्ञानेन निवर्त्यते । न च ब्रह्मणोऽन्यस्याभावात् कथमिदम् ?–इति शङ्कासमुन्मेषः । प्राग् व्युत्पत्तेः सर्वस्यापि व्यवहारस्य यथाप्रसिद्धस्य स्वीकारादिति ॥

(२) स्यादेतत् । अविद्याया अनुभवसिद्धत्वमेव कथम् ? तथासिद्धत्वे वा कथं ब्रह्मण्यविद्यातत्कार्यसंपर्कजो दोषो न स्यात् ? कथं वा तादृश्यास्तस्या निवृत्तिरिति ? तत्रेमे श्लोका भवन्ति –

(अ) सर्वोऽप्यनुभवात् सिद्धां बालोऽप्यज्ञाततां स्वतः ।
न किञ्चिज्जान इत्येवं पृष्टो वक्ति प्रमां विना ॥ सं. वा. ९९३.

(आ) अत्यन्ताननुभूतेषु हिमवत्पृष्ठवस्तुषु ।
जाग्रतोऽनुभवोऽप्येवं सुषुप्तान्न विशिष्यते ॥ सं. वा. ९९५.

(इ) न चाऽत्रानुभवो लुप्तो न जानामीति बोधनात् ।
अदृष्टमपि दृष्टास्ति बोधो नाज्ञासिषं त्विति ॥ सं. वा. ९९६.

[न जानामीत्यत्यन्तमननुभूतेष्वपि अज्ञाततामनुभवेनैव जानाति, इदानीं दृष्टं वस्तु नैतावन्तं कालमज्ञासिषमिति वक्ति । अतोऽज्ञानं सर्वत्रानुभवसिद्धमिति स्थितमित्यभिप्रायः ॥]

(ई) तस्मिन्नपहतध्वान्तेऽप्यविद्या स्वानुभूतितः ।
स्वानुभूतिर्न वेद्मीति प्रागैकात्म्यप्रबोधतः ॥ वा. १-४-२१६.

[स्वयमनुभवरूपत्वात् अविचारहितेऽपि प्रागात्मज्ञानात् 'आत्मानमहं न वेद्मि' – इत्यनुभवबलात् प्रतीयते ॥]

(उ) स्वतोऽबुद्धं तद्यस्मान्निरविद्यमतः सदा ।
संगतिर्निरविद्यस्य नाविद्याहेतुजैर्मलैः ॥ वा. १-४-२१३.

[नित्यस्वयंबुद्धत्वात नास्त्यविद्यातत्कार्यसंपर्को ब्रह्मण इत्यर्थः ।]

(ऐ) ज्ञातात्मतत्त्वो जानाति त्रिकालं तदसंभवम् ।
अन्यतः संगतिः सेयमविचारितसिद्धिका ॥ वा. १-४-२१७.

[आत्मज्ञानी त्रिकालमपि मय्यविद्या न संभवति – इति जानाति । अविद्या संबन्धस्तु अविचारितसिद्धिकः – इत्यर्थः । अविद्यातत्कार्याणामविचारितसिद्धत्वम् असकृदुक्तं वार्तिके – बृ. वा. पा. ६६८. ६९८, ७००, १०२४, १२२९, १२४६, १२९५, १७७१ – इत्यादिस्थलेषु ॥]

(क) तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ।
अविद्या सह कार्येण नासीदस्ति भविष्यति ॥ सं. वा. १८३.
अतः प्रमाणतोऽशक्याऽविद्याऽस्येति निरीक्षितुम् ।
कीदृशी वा कुतो वासावनुभूत्येकरूपतः ॥ सं. वा. १८४.
अविद्यावानविद्यां तां न निरूपयितुं क्षमः ।
वस्तुवृत्तमतोऽपेक्ष्य नाविद्येति निरूप्यते ॥ सं. वा. १७९.

[अविचारितसिद्धत्वादेवाविद्याया निवृत्तिरुपपद्यते, आत्मवत् स्वतःसिद्धत्वाभावादेवात्मज्ञदृष्ट्या सा नैवास्तीति भण्यते । अत एव सा कीदृशी, कुतो वा समागता ? – इत्यादीनि चोद्यानि वास्तविकदृष्ट्या न तत्रावतरन्तीति भावः ॥]

(३) वार्तिककारमते ज्ञानाभाव एव संसारकारणम्। अत एव ते– 'ऐकात्म्याप्रतिपत्तिर्या स्वात्मानुभवसंश्रया। साऽविद्या संसृतेर्बीजं तन्नाशो मुक्तिरात्मनः॥' (नै. १–७) इति प्रतिजानते। अत्र मीमांसकादयश्चोदयन्ति – 'अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः। वस्तुत्वाद् द्विविधस्यात्र संभवो दुष्टकारणात्॥' (श्लो. वा. १–२–५४) इत्यभियुक्तवचनात् मिथ्याज्ञानस्य वस्तुत्वात् कारणत्वं भवति, न त्वज्ञानस्य संसारकारणत्वं युक्तमभ्युपगन्तुम्, अवस्तुत्वादिति। अत एव हेतोः स्यात्, आचार्यमण्डनो मिथ्याज्ञानस्यैव विशेषतोऽविद्यात्वम् अभ्युपजगाम। 'न खल्वग्रहणमभावः कस्यचिन्निमित्तम्' (ब्र. सि. 32) इति वदन्। तत्र वार्तिककाराः प्रत्याहुः –

> किं भोः सदपि मानेन वस्तु साक्षान्निरस्यते।
> तस्मिन्निरस्ते किंशेषं यस्मिन्मानस्य मानता॥ वा. १-४-४२३.
> मिथ्याज्ञानं कथं वस्तु न हि मिथ्येति वस्तुसत्।
> मिथ्या तद् वस्तु चेत्युक्तिर्महतामेव शोभते॥ वा. १-४-४२५.
> स्वतोऽपि यदि सा वस्तु रज्ज्वां सर्पादिका सतिः।
> रज्ज्वात्मना तथापीयमवस्त्वेवात्र बाध्यते॥ वा. १-४-४२६.
> मिथ्याज्ञानस्य कार्यत्वात् किं तत्कारणमुच्यताम्।
> अकारणं सत्कार्यं चेद्धिम्भकैरपि हस्यते॥ वा. १-४-४२७.
> अज्ञानं संशयज्ञानं मिथ्याज्ञानमिति त्रिकम्।
> अज्ञानं कारणं तत्र कार्यत्वं परिशिष्टयोः॥ वा. १-४-१३६८.

[अत्र मिथ्याज्ञानस्यापि ज्ञानाभाववदवस्तुत्वादेव प्रमाणज्ञानेन बाध्यत्वमित्युक्तम्। अज्ञानादेव मिथ्याज्ञानस्याप्युत्थितेर्ने मीमांसकचोद्यं सम्यगिति च॥]

भाष्यवार्तिककारयोरविद्याप्रक्रिये –

११२. सूत्रभाष्ये 'अन्योन्यस्मिन् अन्योन्यात्मकताम्, अन्योन्यधर्माँश्चाध्यस्येतरेतराविवेकेन, अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः, सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः' इति मिथ्याज्ञानस्याध्यासत्वमुक्तम्। 'अध्यासो मिथ्याप्रत्ययरूपः' इति च। तस्यैव च मिथ्याज्ञानस्याध्यासापराख्यस्य अविद्यात्वमुक्तम्

(सू. भा. पा. २)। वार्तिके तु 'आत्मात्मवत्त्वसंबन्ध आत्मात्माज्ञानयोर्मतः। परोऽविवेको भूतानामात्माविद्येति कथ्यते' (वा. १-४-३८१)-इत्यविवेकस्यैव ज्ञानाभावरूपस्य प्रतिज्ञातम् अविद्यात्वम्। 'यदेव नित्यमज्ञानं मिथ्याज्ञानं तदेव तु । कारणेतररूपेण तयोरव्यभिचारतः ॥ (वृ. वा. १-४-३८६) इत्युच्यते मिथ्याज्ञानस्य अज्ञानैकसारवत्त्वख्यापनार्थम्। 'अज्ञानं संशयत्वाच्च मिथ्याज्ञानात्तथैव च । तयोस्तत्त्वविवक्षायामज्ञानं तत्त्वमुच्यते ॥' (वा. १-४-४४०) इति स्पष्टीकृतं च स्वमतम्। 'अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' (सू. भा. पा. ४) - इति सुस्पष्टमध्यासप्रहाणार्थमेव वेदान्तप्रवृत्तिरित्युद्घोषितवतां भाष्यकाराणां मतं विनिवर्त्य स्वमतमेवमुपन्यस्तमतिस्पष्टोक्त्या-'मित्युत्पत्तावनुत्पत्तिर्विरोधाद् बाध्यते यतः। तद्बाधे नाप्यपेक्षास्ति मिथ्याधीबाधनं प्रति ॥ मिथ्याधियोऽपि बाध्यत्वमज्ञानैकसमन्वयात् । मूलध्वस्तौ हतं तच्चेन्मिथ्या धीः किं करोति नः ॥' (वा. १-४-४३७, ४३८) इति । अतोऽत्र कतरः पक्षो ज्याय्यानिति विचिन्त्यमस्ति। अत्र यथाप्रतिभानं तत्त्वं विविच्यते ॥

तत्रात्मानात्मनोरविवेक एव निमित्तमितरेतराध्यासनिमित्तमिति भाष्यकारैरप्युच्यते संव्यवहारमात्रालम्बनार्थत्वं बुद्धेराश्रित्य। तथा ह्युच्यते 'इतरेतराविवेकेन मिथ्याज्ञाननिमित्तो व्यवहारः' (सू. भा. पा. १) इति। गीताभाष्ये च 'इतरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धनः' (गी.भा. १३-२६) इति। यथा हि लोके शुक्तिरजतावभासयोरविवेकनिबन्धनः शुक्तौ रजताध्यासः, एवमत्रापीति कृत्वा इदमुच्यते इतरेतराविवेकनिबन्धनोऽयमात्मानात्मनोरन्योन्याध्यास इति। न हि यथैव दृष्टान्ते शुक्तिद्रष्टुस्तद्दर्शनात् पूर्वमेव प्रमातृत्वं लब्धास्पदम्, तथैवात्राप्यात्मानात्मनोर्दर्शनात् पूर्वमेवास्यात्मनः प्रमातृत्वं लब्धोदयं सत् तयोरविवेकं प्रयोजयति तन्निबन्धनश्चाध्यासस्तयोरिति वक्तुं शक्यते। प्रमातृत्वस्यैव तु यथोक्तमध्यासकार्यत्वं हीष्यत इति। तस्मान्नायमविवेकाध्यासयोः कालकृतः

क्रमोऽभिप्रेतः, किं तर्हि, प्रतिपत्तिक्रम एवायम्—अध्यासप्रतिपत्तिविवेक-प्रतिपत्तिपुरःसरेति । यच्च चोद्यते, मिथ्याज्ञानस्य कार्यत्वादज्ञानकारणकत्वं नान्तरीयकमिति, तत्राप्येषैव गतिः । कार्यकारणबुद्धेरेवाध्यासपुरःसरत्वात् । न ह्यध्यासोऽलब्धात्मक एवाध्यासापेक्षं कालावस्थादिकं प्रत्युपस्थापयितुं प्रभवेदिति । अतोऽत्रात्मविषयेऽज्ञानसंशयमिथ्याज्ञानरूपत्वेन यत् प्रतिभानं तत् सर्वमध्यास एव न तत्र व्यावहारिकक्वाचित्काध्यासेष्विव निमित्तोपादानादिकमन्वेषणीयमित्युत्पश्यामः । 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः' इति भाष्यात् । अङ्गीकृतं चैतदेव वार्तिककारैरपि प्रकारान्तरेण 'यदेव नित्यमज्ञानं मिथ्याज्ञानं तदेव तु' इति वदद्भिः । अतो नात्र प्रक्रियावैषम्यं शङ्कनीयम् । एतद्दृष्ट्या विविच्यमानं वार्तिककारीयमज्ञानमिथ्याज्ञानसतत्त्वविमर्शनं तु दर्शनान्तराभिमतमिथ्याज्ञानदूषणमात्रपर्यवसायित्वेन नेयम् । तत्र हि प्रमात्राश्रयमेव मिथ्याज्ञानादिकमित्यस्मदभिप्रायः ॥

अविद्याश्रयविषयविवेचनम् –

११३. अविद्या कस्य ?–इति प्रश्नस्योत्तरं 'जीवानामिति ब्रूमः' (ब्र. सि. 10) इति ब्रह्मसिद्धौ । तन्मतविमर्शनं तु पूर्वं (खं. ९४, ९५) गतम् । भर्तृप्रपञ्चास्तु ब्रह्मणः स्वत उत्थिता अविद्या तदेकदेशं विकृत्य जीवे तिष्ठतीत्याहुः । सा त्वनात्मधर्म इति च । सुरेश्वराचार्यास्तु प्राहुः—

> तच्चाज्ञानं स्वात्ममात्रनिमित्तं न संभवतीति कस्यचित् कस्मिंश्चिद् विषये भवतीत्यवगन्तव्यम् । इह च पदार्थद्वयं निर्धारितम्, आत्मा अनात्मा च । तत्रानात्मनस्तावत्, नाज्ञानेनासिसंबन्धः । तस्य हि स्वरूपमेवाज्ञानम् । न हि स्वतोऽज्ञानस्याज्ञानं घटते । संभवदपि अज्ञानस्वभावे अज्ञानं कमतिशयं जनयेत् ? न च तत्र ज्ञानप्राप्तिरस्ति । येन तत्प्रतिषेधात्मकमज्ञानं स्यात् । अनात्मनश्चाज्ञानप्रसूतत्वात् । न हि पूर्वसिद्धं सत्, ततो लब्धात्मलाभस्य सेत्स्यत आश्रयस्य आश्रयि संभवति । तदनपेक्षस्य च तस्य निःस्वभावत्वात् । एतेभ्य एव हेतुभ्यो नानात्मविषयम् अज्ञानं संभवतीति ग्राह्यम् । एवं तावन्नानात्मनोऽज्ञानित्वं नापि तद्विषयमज्ञानम् ।

पारिशेष्यादात्मन एवास्त्वज्ञानं तस्य 'अज्ञोऽस्मि' – इत्यनुभवदर्शनात् । 'सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्' (छां.७-१-३) इति श्रुतेः । न चात्मनोऽज्ञानस्वरूपता । तस्य चैतन्यमात्रस्वाभाव्यात्, अतिशयश्च संभवति ज्ञानविपरिलोपः । ज्ञानप्राप्तेश्च संभवः । तस्य ज्ञानकारित्वात् । न चाज्ञानकार्यत्वम् । कूटस्थात्मस्वाभाव्यात् । अज्ञानानपेक्षस्य चात्मनः स्वत एव स्वरूपसिद्धेर्युक्तमात्मन एवाज्ञत्वम् । किंविषयं पुनस्तदात्मनोऽज्ञानम् ? आत्मविषयमिति ब्रूमः । नन्वात्मनोऽपि ज्ञानस्वरूपत्वात्, अनन्यत्वाच्च ज्ञानप्रकृतित्वादिभ्यश्च हेतुभ्यो नैवाज्ञानं घटते । घटत एव । कथम् ? अज्ञानमात्रनिमित्तत्वात् तद्विभागस्य सर्पात्मतेव रज्ज्वाः । तस्मात् तदपनुत्तौ द्वैतानर्थाभावः' इति ॥ नै. ३ (संबन्धोक्तिः)

परमार्थतस्तु नैवाविद्या कस्यचिदिति वार्तिककारमतम् –

> नाविद्यास्त्येत्यविद्यायामेवासित्वा प्रकल्प्यते ।
> ब्रह्मदृष्ट्या त्वविद्येयं न कथञ्चन युज्यते ॥ सं. वा. १७६.

अत्र त्वात्माश्रयविषयकाविद्याव्यतिरिक्ता काचिदनात्माश्रिता अविद्या नास्त्येवेत्युक्तम् । एतावता व्यावहारिक्यपि शुक्त्यादिविषया अविद्या नास्तीति सुरेश्वराणां मतमिति निर्धारयितुं न शक्यते । अतीतानन्तरखण्डोक्तप्रकारेण अनुपदमेव विचार्यमाणप्रकारेण च तेषां रज्जुसर्पाद्युदाहरणेन मिथ्याज्ञानातिरिक्ताज्ञानसाधनप्रक्रियाया असांगत्यप्रसङ्गात् । परमार्थतस्त्वात्माश्रिता तद्विषया एकैवाविद्या, न तु वस्तुत एवाविद्याद्वयमस्तीत्येतावत्तु तदभिमतम् । एतच्च स्फुटयिष्यते समनन्तरोत्तरखण्डे । तेषामविद्याद्वयवादनिराकरणं तु पूर्वमुक्तं (खं. ६९) –

> नैसर्ग्यागन्तुकी चेति ह्यविद्या द्विविधा स्मृता ।
> आगन्तुकी स्याद्विषये नैसर्गिक्यात्मनीष्यते ॥
> तत्रागन्तु यदज्ञानं तत्सकृज्ज्ञानजन्मना ।
> अपैति नासि शबरो राजासीत्युक्तितो यथा ॥
> नैसर्गिकी तु या विद्या सा सकृज्ज्ञानजन्मना ।
> ध्वस्तापि पुनरेवैति तजरागादिदर्शनात् ॥
>
> वा. ४-४-८८१, ८८२, ८८३.

इतिवदतां प्रसंख्यानवादिनां निराकरणप्रस्तावेन । अतो न व्याघातः ॥

एवं भाष्यकारप्रस्थानेऽपि—अध्यासरूपामविद्यामुपेत्य—अविद्याश्रयो यथाव्यवहारप्रसिद्ध एवात्मा ग्राह्यः, न तत्र सूक्ष्मेक्षिका कार्या । विद्याविद्याव्यवहारस्याप्यविद्याविषयत्वात् । यथोक्तं सूत्रभाष्ये —

> 'कस्य पुनरयमप्रबोध इति चेत् यस्त्वं पृच्छसि तस्य त इति वदामः । नन्वहमीश्वर एवोक्तः श्रुत्या, यद्येवं प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रबोधः' सू. भा. ४-१-३, पा. ४६५.

इति । गीताभाष्येऽपि —

> 'अत्राह-सा अविद्या कस्येति ? यस्य दृश्यते तस्यैव'
> गी. भा. १३-२, पा. १९५.

इत्यादि । एवम् उपदेशसाहस्र्याम् अविद्यामात्मविषयामेव प्राहुर्व्यवहार-दृष्ट्या —

> 'त्वं परमात्मानं सन्तम् असंसारिणं संसार्यहमस्मीति विपरीतं प्रतिपद्यसे, अकर्तारं सन्तं कर्ता इति, अभोक्तारं सन्तं भोक्ता इति, विद्यमानं च अविद्यमान इति । इयम् अविद्या' (उप. ग. पा. ५६) ॥

इति । अत्रापि ज्ञानाभावमिथ्याध्यासयोस्तत्त्वैक्यमाश्रित्य भाष्यवार्तिक-सामरस्यं बोध्यम् ॥

प्रमाणव्यापारनिरूपणम् —

११४. विषयाणामज्ञातत्वं न प्रमाणेभ्यः सिध्यति ; यतः प्रमाणव्यासेः प्रागेव तत् सिद्धम् । तस्य प्रमाणसिद्धत्वे हि वस्तुनोऽज्ञातं रूपं नित्यमेवानुवर्तेतेत्यनिष्टं प्राप्नोति । एवं विषयाणां संशयितत्व-विपर्यस्तत्वं च न मानेभ्यः । अज्ञाते हि सर्वत्र मानव्यापार इति (वा. पा. ४७९) । अज्ञातानुभवसिद्धानां घटादीनामज्ञाततां निवर्तयन्त एव प्रत्यक्षादयः प्रामाण्यं भजन्ते यस्मात्, ततः परमात्मानमनुभवस्वरूप-मप्रमीयमाणानि न कदापि प्रमाणान्यनात्मानं प्रमिण्वते (सं.वा. १००४) । यथैव लोके घटादयः प्रमाणैकसिद्धाः प्रमां विना स्वाज्ञातत्वं न मुञ्चन्ति, एवमेव आत्मापि स्वतःसिद्धवस्तुत्वात् विनैव प्रमामज्ञातत्वं मुञ्चतीति

युक्तम् (सं.वा. १००४)[1]। वस्तुतस्तु, अनात्मवस्तुनोऽज्ञातत्वैव न संभवति। तथा हि, व्यवहारे घटादिपदार्थाः स्वविषयप्रमाजन्मनः प्रागज्ञाताः सन्तश्चेत्यभ्युपगम्यन्ते सर्वैरपि तीर्थदृष्टिभिः (वा. ४–२–१५८)। न च सत्त्वे विशेषोऽस्तीत्यत एक एव सच्छब्दवाच्यः पदार्थः, स एव चाज्ञात इति सिध्यति। तस्मात्, यस्यैव प्रमाणे प्रमातरि च स्वयंप्रकाशात्मन आभासोऽनुभूयते स एव सन्नज्ञातः (नै. ३–७, ८)। किञ्च, प्रमाण-व्यापारतः प्राक् सिद्धामेव शुक्तिकाद्याम् अवबोधयद् हि प्रमाणं नाम, न त्वविद्यमानम्। न च रजतादिकमपि प्राक् प्रमाणव्यापाराच्छुक्तिकादि-वदज्ञातम्, आत्मवन्नित्यज्ञातं वा विद्यते, येन तद्विषयकाज्ञानान्तरनिवारणाय प्रमाणं व्याप्रियेत (वा. ४–३–१६६, १६७)। यथैव ह्यज्ञाता शुक्तिका रजतात्मनाध्यवसीयते, एवमेव चाज्ञात आत्मा अनात्मत्वेनाध्यवसीयते अज्ञैः। तत्र दृष्टान्ते तावद् रजतज्ञानं न रजते प्रमाणम्, रजतस्य तज्ज्ञानात् पृथगसिद्धेः। नापि शुक्तौ प्रमाणं तत्, तद्गताज्ञानानपबाधकत्वात् (वा. पा. ४–४–९०४, १८६८)। एवं दार्ष्टान्तिकेऽपि सर्वाण्यप्यनात्मविषयाणि ज्ञानानि तत्राप्रमाणानि। अनात्मनि ज्ञातत्वाज्ञातत्वयोरयोगात्, शुक्ति-रजतादाविव। नाप्यात्मनि, तद्विषयकाज्ञानानपबाधकत्वात्। व्यवहारदृष्ट्या तु स्वस्वविषयकप्रमां जनयन्ति। प्रमाणफलस्य प्रमाया एव अनुभवरूपात्म-स्वरूपत्वात्, वेदान्तप्रमाणविषयमात्मानमेव तानि सर्वाणि समर्पयन्ति। तस्य चागमापायवर्जितस्य स्वतःसिद्धत्वान्न प्रमाणान्तरापेक्षा (तै. वा. २–५२६, पा. १५४)। तस्मिंस्तु 'न जानामि' इति प्रसिद्धयैवाज्ञातत्वं

---

1. अस्य वार्तिकश्लोकस्य व्याख्या टीकाकारेणान्यथैव कृता – 'प्रत्यगात्म-वस्तुसामर्थ्यादेव प्रमां विना नाज्ञाततां त्यक्तुमलम्। मानफलप्रकाशस्यैवाज्ञान-विरोधित्वात्, स्वरूपप्रकाशस्यातथात्वाद्' इति। यद्यप्यत्र सिद्धान्ते नैवास्ति विप्रतिपत्तिः, तथापि प्रकृतश्लोके प्रमाणसिद्धघटादयः स्वाज्ञाततातत्यागे स्वप्रकाशकं प्रमाणफलमपेक्षन्ते, आत्मा तु वाक्यमात्रादज्ञाततां त्यजति, न तु स्वप्रकाशकप्रमापेक्षया, वस्तुत एव प्रमानतिरिक्तत्वात् तस्य – इत्यभिप्रेतमित्यस्मन्मतिः॥

श्रुतिप्रमाणेनाज्ञातत्वमोक्षश्चेति । अत एव श्रुतिजन्यज्ञानेन प्रमातृप्रमाणादि-व्यवहारकारणाज्ञाननाशे सति सकलप्रमाणानां प्रमाणत्वं समाप्यते । पुरुषार्थसिद्धिश्च भवतीति (सं. वा. १६२, १००६) । अत्र वार्तिकसंमत-प्रमाणविवेचनप्रकारप्रकाशकाः कतिचिच्छ्लोकाः समुदाह्रियन्ते –

(१) अज्ञातत्वं न मानेभ्यो ज्ञातत्वं तत्कृतं यतः ।
तैरप्यज्ञातता चेत् स्यात् कातिशीतिर्मितेर्भवेत् ॥
वा. १–४–२९५, पा. ४८८.

(२) अज्ञातत्वस्य माव्याप्तेः पूर्वमेव प्रसिद्धितः ।
ततश्च मानतः सिद्धिर्नाज्ञातत्वस्य कुत्रचित् ॥ सं. वा. ६८६.

(३) मानव्याप्तिक्षमं चेत् स्यादज्ञातत्वं घटादिवत् ।
वास्तवं स्यात्तदा रूपमज्ञातं च सदा भवेत् ॥ सं. वा. ६८७.

(४) अज्ञातं न यथा मानान्मिथ्याधीसंशयौ तथा ।
न्यायः पुरोदितः सर्वो यस्मादस्ति तयोरपि ॥ वा. १–४–२५७.

(५) घटादयः प्रमासिद्धा मुञ्चन्त्यज्ञाततां न तु ।
स्वतःसिद्धोऽपि वस्तुत्वान्मुञ्चत्यात्मा प्रमां विना ॥ सं. वा. १००४.

(६) यमप्रमीयमाणानि नानात्मानं प्रमिण्वते ।
वस्तुवृत्तानुरोधेन कथं तत्राप्रमा वचः ॥ सं.वा. ५५१, पा. १६२.

(७) अज्ञात एव सर्वोऽर्थः प्राग्यतो बुद्धिजन्मनः ।
एकेनैव सता संश्च सन्नज्ञातो भवेत्ततः ॥
प्रमित्सायां य आभाति स्वयं मातृप्रमाणयोः ।
स्वमहिम्ना च यः सिद्धः सोऽज्ञातार्थोऽवसीयताम् ॥ नै. ३–७, ८.

(८) मानव्यापारतः पूर्वं सिद्धामेवावबोधयत् ।
शुक्तिकां मानतां याति नासिद्धं रजतादिकम् ॥
शुक्तौ रजतविज्ञानाच्छुक्तिवन्नामितं यतः ।
रजतं विद्यते किञ्चिद्विज्ञातं चाऽऽत्मवस्तुवत् ॥
वा. ४–३–१६६, १६७.

(९) अज्ञातायां यथा शुक्तौ रजताद्यर्थनिश्रितिः ।
अनात्मनिश्रितिस्तद्वदज्ञातेऽनुभवात्मनि ॥
ज्ञानात् पृथगसंसिद्धे रजतादेरमेयता ।
शुक्तेरिव त्वविज्ञातज्ञातत्वस्य ततोऽन्यतः ॥

यतो न लभते मेयं शुक्तौ रजतधीरतः ।
न रूप्यधीः प्रमाणं स्यात् प्रमेयासंभवादिह ॥
यथा न रजते मानं शुक्तावपि तथैव सा ।
तद्प्रबोधताबाधात्तस्याश्चाशुक्तिकात्मनः(तः ?) ॥
यथैवं सर्वमानानि प्रत्यक्षानातिरेकतः ।
अनात्ममेयभाव्येव विज्ञेयानीति निश्चितिः ॥
प्रत्यक्संवित्त्वविज्ञाता तथैवेहानुभूयते ।
अपि प्राज्ञानसंव्याप्तेर्यावद् व्युत्पाद्यते न ना ॥
वा. ४-४-९०१ प्रभृति ९०६ पर्यन्तम्, पा. १८६८, १८६९.

(१०) प्रमैवात्मात्मिका यत्र त्वनन्यानुभवात्मिका ।
नात्र मानान्तरापेक्षा सैवानस्तमितोदिता ॥ तै. वा. २-५२६.

(११) नैतदेवं यतोऽशेषमानानामपि मानता ।
आ परात्मावबोधात् स्यात्तत्र सर्वसमाप्तितः ॥ सं. वा. १६२.
कृत्स्नमात्राद्युपादानतमोबाधस्तु बोधतः ।
तत्त्वमस्यादिवाक्योत्थात् पूर्णैकात्म्यस्वलक्षणात् ॥ सं. वा. १००६.
तेनागमस्य तत्र स्यादज्ञातत्वविघातिनः ।
प्रमाणत्वं प्रमार्थश्च स एव विदुषां मतः ॥ सं. वा. १००७.

ख्यातिबाधविचारः –

११५. मण्डनाचार्यस्तावत्, अख्यातिवादं निराकुर्वन् स्वमतमेवमाह –

'नेदं रजतम्' इति प्रसक्तप्रतिषेधरूपा प्रतीतिः, नाग्रहणेऽवकल्पते । प्रसङ्गाभावात् । न खल्वग्रहणं कस्यचित् प्रसञ्जकम् । अभावो हि सः । विपरीता तु ख्यातिः संनिहितस्य रजततामभूतां रजतस्य वा संनिहिततां आदर्शयन्ती प्रसञ्जयति । .... 'न हि नेदं रजतम्' इति रजतमात्रं चक्षुःसंयुक्तवस्तुमात्रं वा निरस्यमानमवस्थामः, किं तु चक्षुःसंयुक्तस्य तु रजतताम्, रजतस्य वा चक्षुःसंयुक्तताम् । न चैतयोः, अग्रहणं प्रापकम् । अग्रहणत्वादेव । तस्मादवश्यं प्रतिषेध्यप्राप्तये विपरीतख्यातिरुपासनीया' ॥
ब्र. सि. 143.

इति । शुक्तिरेव तु रजतज्ञानस्यालम्बनमिति च स्पष्टमुक्तं मण्डनेन –

'तत्र शुक्तिः स्वरूपेण नालम्बिता रजतज्ञानेन, तन्निबन्धनव्यवहारा-

भावात्, रजतरूपेण तु, तन्निबन्धनस्य उपादानव्यवहारस्य तत्र भावात्' इति ॥ ब्र. सि. 147.

वार्तिके पुनरभावलक्षणाज्ञानाभ्युपगमेऽपि, अज्ञातशुक्तिकैव रजतात्मना निश्चीयते इति **विपरीतख्यातिरेव** प्रकारान्तरेणानुमोदितेति स्पष्टं समनन्तरपूर्वखण्डोदाहृतश्लोकेन 'अज्ञातायां यथा शुक्तौ' (वा. ४-४-९०१, पा. १८६८) इत्यनेन ॥

प्रातिभासिकं रजतं स्वरूपेण विद्यते वा न वेत्यत्र मण्डनेन न किञ्चित् स्पष्टमुक्तं दृश्यते । वार्तिके तु –

> इदं रजतमित्येवं रूपं वस्तु न कुत्रचित् ।
> न शुक्तौ रजतज्ञानं नेदंता रजतेऽस्ति नः ॥
> तदन्यत्र द्वयाभावात् साक्ष्यादावपि नेष्यते ।
> न चेहार्थावबोधोऽस्ति मिथ्याज्ञानत्वकारणात् ॥

इति (वा. १–४–२७५, २७६, पा. ४८४) मिथ्याज्ञानविषयभूतं **प्रातीतिकं रजतं नाम वस्तु नैव कुत्रचिदस्तीति** स्पष्टमुपपादितम् । न च प्रमाणान्मिथ्याबुद्ध्यादिसंसिद्धिरस्तीत्यतः कूटस्थानुभवसिद्धमेवेदं मिथ्यावस्तु, मिथ्याज्ञानमज्ञानं प्रमात्रादि जगच्चेति च –

> तस्माद् रजतसंस्कारसंस्कृतात् स्वान्ततः स्मृतिः ।
> प्रथतेऽविकृतात्मैकनित्यदृष्टेः परात्मनः ॥
> ज्ञानज्ञात्रतिरेकेण तमस्यपि न विद्यते ।
> मेयं वस्तु ततोऽज्ञानं प्रत्यक्षं सप्रमातृकम् ॥
> न हि संविदनारूढः प्रमात्रादिः प्रसिध्यति ।
> संविन्मात्रैकयाथात्म्यात् प्रमात्रादेरनात्मनः ॥
>
> वा. १–४–२७९ प्रभृति २८२ पर्यन्तम्, पा. ४८५.

एवं च शुक्तिरजतादिदृष्टान्तोपन्यासस्य फलमिदं यत् सर्वजगत्ख्याते-र्भ्रान्तित्वमात्राध्यवसानम्, अज्ञातात्मनि मिथ्यैव विश्वख्यातिप्रसिद्धेः । अज्ञानस्यापि तथैव स्वतःसिद्धात्मानुभवमात्रगोचरत्वादविचारदशायामिति । तथा चेमे वार्तिकश्लोकाः –

तस्मात् प्रमा प्रमाभासाप्रमाणानामशेषतः ।
स्वार्थानन्यप्रमाणात् स्यात् प्रसिद्धिस्तमसस्तथा ॥
आन्तरं मेयमाश्रित्य स्वतःसिद्धमनन्यमम् ।
भावाभावादिमद्विश्वं सर्वमेतत् प्रसिध्यति ॥

[आन्तरं मेयम् अज्ञातात्मलक्षणम् । अनन्यमम् अन्यप्रमाणानपेक्षमेव स्वतःसिद्धम् ॥]

मेयार्थानभिसंबन्धान्न यथावस्तुधीरियम् ।
ज्ञातत्वात्तद्भावोऽपि प्रात्यक्ष्यान्नेष्यते स्मृतिः ॥

वा. १-४-२७२ प्रभृति २७४ पर्यन्तम् ।

[नेयं यथावस्तुबुद्धिः, नापि ज्ञानाभावः, नापि स्मृतिः । 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति भाष्यतुल्यार्थकोऽयं श्लोकः ॥]

श्रुतिवाक्यप्रामाण्यम् –

११६. तदेवम् आत्मन एवैकस्याज्ञातत्वसिद्धेस्तस्यैव प्रमेयत्वं निर्विवादं सिध्यति । अतो वेदान्तदर्शने इव दर्शनान्तरेषु न प्रमेयसिद्धिः । आत्मानुभवस्य तु प्रमेयत्वं सर्वप्रमाणसिद्धम् । यतो बाह्यार्थविषयेषु प्रत्यक्षादिषु या अवगतिः फलत्वेनेष्यते, सैवेह वेदान्तोक्तिप्रमाणस्य प्रमेयत्वेन स्वीक्रियते। तस्मादेव श्रुतिवाक्यस्य केवलवेदवाक्यत्वेन प्रामाण्यमिह न स्वीक्रियते, किं त्वनुभवात्मनि वाक्यप्रमेये संशयविपर्ययादीनामसंभवादेव। अविद्यातत्कार्ययोरविचारितसिद्धत्वादेव च वाक्यजन्यज्ञानमात्रेण तन्निवृत्तिरित्युपपद्यते । न चैवं शङ्कनीयम्, ज्ञानरूपत्वादेवात्मनः स्वयमज्ञाननिवर्तकत्वमुपपद्यते, किमन्याकाङ्क्षया ? – इति । यतः सर्वत्र प्रमाणफलारूढमेव प्रमाणं मेयाज्ञातत्वनिवर्तकम्, आत्मा तु स्वतो नाज्ञानविरोधी यतो नित्यावगतिरूपः सन्नप्यज्ञानेन सहैव वर्तते नित्यदा । अतः श्रुतिप्रमाणफलत्वेनानुभूयमान एवात्मा तमोहन्ता । न चान्वयव्यतिरेकाभ्यामेवात्मस्वरूपं निश्चीयते, किमत्र वाक्येन कर्तव्यमिति शङ्क्यम् । अज्ञानापेक्षयैव हि कार्यकारणात्मना प्रथनमात्मनः, न तु कार्ये कारणे वा तत्तत्त्वेक्षणं भवति। अतः कार्यकारणयोरन्वयव्यतिरेकमात्रेण नात्मतत्त्वाव-

बोधः । किञ्च, ब्रह्मैवात्मा, आत्मैव च ब्रह्म–इति तयोरैक्यं खलु वाक्यस्य विषयः । न च तत्प्रमाणान्तरावसेयम् । न चैवं शङ्का कर्तव्या–ब्रह्मात्मार्थयोर्लौकिकत्वे प्रमाणान्तरगोचरत्वात्, अलौकिकार्थत्वे तु संबन्धाग्रहणादेव 'आत्मा ब्रह्म' इति वाक्याप्रवृत्तिप्रसङ्गात्, उभयथापि न वाक्यस्य विषयः समस्तीति । आत्मशब्दस्य स्वरूपार्थकत्वेन प्रसिद्धेः, ब्रह्मशब्दस्य च महद्वाचकत्वेन प्रसिद्धेश्च तदाश्रयणेनैवालौकिकब्रह्मात्मैकत्वलक्षणार्थबोधकत्वोपपत्तेर्वाक्यस्य । देवतास्वर्गादीनामप्येवमेव हि वाक्यादवगतिरिति ॥

तत्र 'तत्त्वमसि', 'अहं ब्रह्मास्मि' – इत्यादिवाक्येषु पदयोः सामानाधिकरण्यम्, ततः पदार्थयोर्विशेष्यविशेषणभावावगमः, ततश्च त्वंपदार्थगतदुःखित्वस्य तत्पदार्थगतपारोक्ष्यस्य च निवृत्तिः, ततश्च त्वंपदार्थगतज्ञातृत्वाहंतालक्षितात्मनः, तत्पदार्थलक्षितब्रह्मणश्चैक्यावगमे भेदसंसर्गान्याभावशून्यावाक्यार्थानुभवः । अत्र बोधस्यालौकिकत्वात्, सतश्चावगत्यात्मत्वाच्च नान्यप्रमाणापेक्षा भवति । मानान्तरयोग्यविषये हि परतोऽवगमापेक्षा वा वाक्यस्यान्यापेक्षा संभवतीति ॥

अत्रैते वार्तिककारश्लोका भवन्ति –

(१) प्रमात्राद्यतिरेकेण ह्यसंविदितरूपकम् ।
मेयं सिद्धमिहैवैतत्र वेदादन्यतः क्वचित् ॥ वा. १-४-३३९.

(२) परागर्थप्रमेयेषु या फलत्वेन संमता ।
संवित् सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥ सं. वा. १५९.

(३) न च वेदोक्तितो वेदः श्रद्धेयार्थं इहेष्यते ।
किं त्वमानत्वहेतूनां वेदवाक्येष्वसंभवात् ॥ वा. २-४-३२५.

(४) अविद्या वाऽथ तत्कार्यं नाभेदान्नातिरेकतः ।
सिद्ध्यायते यतोऽतः स्यादविचारितसिद्धिकम् ॥
नीलोत्पलदलाभं खं द्विरेफोदरवत्तमः ।
अविचारितसिद्धत्वेवं तमस्तज्जं च वीक्ष्यताम् ॥ वा. १-४-३३२, ३३३.

[अविद्यां तज्जं चानुभवसिद्धं तत्त्वान्यत्वाभ्यामनिर्वचनीयम्, अविचारितसिद्धं चेत्यभिप्रायः ॥]

(५) अवबुद्धस्वभावोऽपि सहतेऽनवबुद्धताम् ।
वस्तुत्वान्न तमो हन्ति तथापि प्रमितिं विना ॥
प्रमाणफलकारूढं स्वतमो हन्ति नान्यथा ।
वस्तु मेयाभिसंबद्धं मानं तद्वत्तमोपनुत् ॥ वा. ४-३-१८१, १८२.

[अनुभवरूप आत्मा न स्वतोऽज्ञानविरोधी, नापि केवलं प्रमाणं प्रमेयानभिसंबद्धं फलापर्यवसन्नं चाज्ञाननिवर्तने समर्थम् इत्यभिप्रायः ॥]

(६) अपेक्षा ज्ञानमात्रैकहेतूत्थानत्वकारणात् ।
न कार्ये कारणे वातो वस्तुतत्त्वं समीक्ष्यते ॥
अन्वयव्यतिरेकाभ्यां नातो वाक्यार्थबोधनम् ।
वस्तुतत्त्वावसायोऽतो वाक्यादेव प्रमाणतः ॥ वा. ४-३-४००, ४०१

[कार्यकारणयोरवस्तुत्वे सति आत्मनोऽद्वयत्वात्, अन्वयव्यतिरेकाभ्यां नात्मज्ञानम् इत्यर्थः ॥]

(७) आत्मनो ब्रह्मता साक्षाद् ब्रह्मणोऽप्यात्मता स्वतः ।
तत्त्वमस्यादिवाक्यस्य विषयोऽयमिहोदितः ॥ वा. ४-३-१११५.
नात्मन्येवात्मशब्दस्य प्रयोगात् स्यादलौकिकः ।
ब्रह्मार्थोऽपि महत्त्वेन प्रसिद्धो व्यवहारतः ॥
एवं पदात् परिज्ञाते पदार्थे लोकमानतः ।
वाक्यार्थोऽतीन्द्रियो वेदे वाक्यात् केन निवार्यते ॥
अपूर्वदेवतास्वर्गपदार्थेष्वपि लोकतः ।
सिद्धेष्वतीन्द्रियोऽप्यर्थो वाक्यादेवावगम्यते ॥ सं. वा. ८६१-८६३

(९) सामानाधिकरण्यादेर्घटेतरखयोरिव ।
व्यावृत्तेः स्यादवाक्यार्थः साक्षान्नस्तत्त्वमर्थयोः ॥ नै. ३-९.

[घटाकाशो महाकाशः – इति वाक्ये सामानाधिकरण्येन, विशेष्यविशेषणभावेन विरुद्धार्थव्यावृत्त्या, लक्ष्यलक्षणभावेन च आकाशमात्रम् वाक्यार्थो भवति । एवं तत्त्वमसीत्यत्रापीति भावः । अवाक्यार्थ इति, संसर्गभेदादिरहित इत्यर्थः ॥]

निर्दुःखित्वं त्वमर्थस्य तदर्थेन विशेषणात् ।
प्रत्यक्ता च तदर्थस्य त्वंपदेनास्य संनिधेः ॥ नै. ३-१०.

[विशेष्यविशेषणभावेन विरुद्धधर्मव्यावृत्तिसिद्धिरित्यर्थः ॥]

(१०) कूटस्थबोधप्रत्यक्त्वमनिमित्तं सदात्मनः ।
बोद्धृताहंतयोर्हेतुस्ताभ्यां तेनोपलक्ष्यते ॥ नै. ३-११.

निषेधवाक्यस्थपदानां व्यापारस्त्वित्थं वार्तिके वर्णितः – प्रथमं तावत् भाष्योक्तार्थव्याख्यानमिदं यन्नामरूपकर्मादिकं सर्वमपि निषेध्यत्वेन इतिशब्देनोपप्रदर्श्य नञा तस्य निषेधः क्रियत इति। न चात्र निषिद्धस्यान्यत्र स्थितिः स्यात्, घटे निषिद्धस्य पटस्येवेति शङ्क्यम् । लोकेऽपि रूपिव्यतिरिक्तरूपस्य पृथक्स्थित्यदर्शनात्, परमार्थब्रह्मणि निषिद्धस्य तदज्ञानजस्य कुत्रचिदपि स्थित्यसंभवाच्च । निषेध्यानां चान्योन्यव्यभिचारात्, प्रत्यगात्मनश्चाव्यभिचारात् तस्मिन्नध्यस्तं सर्वमिति शब्देनोपदिश्य अनुभवरूपेण स्वतःसिद्धे आत्मनि तन्निषेधः क्रियते । आत्मावष्टम्भेन हि नञ् निषेध्यं निषेधतीति सर्वनिषेधानन्तरं स्वयमपि चिद्रूपत्वमेवैति । निषेध्यं सर्वमप्यनिषेध्यात्मनिष्ठमेवेत्यतो निषेधो नाभावनिष्ठः, अभावस्यापि निषेध्यकुक्षिनिक्षिप्तत्वादेव । एवं च नेति नेतीति वीप्सेयं यद्यत् प्राप्तं तत्सर्वं निषेधति, ब्रह्मात्मानं तु सर्वसाक्षिणं परिशिनष्टि (वा. २–३–१८३ प्रभृति २०७ पर्यन्तम्) इति ॥

अथान्येनापि प्रकारेण नेतिवाक्यार्थो वर्ण्यते । नात्र निषेधो निषेधार्थः, यतो प्रागेव 'अथात आदेशो नेति नेति' इति वाक्यारम्भात् मूर्तादिव्यतिरिक्तत्वं ब्रह्मणः सिद्धम्। द्वे वाव ब्रह्मणो रूपे इति षष्ठ्यैव भेदलाभात्, अन्योन्यव्यभिचारेणानात्मनो निषेधस्य सिद्धत्वाच्च । प्रत्यक्षादिसिद्धस्य तस्याशक्यनिषेधनत्वात्, कथञ्चिन्निषेधसंभवेऽपि निषेधमात्रस्याफलत्वात् वाक्यस्य ब्रह्मादेशकत्वासिद्धेश्च । अतः स्वयंसिद्धमेवात्मानं नञा लक्षणया अनूद्य तस्य इतिशब्देन ब्रह्मत्वमुच्यते – इति ॥ वा. २–३–२१४ प्रभृति २३४.

अत्र कतिचिच्छ्लोका उदाह्रियन्ते वार्तिकव्याख्यानान्तरप्रकाशकाः –

(१) व्यतिरेकस्य सिद्धत्वादादेशोक्तेः पुरैव हि ।
साक्षाद्ब्रह्मत्वसिद्ध्यर्थमादेशोऽयमथोच्यते ॥ २१४.

न निषेधो निषेध्यार्थो लक्षणार्थपरत्वतः ।
ब्रह्मणो मान्तरासिद्धेः शून्यतैव प्रसज्यते ॥ २१५.
प्रमात्रादेरभावोऽतो यः सिद्धः स्वात्मबोधतः ।
नञ्वृत्तिस्तं सदा बुद्धं लक्षयत्यपृथक्प्रमम् ॥ २२९.
उक्ता प्रमेयसंसिद्धिः स्वमहिम्नैव नञ्श्रुतेः ।
तस्य ब्रह्मत्वबोधाय नेति ब्रह्मेतिनोच्यते ॥ २३३.

अत्रेत्थं प्रतिवक्तुं शक्यत इति भाति – कथं ब्रह्मणो मूर्तामूर्तादि-सर्वनिषेधे सति ब्रह्मणः शून्यता प्रसज्यत इति ? ब्रह्मणो मानान्तरासिद्धे-रिति चेत् । न । तस्य स्वयंसिद्धत्वात् । अज्ञाननिरासार्थं श्रुतिरपेक्ष्यत इति चेत् । तदर्थमेव हि 'नेति' इत्यध्यस्तनिषेधश्रुतिः । व्यतिरेकस्य सिद्धत्वात् तदर्थं निषेधोऽयुक्त इति चेत् । न । विकल्पितसर्वप्रतिषेधेनैव ब्रह्मणः प्रतिपिपादयिषितत्वात् सर्पादिविकल्पप्रतिषेधेनैव रज्जुस्वरूप-प्रतिपादनवत् । तस्मात् प्रतिषेधविज्ञानसमकालमेव ब्रह्मस्वरूपप्रतिपत्तिरिति न तत्प्रतिपत्त्यर्थं पुनर्यत्नान्तरं कर्तव्यमिति प्रतिभाति । अतो मिथ्यारोप-प्रतिषेधव्यतिरेकेणाप्यज्ञानप्रतिषेधः कर्तव्यतया अवशिष्यत इत्याग्रहेणै-तदुच्यत इति प्रतीमः । अथवा 'साक्षिणो नञर्थस्य ब्रह्मत्वज्ञापनाय नेतीति वाक्यं प्रमाणमुच्यते (आ.वा. २–३–२३३)–इति टीकाकारोक्त-विधया अस्य सर्वस्य व्याख्यानस्योपपत्तिर्भवेदित्यलं सूक्ष्मेक्षिकया । सर्वथापि त्वध्यारोपापवादप्रक्रियानुगुणमेवेदं वाक्यप्रामाण्यपरिशीलनमित्यनवद्यम् ॥

प्रत्यक्षादिविरोधपरिहारः –

११७. द्वैतग्राहिमानान्तरविरोधान्न शास्त्रं प्रमाणमित्याशङ्क्य-मण्डनवदेव वार्तिककारा अपि भेदनिरासं कुर्वन्तीत्यावेदितं प्राक् (सं. १०५) । तदेतच्छङ्कोत्थापनम् अभ्युपगमवादेन केवलम् इति प्रतीमो वयम् । यस्मात् प्रमाणसंप्लवावादं स्पष्टोक्तिभिः पराकुर्वाणाः (सं.वा. १०७६–१०८१ ; नै. ३–८६), ऐकात्म्यविषये प्रमाणानां परस्पर-विरुद्धतामपि भाष्योक्तिविवरणेनैव निरस्यन्तः (वा. २–१–५८८ प्रभृति

५९४ ; नै. ३–९६), कथं मानान्तरविरोधशङ्काया अवकाशं दद्युरिति। श्रुतेरप्यज्ञाननिरासमात्रेणात्मनि प्रामाण्यं न तु साक्षात्, यतः प्रमातृ-प्रमाणादयः कालावस्थादयश्च आत्मानुभवमात्रात् सिध्यन्तो नात्मनि काञ्चिदतिशीतिं कर्तुमलमिति (सं. वा. ९९९) वार्तिकमतम् ॥

कार्यकारणप्रक्रिया –

११८. वार्तिकेऽपि भाष्ये इव कार्यकारणप्रक्रिया कार्यकारण-निरासार्थमेव प्रस्तुता। तत्राविद्या क्वचिज्जगदुपादानत्वेनाङ्गीकृता इव ग्रन्थाभिप्रायविमर्शनासमर्थानामापाततः प्रतिभायात्। वस्तुतस्तु कार्य-कारणभाव एव वास्तविको न संमत इति तत्तद्ग्रन्थप्रकरणपरिशीलनात्, कण्ठरवेणैवोक्तः कार्यकारणनिरासाच्चावगम्यते। तद्यथा –

(१) द्वैतस्य च शुक्तिकारजतादिवत् सर्वस्यापि स्वतःसिद्धाऽद्वितीयात्मानवबोधमात्रोपादानत्वाद्व्यावृत्तिः। अतः सर्वानर्थहेतुरात्मानवबोध एव (नै. सि. ग्रन्थावतरणिकायाम्) ॥

[अत्राविद्याया द्वैतोपादानकारणत्वमित्यापाततो भाति। वस्तुतस्तु, 'न जानामीत्यविद्या स्यात्' (तै. वा.) इत्यादिप्रतिज्ञावलोकनेन अनवबोधस्य अभावात्मकत्वात् कथमपि नोपादानकारणत्वं संभवतीति निश्चीयते ॥]

(२) अनात्मनश्चाज्ञानप्रसूतत्वात् ॥ नै. सि. अवतरणिका.

[अत्रापि अज्ञानस्यानात्मोपादानकारणत्वमुक्तमिति भ्रान्तिः स्यात्। वस्तुतस्तु, 'न च तत्र ज्ञानप्राप्तिरस्ति येन तत्प्रतिषेधात्मकमज्ञानं स्यात्' इति समनन्तरपूर्ववाक्य एव ज्ञानप्रतिषेधात्मकत्वं सुस्पष्टमुक्तमस्ति ॥]

(३) अज्ञानं हि नाम ज्ञानाभावः ; तस्य च, अवस्तुस्वाभाव्यात् कुतः संसारकारणत्वम् ? न ह्यसतः सजन्मेष्यते ॥ नै. सि. सं. ३–७.

[अत्र तु स्पष्टमेवाज्ञानस्य संसारकारणत्वमाक्षिप्तम्]

अज्ञात एव सर्वोऽर्थः प्राग्यतो बुद्धिजन्मनः।
एकेनैव सता संश्च सन्नज्ञातो भवेत्ततः ॥ नै. ३–७.

[अभावरूपमज्ञानं कथं कारणं भवेत् – इत्याक्षेपपरिहारत्वेनेदं पठितम्।

अतोऽज्ञातसद्ब्रह्मैव कारणमिति नोक्तदोष इति परिहारहृदयम् । 'ज्ञानाभाव-विलक्षणभावरूपाज्ञानेनावृतः' इति व्याख्यानं तु ग्रन्थकाराशयविरुद्धमित्युपेक्ष्यम् ॥]

(४) **अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम् ।**
अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥ वा. १-४-३७१.

[द्वैतस्य इन्द्रजालसदृक्षत्वं मिथ्याध्यासत्वमेवेति कृत्वा अज्ञानस्य यथोक्तनीत्या तत्कारणत्वम् । अज्ञानोपाश्रयेण ब्रह्मैव कारणं द्वैतस्येत्यभिप्रायः । मिथ्याज्ञानस्याज्ञानकार्यत्वं प्रागुक्तं विमृष्टं चात्राप्यनुसंधेयम् । अत्र 'द्वैतस्येन्द्र-जालवदविचारितरमणीयस्य अभावेतरकारणत्वेन, उपादानापेक्षस्य अनुरूप-मुपादानमज्ञानमिति तदुपादाय ब्रह्म तत्कारणम्' इत्यादि टीकाकृद्व्याख्यानं मूलाशयप्रतिलोममिति स्पष्टम् ॥]

(५) **एवंभूतात्मसिद्ध्यर्थं कारणादि प्रसाध्यते ।**
उपायः सोऽवताराय तथा तज्ज्ञैश्च सूत्रितम् ॥
कारणादिनिषेधेन न चाद्वैतमभीप्सितम् ।
ऐकात्म्यबोधमात्रेण निषेधस्याप्यपह्नवात् ॥
सत्तत्त्वकमिदं सर्वमिति संसाध्य यत्नतः ।
तस्यापि संविन्मात्रेण पूर्णतैवोच्यते सतः ॥
वा. १-२-२७ प्रभृति २९ पर्यन्तम् ।

[कार्यकारणतदभावविलक्षणम् अजाद्वितीयात्मतत्त्वं साधयितुमेव कारणादि-साधनम्, न तु कार्यकारणभावस्य परमार्थत्वमभिप्रेत्य । कारणादिद्वयाभावत्व-मेवाद्वैतमिति न विवक्ष्यते । अभावस्याप्यपह्नवेनैव तद्विलक्षणस्वतःसिद्धार्थबोधनात्-इत्यभिप्रायः । कारणाद्युपाश्रयेण सर्वस्यापि सत्कारणकत्वं प्रथमतो बोधयित्वा ततः सत्त्वस्याप्यद्वितीये निर्विशेषे प्रविलयः क्रियते । अतः कार्यकारणवादे न तात्पर्यम्-इत्याशयः ॥]

(६) **अविद्याकर्मसंस्कारास्तेजोऽप्क्ष्मासूत्रसंश्रयाः ।**
खे लीनास्त्वस्तितामात्रा अव्यक्ताख्याः सहात्मना ॥ वा. १-४-२०५
प्रथते वैश्वरूपेण यतोऽविद्यैव सर्वथा ।
अविद्यामात्रयाथात्म्यादतस्तद्वद्मुच्यते ॥ वा. १-४-२०७.

[अत्राव्याकृतस्वरूपं विशदय्य, अविद्यैव व्याकृताव्याकृतरूपेण प्रथते इत्युक्तम् । अतोऽव्याकृतस्य क्वचिदविद्याशब्दवाच्यत्वं जगदुपादानत्वं चोक्त-मविद्याया एव रूपान्तरमनात्मा – 'अविद्या साप्युक्ता' (तै. २-१७८) इत्युक्तदिशा तस्या अप्यविद्यात्वोपचार – इत्यवधेयम् ॥]

(७) वस्तुवृत्तमपेक्ष्यैतन्न स्वतः परतस्तमः ।
तर्जं वा तत्तमोऽपेक्ष्य ह्यव्याकृतगिरोच्यते ॥
चिद्भासं तमो ज्ञेयं नाज्ञासिषमितीक्षणात् ।
जगज्जनिस्थितिलया एवंभूते परात्मनि ॥
तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनाम् ।
परः कारणतामेति भावनाज्ञानकर्मभिः ॥
वा. १-४-३४० प्रभृति ३४२ पर्यन्तम् ।

(८) मौढ्यं जाड्यमविद्या स्यान्नित्यबुद्धात्मवस्तुनः ।
अनात्मनि च तद् दृष्टं तेन मृत्युरिदं जगत् ॥ वा. ४-३-४५७.

['मृत्यो रूपाणि' इति श्रुत्युक्तो मृत्युरविद्यैव, 'मृत्युर्वै तमः' इति च श्रुतेः-इत्युक्त्वा तच्छेषेणेदमुक्तम् । मौढ्यं जाड्यं चाविद्यास्वरूपम्, तदुभयम् अनात्मन्यपि च दृश्यत इति सोऽपि मृत्युः - इत्यर्थः । अनात्मन्यविद्याशब्द-प्रवृत्तिनिमित्तमिहोक्तं भवति ॥]

न च जाड्यातिरेकेण ह्यविद्या काचिदप्यते ।
अविद्यां गमयित्वेति श्रुतितोऽप्यवसीयताम् ॥ वा. १-४-२५६.

[अत्र विद्याविद्ययोश्चेतनत्वाचेतनत्वरूपेण विरोधं विशदयितुम् अविद्याया जाड्यमेव स्वरूपमित्युक्तम् । 'शरीरं निहत्याविद्यां गमयित्वा' (बृ. ४-४-३) देहान्तरं गच्छतीति वदन्त्याः श्रुतेरचेतनत्वमेवाविद्यात्वमभिप्रेतमिति गम्यत इत्यभिप्रायः । अत्राप्यविद्यानात्मनोरेकत्वं विवक्षितमिति स्फुटम् ॥]

(९) मृत्युर्वै तम इत्येवमाप एवेदमित्यपि ।
अविद्या प्रथते मौली व्यक्ताव्यक्तात्मनानिशम् ॥ वा. १-२-१३६.

['मृत्युर्वै तमो ज्योतिरमृतम्' (बृ. १-३-२८) इत्यत्र व्यक्तभूत-स्वाभाविकज्ञानकर्मरूपेण प्रथमाना अविद्या मृत्युशब्देन व्यपदिष्टा, 'आप एवेदमग्र आसुः' (५-५-१) इत्यत्राप्यविद्यैवाव्यक्तरूपेण प्रथमाना 'अप्' शब्देन व्यपदिष्टा - इति श्लोकार्थः । अत्र 'मूलाविद्यैव मृत्युशब्दव्याख्यानेन तमः शब्देनोच्यते' इति टीकाकारोक्तिरनादेया । अविद्यैव 'व्यक्ताव्यक्तरूपेण प्रथते' इत्यव्यक्तस्य मूलाविद्यापराभिधानस्य अविद्याकृतत्वोक्तेः, प्रस्थानान्तराहृत-मूलाविद्यावादस्य वार्तिके कुत्राप्यदर्शनाच्च । 'प्रथते मौली' इति मौलिरव-श्रवणमात्रेण कण्ठरवेणोक्तामव्यक्तात्मना प्रथाम् 'न जानामीत्यविद्या स्यात्' इत्यादिवचनैः स्पष्टीकृतामविद्यां च त्यजद्भिर्भ्रान्तैरेव स्वाभिलषितप्रक्रियान्तर-

मत्रानीयत इति स्फुटम् । आस्तामिदं प्रासङ्गिकं तावत् । इदं त्विह बोध्यम् – यत्र क्वचिदविद्याया उपादानकारणत्वं वार्तिके विवक्ष्यते, तत्र जडात्मकाव्यक्तरूपेण प्रथमानायास्तस्यास्तदुच्यते, न तु स्वेन मौढ्यरूपेण । कार्यकारणभावस्याविद्याकृतत्वप्रकाशनैकपरत्वाद्वार्तिकप्रस्थानस्य । व्यवहारदृष्टयैव तु यथाप्रसिद्धस्य कार्यकारणभावस्याभ्युपगमाच्चेति ॥]

(१०) **नामरूपादिना येयमविद्या प्रथतेऽसती ।**
माया तस्याः परं सौक्ष्म्यं मृत्युनैवेति भण्यते ॥ १-२-१३५.

[इह नामरूपकर्मात्मना प्रथमाना अविद्या तस्याः परमं सूक्ष्मरूपं मायापरसंज्ञम् मृत्युशब्देनोच्यते । 'मृत्युनैवेदमावृतमासीत् – इति वाक्ये इत्युक्तम् । अत्राप्यविद्या नामरूपकर्मात्मकानात्मनो बीजावस्थैव मायाशब्देन भण्यते । तथा च 'अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया' – इत्यादिभाष्येणास्यैकवाक्यतैव । 'ये केचिदविद्यामाययोर्भेदमाहुस्तन्निरासार्थं मायेत्युक्तम्' इति टीकोक्तिस्तु वाक्यस्वारस्यानवधानकृतेति ध्येयम् ॥]

(११) **अनिश्चिता यथा रज्जुरिति न्यायोपबृंहितम् ।**
स्फुटार्थं गौडपादीयं वचोऽर्थेऽत्रैव गीयते ॥
तदिदं नामरूपाभ्यामनामकमरूपकम् ।
एवं व्याकृतयाज्ञानहेतुमात्रव्यपाश्रयात् ॥ वा. १-४-३८९, ३९०

[अव्याकृतव्याकृत्याप्रकरणे गौडपादोक्तयुदाहरणपूर्वकं स्रष्टृत्वोपपादनात् जगद्ब्रह्मणोः कार्यकारणभावः सर्वथा रज्जुसर्पादिन्यायेनैवावसेय इत्युक्तं भवति । एवमेव ह्युत्तरत्र – 'रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः । अवस्तु सन्नपि ह्येष इति पूर्व्यैरपीरितम् ॥' (वा. १-४-४४३) इति भगवत्पादीयोपदेशसाहस्रीवचनोदाहरणं संगच्छते ॥]

(१२) **आत्मन्यध्यासरूपोऽयं संसारः प्रतिपादितः ।**
अध्यासश्च विना हेतुं न लोक उपपद्यते ॥
तस्माद्धेतूपदेशाय यः कारणमितीर्यते ।
यस्मिन्नविद्ययेत्येवं ननु कारणमीरितम् ॥
प्रधानवादमाशङ्क्य यस्मात् भूयोऽपि भण्यते ।
अज्ञात आत्मा जगतः कारणं न गुणत्रयम् ॥

वा. १-४-४७८ प्रभृति ४८०.

['यदर्थः सर्वशास्त्रारम्भः, यस्मिन्नविद्यया स्वाभाविक्या कर्तृक्रिया-फलाध्यारोपणा कृता, यः कारणं सर्वस्य जगतः, यदात्मके नामरूपे .... ' (बृ. भा. पा. ६५५) इत्यादिवाक्यस्य व्याख्यानमिदम् । कर्तृक्रियाफलरूपस्य संसारस्याध्यासरूपत्वोक्तिः, अध्यस्यत इत्यध्यासः इति कर्मसाधनत्वमध्यासशब्द-स्याश्रित्य । 'अध्यासस्य हेतुरपेक्षिता ' इत्युक्तिस्तु 'विकल्पस्यास्पदमपेक्षितम्' इत्यभिप्रायकम् । 'अविद्यया' इति भाष्योपात्तस्य स्वप्रक्रियाभिमताज्ञानपरत्व-मुररीकृत्य 'विना हेतुम्' इत्याक्षेपोत्थापनम् । अज्ञानमेव सर्वकारणम् – इति हि स्वप्रक्रियेति न स्वतन्त्रमज्ञानं कारणम्, अपि तु अज्ञातात्मैव कारणम्–इत्यस्मा-कमभ्युपगमः ; अतो नोक्ताक्षेपस्यावसरोऽस्तीति समाधानम् । भाष्यसंमत-प्रक्रियया तु 'स्वाभाविक्या अविद्यया मिथ्याज्ञानरूपया संसारः प्रत्युपस्थापितः' इति क्रियाकारकफलात्मकसंसारस्य मृषात्वोपपत्तिः ; 'यः कारणम्' इति तु सर्वस्यापि जगतो रज्जुसर्पादिवद्विकल्पमात्रत्वात्, तदास्पदत्वमेव कारणत्वं ब्रह्मण इति ज्ञापयितुम् – इति विवेकः । उभयोरपि प्रक्रिययोरेकवाक्यता तु प्राग् (खं ११२) विमृष्टप्रकारेण ॥]

(१३) भिन्नं चेत् कारणात् कार्यं कार्यकारणता तयोः ।
प्रत्यक्प्रसिद्धयोः केयं हिमवद्विन्ध्ययोरिव ॥
अथाभिन्नं तदैकत्वात् कार्यकारणता कुतः ।
नापि निष्क्रियरूपं सत् कारणत्वं समश्नुते ।
तथा चाक्रियमाणं सत् कथं कार्यमिहोच्यते ।
क्रियाशून्यं च यद्वस्तु तच्चाकारकमिष्यते ॥
लयेनैव समाप्तत्वात् कालकर्मादिकारणम् ।
स्वात्मोत्पत्तावशक्तं तद् व्यक्तं सामर्थ्यभाग् यतः ॥

वा. २-१-३९९ प्रभृति ४०२.

[अत्र कार्यकारणभाव एव न युक्तिसह इति प्रत्याख्यातः । एतद्वितत्योत्तर-श्लोकैरपि, अन्ते उपसंहृतम् –'जगदुत्पत्तिसंहारास्तद्वदात्मनि कल्पिताः । वस्तुवृत्तं समालोक्य कुतः सृष्ट्यादिसंभवः ॥' (४११) इति । तथा च मायिकमेव जगत्कारणत्वमित्यभियुक्तसंप्रदाय एवात्रानुसृतः ॥]

सामान्यविशेषभावप्रक्रिया –

११९. यथैव कार्यकारणभावप्रक्रिया न ब्रह्मणः कारणत्वमव-धारयितुम्, किं तु तस्मिन् कारणत्वमध्यारोप्यात्मनस्तत्वमधिगमय्य तदनु

कार्यकारणभावनिरासायैव ; एवमेव सामान्यविशेषभावप्रक्रियाप्यात्मनि सामान्यत्वमध्यारोप्य तदस्तित्वमधिगम्य, तदनु सामान्यविशेषभावापवादायैवेति भाष्यकारानुसार्येव वार्तिकप्रस्थानमिहापि । सामान्यविशेषभावाध्यारोपस्तु श्रुत्यनुसारेणैवं क्रियते वार्तिके –

यथा दुन्दुभिशब्दसामान्याद् विविच्य न तच्छब्दविशेषा ग्रहीतुं शक्यन्ते, एवमात्मातिरेकेण आत्मीयार्थो न शक्येक्षणः (वा. २-४-२६७, २६८)। 'दुन्दुभिशब्दा एते' इति सामान्यग्रहणेन, 'दुन्दुभ्याघातविशेषोत्था एते' इत्यवान्तरसामान्याद् वा, तत्तद्विशेषा गृहीताः स्युः, स्वस्वसामान्यान्वितत्वात् (वा. २७५–२८०) ; यथा च निर्विकल्पज्ञानेन सामान्यरूपेण पूर्वमुमलब्धो घटः, तत ऊर्ध्वम् 'अस्ति', 'सन् घटः' – इत्याद्युत्तरोत्तरविकल्पविशिष्टोऽनुभूयते (वा. २८१), यथा च महासामान्यावान्तरसामान्यविशेषधीपूर्वकमेव तत्तदुत्तरो विशेषो विज्ञायते, एवम् अज्ञातचिदन्वितमेव सर्वं-सामान्यं तद्विशेषो वा-आत्माज्ञानतस्तदध्यस्तं विज्ञायते। प्रत्यगात्मा तु स्वसिद्धौ नान्यापेक्षः । किञ्च प्रमातृत्वकञ्चुकं बिभ्राण एवात्मा अनात्मानमीक्षते, स्वात्मानं तु निरपेक्षचैतन्यस्वरूपेणैवानुभवति। तदेवं सर्वत्राप्येकस्मिन् महासामान्ये, अशेषविशेषाणां प्रविलयं प्रदर्शयितुम् (वा. २८७) शङ्खवीणोदाहरणादानम्–इति ॥

वस्तुतस्तु सामान्यविशेषभावो नाम न कश्चिदस्तीति स्मर्तव्यम् । तथा हि, यथा सामान्यस्य विशेषेष्वन्वयो नियमेन दृश्यते, न तेषां तस्मिन्नन्वयो गृह्यते । सामान्यस्य सर्वथा विशेषासंपृक्तरूपेण तस्य पृथग्ग्रहणं न संभवति । विशेषव्यतिरेकेणापि हि सामान्यस्य केवलस्य सिद्धौ स्वीक्रियमाणायां तस्यापि गोत्वादेः खण्डादिवद् विशेषत्वमेव स्यादिति न सामान्यस्य सिद्धिः, सामान्याभावे च विशेषासिद्धिरपीति। तदेवं सामान्यविशेषयोरसिद्धौ सामान्यव्याप्तो विशेषः–इत्यङ्गीकारोऽपि मुधैव । व्याप्यव्यापकभावस्य द्विनिष्ठत्वात्, सामान्यविशेषयोर्भेदस्याद्याप्यसिद्धत्वात् – इत्यपवादप्रकारः ॥

तत्रैते श्लोका अनुसंधेयाः –

(१) महासामान्यदृष्टान्तो दौन्दुभो रव उच्यते ।
सामान्येतररूपस्य दुन्दुभ्याघात इष्यते ॥
बाह्यानिति तथा चोक्तिर्विशेषाणां तु केवलम् ।
इत्युक्तार्थप्रसिद्ध्यर्थमित्युदाहरणत्रयम् ॥ वा. २-४-२८८, २८९.

(२) अन्वयव्यतिरेकाभ्यामभाववपुषाऽथवा ।
सद्धीगम्याद् हिरुग्वस्तु न मानेनावसीयते ।
षष्ठ्यर्थासंभवोऽतः स्याद् द्वितीयासंभवात् सतः ।
यथा सति तथा विद्यात् प्रतीच्यनन्यमानके ॥
वा.[1] २९०-२९१, पा. १०८१.

[सत्सामान्याद् व्यतिरिक्तं वस्तु सदन्वयेन सद्व्यतिरेकेण अभावरूपेण वा न सिध्यतीति महासामान्यदृष्टान्तत्रयेण सिद्धम् । अतः सतोऽन्येन न केनचिदपि संबन्धः – इति सिद्धम् । एवं स्वतःसिद्धात्मन्यपीति तदद्वयत्वं सिध्यतीत्यर्थः ॥]

(३) उपलब्धोऽस्ति सन् कुम्भो लम्बोष्ठो देशकालवान् ।
पूर्वदूर्वातिरेकेण नोत्तरोऽर्थोऽनुभूयते ॥
वा. २-४-२८१, पा. १०७९.

[निर्विकल्पानुभवव्याप्तं सर्वमित्यत्र दृष्टान्तः]

एवं चिदन्वयात् सर्वस्तदध्यस्तः समीक्ष्यते ।
सामान्यं वा विशेषो वा चिदसंबोधहेतुतः ॥ वा. २८२, पा. १०८०

(४) प्रत्यग्रूपस्य संसिद्धौ प्रतीचोऽन्यन्न कारणम् ।
अनात्मवत् तदप्यात्मविशेषणतया भवेत् ॥
वा. २८३, पा. १०८०.

[प्रत्यगात्मा स्वमात्रमानकः अनात्मा तु आत्मप्रमाणेनैव सिध्यति ॥]

(५) कर्तृत्वकञ्चुको यद्वदात्मानात्मानमीक्षते ।
कूटस्थदृष्टिमात्रत्वान्न तथात्मानमीक्षते ॥
संहतो गम्यतेऽनात्मा प्रत्यक्षेण यथा सदा ।
गम्यतेऽसंहतस्तद्वदात्मा प्रत्यग्धियात्मना ॥
वा. २-४-२८४, २८५; पा. १०८०.

---

1. अत्र सर्वत्र चतुर्थब्राह्मणागतानामेव संख्या परामृष्टा ॥

[प्रमाणं व्यापारयित्वैव कर्त्रात्मा अनात्मानं जानाति, केवलात्मा तु अकिञ्चित्साधन एव स्वात्मानमनुभवति । किञ्च, प्रमेयभूतोऽनात्मा प्रमातृ-प्रमाणाभ्यां संहत एव ज्ञायते ; आत्मा तु न केनचिदन्येन संहतः । प्रत्यक्प्रवणबुद्ध्या आत्मरूपत्वैव गम्यते ॥]

(६) **विशेषैरन्वयो नापि सामान्यान्वयवत् क्वचित् ।**
सामान्यस्याविशेषत्वाच्चातः सामान्यधीग्रहः ॥
विशेषैरन्वयो नो चेदिभाखुव्यक्तिवन्मिथः ।
खण्डवत् स्याद् विशेषादौ यत् सामान्यमितीरितम् ॥
वा. २-४-२६९, २७०, पा. १०७७, १०७८.

[विशेषादौ – सामान्यविशेषे, केवलविशेषेषु वा ॥]

पञ्चकोशविवेकप्रक्रिया –

१२०. पञ्चकोशप्रक्रियापि श्रौती कोशाध्यारोपेण ब्रह्मात्मस्वरूपं प्रतिपाद्य कोशापवादार्थमेवेति वार्तिकमतम् । इत्थं सा प्रक्रिया सङ्क्षेपतः । अनाद्यविद्यावासनया कोशेष्वेवात्ममतेर्निरूढत्वात्, तानेवोपायत्वेनादाय प्रत्यगात्मनि बुद्धिरवतार्यते (तै.वा. २-२३२, २३३) । एक एव हि प्रत्यगात्मा अध्यात्मम् अधिदैवं च कोशपञ्चकावच्छिन्नो द्वेधा प्रविभक्त इवाविद्यया लक्ष्यते । (तै. वा. २–२३४, २३५) । तत्र कार्यरूपान् अन्नमयादीन् स्वस्वकारणेष्वन्नादिषु प्रविलाप्य, तानपि क्रमेणोत्तरस्मिन्नुत्तरस्मिन् पूर्वं पूर्वं प्रविलाप्य, परमकारणात्मना स्थितो वेदान्तवाक्यजन्यज्ञानेन कारणात्मत्वमप्यपबाध्य ब्रह्मस्वरूपेणावशिष्यते (तै. वा. २–२३६, २३७) । केवलम् अध्यात्मकोशानामेव प्रविलापने हि स्वदेहमात्रपरिच्छिन्न आत्मा ज्ञातः स्यात् साङ्ख्यराद्धान्ते इव (तै. वा. २–२६८), तच्चानिष्टमिति । पूर्वस्माद् पूर्वस्माद् व्यतिरेकेण निर्देशात्, उत्तरस्योत्तरस्य 'अन्योऽन्तर आत्मा' इति 'तेनैष पूर्णः' इति च – प्रतिकोशमुत्तरोत्तरपूर्णत्वेन निर्देशात् उत्तरस्योत्तरस्य स्वात्मनापि पूर्वपूर्वकोशान्वयोक्तेः, अन्नमयस्य प्राणमयादिभिश्चतुर्भिः, प्राणमयस्य मनोमयादिभिस्त्रिभिः – इत्येवम् अन्वितत्वावगतेश्च, अन्वय-

व्यतिरेकाभ्यां सर्वस्यापि कार्यस्य परमकारणे प्रविलयोऽभिप्रेत इति निश्चीयते (तै. वा. २-२६९)। तदेवं ब्रह्मण उपेयभूतस्यानन्दवल्ल्यां निर्धारितत्वादेव भृगुवल्ल्यामपि कोशान्वयव्यतिरेकद्वारेणब्रह्मप्रतिपत्तिप्रकारो विवक्ष्यत इति वल्ल्योरानुरूप्यमपि सिध्यति। तत्र 'आनन्दो ब्रह्मेति व्यजानात्' इति त्वज्ञानकार्यभूतपञ्चकोशापह्नवेन शुद्धानन्दस्वरूपं ब्रह्मैव प्रतिपाद्यते इति विशेषः (२-३३२ प्रभृति ३३५ पर्यन्तम्)। एवं च 'असन्नेव स भवति' (तै. २-६) इति श्लोकस्यायमेवार्थोऽवसीयते, यत् आत्मस्वरूपेण सदपि ब्रह्म कोशात्मना असद्रूपेण वेद चेत् असन्नेव भवति, अथ कोशव्यतिरिक्तेन सद्ब्रह्मरूपेण वेद, तं सन्तं विदुर्ब्रह्मविदः। तस्मात् अज्ञानकल्पितान् कोशान् सर्वानपि निरस्य निर्विकारं परमात्मानमेवात्मत्वेनाश्रयेदिति (तै. २-३५३ प्रभृति ३५६) इति॥

अत्रैते वार्तिकश्लोकाः प्राधान्येनानुसंधेयाः –

(१) अनादाविह संसारे वासनारञ्जिता मतिः।
प्रतीच्युपायतः कर्तुं शक्या तस्मात् स उच्यते॥ तै. वा. २-२३३.

(२) द्वैतास्पृक् प्रत्यगात्मैकः प्रतीचीव परागपि।
युष्मदस्मद्विभागाभ्यां भिद्यतेऽविद्यया मृषा॥
अस्मद्विभागे पञ्चान्ये यथैवान्नमयादयः।
तथा तत्प्रत्यगात्मानो युष्मदन्नादयः स्मृताः॥
तै. वा. २-२३४, २३५.

(३) आध्यात्मिकान् विलाप्याथ यथा स्वं प्रत्यगात्मसु।
अन्नादीन् पर्युपासीत ह्युत्तरोत्तररूपगान्॥
जग्ध्वा कार्यात्मतामेवं कारणात्मतया स्थितः।
आत्मनाऽऽलिङ्गते ब्रह्म वाक्याज्जग्ध्वाथ तामपि॥
तै. वा. २-२३६, ३३७.

(४) अविद्ययातदर्होऽपि रज्जुः सर्पात्मतामिव।
कोशपञ्चकतां यातस्तमनुक्रोशतीव हि॥ तै. वा. २-२५०.

(५) कार्याणां कारणात्मत्वमेवं स्यादुत्तरेष्वपि ।
ब्रह्मानन्तं भवेदेवं साङ्ख्यराद्धान्तम(अ ?)न्यथा ॥
पूर्वकार्यातिरेकेण स्वात्मना चान्वयोक्तितः ।
अन्वयव्यतिरेकाभ्यां यथोक्तार्थः समर्थितः ॥
कोशैश्चतुर्भिः संव्याप्तो यथैवान्नमयः पुरा ।
जानीयादुत्तरानेवं त्रिद्वेकार्थसमन्वयात् ॥
तै. वा. २-२६८, २६९, २७१, पा. १०१.

(६) आनन्दवल्ल्यां ब्रह्मोक्तं तदुपायविधित्सया ।
अधीहि भगवो ब्रह्मेत्यवोचद् वरुणं भृगुः ॥
व्याख्यातत्वादुपेयस्य ह्युपायोऽत्रावशिष्यते ।
उपायाः कोशाः पञ्चापि यस्मात्तैस्तं प्रपद्यते ॥
अन्वयव्यतिरेकाभ्यां कोशैरात्मसमीक्षणम् ।
क्रियते हि यतस्तेषामुपायत्वं प्रतीयते ॥
तै. वा. २-३३३ प्रभृति ३३५, पा. ११५.

[अन्वयव्यतिरेकचिन्तनं तपः स्यादिति स्वमतं - भाष्यव्याख्यानानन्तरं भृगुवल्ल्यामप्युच्यते ३-१९ ; तेनैकवाक्यतास्यावगन्तव्या ॥]

(७) सदप्यात्मस्वरूपेण ब्रह्मासदिति वेद् चेत् ।
सोऽसन्नेवेह भवति कोशात्मत्वाभिमानभाक् ॥ तै.वा. २-३५३.
यस्मादेवमतो हित्वा कोशानज्ञानकल्पितान् ।
निर्विकारमनाद्यन्तं परमात्मानमाश्रयेत् ॥
तै. वा. २-३५६, पा. ११९.

द्रष्टृदृश्यविवेकः –

१२१. द्रष्टृत्वाध्यारोपापापवादाभ्यामपि परमार्थात्मतत्त्वं ज्ञाप्यते । तद्यथा – आत्मचैतन्यमेव तावद् दृष्टिर्द्रष्टा चेत्युपचर्यते तत्र तत्र वेदान्ते । एकैव सती हीयं दृष्टिरविद्यया बहुधा आभाति । प्रमातृव्यापारजन्य-लौकिकदृष्ट्यपेक्षया सेयं पारमार्थिकी दृष्टिरिति व्यपदिश्यते । तत्र लौकिकी दृष्टिस्तावत् चैतन्यरूपपरमार्थदृष्टिव्यासैव जन्मादिषड्भावविकारान् भजते । 'यत् साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-४-२) इति श्रुतिवाक्येऽपि लौकिक एव द्रष्टा वर्णितः 'साक्षात्' इति शङ्कावारणाय

द्रष्टृदर्शनदृश्यसंभेदजन्यप्रात्यक्ष्यशङ्कानिवृत्त्यर्थं च 'अपरोक्षात्' इति विशेषणमपि दत्तम् (वा. ३-४-१५ प्रभृति १८ पर्यन्तम्)। तथा हि द्रष्ट्रादिव्यतिरिक्तं परमार्थदृष्टिमात्रत्वम् आत्मनो लभ्यत इति । 'न दृष्टेर्द्रष्टारं पश्येः' इत्यादिवाक्यशेषेण तु द्रष्ट्रादीनां संहतानां साक्षित्वमात्मन इति वस्तुस्वाभाव्यादेवाप्रमेयत्वात्, लौकिकदृष्ट्यविषयत्वं सिध्यतीत्युच्यते । यत्प्रसादाद् हि 'पश्यामि', 'न पश्यामि' – इत्यादिव्यवहारः प्रवर्तते, तं शुद्धचैतन्याभिन्नं द्रष्टारं तद्दृष्टयैव द्रष्टुं शक्नुयात्, न तु लौकिकदृष्ट्या विषयीकर्तुम् इति । द्रष्ट्रादीनां जाड्यात्, संहतत्वेन परार्थत्वाच्च, न प्रत्यग्दृष्टिदर्शनसामर्थ्यं समस्ति । मिथोदर्शनासमर्थानां स्वसिद्ध्यर्थमेव तु साक्षिदृष्टिमपेक्षमाणानां कैव शङ्का सर्वद्रष्टृदर्शनसामर्थ्यस्येति ॥

अत्रानुसंधेयाः श्लोका इमे –

(१) **दृष्टिरेव तु सा द्रष्टा न तु कारकलक्षणः ।**
द्रष्टुर्विशेषणत्वेन दृष्टेरिति परिग्रहात् ॥ वा. ४-३-१४३५, पा. १६३३

[द्रष्टुर्दृष्टेः – इति विशेषणसामर्थ्यात् स्वरूपभूतैव दृष्टिरभिप्रेतेति गम्यते । अतो न दृष्टिकर्तृत्वमात्मन इत्यर्थः ॥]

(२) **दृष्टिरेकैव सर्वत्र सर्वानात्मविलक्षणा ।**
आभाति बहुधैवेयं तद्विद्योत्थहेतुभिः ॥ वा. ३-८-६०. पा १२९०

(३) **क्रियाकारकरूपेयमक्रियाकारकात्मना ।**
तावन्मात्रैकयाथात्म्यात् तया व्याप्तैव जायते ॥
कार्त्स्न्येन यत्र वृत्तिः स्याद् व्याप्यव्यापकवस्तुनोः ।
व्याप्तिस्तत्रैव मुख्या स्याद् रज्जुसर्पादिवस्तुवत् ॥
देशकालादिसंभेदादसाधारणतत्त्वयोः ।
व्याप्तिर्न घटते साक्षाद् हिमवद्विन्ध्ययोरिव ॥
वा. ३-४-९६ प्रभृति ९८ पर्यन्तम्, पा. १२२४.

[कारकनिरूप्यक्रियारूपा दृष्टिः, अक्रियाकारकरूपपरमार्थदृष्ट्यन्वयत्वाद् तद्व्याप्तैव जायते, सर्प इव रज्जुव्याप्तः । एषैव व्याप्तिर्मुख्या । 'घटादिरालोकव्याप्तः' इत्यादिस्थले तु गौण्येवेत्यर्थः ॥]

(४) प्रमात्रादिव्यपेक्षेयं लौकिकी दृष्टिरात्मनः ।
तत्प्रत्यगात्मदृष्टिस्तु विज्ञेया पारमार्थिकी ॥
परमार्थात्मदृष्टयेयं लौकिकी दृष्टिरात्मनः ।
षड्भावविक्रियामेति व्याप्तैवाकाशकुम्भवत् ॥ वा. ३-४-९९, १००

[आकाशकुम्भवत् - आकाशव्याप्तकुम्भवत् । कुम्भोऽपि ह्याकाशकार्यत्वात् तदनन्य एवेति भावः ॥]

(५) यदि वा द्रष्टरि प्राप्ते साक्षादिति विशेषणात् ।
तत्प्रसङ्गनिवृत्त्यर्थमपरोक्षादितीर्यते ॥
द्रष्टृदर्शनदृश्यार्थसंभेदविषयस्य हि ।
निषेधायापरोक्षाद्गीरभिन्नार्थग्रहाय तु ॥
द्रष्टृदर्शनदृश्यार्थसंभेदस्य निषेधतः ।
दृष्टिमात्रं स्वतःसिद्धं विशेषणफलं भवेत् ॥
वा. ३-४-१५, १७, १८ ; पा. १२१०.

(६) द्रष्टृदर्शनदृश्यानां संहतानां परस्परम् ।
साक्षित्वमात्मनो नित्यं वस्तुस्वाभाव्यमुच्यते ॥ वा. ३-४-८२.
वेद्मीति यद् बलादाह न वेद्मीत्यपि यद्बलात् ।
तद्दृष्टयैवेह तं दृष्ट्वा ब्रूह्यवद्यं यदीक्षसे ॥ वा. ३-४-८०, पा.१२२०
सर्वधीविक्रियासाक्षिण्येवं सिद्धे स्वतो दृशौ ।
कार्यं येऽनुभवं प्राहुर्व्यर्थं तैः कार्यसाधनम् ॥ वा. १-४-३२०

[सर्वसाक्षिणि सिद्धे सत्येव प्रमाणव्यवहारावतारात्, स्वतःसिद्धे सिद्ध्यर्थमन्यानपेक्षणात्, दृष्टौ दृश्यमात्रलब्धव्यापारकृत्याभावात्, अनुभवरूपे प्रदीपे दीपान्तरप्रकाशेनाधेयातिशयाभाववत् अनुभवान्तरेणाधेयातिशयाभावात् । एवंभूतेऽपि तत्रानुभवं कार्यं ये प्राहुः, तैः कथं केन साधनेन कस्मै फलाय वा कार्योऽनुभव इति वक्तव्यम् - इत्यभिप्रायः ॥]

तदेतदध्यारोपदृष्ट्या यदेवमुपवर्णितमधस्तात् । अथापवादः । द्रष्ट्रादिप्रवृत्तेः प्राक्, उपजनापायवर्जिता, अकारकात्मनैव तिष्ठत्यात्मनो दृष्टिः । एतदेव चात्मनो वास्तवं रूपम् । अविद्यासंबन्धात्तु साक्षित्वमस्याः, अविद्यासंबन्धोऽपि चाविद्यामात्रहेतुकः । कूटस्थदृष्टेर्न साक्षित्वं समस्ति यथा जडस्य । तथा हि । साक्ष्यार्थसंबन्धाभावाच्चितेर्न

साक्षित्वम्, अचेतनस्य तु तत्संबन्धे सत्यपि न तत्समस्ति । तस्मात् परमात्मचैतन्यस्य स्वाज्ञानस्याभासद्वारैव साक्षित्वं भवतीति सर्वमनवद्यम् ॥

(१) प्रमात्रादिप्रवृत्तेः प्राक् सदानस्तमितोदिता ।
अकारकात्मना तस्थौ प्रत्यग्दृष्टिरसङ्गतः ॥
अकार्यकारणान्मैतद्वास्तवं रूपमात्मनः ।
सकृद्विभातमैकात्म्यं चिदस्त्रकमभेदकम् ॥
एतत्तमोऽभिसंबन्धात् साक्षित्वं प्रतिपद्यते ।
तमोमात्रैव हेतुश्च मोहसंगतिरात्मनः ॥
वा. ३-४-८३ प्रभृति ८५ पर्यन्तम् ; पा. १२२१.

कूटस्थदृष्टेः साक्षित्वं जडस्येव न युज्यते ।
साक्ष्यार्थानभिसंबन्धात् तस्मिन् सत्यपि नाचितेः ॥
तस्मात् परस्य साक्षित्वं स्वमोहाभासवर्त्मना ।
कार्यकारणसंबन्धे चिदाभासस्य संहतेः ॥ वा. ३-४-८९, ९०.

[कार्यम् – बुद्ध्यादि ; कारणं च – अज्ञातचैतन्यम् ।]

(२) अज्ञानमात्रोपाधित्वाद्वचिद्याभुषितात्मभिः ।
कौटस्थ्यान्निर्द्वयोऽप्यात्मा साक्षीत्यध्यस्यते जडैः ॥
वा. १-४-३७२, पा. ५०५.

[साक्षित्वमध्यस्यते, अज्ञानमात्रोपाधिहेतोः ॥]

(३) पराक्प्रवणया दृष्ट्या धीस्थो ज्ञोऽज्ञानमात्मनि ।
व्योमकार्ष्ण्यादिवत् तज्जं संभावयति न स्वतः ॥
वा. १-४-२९८, पा. ४८९.

[न जानामीत्यनुभववलादेवाज्ञानसंभावना । अनुभवोऽप्यसौ पराग्दृष्ट्यैव स्वतः प्रत्यग्दृष्ट्या तु वीक्ष्यमाणे नैवास्त्यज्ञानम् । व्योम्नि कार्ष्ण्यमनुभूतमनुभवकालेऽपि वस्तुतो नैवास्ति यद्वत् ॥]

अवस्थात्रयप्रक्रिया –

१२२. अवस्थात्रयोपन्यासोऽपि नावस्थासद्भावविवक्षया, किं तु, अवस्थात्रयाध्यारोपेण तत्परीक्षापूर्वकम् आत्मस्वरूपम् अधिगमय्य पर्यन्ते नित्यनिरवस्थमात्मानमनुभवारूढमापादयितुम् इति वार्तिककारमतम् ॥

तत्राध्यारोपावस्थायां स्वं पिण्डात्मानं वैश्वानरे उपसंहृत्य तत्तादात्म्यमापन्नः, तमपि हिरण्यगर्भे, तदनु तमपि प्राज्ञे कारणात्मनि प्रविलाप्यान्ते अकार्यकारणस्वरूपे नेतिनेत्यात्मना अवतिष्ठेत -- इत्येष परमार्थतुरीयाधिगमप्रकारः संक्षेपतः ॥

एतत्प्रपञ्चस्तु ज्योतिर्ब्राह्मणे वार्तिके । अयं हि विज्ञानमयात्मा ज्योतिःस्वभाव एव सन्, अविद्यया बुद्धिजागरणे जागर्ति, तत्स्वापे च स्वप्नं पश्यति (वा. ४-३-४४८) । तत्र प्रमातृप्रमाणादिलक्षणो यो वासनामयो मिथ्यावभासे, तयैव चासौ स्वस्वरूपभूतज्योतिर्विषयभूतया प्रस्वपितीत्युच्यत इत्यतस्तत्राप्ययं स्वयंज्योतिरेव । सुषुप्तौ तु केवलाज्ञानमात्रोपाधिः कारणात्मा सन् जाग्रत्स्वप्नाख्यकार्यकृद् भवति (९७९)[1]। एवं च जागरिते कार्यकरणैः कर्मकृत् सुखी दुःखी च भवति, स्वप्ने बुद्ध्युपाधिः सन् कामप्रयुक्तः स्वप्नद्रष्टा भवति, सुषुप्तौ पुनरज्ञानमात्रोपाधिः सन् बुद्ध्यादिकारणं भवतीति विवेकः । (वा. १५२८) । तत्र महामत्स्यदृष्टान्तश्रुतिर्भाष्योक्तप्रकारेण कार्यकरणलक्षणमृत्युरूपाद् विलक्षण आत्मा तत्प्रयोजककामकर्मविलक्षणश्चेति प्रतिपादयति । अतोऽस्य संसारित्वमविद्याकृतमेवेति सिध्यति (वा. ११४८-११५१) । सुषुप्तौ यदज्ञातात्मरूपं कारणं तन्नामरूपरहितं ब्रह्मैव । 'इमानि सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' (छां. ८-३-२), 'एवं ह वै तत्सर्वं पर आत्मनि संप्रतिष्ठते (प्र. ४-७) इति च श्रुतेः । (वा. २-१-४५१, ४५२) । श्येनदृष्टान्तश्रुतिश्चात्मनो नित्यशुद्धबुद्धमुक्तस्वभावं प्रकटयितुं प्रवृत्ता(वा.११५८)। तत्र 'संहृत्य पक्षौ' इत्यनेनाविद्यायामवस्थानम्, 'सलँयाय' इति च चिदाभासस्यापि विशुद्धरूपेऽवस्थानं

---

1. अत्र दत्ता सङ्ख्याः प्रायशस्तृतीयब्राह्मणगतानेव श्लोकान् परामृशन्ति चतुर्थाध्यायस्येति बोध्यम् । अध्यायान्तरगतश्लोकानां तु तत्तदध्यायब्राह्मणसङ्ख्योल्लेखपूर्वकमेव निर्देशः कृतः ॥

निदर्श्यते (वा. ११७२, ११७३) तदेवम् अवस्थाद्वये योऽविद्या-कार्योपाधित्वादविद्यावानासीत्, स इदानीम् अविद्याया विविक्तो भवति (वा. ११७४, ११७५)। एतदेवास्य स्वतो रूपम्, अविद्याकामकर्म-रहितम्; जाग्रत्स्वप्नयोस्तु परोपाधिकृतमविद्यानिमित्तम् (वा. १२०५–१२०६)। उक्तरीत्या यद्यपि जाग्रत्स्वप्नक्षये कामाः क्षीयन्ते, तथापि सुषुप्तौ संस्कारशेषं तिष्ठन्तीति सुप्तोत्थितस्य पुनरप्याविर्भवन्ति, न च यावदात्मज्ञानं सर्वे प्रमुच्यन्ते (वा. ४–४–३७८) इत्यन्यदेतत्। काम-कर्मकलुषित आत्मा स्वप्ने कामहेतुकधीवासनानिर्मितदृश्यान्यवभासयन् ईषत्प्रसन्नो भवति, असङ्गत्वात्। सुषुप्ते तु केवलं कारणात्मना अवतिष्ठमानः सम्यक् प्रसीदतीति सुषुप्तं संप्रसादः (वा. ४–३–९७६ प्रभृति ९७८)। अत्र यदज्ञानम् – 'अयमहम्' इति वा 'तानीमानि भूतानि' इति वा अन्तर्बहिश्च ज्ञानाभावः – तदेतत् प्राज्ञेन परमात्मना एकीभावात् हेतोः, न तु जाग्रत्स्वप्नयोरिवोपाधिनिमित्तम् इति स्त्रीसंपरिष्वक्तपुरुषदृष्टान्तेन निदर्शितं श्रुत्या (बृ. ४–३–१३०९, १३१०)॥

कथमिदं ज्ञायते एकीभावादेवेदमज्ञानम्, न त्वचैतन्यस्वाभा-व्यादिति? दृश्यते नन्वचेतनेष्वप्यज्ञानम् (वा. १३८४)–इति शङ्का-परिहारस्तु 'यद्वै तन्न पश्यति' इत्यादिश्रुत्या। कामकर्माविद्यादि न चैतन्यवदात्मनः स्वभावः। असङ्गत्वश्रुतेः, अनन्वागतत्वश्रुतेश्च। अनाद्यविद्यासंबन्धस्तु तत्कार्यैर्मिथ्याज्ञानकामादिभिरादिमान् इतीष्यते (वा. ४–३–१४०८, १४०९)। एवमज्ञानमिथ्याज्ञानादिमतः कथं क नु स्यादुपदेशादिसंबन्धः इति शङ्कायाम् अविद्याकामकर्मरहितसुषुप्तावस्थोप-न्यासः क्रियते (वा. १४१०)। चक्षुरादिकरणानां स्वप्ननिद्रायामेव तावद् तद्वासनावत्यामप्ययो भवतीति गम्यते 'असुप्तः सुप्तानभिचाकशीति' इति श्रुतेः, कुत एव तदस्तित्वाशङ्का यत्र तद्वासनापि नास्ति (वा. १४१६)? अतो दृष्टिक्रियाकारकफलासंभवात् सुषुप्ते न पश्यति। पश्यन्नेव तु

भवति स्वभावतश्चैतन्यरूपत्वात् (वा. १४१७)। तत्र प्रमात्राद्यभावस्तु चित्स्वरूपेणानुभूतम् इत्येतदुत्थितस्य 'नाद्राक्षम्' इत्यनुसंधानबलादेव सिध्यति (वा. १४२०)। चैतन्यदृष्टेर्विलोपे हि सुषुप्तप्रसिद्धिरेव न स्यात्, अननुभूतत्वात् (वा. १४३८)। 'पश्यन् वै तन्न पश्यति' 'न हि द्रष्टुर्दृष्टेः विपरिलोपो विद्यते' इति शतृतृच्प्रत्ययग्रहणं तु न प्रमातृत्वं ज्ञापयितुम्। तत्र तदसंभवात्। अतः 'आकाशमवकाशदातृ' इतिवद् द्रष्टुरात्मनः स्वरूपमेवाहंप्रत्यय इति संतोष्टव्यम् (वा. १४४२)। न चात्मनोऽकारकत्वे कथं दृष्टिक्रिया स्यात्? – इति शङ्क्यम्। लोकेऽपि क्रियानिष्पत्तेः पूर्वं कारकस्य कुर्वद्रूपत्वादृष्टेः, क्रियायाः कार्यत्वेऽकार्यत्वे च कारकासिद्धेः (वा. १४४८), दृष्टिक्रियातत्फलयोः पौर्वापर्यासिद्धौ साध्य-साधनभावानिश्चितेश्च (वा. १४४९), अविद्याकृत एव द्रष्टृदर्शनतत्फल-विभागः (वा. १४५०) – इति सिद्धम्। अनात्मज्ञानसंबन्धायैवेत्थम् अविद्यापेक्षा, न तु यत्रात्मैव केवलं ज्ञायते तत्राविद्यातत्कृतकारकापेक्षेत्यपि (वा. १४५१–१४५२) बोध्यम्। तदेवं यदज्ञानं नामरूपादिभेदेन स्वात्मनः प्रविभक्तमासीत् स्वप्नजागरितयोः, तन्नैवेहास्ति सुषुप्ते, यस्मिन् सति जागरिते इवात्रापि द्वितीयं पश्येत्। सर्वं ह्यत्र कूटस्थात्मरूपतां प्राप्तम्। अतो नास्त्यज्ञानं तत्कार्यं तदभावो वात्रेति साक्षिविषयीभूतस्य विभक्त-स्यान्यस्याभावादेव न किञ्चिज्जानाति (१५१८–१५२३), न तु चैतन्य-परित्यागादिति निरवद्यम्॥

सुषुप्तविचारात् परिनिष्पन्नमर्थमुपसंहरति श्रुतिः 'सलिल एको द्रष्टाऽद्वैतो भवति' (बृ. ४–३–३२) इत्याद्या। अस्या व्याख्या – सलिलः शुद्धः। कार्यकारणहानेः, नित्यबुद्धस्वरूपस्याविद्यादिसंस्रवा-संभवात्। एकः स्वगतभेदरहितः, सजातीयरहितो वा; अद्वैत इत्यर्थः। अद्रष्टा। अकारकस्वाभाव्यात्, द्रष्टव्याभावाच्च। अद्वैतः, अविद्या तत्कार्यातिलङ्घनात् (वा. १७९८-१८०६)। एष ब्रह्मलोकः। नित्यापरोक्षः,

अव्यावृत्ताननुगतो ब्रह्माख्यो लोकः। ब्रह्मात्मा इत्यर्थः। सामानाधिकरण्य-विशेषणविशेष्यभावलक्ष्यलक्षणसंबन्धैरेवमवगमात् (वा. १८१९–१८२१)। एषाऽस्य परमा गतिः, जीवस्य गत्यन्तरपरिसमाप्तिकरी निष्ठा (वा. १८२८)। एषास्य परमा संपत्, निरतिशया विभूतिः। एषोऽस्य परमो लोकः। अक्षयिष्णुत्वात्। एषोऽस्य परम आनन्दः। सर्वानन्दातिशायित्वात्, एतन्मात्रोपजीवित्वाच्चान्येषां भूतानाम् (वा. १८२८, १८३२, १८३६, १८४०) इति ॥

इत्थं जाग्रत्स्वप्नसुषुप्तावस्थापरीक्षणेन आत्मनः सत्त्वम्, सर्वानात्म-व्यतिरिक्तत्वम्, शुद्धत्वम्, स्वयंज्योतिष्ट्वम्, नित्यत्वम्, निरतिशयानन्द-स्वाभाव्यम्, ऐकात्म्यम्, चैतन्यदृष्टिमात्रत्वम्, अद्वयत्वं च प्रतिष्ठापितं भवति ॥

अत्र प्राधान्येनानुसंधेया श्लोकास्त्विमे –

(१) वैश्वानरात् तदात्मानं प्राज्ञस्य हृदि तैजसम्।
हिरण्यगर्भं तं चापि प्राणात्मन्युपसंहरेत् ॥
प्राणशब्देन चाप्यत्र कारणात्माभिधीयते।
बीजं कार्यस्य सर्वस्य प्राज्ञश्चेति निरुच्यते ॥
कार्याणां कारणं मुक्त्वा नान्यत्रास्त्यप्ययो यतः।
तस्मात् कारणसंप्राप्त्या यायान्नेतीत्यकारणम् ॥
वा. ४–२–८२ प्रभृति ८४ पर्यन्तम्।

(२) बुद्धिजागरणे यद्वज्जागर्मीत्यभिमन्यते।
बुद्धिस्वापेऽपि तत्साक्ष्यात् स्वप्नो भूत्वेति मोहधीः ॥
वा. ४–३–४४८.

(३) केवलाज्ञानमात्राधिरिह प्रत्यङ् व्यवस्थितः।
कारणात्मा यतस्तस्माज्जाग्रत्स्वप्नाख्यकार्यकृत् ॥ वा. ४–३–९७९.

(४) तमोऽन्तः कारणं बुद्धेर्द्रष्टान्तःकरणावधिः।
सुखी दुःखी च देहान्तः प्रत्यगज्ञानहेतुतः ॥ वा. ४–३–१५२८.

(५) तद्यथा श्येन इत्युक्तया तद्दृष्टान्तप्रदर्शनात् ।
बुद्बुद्वादिकं रूपमात्मनः संप्रदर्श्यते ॥ वा. ४-३-११५८.

(६) अविद्यायामवस्थानं तदुद्भूतस्य वस्तुनः ।
संहत्यपक्षोपमया श्रुत्येह प्रतिपाद्यते ॥
सल्लँयायेति यच्छुद्धं रूपं स्यात् प्रत्यगात्मनः ।
प्रत्यक्चिदाभ आगत्य ध्रियते प्रत्यगात्मने ॥
वा. ४-३-११७२, ११७३.

(७) बुद्ध्यादिकार्यसंहारे प्रत्यक्चैतन्यरूपिणः ।
चिद्बिम्बस्यापि संहारो जलार्कप्रविलापवत् ॥
अविद्यावान् पुरा योऽभूदविद्याकार्यगश्चितिः ।
अविद्यया विभागोऽस्य चिद्बिम्बस्योपजायते ॥
वा. ४-३-११७४, ११७५.

[चिदाभासस्य स्वतः प्रत्यक्चैतन्यरूपत्वेऽपि, अविद्यैवास्य विभक्तत्वमवस्थान्तरे । इह तु जलार्कस्य स्वबिम्बभूतार्के इव चिन्मात्रत्वेनावस्थानमिति विशेषः ॥]

(८) एतदस्य स्वतो रूपं यदत्रोपप्रदर्शितम् ।
अविद्याकामकर्मादिविविक्तं यत् सुषुप्तगम् ॥
इतोऽन्यथा तु यद्रूपं जाग्रत्स्वप्नस्वलक्षणम् ।
तदस्य परतो ज्ञेयमात्माज्ञानैकहेतुकम् ॥
वा. ४-३-१२०५, १२०६.

(९) जाग्रत्स्वप्नक्षये कामाः प्रमुच्यन्तेऽखिला नृणाम् ।
संस्कारमात्रशेषास्ते सुषुप्ते यान्ति संक्षयम् ॥
यतस्तदवरोधार्थं तस्मात् सर्वविशेषणम् ॥
कामहेतौ हि विध्वस्ते न कश्चिदवशिष्यते ।
संस्कारो वाऽथवाप्यन्यः सर्वस्याज्ञानमूलतः ॥
वा. ४-४-३७८.

[एतेन व्यवहारदृष्ट्यैव अविद्यादेः संस्काराशेषत्वमिष्टमित्युक्तं भवति ॥]

(१०) स्वभावो नात्मनः कामकर्माविद्यादिबोधवत् ।
असङ्गानन्वयोक्तिभ्यां कामादेश्च मृषात्वतः ॥
चैतन्यमात्मनस्तत्त्वं कूटस्थं न तु कामवत् ।
अनाद्यविद्यायोगोऽस्य तत्कार्यैरादिमान् मतः ॥

अज्ञानमिथ्याविज्ञानसंस्थस्यास्यात्मनः क्व नु ।
उपदेशादिसंबन्ध इत्येतदिह भण्यते ॥
वा. ४-३-१४०८ प्रभृति १४१० पर्यन्तम् ।

(११) न पश्यतीति वचनं कारकादेरसंभवात् ।
वास्तवं वृत्तमापेक्ष्य पश्यन् वै तदितीर्यते ॥
वा. ४-३-१४१७.

(१२) प्रमात्राद्यनभिव्याप्तं वस्तु पूर्वं समीक्ष्य हि ।
नाद्राक्षमिति संधत्ते दृष्टवत् स्वचिदात्मना ॥ वा. ४-३-१४२०.

(१३) न सुषुप्तिप्रसिद्धिः स्याद् दृष्टेर्लोपो भवेद्यदि ।
जन्मनाशादिहीनेयमतो दृष्टिः परात्मनः ॥ वा. ४-३-१४३८.

(१४) यथावकाशदात्रिति भण्यते निष्क्रियं वियत् ।
शतृतृजन्तवचसा तथात्मा भण्यते ध्रुवः ॥ वा. ४-३-१४४२.

(१५) प्राक् क्रियाया विनिष्पत्तेः कुर्वद्रूपं न लभ्यते ।
यतोऽतोऽकुर्वदेवेह स्यात् सर्वत्रैव कारकम् ॥ वा. १४४४.
क्रियायाश्चाप्यकार्यत्वे कारकं न प्रसिध्यति ।
कार्यत्वे चानवस्था स्यात् कुर्वच्चापि सुदुर्लभम् ॥ वा. १४४८.
क्रियातत्फलयोश्चापि पौर्वापर्याप्रसिद्धितः ।
किं साध्यं साधनं चेह निश्चयो नोपलभ्यते ॥ वा. १४४९.
अविद्यामात्रहेतौ तु सर्वमेतत् समञ्जसम् ।
तत्कार्यत्वाच्च सर्वस्य न किञ्चिदसमञ्जसम् ॥ वा. १४५०.

[व्यवहारे कुर्वत्कारकाङ्गीकारेऽपि दोषाप्रसक्तेः प्रौढिवादमात्रमेतदिति भाति । अत एव नात्र सूक्ष्मेक्षिकया विचार्यमिति च । एतत् प्रसङ्गेन (गी. भा. १८-६६, पा. २९५) उपसंहारे – 'अकुर्वतः कारकत्वप्रसङ्गात्' इत्यादि-भाष्यमवलोकनीयं परीक्षकैः ॥]

(१६) यत्रात्मनोऽस्य संबन्धोऽनात्मनेह विवक्ष्यते ।
अविद्याहेतुकर्त्रादिसंगतिस्तत्र मोहजा ॥
यत्र त्वात्मेति धीरस्य जायतेऽनात्मधीरिव ।
यथावस्त्वेव धीस्तत्र नात्राविद्याद्यपेक्षते ॥
वा. ४-३-१४५१, १४५२.

(१७) विभक्तं यत्तमोऽस्तीव नाविभक्तं मनागपि ।
तमोऽन्वितत्वाद्दृश्यन्ते न प्राज्ञेऽनन्वयात् तमः ॥

कूटस्थदृष्टावेकस्मिन्नविभक्ते सहस्रधा ।
नामरूपादिभेदेन विभक्तं यत्तमो दृशेः ॥

तत्तु द्वितीयं नेहास्ति ततोऽनर्थस्य कारणम् ।
द्रष्टृविरूपसंभेदाद्यत्पश्येज्जागरे यथा ॥

अविद्यादेरभावोक्तथा कूटस्थस्यैव भण्यते ।
कारणात्मा यतोऽभावः कार्याख्यस्येह वस्तुनः ॥

वा. ४-३-१५१७ प्रभृति १५२० पर्यन्तम् ।

अथापवादप्रकारः प्रदर्श्यते । यद्यपीयम् आत्माविद्या वस्तुतो मृषैव सती केवलं 'न जानामि' इत्यनुभववलादेव सिद्धा व्यवहारे लक्ष्यते' (वा. १२९३) । परामृष्टयैव ह्यन्तःकरणस्थित आत्मा स्वात्मन्यज्ञानं व्योमकार्ष्ण्यादिवत् संभावयति, प्रत्यग्दृष्ट्या तु परम् अज्ञानं संशयज्ञानं मिथ्याज्ञानं वा स्थानत्रयेऽपि न वीक्ष्यत एव (वा. १-४-२९८, २९९) । 'न किञ्चिदवेदिषम्' इति सुप्तोत्थितस्मृतिबलात्, तत्रावस्थायामज्ञानानुभवः स्वीकर्तव्यो भवतीति तु न शङ्कनीयम् । न हि सुषुप्ते 'न जानामि' इत्यनुभवोऽस्ति । न च 'नाज्ञासिषम्' इति स्मृतिरिति युक्तम् । न हि यथा देवदत्त 'इदं तदानीं तत्राहमज्ञासिषम्' इति कालदेशादिव्यवधानेन यथा पूर्वानुभूतं स्मरति, तथा अयमात्मा स्वस्मिन् पूर्वमनुभूतं परामृशतीति वक्तुं शक्यते । देशकालादेरपि साक्षित्वादात्मनो देशकालादिव्यवहितत्वानुपपत्तेः । अज्ञानं च न स्वार्थम्, किं त्वात्मार्थं तत्र भातीत्यतो रज्जुसर्पादिवद् विकल्पमात्रमित्येव युक्तम् । तस्मात्, यथैव रज्जुसर्पो रज्ज्वामेव कल्पितः, रज्ज्वात्मकश्च । एवमिदमज्ञानमपि चैतन्ये कल्पितं चैतन्यमात्रं सत् तत्र भासते, अत एव च कूटस्थात्मविज्ञानात् सकार्यमज्ञानं बाध्यत इति बोध्यम् (वा. १-४-३०० प्रभृति ३०६ पर्यन्तम्) । यत्तु नैष्कर्म्यसिद्धौ 'सर्वानर्थबीजस्यात्मानव-

बोधस्य सुषुप्ते संभवात्' (नै. ३–५८) इत्यादिना अज्ञानसाधनम् – तद् यथाप्रसिद्धस्याज्ञानस्य यावद्वाक्यज्ञानेन बाधः, तावदनुभवबलात् सर्वत्रानुवृत्तिरित्यभिप्रायकमित्यनवद्यम्। न चैवमात्मनोऽपि सुषुप्तेऽननुभवात्, तत्र तदभावप्रसङ्गः। येनैवानुभवेन व्याप्तोऽयं 'नावेदिषम्' इति विकल्पः, स एवानुभवस्वरूप आत्मा – इत्यभ्युपगमात् (वा. ३–४–१०३)। वस्तुस्वाभाव्येन ह्ययमात्मा अकारकत्वसर्वान्तरत्वकार्त्स्न्यस्वान्ययाथात्म्येभ्यो हेतुभ्यः, न केवलं सुषुप्ते एव, किं तु जाग्रत्स्वप्नयोरपि सर्वथा अज्ञानरहितः, पश्यन्नपि न पश्यतीति युक्तम्। तस्माद् यथैवायं सुषुप्ते न पश्यति, तथैवेतरयोरवस्थयोरपि न पश्यति; यथैव चास्य चिद्दृष्टेरविपरिलोपो जाग्रत्स्वप्नयोः, तथैव सुषुप्तेऽप्यविपरिलोपः (वा. ४-३-१४९३, १४९४, १४९५, १९०७, १९०८) इति सिद्धम्॥

युक्तित एव तावदवस्थानां मिथ्यात्वमवसीयते। जाग्रत् स्थानं मिथ्या जाग्रद्रूपत्वात्, आद्यन्तवत्त्वाच्च स्वप्नजाग्रद्वत्। अज्ञानकार्यं चेदं जडरूपानुगमात्, सापेक्षत्वाच्च मृगतृष्णिकोदकादिवत् (वा. १०७२, १०७३)। किञ्च, जाग्रत्स्वप्नौ नात्मनः, अविद्याकामसमन्वितस्य बुद्ध्यवच्छिन्नात्मन एव दर्शनात्। न तु तत्साक्षिणः, साक्षित्वादेव साक्ष्यधर्मसंबन्धानुपपत्तेः (वा. ९०५)। अपि चानात्मनां सर्वेषामपि अन्योन्यव्यभिचारित्वादेव मिथ्यात्वं रज्जुकल्पितसर्पदण्डादीनामिव (वा. १–४–१४९६, १४९७), सुषुप्तादौ स्वरूपव्यभिचाराच्च (वा. २–३–२२२)। आत्मचैतन्यं तु सर्वथा अव्यभिचारि (२–४–१२६), 'जानामि', 'न जानामि' इत्युभयोरपि साक्षित्वात् (वा. २–४–१२९)। तदेवं नासङ्गस्य जाग्रत्, स्वप्नः, सुषुप्तिर्वा परमार्थतः। अविद्याव्यवहारमात्रत्वात्, रज्जुसर्पादिव्यवहारवत् (वा. २–१–२६४, २६५, २६६)। सर्वथाप्यात्मा नित्यनिरवस्थाद्वयचिन्मात्र इति सिद्धम्। सर्वोऽप्ययमवस्थात्रयसंचारः प्रदर्शित आत्मनः परमार्थशुद्धत्वोपपादनार्थमेव। तस्य ब्रह्मत्व-

ज्ञानं तु वेदान्तवाक्यादेव भवति नावस्थापरीक्षणरूपतर्कमात्रात् (वा. ४-३-१११२ प्रभृति १११५) इति वार्तिकप्रस्थानं ज्ञेयम् ॥

अनुसंधेयास्त्विमे श्लोकाः प्राधान्यतः –

(१) जाग्रत्स्वप्नसुषुप्तेषु त्वात्माविद्या मृषा सती ।
व्यवहारपथं प्राप्ता स्वतःसिद्धात्मसाक्षिका ॥ वा. ४-३-१२९३.
पराक्प्रवणया दृष्ट्या धीस्थो ज्ञोऽज्ञानमात्मनि ।
व्योमकार्ष्ण्यादिवत्तज्जं संभावयति न स्वतः ॥
नैवाज्ञानं मृषाज्ञानं संशयज्ञानमीक्ष्यते ।
प्रत्यक्प्रवणया दृष्ट्या जाग्रत्स्वप्नसुषुप्तिषु ॥
वा. १-४-२९८, २९९.

(२) न सुषुप्तगविज्ञानं नाज्ञासिषमिति स्मृतिः ।
कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक् ॥
[न ह्यात्मस्थमज्ञानं पूर्वकालेऽनुभूतमिति युज्यते ॥]
न भूतकालसृक्प्रत्यङ्न चागामिस्पृगीक्ष्यते ।
स्वार्थदेशः परार्थोऽर्थो विकल्पस्तेन स स्मृतः ॥
वा. १-४-३००, ३०१.
यत्तत्त्वकं स्याद् यद्वस्तु न तत्तदतिवर्तते ।
नाज्ञातरज्जुजः सर्पो रज्जुमुल्लङ्घ्य वर्तते ॥ वा. १-४-३०३.
चैतन्यमात्ररूपं सत् प्रथतेऽज्ञानमात्मनि ।
प्रत्यक्कूटस्थनिष्ठत्वात् तद्वाध्यं कारणेतरत् ॥ वा. १-४-३०६.

(३) न चेदनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते ।
नावेदिषं सुषुप्तेऽहमिति धीः किंबलाद् भवेत् ॥ वा. ३-४-१०३.

(४) चितेरकारकत्वाच्च सर्वान्तरतमत्वतः ।
कार्त्स्न्यात् तदन्ययाथात्म्यात् पश्यन्नपि न पश्यति ॥
न पश्यति यथा प्राज्ञ उक्तहेत्वविशेषतः ।
तथैवैतद् ग्रहीतव्यं स्वप्नजाग्रदवस्थयोः ॥
चितेर्यथाविनाशश्च स्वप्नजाग्रदवस्थयोः ।
तथैव संप्रसादेऽस्मिन्नुक्तहेतुसमन्वयात् ॥
वा. ४-३-१४९३, १४९४, १४९५.

अलुप्तदृष्टिरात्मायं यथोक्तं(क्तः?) स्वप्नबोधयोः ।
प्राज्ञेऽपि च तथैवायं यद्वै तदिति वाक्यतः ॥
अतिकाग्र्यहेतुश्च यथात्मायं सुषुप्तगः ।
कूटस्थदृष्टिमात्रत्वात् तथा स्वप्नप्रबोधयोः ॥
वा. ४-३-१९०७, १९०८; पा. १७१३.

(५) असजाग्रद्वस्थेयं जाग्रद्रूपत्वकारणात् ।
स्वप्ने जाग्रद्वस्थावत् तथा चाद्यन्तवत्त्वतः ॥
अज्ञानोत्थमिदं जाग्रज्जडरूपसमन्वयात् ।
तथापेक्षात्मकत्वाच्च मृगतृष्णोदकादिवत् ॥
वा. ४-३-१०७२, १०७३; पा. १५७०.

(६) कर्मकृद् धिषणान्तो यः कामाविद्यासमन्वितः ।
स्वापबोधाविमौ तस्य न तु तत्साक्षिणो दृशः ॥
वा. ४-३-९०५, पा. १५४२.

(७) सर्पात्मना गृहीतार्या न दण्डादीक्ष्यते स्रजि ।
प्रतीच्येकतनुग्राह्ये तदन्यन्न तथेक्ष्यते ॥
अन्योन्यव्यभिचारित्वमज्ञानेऽपि ह्यनात्मनाम् ।
किमु विध्वस्तनिःशेषघनाज्ञानेऽन्तरात्मनि ॥
वा. १-४-१४९६, १४९७; पा. ७२९, ७३०.

अन्योन्यव्यभिचारोऽस्य वीक्ष्यतेऽनात्मवस्तुनः ।
स्वरूपव्यभिचारोऽपि सुषुप्तादौ स्वसाक्षिगः ॥
वा. २-३-२२२, पा. १०२९.

(८) मात्रादिव्यभिचारेऽपि संविद्व्यभिचारिणी ।
मिथः कृत्स्नेऽपि जगति तदन्यद् व्यभिचारि तु ॥
स्वसाक्षिकैव सर्वस्य न वेद्मीत्यपि या मतिः ।
किमु वेद्मीति बुद्धिः स्याच्चिदतोऽव्यभिचारिणी ॥
वा. २-४-१२६, १२९; पा. १०५४.

(९) नास्य स्वापः प्रबोधो वा कुतः स्वप्नस्य संभवः ।
प्रत्यक्स्वभाव एवास्य जाग्रत्स्वप्नसुषुप्तयः ॥
सुप्तः प्रबुद्ध इत्येवं स्वप्नं पश्यति चेति यः ।
विकल्प एष भूतानामविद्यारात्रिशायिनाम् ॥
मायामात्रमिदं सर्वं जगत्स्थावरजङ्गमम् ।
सर्पादेरिव रज्ज्वादिस्तत्त्वमस्य परं पदम् ॥
वा. २-१-२६४ प्रभृति २६६; पा. ९३१.

(१०) जाग्रत्स्वप्नसुषुप्तेषु संचारोऽयं प्रमान्तरात् ।
सिद्धो यस्मादतस्तस्मिन् वाक्यं स्यादनुवादकम् ॥
क्रमसंचारिणस्तस्य जाग्रत्स्वप्नसुषुप्तिषु ।
ब्रह्मत्वं नान्यतोऽज्ञायि वाक्यं तत्प्रतिपत्तिकृत् ॥
आत्मनो ब्रह्मता साक्षाद् ब्रह्मणोऽप्यात्मता स्वतः ।
तत्त्वमस्यादिवाक्यस्य विषयोऽयमिहोदितः ॥
वा. ४-३-१११३, १११४, १११५; पा. १५७७, १५७८.

ज्ञानविधिचिन्ता –

१२३. मैत्रेयीब्राह्मणे श्रूयते '**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्**' (बृ. २-४-५) इति । तत्र दर्शनादयो विधीयन्ते न वा – इत्येतद् वादिविप्रतिपत्तिविषयो भवति । तत्र मण्डनाचार्यस्तावदाह – 'निदिध्यासितव्यः' इत्यपि 'आत्मनस्तु कामाय' इत्युपक्रमात् 'इदं सर्वं यदयमात्मा' इत्युपसंहारात्, आत्मस्वरूपपरमेकं वाक्यम् । तदन्तर्गताः 'द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यः' इति न पृथग्विधयः कृत्यप्रत्यययोगेऽपि; कृत्यप्रत्ययस्य अर्थान्तरेऽपि स्मरणादर्हादौ, स्तुत्यर्थाः । यथोपांशुयाजवाक्यान्तर्गताः 'विष्णुरुपांशु यष्टव्यः' (तै. सं. २-६-६) इत्येवमादयः (ब्र. सि. 155) – इति । वार्तिककारैस्तु प्रश्नोऽयं त्रेधा विभज्य निरणायि । 'द्रष्टव्यः' इति न विधिः, वस्तुतन्त्रज्ञानविषयत्वात् । श्रोतव्यो मन्तव्य इति च विधी, पुरुषतन्त्रक्रियाविषयत्वात्; निदिध्यासितव्य इति तु न विधिः । फलभूतस्वानुभवरूपत्वात् निदिध्यासनस्य – इति ॥

तत्र 'द्रष्टव्यः' इति तावन्न विधिः । कुतः? 'आत्मा द्रष्टव्यः' इत्यत्र आत्मशब्दस्य प्रत्यगात्मवाचित्वात्, आत्मदृष्टेश्च स्वतः प्राप्तत्वात्, दृष्टिशब्दवाच्यस्य ज्ञानस्य वस्तुतन्त्रत्वे सति विधातुमशक्यत्वात्, विधेयज्ञानस्य ध्यानापराभिधानस्यात्राप्रकृतत्वात्, प्रत्यगात्मनोऽन्यस्य

द्रष्टुरभावात्, द्रष्टृदृष्टव्ययोर्भेदाभावे सति स्वस्मिन्नेव कर्मकर्तृत्वानुपपत्तेर्दृष्टि-क्रियाविधानासंभवाच्च। तस्मात् नेतीत्यनात्मरूपत्वं प्रतिषिध्य 'इदं सर्वं, यदयमात्मा' (बृ. २-४-६) इति श्रुत्या ज्ञाप्यते। अतोऽत्राज्ञातज्ञापन-रूपविधिरेष्टव्यः – इति द्रष्टव्यविधिनिरासग्रन्थसारः। अत्राक्षेपाः प्रति-वाद्यभिमता इत्थं परिहृताः–न चाभिधाश्रुतेः 'नद्यास्तीरे पञ्चफलानि सन्ति' इत्यादिलौकिकवाक्यवदप्रामाण्यं शङ्क्यम्, आख्यातपदाभावेन पदसंहते-रभावाद् वाक्यत्वानुपपत्तिर्वा। मानान्तराप्राप्तस्यैकात्म्यस्य बोधनादेव श्रुतिप्रामाण्योपपत्तेः; सुप्तोत्थापकवाक्यवत् संबन्धाग्रहणेऽपि तदवक्लृप्तेः। न चाख्यातपदाभावः, अस्त्यादिक्रियापदसद्भावात्। नदीतीरे फलानीति वाक्यं तु मानान्तरयोग्यविषयम्, न वाक्यैकगम्यमिति विषमो दृष्टान्तः–इति॥

अत्रेमे श्लोका मुख्यतोऽनुसंधेयाः –

(१) आत्मा प्रत्यक् प्रसिद्धेः स्यात् तत्रैवात्मानुभूतितः।
इति प्रमेयनिर्देशो द्रष्टव्य इति तत्प्रमा॥
आत्मबुद्धिरियं तावत् सर्वेषां जायते स्वतः।
अप्राप्ता सर्वमात्मेति सैवातो धीर्विधीयते॥
द्रष्टृद्रष्टव्ययोर्भेदे सत्येवं धीर्विधीयते।
नियोज्यविषयाभेदे घटते न विधिर्यतः॥
वा. २-४-९५ प्रभृति ९७ पर्यन्तम्; पा. १०४९.

['सर्वमात्मा' इत्यप्राप्तत्वात् सैव बुद्धिर्विधीयत इति युक्तम् यद्यपि, तथापि नियोज्यविषययोर्भेदाभावान्नात्र नियोगः, किं त्वज्ञातज्ञापनमेवेदम् – इत्यभिप्रायः॥]

(२) सर्वमात्मेति या बुद्धिः सा प्रमेयबलाद् भवेत्।
प्रमातृतन्त्रा सा चेत् स्यात् प्राप्ता लोकाग्निबुद्धिवत्॥
अतोऽपुरुषतन्त्रत्वान्नात्मज्ञाने विधिर्भवेत्॥
वा. २-४-१२०, १२१, पा. १०५३.

(३) विभिन्नद्रष्टृदृष्ट्याप्तिर्घटादेरिव नात्मनः।
न चाभेदेऽस्ति संव्याप्तिरैकात्म्यादेव कारणात्॥

[प्रमातृदृष्टिरूपया क्रियया व्याप्यत्वं नास्त्यात्मनः, घटादिवत्; न च स्वस्यैव स्वदृष्टिव्याप्यत्वम्॥]

न च द्रष्टाऽऽत्मनोऽन्योऽस्ति द्रष्टृन्तरनिषेधनात् ।
न च द्रष्टोर्द्वयोर्लोके द्रष्टृदृश्यस्वसंगतिः ॥

['नान्योऽस्ति द्रष्टा' इति श्रुतेः परमार्थदृष्ट्या आत्मनो दृश्यत्वं नास्ति । व्यवहारदृष्ट्यापि एकस्यान्यदृष्टिदृश्यत्वं नास्ति ॥]

क्रियाविरोधः प्राप्नोति द्रष्टुः स्वात्मसमीक्षणे ।
तद्दृष्टेर्नित्यसंप्राप्तेर्विध्यानर्थक्यसंगतिः ॥

[क्रियाविरोधः – कर्मकर्तृत्वविरोधः । न च स्वरूपस्य सकर्तृकस्य वा दृष्टेः स्वविषयस्य विधेयत्वमित्यर्थवद् वचः ॥]

वा. २-४-१३५ प्रभृति १३७ पर्यन्तम् ; पा. १०५५.

(४) इहापि नेतिवाक्येन प्रतीचोऽतत्स्वभावकम् ।
व्युत्थापितमनूद्याह सर्वमात्मेति नः श्रुतिः ॥

अज्ञातज्ञापनं चातो विधिरत्राभिधीयते ।
अप्रवृत्तप्रवृत्तिश्च न्यायाभावान्न युज्यते ॥

वा. २-४-१०४, १०५; पा १०५०.

(५) मैवं मानान्तराप्राप्तसम्यगैकात्म्यबोधतः ।
अभिधाश्रुतेः प्रमाणत्वं सुप्तोत्थापकवाक्यवत् ॥

वा. २-४-१४८, पा. १०५७.

नाख्यातपदसद्भावात् स्यादेव पदसंहतिः ।
अस्त्यस्म्याद्याख्यातपदमस्त्येवेहाभिधाश्रुतौ ॥
सरित्तीरे फलानीति युक्तापेक्षाभिधाश्रुतेः ।
प्रत्यक्षमानग्राह्यत्वात् फलतीरार्थसंगतेः ॥

वा. २-४-१६१, १६२; पा. १०५९.

श्रवणादिविधिचिन्ता –

१२४. श्रवणमननशमदमादयस्तु अन्वयव्यतिरेकाभ्यां पदार्थनिर्णयेन वाक्यार्थज्ञानायोपकुर्वन्ति, पुरुषतन्त्राश्च ते इति विधीयन्त इति युक्तम् । तथा ह्युपदेशसाहस्र्यामुक्तम् –

नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः ।
वाक्यार्थस्य च विज्ञानं पदार्थस्मृतिपूर्वकम् ॥
अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् ।
एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥

उप. १८-१९०. १९१.

इति। तत्र 'द्रष्टव्यः' इत्यत्र न सर्वप्रमाणानां दर्शनोपायत्वम्, वेदान्तवाक्यस्यैव तु – इत्यभिप्रायेण 'श्रोतव्यः' इत्युच्यते। आगमार्थविनिश्चयार्थमुपादीयमानो श्रुतिलिङ्गादिन्यायः, वेदानुरोधितर्कश्च 'मन्तव्यः' इत्यनेन गृह्यते। 'निदिध्यासितव्यः' इति तु स्वात्मानुभवः श्रवणमननयोरवधित्वेनोक्तः। एवं स्वायत्तविज्ञाने संजाते न किञ्चित् कर्तव्यमवशिष्यते। एवं श्रवणमननाभ्यां दृष्टे स्वात्मन्यद्वये 'अनुत्पन्नं ज्ञानं नास्ति, अदग्धमज्ञानं च नास्ति'–इति निश्चितिर्जायते। निदिध्यासनशब्देन ध्यानं विवक्षितम् इति शङ्का न कार्येत्यभिप्रायेण 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' (बृ. २–४–५) इति विज्ञानशब्देन निदिध्यासनमनूदितम्। ध्यानस्य विज्ञानहेतुत्वं तु न पराणुद्यते। विज्ञानं तु न ध्यानादिकं मुक्तिफलदानायापेक्षते। न च विज्ञानफलं मुक्तिरित्यनित्यत्वं शङ्क्यम्। ऐकात्म्यरूपमुक्तेर्नित्यप्राप्तत्वात्, ऐकात्म्याज्ञाननिरसनमेव तु विज्ञानस्य कृत्यम्; मुक्तिस्तु तत्रान्तरीयकत्वेन विज्ञानफलत्वेनोपचर्यत इति ज्ञेयम्॥

अत्रानुसंधेयाः श्लोकाः –

(१) अतोऽपुरुषतन्त्रत्वादात्मज्ञाने विधिर्भवेत्।
अन्वयादिक्रिया स्वस्य तत्तन्त्रत्वाद्विधीयते॥
श्रवणं मननं तद्वत्तथा शमदमादि यत्।
पुमान् शक्नोति तत्कर्तुं तस्मादेतद् विधीयते॥
वा. २–४–१२१, १२२; पा. १०५३.

(२) सर्वमानप्रसक्तौ च सर्वमानफलाश्रयात्।
श्रोतव्य इत्यतः प्राह वेदान्तावरुरुत्सया॥ वा. २–४–२१२.

[सर्वप्रमाणफलरूपत्वात् आत्मनः सर्वप्रमाणद्रष्टव्यत्वप्रसक्तौ, वेदान्तानामेवात्मज्ञाननिवर्तकत्वेन प्रामाण्यमित्यभिप्रायेयं 'श्रोतव्यः' इत्युक्तिरित्यर्थः॥]

(३) श्रुतिलिङ्गादिको न्यायः शब्दशक्तिविवेककृत्।
आगमार्थविनिश्चित्यै मन्तव्य इति भण्यते॥

वस्तुतत्त्वविवक्षेह मन्तव्य इति शासनात् ।
योषिदश्यादिदृष्टौ हि नैव मन्तव्यता विधिः ॥

[दर्शनमिह न ध्यानमुक्तमित्यत्र मन्तव्यत्वविधिर्लिङ्गमिति प्रासङ्गिकमिदम् ॥]

वेदशब्दानुरोध्यत्र तर्कोऽपि विनियुज्यते ।
वाच्यवाचकसंबन्धनियमे तस्य हेतुता ॥

[त्वंपदवाच्यं साक्ष्येवेति निर्णये मननस्योपयोगः ॥]

वा. २-४-२१४, २१५, २१६; पा. १०६८

(४) अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते ।
पूर्वयोरवधित्वेन तदुपन्यास इष्यते ॥ वा. २-४-२१७.
प्रतिपत्तिः पुरा शाब्दी यावन्न मनुते श्रुतम् ।
श्रुत्वा मत्वाथ तं साक्षादात्मानं प्रतिपद्यते ॥ वा. २-४-२२०.
ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते ।
निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः ॥
वा. २-४-२३३, पा. १०७१.
विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम् ।
स्वार्थमेव तु विज्ञानं मुक्तिमात्रफलं स्मृतम् ॥ वा. २-४-२३४.

(५) अनन्यायत्तविज्ञाने श्रवणादेरुपायतः ।
जाते नापेक्षते किञ्चित् प्रतीचोऽनुभवात् परम् ॥
वा. २-४-२२१.
ऐकात्म्याज्ञानविध्वंसव्यतिरेकेण नेष्यते ।
ऐकात्म्यविज्ञानफलं प्राप्तमेव हि तत् स्वतः ॥ वा. २-४-२३५.
प्रत्यक्षात्रैकयाथात्म्यात् कार्यकारणवस्तुनः ।
तज्ज्ञानात् किं तमोऽध्वस्तं किं वाऽज्ञानं वदात्मनः ॥
वा. २-४-२३१.

['अज्ञानम्' इति टीकानुसारतश्छेदः । 'ज्ञानम्' इति च्छेदे तु तज्ज्ञानात् परं ज्ञानमुत्पाद्यं नास्तीति विज्ञायते इत्यर्थः । तथा हि पूर्वस्मिन् वार्तिके 'नास्ति ज्ञानमनुत्पन्नं नाप्यध्वस्तं तथा तमः' इत्युक्तेनैकवाक्यता स्यादिति ॥]

श्रवणादिविषये भाष्यवार्तिकप्रस्थानतुलना —

१२५. अत्र भाष्यवार्तिकप्रस्थानयोः श्रवणादीनां विधेयत्वं प्रति किंचिद् विसंवादाभासः प्रतीयते । तद्यथा-भाष्ये तावत् किमर्थानि

तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि ?" इत्याशङ्कावाक्ये (सू. भा. १–१–४, पा. १९) छाया-शब्दोपादानात्, श्रवणादीनां विधित्वमसंमतमिति प्रतीयते । अन्यत्र तु "प्रत्ययावृत्तिः कर्तव्या । कुतः ? असकृदुपदेशात् । 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्येवंजातीयको हि असकृदुपदेशः प्रत्ययावृत्तिं सूचयति" (सू. भा. ४–१–१, पा. ४६०) – इत्युक्तेः श्रवणादीनां विधेयत्वमप्यङ्गीकृतमिति भाति । न हि शास्त्राविहितं किञ्चित् कर्तव्यताम् इयादिति । वार्तिके तु श्रवणादीनां विधिच्छायात्वोक्तिर्नास्ति, प्रत्युत 'पुमान् शक्नोति तत् कर्तुं तस्मादेतद् विधीयते' (वा. २–४–१२२)– इति कण्ठरवेण तेषां विधेयत्वमुद्घोष्यते । किञ्च भाष्ये आवृत्त्यधिकरणे 'निदिध्यासितव्यः' इत्यपि कर्तव्यतया अभ्युपगम्यते । "अपि च, 'उपासनम्', 'निदिध्यासं च' इति, अन्तर्णीतावृत्तिगुणैककिया अभिधीयते" इति क्रियात्वेनैव परामृश्यमाणत्वात् । उत्तरत्र चोदाहरिष्यमाणे निदर्शने 'गुरुमुपास्ते', 'ध्यायति प्रोषितनाथा पतिम्' – इत्युल्लेखदर्शनात्, निदि-ध्यासनमप्युपासनाविशेष एवाभिमतः स्यादित्यपि शङ्कितुम् अवकाशोऽस्ति । वार्तिके पुनः स्पष्टमेव 'अपरायत्तबोध' एव (वा. २–४–२१७) निदि-ध्यासनशब्दवाच्यः – इत्युक्त्वा वाक्यशेषे विज्ञानशब्दप्रयोगाद् ध्यानार्थता निदिध्यासनशब्दस्य नाशङ्कनीया (वा. २–४–२३३) इति निदिध्यासनस्य कार्यत्वं निराक्रियते । तदत्र प्रस्थानयोरनयोरेकवाक्यता अस्ति वा, उत विरोध एव ? यदापि विरोध एव, तदा कतरः पक्षो ज्यायान् ?–इति विमृश्यमेतत् ॥

अत्रेत्थं नः प्रतिभाति । भाष्ये तावत् प्रतिपत्तिविधिशेषतयैव ब्रह्म शास्त्रप्रमाणकम्–इत्यातस्थुषां वृत्तिकाराणां निराकरणाय वस्तुतन्त्रमपि ज्ञानमस्ति ध्यानविलक्षणम् – इति प्रतिपादनप्रसङ्गेन लिखितमिदं विधि-च्छायात्ववाक्यम् । इत्थं हि तत्र वाक्यविन्यासक्रमः –

"या तु प्रसिद्धेऽर्थे अधिबुद्धिः, न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा; किं तर्हि, प्रत्यक्षविषयवस्तुतन्त्रैव – इति ज्ञानमेवैतत्, न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादयः श्रूयमाणा अपि, अनियोज्यविषयत्वात् कुण्ठीभवन्ति, उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्। अहेयानुपादेयवस्तुविषयत्वात्" (सू. भा. १-१-४, पा. १८, १९)

इति। एवं च कार्यविधिप्रयुक्तस्यैव ब्रह्मणोऽत्र प्रतिपाद्यमानत्वम् – इति यदुच्यते पूर्वपक्षिणा, तदसत्; वस्तुतन्त्रज्ञानस्यापि सद्भावात् – इत्यत्रैव भाष्यस्य तात्पर्यमवसीयते। एतच्छेषेणैव 'किमर्थानि तर्हि' इति शङ्कासमुत्थापनमिति तदपि ज्ञानस्याविधेयत्वे तात्पर्यवदिति गम्यते। परिहारवचनं च "तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघातप्रवृत्तिगोचरात् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्य' इत्यादीनि" इति न श्रवणादीनां विधेयत्वेऽविधेयत्वे वा किञ्चिद् ब्रूते, श्रवणादिविधानस्याप्रकृतत्वात्, किं तु 'द्रष्टव्यः श्रोतव्यः' इत्यादिस्थलेष्वप्यस्तीषद् विधिकार्यम् इति तावता प्रवृत्तिबोधकास्तव्यादिप्रत्यया अर्थवन्तो भविष्यन्ति; अतो न तद्बलात् ज्ञानमपि विधेयमित्याग्रहः करणीयः– इति प्रकृतार्थोपबृंहणेनैवोपक्षीणम्। अनेनैकार्थ्यायास्ति वाक्यान्तरमपि भाष्ये –

"द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठिताः, तत्त्वाभिमुखीकरणप्रधानाः, न तत्त्वावबोधविधिप्रधाना भवन्ति। लोकेऽपि 'इदं पश्य', 'इदमाकर्णय' इति चैवञ्जातीयकेषु निर्देशेषु 'प्रणिधानमात्रं कुरु'-इत्युच्यते, न 'साक्षाद् ज्ञानमेव कुरु' इति। ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते कदाचिन्न जायते। तस्मात् तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन। तस्मिन् दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानम् उत्पद्यते" (सू. भा. ३-२-२१, पा. ३६२)

इति। इत्थं च श्रवणादिवाक्येषु न श्रावणादिविज्ञानं विधीयते, किं तर्हि, आत्मनि प्रणिधानम्–इत्यर्थे भाष्यवाक्यमिदं पर्यवसन्नम्। ईदृशं

प्रणिधानमेवावर्तनीयमित्युच्यते आवृत्त्यधिकरणभाष्ये – इत्यविरोधः । वार्तिकेऽपि यत् पुरुषतन्त्रं तदेव विधीयत इत्युच्यते । तत्रापि च श्रवणादिकेन सकृत् कृतेन नैव ज्ञानमुत्पद्यत इति नाग्रहः । 'श्रवणादिक्रिया तावत् कर्तव्येह प्रयत्नतः । यावद् यथोक्तं विज्ञानमाविर्भवति भास्वरम् ॥' (वा. २–४–२१८) इत्युक्तत्वात् । तदेवं श्रवणमननयोर्विधेयत्वे तावन्नास्ति प्रस्थानयोर्विसंवाद इति स्थितम् ॥

अथ 'प्रतिपत्तिः पुरा शाब्दी यावन्न मनुते श्रुतम्' (वा. २-१-२२०) इति वार्तिकात् केवलश्रवणान्न कस्यचिदपि साक्षाद्विज्ञानं जायत इत्युक्तमिव भाति। सूत्रभाष्ये तु 'भवेदावृत्त्यानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वम् अनुभवितुं न शक्नुयात्' (सू. भा. ४–१–२, पा. ४६१) इत्युक्तम् । तत्र कथमविरोध इति ? तत्रापि विसंवादाभास आपातत एव । यत्कारणं नैष्कर्म्यसिद्धौ लिखितम् – 'तत्र कृत्स्नानात्मनिवृत्तौ सत्यां यः प्रत्यगात्मनि अवाक्यार्थतां प्रतिपद्यते, स क्षपिताशेषान्तरायहेतुरिति न तं प्रति वक्तव्यं किञ्चिदप्यवशिष्यते । योऽपि वाक्यश्रवणमात्रादेव प्रतिपद्यते, तस्यापि अतीन्द्रियशक्तिमत्त्वात्, न किञ्चिदप्यपेक्षितव्यमस्ति' (नै. ३-६४) इत्यादि । अतो ये वाक्यश्रवणमात्रेण ब्रह्मात्मत्वं वाक्यार्थं प्रतिपत्तुं न शक्नुवन्ति, तान् प्रत्येव 'प्रतिपत्तिः पुरा शाब्दी'–इत्यादिवार्तिकोक्तिरिति नास्ति श्रवणमात्राज्ज्ञानोत्पत्तावपि प्रस्थानयोर्विरोधः ॥

अथ निदिध्यासनविषये विरोधाभासः परीक्षणीयः । अत्रोच्यते । तत्र निदिध्यासनमिति 'अन्तर्णीतावृत्तिगुणैव क्रिया अभिधीयते (सू.भा. ४–१–१, पा. ४६०) इति स्पष्टोक्तेः, 'मननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात्' (सू. भा. १–१–४, पा. २३) इत्यवगतिरूपविज्ञानाद् व्यतिरेकेणैव तदर्थमनुष्ठेयत्वेन निदिध्यासनस्य निर्देशाच्च भाष्ये तावन्निदिध्यासनं नाम विधीयमानसाधनविशेष एवेत्यवगम्यते । 'यानि तावत्

सम्यग्दर्शनार्थान्युपासनानि, तान्यवघातादिवत् कार्यपर्यवसानानीनि ज्ञातमेवैषाम् आवृत्तिपरिमाणम्' (सू. भा. ४-१-१२) इत्युपासनाशब्दग्रहणादवसीयते यन्निदिध्यासनमप्युपासनाविशेषत्वेनाभिमतं सूत्रभाष्यकाराणामिति । परं तु "'पुरुषो वाव गौतमाग्निः', 'योषा वाव गौतमाग्निः' (छां. ५-८-१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च" (सू. भा. १-१-४, पा. १८) इत्यत्रोपवर्णिताद् ध्यानात् किञ्चिद्भिन्नमिदं निदिध्यासनम्, केवलचोदनजन्यत्वाभावात् । "एवं ह्यसौ दृष्टो भवति श्रवणमननिदिध्यासनैर्निर्वर्तितैः। यदा एकत्वमेतान्युपगतानि, तदा सम्यग्दर्शनं ब्रह्मैकत्वविषयं प्रसीदति" (बृ.भा. २-४-५, पा. ७६०) । 'सर्वथापि तु यथा आगमेनावधारितम्, तर्कतस्तथैव मन्तव्यम्, यथा तर्कतो मतम्, तस्य तर्कागमाभ्यां निश्चितस्य तथैव निदिध्यासनं क्रियते' (बृ. भा. २-५, सं. पा. ७७०) – इति च श्रवणमननिदिध्यासनानां दृष्टार्थत्वात्, तदेकतागमनस्येष्टत्वाच्च योषाग्न्यादिवाक्यचोदितात्, अदृष्टार्थभावनासंचयाद् विलक्षणमेवेदं साधनमुपासनाशब्दितमपि सदित्यवगम्यते । न ह्यमौ योषिद्बुद्धिर्यथावस्तुविषया भवति, किं तु चोदनावशादेव सा क्रियते लोकान्तरफला च; इह पुनर्यथैव निदिध्यास्यते, तथैव दृश्यतेऽत्रैव जन्मनीति केवलं प्रणिधानमात्रमेतत् – इति वैषम्यम् । तस्मात्, यथैव दर्शनज्ञानादिशब्दाः परापरविद्याधिकारपठितत्वनिमित्तात् मानसक्रियाविशेषं यथावस्तुज्ञानं वा यथायोगमभिदधते, एवमेव 'उपासीत', 'निदिध्यासितव्यः'–इत्यादिशब्दा अपि भावनामात्रं सम्यग्दर्शनार्थप्रणिधानं वेति भिन्नार्थगोचरा एवेति गम्यते । इत्येवं भाष्यप्रस्थाने निदिध्यासनार्थनिर्णयः ॥

वार्तिके यद्यपि 'अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते' (वा. २-४-२१७) इति स्पष्टोक्तेर्निदिध्यासनशब्देन न भावनालक्षणा क्रिया शक्यग्रहणा, तथापि ध्यानस्य सम्यग्दर्शनार्थत्वं न प्रत्याख्यायते ।

'विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम् । स्वार्थमेव तु विज्ञानं मुक्तिमात्रफलं स्मृतम् ॥' (वा. २-४-२३४) इति वाक्यशेषेण तदभ्यनुज्ञानात् । तदेवं निदिध्यासनशब्दस्यार्थभेदस्वीकारेऽपि प्रस्थानयोर्ध्यानक्रियाया ज्ञानसाधनत्वे विप्रतिपत्त्यभावात् नास्ति विसंवादः । यस्तु 'विज्ञानेन' इति वाक्यशेषे श्रवणादत्र वाक्ये निदिध्यासनशब्देन ध्यानं नाशङ्कनीयमित्याग्रहः (वा. पा. १०७१), तत्र निदिध्यासनशब्दस्य श्रवणमननाभ्यां सह समभिव्याहारात् तस्यापि क्रियावाचित्वौचित्यात्, विज्ञानशब्दस्य च 'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' (छां. ८-१-१), 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छां. ८-७-१)-इति च साक्षात्करणार्थप्रवृत्तिवाचकत्वेनान्यत्र प्रयोगदर्शनात्, इहापि दर्शनार्थध्यानवाचकत्वस्वीकारे बाधकाभावात्, तादृशध्यानस्य वार्तिककारैरपि दर्शनोत्पत्तिहेतुत्वेन स्वीकारात्, फलरूपानुभवं 'द्रष्टव्यः' इत्यनेनैवानूद्य तदर्थं साधनत्रयविधानेऽनुपपत्त्यभावाच्च भाष्यकारीयमेव निदिध्यासनशब्दव्याख्यानं युक्ततरम्; अन्यथा 'द्रष्टव्यः' 'निदिध्यासितव्यः' इति पौनरुक्त्यापत्तेरित्युत्पश्यामः । सर्वथापि त्वत्रापि प्रस्थानयोर्ज्ञानसाधनविषये नास्ति प्रक्रियाविगानमिति सर्वमनवद्यम् ॥

शमदमादिविधानम् –

१२६. **'एष नित्यो महिमा ब्राह्मणस्य'** (बृ. ४-४-२३) इत्यत्र नेतिनेतीति निर्विशेषस्वरूपं नित्यो महिमा विदुषः । तादृशमहिम्नः स्वरूपं विदितवतः 'न लिप्यते कर्मणा पापकेन' इति धर्माधर्मलेपाभावं फलमाह मन्त्रः । तमेनं भाष्यानुसारेण व्याख्याय **'पदवित्'** इत्यस्य पदार्थवित् इत्यर्थान्तरमपि कथितं वार्तिके (वा. ४-४-११९०) पदार्थज्ञाने विधिरपि भवेदिति, फलं तु वाक्यार्थबोधत इति कृत्वा । **'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति'** इति वाक्यशेषार्थस्तु एवं योजितः – यस्मादेवं-

फलं ज्ञानम्, तत एवंवित् शमादिसाधनो भूत्वा महिम्नः पदविद् भवेत्' (वा. ४-४-११९२, ११९३) इति । अत्र साधनचतुष्टयसंपन्नः, शान्त्यादिसाधनो भूत्वा अन्वयव्यतिरेकतः, अनात्मभ्यो विविच्यात्मानं पश्येत्, अतःपरं वाक्यादेव सर्वमात्मेति पश्यतीत्युच्यते (वा. ४-४-१२०१, १२०२) । अत्र भाष्ये मुद्रितपुस्तकेषु 'शान्तो बाह्येन्द्रियव्यापारत उपशान्तः, तथा दान्तोऽन्तःकरणतृष्णातो निवृत्तः' इति दृश्यते । तदिदं लेखकप्रमादेन व्यत्यस्तक्रमेण लिखितं स्यादित्युन्नीयते । अन्यत्र 'शान्तिरन्तःकरणस्योपशमः', 'दमश्च बाह्यकरणानामुपशमः' (गी. भा. १६-१) इत्येव व्याख्यानदर्शनात् । अत एवात्र वार्तिके 'दान्तो भूत्वा ततः शान्तस्ततश्चोपरतो भवेत् । अर्थक्रमो बलीयान् स्याद्यतः पाठक्रमादिह ॥' (वा. ४-४-१२०३, १२०४) इत्युक्तम् । शमादयः प्राप्ता एवेति कथमेषां विधिः ? प्रतिषिद्धं काम्यं चापलं नित्यम् – इति हि कर्माणि चतुर्विधानि (वा. १२०८) । तत्राद्यत्रयम् मुमुक्षोर्न संभवतीति स्पष्टमेव । नित्यस्य तु करणादपि अकरणादिवानर्थप्राप्तिरित्यवगतवतः कुतः संभवः (वा.१२१३) ? एवं नित्यानि कर्माणि कुर्वतश्चित्तशुद्ध्या तान्यपि त्यजेदेवेति स्वतः प्राप्ताः शमादयः । 'यमान् सेवेत सततं न नित्यं नियमान् बुधः' (मनु. ४-२०४) इति स्मरणादप्येवम् । अतः कथं शमादिविधिरिति चेत् – प्राप्तानामेव तु तत्त्वज्ञानसाधनत्वमनेन विधीयते । अथवा निवृत्तिमात्रं प्राप्तं, न तु निवृत्तेः कर्तव्यतेति सात्र विधीयते (वा. १२२०) । न च शमदमोक्तयैवालम्, तयैव सर्वकर्मत्याजनात्, किमुपरत्या ?–इति शङ्क्यम् । नित्यकर्मविधेरौत्सर्गिकनिषेधापेक्षया प्रबलत्वात्, तत्त्यागार्थमुपरतिश्रुतिः प्रवर्तते (वा. १२२३-१२२५) । नित्यकर्मवद् विक्षेपकरत्वात् किमिति श्रवणादिकमपि न तित्याजयिषितमिति नाशङ्का भवति । प्रधानोपकारकत्वादेव तेषां त्यागानुपपत्तेः (वा. १२३८) । द्वन्द्वासहिष्णुत्वं तितिक्षा । यत्र पुरुषस्य न स्वातन्त्र्यं मनोरथादिषु तादृशकर्मणां त्यागार्थं 'समाहितो भूत्वा' इति (वा. १२४६) ।

'श्रद्धावित्तो भूत्वा' इति सर्वकर्मत्यागो विधीयते (वा. १२६९) । तदेवं यथोक्तसाधनैरन्वयव्यतिरेकाभ्याम् आत्मन्येवात्मानं पश्येत् । ततः सर्वमात्मानं पश्यति (वा. १२७८) वाक्यजन्यज्ञानेनेति वाक्यार्थः ॥

अत्रानुसंधेयाः श्लोकास्त्विमे –

(१) दान्तो भूत्वा ततः शान्तस्ततश्चोपरतो भवेत् ।
अर्थक्रमो बलीयान् स्याद् यतः पाठक्रमादिह ॥ वा. ४–४–१२०३.

(२) सत्यमेवं शमादीनां प्राप्तत्वान्नेष्यते विधिः ।
प्राप्तानामेव तेषां तु साधनत्वं विधीयते ।
प्रत्यग्याथात्म्यविज्ञानजन्मने श्रुतिवाक्यतः ॥ वा. ४–४–१२१८.

निवृत्तिमात्रं प्राप्तं वा भवेदुक्तेन वर्त्मना ।
कर्तव्यता निवृत्तेस्तु न प्राप्तेति विधीयते ॥ वा. ४–४–१२२०.

(३) औत्सर्गिकत्यागविधिं नित्यकर्मविधिर्बलात् ।
तस्य जीवनमात्रैकहेतुत्वाद् बाधते ध्रुवम् ॥
नित्यकर्मविधेर्यस्माच्छमादिविधिना हतिः ।
न संप्राप्तेत्यतो यत्नात् प्रारब्धोपरतश्रुतिः ॥
वा. ४–४–१२२५, १२२६.

(४) यदि व्याक्षेपकारित्वान्नित्यं कर्म निषिध्यते ।
बहु भिक्षाटनाद्यस्ति तत् कस्मान्न निषिध्यते ॥
वेदान्तश्रवणाद्यस्ति बहुव्याक्षेपकारि च ।
तन्नित्यकर्मवत् कस्माच्छ्रुत्येह न निषिध्यते ॥
नैष दोषः प्रधानार्थसमाक्षेरेव कारणात् ।
भिक्षाटनाद्यनुष्ठानं तादर्थ्यान्न निषिध्यते ॥
वा. ४–४–१२३५ प्रभृति १२३७ पर्यन्तम् ।

(५) अस्वातन्त्र्यं तु येषु स्यात् कर्तुः कर्मसु सर्वदा ।
समाहितोक्त्याऽथेदानीं तन्निरोधो विधीयते ॥ वा. ४–४–१२४६.

[दृष्टिश्रुत्यादिषु मनोरथादिषु च अनिवार्यम् इन्द्रियव्यापारं निरुध्य इन्द्रियाणि च मनसि, मनश्चात्मन्येव कुर्यादिति समाधानं विधीयते ॥]

(६) मैवं दृष्टार्थविषये यत् कर्मास्यावशेषितम् ।
तत्साधनेष्वममताविधानार्थं वचो यतः ॥ वा. ४-४-१२६८.

[श्रद्धावित्तो भूत्वेति वचः भिक्षापात्रादिष्वपि ममतात्यागविधानार्थम् ॥]

श्रद्धैव वित्तमस्येति नान्यदस्य यतस्ततः ।
श्रद्धावित्तोऽयमित्युक्तः संन्यासी सर्वकर्मणाम् ॥ वा. ४-४-१२६९.

(७) अन्वयव्यतिरेकाभ्यां यथोक्तैः साधनैर्यतः ।
आत्मन्येव तमात्मानं निष्कृष्यानात्मराशितः ।
पश्येदित्यभिसंबन्धः पश्यतीत्यथवा भवेत् ॥ वा. ४-४-१२७२.

[पश्येदिति माध्यन्दिनपाठमनुसृत्य ॥]

कर्मोपासनयोर्विनियोगः –

१२७. साधनानां परम्परया ज्ञानोत्पत्तिप्रकारः, साधनानुष्ठान-विधिश्च वार्तिके एवं वर्णितः –

अविद्याया न चोच्छित्तौ ज्ञानादन्यदपेक्ष्यते ।
ज्ञानोत्पत्तौ न चैवान्यच्छमादिभ्यो ह्यपेक्ष्यते ॥
शमाद्युत्पत्तये नान्यद् बुद्धिशुद्धेरपेक्ष्यते ।
बुद्धिशुद्धौ च नित्यादिकर्मभ्यो नान्यदिष्यते ॥
आत्मज्ञानैकहेतुत्वाद् वाङ्मनःकायकर्मणाम् ।
आत्मज्ञानेन तद्बाधात् कर्मापेक्षा कुतो भवेत् ॥
वा. १-३-९८ प्रभृति १०० पर्यन्तम् ।

नैष्कर्म्यसिद्धावप्युक्तम् –

नित्यकर्मानुष्ठानाद्धर्मोत्पत्तिः, धर्मोत्पत्तेः पापहानिः, ततश्चित्तशुद्धिः, ततः संसारयाथात्म्यावबोधः, ततो वैराग्यम् । ततो मुमुक्षुत्वम्, ततस्तदुपायपर्येषणम्, ततः सर्वकर्मतत्साधनसंन्यासः, ततो योगाभ्यासः, ततश्चित्तस्य प्रत्यक्प्रवणता, ततस्तत्त्वमस्यादिवाक्यार्थपरिज्ञानम्, ततोऽविद्योच्छेदः, ततश्च स्वात्मन्येवावस्थानं 'ब्रह्मैव सन् ब्रह्माप्येति' (बृ. ४-४-६), 'विमुक्तश्च विमुच्यते' (वा. २-२-१) इति ॥ नै. सि. १-५२.

उपासनानां यद्यपि तत्तत्फलावसायित्वं व्यक्तमेव कर्मणामिव, तथापि यथा नित्यकर्मणामनुष्ठानं ज्ञानोत्पत्तिहेतुत्वेन, अथवा सर्वेषामपि

कर्मणां विविदिषार्थत्वेन विधानम्, एवं विद्याप्रकरणे श्रुतानामुपासनानां ज्ञानयोग्यत्वाय विधानम् 'इतो विमुच्यमानः क्व गमिष्यसि' (बृ. ४-२-१) इति श्रुतेः, अर्चिरादिमार्गोपदेशाच्च क्रममुक्त्यर्थत्वमवसीयते ॥'

(१) उपासनं च यत्किञ्चिद् विद्याप्रकरणे श्रुतम् ।
तदप्यैकास्म्यविज्ञानयोग्यत्वायैव कल्प्यते ॥
विमुच्यमान इत्युक्तेरर्चिराद्युक्तितस्तथा ।
स्वार्थमात्रावसायित्वं नोपास्तीनां प्रतीयते ॥
सं. वा. ३२९, ३३०.

[उपास्तीनाम् इति । विद्याप्रकरणे उपदिष्टानाम्, अर्चिराद्युपदेशसहितानां च, न तु सर्वासाम् । न स्वार्थमात्रावसायित्वम् – न केवलमुपास्तिपरत्वम्, किं तु ज्ञानोपायत्वमपीत्यर्थः । 'स्वार्थो मोक्षः । तन्मात्रे पारंपर्यं विना न तासां पर्यवसितत्वम्' इति टीका तु नादर्तव्या । मानाभावात् ॥]

पूर्वभूमेर्मुच्यमान उत्तरां कां गमिष्यसि ।
देवतोपासनाद्येतज्ज्ञानोत्पत्त्यै विवक्षितम् ॥
उपासनानि सर्वाणि परविद्याधिकारतः ।
क्रममुक्तिफलानीति क्व गमिष्यसि गीरतः ॥
वा. ४-२-१२, १४, पा. १३६१.

[सर्वाणीति क्रममुक्तिफलानीति । एतच्च सद्योमुक्तिपरविज्ञानेऽनधिकारिणाम् अवान्तरतात्पर्येणेत्यवधेयम् । यतः गार्ग्यजातशत्रुसंवादे, जनकयाज्ञवल्क्यसंवादे च तत्र तत्रैव 'नैतावता विदितं भवतीति । स होवाच गार्ग्य उप त्वा यानीति' (बृ. २-१-१४) । 'अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति' (बृ. ४-२-१) इति च परब्रह्मोपदेशदर्शनात् ॥]

अविद्यानाशव्यतिरेकेण मोक्षान्तरं नास्त्येव –

१२८. बृहदारण्यके श्रूयते **'अणुः पन्था विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव । तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः'** (बृ. ४–४–८)–इति । अत्र ज्ञेयाद् ब्रह्मणो नास्त्यन्यो ज्ञाता यतः, अतो 'मां स्पृष्टः' इत्युच्यते (वा. ४-४-५४९); 'अनुवित्तः' इति शास्त्राचार्योपदेशादनु विदितः इत्यर्थः (वा. ४-४-५५०) ।

अनेन मार्गेणाज्ञानमपहृत्य प्राप्तमेव ब्रह्मापि यन्तीत्येतद् 'अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वम्' इत्यनेनोच्यते (वा. ४-४-५५२)। अत्र ब्रह्मप्राप्तिरेव देहपातव्यपेक्षा इति कारणात् 'इत ऊर्ध्वम्' इति नोच्यते, सर्वकारणाज्ञाननाशे ज्ञानमेव ह्यपेक्ष्यते नान्यदिति (वा. ४-४-५५३)। तथा च 'ब्रह्मैव सन् ब्रह्माप्येति' इत्यनेनास्य एकार्थता भवति (वा. ५६०) इति ऊर्ध्वश्रुतिर्व्याख्याता वार्तिके ॥

अत्रानुसंधेयाः श्लोकाः –

(१) मां मुक्त्वाऽसंभवो यस्माद् ब्रह्मार्थस्यात उच्यते ।
मां स्पृष्टो मामनुप्राप्त एष पन्था यथोदितः ॥
शास्त्राचार्योक्तितः पश्चादनुवित्तो मयैव च ।
ज्ञेयाज्ज्ञाता परो नास्ति प्रत्यग्ज्ञाने यतस्ततः ॥
वा. ४-४-५४९, ५५१.

(२) स्वर्गोऽयमेव प्रागुक्तः स्वर्गकामवचस्यपि ।
कर्मभिस्तदसिद्धेर्हि वेदान्तज्ञानसिद्धितः ॥

[प्राक् स्वर्गकामवचस्यप्ययमेव विवक्षितः। परं सोपाधिकस्तु तत्र कर्मप्राप्यः ॥]

परमानन्द एवातः स्वर्गशब्देन भण्यते ।
मोक्षप्रकरणाक्षिप्तः क्रियोत्थोऽतो न गृह्यते ॥
वा. ४-४-५५५, ५५६.

(३) देहपातव्यपेक्षा स्याद्यत्र कारणसंगतिः ।
सर्वकारणविध्वस्तौ नान्यद्बोधादपेक्ष्यते ॥ ५५८.

[कारणसंगतिः – अज्ञातब्रह्मणो रूपान्तरे प्राणादौ लयः ; सर्वकारण-विध्वस्तौ – अज्ञाननाशे सति ॥]

मुक्तौ क्रमोऽतिरेकेण नान्तरायोऽन्य इष्यते ।
यतोऽतोऽज्ञानविध्वस्तौ मुक्तः सन्नो विमुच्यते ॥

['मुक्तः सन्' इति काठकपरामर्शः ॥]

ब्रह्मैव सन्निति तथा प्रागपीदं श्रुतीरितम् ।
देहपातव्यपेक्षातो न स्याद्ऊर्ध्वश्रुतेरिह ॥
वा. ४-४-५५९, ५६०.

द्वैतं समस्तमविद्याकल्पितम् –

१२९. अस्मिन् प्रस्थाने अविद्याकार्यमेव सर्वं द्वैतमित्यतोऽविद्यानाशात् परं न किमपि कृत्यमवशिष्यते ॥

आत्मानात्मविभागः, ज्ञाताज्ञातविभागः, सत्यासत्यविभागः ज्ञातृत्वाज्ञातृत्वविशेषश्च – इति सर्वमिदम् अविद्ययैव । आध्यात्मिका पञ्चकोशास्तत्कारणभूताः पञ्चकोशाश्च प्रविभक्ताः अविद्ययैव । व्यक्ताव्यक्त–कार्यकारण–समष्टिव्यष्टि–क्रियाकारकफलविभागा अप्यविद्याविजृम्भिता एव । साक्षी ईश्वरः, सृष्टिस्थितिप्रलयाः, अवस्थात्रयम्, किं बहुना, आत्माऽविद्यासंबन्धोऽपि – इत्येतत् सर्वम् अविद्याकृतमेवेत्यतः प्रत्यग्दृष्ट्या वीक्ष्यमाणे अविद्यानिवृत्तौ समस्तः संसारो सद्यो विनिवर्तते । न चाज्ञानप्रतीतितन्नाशाभ्यां आत्मवस्तुनि कश्चिद्विशेषो भवति, रज्जुसर्पविकल्पतन्नाशाभ्यां रज्ज्वामिव । तदेवं भाष्यकारप्रस्थाने इवेहाप्यध्यारोपापवादप्रक्रियैव समाहृता सर्वतः – इति स्थितम् ॥

(१) मातृत्वकञ्चुको यद्वदात्माऽनात्मानमीक्षते ।
दृष्टिमात्रैकरूपत्वान्न तथात्मानमीक्षते ॥ वा. १–४–७३४.

(२) ज्ञाताज्ञातविभागेऽस्मिञ्ज्ञानाज्ञानात्मता तथा ।
ज्ञात्रज्ञातृत्वमप्येवं स्वतःसिद्धेर्न साक्षिणः ॥
तै. २–९–६६६, पा. १८७.

(३) द्वैतास्पृक् प्रत्यगात्मैकः प्रतीचीव परागपि ।
युष्मदस्मद्विभागाभ्यां भिद्यतेऽविद्यया मृषा ॥
अस्मद्विभागे पञ्चास्य यथैवान्नमयादयः ।
तथा तत्प्रत्यगात्मानो युष्मदन्नादयः स्मृताः ॥
तै. वा. २–१–२३४, २३५, पा. ९३.

(४) मृत्युर्वै तम इत्येवमाप एवेदमित्यपि ।
अविद्या प्रथते मौली व्यक्ताव्यक्तात्मनाऽनिशम् ॥

एतेभ्योऽसौ समुत्थाय स्वाभासानात्मजन्मना ।
याति क्षेत्रज्ञतामीशः कूटस्थोऽपि ह्यविद्यया ॥
वा. १-२-१३६, १३७, पा. ३२९, ३३०.

(५) अकारणमकार्यं सत् कार्यकारणतामगात् ।
मोहादेव ततः शास्त्रं तदुच्छित्तौ प्रवर्तते ॥ वा. १-२-१३०.
कार्यकारणरूपाभ्यामतद्वत्तत्त्विका ततः ।
आत्माविद्यैव सर्वत्र प्रथते स्वात्मसाक्षिका ॥ वा. १-४-३०९.

(६) समस्तव्यस्ततैवेह प्रत्यगज्ञानभूमिका ।
न त्वपास्तसमस्तान्ध्ये नेति नेति परात्मनि ॥ वा. १-३-२६९.

(७) अकारणं सदज्ञानात् कारणत्वं यथैत्यजम् ।
सर्वकारकतामेवं क्रियातत्फलतामपि ॥ वा. १-२-१२८.

(८) अपास्ताविद्यातज्जत्वादस्थूलाद्युक्तिगोचरः ।
स्वाभासाविद्योपाधिः सन् साक्ष्यन्तर्यमितां व्रजेत् ॥
वा. १-४-१५१.

(९) जगदुत्पत्तिसंहारास्तद्वदात्मनि कल्पिताः ।
वस्तुवृत्तां समालोक्य कुतः सृष्ट्यादिसंभवः ॥ वा. २-१-४११.

(१०) सुप्तः प्रबुद्ध इत्येवं स्वप्नं पश्यति चेति यः ।
विकल्प एष भूतानामविद्यारात्रिशायिनाम् ॥ वा २-१-२६५.

(११) पराक्प्रवणया दृष्ट्या धीस्थो ज्ञोऽज्ञानमात्मनि ।
व्योमकार्ष्ण्यादिवत् तज्जं संभावयति न स्वतः ॥ वा. १-४-२९८.

[अधस्तादुदाहृताः श्लोकास्तत्तत्प्रकरणे गता अपीह पुनरानीता अध्यारोपापवादप्रक्रियैव वार्तिककाराणां संमतेति निर्दर्शनायेति ज्ञेयम् ॥]

वार्तिकसंमताद्वैतम् –

१३०. ब्रह्मात्माद्वैतमेव वार्तिकाभिमतम्, तच्च सर्वविधद्वैतेन्द्रजालकारणभूताविद्यानिरसनेन वेदान्तवाक्यैकगम्यम् – इति विज्ञातं वार्तिकग्रन्थपरीक्षणेन । अत एव सुरेश्वराचार्याः स्वाभिमताद्वैतप्रक्रियाविरोधिनीः सर्वा अद्वैतप्रक्रियाः श्रुतियुक्त्यनुभवावष्टम्भात् खण्डयन्ति स्मेति

निर्दर्शितं तत्र तत्र प्राचीनप्रस्थानभेदपरीक्षावसरे । आचार्यमण्डन-प्रस्थानतोऽस्य वार्तिकप्रस्थानस्य वैलक्षण्यमपि तत्र तत्र स्फुटीकृतमेवास्मिन् काण्डे । अत एव मण्डनसंमताः शब्दाद्वैतसत्ताद्वैतभावाद्वैतप्रक्रिया वार्तिक-प्रस्थाने प्रत्याख्याता दृश्यन्ते । तत्र कतिपयश्लोकानुदाहृत्य काण्डमिम-मुपसंहरामः –

(१) तदिदं नामरूपाभ्यामनामकमरूपकम् ।
एवं व्याक्रियताज्ञानहेतुमात्रव्यपाश्रयात् ॥
अभिधानाकृतिर्नाम शब्देनेहाभिधीयते ।
अभिधेयाकृतिस्तद्वद्रूपमित्युपदिश्यते ॥
एवं द्वाभ्यां प्रकाराभ्यामीशो व्याकृतजन्मनाम् ।
व्यवहाराय पर्याप्तो न त्वव्यक्तात्मना यतः ॥
वा. १-४-३९० प्रभृति ३९२ पर्यन्तम् । पा. ५१०.

[मण्डनसंमतं शब्दाद्वैतं ब्र. सि. 17-19 पृष्ठेषु द्रष्टव्यम् ॥]

(२) तस्मादैश्वरविज्ञानं यजुर्बुद्ध्याद्युपाश्रयम् ।
एवं च सति नित्यत्वं वेदानां घटतेऽञ्जसा ।
वाचकत्वमशब्दस्य सिद्धं न स्फोटरूपतः ॥
तै. वा. २-२९७, २९८, पा. १०७.

[मण्डनस्य स्फोटविषयेऽभिप्रायाः 'स्फोटसिद्धि'ग्रन्थतोऽधिगन्तव्यः]

(३) अव्यावृत्तानुगतं निःसामान्यविशेषतः ।
ब्रह्मेति मुख्यवृत्त्येह वस्तु श्रुत्याऽभिधीयते ॥ वा. ४-३-१८१५.

[एवं वार्तिके ५६५, ५८२, ६४९, ६८६, ७२०, ९४८, ९९४, १०३२, १०३७, १२१४ – इत्यादिषु पृष्ठेषु ब्रह्म वर्णितं दृश्यते पदे पदे । ब्रह्मसिद्धिकारेण तु ब्रह्म सत्तासामान्यमित्युपगतम् , पा. 37]

(४) अनन्यानुभवेनैव भावाभावात्मभूमिषु ।
प्रत्यक्कूटस्थ आत्मानं पश्यन्नास्ते फलात्मना ॥
अतो मात्रादिसंभेदो यत्र यत्र निवर्तते ।
तत्र तत्रैकलः प्रत्यक्स्वमहिम्नैव सिध्यति ॥

प्रमात्रादेरभावोऽतो यः सिद्धः स्वात्मबोधतः ।
नञ्वृत्तिस्तं सदाबुद्धं लक्षयत्यपृथक्प्रमम् ॥
वा. २-३-२२७ प्रभृति २२९ पर्यन्तम्, पा. १०३०.

[नञ्वृत्तिरभावं न बोधयतीत्युक्त्या भावाद्वैतं निराकृतम् । मण्डनेन तु तत् स्वीकृतम् । द्रष्टव्यम् ब्र. सि. पा. 4]

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां
वार्तिकप्रस्थानपरीक्षा नाम सप्तमः काण्डः

---

८. पञ्चपादिकाप्रस्थानपरीक्षा

पञ्चपादिकाप्रस्थानविमर्शनावश्यकता –

१३१. अथ पञ्चपादिकाप्रस्थानं यथासाध्यं परीक्ष्यते । इयं च सूत्रभाष्यटीका शङ्करभगवत्पादसाक्षाच्छिष्यभूतानां पद्मपादाचार्याणां कृतिरिति प्रथास्तीति प्रागेव (पा. ७) विज्ञापितम् । ग्रन्थसमाप्तिसूचक-पुष्पिकायां परं पद्मपादाचार्यनामोल्लेखो न दृश्यते, न च **विवरणाख्यायां** तद्व्याख्यायां ग्रन्थकृन्नामोल्लेखोऽस्तीति च (पा. ९-१०)। यद्यपि पञ्चपादिकेति नामानुगुणं शारीरकस्थानां पञ्चानां पादानां टीका कृतेत्यनुमातुं शक्यते । तथापि चतुःसूत्रीपर्यन्तमेव ग्रन्थः समुपलभ्यते संप्रतीति शोकस्थानमिदं वेदान्तविचारधारेतिहासजिज्ञासूनाम् । ग्रन्थस्तु पूर्णतया विनिर्मितोऽपि कारणान्तरादग्निदग्धोऽभूदिति कथा, अस्यापूर्णत्वमुपपादयितुं केन-चिदुद्भावित इव भाति[1] । अस्तु तावदिदं यथा तथा, अद्यानुपलभ्यमान-प्राक्तनसूत्रवृत्तिस्थवाक्यान्युद्धृत्य अत्र (पं. ४२, ४८) समुदाहरणात्, अस्य निबन्धस्याद्वैतग्रन्थेषु प्राचीनतमत्वम् ख्याप्यते । पञ्चपादिकातः प्राचीनतरस्य शाङ्करभाष्यव्याख्यानस्येदानीम् अनुपलब्धेश्च अल्पाकारोऽप्ययं ग्रन्थो भाष्यव्याख्यातृषु भाष्याभिप्रायविषये मतभेदो बहोः कालादारभ्य प्राव-र्ततेत्यत्र प्रबलतरं प्रमाणं भवति – इत्येतस्मादपि कारणादिदं प्रस्थानं सूक्ष्मेक्षिकामर्हति ॥

अविद्यास्वरूपं पञ्चपादिकायाम् –

१३२. अविद्यास्वरूपं पञ्चपादिकायाम् अनितरसाधारणप्रक्रिय-यैव प्रदर्शितम् । तद्यथा – **अन्योन्यस्मिन् अन्योन्यात्मकताम्,**

---

1. ग्रन्थः पूर्णतयैव निर्मिमीषित इत्यत्र ग्रन्थशरीरे एव गमकमस्ति । तद्यथा "यथा चैतदेवं तथा 'एक आत्मनः शरीरे भावात्' इत्यधिकरणारम्भे दर्शयिष्यामः" (पं. पा. ३३) इतिवाक्यं तदधिकरणपर्यन्तं ग्रन्थस्य रिरचयिषितत्वे प्रमाणम् ॥

अन्योन्यधर्माश्चाध्यस्य, इतरेतराविवेकेन, अत्यन्तविविक्तयोर्धर्मधर्मिणोः, मिथ्याज्ञाननिमित्तः, सत्यानृते मिथुनीकृत्य 'अहमिदम्' 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यम्। तत्र 'इतरेतराविवेकेन विषयविषयिणोरात्मानात्मनोरध्यासः कृतः' इत्यन्वयो भाष्यकाराणामिष्ट इति ग्रन्थाक्षराज्ञस्याय कल्पनीयं भवति। उक्तं च गीताभाष्ये 'इतरेतरतद्धर्माध्यासलक्षणः संयोगः, क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबन्धन' इति। विवृतं चेदं भाष्यकारीयं प्रस्थानं प्राक् (३१)। श्रीगौडपादीयपरिभाषामनुसृत्य मण्डनोऽपि अग्रहणम्, विपर्ययग्रहणं चाविद्यात्वेनोररीचकार (ब्र. सि. पा. 9)। एतदपि मण्डनप्रस्थानपरीक्षावसरे निवेदितम् (पा. १८५)। एवं सुरेश्वराचार्या अपि न जानामीत्यनुभवप्राप्तमज्ञानमेवाविद्याशब्दवाच्यत्वेन स्वीचक्रुः। मिथ्याज्ञानं तत्प्रत्युपस्थापितमनात्मानमप्यविद्येत्येव व्यवजह्रुरिति तत्प्रस्थानविमर्शनावसरे (पा. २२१) प्रादर्शि। भर्तृप्रपञ्चा अप्यग्रहणमविद्यात्वेन वर्णयांबभूवुः (पा. १६१)। पञ्चपादिकायामेव परम् 'इतरेतराविवेकेन' इत्येतदव्याकृत्यैव, 'मिथ्याज्ञाननिमित्तो व्यवहारः' इति भाष्यवाक्यभागोऽन्यथैव व्याख्यातः। तद्यथा –

(१) 'अध्यस्य', 'मिथुनीकृत्य' इति च क्त्वाप्रत्ययो न पूर्वकालत्वम् अन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तः, 'भुक्त्वा व्रजति' इतिवत् क्रियान्तरानुपादानात्। अध्यस्य नैसर्गिकोऽयं लोकव्यवहारः इति स्वरूपमात्रपर्यवसानात्। उपसंहारे च 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासः' इति तावन्मात्रोपसंहारात् अतः 'चैतन्यं पुरुषस्य स्वरूपम्' इतिवद् व्यपदेशमात्रं द्रष्टव्यम्॥ पं. ४[1].

(२) ननूपन्यासकाले 'नैसर्गिकोऽयं लोकव्यवहारः' इति लोकव्यवहारो नैसर्गिक उक्तः। कथमिहाध्यासो निगम्यते, अनादिरिति च

1. पञ्चपादिकाप्रस्थानपरीक्षायां सर्वत्र पं. इत्येतावन्मात्रसंकेताक्षरात् परतो दत्ता सङ्ख्याः ई. जे. लाजरस् कम्पनीमुद्रितपुस्तकपत्रपार्श्वं परामृशतीति ध्येयम्॥

अधिकावापः ? अत्रोच्यते। तत्रापि प्रत्यगात्मन्यहङ्काराध्यास एव नैसर्गिको लोकव्यवहारोऽभिप्रेतः । स च प्रत्यगात्मा अनादिसिद्धः ; तस्मिन् नैसर्गिकस्यानादित्वम् अर्थसिद्धम् । अतः प्रक्रमानुरूपमेव निगमनम् । न चाधिकावापः ॥ पं॰ पा॰ ३६.

[अनेन अध्यासः, मिथुनीकरणम्, व्यवहारः – इति पर्याया इत्युक्तं भवति । तदेतदुत्तरत्राध्यासविचारावसरे विस्रक्ष्यामः ॥]

(३) मिथ्याज्ञाननिमित्त इति । मिथ्या च तदज्ञानं च मिथ्याज्ञानम् । 'मिथ्या' इत्यनिर्वचनीयता उच्यते, अज्ञानम् इति च जडात्मिका अविद्याशक्तिः, ज्ञानपर्युदासेनोच्यते । तन्निमित्तः, तदुपादान इत्यर्थः ॥ (पं॰ पा॰ ४)

[अत्राध्यासस्य अविद्याशक्त्युपादानकत्वं प्रतिज्ञातम् । 'अविद्याशक्तिः' इति नाविद्यायाः शक्तिः – इत्यस्मिन्नर्थे, किंतु 'अविद्यैव शक्तिः' इति कृत्वा– इत्यनुपदमेव स्फुटीभविष्यति । अध्यासस्य चोपादानापेक्षता, अविद्यायाश्च जडशक्तिरूपत्वम्, मिथ्याशब्दस्य च अनिर्वचनीयपदार्थवाचकत्वं चेत्येतत् सर्वं भाष्ये न कुत्रापि प्रतिपादितं दृश्यते । मिथ्याज्ञानशब्दश्च सम्यग्ज्ञानप्रतिद्वन्द्विमिथ्याप्रत्ययवचन एवेति च तत्र तत्र (सू॰ भा॰ पा॰ २२, ११४, १९८, २०९ ....) प्रदर्शितम् । यद्यपि भाष्ये नामरूपबीजस्य परमेश्वरस्यात्मभूतस्यैव कल्पितस्य तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वम् उक्तमेव, तथापि 'नात्यन्तमसती नापि सती, तस्मादनिर्वचनीया' (ब्र॰ सि॰ 9) इति ब्रह्मसिद्धिकारोक्तविधयैव केवलानिर्वचनीयशब्दव्यपदेश्यत्वं नामरूपबीजलक्षणाविद्यायाः प्रस्थानत्रयभाष्येषु क्वचन नोपलभ्यते ॥]

(४) येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपम्· अव्याकृतम्, अविद्या, माया, प्रकृतिः, अग्रहणम्, अव्यक्तम्, तमः, कारणम्, लयः, शक्तिः, महासुप्तिः, निद्रा, अक्षरम्, आकाशम् – इति च तत्र तत्र बहुधा गीयते चैतन्यस्य स्वत एवावस्थितलक्षणब्रह्मस्वरूपतावभासं प्रतिबध्य जीवस्वापादिका, विद्याकर्मपूर्वप्रज्ञासंस्कारचित्रभित्तिः, सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिः, अनादिरविद्या .... ॥ (पं॰ पा॰ २०)

[अत्र 'अविद्या' 'शक्तिः' – इति च व्यस्ते पदे अविद्यावाचकत्वं न प्रयुक्ते । 'अविद्याशक्तिरभ्युपगन्तव्या' इति समस्तपदवाच्यत्वेनैव तु प्राक् प्रस्तुता अविद्या । अविद्या च अव्याकृतादिशब्दशब्दिता जगत्प्रागवस्था–इति स्पष्टमुद्घोषितम् । ब्रह्मणो ब्रह्मभावावभासप्रतिबन्धिका सैवेति चोक्तम् । तदेतद्

भगवत्पादीयभाष्योपोद्घाते परिभाषिताम् अविद्याम् अध्यासरूपां कार्यत्वेन स्वीकृत्य तदुपादानभूतेयम् इत्यभिनिवेशेन । तत्र मिथ्याज्ञानलक्षणमध्यासं ज्ञानबाध्यत्वेन प्रसिद्धम् अविद्याशब्देनाव्यपदिश्य, ज्ञेयपक्षकुक्षिनिवेश्यस्याव्याकृतस्य तच्छब्दवाच्यत्वेन स्वीकारे हेतुर्न विज्ञायते ॥]

अविद्या किं प्रमाणिका ? –

१३३. भगवत्पादीयप्रस्थाने वार्तिकप्रस्थाने च अविद्या अनुभवसिद्धेति स्वीक्रियत इति स्पष्टम् । 'कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' इति भाष्यात् । 'कल्प्याऽविद्यैव मत्पक्षे सा चानुभवसंश्रया' (सं. वा. १८२) इत्यादिस्थलेषु तथा विस्पष्टमुक्तत्वात् । पञ्चपादिकायां तु सा एवं प्रमाणैः प्रसाधिता –

(१) अवश्यमेषा अविद्याशक्तिर्बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या । अन्यथा मिथ्यार्थावभासानुपपत्तेः ॥ (पं. पा. ४)

[अत्र दृष्टार्थापत्तिः प्रमाणत्वेनोपन्यस्ता ॥]

(२) विद्यत एवात्रापि अग्रहणाविद्यात्मको दोषः प्रकाशस्याच्छादकः । कथं गम्यते ? श्रुतेः, तदर्थापत्तेश्च । श्रुतिस्तावत् 'अनृतेन हि प्रत्यूढाः' (छां. ८-३-२), 'अनीशया शोचति मुह्यमानः' (मुं. ३-१-२) इत्येवमाद्या । तदर्थापत्तिरपि । विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते, तेनार्थादिदमवगम्यते जीवस्य ब्रह्मस्वरूपतानवगमोऽविद्यात्मको बन्धो निसर्गत एवास्तीति ॥ (पं पा. १४)

[अत्र श्रुतिः, श्रुत्यर्थापत्तिश्च अविद्याप्रमाणत्वेनोदाहृता । अत्र प्रमाणानां प्रमेयाज्ञाननिवर्तकत्वम् इति स्थितेऽपि न्याये, प्रमाणप्रवृत्तेः प्रागेव सिद्धस्य अज्ञानस्य साधकत्वेन श्रुत्यादिप्रमाणं किमित्युदाह्रियत इति न विज्ञायते । अर्थापत्तिश्च समुदाहृता कथमेतस्या एवाविद्याशक्तेः प्रसाधिका, न तु प्रस्थानान्तरसंमताविद्याया इत्यत्र साधकतर्कोऽपि नोपन्यस्तोऽत्र ॥]

अविद्याकार्यम् –

१३४. अविद्याशक्तेर्नामरूपात्मकत्वात्, सर्वस्यापि जगतस्तत्कार्यत्वमित्यर्थात् सिध्यति । विशेषतस्तु, अध्यासविचारे प्रवृत्तैर्ग्रन्थकारैरहङ्कारादध्यासकारणत्वेनैव निर्दिष्टा अविद्या । तद्यथा –

(१) सा च (अविद्या) न जडेषु वस्तुषु तत्त्वरूपावभासं प्रतिबध्नाति। प्रमाणवैकल्यादेव तद्ग्रहणसिद्धेः। रजतप्रतिभासात् प्राक्, ऊर्ध्वं च सत्यामपि तस्यां स्वरूपग्रहणदर्शनात्। अतस्तत्र रूपान्तरावभासहेतुरेव केवलम्। प्रत्यगात्मनि तु चितिस्वभावत्वात् स्वयंप्रकाशमाने ब्रह्मस्वरूपानवभासस्य अनन्यनिमित्तत्वात्, तद्गतनिसर्गसिद्धाविद्याशक्तिप्रतिबन्धादेव तस्य अनवभासः। अतः सा प्रत्यक्चिति ब्रह्मस्वरूपावभासं प्रतिबध्नाति, अहङ्काराद्यतद्रूपप्रतिभासनिमित्तं च भवति। सुषुप्त्यादौ चाहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीत्यतो नैसर्गिकोऽप्यहङ्काराममकारात्मको मनुष्याद्यभिमानो लोकव्यवहारो मिथ्याज्ञाननिमित्त उच्यते। न पुनरागन्तुकत्वेन ॥ पं. पा. ४-५.

[अत्र चैतन्याश्रिता अविद्या तत्त्वरूपावभासप्रतिबन्धिका, अतद्रूपावभासनिमित्तं चेत्युक्तत्वात्, अचेतनप्रतिभासोऽप्यतद्रूपावभास एवेत्युक्तं भवति। अथ चाविद्याकार्ये तस्मिन्नप्यचेतनवस्तुन्याश्रिता सेति कथमुच्यत इति न विज्ञायते। अत्र टीकाव्याख्याकाराणामाशयस्तूपरिष्टात् विमर्ष्टव्य इत्यास्तां तावत्। प्रत्यक्चित्यहङ्काराममकारात्मकातद्रूपप्रतिभासहेतुरपि सैवाविद्येत्युक्तिः, 'अहं ममेति नैसर्गिकोऽयं लोकव्यवहार' इति नैसर्गिकत्वप्रतिपादकं भाष्यं विरुणद्धीव भाति। टीकाकारमते तु नैसर्गिक एव सन्नध्यासः सुषुप्त्यादौ संस्कारमात्रावशेषं स्थित्वा पुनरपि जागरे व्यक्तात्मनोद्भवतीत्येतावता तस्य नैमित्तिकत्वमुच्यत इति विशेषः। एतद्विमर्शस्तु भविष्यत्यध्यासविचारे ॥]

(२) ननु न जीवो ब्रह्मणोऽन्य इत्युक्तम्। बाढम्। अत एवार्थात्, जीवे ब्रह्मस्वरूपप्रकाशाच्छादिकाऽविद्या कल्प्यते। अन्यथा परमार्थतस्तस्वरूपत्वे तदवबोधोऽपि यदि नित्यसिद्धः स्यात्, तदा तादात्म्योपदेशो व्यर्थः स्यात्। अतोऽनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदम् एकरसं ब्रह्म – इति श्रुतिस्मृतिन्यायकोविदैरभ्युपगन्तव्यम् ॥ पं. पा. १४-१५.

[अत्र ब्रह्माश्रितेयम् अविद्या तस्मिन् अनन्तजीवनिर्भासे हेतुरित्युक्तम्। तस्मिंस्तत्सत्त्वे प्रमाणं तु तादात्म्योपदेशान्यथानुपपत्तिरिति च। जीवाश्रिता अविद्येति ब्रह्मसिद्धिकाराद्विलक्षणमिदं प्रस्थानमिति स्फुटम् ॥]

अविद्योपादानवादः किं पञ्चपादिकाकारोपज्ञः ?

१३५. अविद्याशक्तिः समस्तभेदजातस्योपादानम् इति वादं स्वीकुर्वाणेषु ग्रन्थेषु संप्रत्युपलभ्यमानेषु पञ्चपादिकैव प्राचीनतमा। तथापि

नैवायं वादः पञ्चपादिकाकारोपज्ञः– इत्यत्रैतद्ग्रन्थाद् बहिरपि प्रमाणमस्ति । यस्माद् **ब्रह्मसिद्धौ** लिखितमुपलभ्यते **" तथा चोक्तम् अविद्योपादान-भेदवादिभिः 'अनादिरप्रयोजना चाविद्या' इति "** (ब्र. सि. 10) इति । न चेदृशं वाक्यं पञ्चपादिकायाम् उपलभामहे । अत उन्नीयते नूनं ततः पूर्वमप्यासीदेवाविद्योपादानवादो लब्धप्रसर इति, भगवत्पादसंमता-ध्यारोपापवादप्रक्रियातो विलक्षणाम् अविद्याशक्त्युपादानप्रक्रियामवलम्ब-मानानां मतमिदं पर्यासप्रोत्साहकाभावेन स्याद् गच्छता कालेन शाङ्करभाष्य-व्याख्यानव्याजेन तत्रैवान्तर्भूतमल्पसरिदिव महानद्याम् इति च । अथवा भाष्यवार्तिकयोस्तु नैकेषां प्रस्थानान्तराणां परामृष्टानां मध्ये क्वचिदपि नाविद्योपादानप्रक्रिया कटाक्षितेत्यतो वार्तिकप्रणयनादर्वाक्काले कैश्चिदुप-स्थापिता प्रक्रियेयम् इति शक्योहनम् । ग्रन्थपुरातत्त्वशोधका एव तु प्रमाणमत्रेति नाधिकमत्र विषये लेखिनीं व्यापारयितुमिच्छामः ॥

पञ्चपादिकाप्रस्थाने अध्यासलक्षणम् –

१३६. 'आह कोऽयमध्यासो नामेति ?' इति प्रश्नस्योत्तरत्वेन लक्षणवाक्यमिदं लिखितं भाष्ये **'उच्यते – स्मृतिरूपः परत्र पूर्वदृष्टाव-भासः'** इति । तत्र पञ्चपादिकाव्याख्यानमित्थम् –

(१) तत्र 'परत्र' इत्युक्तेऽर्थात् परस्य अवभासमानता सिद्धा । तस्य विशेषणं स्मृतिरूपत्वम् । स्मर्यत इति स्मृतिः । असंज्ञायामपि अकर्तरि कारके घञादीनां प्रयोगदर्शनात् । स्मर्यमाणरूपमिव रूपमस्य । न पुनः स्मर्यत एव । स्पष्टं पुरोऽवस्थितत्वावभासनात् । 'पूर्वदृष्टावभास' इत्युप-पत्तिः स्मृतिरूपत्वे । न हि पूर्वम् अदृष्टरजतस्य शुक्तिसंप्रयोगे रजतमव-भासते । यतोऽर्थात् तद्विषयस्य अवभासस्यापि इदमेव लक्षणमुक्तं भवति । कथम् ? तदुच्यते । स्मृते रूपमिव रूपमस्य, न पुनः स्मृतिरेव । पूर्व-प्रमाणविषयविशेषस्य तथा अनवभासकत्वात् । कथं पुनः स्मृतिरूपत्वम् ? पूर्वप्रमाणद्वारसमुत्थत्वात् । न हि असंप्रयुक्तावभासिनः पूर्वप्रवृत्ततद्विषय-प्रमाणद्वारसमुत्थत्वमन्तरेण समुद्भवः संभवति ॥ पं. पा. ६–७.

अत्र भाष्याक्षराणि तावत् 'अन्योन्यस्मिन् अन्योन्यात्मकताम्, अन्योन्यधर्मांश्च अध्यस्य....सत्यानृते मिथुनीकृत्य....नैसर्गिकोऽयं लोकव्यवहारः' इति अध्यासस्य सत्यानृतमिथुनीकरणात्मकज्ञानविवक्षणे स्वरसानि भान्ति। 'सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति' इति वाक्यशेषश्चैतदेव द्रढयति। उपसंहारे च 'अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम' इति स्पष्टतरं लक्षणवाक्यमिदं शब्दान्तरेण ज्ञानाध्यासपरत्वेनैव व्याख्यातमिति सर्वविदितमिदम्। तदेतत् सर्वमनादृत्य – 'अकर्तरि च कारके संज्ञायाम्' (पा. ३–३–१९) इति वैयाकरणस्मरणस्य संज्ञाविषयत्वेऽपि घञादीनामसंज्ञायामपि प्रयोगो दृश्यत इति प्रयोगमात्रशरणत्वेन – स्मृतिशब्दस्य कर्मसाधनत्वमेव प्राधान्येन स्वीकृतमत्र, न तु संभवदपि भावसाधनत्वम्। तदिदं व्युत्क्रमेण प्रस्थानम् अध्यासोपादानत्वेन स्वाभिमतमिथ्याज्ञानपदार्थस्य प्राधान्येनाविद्यात्वं परिरक्षितुमिति वयमुत्पश्यामः। यदि हि सूत्रभाष्ययोरिव ज्ञानप्रहेयाध्यासस्यैव ज्ञानलक्षणस्याविद्यात्वं मुख्यत्वेन लक्षीकृतमभविष्यत्, न तर्हि 'अर्थात् तद्विषयस्य अवभासस्यापि इदमेव लक्षणमुक्तं भवति' इति तस्य भाक्तत्वमवक्ष्यत। शब्दादेव हि ज्ञानलक्षणोऽध्यासो लक्षितो भाष्ये 'अतस्मिंस्तद्बुद्धिरित्यवोचाम' इति, नार्थतो गम्य इति स्पष्टम्। 'पूर्वदृष्टावभासः' इत्युपपत्तिदर्शनपरोऽपि भाष्यभागः स्वव्याख्यानुगुण्येनैव विवृत एभिष्टीकाकारैः 'न हि पूर्वमदृष्टरजतस्य शुक्तिसंप्रयोगे रजतमवभासते' इति, 'न हि असंप्रयुक्तावभासिनः पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्थमन्तरेण समुद्भवः संभवति' इति च। न हि भाष्यकारैः स्मृतौ पूर्वदृष्टावभासः कथं जायत इति विनिश्चेतुं स्मृतिसतत्त्वं परिशीलयितुं वा विशेषणमिदमुपात्तम्, किं त्वध्यासस्य स्मृतिरूपत्वमुपपादयितुम्। न चाध्यासः कथमुत्पद्यत इत्येतदिह भाष्ये विचार्यत्वेन प्रकृतम्, येन 'नियोगतः पूर्वदृष्टेन तद्विषयेण भाव्यम्, अन्यथा तदनुत्पत्तेः' इति व्याख्यायेत।

स्मृतेरिवास्याप्यध्यासलक्षणज्ञानस्य विषयो नास्ति पुरतोऽवस्थितः-इतीयत्यंशे हि दृष्टान्तदार्ष्टान्तिकयोः सारूप्यं विवक्षितम् । न चैवं नियन्तुं शक्यते यदसंप्रयुक्तावभासिनः पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्थत्वमन्तरेण स्मृतिसमुद्भवासंभव इति । अयथार्थस्मृतिभिः स्वप्नोन्मादाद्यवस्थासु जायमानत्वेन संभाव्यमानाभिरित्थमेव भाव्यमिति केनचिन्नियन्तुमशक्यत्वात् । न च प्रमाणप्रमेयविभागाध्यासः पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्थ इति केनचिद्वेदान्तिना समनुज्ञायते । तद्विषयकप्रमाणान्तरस्यैवासंभवात् । संभवे वा अनवस्थादोषग्रासदौस्थ्यप्रौढ्यात् । अतोऽत्र न पूर्वदृष्टत्वं विषयस्यावधार्यते, किं तु पूर्वदृष्टस्येव अवभासः – पूर्वदृष्टसदृशं वस्तु रजतादि तथ्यत एव पुरोऽवस्थितमिति भ्रान्त्या विकल्पनम् अध्यास इत्येतावदुच्यते । अत एव हि पूर्वदृष्टत्वविशेषणमुपसंहारे न निवेशितम्, अतस्मिंस्तद्बुद्धिरित्येव तु लक्षणवाक्यार्थः संगृहीतः -- इत्यवधेयम् ॥

अध्यासे मतान्तरोपन्यासः –

१३७. भाष्ये लक्षणकथनानन्तरम् अध्यासविषये वादिविप्रतिपत्तयोऽपि प्रदर्शिताः – 'तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति; केचित्तु यत्र यदध्यासः, तद्विवेकाग्रहनिबन्धनो भ्रम इति; अन्ये तु यत्र यदध्यासः, तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते' इति । अत्र मतान्तरेषु दूषणं नोक्तम्, 'अध्यासः कथं जायते?' इत्यत्र प्रश्नप्रतिवचनयोः फल्गुप्रयोजनत्वात् । अप्रकृतत्वाच्च । न ह्यध्यासोत्पत्तिप्रकारः प्रतिपाद्यतया प्रकृतः । चिदचितोरध्यासो निसर्गत एवास्ति लोकव्यवहारे – इत्येतत्तु प्रतिपाद्यतया प्रकृतम् । तत्र किंलक्षणस्याध्यासस्य सद्भावः प्रसाध्यते? – इत्यत इदमुत्थितं लक्षणवाक्यम् 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति । अत एव 'सर्वथापि तु अन्यस्यान्यधर्मावभासतां न व्यभिचरति' इति मतान्तरोपन्यासप्रयोजनमुपसंहरति । अध्यासनिमित्तभेदं प्रति विप्रतिपन्नेष्वपि वादिषु अन्यस्मिन्नन्यबुद्धिलक्षणत्वमध्यासस्य सर्वसंप्रतिपन्नम्–इत्यर्थः ॥

व्याख्यानप्रास्थानिकास्तु यथोपन्यस्तानि मतानि केषामिति विशिष्य निर्धारणे तत्तन्मतमनूद्य तत्र दोषप्रदर्शने च स्वस्वाभिप्रायानुसारेण प्रवृत्ताः। तत्र पञ्चपादिकाकारैस्तावत् 'अन्यत्र शुक्तिकादौ अन्यधर्मस्य अर्थान्तरस्य रजतादेः, ज्ञानाकारस्य बहिष्ठस्यैव वा अध्यास इति वदन्ति' इति प्रथमकल्पे मतद्वयम् अन्तर्भावितम्। 'यत्र यस्याध्यासः, तयोर्विवेकस्य अग्रहणात् तन्निबन्धनोऽयम् एकत्वभ्रमः इति वदन्ति' इति द्वितीयः कल्पो व्याकृतः। 'यत्र शुक्तिकादौ यस्य रजतादेरध्यासः, तस्यैव शुक्तिशकलादेः, विपरीतधर्मत्वस्य रजतादिरूपत्वस्य कल्पनाम्, अविद्यमानस्यैवावभासमानताम् आचक्षते–इति तृतीयः कल्पो विवृतः' (पं. पा. ११)। तत्र, द्वितीयकल्पः अन्यविषयकान्यज्ञानस्य विवेकाग्रहणनिबन्धनत्वं – दर्शनस्मरणयोर्निरन्तरोत्पन्नयोः करणदोषादेव विवेकानवधारणात्, दूरस्थयोरिव वनस्पत्योः, अनुत्पन्ने एवैकत्वावभासे उत्पन्नभ्रमः – इत्येषः सप्रपञ्चम् अनूद्य निराकृत एभिष्टीकाकारैः (पं. पा. ७–८)। ततः परम्, शुक्ते रजतात्मनावभासः परमार्थः, शुक्तेरेव दोषवशात् परिणामः, दुष्टकरणजन्यप्रतीतेरेव रजतोत्पादः–इति कल्पत्रयं निरस्तम् (पं. पा. ८-९)। तत ऊर्ध्वं स्वपक्ष उपक्षिप्तः; तद्विशदीकरणप्रसङ्गेन निरधिष्ठानाध्यासवादः, देशान्तरवर्तिपदार्थोऽधिष्ठाने भासत इत्यन्यथाख्यातिपक्षश्च प्रतिक्षिप्तः (पं. पा. १२)॥

अत्रापि ज्ञानाध्यास एव परवादिसंमतत्वेनानूदितो भाष्ये–इति स्पष्टम्। 'विवेकाग्रहनिबन्धनो भ्रमः', 'विपरीतधर्मत्वकल्पना'–इति च लक्षणवाक्ययोर्ज्ञानाध्यास एव स्वरसत्वात्। अथ च अर्थाध्यास एव विशिष्याद्दतोऽत्र टीकायां भाष्याभिमतत्वेन मुख्यतः, अतस्सिस्तद्बुद्धिरिति प्रकृताध्यासलक्षणस्य सर्वसंमतत्वं वदद्भाष्यं, मिथ्याज्ञानस्यैव सम्यग्ज्ञानेन साक्षाद्बाध्यत्वं च पश्यद्भिरपीति चित्रमेतत्॥

अध्यासस्वरूपविशदनार्थं भाष्योपात्तमुदाहरणद्वयम् –

१३८. अध्यासलक्षणं सर्ववादिसंप्रतिपन्नमिति प्रदर्श्य लोकसिद्ध-

मन्यासद्वयमुदाहृतं भाष्ये स्वाभिप्रायविशदनार्थम् – "तथा च लोके अनुभवः–'शुक्तिका हि रजतवदवभासते', 'एकश्चन्द्रः सद्वितीयवदिति।'" इति च। तत्र शुक्तिरजतदृष्टान्त एवं व्याख्यातष्टीकायाम् –

(१) लौकिकसिद्धमेवेदम् अध्यासस्य स्वरूपं लक्षितम्, किमत्र युक्त्या ? – इति कथयति 'शुक्तिका हि रजतवदवभासत इति'। ननु न शुक्तिका प्रतिभासते रजतमेव प्रतिभासते। तेन 'शुक्तिका' इति 'रजतवत्' इति चोभयं नोपपद्यते। उच्यते – शुक्तिकाग्रहणम् उपरितनसम्यग्ज्ञानसिद्धं परमार्थतः शुक्तिकात्वमपेक्ष्य ; वतिग्रहणं तु संप्रयुक्तस्यारजतस्वरूपस्य मिथ्यारजतसंभेद इवावभासनम् अङ्गीकृत्य। मिथ्यात्वमपि रजतस्य आगन्तुकदोषनिमित्तत्वात्, अनन्तरबाधदर्शनाच्च कथ्यते, न पुनः परमार्थाभिमताद् रजतादन्यत्वमाश्रित्य। तत्र असंप्रयुक्तत्वाद् रजतस्य नेदन्तावभासस्तद्गतः, किं तु संप्रयुक्तगत एव। अपरोक्षावभासस्तु संस्कारजन्मनोऽपि रजतोल्लेखस्य दोषबलात्, इन्द्रियजज्ञानान्तर्भावाच्च इति द्रष्टव्यम्॥ पं॰ पा॰ १३–१४.

का तर्हि गतिः शुक्तिसंप्रयोगे रजतावभासस्य ? उच्यते। नेन्द्रियजज्ञानात् संस्कारजं स्मरणं पृथगेव स्मरणाभिमानशून्यं समुत्पन्नम्, किं तु एकमेव संस्कारसहितादिन्द्रियात्। कथमेतत् ? उच्यते। कारणदोषः कार्यविशेषे तस्य शक्तिं निरुन्धन्नेव संस्कारविशेषमप्युद्बोधयति। कार्यगम्यत्वात् कारणदोषशक्तेः। अतः संस्कारदुष्टकारणसंवलिता एका सामग्री। सा च एकमेव ज्ञानम् एकफलं जनयति। तस्य च दोषोत्थापितसंस्कारविशेषसहितसामग्रीसमुत्पन्नज्ञानस्य उचितमेव शुक्तिगतमिथ्यारजतम् आलम्बनमवभासते। तेन मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानम्; न स्वतो ज्ञानस्य मिथ्यात्वमस्ति। बाधाभावात्॥ पं॰ पा॰ ९.

रजतस्य मिथ्यात्वं मिथ्याज्ञानालम्बनत्वं चेत्थमुपपादितमत्र –

(२) एवं च सति नानुभवविरोधः। प्रतिभासमानस्य रजतस्यैवावलम्बनत्वात्। अतो मायामयं रजतम्। अथ पुनः पारमार्थिकं स्यात्, सैवैरेव गृह्येत। .... मायामात्रत्वे तु मन्त्राद्युपहतचक्षुष इव दोषोपहतज्ञानकारणा एव पश्यन्तीति युक्तम्। किञ्च 'नेदं रजतम्' इति बाधोऽपि मायामयत्वमेव सूचयति। कथम् ? तेन हि तस्य निरुपाख्यतापादनपूर्वकं

मिथ्यात्वं ज्ञाप्यते । नेदं रजतं मिथ्यैवाभासिष्टेति ; न च तत् केनचिद्रूपेण रूपवत्त्वे अवकल्पते । संप्रयुक्तशुक्तिवत्, निरस्यमानविषयज्ञानवच्च ॥ पं. पा. १०.

अत्र दोषसंस्कारेन्द्रियसंप्रयोगजन्यज्ञानत्वं ज्ञानाध्यासस्य लक्षणम् । तस्य च शुक्तिगतमिथ्यारजतालम्बनत्वान्मिथ्यात्वं न स्वतः, अबाध्यत्वात् – इत्युक्तम् । अर्थाध्यासस्य तु दोषनिमित्तत्वात्, दुष्टकरणैरेव तथा दृश्यत्वात्, बाधकज्ञानेन च तथैव ज्ञाप्यत्वाच्च मिथ्यात्वम् इति च । अतोऽर्थान्मायामयत्वमेव, अविद्याशक्तिकार्यत्वमेव, मिथ्यारजतस्येत्युक्तं भवति टीकाकारैः ॥

स्वप्नशोकादौ यथोक्तलक्षणं न दृश्यत इत्यव्यापकत्वमाशङ्क्येत्थं परिहृतं टीकायाम् –

(३) 'उक्तमेतत् पूर्वप्रमाणविषयावभासित्वमात्रं स्मृतेः स्वरूपमिति । तदिह निद्रादिदोषोपप्लुतं मनः, अदृष्टादिसमुद्बोधितसंस्कारविशेषसहकार्यनुरूपं मिथ्यार्थविषयं ज्ञानम् उत्पादयति । तस्य च तदवच्छिन्ना परोक्षचैतन्यस्था अविद्याशक्तिः आलम्बनतया विवर्तते' ॥ पं. पा. १०. इति ॥

[तत्रापि मनोरूपं 'करणम्', निद्रादि'दोषः', अदृष्टाद्युद्बोधित'संस्कार'श्च– इति कारणत्रितयमस्त्येवेति नाव्याप्तिरित्यभिप्रायः । चैतन्यस्था अविद्या मिथ्यार्थरूपेण परिणमते, मनसो विषयीभवतीति च ॥]

तदीदृशं ज्ञानाध्यासाथाध्यासिवर्णनं न कुत्रापि प्रस्थानत्रयभाष्ये पश्यामः । कतिभिश्चित् तद्वाक्यैः परिशीलितैर्भाष्यकारमतं बुद्धिमारोप्येति तान्यत्रोदाहरिष्यामः –

(1) 'शुक्तिकां रजतमिति प्रत्येति' इत्यत्र शुक्तिवचन एव शुक्तिकाशब्दः, रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः, प्रत्येत्येव हि केवलं न तु तत्र रजतमस्ति ॥ सू. भा. ४–१–५, पा. ४६७.

(2) तस्यात्मव्यतिरेकेणाभावं पश्यति । यथा शुक्तिकायां रजताभावं पश्यति । तदुच्यते ब्रह्मैवार्पणमिति यथा 'यद्रजतं तच्छुक्तिकैव' इति ॥ गी. भा. ४–२४, पा. ७३.

[अत्र रजतस्याभाव एव शुक्तौ, तत्तत्वं तु शुक्तिरेवेति चोक्तम् ॥]

(3) **स पश्यन्नपि न पश्यति यथा तैमिरिकोऽनेकं चन्द्रम्, यथा वा अभ्रेषु धावत्सु चन्द्रं धावन्तम् .... ॥ गौ. भा. १८-१६, पा. २६३.**

(4) **न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति ॥ सू. भा. २-१-२७, पा. २१३.**

[अत्र तैमिरिकेन दृष्ट इवावभासमानोऽपि तत्कालेऽपि न विद्यते न जातुचिदप्यनेक इति चोक्तम् ॥]

(5) **तैमिरिकदृष्टस्य हि द्वितीयचन्द्रस्य नात्मलाभो नाशो वा अस्ति ॥ तै. भा. २-८, पा. ३१०.**

एकश्चन्द्रः सद्वितीयवत् । सू. भा. पा. २.

[तैमिरिकेण दृष्टवद् विकल्पितस्य द्वितीयचन्द्रस्य तेन रूपेण सत्त्वमेवात्र निषिध्यते । यो हि द्वितीयचन्द्रवद् विकल्प्यते, तस्य परमार्थचन्द्र एव तत्त्वम् इति चोक्तम् ॥]

(6) **यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रम्, तथा ग्रहणं ज्ञानमात्रमेव । विपरीतज्ञानव्यवधानापोहार्थत्वाज्ज्ञानस्य ॥ बृ. भा. १-४-७, पा. ६६६.**

[अत्र शुक्तिकैव रजतवदाभासत इति, रजताभासग्रहणकालेऽपि शुक्तिकैव गृह्यत इति, विपरीतज्ञानमात्रमपोह्यं ज्ञानेन न तु मिथ्यारजतम् इति चोक्तम् ॥]

(7) **यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते .... रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते ॥ छां. ६-२-३, पा. ५१०.**

[सर्पाभिधानबुद्धिव्यतिरेकेण सर्पो नाम रज्जौ नास्त्येवेत्युक्तं भवति ॥]

(8) **न हि मनोविकल्पनाया रज्जुसर्पादिलक्षणाया रज्ज्वां प्रलय उत्पत्तिर्वा । न च मनसि रज्जुसर्पस्य उत्पत्तिः प्रलयो वा । न चोभयतो वा ॥ गौ. का. भा. २-३२, पा. २०४.**

[सर्वथापि नास्ति रज्जुसर्पोत्पत्त्यादिकम्, मनोविकल्पनामात्रं तु तत् सर्वम् ॥]

उपर्युदाहृतवाक्यैः शुक्तिरज्ज्वादिरेव रजतसर्पादिविकल्पास्पदं तथा तथा भ्रान्त्या अवभासत इति भाष्यमतमित्यवगम्यते ॥

जीवभेदेऽविद्यादोषो निमित्तम् –

१३९. 'शुक्तिकोदाहरणेन संप्रयुक्तस्यानात्मा रजतम् इति दर्शितम्, निरञ्जनस्य चैतन्यस्य असदर्थेऽनिदमंशस्यानात्मा तदवभास्यत्वेन युष्मदर्थलक्षणापन्नोऽहङ्कारोऽध्यस्त इति प्रदर्शनार्थम् । द्विचन्द्रोदाहरणेन जीवेश्वरयोर्जीवानां च अनात्मरूपो भेदावभास इति दर्शितम्' (पं.पा. १४) इति टीका । तत्र कारणत्रितयजन्योऽध्यास इत्यङ्गीकारात् जीवे कथमग्रहणविपर्यासौ भवेताम् ? – इति शङ्का समुत्पद्यते । सा च इत्थं टीकायाम् उद्भाविता –

> (१) ननु बहिरर्थे कारणदोषः, अर्थगतः सादृश्यादिः, इन्द्रियगतश्च तिमिरादिरुपलभ्यते । तन्निमित्तश्च अर्थस्य सांशत्वादंशान्तरावग्रहेऽपि अंशान्तरप्रतिबन्धो युज्येत । न त्विह कारणान्तराधत्ता सिद्धिः, येन तद्दोषादनवभासोऽपि स्यात् । निरंशस्य चैतन्यस्य स्वयंज्योतिषस्तदयोगात् ॥ पं. १४.

कारणदोषः, अर्थगतदोषः, इन्द्रियदोषश्चेति दोषत्रितयापेक्षोऽध्यास इति पञ्चपादिकायाः पूर्वं केनापि नोपन्यस्तम् । वार्तिककारैस्तु –

> ननु सामान्यविज्ञानविशेषाज्ञानसंश्रयात् ।
> जातरूप्यस्मृतेर्लोके मिथ्याज्ञानं प्रसिध्यति ॥
> यत्राध्यासो यदध्यस्तं भेदसिद्धौ तयोर्द्वयोः ।
> ज्ञानं जगति संसिद्धं सा चैकात्म्येऽतिदुर्लभा ॥
>
> वा. १–४–४१५, ४१६.

इति चाक्षिप्य

> न नः परिहृतेनार्थश्चोद्येनानेन कश्चन ।
> प्रत्यक्षोहैकहेतुत्वात् सर्वानर्थमृषात्मतः ॥ वा. ४१८.

इति समाहितम् ॥

पञ्चपादिकायामपि जीवस्य ब्रह्मानतिरिक्तत्वं हेतूकृत्य पूर्वपक्षिणा अध्यास आक्षिप्तः । तद् यथा –

(२) ननु ब्रह्मस्वरूपमनवभासमानमस्त्येव । न । तदनवभासना-जीवेऽनवभासविपर्यासौ भवतः । न हि शुक्तेरग्रहणात् स्थाणौ अग्रहणं विपर्यासो वा । ननु न ब्रह्मणोऽन्यो जीवः, 'अनेन जीवेनात्मना' इति श्रुतेः । अतस्तदग्रहणमात्मन एव तत् । एवं तर्हि सुतरामविद्यायास्तत्रा-संभवः । तस्य विद्यात्मकत्वात् । 'तस्य भासा सर्वमिदं विभाति' इति तच्चैतन्येनैव सर्वस्य भासमानत्वात् ॥ पं १४.

अत्र परिहार इत्थमुपन्यस्तः –

(३) उच्यते । विद्यत एवात्रापि अग्रहणाविद्यात्मको दोषः प्रकाश-स्याच्छादकः । कथं गम्यते ? श्रुतेः, तदर्थापत्तेश्च । श्रुतिस्तावत् 'अनृतेन हि प्रत्यूढाः' (छां. ८-३-२), 'अनीशया शोचति मुह्यमानः' (मुं. ३-१-२) इत्येवमाद्या । तदर्थापत्तिरपि । विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते । तेन, अर्थादिदमवगम्यते जीवस्य ब्रह्मस्वरूप-तानवगमोऽविद्यात्मको बन्धो निसर्गत एवास्तीति । ननु न जीवो ब्रह्मणोऽन्य इत्युक्तम् । बाढम् । अत एवार्थात्, जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका अविद्या कल्प्यते । अन्यथा परमार्थतस्तत्स्वरूपत्वे तदबोधोऽपि यदि नित्यसिद्धः स्यात्, तदा तादात्म्योपदेशो व्यर्थः स्यात् । अतोऽनादिसिद्धा-विद्यावच्छिन्नानन्तजीवनिर्भासास्पदम् एकरसं ब्रह्म इति श्रुतिस्मृतिन्याय-कोविदैरभ्युपगन्तव्यम् । तथा च स्मृतिः 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।' इति क्षेत्रज्ञत्वनिमित्ताम् अनादिसिद्धाम् अविद्यां प्रकृतिशब्दे-नाह । 'मायां तु प्रकृतिं विद्यात्' इति श्रुतेः । अतो मायावच्छिन्नरूपत्वात्, अनन्यदपि ब्रह्मरूपम् आत्मनो न वेत्ति । तथा चोक्तम् –

> अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
> अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ (गौ. का. १-१६) इति ।

अत्र 'शोचति मुह्यमानः' (मुं.) इति श्रुतिस्तावद् यथाप्रसिद्ध-जीवेश्वरभेदमनूद्य परमात्मदर्शनात् तस्य शोकनाशं वक्तुं प्रवृत्ता, 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' (मुं. ३-१-२) इति वाक्यशेषात् । 'अनृतेन हि प्रत्यूढाः' (छां. ८-३-२) इत्यपि यथाप्रसिद्धानां जीवानामहरहः सुषुप्तकाले ब्रह्मणा संपद्यमानानामपि न तत्प्रातिज्ञानं भवति । मिथ्याज्ञाननिमित्तकामकर्मवशगत्वात्तेषामिति ग्रन्थ-

संदर्भतोऽवगम्यते । अतो यद्यपि जीवभावस्य व्यवहारदशायामविद्या-कामकर्मपरवशत्वमनूद्य एवैवञ्जातीयकश्रुतिवचनैः, तथापि कथं तैरध्यास-प्रयोजकः 'अग्रहणाविद्यात्मको दोषः प्रकाशस्याच्छादकः' समुपनीयत इति तु न निश्चीयते । जीवस्य ब्रह्मस्वरूपतानवगमोऽविद्यात्मको बन्धो निसर्गत एवास्तीति मोक्षाय ब्रह्मविद्यामुपदिशन्तीभिः श्रुतिभिर्विज्ञाप्यत इति यत् सत्यम्, तथापि तु तादृशाविद्याबन्धो यथाभाष्योक्तो नैसर्गिकाध्यास एव कुतो न स्यादिति टीकायां न स्पष्टीकृतम् । तथा हि न्यायोपबृंहितं भाष्यम् –

(1) एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थहेतोः प्रहाणाय आत्मैकत्व-विद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इति ॥

सू. भा., अध्यासभाष्योपसंहारः ॥

एवं टीकाव्याख्यातद्विचन्द्रोदाहरणनयेनैव जीवेश्वरयोः, जीवानां च भेदो नैसर्गिकाध्यासलक्षणाविद्ययैव वस्तुस्वरूपाविवेकनिबन्धिन्या प्रत्युप-स्थापयितुमलमिति कस्मान्नास्थेयमित्यपि टीकातो न स्पष्टम् । अत्रापि हि भाष्यवाक्यमुदाहर्तुं शक्यते –

(2) सर्वज्ञस्येश्वरस्य आत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्य-त्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य माया, शक्तिः, प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते । ताभ्यामन्यः सर्वज्ञ ईश्वरः 'आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म' (छां. ८-१४-१) इति श्रुतेः ॥ सू. भा. २-१-१४, पा. २०१.

[अत्राविद्याकल्पिते नामरूपे माया प्रकृतिः-इत्युक्तत्वात् मायाशब्दिता प्रकृतिः, तत्कल्पकाध्यासरूपाविद्यातोऽन्येत्युक्ते भवति ॥]

एतेन 'प्रकृतिं पुरुषं चैव' (गी.) इति स्मृतिः, 'मायां तु प्रकृतिं विद्यात्' इति श्रुतिश्च व्याख्याता । प्रकृतिशब्दवाच्याया मायाया अविद्याकल्पितनामरूपबीजत्वेनैव स्वीकृतत्वाद् भाष्ये, मायाशब्दस्य टीका-

संमतानादिसिद्धाविद्याशक्तिवाचकत्वे प्रमाणाभावात् । अविद्याकल्पितत्वे-नाविद्याशब्दव्यपदेश्यत्वस्वीकारे तु, कल्पकाविद्यैवाच्छादिका विक्षेपिका च, न तु नामरूपलक्षणा गौणी – इत्यभ्युपगन्तव्यत्वात् । 'न चानादि-मायया सुप्तः' (गौ. का.) इत्यभियुक्तोक्तिस्तत्र प्रमाण भवितुमर्हति । कारिकासु क्वचिदध्यग्रहणान्यथाग्रहणव्यतिरिक्ताविद्याशक्तेरनङ्गीकृतत्वात् । भाष्ये च प्रकृतकारिकाया 'उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मना, अन्यथाग्रहणलक्षणेन च, अनादिकालप्रवृत्तेन मायालक्षणेन .... स्वप्नान् स्वानद्वयेऽपि पश्यन् सुप्तः' इत्यन्यथैव व्याख्यातत्वाच्च ॥

(3) एवम् अविद्याकृतनामरूपोपाध्यनुरोधी ईश्वरो भवति । व्योमेव घटकरकाद्युपाध्यनुरोधि । स च स्वात्मभूतानेव घटाकाशस्थानीयान् अविद्या-प्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान् विज्ञा-नात्मनः प्रति ईष्टे व्यवहारविषये ॥ सू. भा. २-१-१४, पा. २०१.

[नामरूपमायोपाधिरीश्वरः, कार्यकरणसंघातोपाधयो जीवाः – इत्युक्तेः, अविद्याकल्पितोपाधिभेदाद् भेद इत्युक्तं भवति ॥]

अध्यासव्यवहारयोरैक्यम् –

१४०. 'अध्यस्य', 'मिथुनीकृत्य'–इति च क्त्वाप्रत्ययो न पूर्वकालिकत्वम् अन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तो भाष्ये–इति टीकाकारमतं प्रागेवोदाहृतम् (खं. १३२) । अध्यस्य नैसर्गिकोऽयं लोक-व्यवहारः – इति स्वरूपमात्रे पर्यवसानमिदम्, उपसंहारे च 'एवमय-मनादिरनन्तो नैसर्गिकोऽध्यासः' – इति तावन्मात्रोपसंहारादेवमव-सीयते–इति मन्यन्त एते ग्रन्थकाराः । अत एव ते 'लोकव्यवहारः' इति भाष्यस्थं पदम् एवं विगृह्य व्याचख्युः –

(१) लोक इति 'मनुष्योऽहम्' इत्यभिमन्यमानः प्राणिनिकाय उच्यते । व्यवहरणं व्यवहारः ; लोक इति व्यवहारो लोकव्यवहारः । मनुष्योऽहमित्यभिमानः इत्यर्थः ॥ प. ४.

'सत्यानृते मिथुनीकृत्य' इति भाष्यं चैवं व्याचक्षते स –

(२) सत्यम् अनिर्द्वैतन्यम् । अनृतं युष्मदर्थः । स्वरूपतोऽप्यध्यस्तरूपत्वात् ॥ पं. ४.

अत्र कृत्स्नभाष्यपरिशीलनतोऽयं भगवत्पादाभिप्राय इति नः प्रतिभाति – 'इतरेतराविवेकेन धर्मधर्मिणोरत्यन्तविविक्तयोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः' इतीदं भाष्यम् आत्मानात्मनोर्धर्मिणोः, तद्धर्मयोश्च चिन्मात्रत्वाचेतनत्वयोः तमःप्रकाशवद् विरुद्धस्वभावत्वाद् वस्तुत एव नित्यदा विविक्तत्वमाह । अथ च लोको निसर्गत एवाविचारस्वभावेन तौ न विविनक्ति, तदविवेकाच्च तयोर्धर्मधर्मिणोरन्योन्यात्मकताम् अन्योन्यधर्मतां चाध्यस्य सत्यानृतमिथुनीकरणपूर्वकम् 'अहमिदं ममेदमिति' व्यवहरतीति च । तत्र सत्यत्वप्रयोजकं तु अव्यभिचरद्रूपत्वम्, अनृतत्वप्रयोजकं च व्यभिचरद्रूपत्वम् – इति भाष्यान्तराद्वगम्यते –

(१) यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्, यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरति (तत्) अनृतमित्युच्यते । अतो विकारोऽनृतम् ॥ तै. भा. २-१, पा. २८३.

(२) यद्विषया बुद्धिर्न व्यभिचरति तत् सत्, यद्विषया व्यभिचरति तदसत् – इति सदसद्विभागे बुद्धितन्त्रे स्थिते, सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते सामानाधिकरण्येन नीलोत्पलवत् 'सन् पटः', 'सन् हस्ती' इत्येवं सर्वत्र । तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति । तथा च दर्शितम् । न तु सद्बुद्धिः ॥ गी. भा. २-१६, पा. १४.

[अत्राव्यभिचरद्बुद्धिविषयत्वं सत्यत्वम्, व्यभिचरद्बुद्धिविषयत्वमनृतत्वमित्युक्तम् । बुद्धिश्चात्र निश्चिततद्रूपविषया सार्वजनीना विवक्षिता ॥]

एवं चात्मनः सत्यत्वम् अव्यभिचरद्बुद्धिगम्यत्वात्, अनात्मनश्च अनृतत्वं व्यभिचरद्बुद्धिगोचरत्वात् – इत्यनयोर्विरुद्धस्वभावत्वादत्यन्तविविक्तता, यथैव तयोर्विविक्तता विषयित्वविषयत्वलक्षणविरुद्धस्वभाव-

प्रयुक्ता – इत्युक्तं भवति भाष्ये। टीकायां तु 'अनृतं युष्मदर्थः। स्वरूपतोऽप्यध्यस्तत्वात्' इति केनाधारेणोक्तमिति न विज्ञायते॥

अपि च स्वरूपतोऽप्यध्यस्तत्वम् अनृतत्वप्रयोजकत्वेनोच्यमानम् परस्पराश्रयदोषमप्यावहतीति भाति। स्वरूपतोऽध्यासनिश्चये सत्यनृतत्व-निश्चयः, अनृतत्वनिश्चये सत्येव तु सत्यानृतमिथुनीकरणलक्षणाध्यासनिश्चय इति। न चात्मनोऽप्यनात्मवत् स्वरूपतोऽध्यस्तत्वे सिद्धान्तिनः किञ्चि-च्छिद्यते। यत्सत्यमध्यस्तस्य तद्रूपेणासत्यत्वम् अवश्यंभावीति, तथापि न तावता यथावस्थितेन स्वेनापि रूपेणानृतत्वं तस्य नियोगतः प्राप्नोति। न हि लोके शुक्तिरजतयोः परस्परसंनिहितयोः शुक्तिकायामध्यस्तस्यापि रजतस्य स्वेन शुक्तिनिरपेक्षरजतरूपेणाप्यनृतत्वं तावता प्राप्नोतीति। एवमहङ्कारादावध्यस्तस्यात्मनः समारोपितरूपेणानृतत्वेऽपि स्वेनान्यनिरपेक्षेण कूटस्थचिद्रूपेण सत्यत्वं निराबाधं भवतीत्यनवद्यम्। अत एव ह्युपसंहार-भाष्ये निःशङ्कमुच्यते –

> (३) 'एवम् अहंप्रत्ययिनम् अशेषस्वप्रचारसाक्षिणि प्रत्यगात्म-न्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेण अन्तःकरणादिष्व-ध्यस्यति' इति॥ अध्यासभाष्यम् पा. ४.

अत्रात्मनि सर्वसाक्षिणि अहंप्रत्ययित्वमध्यस्यते, अहंप्रत्ययिणि च सर्वसाक्षित्वमध्यस्यते, न चैतावता अहंप्रत्ययिनस्तथ्यत एव सर्वसाक्षित्वं सत्यत्वं वा सर्वसाक्षिण आत्मनोऽहंप्रत्ययित्वम् अनृतत्वं वा प्रादुःष्यात्। उक्तं हि भाष्ये एव –

> (४) तत्रैवं सति यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वा अणु-मात्रेणापि स न संबध्यते॥ सू. भा. पा. २.

इति। यच्चोच्यते लोकव्यवहारो नाम मनुष्यात्मताभिमान एवाध्यासानन्य-लक्षणः। 'नैसर्गिकोऽध्यास' इति तावन्मात्रोपसंहारात् – इति। तत्राप्येवं

प्रतिभाति नः – उपक्रमे, मध्ये, उपसंहारे च सममेवाध्यासस्य व्यवहार-प्रयोजकत्वमुच्यते भाष्ये । तद् यथा –

(१) 'अध्यस्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः ॥'

इत्युपक्रमे प्रतिज्ञा ॥

(२) अविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि ॥

इति मध्ये परामर्शः ॥

(३) 'नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' –

इत्युपसंहारे यद्यपि व्यवहारशब्दो नोपात्तः, तथापि कर्तृत्वभोक्तृत्व-व्यवहारप्रवर्तकत्वमध्यासस्योक्तमेवेति न दोषः ॥

मिथ्याबुद्धिलक्षणाध्यासाभिन्नाविद्यायाः सर्वव्यवहारप्रयोजकत्वं ब्रुवन्ति विद्वन्ते परःशतं भाष्यवचनानि । तत्र कतिचिदेवेहोदाहरिष्यामः–

(१) पश्वादीनां च प्रसिद्धोऽविवेकपुरःसरः प्रत्यक्षादिव्यवहारः ॥ सू. भा. पा. ३.

[अविवेकनिबन्धनाध्यासपुरःसरो व्यवहार इत्यर्थः ॥]

(२) तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः, सर्वो व्यवहारः ॥ सू. भा. १-१-१२, पा. ३५.

(३) तथा च श्रुतिः 'यत्र वा अन्यदिव स्यात् तत्रान्योऽन्यत् पश्येत्' इत्यादिना स्वप्नदृष्टहस्त्यादिव्यवहारवदविद्याविषय एव कर्तृत्वादि-व्यवहारं दर्शयति 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्' (बृ. ४-५-१५) इत्यादिना च विवेकिनः कर्तृत्वादिव्यवहाराभावं दर्शयति ॥ सू. भा. १-२-१२, पा. ७४.

(४) अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्या-मिणोर्भेदव्यपदेशो न पारमार्थिकः । .... ततश्च ज्ञातृज्ञेयादिभेदश्रुतयः,

प्रत्यक्षादीनि च प्रमाणानि, संसारानुभवः, विधिप्रतिषेधशास्त्रं च – इति सर्वमेतदुपपद्यते। तथा च श्रुतिः 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति' इत्यविद्याविषये सर्वं व्यवहारं दर्शयति। 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इति विद्याविषये सर्वं व्यवहारं वारयति॥

सू. भा. १-२-२०, पा. ८१.

(५) अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः संततो वर्तते॥

सू. भा. १-४ ३, पा. १४९.

(६) अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वम् अवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते, रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनाम्। बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति॥ सू. भा. २-१-१४, पा. १९७.

[स्वाभाविको व्यवहारः – नैतर्गिकाध्यासकृतः। देहेन्द्रियादिष्वहंममाभिमानात्मकत्वाद्ध्यासस्य॥]

(७) न चेयमवगतिरनर्थिका, भ्रान्तिर्वा – इति शक्यं वक्तुम्। अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च। प्राक्चात्मैकत्वावगतेः, अव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्थमेवाचाम॥

सू. भा. २-१-१४, पा. २००.

(८) तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्षमेव ईश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च। न परमार्थतो विद्ययापास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते॥

सू. भा. २-१-१४, पा. २०१.

(९) अपि च यदा 'तत्त्वमसि' इत्येवञ्जातीयकेन अभेदनिर्देशेन अभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वम्, ब्रह्मणश्च स्रष्टृत्वम्। समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात्॥ सू. भा. २-१-२३, पा. २०९.

(१०) न चेयं परमार्थविषया सृष्टिश्रुतिः। अविद्याकल्पितनामरूपव्यवहारगोचरत्वात्॥ सू. भा. २-१-३४, पा. २१७.

११) योऽयं लौकिको वैदिकश्च व्यवहारः, स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य, अविद्याकार्यत्वात् अविद्यानिवृत्तौ निवर्तते। अविद्यायाश्च विद्याविरोधान्निवृत्तिः॥ गी. भा. २-६९, पा. ३८.

तदेवम्, आत्मानात्मनोः सत्यानृतत्वं अव्यभिचरद्व्यभिचरद्बुद्धिगोचरत्वात्, सत्यानृतमिथुनीकरणं च तयोरितरेतरतादात्म्यताद्धर्म्यबुद्धिलक्षणा नैसर्गिकी भ्रान्तिः, अध्यासलक्षणाविद्या। लोकव्यवहारस्तु जनानां नैसर्गिकाविद्याप्रयुक्तः सर्वविधप्रमाणप्रमेयबुद्धिः, तत्कृता कर्तृत्वभोक्तृत्वबुद्धिः, तत्प्रयुक्तः सर्वविधशब्दप्रयोगः, तदनुरूपप्रवृत्तिनिवृत्ती चेति भाष्याभिप्रायोऽवसीयते । टीकायां तु, अध्यासमिथुनीकरणव्यवहाराः पर्यायशब्दत्वेन स्वीकृताः, लोकव्यवहारशब्दश्च बुद्धिव्यपदेशप्रवृत्तिरूपसामान्यार्थवाचकत्वात् प्रत्यग्व्य मनुष्योऽहमिति बुद्धिमात्रे संकोचित इति तत्र प्रस्थानवैलक्षण्यमिति स्फुटम् ॥

अहमध्यासः –

१४१. 'अहमिदं ममेदम् इति नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यम् । तत्राहमध्यासं प्रकृत्य टीकायां प्रकटितमभिप्रायं परिशीलयितुं कतिचिद् वाक्यानि ततः समुद्ध्रियन्ते –

(१) 'अहमिदं', 'ममेदम्' – इत्यध्यासस्य स्वरूपं दर्शयति । अहमिति तावत् प्रथमोऽध्यासः । ननु 'अहम्' इति निरंशं चैतन्यमात्रं प्रतिभासते. नांशान्तरमध्यस्तम् अनध्यस्तं वा । यथा अध्यस्तांशान्तरभावः, तथा दर्शयिष्यामः ॥ पं. ५.

(२) यदैवाहङ्कर्ता अध्यासात्मकः, तदैव तदुपकरणस्यापि तदात्मकत्वसिद्धिः । न हि स्वप्नावास्थाराज्याभिषेकस्य, माहेन्द्रजालनिर्मितस्य वा राज्ञो राजोपकरणं परमार्थसद् भवति । एवम् अहङ्कर्तृत्वप्रमुखः क्रियाकारकफलात्मको लोकव्यवहारः, अध्यस्तो नित्यशुद्धबुद्धमुक्तस्वभावे आत्मनि ॥ पं. ५.

['एवमहंप्रत्ययिनम् अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य' इति भाष्यानुरूपमेवेदमुक्तम् अहङ्कर्तृत्वमात्मन्यध्यस्तमिति सर्वसंप्रतिपन्नमेवैतत् ॥]

(३) यद्यपि देहादिव्यतिरिक्तभोक्तृविषय एवायमहङ्कारः । तथापि तथा अनध्यवसायात्, तद्धर्मान् – आत्मन्यध्यस्यति । दृश्यते च स्वरूपे-

णावभासमानेऽपि वस्त्वन्तरसेद्दानध्यवसायात् तत्संभेदेनावभासः । यथा, एकस्मिन्नप्यकारे ह्रस्वादिसंभेदः ॥ पं. १५.

(४) बाढम्, इन्द्रजालमेवैतत्, अविद्याकृतत्वात् । तथा हि अहंप्रत्ययस्य स्वविषयप्रतिष्ठितस्यैव सतः, तदेकप्रतिष्ठिताप्रतिबन्धकृदनाद्यविद्याकृतं देहादिप्रतिष्ठितत्वमपि दृष्टम् । अतो देहादिविषयत्वाविरोधिस्वविषयप्रतिष्ठत्वम् अहंप्रत्ययस्य । अतो युक्त्या विषयविवेचनेऽपि स्वविषयोपदर्शनेन तत्प्रतिष्ठत्वमात्रं कृतम्, नाधिकमादर्शितम् । स्वविषयप्रतिष्ठत्वं च देहादिष्वहंममाभिमानेन न विरुध्यते इत्युक्तम् । अतो न्यायतो विषयविवेचनादूर्ध्वमपि न प्रागवस्थातो विशिष्यते अहंप्रत्ययः । तेन न कदाचिदपि मनुष्योऽहमिति प्रत्ययो गौणः ॥ पं १६.

अत्र 'देहादिव्यतिरिक्तविषय एवाहङ्कारः' इत्यत्र तत्प्रतिष्ठितस्यैव देहादिप्रतिष्ठितत्वम् अनाद्यविद्याकृतम् – इत्यत्र च उभयत्रापि लोकैरहंप्रत्ययः क्रियते परस्पराध्यासात् इत्यभिप्रायश्चेत् तद् भाष्यसंमतमेव । भोक्तर्येवाज्ञसः प्रत्यय इति चेदभिनिवेशः, तन्न भाष्यसंमतमिति भाति । यतः —

(१) इदं हि कर्तृत्वं भोक्तृत्वं च सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते । परमार्थतस्तु नान्यतरस्यापि संभवति ॥

सू. भा. १-२-१२, पा. ७४.

(२) देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादौ अभिमानो गौणः, न मिथ्या – इति चेत् । न । प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः । ....यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायाम् अकस्माद् रजतमिति निश्चितौ शब्दप्रत्ययौ, तद्वद् देहादिसंघाते 'अहम्' इति निरुपचारेण शब्दप्रत्ययौ आत्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम् ? आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिव अविविक्तौ शब्दप्रत्ययौ भवतः । तस्माद् देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादौ अहंप्रत्ययो मिथ्यैव न गौणः ॥

सू. भा. १-१-४, पा. २२.

(३) सत्यं प्रसिद्धौ देहात्मानौ, न तु स्थाणुपुरुषाविव विविक्तप्रत्ययविषयतया सर्वलोकप्रसिद्धौ, कथं तर्हि ? नित्यमेव निरन्तराविविक्त-

प्रत्ययविषयतया । न हि 'अयं देहः', 'अयम् आत्मा' इति विविक्ताभ्यां प्रत्ययाभ्यां देहात्मानौ गृह्णाति यः कश्चित् । अत एव हि मोमुह्यते लोकः, आत्मानात्मविषये 'एवमात्मा', 'नैवमात्मा' इति ॥

उप. गद्य. २-५४. पा. ६०.

एतेषां वाक्यानामर्थस्य समालोचनात् विषयविवेचनादूर्ध्वमपि भोक्तृविषय एव सन् अहंप्रत्ययो देहादावपि भासते – इत्येतत् भाष्यानुगुणम् इति वक्तव्यं भवति । देहादिसंहतस्यैव ह्यविद्यागृहीतस्यात्मनो भोक्तृत्वमुक्तं समन्वयाधिकरणभाष्ये 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इति श्रुत्यनुसारेणेति । देहादिव्यतिरिक्तात्मनः सत्तां श्रद्धामात्रेण विश्वस्य तत्राहंप्रत्ययविषयत्वं निश्चितवतोऽपि लोकस्य देहादौ यथापूर्वं निरुपचरितमहंप्रत्ययो भवतीत्येतावत्यंशे तु न विसंवादः ॥

अहङ्काराध्यासे स्वाभिमतलक्षणसमन्वयश्चेत्थं टीकायां दर्शितः –

(१) तदेवं स्वयंज्योतिष एव सतो जीवस्य कार्यकरणसंघातव्यतिरिक्ततायाः, तथानवभासदर्शनात्, 'मनुष्योऽहम्' इति चाध्यासोपलब्धेः, ब्रह्मात्मैकत्वस्यापि तत्स्वरूपस्यानवभासनं पूर्वकालकोटिरहितप्रकाशाच्छादितमोनिमित्तं श्रुतितदर्थापत्तिसमर्पितं तन्निमित्ताहङ्काराध्यासश्च संभाव्यते । अनादित्वाच्च पूर्वदृष्टत्वं स्मृतिरूपत्वं च । पृथग्भोक्तृविषयानुभवफलाभावाद्, भोक्तृचैतन्यसंवलितैकानुभवफलत्वाच्च परत्र परावभासस्यान्योन्यसंमेदस्य विद्यमानत्वात्, अध्यासलक्षणव्याप्तिरिहाप्युपपद्यते ॥ पं. १६, १७.

अत्राहङ्कारो न भवति परमार्थत आत्मनो धर्मः, ज्ञेयस्थत्वात् मनुष्यत्वादिवत् – इति संभावनायुक्तिर्भाष्यानुगुणैव । तया चाहङ्कारस्याविद्याध्यारोपितत्वमवश्यमायाति ॥

(१) तथा देहधर्मान् स्थूलोऽहम्, कृशोऽहम्, गौरोऽहम्, तिष्ठामि, गच्छामि, लङ्घयामि चेति । तथेन्द्रियधर्मान् ... एवम् अहंप्रत्ययिनम् अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य .... ॥ अध्यासभाष्यम् ।

(२) (सुखदुःखमोहेच्छादयो ज्ञातुः) न भवन्तीत्यस्यनुमानम् । अविद्याध्यारोपितत्वात्, जरादिवदिति; हेयत्वात्, उपादेयत्वाच्च इत्यादि ।

तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्यया अध्यारोपित इति न तेन ज्ञातुः किञ्चित् दुष्यति ॥

गी. भा. १३-२, पा. १९१

इत्याद्युदाहरणोपलम्भाद् भाष्ये । ब्रह्मात्मैकत्वस्यापि तत्स्वरूपस्यानवभासनं 'पूर्वकालकोटिरहितप्रकाशाच्छादितमोनिमित्तम्, श्रुतितदर्थापत्तिसमर्पितम्' इति तु पूर्वमेव समालोचितम् (खं. १३३, पा. २८०) इति न तत्र वक्तव्यमवशिष्यते ॥

आत्मनोऽस्मत्प्रत्ययविषयत्वम् –

१४२. 'कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्? सर्वो हि पुरोऽवस्थिते विषये विषयान्तरम् अध्यस्यति। युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि।' इत्याक्षिप्य **'उच्यते – न तावदयमेकान्तेनाविषयः। अस्मत्प्रत्ययविषयत्वात्'** इति समाधानं भाष्ये लिखितम्। तत्र टीकायां व्याख्यानम् –

(१) अस्मत्प्रत्ययस्वाभिमतोऽहङ्कारः। स च इदमनिदंरूपवस्तुगर्भः॥ पं. १७.

(२) अद्यापि चैतन्यैकरसोऽनिदमात्मकत्वादविषयः। तथापि अहङ्कारे व्यवहारयोग्यो भवतीति गौण्या वृत्त्या अस्मत्प्रत्ययविषयतोच्यते। प्रमेयस्य व्यवहारयोग्यत्वाव्यभिचारात्। ननु व्यवहारयोग्यत्वेऽध्यासः, अध्यासपरिनिष्पन्नाहंप्रत्ययबलाद् व्यवहारयोग्यत्वम् इति प्राप्तम् इतरेतराश्रयत्वम्। न। अनादित्वेन प्रत्युक्तत्वात्॥ पं. २४.

[इहाप्यहङ्कृतसंस्कारयोर्बीजाङ्कुरयोरिवानादिः कार्यकारणभावस्य वक्ष्यमाणत्वात् संस्कारो विभ्रमहेतुर्विद्यते इत्यर्थः॥]

(३) तदेवम् अहङ्कारग्रन्थिरस्मच्छब्दसंज्ञितः। प्रत्ययश्चासौ। आदर्श इव प्रतिबिम्बस्य, अनिदञ्चित्संवलितत्वेन तस्याभिव्यक्तिहेतुत्वात्। अतस्तस्य विषयवद् भवतीति उपचारेण अनिदञ्चिदात्मधातुः 'अस्मत्प्रत्ययविषय' उच्यते॥ पं २९.

अत्र 'कथमविषये विषयतद्धर्माध्यासः ?' इत्याक्षिप्ते भाष्योक्तं समाधानम् – 'नायमेकान्तेनाविषयः । अस्मत्प्रत्ययविषयत्वात्' इति । एवं चात्रात्मनि विषयत्वमेवाङ्गीकृतमुपपादयितव्यम् इति स्पष्टम् । टीकायां तु अस्मत्प्रत्यय इवास्मत्प्रत्यय इत्यहङ्कारे गौणं प्रत्ययत्वमुक्तम् अभिव्यक्तिहेतुत्वेन ; एवं विषयत्वमपि गौणमेव, गुणसाम्यं च व्यवहारयोग्यत्वमित्युक्तम् । तथा च सर्वथापि आत्मनोऽस्मत्प्रत्ययविषयत्वं मुख्यं नास्त्येवेति कथमिदमाक्षेप्तुः समाधानायावकल्पेतेति न विद्मः ॥

किञ्च युष्मदस्मत्प्रत्ययगोचरयोर्विरुद्धस्वभावत्वात् इतरेतरभावानुपपत्तेः, तयोरध्यासो न संभवतीति प्रथमत आक्षिप्तं पूर्वपक्षिणा । तथापि नैसर्गिकोऽध्यासपुरःसरो लोकव्यवहारो दृश्यते -- इत्येव तु सिद्धान्तिना सार्वत्रिकानुभवमालम्ब्य समाहितम्, 'न हि दृष्टेऽनुपपन्नं नाम' इति न्यायेन । न पुनरस्मत्प्रत्ययगोचरत्वं नास्त्येवेति पूर्वपक्षप्रत्यास्थानं कृतम् । अध्यासो नामातस्मिंस्तद्बुद्धिः । स च विषये विषयान्तराध्यारोपणरूप एव प्रसिद्धः । प्रत्यगात्मनस्तु विषयत्वं नास्ति । युष्मत्प्रत्ययगोचरत्वाभावात् । तत्कथमिहाध्यासः ? – इत्याक्षेप्ता पुनः प्रत्यवस्थितः । तत इदं समाधानमुक्तं 'नायमेकान्तेनाविषय' इति । तत् कथमिह गौणप्रत्ययगौणविषयत्वाभ्यां प्रतिवादी समाधीयेत ? न हि शस्त्रास्त्रसंपन्नसेनासमेतः शत्रुः चित्रार्पितशस्त्रास्त्रादियुक्तभटैर्विद्रावणीयः स्यादिति ॥

अस्मत्प्रत्यये गौणे व्यवहारयोग्यत्वमेव विषयत्वमित्यङ्गीकृत्यापि, अत्र टीकायां दोषान्तरं दुर्वारणं भाति । कथम् ? अहङ्कारे व्यवहारयोग्यत्वमनु तस्मिन् अध्यासः, अध्यासमनु च व्यवहारयोग्यत्वमित्यन्योन्याश्रयदोष आपादिते, बीजाङ्कुरवदनादित्वाददोष इति समाधानमयुक्तम् । बीजाङ्कुरवद् योग्यत्वाध्यासयोरपि कालाश्रयत्वप्रसङ्गात्, कालस्यानध्यस्तत्वापातादिति ॥

अतो नेदं सम्यग् भाष्यव्याख्यानम् । अस्मत्प्रत्ययविषयत्वमप्यस्ति, अध्यासोऽप्यस्ति । अतो न विरोधः, विषये विषयान्तराध्यासस्य प्रतिवादिनाप्यभ्युपगमात् । तादृशविषयत्वं त्वाध्यासिकम् । न चान्योन्याश्रयदोषः, कालाश्रयत्वं वा अध्यासस्य । अध्यासदृष्ट्या आत्मनोऽस्मत्प्रत्ययगोचरत्वविषयतद्धर्माध्यासास्पदत्वयोर्युगपदेव स्वाग्नेयेनुतद्वत्स्वयोरिवोपलम्भात्, परमार्थदृष्ट्या अद्वितीयपरमात्मन एव सत्त्वाच्च—इति भाष्यवाक्यस्य सुव्याख्यानत्वादिति वयं पश्यामः ॥

अहमुल्लेखः –

१४३. अहमित्यनुभवः किंस्वरूपः ? – इत्येतद्विमर्शनप्रकरणे टीकायां द्वे पक्षान्तरे पूर्वपक्षतया उपक्षिप्ते –

(१) प्रमेयं कर्मत्वेनापरोक्षम् । प्रमातृप्रमिती पुनरपरोक्षे एव केवलम्, न कर्मतया । प्रमितिरनुभवः स्वयंप्रकाशः प्रमाणफलम् । तद्बलेन इतरत् प्रकाशते । प्रमाणं तु प्रमातृव्यापारः, फललिङ्गो नित्यानुमेयः । तत्र 'अहमिदं जानामि' इति प्रमातुर्ज्ञानव्यापारः कर्मविषयो नात्मविषयः । आत्मा तु विषयानुभवादेव निमित्तात् अहमिति फले विषये चानुसंधीयते ॥ पं. १७.

इति प्राभाकरः पक्षः ॥

(२) ननु नायं विषयानुभवनिमित्तोऽहमुल्लेखः, किं त्वन्य एवात्ममात्रविषयः, 'अहम्' इति प्रत्ययः । तस्मिंश्च द्रव्यस्वरूपत्वेन आत्मनः प्रमेयत्वं ज्ञातृत्वेन प्रमातृत्वम् इति प्रमातृप्रमेयनिर्भासरूपत्वात् अहंप्रत्ययस्य ग्राह्यग्राहकरूपः आत्मा । तस्मादिदमनिर्देश्यरूपः, प्रमेयांशस्य इदंरूपत्वात् । अनिर्देश्यरूपत्वात् प्रमात्रंशस्य ॥ पं. १७–१८.

इत्ययमपरः पक्षो भाट्टानाम् ॥

[अयं प्राभाकरैरित्थं खण्डितः । नैतद्युक्तम् – अनंशत्वात्, अपरिणामित्वाच्चात्मनः । प्रमेयस्य चेदंरूपतया पराग्रूपत्वात्, अनात्मत्वात् । तस्मात्, नीलादिज्ञानफलम् अनुभवः, स्वयं प्रकाशमानो ग्राह्यमिदंतया, ग्राहकं चानिदंतया अवभासयति, ग्रहणं चानुमापयतीति ॥]

तदिदं पक्षद्वयं निरस्य स्वपक्ष इत्थमुपन्यस्तष्टीकायाम् –

(१) चित्स्वभाव एवात्मा तेन तेन प्रमेयभेदेनोपधीयमानः, अनुभवाभिधानीयकं लभते । अविवक्षितोपाधिरात्मःदिशब्दैरभिधीयते । अवधीरितवनःभिधाननिमित्तैकदेशावस्थाना इव वृक्षा वृक्षादिशब्दैः – इत्यभ्युपगन्तव्यम् ॥ पं १९

(२) तदेवं नायं नीलादिप्रत्ययात् अन्य एवात्मविषयोऽहंप्रत्ययः, नापि विषयानुभवादेवाहमुल्लेखः । .... येयम् श्रुतिस्मृतीतिहासपुराणेषु.... बहुधा गीयते .... सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिरनादिरविद्या' तस्याः परमेश्वराधिष्ठितत्वलब्धपरिणामविशेषो विज्ञानक्रियाशक्तिद्वयाश्रयः कर्तृत्वभोक्तृत्वैकाधारः कूटस्थचैतन्यसंवलनसंजातज्योतिः स्वयंप्रकाशमानोऽपरोक्षोऽहङ्कारः, यत्संभेदात् कूटस्थचैतन्योऽनिदमंश आत्मधातुरपि मिथ्यैव भोक्तेति प्रसिद्धिमुपगतः ..... । स च परिणामविशेषोऽनिदञ्चिदात्मनो बुद्ध्या निष्कृष्य वेदान्तवादिभिः अन्तःकरणम्, मनः, बुद्धिः, अहंप्रत्ययी–इति च विज्ञानशक्तिविशेषमाश्रित्य व्यपदिश्यते, परिस्पन्दशक्त्या च प्राण इति । तेनान्तःकरणोपरागनिमित्तं मिथ्यैव, अहंकर्तृत्वमात्मनः स्फटिकमणेरिव उपधाननिमित्तो लोहितिमा ॥ पं. २०.

अत्र टीकायां यदुच्यते पदे पदे अहंकारस्य चित्स्वरूपसत्तामात्रानुबन्ध्यविद्यापरिणामत्वम् (पं. ५, १४, २०) न तद्भाष्ये कुत्रापि दृश्यत इत्युक्तमेव । प्रकृते अहमित्यनुभवः कथं जायते ? किं ग्राह्यग्राहकरूप एवात्मा अहंप्रत्ययविषयः, अथवा विषयानुभवादेव अहमित्यनुसंधीयते, उतान्य एवाहमुल्लेखस्य हेतु ?–इति विचार्यमाणे न केवलमविद्यापरिणामविशेषत्वप्रतिज्ञामात्रात् जिज्ञासापरिसमाप्तिर्भवेत् इति स्पष्टमेव । भाष्ये तु अहंप्रत्ययो यद्यपि जायमानः प्रत्ययविशेष एवेति स्पष्टमुक्तम् – न तु टीकायामिव अहङ्कार एव गौण्या वृत्त्या अस्मत्प्रत्ययशब्दित इति–तथापि किंनिमित्तं कथं वा अहंप्रत्ययजन्म ? – इत्येतत् स्पष्टतया व्याख्यातं नोपलभ्यते । अहं कर्ता एव त्वविद्याकल्पितो जीवः कर्ता भोक्ता च,

1. १३२ खण्डे एष वाक्यभागः पूर्णतया लिखितः ॥]

तद्व्यतिरिक्त एव तु साक्षी यस्मिन्निदं कर्तृत्वं भोक्तृत्वं चाध्यस्तमविद्ययेत्येतावत्तुक्तं दृश्यते । तत्रैतानि भाष्यवाक्यान्यनुसंधेयानि –

(१) वैनाशिकास्तु अहमिति प्रत्यये जायमानेऽपि देहान्तरव्यतिरिक्तस्य नास्तित्वमेव प्रतिजानते .... आगमेन त्वात्मास्तित्वेऽवगते वेदप्रदर्शितलौकिकलिङ्गविशेषैश्च तदनुसारिणो मीमांसकाः तार्किकाश्च अहंप्रत्ययलिङ्गानि च वैदिकान्येव स्वमतिप्रभवाणीति कल्पयन्तो वदन्ति 'प्रत्यक्षश्चानुमेयश्चात्मा' इति ॥ बृ. भा. पा. ६०८.

[अत्राहंप्रत्ययो जायमानस्वभाव इत्युक्तम् ॥]

(२) देहादिसंहतस्यैवाविद्यागृहीतस्य आत्मनः संस्क्रियमाणत्वात् । .... तेनैव हि अहंकर्त्रा. अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रियाः निर्वर्त्यन्ते. तत्फलं च स एवाश्नाति ॥ सू. भा. १-१-४, पा. १७.

[अत्र कर्ता भोक्ता जीवोऽहंप्रत्ययविषय इत्युक्तम् ॥]

(३) न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा ॥ सू. भा. १-१-४, पा. २०.

[अत्राप्यहंप्रत्ययविषयत्वं कर्त्रात्मनोऽनुज्ञातम् तत्साक्षिणश्चाविषयत्वम् ॥]

(४) अहंप्रत्ययबीजं यदहंप्रत्ययवह्न्युष्टं ।
नाहंप्रत्ययवह्न्युष्टं कथं कर्म प्ररोहति ॥ उप. ४-१, पा.

[अत्रापि कर्मणो बीजमहंप्रत्यय इत्युक्तम् । तच्च अहंप्रत्ययवति कर्त्रात्मन्याश्रितम् । नाहं कर्ता इति ज्ञानाग्निना बीजे दग्धे चेत् कर्मप्ररोहो न भवेदेवेत्युक्तम् ॥]

वार्तिककारैस्तु नैष्कर्म्यसिद्धौ इमे श्लोका लिखिताः –

(१) बाह्यां वृत्तिमनुत्पाद्य व्यक्तिः स्यान्नाहमो यथा ।
नैतेऽन्तःकरणं तद्वद् ध्वान्तस्य व्यक्तिराञ्जसी ॥ नै. ३-५८.

[बाह्यविषयां वृत्तिमनुत्पाद्य, अहमो विद्यमानस्यापि नाभिव्यक्तिर्यथा, तथा अश्रुतवेदान्तवाक्यानां सुषुप्ते विद्यमानमप्यज्ञानं नाभिव्यज्यते । ततश्च सान्तःकरणस्यैव 'न जानामि' इत्यज्ञानाभिव्यक्तिसंभवात् इति श्लोकार्थः ॥]

(२) दाह्यदाहकतैकत्र यथा स्याद्वह्निदारुणोः ।
ज्ञेयज्ञातृकतैवं स्यादहंज्ञात्रोः परस्परम् ॥ नै. ३-५९

[अत्र अहंप्रत्ययविषयात्मनि ग्राह्यग्राहकविभागो न विद्यते, तथा स्फुटतरव्यवहाराभावात्–इत्याशङ्क्य परिहारोऽभिहितः । यथा वह्निर्दाहकः, दारु च दाह्यम्–इति विभक्तयोरप्येकत्र काष्ठे अविभक्तत्वेन प्रतीतिः, एवं ज्ञात्रात्माहङ्कारयोरुभयोरपि 'अहम्' इति भोक्त्रात्मत्वस्याविभागेनैव प्रतीतिरध्यासात् । तयोर्विभागस्तु सुषुप्तादिपरीक्षणेन निश्चेय इत्यर्थः ॥]

(३) इदंज्ञानं भवेज्ज्ञातुर्ममज्ञानं तथाहमः ।
अज्ञानोपाधिनेदं स्यात् विक्रियातोऽहमो मम ॥ नै. ३-६०.

[यद्यहङ्कारोऽपि विषयांश एवान्तर्भाव्यः, तर्हि किमिति ममेति नावभासते ? – इत्याशङ्क्य परिहारोऽयम् । इदंज्ञानं ज्ञातुः केवलाज्ञानोपाधिनैव ; अज्ञातात्मैव हि ज्ञातृत्वमात्मन्यध्यस्य सर्वमन्यद् इदमिति विषयत्वेन गृह्णाति । ममेति ज्ञानं तु न केवलमज्ञानोपहितात्मनः, किं त्वज्ञानाहंरूपोभयोपाधिविशिष्टस्यैव । अहंवृत्तिलक्षणव्यापारेणैव हि 'मम' इति ज्ञानं संभवतीत्यर्थः । स्पष्टीकृतमिदं श्लोकसंबन्धोक्तौ ॥]

(४) अनुपक्रियमाणत्वान्न ज्ञातुः स्यादहं मम ।
घटादिवदिदं तु स्यान्मोहमात्रव्यपाश्रयात् ॥ नै. ३-६१.

[बाह्यघटादीनामिवोपकारित्वापकारित्वान्यतराभावात्, अहङ्कारे ज्ञातुः 'मम' इति बुद्धिर्न भवति । अज्ञानमात्रोपहितत्वात्तु ज्ञातुः, तत्र 'इदम्' इत्येव केवलं ज्ञानम् इत्यर्थः ॥]

(५) विक्रियाज्ञानशून्यत्वान्नेदं न च ममात्मनः ।
उत्थितस्य सतो ज्ञानं नाहमज्ञासिषं यतः ॥ नै. ३-६२.

[यत्राज्ञानाहंविक्रिययोः सद्भावः, तत्र इदं ममेति ज्ञानम् इत्यन्वयः प्रदर्शितः । यत्र तु तदुभयं नास्ति, तत्रोभयविधज्ञानमपि न जायत इति व्यतिरेकप्रदर्शनार्थोऽयं श्लोकः । सुषुप्तेऽज्ञानं नास्ति, अहंवृत्तिरपि नास्तीत्यतः इदमिति वा, ममेति वा ज्ञानं नैव जायते । अत एव हि उत्थितस्य 'न किञ्चिदवेदिषम्' इति परामर्शः । अन्यथा विषयज्ञानस्य वा आत्मीयज्ञानस्य वा परामर्शो भवेदपीत्यभिप्रायः ॥]

यथोद्दाहृतनैष्कर्म्यसिद्धिवाक्येभ्यो विज्ञायते, टीकाप्रस्थानतो भिन्नमेव वार्तिकप्रस्थानमिति । तत्र हि बाह्यविषयवृत्तिकृतैवाहंप्रत्ययाभिव्यक्तिरित्यङ्गीकृता । अहङ्काराध्यासस्य तु भाष्ये इव तत्रापि जागरिते एवान्तःकरणाविवेककृतत्वं स्वीकृतम् । यतोऽन्तःकरणाभावमेव प्रतिजानते सुषुप्ते वार्तिककारा इति ॥

इदं त्वत्र नः प्रतिभाति – 'देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः' इति भाष्योक्तरीत्या नैकोऽप्यहङ्काराध्यासविरहितोऽस्ति व्यवहारः । 'अहम्' इत्युल्लिख्याहंप्रत्ययविषयत्वं तु नात्मनि सर्वदा, न च विषयेषु सर्वदा 'मम' इत्युल्लिख्य ममप्रत्ययविषयत्वं वा व्यवहारे । तत्र देहेन्द्रियादिष्वहंममाभिमानस्तावन्नैसर्गिकः । उल्लिख्याहंप्रत्ययविषयत्वापत्तिस्तु क्वचित्कः । परमार्थदृष्ट्या कूटस्थाजाद्वयचिन्मात्रस्वभाव एव सन्नयमात्मा लौकिक्या त्वविद्यादृष्ट्या ज्ञातृज्ञानज्ञेयविभक्त इव, कर्तृकरणक्रियाफलविभक्त इव, भोक्तृभोगभोग्यविभक्त इव चाभातीत्यनादिरियमविद्या, नास्त्येव तत्र कारणगवेषणाहेतुः । अविद्यायाः स्वभाव एव ह्येषः, यदविद्यमानं वस्तु प्रत्युपस्थाप्य तदपेक्षया आत्मानं परिच्छिन्नमिवापाद्य स्वप्रत्युपस्थापितविषयविषये शुभाशुभदृष्टिमुद्भाव्य तस्मिन्नुपकारकापकारकत्वविकल्पनम्, आत्मनि च रागद्वेषोत्थापनम् तदनुगुणक्रियायां प्रवर्तनं चेति । अविद्या तु स्वयमव्यक्तैव सर्वस्यास्य व्यवहारस्य निर्वोढ्री, अक्रमेऽपि व्यवहारे सक्रमत्वप्रदर्शिनी, आत्मनि ज्ञातृत्वं विषयेषु तत्प्रयुक्तम् इदंबुद्धिविषयत्वं ज्ञेयत्वं च जनयति; आत्मनि कर्तृत्वं विषयेषु तत्तत्क्रियाप्राप्यत्वम्, आत्मनि भोक्तृत्वं विषयेषु भोग्यत्वम्, आत्मन्यहंबुद्धिम् प्राप्तभोग्येषु ममत्वबुद्धिं चोत्पादयति । तथा च यत्र विषयप्रधानैव बुद्धिर्भवति, तत्र इषुकारन्यायेन विषयव्यापृतबुद्धित्वेनैव विनियोगात्; यत्र च कामक्रोधादिवेगातिशयेन संमोहप्राप्तिः, तत्रापि प्रसुप्तसर्वेतरवृत्तित्वात्, नात्मन्यहं

बुद्धिरुल्लिख्याविष्क्रियते । यत्र पुनः स्वात्मानमेव प्रधानीकृत्य विमर्ष्टुं प्रवर्तते लोकः, तत्र नियमेनाहंप्रत्ययोन्मेषो भवति 'स्थूलोऽहम्', 'चक्षुष्मानहम्', 'संकल्पवानहम्', 'निश्चयवानहम्', 'सिद्धोऽहम्', 'सुख्यहम्'–इत्यादिरूपेण । तदेवं देहेन्द्रियमनोबुद्ध्यहङ्कारेषु सामान्येन अहंमतिलक्षणाध्यास एवाविद्या, विशेषेण देहादिष्वहंबुद्ध्यादयस्तु काचित्काः । असत्प्रत्ययगोचरत्वं तु भाष्योक्तम् अनादिसाद्यहंमति-साधारणमिति सर्वमनाकुलमिति ॥

अत्रैव प्रसङ्गात् साक्ष्यहमोरन्योन्याध्यासविषयकष्टीकाभिप्रायोऽपि विमृश्यते –

(६) यदि युष्मदर्थस्यैव प्रत्यगात्मन्यध्यासः स्यात्, प्रत्यगात्मा न प्रकाशेत । न हि शुक्तौ रजताध्यासे शुक्तिः प्रकाशते, प्रकाशते चेह चैतन्यमहङ्कारादौ । तथा यदि चैतन्यस्यैव अहङ्कारादावध्यासो भवेत्, तदा नाहङ्कारप्रमुखः प्रपञ्चः प्रकाशेत । तदुभयं मा भूदित्यनुभवमेवानुसरन्नाह 'तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति' इति ॥ पं. ३५, ३६.

अत्र वयं पश्यामो नेयं समीचीना युक्तिरिति । यत्र यदध्यस्यते, तत्राध्यस्तमेव भासते, न तु सर्वथा तद्विकल्पास्पदम् इति नायमेकान्तः । शुक्तिरजतस्थलेऽपि 'इदं रजतम्' इति शुक्तेरिदमंशस्याध्यस्तरजतेन सह सामानाधिकरण्येन प्रतिभासदर्शनात् । मुखप्रतिबिम्बस्य हि आदर्शानुविधायित्वं मुखे अध्यस्यते बालैः, अथ च मुखं प्रतिबिम्बव्यतिरेकेण भासत एवेति । अपि च यत्राध्यस्यते तन्न प्रकाशते इति चेन्नियमः, तर्हि उभयत्राप्यध्यासस्वीकारात् उभयोरप्यात्माहमोरप्रकाश एव किमिति न प्रसज्यते? –इति प्रष्टव्यो भवेत् सिद्धान्ती । अथानुभवानुसारीदं कल्पनमित्यचोद्यो भवतीतरेतराध्यास इति, तर्हि केवलम् अनुभव एव प्रदर्श्यताम् । किमनुभवाननुसारिण्या युक्त्या? तस्मान्नायं विवक्षितोंऽशोऽत्र । किं तर्हि, 'सत्यानृतमिथुनीकरणमध्यासः', 'यत्र यदध्यासः, तत्कृतेन दोषेण

गुणेन वा अणुमात्रेणापि स न संबध्यते' इति चोक्तम्। तदुभयमिह प्रदर्श्यते 'एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति' इति। एवं हि साक्षिणि अहमः कर्तृत्वं विकारित्वं च, साक्षिणः प्रत्यक्त्वं चैतन्यं च अहमादिषु चाध्यस्यमानं मिथ्यैव, न तेनाध्यासेन साक्षिणि विकारदोषो वा, अहमादिषु चैतन्यगुणो वा वस्तुवृत्तेनैव भवतीति स्फुटितं भवति। तथा ह्यन्यत्रोक्तम् –

(१) एकाधिकरणत्वं घटादिविशेष्याभावे न युक्तमिति चेत्। न। 'इदमुदकम्' इति मरीच्यादौ अन्यतराभावेऽपि सामानाधिकरण्यदर्शनात्। गी. भा. २-१६, पा. १५.

[अत्र 'सन् घटः' इत्यत्र सद्बुद्धिः सत्यभूतात्मविषया घटबुद्धिस्तु अनृत-रूपघटविषया, यथा इदंबुद्धिर्मरीचिविषया, उदकबुद्धिस्तु अनृतोदकविषया इत्युक्तम्॥]

(२) यत्र यस्यावभासस्तु तयोरेवाविवेकतः।
जानातीति क्रियां सर्वो लोको वक्ति स्वभावतः॥
बुद्धेः कर्तृत्वमध्यस्य जानातीति ज्ञ उच्यते।
तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते॥
उप. १८-६४, ६५, पा. ३७५, ३७६.

[ज्ञानकर्तृत्वं साक्षिणि मिथ्या, चिदाभासत्वमप्यहमि दृश्यमानं मिथ्या॥]

बौद्धैस्तु प्रत्ययैरेवं क्रियमाणैश्च चिन्निभैः।
मोहिताः कियते ज्ञानमित्याहुस्तार्किका जनाः॥ उप. १८-६८.

[आत्मनि ज्ञानादिविकारा जायमाना इव मिथ्यैवाध्यस्यन्ते, अहमि च चिन्निभत्वं मिथ्यैवाध्यस्यते॥]

इति च॥

अध्यासदृष्टान्ताः पञ्चपादिकायाम् –

१४४. 'तेनान्तःकरणोपरागनिमित्तं मिथ्यैव अहंकर्तृत्वमात्मनः स्फटिकमणेरिवोपधाननिमित्तो लोहितिमा' (पं. २०) इत्युक्त्वा एतत्प्रसङ्गेन

कथं ब्रह्मणि मिथ्याजीवत्वप्रतिभासः ? – इत्येतद्दर्शयितुम् स्फटिक-प्रतिबिम्ब–रज्जुसर्प–घटाकाशदृष्टान्ताः समुदाहृताः ।

(१) स्फटिके जपाकुसुमसांनिध्येन प्रतीयमानो लोहितिमा मिथ्या । न हि स्फटिकप्रतिस्फालिता नायनरश्मयो जपाकुसुमस्थं लौहित्यं ग्राहयन्ति कल्पयितुं शक्यते । न च रूपमात्रे चाक्षुषः प्रत्ययोऽस्ति । न च जपाकुसुमप्रभाव्याप्तत्वात् स्फटिकोऽपि लोहित इवाभातीति युक्तम् । अनुपपत्तेः । कुसुमप्रभाया एवाभावाच्च । तदेवं स्फटिकमणाविव, चिदात्मन्यप्यहङ्कारोपरागः ॥ पं· ३१ लिखितस्य सारः ।

(२) 'यत्पुनर्दर्पणजलादिषु मुखचन्द्रादिप्रतिबिम्बोदाहरणम्, तदहङ्कर्तुरनिदमंशो बिम्बादिव प्रतिबिम्बं न ब्रह्मणो वस्त्वन्तरम्, किं तु तदेव तत्पृथगवभासविपर्ययस्वरूपतामात्रं तु मिथ्येति दर्शयितुम् । कथं पुनस्तदेव ? तदेकलक्षणतावगमात् ॥ ....

अत्राह भवतु न वस्त्वन्तरम् । तदेव तदिति तु न क्षम्यते । शुक्तिकारजतस्य मिथ्यारूपस्यापि सत्यरजतैकरूपावभासित्वदर्शनात् । मैवम् । तत्र हि बाधदर्शनान्मिथ्याभावः, नेह स बाधो दृश्यते ... । ननु तत्त्वमसिवाक्याद् बाधो दृश्यते । मैवम् । तत्र 'तत् त्वम्' इति बिम्बस्थानीयब्रह्मस्वरूपता प्रतिबिम्बस्थानीयस्य जीवस्योपदिश्यते । अन्यथा न 'तत् त्वमसि' इति स्यात्, किं तु 'न त्वमसि' इति भवेत्, 'न रजतमस्ति' इतिवत् । किञ्च शास्त्रीयोऽपि व्यवहारः प्रतिबिम्बस्य पारमार्थिकमेव बिम्बैकरूपत्वं दर्शयति । .... न वयं विच्छेदावभासं पारमार्थिकं ब्रूमः, किं त्वैकत्वम् । विच्छेदस्तु मायाविजृम्भितः .... । जीवः पुनः प्रतिबिम्बकल्पः सर्वेषां नः प्रत्यक्षश्चिद्रूपः, नान्तःकरणजाड्येनास्कन्दितः । स च अहंकर्तृत्वमात्मनो रूपं मन्यते न बिम्बकल्पब्रह्मैकरूपताम् । अतो युक्तस्तद्रूपतावगमे मिथ्यात्वापगमः ॥ पं· २१, २२, २३·

(३) ननु तत्र विभ्राम्यतो विभ्रमहेतुर्दर्पणालक्तकादिपरमार्थवस्तुसंनिहितमस्ति । न तथेह किञ्चित् सर्वत्रैव चिद्विलक्षणे विभ्रमविलासाभिमानिन इति मा भूदाशङ्केति रज्जुसर्पमुदाहरन्ति ॥

ननु तत्रापि यदि नामेदानीमसंनिहितः सर्पस्तथापि पूर्वनिर्वृत्ततदनुभवसंस्कारः समस्त्येव । बाढम् । इहापि, अहङ्कर्तृतातत्संस्कारयोर्बीजाङ्कुरयोरिवानादेः कार्यकारणभावस्य वक्ष्यमाणत्वात्, संस्कारो विभ्रमहेतुर्विद्यते ॥

(४) यद्यपि अनिर्वचनीयतयैव अरुणादिना स्फटिकादेः सावयवत्वेन संभेदयोग्यस्यापि असंभेदावभासः सिद्धः, तथापि तदासङ्गेन स्फटिक-प्रतिबिम्बमुल्लेख्यते। रज्ज्वां पुनः सर्पबुद्धिरेव न तत्संभिन्नत्वम् असंभिन्नत्वं वा तस्याः। तेन ..... असङ्गता आत्मनो न स्पष्टं दर्शितेति तदर्थं घटाकाशोदाहरणम्। तत्र हि तत्तत्परामर्शाद् ऋते न भेदरूपकार्यसमाख्याः स्वगता दृश्यन्ते ॥ पं. २४.

अत्र यद्यपि 'एतच्च सर्वमुदाहरणजातं श्रुतितन्न्यायानुभव-सिद्धस्य तदसंभावनापरिहाराय, बुद्धिसाम्यार्थं च, न वस्तुन एव साक्षात् सिद्धये' इति टीकाकारैरुक्तम्, तथापि दृष्टान्तानामुपादानं कीदृशं साम्यमङ्गीकृत्य दृष्टान्तदार्ष्टान्तिकयोरित्यत्र भाष्यटीकयोर्यत्किञ्चिद्वैलक्षण्य-मपि दृश्यते। अतष्टीकोक्तदृष्टान्तविमर्शनमत्र किञ्चित् क्रियते –

स्फटिकनिदर्शने तावत् अनिर्वचनीया अरुणिमा – इत्येतद् भाष्ये कुत्रापि नोक्तम्।

(1) यथा शुद्धस्य स्फटिकस्य स्वाच्छ्यं शौक्ल्यं च स्वरूपं प्राग् विवेक-ग्रहणात् रक्तनीलाद्युपाधिभिरविविक्तमिव भवति। प्रमाणजनितविवेकग्रहणात् तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन्। तथा देहाद्युपाध्यविविक्तस्येव सतो जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात् समुत्थानं विवेकविज्ञानफलं स्वरूपेणाभि-निष्पत्तिः, केवलात्मस्वरूपावगतिः। तथा विवेकाविवेकमात्रेणैव आत्मनोऽ-शरीरत्वं सशरीरत्वं च ॥ सू. भा. १-३-१९, पा. ११३.

[अत्र 'प्रागपि तथैव सन्' इत्युक्त्या अविवेकदशायामनिर्वचनीयारुणि-माद्युत्पत्तिर्निषिद्धा भवति। 'विवेकाविवेकमात्रेणैव' इत्यवधारणेन, अशरीरत्वम् सशरीरत्वं च विवेकाविवेकमात्रकृतं न त्वनिर्वचनीयोत्पत्तितत्परिहारकृतमिति गम्यते। एवम् 'अविविक्तस्यैव सतः' इतीवशब्दोऽप्यनिर्वचनीयोत्पत्तिवादं निरुणद्धि ॥]

प्रतिबिम्बदृष्टान्ते – तत्त्वमसीति बाधो न बोध्यते, किं तु बिम्ब-प्रतिबिम्बभूतयोर्जीवपरयोरैक्यमेवेत्याग्रहो नाचार्यसंमतः।

(2) सिद्धादेवाहमित्यस्माद् युष्मद्धर्मो निषिध्यते ।
रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः ॥

उप. १८-४, पा. ३४८.

[अत्र रज्ज्वामहिधीनिषेधवत्, आत्मन्यपि स्वतःसिद्धे युष्मदंशबुद्धिर्निषिध्यते – इति बाधो दर्शितः ॥]

(3) आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः । न स एव साक्षात् नापि वस्त्वन्तरम् ॥

सू भा. २-३-५०, पा. ३०२.

[अत्र 'न स एव साक्षात्' इति कण्ठरवेणैव 'तदेव तत्, बिम्बमेव प्रतिबिम्बम्' इत्यभ्युपगमः प्रतिषिद्धः । अत्र यद्यपि चेतनांशे एकत्वं संमतमेव भाष्यकाराणाम्, तथापि जीवत्वं कल्पितमित्यत्रैव तात्पर्यमिति न विरोधः । कल्पितजीवस्यैव हि ब्रह्मैक्यनिषेध इति ॥]

(4) परस्यादुःखित्वे, अन्यस्य च दुःखिनोऽभावे दुःखोपशमनाय शास्त्रारम्भानर्थक्यमिति चेत् । न । अविद्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वात्, आत्मनि प्रकृतसंख्यापूरणभ्रमापोहवत् । कल्पितदुःख्यात्माभ्युपगमाच्च । ....

प्रागुत्पत्तेरनुपलब्ध आत्मा पश्चात् कार्ये च सृष्टे व्याकृते बुद्धेः अन्तरुपलभ्यमानः, सूर्यादिप्रतिबिम्बवत् जलादौ, कार्यं सृष्ट्वा प्रविष्ट इव लक्ष्यमाणो निर्दिश्यते 'स एष इह प्रविष्ट' इति ॥

बृ. भा. १-४-७, पा ६५८ ।

[अत्र दशमदृष्टान्तेन स्वात्मनोऽदशमत्वभ्रान्तिनिवर्तकत्वं शास्त्रस्य, कल्पितदुःख्यात्मानमुद्दिश्य शास्त्रप्रवृत्तिः–इति पक्षद्वयस्यापि अभ्युपगमो दृश्यते । एतस्मिन् कल्पे कल्पितजीवापबाधेन परमात्मत्वोपदेश इति पक्षोऽप्यङ्गीकृतो भवतीति स्पष्टम् ॥]

रज्जुसर्पदृष्टान्तेऽपि यदुच्यते अहङ्कर्तृतातत्संस्कारयोर्बीजाङ्कुरयोरिवानादेः कार्यकारणभावात्, संस्कारो विभ्रमहेतुर्विद्यते' इति । तत्र यदि 'पूर्वदृष्टः स्मृतिरूपः' इति भाष्यव्याख्याप्रकारेण कारणत्रितयजन्यत्वं विवक्षितम्, तन्न भाष्ये कुत्रापि दृष्टमित्युक्तम् । अनिर्वचनीय-

सर्पोक्तिश्च प्रत्युक्तैव (खं. १३७) इति न वक्तव्यमवशिष्यते । अतोऽत्र वाक्यद्वयसमुदाहरणेनैव तुष्यामः –

(5) **न त्वहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद्विशेषः स्यात् ॥ सू. भा. १-४-६, पृ. १५४.**

[अनिर्वचनीयोऽहिः समुत्पन्नोऽहिबुद्धिकाले इति नोक्तमत्र ॥]

(6) **रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः**
अवस्तुसन्नपि ह्येष कूटस्थेनात्मना तथा
आत्माभासाश्रयश्च .... उप. सा. ॥ १८-४-६४७, पा. ३६७.

[विवेकात् प्रागपि रज्जुसर्पो रज्ज्वात्मक एव यथा, तथा आत्माभासाश्रयोऽहङ्कारोऽपि आत्मनैवात्मवान् इत्यर्थः । अत्रापि रज्जुव्यतिरिक्तः प्रातिभासिकः सर्पो नाङ्गीकृतः ॥]

अध्यासाविद्ययोरैक्यम् –

१४५. **'तमेतमेवंलक्षणम् अध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्याम्राहुः'** इति भाष्यम् । तत्र टीका –

(१) **अध्यस्तातद्रूपसर्पविलयनं कुर्वत्, वस्तुस्वरूपं रज्जुरेवेत्यवधारयद् विज्ञानं 'विद्या' इति प्रसिद्धमेव लोके ब्रह्मविदो वदन्ति ॥ पं. ३०**

[यद्येवं लोके प्रसिद्धमेव ज्ञानं विद्या, तर्हि किमिति 'सर्पं विलापयत्' इत्यर्थाध्यासविनाशकृत्त्वविशेष उपादीयते ? न हि रज्जुज्ञानं सर्पज्ञाननिवर्तनव्यतिरेकेणापि सर्पविलयने व्याप्रियमाणं दृष्टम् । अस्य प्रश्नस्य टीकायामुत्तरं न दृष्टम् । अथ मतम् सर्पज्ञानबाधनमेव सर्पविलयनम् इति, तर्हि अर्थाध्यासो लक्षणवाक्यात् साक्षादेवोच्यते, ज्ञानाध्यासस्तु अर्थात् इत्युक्तं हीयते । भाष्ये तु अविवेकेनाध्यासः, विवेकेन वस्तुस्वरूपावधारणं विद्या – इति ज्ञानविषयत्वेनैव विद्याविद्यावर्णनेनोपक्षीणमिति स्पष्टमेव ॥]

(२) **" यद्येवमध्यास इति प्रक्रम्य पुनस्तस्याविद्याभिधानव्याख्याने यत्नगौरवात् वरम् 'अविद्या' इत्येवोपक्रमः कृतः " इत्याक्षेपमुत्थाप्य टीकायाम् इत्थं समाधिः कृतः –**

नैतत् सारम् । आदावेव अविद्येत्येवोच्यमाने आच्छादकत्वं नाम यत् तस्यास्तत्त्वम्, तदेवाभिहितं स्यात्, नातद्रूपावभासितया अनर्थहेतुत्वम् । अतोऽतद्रूपावभासित्वम् अध्यासशब्देन प्रकृतोपयोगितया उपक्षिप्य पुनस्तस्य अविद्याशब्दतया विद्यामात्रापनोदनार्हत्वं दर्शनीयम् ॥ पं. ३०.

[यद्येवम्, तर्हि किमिति 'मिथ्याज्ञाननिमित्तः' इत्येतत् मिथ्यारूपाविद्याशक्त्युपादानः-इति व्याख्यातम् ? न हि स्वयमेव स्वोपादानक इति वर्णितं स्वरूपवैशद्याय कल्प्येत । तस्मान्नेदं सम्यगुत्प्रेक्षितमिति भाति । 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे ब्रह्मज्ञानार्थं विचारः कर्तव्य इत्युपदिष्टम्, ज्ञानस्य परमपुरुषार्थहेतुत्वं च निर्दिष्टम् । अतोऽर्थात्, ज्ञानबाध्याज्ञानमात्रं बन्धहेतुरित्युक्तं भवति । तच्चाज्ञानं किंस्वरूपम् ? किं तन्त्रान्तरसंमतैवाविद्या, अहोस्विदन्यादृशी ?-इत्याकाङ्क्षायाम्, विषयविषयिणोरन्योन्याध्यासलक्षणा सत्यानृतमिथुनीकरणरूपा – इयमविद्येत्येवं ज्ञापनार्थं भाष्ये आदौ अध्यासशब्देनोपात्तस्याज्ञानस्य पुनरिह श्रुतिस्मृतिसिद्धाविद्याशब्देनाभिधानमित्युत्पश्यामः । न चैवमविद्याया आच्छादकत्वं नाभिहितं स्यात्, यतः – 'यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासायाः अग्रहणं विपरीतज्ञानव्यवधानमात्रम् तथा ग्रहणं ज्ञानमात्रमेव । विपरीतज्ञानव्यवधानापोहनार्थत्वाज्ञानस्य । एवम् इहापि आत्मनोऽलाभोऽविद्यामात्रव्यवधानम् । तस्माद् विद्यया तदपोहनमात्रमेव लाभः, नान्यः कदाचिदप्युपपद्यते ॥' (बृ. भा. १-४-७, पा. ६६६) इत्यात्मनोऽध्यासलक्षणाविद्यामात्रव्यवहितत्वोक्तेः । न ह्यात्मानात्मनोरन्योन्यात्मकतादर्शनव्यतिरिक्ता काचिदविद्या भाष्योररीकृता दृश्यते क्वापीति ॥]

प्रमाणव्यवहारः –

१४६. **'तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि । कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि, शास्त्राणि चेति ? उच्यते । देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः'** इति च भाष्यम् । अत्र टीका –

(१) बाढम्, उक्तलक्षणा अविद्या प्रत्यग्दृश्यपि संभवेत् । नैतावता तत्सद्भावः सिध्यति । तेन निदर्शनीयः सः । प्रमातारमाश्रयन्ति प्रमाणानि ।

तेन प्रमाता प्रमाणानामाश्रयः, नाविद्यावान् । अनुपयोगादित्यभिप्रायः । अथवा कथमविद्यावद्विषयाणि प्रत्यक्षादीनि शास्त्राणि च प्रमाणानीति संबन्धः । अविद्यावद्विषयत्वे सति, आश्रयदोषानुगमात् अप्रमाणान्येव स्युः – इत्याक्षेपः ॥ पं. ३१.

अत्र मुद्रितपुस्तकेषु नैकेषु यद्यपि 'नैतावता तत्संभवः सिध्यति' इत्येव पाठः समादृतः, तथापि 'तत्सद्भावः' इति पाठ एवास्माभिर्धृतः, प्रतिज्ञाटीकानुसारेण । इत्थं हि प्रतिज्ञा –

'आह-कोऽयमध्यासो नाम ?' इत्याद्यारभ्य अध्याससिद्धिपरं भाष्यम् । तत्रापि 'कथं पुनरविद्यावद्विषयाणि ?' इत्यतः प्राक् अध्यासस्वरूप तत्संभावनाय, तदादि तत्सद्भावनिर्णयार्थम्–इति विभागः' ॥ पं. ५, ६.

इति । तदेवं स्थिते यत्तावत् टीकायां भाष्यव्याख्यानम् –

(1) 'प्रमाता प्रमाणानामाश्रयो नाविद्यावान्, अनुपयोगात् – इत्यभिप्रायः'. पा. ३१.

इति, नैतद् भाष्याभिप्रायानुगुणमिति भाति । कुतः ? 'आत्मानात्मनोरितरेतराध्यासं पण्डिता अविद्येति मन्यन्ते, तद्विवेकेन वस्तुस्वरूपनिर्धारणं विद्येति च' इति खलूक्तं पूर्वस्मिन् ग्रन्थे । तत्र अध्यासस्वरूपमुक्तं तत्संभावना च, न तु 'अध्यस्य नैसर्गिकोऽयं व्यवहारः' इति प्रतिज्ञातस्य सिद्धिः प्रदर्शिता । तस्मादत्राध्यासलक्षणाविद्यासद्भाव एवाक्षेपपरिहाराभ्यां निदर्शयितव्यः । तथा चोक्तं टीकायामपि 'नैतावता तत्सद्भावः सिध्यति तेन स निदर्शनीयः' – इति । तत्र कथमिदमप्रकृतम् आक्षिप्यते परिह्रियते च 'प्रमातारमाश्रयन्ति प्रमाणानि नाविद्यावन्तम् अनुपयोगात्' इति ? न हि प्रमाणवृत्तं तदाश्रयत्वं वा इह प्रकृतम्, येन तदाक्षिप्य परिह्रियेतेति । एवम् –

(2) 'कथमविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च ?'

इत्याक्षेपोऽपि न प्रकृतविषयकः । न हि प्रत्यक्षादीनां शास्त्राणां च प्रामाण्यमिह सिषाधयिषितम्, किं तु तेषामविद्यापुरःसरत्वमेवेति ॥

अत एवोपसंहारे यदुच्यते –

(3) तेन यद्यपि प्रमातृत्वशक्तिसन्मात्रं (सत्तामात्रम् ?) प्रमाण-प्रवृत्तौ निमित्तम्, तदेव तु अविद्याध्यासविलसितम् – इत्यविद्यावद्विषयता-प्रमाणानामुच्यते । तथा निरपेक्षाणां स्वसामर्थ्येन अर्थसिद्धिं विदधतां बाधानुपलब्धेः प्रामाण्यम् अविद्यावद्विषयत्वं च विधिमुखोपदर्शितं न नेति शक्यमपह्नोतुम् । दोषस्त्वागन्तुक एव मिथ्यात्वे हेतुः, न नैसर्गिकः । तथोपलब्धेः । न च सर्वसाधारणे नैसर्गिके दोषबुद्धिः । तथा हि क्षुत्पिपासोपजनिते संतापे शश्वदनुवर्तमाने जाठराग्निकृतविकारे अन्नपान-निष्यन्दे वा न रोगबुद्धिर्जनस्य । मुहूर्तमात्रपरिवर्तिनि मन्दे ज्वरे प्रतिश्याये वा अल्पकफप्रसूतावपि रोगबुद्धिः, अनैसर्गिकत्वात् । अनैसर्गिकं च दोषमभिप्रेत्योक्तम् 'यस्य च दुष्टं करणम्, यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययो नान्यः' (शा. भा. १-१-५) इति ॥ पं. ३२.

इति, तत्र प्रमातृत्वमविद्याविलसितमिति भाष्येऽपि दर्शनात्, स्वीकार्यम् । तथा प्रमाणानां व्यवहारे बाधानुपलम्भे सति स्वार्थसिद्धिविधानं दुरपह्नवम्– इति च सम्यगेव । यत्पुनः सदृष्टान्तमुच्यते 'नैसर्गिकदोषो न प्रमाण-मिथ्यात्वहेतुः' इति, तदनवसरप्राप्तम् इति भाति । न हि यथा दृष्टान्ते क्षुत्पिपासादिसंतापानुवृत्तिस्तथा, अविद्यादोषानुवृत्तिर्व्यवहारे सर्वसाधारण्ये-नानुभूतचरी, येन तस्यां दोषबुद्धिर्नोत्पद्यत इति परिहार अन्विष्येत । अव्यक्तैव ह्यविद्या जीवभावं प्रमातृप्रमेयादिसर्वव्यवहारं च प्रयोजय-तीत्यवोचाम । न च प्रमाणप्रमेयव्यवहारो नाम प्रत्यक्षादिप्रमाणेषु तत्त्वेन निश्चयः तार्किकाणामिव, येन तत्प्रामाण्यविघातकृद्दोषादिचिन्ता अर्थवती स्यात् । किं तु प्रमेयेषु स्वाभाविकप्रवृत्तिनिवृत्तिलक्षण एव । 'पश्वादिभि-श्चाविशेषात्' इति भाष्यात् । तस्मादध्यासापराभिधानीयभागिन्येवाविद्या नैसर्गिकी प्रमाणव्यवहारस्यात्मलाभे तस्य सत्यत्वबुद्ध्युद्भावने च हेतुरिति न तत्र चोद्यपरिहारावुपपन्नौ इति पुष्कलम् । तथा हि भाष्यम् –

(१) 'सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः । स्वप्नव्यवहारस्येव प्राक् प्रबोधात् । .... यथा सुप्तस्य प्राकृतस्य जनस्य

स्वप्न उच्चावचान् भावान् पश्यतो निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति प्राक् प्रबोधात् न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति, तद्वत् ' इति ॥
सू भा २-१-१४, पा॰ १९८

इति । करणदोषादिगवेषणं तु व्यवहारे भवतु, अत्र पुनः परमार्थज्ञानेन बाध एवालं मिथ्यात्वनिश्चयाय । तथा हि भाष्योदाहृतं सांप्रदायिकवचनं सार्थकं भवति –

(२) ' देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्देवेदं प्रमाणं त्वात्मनिश्चयात् ॥
सू. भा. १-१-४, पा. २४.

इति ॥

प्रमेयापरोक्ष्यम् –

१४७. वेदान्तदर्शने प्रमाणप्रमेयव्यवहारस्य सर्वस्याप्यध्यासपुरःसरत्वात्, तदपवादेन नित्यशुद्धबुद्धमुक्तब्रह्मात्मस्वरूपसमर्पण एव तात्पर्यं वेदान्तानामिति हेतोः सूत्रभाष्ययोर्न क्वचिदपि प्रमाणवृत्तपरिशीलनं कृतम् । प्रायशस्तद्दर्शनविचारे प्रवृत्ते ' परमतमप्रतिषिद्धमनुमतं भवति ' इति न्यायमनुसृत्य तत्संमतरीत्यैव प्रमाणविचारः परिशील्यत इति प्रसिद्धमेतत् । तत्र टीकायामेव तु प्रथमं प्रमाणादिपरिशीलनप्रक्रिया काचिद्विशिष्टा समानीता । अतः सेह वाचकानां विमर्शार्थं समुदाह्रियते –

तत्रैवंभूतस्य अहङ्कर्तुरिदमंशस्य ज्ञानसंज्ञशब्दितो व्यापारविशेषः सकर्मत्वात् कर्मकारकाभिमुखं स्वाश्रये किञ्चिद्वस्थाविशेषम् आदधाति । स्वाश्रयविकारहेतुत्वात् क्रियायाः । स च प्राप्तोतिक्रियाहितकर्तृस्थविशेषवत्कर्मसंबन्धः, 'ज्ञातुर्ज्ञेयसंबन्ध' इति गीयते । तेन विषयविशेषसंबद्धमेव अन्तःकरणं चैतन्यस्यावच्छेदकम् । कर्मकारकमपि प्रधानक्रियासिद्धौ स्वव्यापाराविष्टं चैतन्यविवर्तत्वात् प्रधानक्रियाहितप्रमात्रवस्थाविशेषावच्छिन्नापरोक्षतैकरूपाम् अपरोक्षताम् अभिव्यनक्ति । ततश्च आत्मनोऽन्तःकरणावस्थाविशेषोपाधिजनितो विशेषो विषयानुभवसंज्ञशब्दितः, विषयस्यापरोक्षैकरसः 'फलम्'–इति क्रियैकविषयता फलस्य युज्यते । एवं चाहङ्कर्ता

स्वांशचैतन्यबलेन व्यापाराविष्टतया च 'प्रमाता' इति, बुद्धिस्थमर्थं पुरुषश्चेतयत इत्युच्यते । तत्र च प्रमातुः स्वयंज्योतिषो विषयसंबन्धसंजातविशेषोऽनुभवः, अपरोक्षतया सर्वान् प्रत्यविशिष्टोऽपि कारकाणां संभूय प्रधानक्रियासाधनत्वात्, येन सह साधनम्, तन्निष्ठ एव नान्यत्र । कर्मकारकमपि येन सह साधनम्, तस्यैवापरोक्षम्, गन्तृसंबन्ध इव ग्रामस्य ॥ पं॰ २४॰

अत्र प्रमातृत्वं चिदचिदंशगर्भितमित्यत्र भाष्यसंवादोऽस्ति । 'देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः' इत्युक्तेः । आत्मनोऽन्तःकरणस्थविशेषो विषयानुभवसंशब्दितः, विषयस्थापरोक्षैकरसः फलम् ' इति यदि चैतन्यांशमप्यन्तर्भाव्य, तर्हि तदप्यस्तु । अनन्तर्भाव्य तु तस्य फलत्वमसंभवि । न ह्यन्तःकरणवृत्तिविशेषलाभार्थमेव कश्चित् प्रमाणं व्यापारयति । अत एव हि भाष्यम् –

(1) 'अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म । फलविषयत्वादिच्छायाः । ज्ञानेन हि प्रमाणेन अवगन्तुमिष्टं ब्रह्म । ब्रह्मावगतिर्हि पुरुषार्थः । निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात्' ॥ सू॰भा॰ १–१–१॰

इति ब्रह्मजिज्ञासाफलम् अवगतिमेवाह । अवगतिस्वरूपं चैतन्यमेवेति तु स्फुटीकृतमन्यत्र –

(2) 'अवगतिः प्रमाणानां फलम्, कूटस्थनित्यात्मज्योतिःस्वरूपा इति च विप्रतिषिद्धम् ' इत्युक्तवन्तम् आह – न विप्रतिषिद्धम् । कथं तर्हि, कूटस्थनित्यापि सती प्रत्यक्षादिप्रत्ययान्ते लक्ष्यते । तादर्थ्यात् । प्रत्यक्षादिप्रत्ययस्य अनित्यत्वे, अनित्येव भवति । तेन प्रमाणानां 'फलम्' इत्युपचर्यते ॥ उप॰ गद्य॰ पा॰ १०१॰

इति । एवं प्रमातुः स्वरूपमपि नित्यचैतन्यरूपमेवेति परमसिद्धान्तमङ्गीकृत्यैव 'अहङ्कर्ता स्वांशचैतन्यबलेन व्यापारविशिष्टतया च प्रमाता ' इति यद्युच्यते, तत्रोमिति वक्तव्यम् । अहङ्कारप्राधान्येनैवेति यदा, तदा भाष्यविरोधः –

(1) 'न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते ॥ सू. भा. पा. ३.

इत्यात्मन एव देहेन्द्रियाहमध्यासास्पदस्य प्रमातृत्वोक्तेः ॥

(2) 'ज्ञो नित्यचैतन्योऽयमात्मा अत एव, यस्मादेव नोत्पद्यते, परमेव ब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठते ॥ सू. भा २-३-१८, पा. २८०.

इति चोक्तेः । अन्यत्राप्येतत् स्फुटीकृतम् —

(3) 'यस्य प्रमित्सा स एव प्रमाता अभ्युपगम्यते'

इति सोपाधिकत्वमुक्त्वापि तदनन्तरम् —

'ननु एवं सति, असति प्रमाश्रयत्वे कथं प्रमातुः प्रमातृत्वम् ? उच्यते । प्रमायाः नित्यत्वे अनित्यत्वे च रूपविशेषाभावात् । ... यथा धात्वर्थस्य तिष्ठत्यादेः फलस्य गत्यादिर्दूर्वकस्य अनित्यस्य अपूर्वस्य, नित्यस्य वा रूपविशेषो नास्तीति तुल्यो व्यपदेशो दृष्टः । 'तिष्ठन्ति मनुष्याः', 'तिष्ठन्ति पर्वताः' इत्यादि, तथा नित्यावगतिस्वरूपेऽपि प्रमातरि प्रमातृत्वव्यपदेशो न विरुध्यते । फलसामान्यात् ॥ उप गद्य. पा. ९४, ९५, ९६.

इति नित्यचैतन्यरूपस्यैव प्रमातृत्वाभ्युपगमात् ॥

एवम्, अन्तःकरणावस्थाविशेषोपाधिजनितत्वेनोपचर्यमाणाया अवगतेर्व्यतिरेकेण 'विषयस्यापरोक्ष्य'स्वीकारप्रक्रियापि मुधेत्यस्मदभिप्रायः । न ह्यन्तःकरणवृत्त्युपलक्षितावगतेः पृथक् विषयस्या अपरोक्षता केनचिदनुभूयते, न च विषयसबन्धं विना प्रमातुरन्तःकरणे काचिदपरोक्षावगतिफलाभिव्यञ्जिका वृत्तिर्जातुचिज्जन्यत इति ॥

वेदान्तशास्त्रप्रामाण्ये शङ्कापरिहाराः—

१४८. शास्त्रप्रामाण्यविषये इमानि टीकावाक्यानि उदाहरणमर्हन्ति —

(१) 'तत्त्वमसि' इति वाक्यार्थावगमादर्वाक्, अविद्याकृतं संसारम् अहमुल्लेखमाश्रित्य प्रवर्तमानं शास्त्रं नाविद्यावद्विषयत्वं अतिवर्तते ॥ पं. ३४.

(२) यद्यपि शब्दमात्रस्य प्रत्यक्षादिविषय एव प्रयोगो दृष्टः, व्युत्पत्ता तु कथं व्युत्पद्यत इति वाच्यम् । श्रोतृव्यवहारो हि मूलं बालानां व्युत्पत्तेः । स च श्रोतुर्ज्ञानान्तरानिमित्ततापरिशुद्धः शब्दसामर्थ्यावगमहेतुः । अतो न प्रतिपत्तुर्ज्ञानान्तरासिद्धार्थावबोधकत्व सामर्थ्यावगमकालेऽवगतम् । तेनानवगम्यैव तद्विषयं ज्ञानं सामर्थ्यावगमः । यथावगमं च विज्ञानोत्पत्तिः । यदा पुनर्व्युत्पन्नः स स्वयं प्रयुयुक्षते परप्रतिपत्तये, तदा ज्ञानान्तरसंनिधापितं स्वसाक्षिकं विवक्षन् सामर्थ्यावगमकालेऽपि तयोः सत्तां प्रतिपद्यते केवलं न ज्ञानोत्पत्तौ तयोरुपयोगम् । तस्मात्, न शब्दस्य प्रमाणान्तरगृहीतार्थप्रकाशने सामर्थ्यं व्युत्पत्तिकाले अवगतम्. किं तु चक्षुरादिवत् अन्यनिरपेक्षो यथावगतसामर्थ्यं चशब्दो विज्ञानं जनयति । तस्मान्न प्रमेयस्य प्रत्यक्षादिविषयत्वं शब्दस्य विज्ञानजनन उपयुज्यते । अपि च अपौरुषेये शब्दे चक्षुर्वीव विज्ञानोत्पत्तौ अनपेक्षे कथम् अप्रामाण्यमाशङ्क्येत ?

पं. ८४, ८५.

(३) नन्वूक्तमाशङ्काकारणम् – स्पर्शनगोचरचित्रनिम्नोन्नतविषयस्य चाक्षुषस्य प्रत्ययस्य तत्संवादाभावादप्रमाणत्वम् । न तत्साधूक्तम् । अदुष्टकारणत्वादस्य, तस्य च तदभावात् । तथा हि – शब्दः तावदपौरुषेयत्वाददुष्टः । प्रमेयस्य पुनर्ज्ञानहेतुत्वे न प्रमाणमस्ति, शब्दस्यैव तदेकनिष्ठत्वेन तन्नियमात् । चित्रस्य तु चाक्षुषज्ञाने सामग्र्यन्तःपातिनः श्यामादिरेखासंनिवेशविशेषो दोषः । तदभावे तिमिराभाव इव सम्यग्दर्शनोत्पत्तेः । अतः प्रवर्तमानमपि प्रमाणं संवादकमेवेति नाप्रामाण्यमावहति । न च संवादलक्षणं प्रामाण्यम् अपि तु बोधलक्षणमिति प्रमाणविदां स्थितिः । अतो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम्, एवं स्वरूपवाक्यानामपि । अनवगतार्थपरिच्छेदसामान्यात् ॥ पं. ८५.

(४) ननु विधिवाक्यानामेव प्रामाण्यं युक्तम् । क्रियार्थत्वादाम्नायस्य । न इतरेतराश्रयत्वात् । विधिवाक्यानामेव हि प्रामाण्ये सिद्धे क्रियार्थत्वमाम्नायस्य सिध्येत्. क्रियार्थत्वे च सिद्धे तेषामेव प्रामाण्यमिति । .... अतो यदवगमयत्याम्नायः, तदर्थः सः । तस्मात् यथाकार्यमवगमयन् तदर्थः, एवम् ऐकात्म्यमप्यवगमयन् तदर्थो भवितुमर्हति ॥ पं. ८५.

(५) नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् – इत्यक्रियार्थानां पदानामर्थशून्यत्वं शास्त्रतात्पर्यविद आहुः । .... उच्यते – नैव

सूत्रकारभाष्यकारयोरभिप्रायो लौकिको वा न्यायः सम्यगवगतो भवता। पश्यतु भवान्-'देवदत्त गामभ्याज शुक्लां दण्डेन' इति प्रवर्तकाभ्याजेति पदातिरेकिणां देवदत्तादिभूतार्थवादिनाम् अप्रवर्तकानामपि प्रवर्तकादेव वाक्याद् भूतवस्तुविषयमपि सामर्थ्यं प्रतीयते न वा? - इति। प्रतीयते चेत्, निष्प्रयोजनत्वमानर्थक्यं न निरालम्बनत्वम्। .... ब्रह्मात्मत्वावगति समन्वितानां तु परमपुरुषार्थफलानां कथं निष्प्रयोजनत्वम्? पं ९५, ९६.

(६) 'यद्यपि प्रवर्तकादेव वाक्यात्, भूतार्थविषयमपि सामर्थ्यं प्रतीयते तथापि नाप्रतिपन्नभूतार्थावगतेः संभवः। क्रियार्थतयैव संसर्गावगमात्'

इत्याशङ्क्य टीकायां प्रथमं समाधानमुक्तम् -

(1) 'वषट्कर्तुः प्रथमभक्षः', 'तस्मात् पूषा प्रपिष्टभागः' इत्येवमादौ क्रियाशून्यानां समन्वयो दृश्यते। यस्तु 'कर्तव्यः' इति क्रियासंबन्धः, स समन्वयनिमित्तो न तन्निमित्तः समन्वयः। यत्त 'तद्भूतानां क्रियार्थेन समाम्नायः' इति सूत्रयामास जैमिनिः, तदपि सिद्धेषु रूपादिष्वर्थेषु वर्तमानानां सामानाधिकरण्याद्यर्थत्वेन समाम्नायः समुच्चारणम् इति। यतो दर्शितः समन्वयो विशेषणविशेष्यत्वेनापि। 'क्रियार्थेन' इति तु धर्मजिज्ञासोपक्रमात् प्रकृतोपयोगितया सूत्रितम्। तथा च भाष्यकारोऽपि 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इति अर्थसद्भावमात्रे कथनीये 'कर्मावबोधनम्' इति प्रकृतोपयोगित्वेनैवोक्तवान्। .... पं. ९६.

द्वितीयं तु समाधानमित्थम् -

(2) इह पुनः 'तत्तु समन्वयात्' इति विशेषणविशेष्यात्मकमपि गौणमपि सामानाधिकरण्यं विहाय एकस्मिन् निरंशे चैतन्ये अधिकरणे 'तत्त्वमसि' इति समन्वयो मुख्यः प्रदर्शितः। तथा च भगवान् पाणिनिरव्यतिरिक्ते प्रातिपादिकार्थमात्रे प्रथमां स्मरति, नास्ति क्रियाकर्तृर्थेवातिरिक्तेऽर्थे। तेन च कात्यायनस्य अस्तिर्भवन्ति पर इति मतं नानुमन्यते। दृश्यते च 'फलिता अमी द्रुमाः', 'राज्ञोऽयं पुरुषः' इत्यस्तिक्रियाशून्यः समन्वयः। नात्रापि ये फलिता द्रुमाः, ते सन्ति; 'यो राज्ञः पुरुषः, सोऽस्ति' इति विवक्षितम्। अपि तु 'एते द्रुमाः फलिताः' 'अयं पुरुषो राज्ञः' इति संबन्धमात्रावसितं वाक्यम्, एवं सामान्यतः सिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे, त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वयो

वेदान्तवाक्यानां सिद्धः । न तत्रास्तिक्रियाया वस्तुस्वरूपान्तर्वर्तिन्या अप्यनुप्रवेशः, दूरत एव बाह्यायाः ॥ पं. ९६, ९७.

[" 'तत्तु समन्वयात्' इति चोदनालक्षणाद् धर्मात् तुशब्देन विशेष्यं ब्रह्म समन्वयगम्यम् उक्तम् । समन्वयो हि पदार्थानां संसर्गो वियोगः ; ततो ब्रह्म गम्यते, न चोदनातः-इत्यर्थः"(ब्र. सि. 155) - इति मण्डनवाक्येनेदं तुलयितव्यम् । एवम् अस्तिक्रियाविचारे (ब्र. सि. 99), जगत्कारणस्य सामान्यतोऽवगतस्य विशेषपर्यवसायित्वे च (ब्र. सि. 157) मण्डनग्रन्थेन तुलयितव्यमिदं वाक्यम् ॥]

अत्र

'अस्तिपदसहितानां परमात्मेश्वरादिप्रतिपादकवाक्यपदानां विशेषण-विशेष्यभावेन संहतिः, केन वार्यते ? ' (बृ. भा. १-३-१, पा. ६२७)

'अस्त्यस्तीत्यभ्युपेतत्वान्नैवमप्युपपद्यते ' (वा. १-३-८०)

इति भाष्यवार्तिकयोरस्तिक्रियासहितान्वयमङ्गीकृतं परित्यज्यैव किमिति ब्रह्मसिद्धिकारोक्तप्रकारेण 'फलिता अमी द्रुमाः' इत्याद्युदाहरणेनैव परितुष्टा ग्रन्थकारा इति न विज्ञायते । एवं –

भेदसंसर्गहीनत्वात् पदवाक्यार्थतात्मनः ।
दुःसंभाव्याऽत आत्मायमात्मनैवानुभूयते ॥ वा. १-४-१४०८, पा. ७१३

इत्यादिवार्तिकोक्तिमनादृत्यैव 'सामान्यतः सिद्धजगत्कारणत्वस्य सर्वज्ञत्वादि-स्वभावत्वे' समन्वयं वाक्यार्थत्वमेव मण्डनरीत्या स्वीकुर्वतां क आशय इत्यपि न विज्ञायते ॥

यथोद्धृतेषु टीकाग्रन्थभागेषु सर्वत्र विधिकाण्डस्थवाक्यसामान्येनैव शब्दधर्मपरिशीलनेन श्रुतेरपौरुषेयत्वोपस्थापनेन वा वेदान्तप्रामाण्यं प्रति-ष्ठापितम्, न त्वनुभवारूढत्वं वाक्यजन्यज्ञानफलस्य क्वचिदादर्शितम् । यथा भाष्ये–

'कर्मफले हि स्वर्गादावनुभवानारूढे स्यादाशङ्का 'भवेद् वा न वा' इति । अनुभवारूढं तु ज्ञानफलम् । 'यत्साक्षादपरोक्षाद् ब्रह्म ' (बृ. ३-४-१) इति श्रुतेः, 'तत्त्वमसि' (छां. ६-८-७) इति च सिद्धवदुपदेशात् ॥

सू. भा. ३-३-३२, पा. ४०७

इत्यादिस्थलेषु । एतदपि कस्य हेतोरिति न विद्मः ॥

आत्मसाक्षात्कारः—

१४९. वेदान्तवाक्येनैव ब्रह्मज्ञानं साक्षाद् भवति वा न वा ? — इत्यत्र टीकायां निःसन्दिग्धतया कण्ठरवेण स्वाभिप्रायो न प्रकटितो ग्रन्थकारैरिति भाति । तत्रेमानि टीकावाक्यानि समालोचनीयानि —

(१) यद्यपि वाक्यार्थज्ञानं शास्त्रानुग्रहात् प्रागेवोदेति, तथापि स्वोत्पत्तिसमकालसमुत्थेन सामान्यतोदृष्टनिबन्धनेन अर्थान्तरनिवेशिना समकक्षाभिमतेन ज्ञानेन विरोधात्, उन्मज्जननिमज्जनमिवानुभवत्, अस्यामवस्थायां संशयज्ञानकोटिनिक्षिप्तं सत्, मीमांसया शब्दशक्त्यनुसरणे सति प्रतिपक्षज्ञानस्यानुत्पत्तौ निमज्जनाभावात्, निश्चलं निर्णयज्ञानमिव जातमिति लक्षणया मीमांसया निर्णयः क्रियत इत्युच्यते । न पुनः साक्षान्निर्णयज्ञानहेतुत्वात् ॥ पं. ६९.

[अत्र वेदान्तवाक्यैरेव ज्ञानस्य समुत्थत्वेऽपि कारणान्तरात् संशयकोटिनिक्षिप्तत्वे सति तन्निवारणेन निर्णयज्ञानमिव कुर्वत्, मीमांसाशास्त्रं सप्रयोजनं भवतीत्युक्तम् ॥]

(२) प्रकृते पुनर्विषये विद्या उदितापि न प्रतिष्ठां लभते। असंभवनाविपरीतभावनाभिभूतविषयत्वात् । तथा च लोके यस्मिन् देशे काले च 'इदं वस्तु स्वरूपत एव न संभवति' इति दृढभावितम्, यदि तत् कथञ्चिद् दैववशादुपलभ्येत, तदा स्वयमीक्षमाणोऽपि तावन्नाध्यवस्यति यावत् तत्संभवं नानुसरति । तेन सम्यग्ज्ञानमपि स्वविषये अप्रतिष्ठितमनवाप्तमिव भवति । तेन तत्स्वरूपप्रतिष्ठायै तर्कं सहायीकरोति ॥

(३) क्व तर्हि तर्कस्योपयोगः ? विषयासंभवाशङ्कायां तथानुभवफलानुत्पत्तौ तत्संभवप्रदर्शनमुखेन फलप्रतिबन्धविगमे । तथा च तत्त्वमसिवाक्ये त्वंपदार्थो जीवः तत्पदार्थब्रह्मस्वरूपताम् आत्मनोऽसंभावयन्, विपरीतं च रूपं मन्वानः, समुत्पन्नेऽपि ज्ञाने तावन्नाध्यवस्यति यावत् तर्केण विरोधमपनीय तद्रूपताम् आत्मनो न संभावयति । ततः प्राग् विद्या उदितापि वाक्यादनवाप्तेव भवति । अवाप्तिप्रकारश्च वेदान्तेष्वेव निर्दिष्टः साक्षादनुभवफलोद्देशेन ॥ पं. ३९.

[अत्रापि ज्ञानस्य समुत्पत्तावपि, असंभावनादिनिवृत्त्यर्थं तर्क इत्युक्तम् ॥]

(४) अवगतिरिति साक्षादनुभव उच्यते । ज्ञानं तु परोक्षे अनुभवानारूढेऽपि संभवति । संनिहितेऽपि असंभावितविषये अनवसितरूपम् इत्युक्तं पुरस्तात् ॥ पं. ६६.

[अत्रानवसितरूपं ज्ञानं किं परोक्षम् उतापरोक्षम् ? संनिहितविषयत्वादपरोक्षमिति शक्यं वक्तुम्, अनवसितरूपत्वात् परोक्षमेवेति च ॥]

'वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा' (सू. भा. १-१-१, पा. ६) इति भाष्यव्याख्यानप्रसङ्गेनेदं लिखितं टीकायाम् –

(५) तर्को युक्तिः, उपकरणम्, इतिकर्तव्यता । सहकारिकारणमिति यावत् । अथवा तर्कोऽनुमानं वेदान्तैरविरुद्धम् । तदर्थप्रतीतेरेव दृढत्वहेतुतया उपकरणमस्या इत्यर्थः ॥ पं. ७६.

[अत्र तर्कशब्दस्यासंभावनादिनिवर्तकयुक्तिपरत्वम्, वाक्यार्थप्रतीतिदार्ढ्यर्थानुमानपरत्वं वा – इत्युक्तम् ॥]

'श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम् । अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य' (सू. भा. १-१-२, पा. ८) इति भाष्यव्याख्यानावसरे टीका –

(६) 'श्रुतिः पदान्तरनिरपेक्षः शब्दः । आदिशब्देन लिङ्गवाक्यादयः शब्दप्रकारा गृह्यन्ते । न त एव ब्रह्मणि प्रमाणम्, किं तु, अनुभवादयोऽपि । तत्र हेतुमाह – 'अनुभवावसानत्वात् भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य' इति । सिद्धे वस्तुनि संभवत्यनुभवः, तदवसाना आकाङ्क्षानिवृत्तिर्यतः ॥ पं. ७९.

(७) इह तु सिद्धस्य साक्षाद्रूपेण विपर्यासगृहीतस्य सम्यग्ज्ञानेन साक्षात्करणमन्तरेण न मिथ्याज्ञानोदयनिवृत्तिः । द्विचन्द्रादिषु तथा दर्शनात् ॥ पं. ८०.

[अत्र साक्षाद्रूपस्य मिथ्याज्ञानस्य ब्रह्मवस्तुसाक्षात्काररूपानुभवं विना अनिवृत्तिः – इत्युक्तम् ॥]

(८) नन्वेवं सति कथं युक्तिरब्रह्मविषया सती तद्विषयाणां वाक्यानामुपकरणं भवति ? उच्यते – ब्रह्मपरेषु वाक्येषु मृदादिदृष्टान्तैर्युक्तस्य

उपन्यस्यन्ते । ताश्च विधिप्रतिषेधवाक्ययोः प्रवर्तकत्वनिवर्तकत्वाकाङ्क्षित-स्तुतिनिन्दार्थवादवत् स्वरूपवाक्यस्य फलपर्यन्तापेक्षितसंभावनार्थवादतां प्रतिपद्यमानाः, तत्र श्रुतिसाहाय्ये वर्तन्त इत्युच्यते ॥ पं. ८१-

[अत्र युक्तीनां संभावनामात्रसंपादनेन साक्षात्करणे हेतुत्वम् इत्युक्तम् । अतो वाक्येन न साक्षाज्ज्ञानं जातमित्यपि व्याख्यातुं शक्यते । मृदादिदृष्टान्ताः 'कथं स आदेशो भवति ?' इति प्रश्ननिर्णयार्थमुपन्यस्ताः कथमिव वाक्यार्थ-संभावने विनियुज्यन्त इति टीकायां नोपपादितमिति भाति ॥]

प्रतिपत्तिविधिनिराकरणम्–

१५०. 'प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते' (सू.भा. १–१–४, पा. १२) इति पूर्वपक्षनिरासिभाष्यव्याख्यानावसरे टीकायाम् –

(१) किमिदं ज्ञानं ब्रह्मकर्मकं विधीयते ? न तावच्छब्दजन्यम् । स्वाध्यायपाठादेव तत्सिद्धेः ॥

(२) अथशब्दजन्यस्यैव ज्ञानस्याभ्यासो विधीयत इति । न तस्य प्रयोजन पश्यामः । ननु इष्टविषयस्य ज्ञानसन्तानस्य सुखसन्तानहेतुत्वं दृश्यते । यद्येवम्, तद्वदेव विध्यानर्थक्यम् । अथ पुनः साक्षात्करणाय ज्ञानसंतानविधिरुच्यते, नैतद् युक्तम् । न हि दृष्टाधिकारो विधिरसंभावित-दृष्टफलो भवति । न हि लैङ्गिकोऽर्थो लिङ्गजन्मनैव ज्ञानेन सहस्रशोऽप्यभ्यस्य-मानेन साक्षात्क्रियते, मा भूत् शाब्दज्ञानादेव अभ्यस्यमानात् साक्षाद्भावः । तज्जन्मनो ज्ञानान्तराद् भविष्यति । नेत्थंभावे प्रमाणमस्ति ॥

(३) अस्तु तर्हि शब्दात् प्रतिपन्नस्य यथाप्रतिपत्ति ध्यानं नाम मनो-व्यापारो विधीयत इति । किमर्थं तस्य विधानम् ? ध्येयसाक्षात्काराय । न तस्य संभवः । न हि परोक्षं ध्यायमानं साक्षाद्भावमापद्यमानं दृष्टम् । ननु दृष्टं परोक्षमपि ध्यायमानं साक्षाद्भावमापन्नं कामाद्युपप्लवे । मैवम् । न तद् ध्यायमानम् । अपि तु, अविद्यात्मकम् । अन्यथा बाधो न भवेत् । ननु 'द्रष्टव्यः' इति दर्शनमनूद्य 'निदिध्यासितव्यः' इति ध्यानं दर्शनफलं विधीयते । उक्तमेतत्, न दृष्टाधिकासे विधिरसंभावितदृष्टफलो भवतीति । न हि ध्यानं ध्येयसाक्षाद्भावहेतुः कचिद् दृष्टम् । अथापि भवतु नाम ध्यानाद् ध्येयसाक्षाद्भावः, ध्येयस्य तथात्वे किं प्रमाणम् ? शब्दस्तावत् साक्षात्करणो-

पायोपासनविधाने पर्यावसितो, न तत्सद्भावे । सत्यम् । तथापि तत्त्वं सिध्यति वक्ष्यमाणेन देवताविग्रहवत्त्वन्यायेन । विषम उपन्यासः । तत्र हि न तथात्वे साधकं बाधकं वा – इति प्रतीतिशरणैस्तथाऽभ्युपेयते । न तथेह सर्वस्यात्मत्वे । प्रत्यक्षादिविरोधात् । आरोपितरूपेणापि ध्यानोपपत्तेः । पूर्वोक्तेष्वपि ज्ञानविधिपक्षेषु, अनयैव दिशा वस्तुतथात्वसिद्धिर्निराकार्या ॥ पं. ८७, ८८.

एवमेव

(४) 'शाब्दज्ञानादन्यदेव ज्ञानान्तरमलौकिकं वेदान्तेषु कर्तव्यत्वेन विधीयते' इति पक्षः, ज्ञानकर्मणोऽवगतत्वे विधानमनर्थकम्, अनवगतत्वे न विधानं शक्यम् इति, साधनमपि ज्ञानस्य न विहितं तेन साकाङ्क्षं विधानम् इति च प्रत्युक्तः। (५) देवताविग्रहन्यायेन 'मोक्षकामस्य ब्रह्मोपासनं विधीयते' इति पक्षश्च कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्' इति भाष्यावष्टम्भेन प्रत्युक्तः ॥ पं. ८८.

एवं 'सिद्धैव ननु ब्रह्मजिज्ञासा, 'अथातो धर्मजिज्ञासा' इति सकलवेदार्थविचारस्योदितत्वात् ब्रह्मज्ञानस्य च चोदनालक्षणत्वेन धर्मस्वरूपत्वात्' इत्याशङ्क्य –

(१) अत्र विध्यभावात् अविवक्षिता वेदान्ता इति धर्मजिज्ञासानन्तरं स्नाने प्राप्ते अथ ब्रह्म जिज्ञासितव्यम्, न स्नातव्यम् । कर्माभिधायिनोऽपि कृत्यप्रत्ययान्नियोगसंप्रत्ययात्, अविद्योच्छेदस्य प्रयोजनस्योपलभ्यमानत्वात्–इति वदताम् एकदेशिनां पक्षः (पं. ४२) ; (२) 'ब्रह्मणि प्रत्यक्षादिप्रत्ययान्तराणामसंभवात् परिनिष्पन्ने वस्तुनि प्रतिपत्तिहेतुतया संभावितसामर्थ्यानामपि, आम्नायस्य पुनः कार्यविषयतया सुतरामसंभवं मन्वानस्य पूर्वपक्षनिरासार्थम् इहापि सर्वेष्वेवात्मज्ञानविधानेषु कार्यनिष्ठतां वर्णयन्ति समाम् । तत्त्वावबोधश्च कार्यम्, अधिकारिनियोगविषयतया अवगमात्' इतिवदताम् एकदेशिनां पक्षः (पं. ४३) ; (३) 'इह सर्वस्यात्मभावना विधीयते । अनात्मस्वभावविलयनेन हि वस्तुनोऽवगतिर्दृष्टा ।

विध्यभावेऽपि कल्प्यतां विधिः' इति वदतामेकदेशिनाम् (पं. ४४); (४) शाब्दज्ञानान्न तथा अनुभवः, तेन साक्षात्करणाय विधिरिति' वदतामपि पक्षः (पं. ४६); (५) किमत्र विधिना श्रुतेन? स्वयमेव साक्षात्कारकरणाय पुरुषार्थत्वादभिमुखः पुरुषः। सिद्धश्च ज्ञानाभ्यासः शास्त्रादौ साक्षात्करणे हेतुः' इति वदतामेकदेशिनां च पक्षः (पं. ४६)– इत्येते पूर्वपक्षा अनूद्य खण्डिताः। तथा (६) कार्यनिष्ठे वेदे वस्तु-तत्त्वसिद्धिर्मनोरथ एव। अहंप्रत्ययावसेय एवात्मा न तस्य शब्दावसेयवद् अतीन्द्रियं रूपान्तरमस्ति। शब्दस्य तत्र सामर्थ्याभावात्। एवं च सति 'अयमात्मा ब्रह्म', 'एष त आत्मा अन्तर्याम्यमृत' इति ब्रह्मात्मान्तर्याम्यादि-शब्दा अहंप्रत्ययावसेय एवात्मनि कथञ्चिद् वर्तन्ते। तेन 'स आत्मा तत्त्वमसि' इति विद्यमानैः, आरोपितैश्च गुणैरात्मोपासनं मोक्षफलं च विधीयते–इति वदतामपि पूर्वपक्षो (पं. ४७) निराकृतः॥

तदेवं ब्रह्मजिज्ञासारम्भसमर्थनार्थव्याजेन सर्वविधिसंपर्कराहित्यं ब्रह्मणि साधयन्तो ग्रन्थकारा वार्तिकब्रह्मसिद्ध्योरुक्तानाम् अनुक्तानामपि कतिपयानां वृत्तिकाराणां अथशब्दार्थनिर्णयप्रस्तावेन चानूद्य प्रतिचिक्षिपुः। तत्र तत्र ब्रह्मसिद्ध्यादृतविचारसरणिश्च दृश्यते टीकायाम्। तदिमे ग्रन्थकाराः किं मण्डनसमकालीनाः, उत ततोऽपि प्राचीनतराः – इत्येष ग्रन्थपुरातत्त्वनिर्णयकोविदानामेव विषय इति न तत्र किमप्यस्माभिरुच्यते॥

अनाद्यविद्यानिवृत्तिः कथम्? –

१५१. 'नन्वनर्थहेतुरध्यासोऽनादिः, स कथं प्रहीयते? तथा हि मनुष्यादिजातिविशेषमात्राध्यासस्ततो विविक्तेऽपि न्यायतोऽहंप्रत्यये, अनादित्वात् पूर्ववदविकलो वर्तते' इत्याशङ्क्य टीकायामुक्तः परिहारः॥

(१) नायं दोषः। 'तत् त्वमसि' इत्यादिवाक्याद् ब्रह्मरूपावगाहि ज्ञानान्तरोत्पत्तेरिष्टत्वात्। तद् हि ब्रह्मणोऽवच्छिद्यैव चैतन्यस्य ब्रह्मरूपत्व-प्रच्छादनेन जीवरूपत्वापादिकाम् अनादिसिद्धामविद्याम् अहङ्कारादिविक्षेप-

हेतुं निराकुर्वदेवोत्पद्यते ततः कारणनिवृत्तौ तत्कार्यम् अहमिति जीवे भोक्तृत्वरूपता सपरिकरा निवर्तत इति युज्यते। अहंप्रत्ययः पुनः अनादिसिद्धो अनादिसिद्धेनैव कार्यकरणमात्रेण सहभावात्, अविरोधान्न स्वरूपविवेकमात्रेण निवर्तते, नापि ज्ञानान्तरं समुत्पन्नम् इति विशेषः' ॥ पं. ३७.

'ननु ब्रह्मज्ञानादग्रहणापाये तन्निमित्तस्य अहङ्कारग्रन्थेस्तत्कालमेव अभावः प्रसज्येत' इत्याशङ्क्य टीकायाम् अयं परिहार उक्तः –

(२) न। संस्कारादप्यग्रहणानुवृत्तेः संभवात्, भयानुवृत्तिवत्। तथा हि। सम्यग्ज्ञानान्निवृत्तमपि भयं स्वसंस्कारादनुवर्तते. कम्पादिनिमित्तं च भवति। तथा अग्रहणमपि स्वसंस्कारादनुवर्तते. अहङ्कारग्रन्थेश्च निमित्तं भवतीति न किञ्चिदनुपपन्नमस्ति ॥ पं. ४०.

अत्र 'तत् त्वमसि'वाक्याज्ज्ञानान्तरं जायते तेन चोत्पन्नमात्रेणाविद्यानिवृत्तिरित्युक्तम्। ज्ञानाभ्यासात्, उपासनाद्वा यथार्थसाक्षात्कारानुभवो न दृष्टः इति–

(अ) नाप्यभ्यासात् साक्षाद्भावः सिद्धः ॥ पं. ४६.

(आ) न हि दृष्टाधिकारो विधिरसंभावितदृष्टफलो भवति। न हि लैङ्गिकोऽर्थो लिङ्गजन्मनैव ज्ञानेन सहस्रशोऽप्यभ्यस्यमानेन साक्षात्क्रियते ॥ पं. ८७.

(इ) न हि परोक्षं ध्यायमानं साक्षाद्भावमापद्यमानं दृष्टम् ॥ पं. ८७.

(ई) न हि ध्यानं ध्येयसाक्षाद्भावहेतुः क्वचिद् दृष्टम्। अथापि भवतु नाम ध्यानाद् ध्येयसाक्षाद्भावः, ध्येयस्य तथात्वे किं प्रमाणम्? पं.८८.

–इत्यादिवाक्यैरसकृदुद्धोषितम्। अथ च 'स्वयमेव साक्षात्करणाय, पुरुषार्थत्वादभिमुखः पुरुषः, सिद्धश्च ज्ञानाभ्यासः शास्त्रश्रवणादौ साक्षात्करणे हेतुः?' – इति मतनिराकरणावसरे

(उ) 'यद्येवं किं विधिना? स्वयमेव पुरुषार्थे निर्ज्ञाते हेतौ प्रवर्तते ॥ पं. ४६.

– इति ज्ञानाभ्यासेन साक्षात्कारः स्वाभिप्रायविरोधेनैव मण्डनानुसारेण समालम्बितः। कथमेतदिति न विज्ञायते ॥

एवम् 'निश्चितेऽपि प्रमाणात् तत्त्वे सर्वत्र मिथ्यावभासा निवर्तन्ते हेतुविशेषादनुवर्तन्तेऽपि । यथा द्विचन्द्रदिग्विपर्यासादय आप्तवचनविनिश्चितदिक्चन्द्रतत्त्वानाम्' (ब्र.सि. 35) इति मण्डनमतमेवात्रापि प्रकारान्तरेणावलम्बितम् । 'प्रमितरज्जुभावाया अपि रज्ज्वाः, प्रमाणाननुसंधाने सर्पभ्रान्त्या भयदर्शनात्' (ब्र. सि. 35) इति, 'यथा रज्ज्वां सर्पसमारोपसमुत्थभयजन्मनो वेपथुप्रभृतयस्तत्त्वदर्शनादपावृत्ते भये कस्यचित् तदैव निवर्तन्ते, कस्यचित् कियन्तञ्चित् कालमनुवर्तन्ते तत्संस्कारात्' (ब्र. सि. 131) इति च मण्डनविचारसरणिरप्यनुसृता ॥

इयांस्तु विशेषोऽत्र दृश्यते –

(१) 'जातेऽपि प्रमाणात् तत्त्वदर्शने अनादिमिथ्यादर्शनाभ्यासपरिनिष्पन्नस्य द्वितीयस्य संस्कारस्याभिभवायोच्छेदाय वा तत्त्वदर्शनाभ्यासं मन्यन्ते' – इति मण्डनः ॥ (ब्र. सि. 35.)

(२) न कर्मनिमित्तत्वात् शरीरसंबन्धः । इतरेतराश्रयदोषात्, क्रियादिरहितत्वाच्च चैतन्यस्य । अनादित्वेऽपि अन्धपरम्परावद्प्रतिष्ठत्वात् । तन्निमित्तत्वे च पुत्रादिशरीरेष्विव गौणत्वप्रसङ्गात् । तथानुभवाभावात्, प्रसिद्धगौणत्वप्रकारासंभवात् । पुत्रादिशरीरेणेव स्वशरीरेणापि प्रमातृत्वाभावप्रसङ्गात् ॥

पारिशेष्यात् अविद्यानिमित्तः शरीरसंबन्धः । तस्यां च निवृत्तायां तत्संबन्धनिवृत्तौ कथं पूर्ववद् तन्निमित्तः सुखदुःखानुभवः ? तथा च श्रुतिस्मृतिवादा ब्रह्मविदः सर्वसंसारप्रवृत्त्यभावं दर्शयन्तः उदाहृता भाष्ये । तस्मात्, न ब्रह्मात्माभिमानिनः पूर्ववत् संसारित्वम् । तदभिमानविरोधात् । वैषयिकस्तु साक्षादनुभवाभिमानः संसारविषयः, आरब्धेकर्मशेषनिमित्तः । तिमिरनिमित्तद्विचन्द्रवत् । मननिदिध्यासनयोर्न ब्रह्मावगत्युत्तरकालीनता किं तु श्रवणवद्वगत्युपायतया पूर्वकालतैवेत्युक्तम् ॥ पं. ९८–९९

इति तु टीका ॥

अत्र संस्कारादप्यग्रहणानुवृत्तिः संभवति, सा च अहङ्कारग्रन्थेनिरिष्टं भवति – इत्यङ्गीकारे, तस्य ब्रह्माभिमानविरोधात् न यथापूर्वं

संसारित्वमिति कथम् ? मननिदिध्यासनयोर्ब्रह्मावगतिपूर्वकालीनैवेति स्वीकारात् अग्रहणानुवृत्तेर्निवृत्तिः कथं भवति ?–इत्येतत् स्पष्टतया नोक्तं टीकायाम् । संस्कारादेवावगतब्रह्मणो व्यवहारो भवति ; स च संस्कारः प्रारब्धकर्मक्षये स्वयमेव क्षीणो भवतीति ग्रन्थकाराशयः स्यादिति यथोदाहृतवाक्यबलादुन्नीयते ॥

कार्यकारणप्रक्रिया –

१५२. ब्रह्मणो जगत्कारणत्वमुद्दिश्य प्रवृत्तानीमानि टीकावाक्यानि –

(१) यदवष्टम्भो विश्वो विवर्तते प्रपञ्चः, तदेव मूलकारणं ब्रह्म ॥ पं. ७८.

(२) 'न यथोक्तविशेषणस्य' इत्यादिना भाष्येण युक्तिरपि ब्रह्मस्वरूपनिर्णयाय अनेनैव सूत्रेण तन्त्रेण, आवृत्त्या वा 'जन्माद्यस्य यतः संभवति' इति सूत्रिता – इति दर्शयति ॥ पं. ७८.

(३) अतो युक्त्यापि वस्त्वन्तरस्य कारणत्वसंभावनानिराकरणेन पारिशेष्यात् पूर्वोक्तविशेषण ईश्वर एव कारणमिति सिद्धम् ॥ पं. ७९.

(४) 'नन्विहापि तदेवोपन्यस्तम्' इति । यथा धूमविशेषस्य अगुरुसंभवत्वम्, तथा प्रपञ्चसंनिवेशविशेषस्य सर्वज्ञत्वादिगुणकारणत्वम् इति । 'न । वेदान्तवाक्यार्थग्रथनार्थत्वात् सूत्राणाम्' इति । सत्यम् । तदेवोपन्यस्तम् उपकरणत्वेन । न तत्र तात्पर्यम् । तात्पर्यं तु वेदान्तवाक्यग्रथने ॥ पं. ७९.

(५) पृथिव्यादीनां जन्मादिदर्शनात्, तत्कारणे एकत्वनानात्वयोरन्यतरावगमे प्रमाणाभावात्, बुद्धिमत्कारणपूर्वतामात्रे प्रतिपन्ने 'यतो वा इमानि' इति कारणस्यैकवचननिर्देशात्, तदर्थमात्रस्यैव विधित्सितत्वात्, अर्थात् सर्वज्ञं सर्वशक्ति जगत्कारणम् – इति कारणविशेषो वाक्यादवगम्यते । पुनः 'तद्विजिज्ञासस्व' इत्यनूद्य 'तद् ब्रह्म' इति तत्र ब्रह्मशब्दप्रयोगात् , बृंहत्यर्थान्वयेन, सर्वतोऽनवच्छिन्नस्वभावं जगत्कारणं ब्रह्मपदस्यार्थ इति गम्यते । तस्य च निर्णये वाक्यमपि 'आनन्दाद्ध्येव खलु' इति प्रसिद्धावद्योतकेन हिशब्देन संयुक्तम् आनन्दावद्योतकम् उपपद्यते ॥ पं. ८१.

(६) तस्मात् ब्रह्मपरे वाक्ये जन्मादिधर्मजातस्य उपलक्षणत्वात्, ब्रह्मसंस्पर्शाभावात्, सर्वज्ञं सर्वशक्तिसमन्वितं परमानन्दं ब्रह्म – इति जन्मादिसूत्रेण ब्रह्मस्वरूपं लक्षितमिति सिद्धम् ॥ पं. ८१.

अत्र 'अथातो ब्रह्मजिज्ञासा' इति जिज्ञासायाः कर्तव्यत्वोपदेशमुखेन वेदान्तवाक्यमीमांसाप्रारम्भः प्रतिज्ञात इति तावदविवादम् । किंलक्षणं पुनस्तद्वेदान्तगम्यं ब्रह्म ? – इत्यत इदमुत्थितं सूत्रम् । तथैव च भाष्यकारीयसूत्रपातनिका दृश्यते । तत् कथमिह 'तन्त्रेण, आवृत्त्या वा युक्तिरप्यत्र सूत्रिता' इति कल्प्यताम् ? न चेह लक्षणद्वारेण ब्रह्मस्वरूपास्तित्वसंभावना विवक्षितेति वक्तुं शक्यम् । न हि सूत्रे, तदनुगतश्रुत्यां वा संभावनावक्ता शब्दोऽस्तीति । यदपि भाष्यं 'न यथोक्तविशेषणस्य जगतः' इत्यादि, तदपि प्रधानादितो जगदुत्पत्त्याद्यसंभवं ब्रुवदपि यथाटीकाप्रदर्शितां युक्तिं समर्पयितुं नालम् । न हि तत्र वाक्यशेषे टीकायामिव 'कारणसामान्ये सिद्धे तद्विशेषावगमाय' (पं. ९८) वेदान्तवाक्यानि प्रवृत्तानीति समभिहितमुपलभ्यते । प्रत्युत 'सत्सु तु जगतो जन्मादिकारणवादिषु' इति सूत्रविषयवाक्यम् आगमविधयैव निर्दिष्टम्, तत्सहायत्वेनैव च तर्कापेक्षा कीर्तिता । स्पष्टमेव चानुमानप्रत्याख्यानं भाष्ये 'तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम्' (सू. भा. १–१–२, पा. ८) इति । स्वोक्तिविरुद्धं चेदं वचनम् 'मृदादिदृष्टान्तयुक्तयः संभावनार्थवादतां प्रतिपद्यमानाः श्रुतिसाहाय्ये वर्तन्त' इति, 'युक्तिमपि तदुपकरणां तदर्थानुभवप्रयोजनां सूचयति' इति हि पूर्वं प्रतिज्ञातम् । 'श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम्' इति च भाष्यम् । न चेह कथमनुभवाङ्गता तर्कस्य ? – इति, प्रमाणभूतोऽनुभवः कीदृशोऽभिप्रेतोऽत्र फलभूतानुभवाद्विलक्षणः ? – इति वा विमृष्टमस्ति । अतो टीकाभिप्रायोऽत्र विमृश्य निर्णेयः पण्डितैरिति भाति ॥

इदमप्यत्र चिन्तितव्यम् । भाष्ये तावत्, जगत्सृष्टिर्मायिक्येवेति स्पष्टमुल्लिखितम् –

(१) न च विषदादिसर्गस्याप्यात्यन्तिकं सत्यत्वमस्ति । प्रतिपादितं हि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (सू. भा. २-१-१४) इत्यत्र समस्तस्य प्रपञ्चस्य मायामात्रत्वम् । .... अतो वैशेषिकमिदं स्वप्नस्य मायामात्रत्वमुदितम्' (सू. भा. ३-२-४, पा. ३४७)

इति । टीकायां त्वत्रानुमानाद्युपन्यासेन कारणावधारणात्, किं मायामयं जगत्, किं वा वस्तुवृत्तेनैव ब्रह्मणः कार्यं तत् ? – इति न स्पष्टं भवति । यद्यपि 'नन्वेवं सति बुद्धिपूर्वत्वात् सापेक्षं स्यात्' इति शास्त्रस्य ब्रह्मकारणकत्वे सापेक्षत्वमाशङ्क्य समाहितम् –

(२) न स्यात्, ब्रह्मवदनादित्वात्, कूटस्थनित्यत्वाच्च । कथं पुनस्ततो जन्म ? तत्परतन्त्रत्वात्, रज्जुसर्पवत् । तथा च श्रुतिः निःश्वसितमेतदिति ॥ पं. ८२.

इति, ततश्च जगतोऽपि ब्रह्मकारणकस्य मिथ्यात्वमुक्तमेव भवति, तथापि कया नीत्या तस्य मिथ्यात्वमुररीकृतमिति तु 'तदनन्यत्व'सूत्रटीकासमुपलम्भाभावान्न निश्चीयते । अथवा रज्जुसर्पदृष्टान्तोपादानात्, अत्राप्यनिर्वचनीयं जगदुत्पद्यत इत्येव टीकाकाराभिप्रायः स्यादित्युन्नीयते ॥

अवस्थात्रयप्रक्रिया –

१५३. सूत्रतृतीयाध्यायपर्यन्तटीकाया इदानीम् अनुपलभ्यत्वात्, अवस्थात्रयप्रक्रिया टीकासंमता कीदृशीति विनिश्चित्य वक्तुं न पारयामः ॥

तत्र अध्यासलक्षणं स्वप्नशोकादौ न व्याप्तोतीत्याशङ्क्य तत्रापि दोषसंस्कारादिकमस्तीति यथा समाहितं तत् प्रागेव (खं. १३८) निवेदितम् । तत्र स्वप्ने समुत्पन्नमिथ्याज्ञानस्य मनोऽवच्छिन्नापरोक्षचैतन्यस्था अविद्याशक्तिरालम्बनतया विवर्तते–इत्युक्तम् । तदनु लिखितमित्थम् –

(१) नन्वेवं सति, अन्तरेव स्वप्नार्थप्रतिभासः स्यात् । को वा ब्रूते नान्तरिति ? ननु विच्छिन्नदेशोऽनुभूयते स्वप्नेऽपि जागरण इव । न तदन्तरनुभवाश्रयत्वे स्वप्नार्थस्य, उपपद्यते । ननु देशोऽपि तादृश एव

कुतस्तत्संबन्धाद् विच्छेदोऽवभासते ? अयमपि तर्हि अपरो दोषः । नैष दोषः । जागरणेऽपि प्रमाणज्ञानात् अन्तरपरोक्षानुभवात्, न विषयस्या अपरोक्षता मिद्यते । एकरूपप्रकाशनात् । अतोऽन्तरपरोक्षानुभवावगुण्ठित एव जागरणेऽप्यर्थोऽनुभूयते । अन्यथा जडस्य प्रकाशानुपपत्तेः । यथा तमसा अवगुण्ठितो घटः प्रदीपप्रभावगुण्ठनमन्तरेण न प्रकाशीभवति, एवम् । यः पुनर्विच्छेदावभासः, स जागरेऽपि मायाविजृम्भितः । सर्वस्य प्रपञ्चजातस्य चैतन्यैकाश्रयत्वात् । तस्य च निरंशस्य प्रदेशभेदाभावात् ॥ पं. १०–११.

(२) अविद्याशक्तिः सुषुप्तादौ अहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवति ॥ पं. ५.

(३) सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिरनादिरविद्या ॥ पं. २०.

(४) स पुनरेवंभूतो जाग्रत्स्वप्नयोरहमुल्लेखरूपेण, सुषुप्ते तत्संस्कार-रञ्जिताग्रहणाविद्याप्रतिबद्धप्रकाशत्वेन च गतागतमाचरन् संसारी जीवः, विज्ञानघनो विज्ञानात्मा, प्राज्ञः, शरीरी, शारीर आत्मा, संप्रसादः, पुरुषः, प्रत्यगात्मा, कर्ता, भोक्ता, क्षेत्रज्ञ–इति च श्रुतिस्मृतिप्रवादेषु गीयते ॥ पं. २९.

(५) 'यत्र यदध्यासः, तत्कृतेन गुणेन दोषेण वा अणुमात्रेणापि स न संबध्यते'–इत्यवास्तवमनर्थं दर्शयति । वास्तवत्वे हि न ज्ञानमात्रात् तद्विगम इति प्रतिज्ञा हीयेत ॥ पं. ३०.

(६) ननु ब्रह्मज्ञानादग्रहणाभावे तन्निमित्तस्य अहङ्कारग्रन्थेस्तत्काल-मेव अभावः प्रसज्येत । न । संस्कारादप्यग्रहणानुवृत्तेः संभवात् ॥ पं. ४०

(७) यदा पुनस्तद्रूपं विस्मृतसुवर्णवद्वासम् ; तदा स एव प्रमातृत्वाभिमतो निरस्तसंसारदोषः संपन्नः ॥ पं. १००.

तथा चोक्तम् –

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ (गौ. का. १–१६) पं. १५.

(८) नन्वस्त्येव सुषुप्तेऽहमुल्लेखः 'सुखमहमस्वाप्सम्' इति सुप्तोत्थि-तस्य स्वापसुखानुभवपरामर्शदर्शनात् ; नात्मनोऽन्यस्य तत्रानुभवः संभवति । सत्यमस्ति । न तत्स्वापे सुखानुभवसंस्कारजं स्मरणम्, किं तर्हि सुखावभर्शो दुःखाभावनिमित्तः ॥ पं. १९.

अत्रावस्थात्रयेऽपि अविद्याशक्तिः, अहङ्कारसंस्कारसचिवा अवतिष्ठते – इत्युक्तम् । ज्ञानेन तदपायेऽपि संस्कारादनुवृत्तिरिति कथम्, अविद्याया अनात्मधर्मत्वं कथं केनानुभवेन विज्ञायते शास्त्रोपदिष्टस्यापि-इति तु न कथितम् । संस्कारात् सदा अनुवर्तमानाया अविद्याया अवास्तवत्वं केन प्रकारेण जिज्ञासूनाम् अनुभवमारोक्ष्यति ? – इत्येतत्तु न टीकायां क्वचिदप्युक्तम् उपलभ्यते ॥

(1) तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ३-२-७

इति सूत्रे

(2) 'तस्मादात्मैव सुप्तिस्थानम् ॥' (सू. भा. ३-२-७)

इति तद्भाष्ये वा अविद्याशक्तिः किमिति न परामृष्टा ?–इति नात्रोक्तम् ॥

(3) येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात् संपद्यते, तस्येदानीं स्वरूपं श्रुतिवशेन निर्धार्यते ॥ सू. भा. ३-२-११.

इत्यत्राविद्यावस्थायां जीवस्य ब्रह्मसंपत्तिः कथम् ? **'तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माभयं रूपम्'**– इति श्रुतौ

(4) इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यम्, स प्रत्यक्षतो निर्दिश्यते यत्र अविद्याकामकर्माणि न सन्ति (बृ.भा. ४.३-२१)

इति तद्भाष्ये चोक्तः सुषुप्तौ अविद्याकामकर्माभावः कथं संगच्छत इति वा टीकायां न समालोचितम् ॥

गौडपादकारिकामुदाहरद्भिरपि टीकाकृद्भिः किमित्यवस्थात्रयप्रक्रियायाः न तत्तादृशं प्रामुख्यं प्रापितम् ? – इति तु न वयं शक्ता निश्चेतुम् ॥

ज्ञानसाधनविचारः –

१५४. ज्ञानसाधनविचारे टीकायामिमानि वाक्यानि परिशीलनीयानि भवन्ति । कर्मणां तावत् कया प्रणाड्या ब्रह्मजिज्ञासोपयोगित्वमिति चिन्तां प्रस्तुत्य –

(अ) 'कर्मणाम् अधिकारपरम्परया शब्दतो वा संस्कारतया वा यथाविभागं तादर्थ्याधिगमात्, निःश्रेयसप्रयोजनत्वाच्च आनन्तर्य-वचनो (जिज्ञासासूत्रे) अथशब्दः।' इति मतम्,

(आ) 'अथेति पूर्वप्रकृतां धर्मजिज्ञासामपेक्ष्य, अनन्तरं ब्रह्म-जिज्ञासा प्रारम्भार्थः।' इति मतं च प्रत्याख्यातं टीकायाम् –

(१) यथा तावत् प्रासादमारुरुक्षोः सोपानपरम्परा क्रमशः प्राप्य-माणा प्रासादारोहणहेतुः, न तथेह ब्रह्मजिज्ञासां चिकीर्षोः कर्माणि सहस्र-संवत्सरपर्यन्तानि तत्क्रियाहेतुतया स्थितानि। प्रमाणाभावात्॥ पं. ५९.

(२) सर्वत्र कामस्य विषयदोषदर्शनमेव उच्छेदकारणम्, नित्यवस्तु-दर्शनं च। .... तस्मात्, न कर्मणां काम्यनिबर्हणद्वारेण ब्रह्मजिज्ञासा-योग्यतापादनम्॥ पं. ६०.

(३) भवतु तर्हि संस्कारद्वारेण कर्मणां पूर्ववृत्तत्वम्। .... वक्ष्यति च सूत्रकारः–'अत एवाश्रमकर्मापेक्षा' (?) 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति च[1]। सत्यमेवम् यदि समानजन्मानुष्ठितमेव कर्म संस्कुर्वद् ब्रह्म-जिज्ञासायोग्यत्वहेतुः स्यात्। न च नैयोगिके फले कालनियमोऽस्ति॥ पं. ६१.

[अत्र ब्रह्मसिद्धिगतविचारस्तुलयितव्योऽनेन]

(४) यावदस्य हिरण्यगर्भावाप्तिपर्यन्तस्य भोगस्य उत्पादपरिच्छेदाभ्यां विनाशित्वादनित्यत्वं नावैति, विनश्यदपीदं कूटस्थनित्यवस्तुपर्यन्तमेव विनश्यति। अन्यथा निरुपादानस्य पुनरुत्पत्त्यसंभव इति वर्तमानस्याप्य-संभवात् अभावोऽभविष्यत् – इति निरूपणात्। नित्यानित्यवस्तुविवेको यावन्न जायते, तावद् विरक्तो न जायते[2]। यावच्चाभिमुखं विनाश-दर्शनात् भुञ्जानस्यापि भोगात् स्रक्चन्दनवस्त्रालङ्कारभोगानिवाग्निप्रवेशार्थं भोगार्थव्यापारजनितदुःखानुभवाच्च तन्निमित्तां निर्वृतिमप्यलभमानो भोगात् विरक्तः, ततो मुमुक्षुत्वं तत्साधनशमदमोपरमतितिक्षासमा-धानसंपन्नो भूत्वा यावन्नालम्बते, तावद् ब्रह्मजिज्ञासां कः प्रतिपद्येत?

1. "अत एवाश्रमकर्मापेक्षाम् 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत' इति" इति मूलपाठः स्यादित्यनुमीयते॥

2. 'इत्यध्याहारः' इत्यधिकं त्यक्तमत्र।

कथञ्चिद् वा दैववशात्, कुतूहलाद् वा बहुश्रुतत्वबुद्ध्या वा प्रवृत्तोऽपि न निर्विचिकित्सं ब्रह्म आत्मत्वेनावगन्तुं शक्नोति । यथोक्तसाधन-संपत्तिविरहात्, अनन्तर्मुखचेता बहिरेवाभिनिविशमानः । तस्माद्, वर्णितवस्तुकलापादानन्तर्यमभिप्रेत्य अथशब्दं प्रयुक्तवान् आचार्यः॥ पं· ६३·

[अत्र वार्तिकप्रस्थानेन (खं· १२६) इदं शान्त्यादिसाधनवर्णनं तुलनीयम्]

(५) एवं सति ब्रह्मात्मैकत्वविज्ञानस्यापि यथाभूतवस्तुविषयत्वात्, न चोदनाजन्यत्वम् । अतो न विधेरत्रावकाशः । अतः श्रूयमाणा अपि विधयः केवलप्रमाणवस्तुपरतन्त्रे ज्ञाने अकिञ्चित्करत्वात् कुण्ठीभवन्ति । अतोऽर्थवादतया आत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात्, सामर्थ्यसिद्ध-बहिर्मुखतानिरोधाच्च विधिकार्यलेशस्य विद्यमानत्वात्, विधय इव लक्ष्यन्ते ॥ पं· ९३·

(६) तथा च श्रवणं नाम आत्मावगतये वेदान्तवाक्यविचारः, शारीरकश्रवणं च । मननं वस्तुनिष्ठवाक्यापेक्षितदुन्दुभ्यादिदृष्टान्तजन्म-स्थितिलयवाचारम्भणत्वादियुक्त्यर्थवादानुसंधानम् । वाक्यार्थाविरोध्यनु-मानानुसंधानं च । निदिध्यासनं मननोपबृंहितवाक्यार्थविषये स्थिरीभावः । विधेयस्योपासनापर्यायस्य निष्फलत्वात् । दर्शनम् ततो वाक्यार्थे स्थैर्यात्, निरस्तसमस्तप्रपञ्चावभासविज्ञानघनैकतानुभवः ॥ (पं· ९३-९४)

(७) कः पुनरत्रार्थवादः ? इदमत्र प्रस्तुतम्–क्रियाकारकफलात्मकात् संसाराद् विरक्तायै मैत्रेय्यै मुमुक्षवे मोक्षसाधनम् आत्मज्ञानं प्रतिपिपाद-यिषन् ' न वा अरे पत्युः कामाय पतिः प्रियो भवति ' इति पत्यादेरीप्सि-तत्वं प्रतिषिध्य आत्मन ईप्सिततमत्वमाह । ... ईप्सितश्चेन् द्रष्टव्यः श्रोतव्य इत्येषोऽर्थवादः । एतच्च सर्वं प्रथमसूत्रेणैव सूत्रितं विवृतं च भाष्ये । अपि च नैवायं विधौ कृत्यः, किं तर्हि, ' अर्हे कृत्यतृचश्च ' (पा· ३-३-१६९) इत्यर्हकृत्यः । एतेन, 'आत्मेत्येवोपासीत', 'आत्मानमेव लोकमुपासीत ' इत्येवमादीनि विधिच्छायादिवाक्यानि व्याख्यातानि वेदि-तव्यानि ॥ पं· ९४·

[अत्र ' तमेव धीरो विज्ञाय – इति न प्रज्ञाकरणविधिः ' – इत्यारभ्य (ब्र· सि· 154) 'आत्मस्वरूपपरमेकं वाक्यम् ' इति यावत् (ब्र· सि· 155) ब्रह्मसिद्धिगतं वाक्यजातम् अनुसंधेयम् । विशिष्य च 'द्रष्टव्यः श्रोतव्यो निदि-ध्यासितव्यः ' इति न पृथग्विधयः कृत्यप्रयोगेऽपि । कृत्यप्रत्ययस्य अर्थान्तरेऽपि स्मरणादर्हादौ स्तुत्यर्था यथोपांशुयाजवाक्यान्तर्गताः ' (ब्र· सि· 155) इति भागश्च टीकासमानार्थकः ॥]

श्रवणादिविषये वार्तिकपञ्चपादिकाप्रस्थानयोरेकवाक्यताविषये या चिन्ता प्रतानिता प्राक् (खं. १२५) सा भूयोऽपीहानुसंधेया ॥

उपसंहारः –

१५५. पञ्चपादिकायां ब्रह्मसिद्धिगता विचारसरणयस्तत्र तत्रानुकृताः, दृष्टान्ताः, शब्दसाम्यम्, वाक्यसाम्यं च तत्र तत्र दृश्यते । तथापि ग्रन्थान्तरेष्वदृष्टचरा विषयाः प्रप्रथममत्रैव प्राकाश्यं नीता समुपलभ्यन्ते । विशिष्य च – अविद्यासतत्त्वपरिशीलनम्, अहंप्रत्ययविमर्शः, ब्रह्मजिज्ञासारम्भप्रतिज्ञासमर्थने प्राचीनवृत्त्यन्तराशयविमर्शः, आत्मैकत्वविद्याप्रतिपत्तये वेदान्तारम्भ इति भाष्याशयपरिशीलनरीतिः – इत्यादिस्थलेषु स्वासाधारणप्रतिपादनशैल्या समादृतयुक्तिजातेन च सर्वथा विचारप्रचोदिकेयं टीका वेदान्तप्रक्रियानिर्दिधारयिषूणामवश्यं सावधानसमालोचनमर्हति । तत्राप्यध्यारोपापवादप्रक्रियायाः सांप्रदायिक्याः कियत्यंशे उपकरोत्ययं ग्रन्थ इति निर्णयार्थं भाष्यवार्तिकादिसंवादीकरणेन परिशीलनमपेक्षते इति तु निर्विवादम् । एतच्च यथामति तत्र तत्र स्वाभिप्रायाविष्करणेन सप्रपञ्चं कृतमप्यस्मिन् काण्डे पुनरपि विशदीकरिष्यते विवरणप्रस्थानपरीक्षायामिति शम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

पञ्चपादिकाप्रस्थानपरीक्षा नामाष्टमः काण्डः

९. भास्करप्रस्थानपरीक्षा

भास्करमतस्थानं वेदान्तविचारेतिहासे –

१५६. यद्यपि पञ्चपादिकापरीक्षणपरिपूर्णतायै तद्व्याख्यानरूप-विवरणग्रन्थपरीक्षणमेवाभ्यर्हितम्, प्रस्थानान्तरान्तरीकरणेन विचारधारा-विच्छेदो मा भूदिति, तथापि शङ्करभाष्यब्रह्मसिद्धिपञ्चपादिकाग्रन्थाभि-प्रायाणां नैकेषां विमृश्य खण्डनपूर्वकं भेदाभेदप्रस्थानोज्जीवनयत्नप्रदर्शनात्, भामतीविवरणयोः पदे पदे कटाक्षीकृत्य निराकरणार्थमुपादीयमानत्वा-च्चात्रैव परीक्षामर्हति भास्कराचार्याणां प्रस्थानमिति तदेव विमर्शनायादर-णीयं भवत्यग्रे भामत्याद्यपेक्षया। अपि चार्वाचीनवेदान्तिभाष्यान्तरेष्वपि नैकवारं भास्करमतं विचारणाय समुपात्तमुपलभ्यत इत्यतोऽपि परीक्ष-णीयत्वमेतस्य। यद्यपि भास्कराभिधानीयका नैके प्रसिद्धा ग्रन्थनिबन्द्धारो देववाणीपरिचर्यया प्रख्याताः, तथापि न सर्वे ते वेदान्तिनः। माधवीयशङ्कर-विजये वर्णितस्तु शङ्कराचार्यभट्टभास्करसंवादः कल्पनामात्रमित्युपेक्षणीयः। तत्र समादृता भास्करखण्डनरीतिः पञ्चपादिकाव्याख्यानतया सुप्रसिद्धां विवरणव्याख्यामेव बहुशोऽनुकुर्वती लक्ष्यते, विवरणे च प्रकृतभास्करमतमेव पदे पदे खण्ड्यमानं दृश्यत इत्यतः शङ्करविजयगतकथाकल्पनाया विवरण-ग्रन्थ एवाधारभूत इत्यपि शक्यमुन्नेतुम्। मनुस्मृतिव्याख्यात्रा कुल्लूकभट्टेन 'भगवद्भास्करीयदर्शनम्' (कु. मनु. १–१५) इति सबहुमानं परामृष्टत्वात् तदात्वे भास्करीया बहवो बभूवुरित्यपि समुन्नीयते। अतः शाङ्कर-व्याख्यानप्रस्थानान्तरपरीक्षां न्यायप्राप्तामप्यनादाय इदमेव प्रस्थानमादौ परीक्ष्यते॥

भास्करसंप्रदायः –

१५७. अद्य यावत् सूत्रभाष्यमेकमेव तूपलभ्यते भास्कर-कृतित्वेन। परं तु –

(१) छान्दोग्ये च तत्र तत्रानयोर्मायाप्रविलयवादिनोर्निराकरणं विस्तरेण कृतम् ॥ भा. सू. पा. ८४.

इति वाक्यादवगम्यते छान्दोग्योपनिषदपि तैर्व्याख्यातेति। अर्वाचीनवेदान्त-ग्रन्थेषु—उपनिषद्व्याख्यानेषु भगवद्गीताव्याख्यानेषु च-भास्करीयाभिप्रायाणां भूयो भूयः परामर्शोपलम्भादुन्नीयते यत् प्रस्थानत्रयव्याख्याने सममेव भास्कराचार्यैर्लेखनी व्यापारितेति। इदानीमुपलभ्यमानं तु मुद्रितसूत्रभाष्यम् अशुद्धिभूयिष्ठमपि तदीयप्रक्रियास्वरूपनिर्धारणे पर्याप्तसामग्रीगर्भितमित्येतत्तु वेदान्तविचारेतिहासतत्त्वशोधकानां किञ्चित्तोषस्थानम् ॥

इमे च भास्कराचार्या भेदाभेदसिद्धान्तावलम्बिनः स्वकीयां प्रक्रियां संप्रदायशुद्धां मन्यन्ते, शङ्करभगवत्पादसंमतां तु तां तद्विरुद्धेति भूयो भूयो ज्ञापयन्ति —

(२) तदेतत् भेदाभेददर्शनं सूत्रकाराभिमतम् अरोचयमानाः केचिन्-मायावादिनो वदन्ति – ईश्वरस्यैव संसारित्वं तदंशभूतो जीवो नाम नास्ति। अविद्याकल्पितोपाधिकृतभेदाद् व्यवहारः संसारीति(तीति) ॥
भा. सू. १-२-६, पा. ३९.

[अत्र ईश्वरस्यैव संसारित्वम् इति मृषानुवादः ॥]

(३) तदेवं श्रुतिसूत्रकारौ जीवपरयोर्भेदं दर्शयतः। केचित्तु श्रुत्यर्थम् आचार्योक्तिं च पृष्ठतः कृत्वा मायामात्रं स्वबुद्ध्या कल्पयित्वा अन्यदेव दर्शनं रचयन्ति ॥ भा. सू. १-२-१२, पा. ४१.

(४) अयमेव छान्दोग्ये वाक्यकारवृत्तिकाराभ्यां संप्रदायमतः समाश्रितः ॥ भा. सू. १-४-२५, पा. ८५.

अपि च सुप्रसिद्धं ह्येतद् यद् वाक्यान्वयाधिकरणे शङ्करभगवत्पादैः, 'प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः' इत्यादिमतत्रयम् उपन्यस्य तृतीयं मतं स्वप्रक्रियाधारत्वेन स्वीकृतमिति। भास्कराचार्यमते तु आश्मरथ्यस्य मतं भेदाभेदाङ्गीकर्तृत्वेनैव व्याख्यातम् —

(१) यद्यत्यन्तभिन्नो जीवः परमात्मनः, ततो वाक्योपक्रमो जीवेन, परमात्मना चोपसंहारः – इति वाक्यमसंबद्धं स्यात्, प्रतिज्ञा च न

सिद्ध्येत् । तस्मादभेदांशेनोपक्रमः । कियानपि जीवपरयोर्भेदोऽस्तीत्यस्याभिप्रायः ॥ भा. सू. १-४-१९, पा. ८१.

एवं द्वितीयमपि मतं शङ्करवदेव वर्णितम् –

(२) जीवः परमात्मनोऽत्यन्तभिन्नः, तस्य पुनर्ज्ञानध्यानसमाधिसंप-(प्रस?)न्नस्य शरीरेन्द्रियसंघातादुत्क्रमिष्यतः, मुक्तयवस्थायामेवं(मैक्यम्?)। एवं (इत्येवं?) तावज्जीवोपक्रमे(जीवेनोपक्रम?) इत्यौडुलोमिराचार्यो मन्यते स्म। श्रुतिरपि नदीदृष्टान्तेनेदमर्थं ज्ञापयति ॥ भा. सू. पा. ८१.

काशकृत्स्नमतं पुनरित्थं वर्णितम् –

(३) न प्रकृतिविकारभावो नाप्यत्यन्तभिन्नस्य जीवस्य मुक्तयवस्थायाम् अभेदापत्तिः, किं तर्हि उत्क्रमणात् प्रागपि जीवरूपेण परमात्मनोऽवस्थानात् अभेदेनोपक्रमः – इति काशकृत्स्नो मन्यते स्म ॥ भा. सू. ८१.

अत्र "ननु यदि पर एव साक्षादयं जीवः स्यात् तत उपदेशोऽनर्थको मैत्रेय्याः 'स वा एष महानज आत्मा' इति । न हि सर्वज्ञस्य उपदेष्टा प्रयोजनम् । " इत्याशङ्क्य परिहार एवमुक्तः –

(४) सम्यगाह भवान् अस्तिभेदोऽप्यनादिकालप्रवृत्ताविद्याकर्मोपाध्यवच्छेदात्, अंशो हि परस्याहं(यं) जीवो नाम । यथाग्नेर्विस्फुलिङ्गाः, यथाकाशस्य पार्थिवाद्यधिष्ठानोपाध्यवच्छिन्नः छिद्रप्रदेशस्तदंशः शब्दग्रहणशक्त्यपेक्षा(क्षया?), यथा च वायोः प्रतिशरीरं पञ्चवृत्तिः प्राणः, तथायं भिन्नाभिन्नस्वभावो जीवः संसारी न कदाचिन्मुक्तपूर्वः। तस्य मुक्तयर्थं विद्योपदेशोऽर्थवान् ॥ भा. सू. १-४-२१, पा. ८१.

[अत्र सूत्रे भिन्नाभिन्नशब्दाभावेऽपि, आश्मरथ्यपक्षात् स्वपक्षस्य वैलक्षण्यद्योतनार्थं इत्थं व्याख्यातम् – इति स्पष्टम् ॥]

उपर्युदाहृतवाक्यबलात् अवगम्यते, यत् भास्कराचार्या इमे भेदाभेदवादिनोऽपि न भर्तृप्रपञ्चमतं सर्वथा अनुमन्यन्ते ; यतः परमात्मविज्ञप्तिविकारत्वं जीवस्योशन्ति भर्तृप्रपञ्चाः (खं.७९), अत्र तु भिन्नाभिन्नत्वं जीवपरयोरनाक्षिप्तेनाभ्युपेतम् । एवं भर्तृप्रपञ्चाभिमता अन्येऽपि वादा इह नोररीकृताः। अतो भाष्यवार्तिकयोर्निराकृतं तदीयमतांशं प्रविहाय कियानपि

प्रक्रियाभेद एभिः कल्पितः स्यात् । अथवा भेदाभेदवादेऽपि अवान्तर-वादविकल्पा आसन्नेव बहोः कालादारभ्य–इति संप्रदायान्तरमेवैषाम् इति कल्पनीयं भवति । अत्र पुरातत्त्वनिर्णायकपरीक्षा आवश्यकीत्युपरम्यते ॥

भास्कराभिमतवृत्तिकारवाक्यकारौ –

१५८. वेदान्तप्रक्रियासतत्त्वनिर्धारणार्थं प्राचीनकालादेव बहवो बहुधा प्रस्थिता इति प्रागेवावादिष्म (खं. ६२, ६३) । यथैवान्यसंप्रदा-यस्थास्तथैव भास्कराभिमतप्रक्रियापुरस्कर्तागेऽपि प्रागपि तद्भाष्यप्रणयनाद्, वाक्ययुक्त्यवष्टम्भाः प्रस्थानत्रयं व्याचख्युरिति भास्करभाष्यादेवावगम्यते । तथा चोदाहृतं भास्करीयं वचनम् 'अयमेव छान्दोग्ये वाक्यकारवृत्तिकाराभ्यां संप्रदायमतः समाश्रितः' इति । तत्र कौ नु स्यातां तत्संमतवाक्यकार-वृत्तिकारौ इति तु संप्रति दुरूहम् । न हि 'वाक्यकारः', 'वृत्तिकार' इति वा कस्यचनैकस्य संज्ञा सर्वसंप्रतिपन्ना । शाङ्करभाष्येष्वेव प्राचीनाद्वैत-संप्रदायभेदान् अनुसरन्तो बहवो वृत्तिकाराभिप्राया अनूद्य निराकृताः, तथा बृहदारण्यकवार्तिकेऽपीति प्रादर्शि प्राक् (कां. ४) । एवं पञ्चपादिकायामपि केषाञ्चित् वृत्तिकाराणां वाक्यान्युदाहृतानि निराकरणाय –

(1) अत्र केचिदभ्यधिकाशङ्कां दर्शयन्तो ब्रह्मजिज्ञासां पृथगारभन्ते ॥ पं. ४२. (2) अपरे पुनरेवमारभन्ते ॥ पं. ४२. (3) तथा च वृत्त्यन्तरे वर्णितम् ॥ पं. ५८. (4) अन्यैरपि स्ववृत्तौ वर्णितम् ॥ पं. ५८. (5) यदन्यैर्वृत्तिकारैर्ब्रह्मशब्दस्य अर्थान्तरमाशङ्क्य निरस्यते ॥ पं. ६४. (6) वृत्त्यन्तरे तु शेषलक्षणा व्याख्याता ॥ पं. ६४.

इत्यादिदर्शनात् । तस्मात् बहोः कालादारभ्य वेदान्तप्रक्रियानिर्णयन-प्रयतनं बहुभिर्बहुभिः प्रकारैः कृतम् । अत एव वेदान्तप्रक्रियाप्रत्यभिज्ञानं संप्रति दुष्करं भवतीत्येष प्रयत्न आसाकीनः । तिष्ठत्वेतत् । भास्कर-संमतवृत्तिकारवाक्यकारौ किं भर्तृप्रपञ्चप्रक्रियानुगन्तारौ, किं वा न ?–इति विशये, न किमपि निर्धारणकारणं समस्ति, तयोः साक्षाद्वाक्यानुदाहरणात् प्रकृते भाष्ये–इत्येतावत्तु निश्चितं वक्तुं शक्यते ॥

भास्कराभिमतः सूत्रार्थविभागः –

१५९. भास्कराभिमतरीत्या सूत्रार्थविभाग इत्थम् –

(१) ब्रह्म च कारणात्मना, कार्यात्मना, जीवात्मना च त्रिधावस्थितम्। तत्राविशेषेण ब्रह्मजिज्ञासा प्रस्तूयते। 'ब्रह्मैवेदं सर्वम्' इति ब्रह्मशब्दस्याविशेषात्। तत्र स्वरूपं प्रमाणं च प्रथमेनाध्यायेन प्रतिपाद्यते; द्वितीयेन स्मृतिविरोधपरिहारः; परमतनिराकरणं च तर्कपादे, श्रुतीनां च परस्परविरोधपरिहारः; तृतीयेन संसारगतिवर्णनम्, जीवस्यावस्थाभेदः, ब्रह्मसतत्त्वम्, विद्यानां भेदाभेदविचारः, ज्ञानकर्मसमुच्चयस्य इति; चतुर्थेन ज्ञानावृत्तिः, अर्चिरादिमार्गनिरूपणं फलनिरूपणं च क्रियत इति॥

भा. सू. ८.[1]

[ब्रह्मणस्त्रिविधत्वं प्रतिज्ञाय 'जन्माद्यस्य यतः' इति सूत्रे किमिति कारणस्यैव ब्रह्मणो लक्षणमुक्तम् – इति प्रश्नो न निर्णीतोऽत्र भाष्ये॥]

अत्र शाङ्करभाष्यवदेव ग्रन्थविभाग आदृतः, तद्वदेव च तत्र तत्र परमतनिराकरणपूर्वकमेव स्वाभिप्रायेण सूत्राणि व्याख्यातानि। विशिष्य च शाङ्करं व्याख्यानं बहुशोऽनूद्य दूषितम्। भगवत्पादीयं मतं तदात्वे सर्वत्र व्याप्तमासीदिति, तन्निराकरणेनैव स्वाभिमतो भेदाभेदसिद्धान्तः स्थापनीय इति च भास्कराभिप्रायः स्यादित्युन्नीयते। यतः –

(२) सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायप्रकाशनात्।
व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये॥

इत्यादावेव प्रतिज्ञातमत्र॥

अविद्यागता चिन्ता –

१६०. अविद्याध्यासयोरैक्यं भगवत्पादसंमतं नात्राङ्गीकृतम्। न च लोकव्यवहारस्य अविद्याकृतत्वमङ्गीकृतम्॥

---

1. असत्यध्यायाद्युल्लेखे अस्मिन् काण्डे भा. सू. इति निर्दिष्टा भास्करसूत्रभाष्यपत्रपार्श्वसङ्ख्यैव ग्राह्या॥

(१) जीवस्य वस्तुभूतस्य देहादिष्वनात्मसु विपरीतज्ञानम्, ब्रह्मस्वरूपाप्रतिपत्तिश्च, तदुभयं ग्रहणाग्रहणम् अविद्या । सा तत्त्वमस्यादिवाक्यश्रवणजनितया विद्यया निवर्तते ॥ भा. सू. १-१-४, पा. १९.

परवादिसंमता अविद्या भास्करभाष्ये एवं निराकृता – **का चेयमविद्या** भवतोऽभिप्रेता ? किं भेददर्शनम्, उत तद्व्यतिरिक्ता ? (भा. सू. १९)– इति प्रश्नमुत्थाप्य **लक्षणं** बहुधा विकल्प्य दूषितम् –

(1) यदि तावद् भेददर्शनमविद्या अभ्युपेयेति । तत्रेदं वक्तव्यम्, कथं भेददर्शनस्य अविद्यात्वम् ? किं विद्यातोऽन्यत्वादविद्या, अथ विद्याया अभाव इति । न तावदभावः । संवेदनत्वस्य प्रत्यक्षत्वात् । ... न च पर्युदासः संभवति । न हि भेदज्ञानं द्रव्यं गुणः क्रिया वा येन विद्यातोऽन्यत् स्यात् । विद्येति ज्ञानमुच्यते, भेदज्ञानमपि ज्ञानमेवेति । अथ तद्विपरीता अविद्या, तत्रापि किं नित्या, अनित्या वा ?....यद्यनादिरविद्या, तदानीमनिर्मोक्षप्रसङ्गः । तस्या उच्छेत्तुमशक्यत्वात्, ब्रह्मवत् । अथादिमती, कुतः सा जायते । ? यदि चोत्पद्येत, कार्यत्वाद् वस्तुत्वप्रसङ्गः । तन्नावस्तुभूता अविद्या इति प्रतिज्ञा हीयते । न ह्यवस्तु शशविषाणम् उत्पद्यते । .... तस्मान्न भेददर्शनमविद्या ॥ भा. सू. पा. १८, १९.

(2) सत्त्वासत्त्वाभ्याम् अनिर्वचनीया इति चेत् । अनिष्टोत्तरमेतत् –
यस्याः कार्यमिदं कृत्स्नं व्यवहाराय कल्पते ।
निर्वक्तुं सा न शक्येति वचनं वचनार्थकम् ॥
यदि वाऽनिर्वचनीया । कथमाचार्यः शिष्येभ्यः प्रतिपादयेत् ? अप्रतिपत्त्या च तया कथं व्यवहारः क्रियते ? किञ्च, आदिमती सा, अनादिरिति वक्तव्यम् । अनादित्वे नित्यत्वादुच्छेत्तुमशक्या इत्यनिर्मोक्षप्रसङ्गः । ब्रह्म चेन्निमित्तं तदयुक्तमित्युक्तं पुरस्तात् । अनात्मस्वरूपं निमित्तमपि, एतत् निमित्तनित्यत्वान्नैमित्तिकानुपरमादनिर्मोक्ष एव । अथ सती, असती चाविद्या, तदा सद्भावाभावरूपत्वानुपपत्तेः(त्तिः ?) । न हि युगपदेकत्र विरुद्धज्ञानसंभवः ॥ भा. सू. ९५.

[सत्यानृतयोर्विषयविषयिणोः मिथुनीकरणलक्षणाध्यास एव अविद्या । अध्यासश्च नैसर्गिकव्यवहारदृष्ट्या यद्यप्यनादिः, अपरमार्थत्वाद् तत्त्वस्वरूपनिर्धारणरूपया विद्यया निवर्त्यः – इति भगवत्पादीयं प्रस्थानम् ॥]

(3) **अथाव्याकृताकाशम् आद्याविद्या – इत्युच्यते, उच्यताम् । न संज्ञायां विरोधः । वस्तुत्वं तु प्राप्नोति । उत्पत्तिमत्वादङ्कुरादिवत् ॥ भा. सू. पा. ९५.**

[अव्याकृतं यद्यपि न स्वरूपतोऽविद्या । अविद्याप्रत्युपस्थापितत्वात् अविद्याशब्दभागपि भवत्येव । न चाविद्याकृतस्य वस्तुत्वम्, शुक्तिरजतादेरिव प्रतीतिमात्रशरीरत्वात् – इति भगवत्पादीयप्रस्थानम् । अविद्यापि यदा अविवेकलक्षणान्तःकरणधर्मत्वेन निरूप्यते तदा नामरूपपक्षस्यैव, अविद्याप्रत्युपस्थापितनामरूपबीजभूताव्याकृतवत् । आत्मनि कल्पितत्वादेव शुक्तिरजतवत् तत्त्वान्यत्वाभ्यामनिर्वचनीयैव । अविर्वचनीयापि प्रतीतरूपेणात्मत्वतदन्यत्वाभ्यामनिर्वचनीयेति शक्योपदेशनैवेति न किञ्चिच्चित्रम् । द्रष्टव्यं भगवत्पादीयं तै. भा. २–८]

(4) **न चाग्रहणम् अविद्या । ग्रहणाभावस्य अवस्तुत्वे बन्धहेतुत्वाभावात् । तथा हि-अवस्तु चेद्ग्रहणम्, न बध्नाति खपुष्पवत्; बन्धकं चेदवस्तुत्वं विरुद्धम्, मत्स्यबन्धवत् । अत एव निर्वचनीयत्वम् अविद्यायाः ॥ भा. सू. ९६.**

(5) **योऽपि मन्यते नामरूपमविद्याशब्दवाच्यमिति, तदापि अनिर्वचनीयत्वं नास्ति । निरुच्य वचनं निर्वचनमुच्यते । गवादिशब्दाश्च स्पष्टा एव निरुच्यन्ते व्याकरणे; तद्वाच्याश्चगवादयो(ऽपि) निरुक्ताः ॥ भा.सू. ९६.**

[व्याकृताव्याकृतयोर्नामरूपयोः सममेव प्रतीतरूपेण तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वम्, अवस्तुत्वम्, विद्यावाध्यत्वम्, वस्तुत आत्मस्वरूपानन्यत्वमिति नात्र किञ्चिद्दूषणमस्ति ॥]

अत्र सर्वत्र भगवत्पादसंमता सत्यानृतमिथुनीकरणलक्षणाविद्या नालोचितेति स्पष्टम् । **अविद्याश्रयः कः ?** इति प्रश्नोऽपि दुरुत्तरः परेषां पक्षे इति प्रपञ्चितमत्र –

(1) **न च ब्रह्मणोऽविद्या । तस्य विशुद्धचिद्रूपत्वात्, निरतिशयानन्दरूपत्वात् । न च जीवस्य । ब्रह्मव्यतिरिक्तजीवानभ्युपगमात् । प्रतिबिम्बरूपस्य च जीवस्य कल्पितस्य अवस्तुत्वात् । हन्त निराश्रया अविद्या अभावपदवीं प्राप्ता ॥ भा. सू. १९.**

(2) कस्येयमविद्या ? न तावज्जीवस्य । वस्तुभूतस्य तस्यानभ्युपगमात् । नापीश्वरस्य । नित्यविज्ञानप्रकाशत्वात्, अज्ञानं विरुध्यते । यदि च तस्य संसारित्वम्, तदा ईश्वरत्वं विरुध्यते । सुखदुःखमोहादिरहितत्वं हि ईश्वरत्वमुच्यते, तद्योगित्वं च संसारित्वम् । तदत्र संसारित्वासंसारित्वयोरविद्याविद्यात्वयोर्बन्धमोक्षयोश्च एकस्मिन्नात्मनि समवायविरोधात्, शीतोष्णयोरिव अन्यतरपरित्यागो बलात् प्राप्नोति । ईश्वरश्चेत्, न संसारी, संसारी चेत्, नेश्वर इति ॥ भा. सू. १-४-२१, पा. ८२.

[अत्र संसारित्वेश्वरत्वयोर्व्यावहारिकत्वम् – इति सू. भा. २-१-१४ इति शाङ्कराभिप्रायो न कटाक्षितः । एवं बन्धमोक्षादिव्यवहारोऽपि न पारमार्थिक इति (गौ. का. २-३२) मतं च न वीक्षितम् ॥]

(3) यदप्युच्यते 'कस्याविद्या ?' इति पृष्टे 'तस्य ते यस्त्वं पृच्छसी'ति, तदपि च दुष्टोत्तरम् । यद्यसौ ब्रूयात् 'अहं जीवः, परमात्मनोंऽशः' इति तदा तूष्णीमासनमेव ते ॥ भा. सू. ४-१-१, पा. २१९.

[अत्र भगवत्पादीयभाष्याभिप्रायः सम्यग् न व्यज्ञायि । यतः, 'कस्य पुनरयमप्रबोधः ?' इति प्रश्नः, एकत्ववादे न संभवतीत्याशयेन कृतः । यद्येकत्वं ज्ञातम्, तर्हि न कस्यचनाविद्या ; यदि न ज्ञातम्, तर्हि पृच्छकस्यैवाविद्या – इति प्रश्नसामर्थ्यादेवावगम्यत इत्युत्तरम् । अतः, 'अहं जीवः' इत्युत्तरप्रदातुरपि तदेवोत्तरम्-तवैवाविद्येति ॥]

अविद्या किमेका, अनेका वा – इति विकल्प्य भास्करेणोक्तम् –

(1) यद्यनेका ततो अर्थत्वं प्राप्नोति, तत्त्वातत्त्वाभ्याम् अनिर्वचनीयेति हीयते । एकत्वे च युगपत् सर्वमुक्तिप्रसङ्गः ॥ भा. सू. पा. २१९.

[एकत्वमनेकत्वमिति विकल्पनम् अविद्यापेक्षयैव व्यवहारे संभवति, न त्वविद्याविषये – इति न पर्यालोचितमत्र ॥]

अविद्यानिवृत्तिमधिकृत्यापि दोष एवमुक्तः –

(1) भेदविज्ञानमविद्या भवतोऽभिप्रेता । न तद्विद्यमाणशरीरस्य कस्यचिद् भेदज्ञानं विनिवर्तते चक्षुरादीनां तन्निमित्तत्वात् । न च निमित्ते सति नैमित्तिकं न भवति । कर्मणां तद्भोगार्थत्वात् । कथं भोगार्थत्वम् ? देहेन्द्रियविषयविभागज्ञानहेतुत्वात् । अपि च इतरेतरहेतुत्वम् । अविद्या-

कामकर्मणां बीजाङ्कुरवत् । यतः संस्कारचक्रम् अविरलम् अनुवर्तते, ततश्चाद्वैतज्ञानं बाध्यतामेति । प्रतिपक्षबलीयस्त्वात् अपवर्गाभावः प्रसज्यते ॥ भा. सू. २०.

['देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः' इति भगवत्पादीयं भाष्यं न विमृष्टमत्र । सति हि शरीरेन्द्रियादीनां सत्यत्वे तत्कृतं प्रमातृत्वं संसारभोगश्च । न तु साक्षिदृष्ट्या शरीरम् इन्द्रियाणि वा वस्तुसन्ति सन्ति । अत एव हि 'न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम्' इति (सू. भा. १-१-४, पा. २२) भाष्यम् । न चाद्वैतज्ञाने संजाते पुनरपि बाध्यबाधकभावावशेषः संभवति । 'तत्केन कं पश्येत्' इति श्रुतेः – इत्यपि नावहितमनसा समालोचितम् ॥]

भर्तृप्रपञ्चप्रस्थाने 'सा अविद्या अहमेवेदं सर्वम् इत्यस्यार्थस्यासंबोधः (खं. ८१) । 'अविद्या पुनः स्वविज्ञानाश्रयैव, तदेव विज्ञानं विकृत्य विपरीतग्रहाय प्रकल्पयति' (मत्स्यदृष्टान्तवाक्यसंबन्धे, पा. १६८), 'क्षितेरूषरवत् अविद्या परस्मात् स्वतो जायते' (खं. ८५, पा. १७४) – इत्याद्यविद्यावर्णनं यद् दृश्यते, तद्ग्रन्थोऽप्यत्र नोपलभ्यते । अतः भाष्यवार्तिकाभ्यां खण्डितत्वात् सा प्रक्रिया भास्करभाष्ये परित्यक्ता, अन्यैव वा एतदीयप्रक्रिया – इति कल्पनीयम् ॥

प्रत्यक्षादिप्रामाण्यं शास्त्रप्रामाण्यं च –

१६१. 'तमेतम् अविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि' – इति प्रमाणप्रमेयव्यवहारस्य शास्त्रस्य च प्रवृत्तिरविद्याभूमावेवेति भगवत्पादैः प्रतिज्ञातमत्र प्रस्थाने न परीक्षितम् । अतः पूर्वमीमांसासंमतरीत्यैव प्रमाणव्यवहरणमिह स्वीक्रियत इति न चित्रम् ॥

एकत्वैकान्ताभ्युपगमे नानात्वाभावात् कथं प्रत्यक्षादिव्यवहारः, कथं वा विधिप्रतिषेधशास्त्राणाम् अर्थवत्ता, कथं वा मोक्षशास्त्रेणासत्येन

ब्रह्मज्ञानमुत्पद्यते ? – इति शङ्कामुत्थाप्य भगवत्पादैः परिहार उक्तः – 'सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः, स्वप्नव्यवहारस्येव प्राक् प्रबोधात्' (सू. भा. २–१–१४, पा. १९८) इति । तदनूद्य भास्करभाष्ये लिखितम् –

(१) अत्र ब्रूमः । 'मृत्तिकेत्येव सत्यम्' इत्यस्यार्थो व्याख्यातः । यदि च प्रपञ्चासत्यत्वम्, मृत्तिकाया अप्यसत्यत्वम्, प्रपञ्चत्वात् । कथं वा मिथ्यात्वमवगतम् ? न तावत् प्रत्यक्षानुमानाभ्याम् । (लाभ्यां ?) हीदं प्रपञ्चजातं परिच्छिन्नम् । न च कारणदोषबाधकप्रत्ययौ स्तः । पृथिव्यादिज्ञानस्य आसंसारं सर्वेषां प्राणिनामनुवृत्तेः । अतः पारमार्थिक एवायं भेदः तन्निबन्धनश्च व्यवहारः । तथैव यदि च मिथ्यात्वं सिद्धं स्यात् ततो द्विचन्द्रादिवत् बाधकप्रत्ययाभावात् अनुवर्तते. बाधकप्रत्ययं चासाद्य निवर्तते-इति कल्पना युज्येत । ननु प्रमितिवादि(प्रमातृ ?)वदविद्या अत्रापि कारणदोषः स्यात् ; तद्वतां प्रमातॄणां भेदविज्ञानम् उत्पद्यमानं मिथ्या स्यात्. द्विचन्द्रज्ञानवत् । अत्रोच्यते, स हेतुः परदूषणाय वक्तव्यो यः स्वसिद्धान्तं न बाधते । अयं तु तवैव दोषमावहति । यथा अविद्यावत्प्रमातॄणाम् उत्पन्नं भेददर्शनं मिथ्या तथा अद्वैतब्रह्मज्ञानमपि मिथ्यैव । .... किं प्रपञ्चज्ञानस्य बाधकप्रत्ययोऽस्ति ? अविद्यावत्त्वमेव च तत्रापि कारणं भवता व्यपदिष्टम् । तत्समानं सर्वत्र मिथ्यात्वे ततश्च मूलोच्छेदः प्रसज्यते । अनुमानान्तरं च – ब्रह्मज्ञानं मिथ्या. ज्ञानत्वात्, प्रपञ्चज्ञानवत् । यथा निद्रालक्षणस्य कारणदोषस्य अविशेषात् स्वप्नज्ञानस्य सर्वस्य मिथ्यात्वमापद्यते । यथा चारण्ये तैमिरिकगतस्य वसतो द्विचन्द्रज्ञानमविशिष्टम् । न च तेषां बाधकप्रत्ययोऽस्तीति । न चासत्यात् सत्यप्रतिपत्तौ दृष्टान्तोऽस्ति ॥

भा. सू. २–१–१४, पा. ९४.

अत्र पञ्चपादिकास्वीकृतं दोषादित्रितयजन्यत्वं मिथ्याज्ञानलक्षणम् उररीकृत्यैव दोष उद्घाटितः, न तु भाष्यकाराभिमतं सर्वस्य प्रमाणव्यवहारस्याविद्यापुरःसरत्वं परिशीलितमिति स्पष्टम् । न हि भाष्यकारैः प्रत्यक्षादिप्रमाणैर्मिथ्यात्वं साध्यते, येन तत्र कारणदोषादिगवेषणं स्यात् ; किं तर्हि, सर्वस्यैव व्यवहारस्याविद्यापुरःसरत्वम् अनुभवाधारेणैव स्वीकृतम् । न च 'ब्रह्मज्ञानं मिथ्या' इत्याद्यनुमानस्यात्र लब्धप्रसरत्वम् ।

प्रमाणस्यापि प्रपञ्चान्तःपातित्वे सति श्रुतितो जाते ब्रह्मज्ञाने तत्राकाङ्क्षान्तराभावात् । यथोक्तं भाष्यकृद्भिः – 'अपि चान्त्यमिदं प्रमाणम् आत्मैकत्वस्य प्रतिपादकं नातः परं किञ्चिदाकाङ्क्ष्यमस्ति' (सू. भा. २–१–१४) इति, 'न चेयमवगतिरनर्थिका, भ्रान्तिर्वा – इति शक्यं वक्तुम् अविद्यानिवृत्तिदर्शनात्, बाधकज्ञानान्तराभावाच्च । प्राक्चात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्च' (सू. भा. पा. १९९–२००) इति च ॥

(२) यत्तु प्रत्यक्षादीनां स्वतो मिथ्यात्वं नास्ति । परतस्तु मिथ्यात्वमिति, किं विशिष्योच्यते ? ननु सर्वत्र स्वप्नादावपि परत एव मिथ्यात्वं गम्यते, न स्वतः । न हि रजतज्ञाने तद्गतमिथ्यात्वं गृह्यते । तत्र चागमस्याबाध(ध्य?)स्य प्रत्यक्षादीनां सर्वदा मिथ्यात्वमेव स्यात्, न कदाचित्तथात्वमिति । प्रथमपादे प्रत्यक्षादिप्रामाण्यनिरूपणं चोदनाप्रामाण्यसिद्ध्यर्थं यत् तदुदके विशीर्णं स्यात्, उपवर्षाचार्यस्य शास्त्रसंप्रदायप्रवर्तकस्य ॥

भा. सू. २–२–२९, पा. १२४.

अत्र कः पूर्वपक्षो निरसनीयत्वेनाभीष्ट इति न ज्ञायते । भगवत्पादीयमते तु यावदागमेन प्रमातृत्वं न निवर्त्यते, तावत्प्रत्यक्षादीनां प्रामाण्यं निराबाधमिति स्पष्टमेव । उदाहृतं हि ब्रह्मविदां गाथाद्वयं चतुर्थसूत्रान्ते भगवद्भाष्यकारैरत्र विषये –

अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः ।
अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥
देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् ॥

सू. भा. १–१–४, पा. २४.

इति च । शास्त्रस्य अविद्यापुरःसरत्वं निराकुर्वता भास्करेण शास्त्रप्रामाण्यं पूर्वमीमांसानुसारेणैव रक्षणीयमिति स्पष्टमेव । तथा चोक्तं तत्र तत्र भाष्ये–

(३) केवलम् आगमैकसमधिगम्यत्वात् तत्प्रसिद्धमेव लक्षणं दर्शयितुम् आचार्यः प्रववृते ॥ भा. सू. १–१–२, पा. ८.

(४) शास्त्रं योनिः प्रमाणं यस्य तदिदं शास्त्रयोनि ब्रह्म । तस्य भावः शास्त्रयोनित्वम् । शास्त्रप्रमाणकत्वात् इति यावत् ॥

भा. सू. १-१-३, पा. ९.

[अत्र प्रपञ्चप्रविलापनद्वारेण कार्यत्वात् आत्मनो नियोगविषयत्वम् – इति पक्षो निराकृतः । आत्मज्ञानविषयत्वं च नियोगस्य निराकृतम्, भगवत्पादानुसृतरीत्यैव, ज्ञानस्यापुरुषतन्त्रत्वात् इति ॥]

(५) यदि च दुर्ग्रहबलेन सर्वत्र कार्यपरत्वं वर्ण्यते सर्वत्र, सर्वशक्तीश्वरस्य तत्त्वं न सिध्यति । कुतः –

विध्यर्थवादमन्त्रात्मा त्रिधा वेदो व्यवस्थितः ।
स चेदिष्टः कार्यपरो न स्वरूपे प्रमाणता ॥ ....
तस्मादवश्यं स्वरूपपरत्वमेवेष्टव्यमीश्वरमिच्छतेति ॥

भा. सू. १-१-४, पा. १५.

(६) यथा च प्रकृतिर्विकृतिं नापेक्षते परिपूर्णत्वात्, विकृतिश्च पुनः प्रकृतिमपेक्षते, अपरिपूर्णत्वात्, एवं पूर्वो वेदभागः परं नापेक्षते; स पुनः पूर्वमपेक्षते । वेदान्तवाक्यैरेव ज्ञानसहकारितया नित्यकर्मोपदेशात् ॥

भा. सू. १-१-४, पा. १६.

(७) यत् पुनः केवलकर्मभिः क्रियमाणं कर्म पुरुषयोग्यतापादनद्वारेण उत्तमाधिकारविधिशेषत्वं प्रतिपद्यते (इति ?) । तदुपेक्षामात्रेण कल्पितम् ॥ भा. सू. पा. १६.

[देवादिभ्योऽनृणीभावः पूर्ववृत्तः प्रज्ञाकषायपरिपाकश्च । एतदानन्तर्यमथशब्देनोच्यते प्रथमसूत्रे । 'आत्मा वा अरे द्रष्टव्यः' इत्यायुत्तमाधिकारविधियोग्यः पुरुषः क्रियते कर्मभिरिति केषाञ्चित् पक्षः ॥ द्र. भा. सू. पा. ४.]

(८) वेदोऽपि तस्मिन् ब्रह्मणि प्रतिष्ठितः सर्गादौ तदनुग्रहात् प्रजापतेर्मनसि प्रादुर्बभूव – इति न कश्चिद्दोषः । परमात्मनश्च नित्यत्वात् तदात्मत्वाच्च वेदस्य सुतरां नित्यत्वमुपपद्यते ॥ भा. सू. १-३-३०, पा. ६५

[विद्यमानस्याभिव्यक्तीकरणमेव सृष्टिः – इत्यङ्गीकुर्वता सर्वस्यापि नित्यत्वमत एव न्यायात् किं न प्रसजतीत्येतदिह न चिन्तितम् ॥

(९) अत्र मीमांसकाश्चोदयन्ति । कथं युगादौ कस्यचित् पुरुषस्य संप्रदायमन्तरेण वेदग्रहणम् ? एकस्य च प्रतिभाने वेदस्य कृतकत्वं प्रसज्यते ।

अत्र वदामः । वेदस्य तावत् प्रामाण्यं प्रथमपादोक्तेन न्यायेन वाच्यवाचकसंबन्धनित्यत्वात्, अस्मर्यमाणकर्तृकत्वात्, प्रयाजादिवदनपेक्षत्वात्, अनधिगतार्थगन्तृत्वात् (इति ?) आवयोः समानम् । स्वसिद्धार्थस्वरूपे प्रामाण्यं च पुरस्तात् प्रतिपादितम् । तेन यथा स्वर्गास्तित्वं भवान् प्रतिपद्यते, तथा अहमपि सृष्टिस्थितिप्रलयकारणं परमात्मानं सर्वज्ञं सर्वशक्तिं प्रतिपद्ये ॥

भा. सू. १-३-३०, पा. ६५.

[अत्र "कर्मफले हि स्वर्गादावनुभवानारूढे स्यादाशङ्का 'भवेद् वा न वा' –इति । अनुभवारूढं तु ज्ञानफलम् 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ. ३-४-१) इति श्रुतेः । 'तत्त्वमसि' (छां. ६-८-७) इति च सिद्धवदुपदेशात्" – (सू. ३-३-३२, पा. ४०७) इति भगवत्पादीया युक्तिर्नानुसृता – इत्येतदवधेयम् ॥]

शास्त्रतर्कयोः संबन्धः –

१६२. आगमस्य निरपेक्षप्रामाण्यं परिरक्षितुं भास्करभाष्ये तर्कस्य स्थानम् इत्थं वर्णितम् –

(१) तस्मादागमेन बन्धमोक्षव्यवस्था वक्तव्या ; न तर्केण, अनवस्थितत्वात् ॥ भा. सू. १-१-४, पा. १९.

(२) परमेश्वरस्यापि सर्वशक्तित्वात् । उपासकानुग्रहाय रूपोपादानसंभवात् । किं मायामयं रूपम् ? नेति ब्रूमः । पारमार्थिकमेवैतत् । यथाभूतार्थज्ञापकं हि शास्त्रम् ॥ भा. सू. १-१-२०, पा. २५.

[शास्त्रस्य ज्ञापकत्वमनुभवजननपर्यन्तम्, नाविद्यमानकर्तृत्वं शास्त्रस्य – इत्यस्मिन्नर्थे ज्ञापकं शास्त्रम् इति न्यायो भगवत्पादैराहृतः । अत्र तु यच्छास्त्रेण ज्ञाप्यते तद् यथाभूतम् – इति स न्यायः परिवर्तितः ॥]

(३) ननु कथम् एकस्मिन् देहे द्वौ द्रष्टारौ संभवतः इति ? को विरोधो येनैवम् उच्यत इति ? श्रुतिर्हि नान्योऽतोऽस्ति द्रष्टा – इति प्रकृतादन्तर्यामिणोऽन्यं वारयतीति । अत्रोच्यते । यथैवेयमेव भेदं दर्शयति तथा पूर्वमुदाहृतम् । 'आत्मनि तिष्ठन्' इति भेदं दर्शयति । किं न पश्यसि ? न ह्यस्याः श्रुतेर्वचनं सुभगावचनमिवानादरणीयम् प्रामाण्यतुल्यत्वात् ॥

भा. सू. १-२-२०, पा. ४५.

[अत्र स त आत्मा अन्तर्याम्यमृत इति ब्रह्मणः सर्वान्तरत्वदर्शनपरापि श्रुतिर्भेददर्शनपरत्वेन व्याख्याता ॥]

(४) भवतु श्रुतिसंवादात् सम्यग्दर्शनोपायोपदेशांशस्य तथात्वम्, विप्रतिपन्नांशस्य तु मिथ्यात्वं पुरुषाणाम् अन्यथार्थदर्शित(?)त्वसंभवात् ॥

भा. सू. २-१-३, पा. ८९.

[सर्वैरपि वादिभिरेवमेव श्रुतिसंवादं प्रदर्श्य स्वाभिमतांशे, अनभिमतांशस्य तर्केण निराकरणं न संभवति वा ? – इत्येतत्तु न विचारितमत्र ॥]

(५) यदुक्तं 'मन्तव्यः' इति तर्कस्यानुप्रवेशं श्रुतिः श्रावयतीति नैवानया श्रुत्या शुष्कतर्कोऽभ्यनुज्ञायते, किं तर्हि, आगमानुसारी यस्तर्कः, तदुपपत्त्यर्थं स एवानुज्ञायत इति ॥ भा. सू. २-१-६, पा. ९०.

[तर्कविशेषस्यागमानुसारित्वे वादिनो यत्र विप्रतिपन्नाः, तत्र कथं निर्णयः ? -इत्येतन्न चिन्तितमत्र ॥]

(६) तर्काणां कथ(मप्य ?)त्यन्तातीन्द्रिये विषये साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानासंभवात्, नानुमानेनाभिप्रेतार्थसिद्धिः कस्यचित्, अतः श्रुतिमूलमेव ऽगद्बीजावधारणम् इति स्थितम् ॥ भा. सू. २-१-११, पा. ९२.

[तदवधारणं सर्ववादिसंप्रतिपन्नं कथं भवेदिति तु नोक्तमत्र ॥]

(७) 'आदि'ग्रहणम् दृष्टान्तप्रतिदृष्टान्तानन्त्यात्. आगमसिद्धस्यार्थस्य अनुमानेन दूषणम् ऋणं धनं वा न शक्यते कर्तुमिति ॥

भा. सू. २-१-२५, पा. १०४.

[आगमसिद्धस्यानुभवपर्यन्तता अस्ति वा न वा ? – इत्येतत्तु नोक्तम् ॥]

'न शक्यते वचनशतेनापि वस्तुतत्त्वम् अन्यथाकर्तुम्' इति (भा. सू. ४-४-२२, पा. २४९) इति यद्यपीहापि न्यायः कदाचिदुपनीतः, तथापि प्रायेण सर्वत्र श्रुतिसंगानं यथा स्यात्, तथैव विषयनिरूपणं कर्तव्यम् – इत्यर्थे एवायं न्यायः परिगृह्यत इति स्पष्टम् । अत एव हि भास्कराचार्या इमे यत्र यत्र स्वसिद्धान्तोपरि प्रक्षिप्यमाणानाक्षेपान् सर्वान् सामान्येन श्रुतिवचनोदाहरणब्रह्मास्त्रेणैव प्रतिक्षेप्तुमीहन्ते, तर्कं तु समाह्वयन्ते प्रतिपक्षदोषाविष्करणे – इति च । सैषा वादसरणिर्वाचीनानामनेकेषां वेदान्तिनामनुकरणीयताम् अभजतेति शोचनीयमेतत् ॥

भास्करमते कार्यकारणभावस्य प्रामुख्यम् –

१६३. भास्करमते ब्रह्मपरिणाम एव जगदित्यतो कार्यकारण-प्रक्रियाया अग्रिमं स्थानं विद्यते । अत एव जिज्ञासासूत्रव्याख्यानावसरे एवं लिखितम् –

> प्रसिद्धं तावद् ब्रह्म आगमप्रमाणगम्यत्वात्, 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' इति जगत्कारणोपदेशात् । ब्रह्मशब्दव्युत्पत्तेश्च । बृंहतेर्धातोर्ब्रह्म । यतः परं बृहदधिकं नास्ति, तन्मूलकारणमेव पारिशेष्यात् । कार्यप्रपञ्चे तु ब्रह्मशब्दो गौणः । मुख्यपूर्वश्च गौणो भवति । यथा 'अग्निर्माणवकः' इति । किमर्थो तर्हि जिज्ञासा? तद्विशेषं प्रति विप्रतिपत्ति-निराकरणार्था । केचित् त्रिगुणं प्रधानं जगत्कारणमाहुः । अपरे परमाणुं प्रतिजानते । अतः प्रस्तूयते ब्रह्मजिज्ञासा । ब्रह्म च कारणात्मना, कार्यात्मना, जीवात्मना च त्रिधा अवस्थितम् । तत्राविशेषेण ब्रह्मजिज्ञासा प्रस्तूयते । 'ब्रह्मैवेदं सर्वम्' इति ब्रह्मशब्दस्य अविशेषात् ॥
>
> भा. सू. १-१-१, पा. ७-८.

अत्र ब्रह्म सर्वस्यात्मत्वेन प्रसिद्धं शास्त्रे । तद्विशेषं प्रति तु विप्रति-पत्तिरिति जिज्ञासा कर्तव्या – इति भगवत्पादीयं प्रस्थानम् । तत्र कारणत्वाकारणत्वोदासीनं ब्रह्म जिज्ञास्यम् इति शास्त्रार्थः सिध्यति । 'जन्माद्यस्य यतः' इति तु न जगत्कारणनिर्देशार्थम्, किं तु ब्रह्मलक्षण-समर्पणार्थं सूत्रम् इति च । अत्र पुनः, जगत्कारणे वादिविप्रतिपत्ति-दर्शनात्, ब्रह्मजिज्ञासा प्रस्तूयते इति न संगतोक्तिरिति भाति । तथा हि ब्रह्मैव कारणमिति प्रतिपादयितुं शास्त्रप्रवृत्तिरिति भवेत्, न तु प्रसिद्धमेव ब्रह्म जिज्ञास्यमिति । अभ्युपगम्यापि कारणब्रह्मजिज्ञास्यता शास्त्रार्थ इति त्रिधावस्थितब्रह्मणोऽविशेषेण जिज्ञासा प्रस्तूयत इति न संगतम् । कारणत्वेन हि ब्रह्म जिज्ञास्यं भवति विप्रतिपत्तिनिराकरणायेति ॥

कार्यकारणप्रक्रिया –

१६४. कार्यकारणयोरुभयोरपि सत्यत्वम्, तयोर्भेदाभेदश्च – इति मतमत्र ॥

(१) कार्यकारणयोरत्यन्तं भेदः, कारणं मृत्पिण्डः, शरावादिकार्यं भेदेनोपलभ्यते। कार्यस्य च उदकाहरणादिकार्यम्, न मृत्पिण्डस्य। अतो अनयोर्भेदः। असच्च कार्यमुत्पद्यते इति वैशेषिका मन्यन्ते। तन्निराकरणायाह ॥ भा. सू. २-१-१४ अवतरणिका, पा. ९३.

[अत्र वैशेषिकनिराकरणमप्रस्तुतप्रक्रिया। स्वपक्षे स्मृतिन्यायविरोधपरिहार एव हि पादार्थ इति प्रतिज्ञात इति ॥]

(२) 'तयोरनन्यत्वम् आरम्भणशब्दादिभ्यः'। एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्सिषाधयिषया दृष्टान्त उपादीयते - 'यथा सोम्येकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६-१-४) इति वार्थः (अस्यार्थः?)। वागिन्द्रियस्य, उभयमारम्भणं विकारो नामधेयं च। विकारोऽभिधेयोपप(त्प?)त्तिः। तदभिधेयं नामधेयम् उभयमालम्ब्य वाग्व्यवहारः प्रवर्तते। 'घटेन उदकमाहर' इति। मृन्मयम् इत्यस्येदं व्याख्यानम्। यदि तर्हि व्यवहारहेतुः कार्यम्, न तर्हि कार्यकारणयोरनन्यत्वम् इत्याशङ्क्याह - मृत्तिकेत्येव सत्यम् इति। कारणमेव कार्यात्मना घटवदवतिष्ठते। मृत्सामन्विलं हि कार्यमुपलभ्यते त्रिष्वपि कालेषु। कारणाधीनं कार्यम्, नाश्वमहिषवद् देशतः कालतो वा व्यतिरिक्तमुपलभ्यते। कारणस्य अवस्थामात्रं कार्यं व्यतिरिक्ताव्यतिरिक्तम्, शुक्तिरजतवदागमापायधर्मित्वाच्च 'अनृतम्', 'अनित्यम्' - इति च व्यपदिश्यते ॥ भा. सू. २-१-१४, पा. ९३.

['शुक्तिरजतवदनृतम्' इति किमित्युक्तमिति न ज्ञायते ॥]

(३) 'अपागादग्नेरग्नित्वम्' (छां. ६-४-१) इति च कारणात्मना निरीक्ष(क्ष्य?)माणं कार्यं चातिरिक्तं नोपलभ्यते, कारणात्मन्येव तिरोहितं भवति - इत्यभिप्रायेणोक्तम् ॥ भा. सू. ९३.

(४) आदिशब्देन 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' (छां. ६-८-७) इत्येवञ्जातीयकं वचनं गृह्यते ॥ भा. सू. पा. ९३.

(५) तथा च श्रुत्यन्तरम् आत्मव्यतिरिक्तस्य प्रपञ्चस्य सत्यतां दर्शयति - 'अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यम् तेषामेष सत्यम्' (बृ. २-३-६) इति। यदि चानृतत्वमभिप्रेयात् 'प्राणा असत्यम्' इति ब्रूयात् ॥ भा. सू. पा. ९३.

अत्र कार्यं कारणाद् व्यतिरिक्ताव्यतिरिक्तम् इति कुतो लभ्यत इति न ज्ञायते । दृष्टान्ते यद्यपि मृद: सत्यत्वं प्रत्यक्षसिद्धमेवानूद्यते, तथापि 'मृत्तिकेत्येव सत्यम्' इति किमित्येवकारेणावधार्यते ? न हि कार्यस्यापि सत्यत्वे विवक्षिते तत् संगतं भवेत् । एवम्, त्रिवृत्करण-प्रक्रियायामपि 'कारणात्मना निरीक्ष्यमाणम्' कार्यं व्यतिरिक्तं नोपलभ्यते स्वेन रूपेण सत्यमेव – इति चेद् विवक्षितम्, तर्हि किमिति प्रतिपर्यायम् 'अपागादग्नेरग्नित्वम्', 'अपागादादित्यस्यादित्यत्वम्' इत्यग्नित्वादीनामपगमो भूयो भूय उद्घुष्यते 'त्रीणि रूपाणीत्येव सत्यम्' इति च रूपत्रयस्यैव सत्यत्वमवधार्यते ? न हि दृष्टान्ते घटस्य दार्ष्टान्तिके अग्न्यादीनां वा सत्यत्वं केनचित् संशय्यते, विकारनामधेययोर्व्यवहारा-लम्बनत्वे सिद्धेऽपि ? किं च कारणम् उभयत्रापि 'वाचारम्भणं विकारो नामधेयम्' ? इति प्रतिपर्यायम् अभ्यस्यते, न हि बाह्यं घटादिकं वागिन्द्रि-येणाभिधेयम् अभिधानं च वागिन्द्रियव्यवहारयोग्यमित्येतत् केनचिन्निषिद्धं संशयितं वा, येनैवमभ्यासेनावध्रियेत । तदेतत् कारणस्यैव सत्यत्वावधारणं कार्यस्य तु रूपधेयनामधेयस्वरूपेण वाचारम्भणत्वाभ्यासश्च न सम्यगुपपादितं कार्यसत्यत्ववादिमतेनेति भाति ॥

यदप्युच्यते 'कार्यं व्यतिरिक्ताव्यतिरिक्तं शुक्तिरजतवदागमापाय-धर्मित्वात् अनृतमनित्यमिति च व्यपदिश्यते' इति, तत्र किम् आगमा-पायित्वादनित्यमित्येतावद् विवक्षितम्, आहोस्वित् शुक्तिरजतादिवत् प्रतीति-मात्रशरीरकमसत्यमित्येव कृत्वा अनृतमिति व्यपदिश्यते–इत्येतन्निरूपणीयम् । दृष्टान्तवद्दार्ष्टान्तिकेऽपि सत्यप्रतिद्वन्द्विवाचकतयैव ह्यनृतशब्द उपचरितो लक्ष्यते 'स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते । सोऽनृताभि-संधोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति संदह्यतेऽथ हन्यते', 'अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसंधः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते' इति

चोक्त्वा (छां. ६–१६–१, २) 'स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं तत्सत्यम्' इति 'ब्रह्मैव सत्यम्' इति सत्याभिसंधो मुच्यते–इति दृष्टान्त-दार्ष्टान्तिकयोः सममेव सत्यशब्दोपादानदर्शनात् । तस्मादत्र कार्यस्य शुक्तिरजतवत् कारणेऽध्यारोपितत्वेन वाचारम्भणमात्रत्वात् – केवलं वाचैव घटघटिकाद्यात्मना आरभ्यत्वात् – कारणव्यतिरेकेणाभाव एव इति कृत्वा 'तदनन्यत्वम्' उच्यते इति वदतां भगवत्पादसंमताध्यारोपापवादप्रक्रिया-मालम्बमानानां पक्ष एव सूत्रकारसंमत इति भाति । अन्यथा हि 'तदन्या-ननन्यत्वम्' इत्येवोच्येतेति ॥

यत्तूच्यते – 'अथ नामधेयम् सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्' (बृ. २–३–६) इति श्रुत्यन्तरं प्राणानां सत्यत्वं ब्रूते इति, तदसत् । श्रुत्यन्तरेण तत्परेण सिद्धस्य श्रुत्यन्तरेणातत्परेण प्रतिषेधा-नुपपत्तेः । वाचारम्भणश्रुतिस्तावत् विकारस्य सर्वस्य नाममात्रत्वं कारणस्यैव सत्यत्वमित्यसकृदुद्घोषयति । 'प्राणा वै सत्यम्' इति लोकसिद्धानुवादः, 'तेषामेष सत्यम्' इत्येव तु प्रतिपादनम् । प्राणानां सत्यत्वं सत्यच्छब्द-वाच्यतया व्यावहारिकसत्यतया च ; तेषु विभाव्यमानं सत्यत्वं तु वस्तुतो नेतिनेत्यात्मन एव–इत्यतः 'सत्यस्य सत्यम्'–इत्युच्यते आत्मा । 'येनायो दहति, तदग्नेरौष्ण्यम्' इतिवत् । अतो नैतत् प्रपञ्चानृतत्वबाधकमिति सिद्धम् ॥

कार्यमिथ्यात्वनिरासः –

१६५. यथा नानात्वं मिथ्येति पक्षो भास्करभाष्ये निरस्यते तथा दिङ्मात्रं दर्शितं प्रत्यक्षादिप्रामाण्यनिरूपणप्रसङ्गेन (खं. १६१, पा. ३४६) । आगमादपि मिथ्यात्वासिद्धिरित्येतदित्थमुपपादितं भास्करेण–

(१) (अथ) आगमात् प्रपञ्चस्य मिथ्यात्वमुच्यते, तदयुक्तम् । श्रोत्र-प्रभवस्य ज्ञानस्य मिथ्यात्वात्, वर्णात्मकस्य तत्त्वमस्यादिवाक्यस्याभावः । ततश्च केन मिथ्यात्वं प्रतिपद्येत ? भा. सू. २–१–१४, पा. ९५.

(२) 'नेह नानास्ति' इत्यपि इहशब्दोपादानात्, कारणस्वरूपे नानात्वं नास्तीति विवक्षितं स्थितम्। स्थित्यवस्थायां तु कार्यमप्यस्तीत्यविरोधः ॥ भा. सू. पा. ९५.

(३) 'स एष नेतिनेत्यात्मा' इति शरीराद्यनात्मपर्युदासेन आत्मस्वरूपमुपदिश्यते ॥ भा. सू. पा. ९५.

(४) 'यत्र स (हि?) द्वैतमिव' इति इवशब्दोऽनर्थकः, यथा 'वितत्तमिव' इति; अवधारणार्थो वा, 'यथाश्व इव' इति; सादृश्यार्थो वा, यथाग्नेर्वाग्नेः (यथा आद्रैधाग्नेः?) धूमविस्फुलिङ्गादिवत्। विविधं विकारजातं यस्याम् अवस्थायां भवति तदितरं इतरं पश्येत्, 'यत्र त्वस्य सर्वमात्मैवाभूत् तदा केन बलेन कं विषयं पश्येत्' इति विषयज्ञानं निषिध्यते कारणप्राप्तौ – इत्येवं सर्वम् अविरुद्धम् ॥ भा. सू. पा. ९५.

अत्र सर्वत्रापि द्वैतक्षेत्रे सत्यानृतविभागोऽस्त्येवेति वेदान्तसिद्धान्तः। वैयात्येन तु तदनुवादोऽन्यथा क्रियते। यदा तु श्रोत्रप्रभवस्य ज्ञानस्य वर्णात्मकतत्त्वमस्यादिवाक्यस्य च मिथ्यात्वम्, किं तदा श्रोत्रस्य मुखस्य च सत्यत्वं भवति, येन वक्ता वाक्यं ब्रूयात्, श्रोता च श्रुतिवाक्यं तदर्थं वा गृह्णीयात्? कस्य वा तत्र सत्यत्वं मिथ्यात्वं वा साध्येत, बाध्येत वा? अत्रेदमभियुक्तवचनमनुसंधेयम् –

> विकल्पो विनिवर्तेत कल्पितो यदि केनचित्।
> उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ गौ. का. १-१८.

अतो ब्रह्मैवेदं सर्वमिति ज्ञानात् प्रागेव सत्यमिथ्याविभागकथनम्। यथाहुर्भाष्यकाराः –

> 'प्राक् चात्मैकत्वावगतेरव्याहतः सर्वः सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम' (सू. भा. २-१-१४, पा. १९९)

इति। तत्र भास्करोदाहृतश्रुतिवचनानि परिशील्यन्ते तद्व्याख्यानस्यानाञ्जस्य प्रकटनार्थम् ॥

(१) **'नेह नानास्ति किञ्चन'** (का. २-१-११) इति श्रुतिः ब्रह्मणि नानात्वं किञ्चन नास्ति – इत्याह, न तु कारणे ब्रह्मणीति।

अप्रकृतत्वात् कार्यकारणप्रक्रियायाः । 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते' इति सर्वप्रपञ्चधर्मवर्जितस्य ब्रह्मात्मनोऽवगमेनामृतो भवतीति खलु पूर्वस्यां वल्ल्यामुक्तम् । तदेवेह वल्ल्यां प्रपञ्च्यते सप्रपञ्चत्वदर्शनादेवायमात्मा न प्रकाशते—इति ज्ञापयितुम् । प्रकृतमन्त्रेऽपि सप्रपञ्चत्वदर्शनं विनिन्द्यते 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' । न हि कारणब्रह्मणि नानात्वं प्राप्तम्, येन तद्दर्शनं विनिन्द्येत । तस्मात्, ब्रह्माप्यविद्याकृतं नानात्वमेव निषिध्यते वाक्येन—इति युक्तम् ॥

(२) **'स एष नेतिनेत्यात्मा'** इति वाक्यं बृहदारण्यके नैकवारम् उपन्यस्तम् । सर्वत्रापि 'अथात आदेशो नेति नेति' (बृ. २–३–६)[1] इत्यत्रोक्त एवात्मा परामृष्ट 'नेतिनेत्यात्मा' इति । तत्र तृतीयाध्याये तावत् पूर्वस्मिन् ग्रन्थे पृथिव्याद्याकाशान्तेषु पूर्वस्य पूर्वस्योत्तरस्मिन्नुत्तरस्मिन् ओतत्वं देवतानां नियन्तव्यत्वं चोक्तम् । समनन्तरपूर्ववाक्यं तु 'कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति, प्राण इति' इत्यादि प्राणापानादीनामुत्तरोत्तरस्मिन् प्रतिष्ठितत्वमाह । नात्र शरीरादिकं परामृष्टम् । चतुर्थे तु द्वितीयब्राह्मणे (ब्र. ४–२–४) 'इन्धो ह वै नामैषः' इत्यादिना वैश्वानरतैजसप्राणाः पूर्वं परामृष्टाः । तदनु 'स एष नेति नेत्यात्मा' इत्युक्तत्वात्, आत्मनि वैश्वानरत्वादिकं निह्नुते इति गम्यते । पुनस्तत्रैव चतुर्थब्राह्मणे सकामस्य संसारगतिं आत्मकामस्य च सर्वैषणात्यागेन मोक्षं चानुक्रम्य 'स एष नेति नेत्यात्मा' (बृ. ४–४–२२) इत्याह । उभयत्रापि शरीरादेरात्मविवेक इत्यत्र गमकं किमपि नोपलभ्यते । पुनरपि मैत्रेयीब्राह्मणे दुन्दुभ्यादिदृष्टान्तेन सामान्यविशेषभावम् अग्निसमुद्रदृष्टान्तैर्नामरूपप्रपञ्चस्यात्मन उत्पत्तिं तत्रैव च लयं दर्शयित्वा

1. अत्रोपनिषत्कर्मणैवाध्यायसङ्ख्या दीयते, न तु प्रकर्यब्राह्मणमपि परिगणनेऽन्तर्भाव्येति ज्ञेयम् ॥

द्वैताद्वैतदृष्टिभेदौ चोपन्यस्याह 'स एष नेतिनेत्यात्मा' (बृ. ४-५-१५) इत्याह । सर्वत्राप्यत्र यद् यद् दर्शितम् उपायत्वेन, तदेवात्मनि वस्तुतो नास्तीति निषिध्यत इति युक्तम् । निष्प्रपञ्चत्वमात्मनो विज्ञापयितुं प्रवृत्तत्वात् । न तु कुत्रापि 'शरीराद्यात्मपर्युदासेन आत्मस्वरूपदर्शने' यत्नः कृतो दृश्यते । स्वरूपेणाग्राह्यत्वादेवात्मनः । तस्मात्, यः प्रपञ्चो निह्नुतोऽत्र तस्य मिथ्यात्वमेव युक्तमवगन्तुमित्युत्पश्यामः ॥

(३) अथ **'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति .... यत्र त्वस्य सर्वमात्मैवाभूत्'** (बृ. ४-५-१५) इति वाक्ये यत्र हि 'द्वैतमिव' इत्यनर्थकः, अवधारणार्थः, सादृश्यार्थो वा इवशब्दः – इत्यत्र गमकं किञ्चिदपि नोपलभ्यते । मैत्रेयीब्राह्मणे हि जगत्सृष्टिस्थिति-प्रलयकारणत्वम् आत्मन एवेति प्रदर्श्य, आत्मा प्रज्ञानघनोऽपि भूतमात्राकृत-शरीरादिसंसर्गाद् विशेषविज्ञानवानिव विभाव्यमानोऽपि भूतेभ्यो व्युत्थाने सति न विशेषसंज्ञावानिति 'न प्रेत्य संज्ञास्ति' इति श्रुत्या ज्ञापितम् । अतो यत्रैव द्वैतमिव भवति तत्रैव सैन्धवखिल्य इव परिच्छिन्नत्वमात्मनः, तत्रैव च विशेषसंज्ञा इतरस्य इतरेण दर्शनम्, न तु स्वाभाविके अद्वैते – इत्येव याज्ञवल्क्यो विवक्षतीति युक्तम् । 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति सावधारणश्रुतेः । एवेत्यवधारणं हि विद्यया निरस्तद्वैतावस्थामाह इवेति प्राग्दर्शितमिथ्यादर्शनव्यवच्छेदेनेत्यक्षराङ्कस्यं भवेत् । न हि 'यत्र कारणत्वं प्राप्तः' इति श्रुतिरस्तीति ॥

अत्राह भास्कराचार्यः –

(१) न च पुरुषापेक्षया मिथ्यात्वं सत्यत्वं वा प्रपञ्चस्य कल्पयितुं शक्यम्, मुमुक्षून् प्रति मिथ्या, इतरान् प्रति सत्यम्–इति । न हि रूप-मन्धान् प्रति असत्यम्, इतरान् प्रति सत्यम् – इति शक्यं वक्तुम् । न हि पुरुषस्व(रूपा,भावानुरोधिनो भावाः, येन तदपेक्षया सत्यत्वम्, असत्यत्वं वा भजेरन् । ... किञ्च,

प्रपञ्चास्तित्वमज्ञस्य तस्यैव ज्ञानिनः पुनः ।
स एव किल नास्तीति कथं सह्यं वचो भवेत् ॥
न हि द्विचन्द्रः प्रागासीत् पश्चान्नास्तीति युज्यते ।
द्विचन्द्रज्ञानतुल्यत्वं प्रत्यक्षादेस्त्वपेक्ष्यते ।
.... न च तिमिरवत् प्रपञ्चमिथ्यात्वे कारणदोषो गृह्यते ॥

सू. भा. १-१-४, पा. १७, १८.

इति। अत्रेदं वक्तव्यम्-क एवमाह तदेव वस्तु पुरुषमेकं प्रत्यस्ति, पुरुषान्तरं प्रति नास्तीति? ज्ञानाज्ञानापेक्षया सत्यत्वबुद्धिः, मिथ्यात्वबुद्धिश्च सर्वैरभ्युपेयेते । न हि शुक्तिरजतं पश्यन् तत्काले रजतं 'मिथ्या' इति मन्यते । न च तदानीं तत्र तस्य सत्यत्वबुद्धिरस्तीत्येतावता रजतं सत्यमेव भवति सर्वेषामपि तत्प्रेक्षकाणाम् । न च शुक्तिज्ञानवतस्तत्र पूर्वं विद्यमानं सत् रजतमपगच्छति बाधकाले कुत्रचित्। एवमेव प्रत्यक्षादिज्ञानम्, प्रपञ्चः-इत्यादि सर्वमपि मिथ्यैव सत् अविद्यावतां सत्यमिव भासते, विद्यया तु तत्र सत्यत्वबुद्धिर्बाध्यते । यथा शरीरादिष्वात्मबुद्धिर्यथार्थेति लौकिकैर्निश्चिता सत्यपि विद्ययापगच्छतीति भवानप्यनुमन्यते । तदेवाहुः सांप्रदायविदः -

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् ॥

ब्रह्मविदां गाथा, सू. भा. १-१-४.

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥

गौ. का. १-१७, पा. १९०.

इति च । न च नास्त्येव कस्यचिन्मिथ्यात्वज्ञानम् । सुषुप्तिसमाध्यादावदर्शनेन विवेकिनां प्रपञ्चस्य व्यभिचरत्स्वरूपस्य मिथ्यात्वनिश्चयात् । दर्शनानुवृत्तिस्तु चन्द्रसूर्यादीनां प्रादेशमात्रज्ञानानुवृत्तिवदित्यनवद्यम् ॥

तदेवं व्याख्यानकौशलप्रदिदिर्शयिषुभिर्यद्यपि शक्यन्त एवाद्वैतश्रुतयः, द्वैतनिषेधश्रुतयश्च, अन्यथान्यथा व्याख्यातुम्, तथापि प्रकरणादि-

पर्यालोचनया अनुभवाङ्गयुक्तयवष्टम्भेन च वीक्ष्यमाणे सर्वत्रात्र अध्यारोपापवादप्रक्रियैव त्रय्यन्तार्भीष्टेति सुस्फुटं भवेत् निष्पक्षपातिपरीक्षकाणाम् इति सुस्थम् ॥

आत्मपरिणामवादः –

१६६. 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रे एकज्ञानेन सर्वविज्ञानप्रतिज्ञानात्, मृद्विज्ञानेन सकलमृन्मयविज्ञानवदिति दृष्टान्ताच्च ब्रह्म न केवलमधिष्ठातृकारणं जगतः, किं तु 'प्रकृतिः' उपादानकारणमपीत्युक्तम् । 'बहु स्याम्' इति संकल्पपूर्वकसृष्टिकथनात्, ब्रह्मैव कारणमुपादाय सृष्टिप्रलययोराम्नानाच्चैतदेवम् – इत्युत्तरसूत्रयोरभिहितम् । तदनन्तरसूत्रे तु – 'आत्मकृतेः परिणामात्' (वे. सू. १–४–२५)[1] इत्युच्यते । तत्र भगवत्पादीयं भाष्यम् 'पूर्वसिद्धोऽपि हि सन्, आत्मा विशेषेण विकारात्मना परिणमयामासात्मानम् । विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्धः' (सू. भा. पा. १७७) इति । भास्करीयभाष्ये तु लिखितमस्ति –

> (१) परमात्मा स्वयम् आत्मानं कार्यत्वेन परिणमयामास-इत्यर्थः । शक्तिविक्षेपं कृतवान् । अनन्ता हि तस्य शक्तयोऽचिन्त्याश्च तासां विक्षेपं करोति सृष्टिस्थितिकाले यथा सूर्यो रश्मीनाम्, तद्वदेव संहरति ॥
>
> भा. सू. पा. ८५.

इति । अत्र यद्यपि परिणामशब्द उभयत्र समानः, तथापि प्रक्रिययोरनयोर्महद् वैलक्षण्यमस्ति । भगवत्पादानां हि यथा मृदादयः स्वात्मरूपेणैव स्थिता घटादिरूपेण स्वात्मानं दर्शयन्ते, न तु घटादिविकाराणां वाचारम्भणमात्राणां मृदाद्यात्मत्वव्यतिरेकेण सत्त्वान्तरमस्ति, एवम् आत्मापि प्रपञ्चरूपेणाभासते, प्रपञ्चस्यात्मव्यतिरेकेणाभाव एवेत्यभिप्रायः । भास्कराचार्यमते तु

1. संख्यानिर्देशो भास्करानुसारेण; भगवत्पादानुसारेण तु २६तममिदं सूत्रम् ॥

तथ्यत एव अचिन्त्या अनन्ताः शक्तयः सन्ति परमात्मनः। तद्विक्षेपभूतं कार्यमपि प्रपञ्चलक्षणं सत्यमेव – इति विशेषः॥

(२) तथा च वाक्यं 'परिणामस्तु स्याद् दध्यादिवत् इति। विगीतं विच्छिन्नमूलं माहायानिकबौद्धगाथितं मायावादं व्यावर्णयन्तो लोकान् व्यामोहयन्ति॥ भा॰ सू॰ पा॰ ८५॰

[अत्र कार्यं प्रतीतरूपेण मायामयमित्येतत् श्रुतिसंमतं विस्पष्टमेव प्रत्याख्यातम्॥]

(३) कथं पुनः परिणामो निरवयवस्याकाशकल्पस्येति चेत्? अत्रोच्यते। परिणामस्वाभाव्यात् क्षीरवत्। सर्वज्ञत्वाच्च सर्वशक्तित्वाच्च स्वेच्छया परिणामयेदात्मानमिति शक्यते वक्तुम्॥ भा॰ सू॰ पा॰ ९६॰

परिणामस्वाभाव्यात् परिणामः, परिणामाच्च तत्स्वाभाव्यम्-इत्यन्योन्याश्रयः स्पष्टः। सर्वज्ञत्वात् सर्वशक्तित्वाच्च परिणाम इति वदता, अशक्यमपि कर्तुं प्रभवेत् सर्वशक्त इत्युक्तं भवेत्। तत् किं स्वात्मानं विनाशयितुमपि प्रभवेत् सर्वशक्तः, आत्मनोऽभावं वा जानीयात् सर्वज्ञः–इति नालोचितमत्र॥

(४) ननु सावयवत्वात् क्षीरस्य परिणामोपपत्तिः। उच्यते। न सावयवत्वं तत्र परिणतिहेतुः। यदि स्यात् अम्बुनोऽपि दधिभावेन परिणामः स्यात्। अतोऽप्रयोजकं सावयवत्वम्। परिणामस्वाभाव्यादेव हि पयः परिणमते॥ भा॰ सू॰ पा॰ ९६॰

अहो तर्कशैली! सावयवत्वाद् यदि परिणामः, तर्हि अम्बुनोऽपि दधिभावेन परिणामः स्यादिति कोऽयमपूर्वो नियमः? यस्यापि परिणामस्वाभाव्यादेव दधिभावः, तस्याप्यम्बुनः किं न स्याद् दधिभावेन परिणामः? – इति पृष्टव्योऽयं तार्किकः। तथास्वभाव्याभावादिति चेत्, एवं स्वभाववादेन कस्य वा वादिनः किं न सिध्येत्। 'एवंस्वाभाव्याद् वस्तुनः एवं भवति, एवंस्वाभाव्याभावाच्च न तथा भवति' इत्येतावदेवालं सर्वत्रेष्टसाधने, किं हेतुविशेषस्य साध्यव्याप्यत्वादर्शनप्रयासेनेति सर्वमपि सदसद्धेतुपरीक्षयं लवणाम्बुधावेव हि निर्धार्येतेति॥

(५) तदपीदं चिन्त्यम्–किमवयविनः परिणामे शक्तिः, आहोस्वित् अवयवानामिति । न हि तस्मिन् द्रव्यद्रव्ये अवयवी नाम व्यतिरिक्तोऽभ्युपगम्यते मायावादिना । ततः परिशेषात्, अवयवानां शक्तिः । ते च निरवयवाः । न ह्यवयवानाम् अवयवाः सन्ति, येन सावयवस्य परिणामो वर्ण्येत ? ये चावयवानाम् अवयवाः कल्पिताः, ते किं परिणमन्ते नेति ? यदि न परिणमेरन्, दधनि पयो दृश्येत । तस्मात् सर्वेषामवयवानां परिणामित्वम् एष्टव्यम् । किञ्च, अवयवानाम् अवयवकल्पने तेषामप्यवयवकल्पने हि अनवस्था ; क्षीरमसुद्रश्च कुण्डे स्यात्, अवयवानामानन्त्यात् । तस्मान्निरवयवस्यैव परिणामो दृश्यत इति ब्रह्मणोऽप्युपपद्यते । तथा च न्यग्रोधा(दी ?)नां दृष्टान्तेन परिणामो वर्णितः श्रुत्या ॥

भा. सू. २–१–१४, पा. ९६.

अत्रापि तर्ककौशलप्रदर्शनं क्रियते । यदि हि निरवयवा अवयवाः, तत्राप्यवयवकल्पने चानवस्थादिदोषः, तर्हि मास्तु अवयवानां परिणामवत्त्वम्, किं तत्र च्छिन्नं मायावादिनः ? न हि स वास्तविकमेव कार्यकारणभावम् अभिमन्यते यथा भवान् । किञ्च, यदि सावयवस्य परिणामो नोपपद्यते, मा नामोपपद्यताम् ; कथं तावता निरवयवस्यैव परिणामः सेत्स्यति ? परिणामो दृश्यत इति चेत्, दृश्यताम् । तावता तथ्यत एव परिणाम इति कुतोऽङ्गीकर्तव्यम् ? 'सतो हि मायया जन्म युज्यते न तु तत्त्वतः' (गौ. का. ३–२७) इति हि प्रतिवादिनो मतम् । अपि च ब्रह्मणो निरवयवस्यैव तत्त्वतः परिणामे अभ्युपगम्यमानेऽपि कथं नानवस्था ? न ह्यजं जायत इत्युपपद्यते । ततश्च 'तत्त्वतो जायते यस्य जातं तस्य हि जायते' (गौ. का. ३–२७) इत्यभियुक्तप्रदर्शितन्यायेन तत्रापि हि ध्रुवमनवस्था समापतेदिति मन्तव्यम् । न्यग्रोधदृष्टान्तश्रुतिस्तु – अत्यन्तसूक्ष्माद् ब्रह्मणो नामरूपादिमत् कार्यं जगदुत्पन्नमित्येतावदाह, न तु तात्त्विकपरिणाम इतीत्यनुदाहरणम् ॥

(६) अप्रच्युतस्वरूपस्य शक्तिविक्षेपलक्षणः ।
परिणामो यथा तन्तुनाभस्य पटतन्तुवत् ॥

पटवच्च । यथा अप्रच्युतस्वरूपाणां तन्तूनां पटात्मना अवस्थानम्, यथा आकाशादप्रच्युतस्वभावाद् वायुरुत्पद्यते इति । सोऽयं शक्तिविक्षेपोपसंहारवादः सूरिभिराश्रितः । प्रमाणवत्त्वात् ॥ भा. सू. पा. ९६.

अत्र तन्तुनाभदृष्टान्तस्तावत् तवानिष्टं प्रसञ्जयति । तस्य हि कीटस्य क्षुद्रतरजन्तुभक्षणात्, लाला कठिनतामापद्यमाना तन्तुर्भवति । अतो नाप्रच्युतस्वभावः सः । जन्त्वन्तरनिगिरणेन ह्युपचयः, तदुच्चारणेन चापचयो लूताकीटस्येति ॥

पटतन्तवो यद्यपि प्रच्युतिरहिताः, तथापि त एवातानवितानवन्तः प्रत्यक्षमुपलभ्यमानाः स्वव्यतिरेकेण पटं नाम वस्त्वन्तरमविद्यमानमेव विद्यमानमिव दर्शयन्ति । अतः पटो नाम विकारो नाममात्रम्, तस्य तन्तव एव स्वरूपमिति निश्चीयते । आकाशोऽपि स्वात्मनाऽऽकाशरूपेण स्थित एव वाय्वात्मनापि भासते इत्यङ्गीकर्तव्यम् । न ह्याकाशाद् वायुरभिनवतया उत्पद्यमानः केनचिद् दृष्टः, अनाकाशव्याप्तो वा स्थितिं लभमानः । श्रुतिप्रमाणेन तु 'वायुः संभूतः' इति यद्यपि स्वीकार्यम्, तथाप्याकाशे आकाशात्मतां हित्वा वायुर्नास्तीति दर्शयितुमेव श्रुतिप्रवृत्तिरिति ज्ञायते । 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' (तै.) इति, 'अनाकाशम्' (बृ. ३-८-८) इति च ब्रह्मणोऽव्यतिरिक्तत्वमाकाशस्य दर्शयन्त्याः श्रुतेः प्रामाण्यात् । स्मृतिश्च 'मत्स्थानि सर्वभूतानि' (गी. ९-४), 'न च मत्स्थानि भूतानि' (९-५) इत्युक्त्वा तद्दृष्टान्तत्वेन 'यथाऽऽकाशस्थितो नित्यं वायुः' (गी. ९-६) इति वायोराकाशे स्थितिमस्थितिं चाहेति । तस्मात् अप्रच्युतस्वरूपस्य परिणतिर्मायिक्येवेति सुस्थम् ॥

(७) न च निरवयवस्य परिणामो नास्ति । यथा मनसः कामक्रोधलोभमोहादयः परस्परविलक्षणाः समुद्रोर्मय इवोद्भवन्ति, मनःस्वरूपं चाऽप्रच्युतम् । दर्शितं च 'एतत् सर्वं मन एव' (बृ. १-५-३) इति । यथा नभसो वायुर्वायोरग्निः । असिद्धो दृष्टान्त इति चेत्, बधिरस्त्वम् ।

किं श्रावयन्तीं श्रुतिं न शृणोषि ? शृणोमि । अप्रमाणं सा अनुपपन्ना, अर्थवादत्वात् इति चेत्, ऊर्णनाभिं प्रजापतिप्रिय, पश्य । दृष्टत्वादत्रोपपन्नम् इति चेत् । अत्राप्यविशिष्टं शास्त्रदृष्टत्वम् । न च प्रामाण्ये कश्चिद् विशेषः स्वे स्वे विषये ॥ भा. सू. पा. ९८.

मनसो निदर्शनं तावद् विषमम्, 'अन्नमयं हि सौम्य मनः' (छां.६-५-४) इति, 'एका कलाऽतिशिष्टाऽभूत् सान्नेनोपसमाहिता प्राज्वाली' (छां. ६-७-६) इति चोपचयापचयज्ञापनात् सावयवत्वसिद्धेः । ऊर्णनाभिदृष्टान्तोऽपि व्याख्यातपूर्वः । शास्त्रं तु किं परिणामपरं न वेत्येतदेवात्र विचारणीयं वर्तते । अतो न किञ्चिदेतत् ॥

मायावादनिरासः –

१६७. मायावादश्च इत्थं निराकृतोऽत्र –

(१) कथमिदं मायामात्रं प्रमाणमन्तरेण प्रतिज्ञातुं शक्यम् ? 'त्रिवृतं त्रिवृतमेकैकं करवाणि' (छां. ६-३-३) इति बुद्धिपूर्वं परदेवताप्रवृत्तेः । तदभिप्रायमज्ञात्वा को नामादृष्टनिर्भयः 'सर्वं मिथ्या' इति कल्पयितुमर्हेत् ? यदि च दृष्टसाधर्म्येण अदृष्टं निर्णेतुमिष्येत, तदा च दृष्टमदृष्टं द्रष्टव्यम् ॥ भा. सू. पा. ९९.

उक्तः श्रुतेरभिप्रायः – 'अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयम्' इति श्रुतिं व्याकुर्वद्भिरस्माभिः प्रागेव (खं. १६४, पा. ३५३) दृष्टसाधर्म्यमपि श्रुत्यैव दर्शितम् 'मृत्तिकेत्येव सत्यम्' इति ॥

(२) कुतश्चायमवगमो भवतः ? न हि सूत्रकारः क्वचिन्मायाशब्दं प्रायुङ्क्त । यत्तु स्वप्नज्ञानात् (इति?), मायामात्रं तु 'कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्', (वे. सू. ३-२-३) इति हि य(त?)त्रोक्तम् ; 'वैधर्म्याच्च न स्वप्नादिवत्' (२-२-२९) इति वैधर्म्यमुक्तम् ॥ भा. सू. पा. ९९.

मायाशब्दस्याभावेऽपि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (वे.सू. २-१-१४) इति सर्वस्यास्य विकारस्य वागारम्भणमात्रश्रुत्युदाहरणात्,

तस्य मायात्वमुक्तमेव । यत्तु 'वैधर्म्याच्च' इति सूत्रं तस्यार्थाऽवस्थात्रय प्रक्रियापरिशीलनावसरे प्रदर्शयिष्यत इत्यास्तां तावत् तत् ॥

(३) सूत्रकारस्य 'स्मृत्यनवकाशदोषः' इत्यारभ्य सांख्याद्युद्भाषि. वि?)तदूषणोद्धरणार्थं प्रत्यधिकरणं प्रयासोऽनर्थकः स्यात् मायामात्रत्वे। 'न वियदश्रुतेः' इति चारभ्य भूतानामुत्पत्त्यादिविचारोऽनर्थकः स्यात् ॥

भा. सू. पा ९९-१००.

अहो व्यामोहः ! प्रधानादिकारणवादे, अद्वितीयात्मासिद्धिः फलम्; ब्रह्मैककारणवादे तु 'ऐतदात्म्यमिदं सर्वम्', 'इदं सर्वं यदयमात्मा', 'नेह नानास्ति किञ्चन'–इत्येवमादिश्रुतिभ्य आत्मैकत्वसिद्धिः फलम् – इति तदनन्यत्वसूत्रे 'आरम्भणशब्दादिभ्यः' इत्यादिशब्देन सूचितमिति भगवत्पादीयं परिहारं किं न शृणोति, येनेत्थमाम्रान् पृष्टो कोविदारानाचष्टे भवान् ? 'न वियदश्रुतेः' इत्यारभ्य भूतानामुत्पत्तिविचारोऽपि – तेषां मायिक्येवोत्पत्तिः, यतस्तानि त्रिष्वपि सृष्ट्यादिकालेषु ब्रह्मात्मतां न जहति – इति श्रुत्यर्थदृढीकरणार्थमेवेति किं भवन्तं न प्रतिभातीति न विद्मः ॥

(४) 'ननु सूत्रकारो न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' (वे सू. ३-२-११) इति ब्रह्मव्यतिरिक्तं सर्वं माया – इति वक्ष्यति। मैवं वोचः, तस्याधिकरणस्यान्यविषयत्वात् । न प्रपञ्चाकारं ब्रह्मोपास्यं किं तर्हि निराकारमात्रमुपास्यमिति तात्पर्यम् ॥ भा. सू. पा. १००.

नात्रोपासनं प्रकृतम्, न वाऽस्त्युपासनावाचकः शब्दः प्रकृतसूत्रे, एतदुत्तरसूत्रेषु वा। उपासनाविचारस्तु तार्तीयीकपादे । भवतापि हि 'इदं तूपासनं निर्णीते वस्तुतत्त्वे पश्चात् क्रियते' (भा. सू. पा. १७४) इत्येवोच्यते । तस्माद्वस्तुतत्त्वनिर्णय एवात्र कर्तव्यः । तच्च "'अस्थूलमनण्वह्रस्वम्' इति प्रपञ्चाकारस्य समस्तस्य निवर्तितत्वात् । स्वतश्च कारणं कूटस्थं नित्यम् (कूटस्थनित्यम्?) एकमेवाद्वितीयम्, पश्चात्तु कार्यं कादाचित्कं प्रवर्तते । .... न पृथिव्यादिस्थानतोऽपि परस्योभयलिङ्गता ।

स्वतोऽभिन्नत्वात्, आगन्तुकत्वाच्च पृथिव्यादिस्थानकृतस्य रूपस्य। ब्रह्मात्मकं हि नामरूपप्रपञ्चः, न प्रपञ्चात्मकं ब्रह्म" इत्यादि (भा.सू.पा. १६४-१६५) यथा भवतापि वर्णितम्। तत्रैवं सति यत् कूटस्थनित्यमेवाद्वितीयस्वभावम्, तस्य कारणत्वमेव कथं संस्यात्? कार्यकारणविभागरूपप्रपञ्चधर्मवर्जितं हि ब्रह्म। 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' (बृ. २-५-१९) इति श्रुतेः। न चेदृशे ब्रह्मणि संभवेत् कथञ्चिदपि उपास्योपासकभावः। 'अयमात्मा ब्रह्म' (बृ. २-५-१९) इत्युपासित्रात्मभूतमेव हि तद्विज्ञायत इति॥

(५) न चैवं ग(म?)न्तव्यम् अतो मायामात्रमिदं सर्वं प्राप्तमिति। कारणे कार्यरूपम् अनेकविधं नास्तीत्यवधार्यते. न पुनः प्रपञ्चस्याभावः प्रतिपाद्यते॥ भा. सू. पा. १६५.

अहो मायिकप्रपञ्चेऽभिनिवेशः! साधूक्तमभियुक्तैः – 'अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते' (गौ. का. ४-७५) इति। श्रुतिस्तु प्रपञ्चत्वेनावभासमानमिदं सर्वं ब्रह्मैव, नान्यत् – इति सावधारणं सर्वान् नः प्रतिबोधयति – 'ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्' (मुं. २-२-१२) इति सर्वमिदमिदानीमपि ब्रह्मैव नान्यत्, अतोऽब्रह्मप्रत्ययः सर्वोऽविद्यामात्रो रज्ज्वामिव सर्पप्रत्ययः, ब्रह्मैवेदं परमार्थसत्यमिति। इतः परमपि किं वाञ्छितं प्रपञ्चस्य मायात्वोपपादने?

(६) यदप्युक्तम् 'मायां तु प्रकृतिं विद्यादिति' तदयुक्तम्, 'अजामेकाम्' इति तेजोऽबन्नलक्षणा प्रकृतिः प्रकृता, सा मायाशब्देनाभिधीयते। प्रकरोति स्वविकारानिति प्रकृतिरुच्यते। पीतायामपि वस्तुभूता प्रकृतिर्भूतामपीति (प्रकृतिः प्रकृतिर्भूतानामिति?) व्यपदेशात्। क्वचिन्मायाशब्दः प्रकृतिवचनो(?)[1] मीयते परिच्छिद्यतेऽनया इति 'प्रज्ञा' उच्यते। यथा 'इन्द्रो मायाभिः' इति॥ भा. सू. पा. १००.

1. इदमनन्वितं वाक्यम् प्रज्ञावचनो मायाशब्द इति हि विवक्षितमत्र॥

'मायां तु प्रकृतिं विद्यात्' इति श्रुतिः, प्रकृतिं मायेत्याह। तत्र प्रकृतेरपरमार्थत्वमेवाभिप्रेतम् इति गम्यते। 'मायिनं तु महेश्वरम्' (श्वे. ४–१०) इति वाक्यशेषात्। न हि तत्र मायिनमुद्दिश्य महेश्वरत्वं विधीयत इति शक्यं वक्तुम्। तथा च यथा माया मायिपरवशा, तथा प्रकृतिरपि महेश्वरपरवशा – इत्युच्यते। ततश्च प्रकृतेरीश्वरसत्तयैव सत्त्वं रज्जुसत्तयेव सर्पस्येत्युक्तं भवति। पूर्वस्मिन्नपि वाक्ये 'अस्मान्मायी सृजते विश्वमेतत्, तस्मिंश्चान्यो मायया संनिरुद्धः' (श्वे. ४–९) इति जीवस्य मायाबद्धत्वम् ईश्वरस्य च स्वातन्त्र्यमाह। गीतायामपि 'दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' (गी. ७–१४) इति मायायास्तर्तव्यत्वनिर्देशादपरमार्थतैव। यतश्च ज्ञान्येव वासुदेवः सर्वमित्येकात्मत्वं जानातीति वक्ष्यते, अतोऽपीह-ज्ञानिनां मायातरणं न वस्तुभूतप्रकृतेरित्युपपद्यते। न हि ज्ञानं वस्तु-तत्त्वस्यापोढृ क्वचिद् दृष्टमिति। यदापि मायाशब्दः प्रज्ञावचनः, यथा 'इन्द्रो मायाभिः' इत्यत्र, तदापि वाक्यैर्दर्पयमालक्ष्य आविधिकी प्रज्ञा ग्राह्या भवति। न हि यथार्थप्रज्ञा एकस्य बहुत्वमापादयेदिति॥

तस्मात्, श्रुतिस्मृतिप्रामाण्याय जगत्प्रकृतिर्मायिक्येव, तस्या मायायाः सतत्त्वं तु ब्रह्मैवेत्यद्वैतसिद्धान्त इत्यनवद्यम्॥

सत्कार्यवादः –

१६८. भास्कराभिमतः सत्कार्यवादः समुदाहरिष्यमाणवाक्येभ्योऽवसेयः –

(१) इतश्च अनन्यम् (अनन्यत्वम्?)। 'सदेव सौम्येदमग्र आसीत्' इति इदंशब्दवाच्यस्य कार्यस्य, अवरकालीनस्य कारणे सत्त्वात् अनन्यत्वम्। कथं गम्यते? सामानाधिकरण्यात्॥ भा. सू. १००.

[सामानाधिकरण्यात् कारणे सत्त्वं गम्यते, कारणात्मना सत्त्वं वा?]

(२) इतश्च कारणे कार्यस्य सत्त्वम् । युक्तेः । का पुनर्युक्तिः ? मृत्पिण्डात् घटो जायते ; न दधि, शशविषाणं वा । यद्यसन् घटो जायेत, असत्त्वाविशेषाच्च ततस्तयोरप्युत्पत्तिः स्यात् । ननु च कारणशक्तिनियमात् व्यवस्था भविष्यति । नेति ब्रूमः । स एवास्माभिः पर्यनुयुज्यते 'कथं कारणशक्तिनियमः ?' इति । असत्त्वाविशेषे मृत्पिण्डस्य या शक्तिः, कथमेकत्र सा नियम्यत इति ? कार्यस्य कारणे सद्भावे(वं ?) मुक्त्वा नियमहेतुरुच्यमानो यः कश्चित् स सर्वः पर्यनुयोगं नातिवर्तते । तस्मात् सत् कार्यम् उत्पद्यते ॥ भा. सू. १०१.

(३) सदेव कार्यम् । कुतः ? कारणमेव हि तां ताम् अवस्थां प्रतिपद्यमानं कार्यमिति गीयते । अवस्थातद्वतोश्च नात्यन्तभेदः । न हि शुक्लपटयोर्धर्मधर्मिणोरत्यन्तभेदः, किं तु एकमेव वस्तु ॥ भा. सू. १०१.

(४) कार्यकारणयोर्भेदाभेदौ अनुभूयेते । अभेदधर्मश्च भेदः यथा महोदधेरभेदः । स एव तरङ्गाद्यात्मना वर्तमानो भेद इत्युच्यते । न हि तरङ्गादयः पाषाणादिषु दृश्यन्ते । तस्यैव ताः शक्तयः । शक्तिशक्तिमतोश्च अनन्यत्वम् अन्यत्वं चोपलक्ष्यते । यथा अग्नेर्दहनप्रकाशनादिशक्तयो भेदाः, यथा च वायोः प्राणादिवृत्तिभेदेन भेदः । तस्मात् सर्वमेकमनेकात्मकम्, नात्यन्तमभिन्नम् भिन्नं वा ॥ भा. सू. पा. १०१.

(५) ततश्चाभिव्यक्तितिरोभावावस्थयोरन्योन्याभिभवात् अन्यतरावस्थानम्, मरकतप्रभावेजे(भये ?)चेतरेषाम् । श्रौतश्च दृष्टान्तोऽनुसंधातव्यो निरवयवो वटकटिकाणिभी(णिमा ?) तां ताम् अवस्थां गत्वा स्थूलीभवन् उपलभ्यते । दर्शितं च 'महान् न्यग्रोधस्तिष्ठति' इति । न हि दृष्टे अनुपपन्नं नाम । यथा च पुंस्त्वं विद्यमानमेव यौवनावस्थायाम् अभिव्यज्यते, अन्यथा षण्डस्यापि पुंस्त्वप्रसङ्गात् ॥ भा. सू. १०२.

(६) परमात्मा स्वयमात्मानं कार्यत्वेन परिणमयामास्येत्यर्थः । शक्तिविक्षेपं कृतवान् । अनन्ता हि तस्य शक्तयोऽचिन्त्याश्च । तासां विक्षेपं करोति सृष्टिस्थितिकाले यथा सूर्यो रश्मीनाम्, तद्वदेव संहरति । तथा च मन्त्रवर्णः श्वेताश्वतराणाम् – 'न तस्य कार्यं करणं च विद्यते स तत्समश्चाप्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' (श्वे. ६–८) इति ॥ भा. सू. पा. ८५.

(७) अयं प्रपञ्चः प्रविलीयमानः शक्त्यात्मना कारणमग्रे अनुप्रविशति ॥ भा. सू. पा. ९१.

(८) ईश्वरस्य द्वे शक्ती भवतः, भोग्यशक्तिरेका, भोक्तृशक्तिश्चापरा। भोग्यशक्तिश्च सा आकाशादिरूपेणाचेतनपरिणामापन्नः (परिणाममापद्यते?), भोक्तृशक्तिः सा चेतना जीवरूपेणावतिष्ठते ॥ भा. सू. पा. १-५.

(९) न हि भावानां शक्तयः केनचित् प्राकृतबुद्धिना परिच्छेत्तुं शक्यन्ते। तर्काणाम् अप्रविष्टत्वात् (अप्रतिष्ठत्वात्)। साधर्म्यवैधर्म्यस्य सर्वत्र योजयितुमशक्यत्वात् (तुं शक्यत्वात्?)। किमुत चेतनस्य सर्वज्ञस्य सर्वशक्तेः स्वतन्त्रस्य शास्त्रैकसमधिगम्यस्य जगत्कारणस्य परिणामो व्यवस्थाप्येत। स हि स्वेच्छया स्वात्मानं लोकहितार्थं परिणामयन् स्वशक्त्यनुसारेण परिणामयति ॥ भा. सू. पा. ९७.

(१०) स च सर्वज्ञः प्राणिनाम् उपभोगकालं ज्ञात्वा प्रथमं भूतसूक्ष्मम् अव्याकृताकाशं सृजति, तदनन्तरं हिरण्यगर्भम्। तस्मिन् अनुप्रविश्य तदात्मना स्थित्वा आकाशादिक्रमेण अण्डं सृष्ट्वा ततः स्थावरपर्यन्तं सृजति प्राणिनां कर्मानुरूपेण ॥ भा. सू. पा. ६५.

(११) अन्तर्यामिपरमात्मनोर्नि(नो नि?)यन्तृरूपा शक्तिः पारमार्थिकी। न हि सा केनचित् कल्पिता, येनाविद्यानिबन्धनापि स्यात् मृगतृष्णादिवत् ॥
भा. सू. पा. १०७.

यथोदाहृतभास्करवाक्यानामियदेव जीवितं यत् सदेवोत्पद्यते नासदिति। उत्पत्तेः प्राक्च शक्त्यात्मना कारणे विद्यमानमेवाभिव्यज्यते, तादृशाभिव्यक्तिरेवोत्पत्तिः। ईश्वरश्च अनन्तशक्तित्वात् तथा तथा विकारान् सृजतीति। सर्वमेतत् सर्ववेदान्तिसंप्रतिपन्नम्, तथा तत्र तत्र वेदान्तेपूच्यमानत्वात्। एतदेव परमत्र विचिन्त्यम्—किमियं सृष्टिः पारमार्थिकी, उत मायिकी ?— इति। तत्र शक्तिविषये इदं भगवत्पादैरुक्तम् अनुशीलनीयं पण्डितैः —

(१) शक्तिश्च कारणस्य कार्यनियमार्था कल्प्यमाना नान्या, असती वा कार्यं नियच्छेत्। असत्त्वाविशेषात्, अन्यत्वाविशेषाच्च। तस्मात् कारणस्यात्मभूता शक्तिः, शक्तेश्चात्मभूतं कार्यम् ॥
सू. भा. २-१-१८, पा. २०४.

न हि वह्नेरौष्ण्यशक्तिस्तदनात्मभूता, तदन्या वा शक्या कल्पयितुम् । एवं ब्रह्मणोऽपि शक्तिर्ब्रह्मणोऽन्या न शक्या कल्पयितुम् । व्यावहारिककार्यापेक्षया तु शक्तिरिति व्यपदेशमात्रम्, शिलापुत्रकस्य शरीरमितिवत्– इति श्लिष्यते । अत एव यदुच्यते भास्करेण–'विविधा शक्तिः, सा च स्वाभाविकी न चागन्तुकीति ब्रुवन्त्या कुतार्किकचोद्यं किं नाम न परिहृतम् ?' इति, तत् तथैवेति ब्रूमहे । 'स्वाभाविकी' इति अग्न्युष्णवत् स्वात्मानन्यत्वात् शक्तेः । शक्तिस्तु शक्यापेक्षयैवेति शक्यस्य कार्यस्यानन्यत्वदृष्ट्या परमात्मानन्यैव भवतीति न किञ्चिदवद्यम् ॥

यत्पुनरुच्यते भास्करेण –

'अथ मन्यसे नेदं शास्त्रं सृष्टिप्रतिपादनपरम्, किं तर्हि, अद्वैतप्रतिपादनपरम् । सृष्टौ प्रयोजनाभावात्, भेदस्य च प्रमाणान्तरा(?)सिद्धत्वादिति । अत्रोच्यते । कार्यकारणयोरनन्यत्वात् – इत्यनेन हेतुना आत्मैकत्वं प्रतिपाद्यते भवता, स चायम् असिद्धो हेतुः । सर्गानभ्युपगमे वियदादि सर्वं नित्यं मीमांसकानामिव प्रसज्यते । न च सृष्टिर्निष्प्रयोजना । विज्ञानात्मनां भोगज्ञानार्थत्वात्' ॥ भा. सू. ९८.

इति, तदेतदनवहिताभिधानम् । न हि सृष्टिरविवक्षितेत्यनेन वाक्येनेदमुच्यते यद् वियदादिर्नित्येति । किं तर्हि ? अवहितमनोभिरनुशीलनीयानीमानि वाक्यानि भगवत्पादानाम् –

(२) न हि तत्प्रतिबद्धः कश्चित् पुरुषार्थो दृश्यते श्रूयते वा । न च कल्पयितुं शक्यते । उपक्रमोपसंहाराभ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकम् एकवाक्यतया गम्यमानत्वात् ॥ सू. भा. १-४-१४, पा. १६३.

[सृष्टिज्ञानप्रतिबद्धं प्रयोजनं नास्तीत्युच्यते । भोगार्थत्वं तु तस्या न निषिध्यते । दृश्यते हि स्वाप्निकपदार्थानामपि तात्कालिकभोगोपयोगित्वमिति । श्रुत्यापि सृष्टिज्ञानेन फलं न ज्ञाप्यते ॥]

(३) दर्शयति च सृष्ट्यादिप्रपञ्चस्य ब्रह्मप्रतिपत्त्यर्थताम् । 'अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' इति ॥ सू. भा पा. १६३.

[कार्येण तदात्मभूतं कारणमन्वेषणीयम् इत्यर्थः । तस्मात् सृष्टिवचनस्य सत्कारणप्रतिपत्त्यर्थता अवगम्यते । न च वस्तुसत एव कार्यकारणभावस्यायं नियमः । पदार्थानां मायिकत्वेऽपि केनेयं माया कथं कृता ? – इति विज्ञातुं कुतूहलदर्शनात् प्रेक्षकाणाम् ॥]

(४) मृदादिदृष्टान्तैश्च कार्यस्य कारणेनाभेदं वदितुं सृष्ट्यादिप्रपञ्चः श्राव्यत इति गम्यते । तथा च संप्रदायविदो वदन्ति-'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन ' ॥ (गौ. का. ३-१५) इति ॥ सू. भा. पा. १६३.

[न हि मृदादीनां कारणत्वं घटादीनां सत्त्वं वा अभिप्रेत्य दृष्टान्तः–इति शक्यं कल्पयितुम् । लोकसिद्धत्वात् कार्यकारणभावस्य । एकेन मृत्पिण्डेन ज्ञातेन सर्वं मृन्मयं यथा विज्ञातं स्यात्, एवम् एकेन ब्रह्मणा ज्ञातेन सर्वं कार्यं विज्ञातं स्यात्-इति तु प्रकृतार्थसंगतम् ॥]

(५) ब्रह्मप्रतिपत्तिप्रतिबद्धं तु फलं श्रूयते ' ब्रह्मविदाप्नोति परम् ', 'तरति शोकमात्मवित्', 'तमेव विदित्वाऽतिमृत्युमेति'-इति । प्रत्यक्षावगमं चेदं फलम् । 'तत्त्वमसि' इत्यसंसार्यात्मत्वप्रतिपत्तौ सत्यां संसार्यात्मत्वव्यावृत्तेः ॥ सू. भा. पा. १६४.

[उपायभूतसृष्टिकथनप्रतिपत्तौ फलं न श्रूयते नाप्यनुभूयते यथा तद्विपर्ययेण आत्मैक्यज्ञाननिमित्तं फलं श्रूयते· अनुभूयते च । अतः सृष्टिवाक्यानि न तत्परानि, किं त्वात्मज्ञानपराणीत्यर्थः ॥]

(६) जगदुत्पत्तिस्थितिप्रलयहेतुत्वश्रुतेरनेकशक्तित्वं ब्रह्मण इति चेत्, न। विशेषनिराकरणश्रुतीनामनन्यार्थत्वात् । उत्पत्त्यादिश्रुतीनामपि समानम् अनन्यार्थत्वम् इति चेत् । न । तासाम् एकत्वप्रतिपादनपरत्वात् । मृदादिदृष्टान्तैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयत् शास्त्रं नोत्पत्त्यादिपरं भवितुमर्हति । कस्मात् पुनरुत्पत्त्यादिश्रुतीनां विशेषनिराकरणश्रुतिशेषत्वं न पुनरितरशेषत्वम् इतरासामिति ? उच्यते । विशेषनिराकरणश्रुतीनां निराकाङ्क्षत्वात् । न ह्यात्मन एकत्वनित्यत्वशुद्धत्वाद्यवगतौ सत्यां भूयः काचिदाकाङ्क्षा उपजायते । पुरुषार्थसमाप्तिबुद्ध्युपपत्तेः । ..... नैवमुत्पत्त्यादिश्रुतीनां निराकाङ्क्षार्थप्रतिपादनसामर्थ्यमस्ति । प्रत्यक्षं तु तासाम् अन्यार्थत्वं समनुगम्यते ॥ सू. भा. ४-३-१४, पा. ४९८.

यत्तु भास्करेणोच्यते ' कारणे कार्यरूपम् अनेकविधं नास्तीत्यवधार्यते, न पुनः प्रपञ्चरूपस्याभावः प्रतिपाद्यते ' (भा. सू. पा. १६५),

"सृष्टिप्रकरणपर्यालोचनया प्रपञ्चरूपतायाम् अधिगम्यमानायाम् अरूपवदेव ब्रह्मावधार्यते। तत्प्रधानत्वात् 'अस्थूलमनणु....' इत्येवमादीनां वाक्यानाम्, सृष्टिप्रकरणस्यापि अरूपवद्ब्रह्मप्रतिपादने तात्पर्यं सुदृष्टान्तप्रणयनादवगम्यते। अतः 'सल्लक्षणमेवाद्वितीयं प्रलयावस्थायामेवोपसंहृतसमस्तविकारं 'ब्रह्माहमस्मि' इति ध्येयम्" (भा. सू. पा. १६६) – इति च, तदेतदनालोचितस्ववाक्याभिप्रायस्य व्याहतं वचनम्। न हि सृष्टिवाक्यसहितस्य सर्वस्य प्रकरणस्य अरूपब्रह्मावधारणपरत्वे सिद्धे, तदनन्यत्वं विज्ञातवतः पुनरपि ध्यानं कर्तव्यमवशिष्यत इति। अतोऽद्वितीयात्मतत्त्वमेकमेव मायया मायाविवत् अनेकधा कार्यरूपेण विभाव्यते – इति भगवत्पादीयमेव प्रस्थानं शरणं भवत्येवंमन्वानस्य। तस्मात्, 'न तु शब्दादिमत्कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीं वा अस्ति' (सू. भा. २–१–७, पा. १८९), कारणात्मना सत्त्वमेव तु कार्यस्य सत्त्वं नापरम्, 'यस्मात् परं नापरमस्ति किञ्चित्' (ना. १२–२८) इति श्रुतेरित्ययमेव सत्कार्यवादो नामेत्यकामेनाप्यभ्युपगन्तव्यम्। इत्थमेव चाध्यारोपापवादप्रक्रिया श्रौती समनुगृह्यत इत्यलं पल्लवितेन॥

जीवपरमेश्वरसंबन्धः –

१६९. परिशीलितो यथावकाशं किञ्चिद्विस्तरेणैव भास्करीयः कार्यकारणवादः। उपपादितं च तस्य वेदान्ताभिमतप्रक्रियाविरोधित्वम्। अथ तन्मतानुसारेण जीवविचारः क्रियते, संक्षेपेणैव। प्रायशो भगवत्पादीयप्रक्रियानुसारिण्येवात्रत्या प्रक्रिया, जीवपरयोर्भेदस्य सत्यतैव स्वीकृतात्रेति तु सुमहद् वैषम्यम्। तथा हि वेदान्तप्रक्रियया विरोधः सुस्थित इति॥

(१) न प्रकृतिविकारभावः, नाप्यत्यन्तभिन्नस्य जीवस्य मुक्तयवस्थायाम् अभेदापत्तिः, किं तर्हि, उत्क्रमणात् प्रागपि जीवरूपेण परमात्मनोऽवस्थानात् अभेदेनोपक्रमः–इति काशकृत्स्नो मन्यते स्म॥

भा. सू. पा. ८१.

(२) अस्ति भेदोऽप्यनादिकालप्रवृत्ताविद्याकर्मोपाध्यवच्छेदात्। अंशो हि परस्याहं(यं?) जीवो नाम। यथाग्नेर्विस्फुलिङ्गाः, यथाकाशस्य पार्थिवाद्यधिष्ठानोपाध्यवच्छिन्नश्छिद्रप्रवेशस्तदंशः शब्दग्रहणशक्त्यपेक्षा (क्षया?), यथा च वायोः प्रतिशरीरं पञ्चवृत्तिः प्राणः, तथायं भिन्नाभिन्नस्वभावो जीवः संसारी, न कदाचिन्मुक्तपूर्वः॥ भा. सू. १-४-२१, पा. ८१.

[उदाहृतपूर्वमेतद् वाक्यद्वयम् तद् द्रष्टव्यम्। पा. ३३९]

(३) भूयसीनां च श्रुतीनाम् अन्यथाकर्तुम् अशक्यत्वात् तदविरोधाय विस्फुलिङ्गश्रुतिर्विपरिणेया। न चात्रापि विकारभावो विवक्षितः, किं तु उपाधिकृतभेदाभिप्राया हि सा। तेष्वप्यग्निसामान्यानुगमात्, पार्थिवद्रव्यविश्लेषवशात् विच्छेदमात्रं नान्यत्र भेदः। सुषुप्तिप्रकरणत्वान्न सृष्ट्यभिप्रायेणेति स्थितम्॥ भा. सू. १-३-१७, पा. १३४.

(४) उपाध्यवच्छिन्नस्यानन्यभूतस्य वाचकोऽयमंशशब्दः प्रयुक्तो यथाग्नेर्विस्फुलिङ्गस्य। कथं पुनर्निरवयवस्य परमात्मनोऽंशः संभवति? आगमात् तावदवगम्यते। 'यथाग्नेः क्षुद्रा विस्फुलिङ्गाः' - इति दृष्टान्तप्रणयनात्। यथा चाकाशस्य पार्थिवाधिष्ठानावच्छिन्नं कर्णच्छिद्रं च, यथा च वायोः पञ्चवृत्तिः प्राणः, यथा च मनसः कामादयो वृत्तयः। स च भिन्नाभिन्नस्वरूपः। अभिन्नरूपं स्वाभाविकम्, औपाधिकं तु भिन्नरूपम्। उपाधीनां च बलवत्त्वात् संभूतितस्तन्मयः संसरतीत्य(ति?)भेदोऽभ्युपगम्यते॥ भा. सू. २-३-४३, पा १४०, १४१.

उपाध्यवच्छिन्नस्य, अनन्यभूतस्य वाचकोऽयमंशशब्द--इति वक्तुं न युक्तम्। न हि लोके शास्त्रे वा तथा प्रसिद्धिरस्ति। उपाध्यवच्छिन्नस्य अनन्यतां द्योतयितुं लक्षणया गौण्या वा वृत्त्या अंशशब्दः प्रयुज्यते। अंश इवांश इति--इति यद्यभिप्रायः, तर्हि तथा नामास्तु। न चांशादिशब्दाः, वस्तुवृत्तेनैवात्मनोऽवच्छिन्नत्वं द्योतयितुं प्रयुक्ताः, किं तु एकत्वज्ञापनार्थाः। तथा चाभियुक्ताः -

(१) 'न कर्मणा लिप्यते पापकेन', 'समं सर्वेषु भूतेषु तिष्ठन्तम्', 'शुनि चैव श्वपाके च' - इत्यादिश्रुतिस्मृतिन्यायेभ्यः परमात्मनोऽसंसारितैव। अत एकदेशः, विकारः, शक्तिर्वा विज्ञानात्मा, अन्यो वा--इति विकल्पयितुं निरवयवत्वाभ्युपगमे विशेषतो न शक्यते। अंशादिश्रुतिस्मृति-

वादाश्च, एकत्वार्थाः, न तु भेदप्रतिपादकाः । विवक्षितार्थैकवाक्ययोगात्– इत्यवोचाम ॥ बृ. भा. २-१-२०, पा. ७४०.

(२) अग्निविस्फुलिङ्गादिदृष्टान्तश्रुतेर्न दोष इति चेत् । न । श्रुतेर्ज्ञापकत्वात् । न शास्त्रं पदार्थानन्यथा कर्तुं प्रवृत्तम्, किं तर्हि यथाभूतानाम् अज्ञातानां ज्ञापने । किं चातः ? शृणु, अतो यद्भवति । यथाभूता सूर्यामूर्तादिपदार्थधर्मा लोके प्रसिद्धाः । तद्दृष्टान्तोपादानेन तद्विरोध्येव वस्त्वन्तरं ज्ञापयितुं प्रवृत्तं शास्त्रं न लौकिकवस्तुविरोधज्ञापनाय लौकिकमेव दृष्टान्तमुपादत्ते । उपादीयमानोऽपि दृष्टान्तोऽनर्थकः स्याद् दार्ष्टान्तिकासङ्गतेः । न हि 'अग्निः शीतः', 'आदित्यो न तपति' इति वा दृष्टान्तशतेनापि प्रतिपादयितुं शक्यम् । प्रमाणान्तरेण अन्यथा अधिगतत्वाद् वस्तुनः ॥ बृ. भा. २-१-२०, पा. ७३७.

जीवस्य ब्रह्माभिन्नत्वेऽपि भेदोऽप्यौपाधिकः सत्य एव इति भास्करभाष्ये इत्थमुपादितम् –

(१) यथा च भग्ने घटे घटाकाशो महाकाश एव भवति दृष्टत्वात्, एवमत्रापीति । जीवपरयोश्च स्वाभाविकोऽभेदः, औपाधिकस्तु भेदः, स तन्निवृत्तौ निवर्तते ॥ भा. सू. ४-४-४. पा. २४३.

(२) 'तत्त्वमसि' इति श्रुतेर्भिन्नाभिन्नो जीवः । स्वाभाविकं नित्यसिद्धम् अभिन्नं रूपम्, इतरदौपाधिकं प्रवाहनित्यम् इति विवेकः ॥

भा. सू. ३-२-६, पा. १६२.

(३) 'द्वा सुपर्णा' इत्यत्रापि, अयमेव न्यायः । परप्रकरणे श्वेताश्वतराणामपि, अयं मन्त्रः पठ्यते । अनन्तरश्च मन्त्रस्तामेव दर्शयति 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इति । तदेवं श्रुतिसूत्रकारौ जीवपरयोर्भेदं दर्शयतः । केचित्तु श्रुत्यर्थम् आचार्योक्तिं च पृष्ठतः कृत्वा मायामात्रं स्वबुद्ध्या कल्पयित्वा अन्यदेव दर्शनं रचयन्ति ॥

भा. सू. १-२-१२, पा. ४१.

(४) जीवानां परस्परं भेद एव परमात्मना चाभेदः । फेनतरङ्गादीनामिव ॥ भा. सू. १-४-१०, पा. ७५.

(५) यथा जलवृद्धौ वर्धते ह्रासे च ह्रसति सूर्यकादिः, तथा उपाधिधर्मानुविधायिषु जीवेषु सामान्यात्मना परमो निर्विकारः स्वमहिमस्थो वर्तत इति दृष्टान्तप्रणयनम् ॥ भा. सू. ३-२-२१, पा. १६८.

घटे भग्ने एव घटाकाशो महाकाशो भवतीति न शोभनं दर्शनम्। महाकाशस्य निरवयवस्य कदाप्यवच्छेदाभावात्, घटादीनामपि नित्यम् आकाशेनानन्यत्वाच्च। एवं सत्यप्युपाधौ परमार्थतो जीवो तेनानन्य एव। अज्ञानेन तु भिन्नमात्मानं मन्यत इत्येव युक्तम्। यथाहुर्वृद्धाः –

(१) आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः।
घटादिवच्च संघातैर्जातावेतन्निदर्शनम् ॥ गौ. का. ३-३.

[आकाशो घटाकाशाद्यात्मना घटाद्यात्मना च यथा उत्पन्न इव, एवं परमात्मापि जीवात्मना कार्यकरणसंघातात्मना च जात इवेत्यर्थः ॥]

(२) रूपकार्यसमाख्याश्च भिद्यन्ते तत्र तत्र वै।
आकाशस्य न भेदोऽस्ति तद्वज्जीवेषु निर्णयः ॥ गौ. का. ३-६.

[आकाशे यथा रूपकार्यादिकृतो भेदो नास्त्येव परमार्थतः, एवं परमात्माभिन्नर्जीवेष्वपीत्यर्थः ॥]

(३) नाकाशस्य घटाकाशो विकारावयवौ यथा ॥
नैवात्मनः सदा जीवो विकारावयवौ तथा ॥ गौ. का. ३-७.

[जीवस्य परमात्मांशव्यवहारोऽप्येवं बोध्यः ॥]

तत्त्वमसीति वर्तमानक्रियापदप्रयोगादेव, नौपाधिकोऽपि भेदः परमार्थतोऽस्तीति गम्यते। ततश्च उपाधिनिवृत्तावेव भेदनिवृत्तिरित्ययुक्तम्। यथाहुर्भाष्यकाराः –

(१) न चायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुम्। 'तत्त्वमसि' इति ब्रह्मात्मभावस्य अनवस्थाविशेषनिबन्धनत्वात् ॥
सू. भा. २-१-१४, पा. १९८.

'द्वा सुपर्णा' इति श्रुतिः, 'गुहां प्रविष्टौ' इति श्रुतिर्वा न जीवेश्वरभेदं प्रतिपादयितुं प्रभवति। आद्या श्रुतिर्हि जीवस्य परमात्मदर्शनेन

तत्साम्यं वक्ष्यामीति प्रवृत्ता । 'यदा पश्यः पश्यते' (मुं. ३–१–७) इति वाक्यशेषात् । द्वितीयापि 'सोऽध्वनः पारमाप्नोति' (का. १–३–९) इति वाक्यशेषात्, विष्णोः परमपदप्रेप्सोः साधनं विवक्षतीति गम्यते । न च जीवस्य परमपुरुषार्थप्राप्त्युपायं जीवपरभेदं चैकमेव वाक्यं वक्तुमलम् । एवं सूत्रमपि जीवाद् विलक्षणं तत्प्राप्यं परमात्मानमुद्दिश्यैव प्रवर्तते–इति युक्तम् । समन्वयाध्याये हि नाकस्माज्जीवस्य प्रतिपादनप्रसक्तिरस्तीति । अतः श्रुतिसूत्रयोः कुत्र प्रस्थाने सामञ्जस्यमिति वाक्यार्थनिर्णयकोविदैरेव निर्णेयमेतत् ॥

जीवस्य व्यवहारः –

१७०. सर्वोऽपि जीवस्य व्यवहार उपाधिप्रयुक्तो न स्वाभाविक इति भास्करप्रस्थानं वेदान्तप्रक्रियानुगुणमेव । उपाधीनां तु न पारमार्थिकत्वम्, किं त्वविद्याप्रत्युपस्थापितत्वमित्येतावत्तु प्रस्मृतम्, अपरीक्षितं चानेनाचार्येण ॥

(१) योऽयमुत्पत्तिप्रलयव्यपदेशो लौकिकः, स भाक्तः, गौण इत्यर्थः ॥ भा. सू. २–३–१६, पा. १३४.

(२) नात्मा जायते । कस्मात् ? अश्रुतेः । न ह्याकाशादिसृष्टिप्रकरणे जीवस्योत्पत्तिश्रुतिरस्ति ॥ भा. सू. २–३–१७, पा. १३४.

(३) स्वप्रत्यक्षं चास्य चैतन्यम् । ज्ञातृस्वरूपस्य सर्वदा अपरोक्षत्वात् । घटादीनां च कादाचित्कानां पृथगेव गृह्यमाणत्वात् ॥
भा. सू. २–३–१८, पा. १३५.

[ज्ञातृस्वरूपस्येति तत्साक्षिरूपं चेद् विवक्षितं समीचीनतरं स्यात् ॥]

(४) गृह्णीम एतत्, संसारावस्थायाम् अणुरात्मेति, न तु तदेवास्य निजं रूपम् । तत्त्वमसीति ब्रह्मात्मत्वोपदेशात् । ....
भा. सू. २–३–२९, पा. १३७.

(५) न स्वाभाविकं कर्तृत्वम् । अनिर्मोक्षप्रसङ्गात् । .... न चौपाधिकं कर्तृत्वमपारमार्थिकम् । यथाग्निगतेन उष्णगुणेन दाहोऽनुभूयते; किमसावपारमार्थिको भवति, यद्यपि स्वात्मन्यौष्ण्यं स्वतो नास्ति ? ॥ भा. सू. पा. १३९

[अग्नेरौष्ण्यम् अग्नेरेव नात्मनः। एवं दाहोऽपि शरीरस्यैव न तु तत्साक्षिण आत्मन इत्येव सत्तर्कः। न ह्यात्मनि दाहोऽनुभूयत इति ॥]

(६) परादीश्वरात्। (जीवस्य कर्तृत्वम्) तच्छ्रवणात् ॥

भा. सू. २-३-४१, पा. १४०.

(७) स्वतन्त्रस्यैव जीवस्य कर्तृत्वम् इत्याशङ्क्य ईश्वरापेक्षं कर्तृत्वमिति स्थापितम्। 'वैषम्यनैर्घृण्ये' इत्यत्र तु कर्मापेक्षायां जगत्सर्गः-इति विवेकः ॥

भा. सू. २-३-४२, पा. १४०.

(८) यथा जीवः सुखी च स्वकर्मवशात्, नैवं परः। तस्य निमित्ताभावात्। प्रकाशादिवत् ॥ भा. सू. २-३-४६, पा. १४१.

(९) परमात्मना चेदभिन्नो जीवः, कस्यानुज्ञापरिहारौ स्याताम्? ... अत्रोच्यते - स्याताम् अनुज्ञापरिहारौ अंशस्य देहसंबन्धमधिकृत्य ॥

भा. सू. २-३-४८, पा. १४२.

[देहसंबन्धो नाम देहादिरयं संघातोऽहमेवेति आत्मनि विपरीतप्रत्ययोत्पत्तिः। स च भास्करप्रस्थानेऽपि संमतः। देहाद्युपाधिरविद्यानिमित्त इति तु नात्राभ्युपगम्यते ॥]

(१०) जीवो मुख्यप्राणसचिवः, सेन्द्रियः समनस्कोऽविद्याकर्मपूर्वप्रज्ञावशेन सुखदुःखभोगार्थं पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते ॥

भा. सू. ३-१-१, पा. १५२.

किं बहुना? सर्व एव तु जीवव्यवहार उपाधिनिमित्त एवेति संग्रहः। उपाधयस्तु अविद्याकल्पितमायासृष्टा इति तु भगवत्पादीयप्रस्थाने विशेषः। अपेक्षितस्तु स विशेषोऽध्यारोपापवादप्रक्रियानुग्रहार्थम्। न ह्यन्यथा विद्यमानस्य संसारस्याभावो वा, अविद्यमानस्य मोक्षस्य उत्पत्तिर्वा घटत इति। अत एवाभियुक्ताः --

(१) मरणे संभवे चैव गत्यागमनयोरपि।
स्थितौ सर्वशरीरेषु चाकाशेनाविलक्षणः ॥

(२) संघाता स्वप्नवत् सर्वं आत्ममायाविसर्जिताः।
आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥

गौ. का. ३-९, १०.

कथमेकस्मिन् देहे द्वौ द्रष्टारौ संभवत इति ? श्रुतिर्हि 'नान्योऽतोऽस्ति द्रष्टा' (बृ.) इति प्रकृतात् अन्तर्यामिणोऽन्यं वारयति–इत्याशङ्कामुत्थाप्य भास्करेणेत्थं समाधानं लिखितम् –

(११) अत्रोच्यते – यथैवेयमेव भेदं दर्शयति तथा पूर्वम् उदाहृतम् । 'आत्मनि तिष्ठन्' (बृ.) इति भेदं दर्शयति, किं न पश्यसि ? न ह्यस्याः श्रुतेर्वचनं सुभगावचनमिवानादरणीयम् । प्रामाण्यतुल्यत्वात् । अतो भेदाभेदौ ग्रहीतव्यौ । न च तात्पर्यकृतो विशेषः । अन्तर्यामिस्वरूपविज्ञानपरत्वात् प्रकरणस्य नियन्त्रन्तराशङ्कानिवृत्त्यर्थमपि शक्यते वर्णयितुम् – नान्यः सर्वस्य द्रष्टाऽस्ति । सर्वथा 'यं पृथिवी न वेद' इति देवतादिक्षेत्रज्ञानुपन्यस्य तदपलापो न युज्यते ॥ भा. सू. १-२-२०, पा. ४५.

भगवत्पादैः शङ्कामुद्भाव्य कृतनिरासस्यैव पक्षस्य सिद्धान्तत्वेन स्वीकारो भास्करोपज्ञः । स एवाद्य यावत् सर्वैरप्यध्यारोपापवादप्रक्रियाविरोधिभिरनुस्रियत इत्यन्धपरम्परेयम् इहैव दूरीकरणीया । अतः किञ्चिदत्रोच्यते । 'शारीरश्चोभयेऽपि हि भेदेनैनमधीयते' (वे. सू. १-२-२०) इति सूत्रं तावत्, अन्तर्यामिणो भेदेनैनं काण्वा माध्यन्दिनाश्चेत्युभयेऽपि शाखिनोऽधीयते – इत्याह ; न तु भेदः परमार्थ इति । न च भेदाभेदशब्दः कुत्राप्याघ्रातः सूत्रकारेण । अतः शारीरश्च नान्तर्यामी–इत्येतावान् सूत्रार्थ आस्थेयः । कथं तर्हि 'नेतरः' (वे. सू. १-१-१६, १-२-१७....) । 'भेदव्यपदेशाच्चान्यः' (वे. सू. १–१–२१) इत्यादिसूत्रेषु जीवमाशङ्क्य निरस्यति ? तत्र भगवत्पादैरेवं समाधानमुक्तम् –

(१) नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्ये एकस्मिन् असङ्गे परमात्मनि तद्विपरीतं जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम् । तदात्मैकत्वप्रतिपादनपरैर्वाक्यैः, न्यायोपेतैः, द्वैतवादप्रतिषेधैश्च अपनेष्यामि – इति परमात्मनो जीवादन्यत्वं द्रढयति । जीवस्य तु न परस्मादन्यत्वं प्रतिपिपादयिषति, किं तु अनुवदत्येवाविद्याकल्पितं लोकप्रसिद्धं जीवभेदम् । एवं हि स्वाभाविककर्तृत्वभोक्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति मन्यते । प्रतिपाद्यं तु शास्त्रार्थम् आत्मैकत्वमेव दर्शयति 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (वे. सू. १-१-३०) इत्यादिना इति ॥

सू. भा. १-३-१९, पा. ११५.

प्रकृतसूत्रभाष्ये च –

(२) कथं पुनरेकस्मिन् देहे द्वौ द्रष्टारावुपपद्येते ? यश्चायमीश्वरोऽन्तर्यामी, यश्चायमितरः शारीरः। का पुनरिहानुपपत्तिः ? 'नान्योऽतोऽस्ति द्रष्टा' इत्यादि श्रुतिवचनं विरुध्येत । अत्र हि प्रकृतादन्तर्यामिणोऽन्यं द्रष्टारं श्रोतारं मन्तारं विज्ञातारं चात्मानं प्रतिषेधति । नियन्त्रन्तरप्रतिषेधार्थमेतद् वचनम् इति चेत् । न । नियन्त्रन्तराप्रसङ्गात्, अविशेषश्रवणाच्च ॥ सू. भा. १-२-२०, पा. ८१.

इति शङ्काग्रन्थः। तदनालक्षयन्निव भास्करोऽभाणीत् 'नियन्त्रन्तराशङ्कानिवृत्त्यर्थमपि शक्यते वर्णयितुम्' इति । कथं हि प्रतिपर्यायं 'एष त आत्मा अन्तर्याम्यमृतः' (का.), 'स त आत्मा अन्तर्याम्यमृतः' (मा.) इत्यविशेषेण श्रूयमाण आत्मा अन्तर्यामी, अन्योऽन्यः स्यादिति कश्चिद् बधिरः शङ्केत । अत एव भगवत्पादैः समाधानवाक्ये लिखितम् –

(३) अत्रोच्यते – अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणोर्भेदव्यपदेशः, न पारमार्थिकः । एको हि प्रत्यगात्मा भवति । न द्वौ प्रत्यगात्मनौ संभवतः । एकस्यैव तु भेदव्यवहार उपाधिकृतः । यथा 'घटाकाशो', 'महाकाश' – इति ॥ सू. भा. पा. ८१.

इति । नैव चान्तर्याम्यनेकत्वे शङ्कासमुन्मेषोऽस्ति । यत्कारणं प्रष्टा उद्दालकोऽन्तर्यामिणमेकं जानन्नेव वक्ति – 'तदहं वेद तच्चेत् त्वं याज्ञवल्क्य सूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यति' (बृ. ३-७-१) इति ॥

न च जीवरूपप्रत्याख्यानेन परमात्मरूपप्रतिपादने तात्पर्यं श्रुतीनाम् इति भवतोऽप्यसंप्रतिपन्नम् । लिखितं हि भवतैव –

(१२) 'प्रस्थानादिगतयः (नगतयः ?) काश्चित् परं प्रतिपाद्य तदसीति ग्राहयन्ति यथा 'तत् त्वमसि' इति ; काश्चित् पुनर्जीवमेवाधिकृतां (कृत्य ?) तां तामवस्थां प्रत्याख्याय ततः परम् आत्मरूपं दर्शयन्ति ।

यथा 'कतम आत्मा योऽयं विज्ञानमय' इत्युपक्रम्य 'अनस्थिकोऽशरीरः स वा एष महानज आत्मा' इत्युपसंहारात्(हार?)' इति ॥

भा. सू. १-३-२०, पा. ५८.

तत्र यत्प्रत्याख्यायते जीवरूपं तदविद्याकल्पितमिति नानुमन्यते, उपाधिकृतमपि परमार्थमेवेति चास्थीयते दुराग्रहमात्रेणेत्यन्यदेतत् ॥

पञ्चकोशविवेकप्रक्रिया –

१२१. आनन्दमयाधिकरणभाष्यं प्रायेण भगवत्पादैरनूदित-वृत्तिकारमतमेवानुहरति, पुच्छब्रह्मप्रतिपादनं तु निराकुरुते। तत्र प्रथमं तावदिदं वक्तव्यं यत् सूत्रभाष्यानूदितः पक्षो न भास्करसंप्रदायानुवर्तीति। यतो भगवत्पादैर्वृत्तिकारमतम् इत्थमनूदितम् –

"यत्तु ब्रूषे प्रियादीनां शिरस्त्वादिकल्पनाऽनुपपन्ना मुख्यस्यात्मन इति, अतीतानन्तरोपाधिजनिता सा न स्वाभाविकीत्यदोषः। शारीरत्वमपि आनन्दमयस्यान्नमयादिशरीरपरम्परया प्रदर्श्यमानत्वात्। न पुनः साक्षादेव शारीरत्वं संसारिवत्" ॥ सू. भा. १-१-२, पा. ३७.

इति। भास्कराचार्येण तु –

(१) 'यदुक्तमवयवयोगः – इति तत्प्रायापत्त्यापि पुरुषविधत्व-कल्पनार्थो नावयवशरीरप्रतिपत्त्यर्थ इत्यदोषः ॥ भा. सू. पा. २५

इत्यन्यथैवोपपादितम्। यद्यप्यर्थतो वृत्तिकारानुगुणमेव भवत्येतदपि, तथापि नासौ वृत्तिकारो भास्करसंप्रदायीत्यत्र गमकान्तरमप्यस्ति ॥

किञ्च, भाष्ये वृत्तिकारमतदूषणप्रसङ्गेनोक्तम्

'अपि च आनन्दमयस्य ब्रह्मत्वे प्रियाद्यवयवत्वेन सविशेषं ब्रह्माभ्युप-गन्तव्यम्; निर्विशेषं तु ब्रह्म वाक्यशेषे श्रूयते वाङ्मनसयोरगोचरत्वाभि-धानात् 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति' (तै. २-९)

इति। एतेन दूषितवृत्तिकाराः निर्विशेषब्रह्माभ्युपगन्तार इति गम्यते। अन्यथा नैवेदं तद्दूषणं स्यादिति। भास्कराचार्यस्तु प्रतिवक्ति प्रकारान्तरे-णैव। तद्यथा –

(२) यदप्युक्तं निर्विशिष्टं (निर्विशेषं) ब्रह्मात्र विवक्षितमिति । तदप्ययुक्तम् । आनन्दगुणस्य ब्रह्मणो विवक्षितत्वात् । अत एवोत्तरत्र केवलेन गुणवचनेन गुणी निर्दिश्यते । 'सैषानन्दस्य मीमांसा', 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इति । 'यतो वाचो निवर्तन्ते' इति च रागादिदोषदूषितयोर्वाङ्मनसो(सयो?)र्न गोचरं ब्रह्मेत्यर्थः । शुद्धयोस्तु पुनर्गोचर एव । तथा च श्रुत्यन्तरम् – 'दृश्यते त्वग्र्यया बुद्ध्या', 'ज्ञानप्रसादेन विशुद्धसत्त्वः' इति च ॥ भा. सू. पा. २८.

अपि च – 'भेदव्यपदेशाच्च' इति सूत्रभाष्ये 'जीवानन्दमयौ भेदेन व्यपदिशति । न हि लब्धैव लब्धव्यो भवति।' इति वृत्तिकारमतमनूद्य तत्र चोद्यमुद्भावितम् – "कथं तर्हि 'आत्मान्वेष्टव्यः', 'आत्मलाभान्न परं विद्यते' इति श्रुतिस्मृती" इति । तत्र परिहारश्च लिखितः –

"आत्मनोऽप्रच्युतात्मभावस्यैव सतः, तत्त्वानवबोधनिमित्तो देहादिष्वनात्मस्वात्मत्वनिश्चयो लौकिको दृष्टः । तेन देहादिभूतस्य आत्मनोऽप्यात्माऽनन्विष्टोऽन्वेष्टव्योऽलब्धो लब्धव्योऽश्रुतः श्रोतव्योऽमतो मन्तव्योऽविज्ञातो विज्ञातव्य – इत्यादिभेदव्यपदेश उपपद्यते । प्रतिषिध्यत एव तु परमार्थतः सर्वज्ञात् परमेश्वरादन्यो द्रष्टा श्रोता वा 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिना । परमेश्वरस्तु अविद्याकल्पितात्, शारीरात् कर्तृभोक्तृविज्ञानात्माख्यादन्यः । यथा मायाविनश्चर्मखड्गधरात् सूत्रेणाकाशमधिरोहतः स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यः । यथा वा घटाकाशात्, उपाधिपरिच्छिन्नात्, अनुपाधिपरिच्छिन्न आकाशोऽन्यः । ईदृशं च विज्ञानात्मपरमात्मभेदमाश्रित्य 'नेतरोऽनुपपत्तेः', 'भेदव्यपदेशाच्च' इत्युक्तम्" सू. भा. १–१–१७, पा. ३९.

इति । अत्र वृत्तिकारा इमे आनन्दमयब्रह्मवादिनोऽपि, अविद्याकल्पितत्वमेव शारीरत्वं कर्तृत्वभोक्तृत्वं चात्मन इच्छन्ति स्म । अतस्तेषां वेदान्तप्रक्रिया भगवत्पादसंमतादनतिविलक्षणेति स्फुटम् । तथाप्याचार्यभास्कर इह ब्रूते –

(३) अत्र केचित् स्वमतिकल्पितदर्शनपरित्राणाय सूत्रार्थं विनाशयन्तो व्याचक्षते – न हीश्वशदन्यः संसारी विद्यते स एव संसारी । तत्र 'नेतरोऽनुपपत्तेः' । 'भेदव्यपदेशाच्च' इति कथं सूत्रद्वयमिति चेत् । नैष दोषः । उपाधिकृतभेदमात्राङ्गीकरणादिदमुच्यते । यथा 'घटाकाशः' 'पटाकाश' इत्याकाशस्य भेदव्यपदेशः कल्पनामात्रेणेति । तदेतदयुक्तम् ॥

भा. सू. पा. २६.

इत्यादि । अत्र वृत्तिकारमतमिदमित्यविजानन्, भाष्यकारं प्रति प्रसिद्धनैसर्गिकद्वेषेण विजानन्नेव वा, आनन्दमयब्रह्मवादिवृत्तिकारमतं दूषयति भास्कराचार्यः । अथ चोपसंहारे भणति –

(४) 'तस्मात् संप्रदायपरम्परया च तद्व्याख्यानं शोभनमिति स्थितम्' इति ॥ भा. सू. पा. २९.

उभयथापि तु निर्विशेषब्रह्मवादिनो वृत्तिकाराः, भगवत्पादैर्दूषिताः केवलमत्राधिकरणे तदभ्युगतैकदेशनिराकरणार्थम् । भास्कराभिमतभेदाभेदसिद्धान्तसंप्रदायस्तु सर्वथा ततो विलक्षणः । यदि भर्तृप्रपञ्चाभिमतद्वैताद्वैतसंप्रदायस्य वेषान्तरमेव तस्य, यदि वा नूतनया रचितप्रक्रियान्तरप्रदर्शकः सः–इति सिद्धम् ॥

पञ्चकोशविवेकेन साधकस्य निर्विशेषानन्दरूपे ब्रह्मणि अभयप्रतिष्ठालक्षणं फलम् – इति कोशाध्यारोपापवादेन भगवत्पादैर्निरूपितम् । एतस्मिन् पक्षे 'एतमानन्दमयमात्मानमुपसंक्रामति' (तै. २–५) इति संक्रमणवाक्यम् तद्विज्ञानेन तत्तत्त्वभूतं ब्रह्म सद्यः प्राप्नोति – इति सुव्याख्यानम् । पुच्छब्रह्मणो निर्विशेषत्वात् 'असन्नेव स भवति, असद् ब्रह्मेति वेद चेत्' (तै. २–६) इति नास्तित्वशङ्कोत्थापनश्रुतिः 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' (तै. २–९) इति ब्रह्मणो वाङ्मनसागोचरत्ववादिनी श्रुतिश्च अनुगुणे भवतः । भास्करस्तु 'शुद्धयोस्तु वाङ्मनसयोर्गोचर एव वर्तते ब्रह्म' – इति ब्रुवन् सर्वसाक्षिणोऽपि वाङ्मनसगोचरत्वमाह । 'मनसो मनो यद् वाचो ह वाचम्' (के. १–२)

'न वाग्गच्छति नो मनः' (के. १ ३), 'यद्वाचाऽनभ्युदितम्' (के. १-५), 'यन्मनसा न मनुते' (के. १-६) – इति वारं वारं वाङ्मनसोर्गोचरत्वं निषेधन्तीमपि श्रुतिं पृष्ठतः कृत्वा, अविद्यमानस्य कर्तृत्वमपि शास्त्रस्य प्राहेत्यहो साहसरसिकता स्वमताभिनिवेशिनः !

अवस्थात्रयविवेकप्रक्रिया –

१७२. पञ्चकोशविवेकवत् अवस्थात्रयविवेकोऽपि भास्करप्रस्थाने न शुद्धब्रह्मस्वरूपम् उपस्थापयितुम् अलम् । तत्र तन्मतप्रकाशकानि कतिचिद् वाक्यानि समुदाह्रियन्ते –

(१) स्वप्नावस्था चिन्त्यते जीवस्य स्वयंज्योतिःस्वप्न(ज्योतिष्ट्व)प्रसिद्ध्यर्थम्, सुषुप्त्यवस्था च सर्वोपाधिविनिर्मुक्तम् अभयम् आत्मरूपं दर्शयितुम् ॥ भा. सू. ३-२-१, पा. १६०.

(२) स्वप्ने सृष्टिर्मायामात्रम् । न बाह्यार्थोऽस्तीति मात्रग्रहणम् । .... नन्वेवं निरालम्बनः प्रत्ययः प्राप्नोति । नायं दोषः । देशान्तरकालान्तरानुभूतानुस्मरणात् । स्वप्ने पूर्वप्रवृत्तार्थभव(अनुभव ?)जनितवासनावासितं मनो नाडीषु परिवर्तमानं स्मृतिज्ञानहेतुर्भवति, शुभाशुभकर्मप्रेरितं मोदत्रासादिदर्शनात् । स एव स्मर्यमाणोऽर्थः प्रत्ययालम्बन इति न दुष्यति ॥
भा. सू. भा. ३-२-३, पा. १६१.

[अत्र जाग्रद्वदेव स्वप्नेऽपि प्रत्यक्षाभासानुभवः स्मरणं च विविक्तमनुभूयते, तत् किं निमित्तम् ? - इति न विवेचितम् । 'देशान्तरकालान्तर' शब्दाभ्यां किं विवक्षितम्, स्वप्नोपलब्धदेशकालाभासानुभवस्य का गतिः ? – इत्यपि न विवेचितम् ॥]

(३) अत एव 'वैधर्म्यान्न स्वप्नादिवत्' इत्युक्तं तर्कपादे ॥
भा. सू. पा. १६१.

(४) ये तु बौद्धमतावलम्बिनो मायावादिनः, तेऽप्यनेन न्यायेन सूत्रकारेणैव निरस्ता वेदितव्याः । यदि बाह्योऽर्थो नाभिप्रेतः स्यात्, किमर्थमिदं यतते सूत्रकारः ? अथ मन्यसे, अन्यस्मिन् स्थायिनि वस्त्वन्तरे असति विज्ञानमात्रं नेष्यते, सति पुनरात्मतत्त्वे प्रपञ्चापलाप इति । कोऽयं

न्यायो यत् सत्यस्मिन् (अन्यस्मिन्?) प्रतिपन्ने अन्यन्नेष्यत इति ? प्रत्युत ब्रह्मकार्यत्वात् पृथिव्यादीनां तथात्वमेव युक्तम् ॥

भा. सू. २-२-२९, पा. १२४.

अत्र 'यथा हि स्वप्नमायामरीच्युदकगन्धर्वनगरादिप्रत्यया विनैव बाह्येनार्थेन ग्राह्यग्राहकाकारा भवन्ति, एवं जागरितगोचरा अपि स्तम्भादिप्रत्यया भवितुमर्हन्तीत्यवगम्यते । प्रत्ययत्वाविशेषात्' इति अनुमानेन बाह्यार्थापलापे प्रवृत्ते, अनुमानदूषणमुक्तं 'वैधर्म्यात्' इति । नैवं शक्यमनुमातुं प्रत्ययत्वसाम्यात् स्वप्नप्रत्ययवत् जाग्रत्प्रत्यया अपि निरालम्बना भवितुमर्हन्तीति स्वप्नजागरितयोर्वैधर्म्यं स्वयमास्थितवता – इति । स्वप्नो हि नाम जागरिते स्मर्यमाणा जागरितबाध्या अवस्था इत्यङ्गीकृत्य को नामानुन्मत्तोऽनुमिमीत स्वप्नवज्जागरितमिति ? – इति । न चास्ति भाष्यकारस्याऽऽग्रहो यद् बाह्यार्थो नाभिप्रेतः सूत्रकारस्येति, यत्कारणं यद् यथानुभूतं तत् तथैव ह्यनुमन्तव्यम् । सौगतेन परं यत्किञ्चित् साधर्म्यमवष्टभ्य स्वप्नादिवत् जागरितप्रत्यय इत्यनुमीयते, तन्न साधु–इत्येतावदिहोच्यते । न चान्यस्मिन् प्रतिपन्ने अन्यन्नेष्यत इति न्यायमनुसरति भाष्यकारः । स हि शून्यवादनिराकरणप्रसङ्गेनेदं ब्रवीति –

'न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुम् । अपवादाभावे उत्सर्गप्रसिद्धेः' ॥ सू. २-२-३१, पा. २५२.

इति । तत्रायमभिप्रायः । शुक्तिरजतादयोऽपि यावत् प्रतिभासं सत्यत्वेनैव स्वीक्रियन्ते प्रतिपत्तृभिः ; यदा तु शुक्तिकेयमिति प्रतिपद्यन्ते, तदा रजतव्यवहारमपह्नुवते 'नेदं रजतम्, मिथ्यैव रजतवदवाभासिष्ट' इति । एवं यदि शून्यवादी सर्वमिदं प्रमाणप्रमेयव्यवहारविषयतामध्यासीनं जगत् अपजुहुषते, तर्हि अवश्यं तेन सर्वस्यापि विकल्पत्वं विवक्षता सर्वविकल्पास्पदं परमार्थतत्त्वम् अनुभवपथे आनेतव्यम्, त्यक्तव्यो वा सर्वशून्यतादुराग्रह इति ॥

यत्तूच्यते ब्रह्मकार्यत्वात् पृथिव्यादीनां तथात्वमेव युक्तम् – इति, तत्र सूत्रभाष्यकारौ ओमिति ब्रुवाते । अभ्युपगम्यते हि पृथिव्यादिसर्वकार्यस्य तथात्वं तदनन्यत्वन्यायेन । 'ब्रह्मैवेदं विश्वम्' (मुं.) इत्यादिश्रुतेरिति । प्रातीतिकेन तु रूपेण तेषां तथात्वं नैव शक्यं विज्ञातुम् । दृष्टनष्टस्वरूपत्वात् शुक्तिरजतादिवत् 'वाचारम्भणं विकारो नामधेयम्' (छां. ६–१–४), 'अपागादग्नेरग्नित्वम्....' (छां. ६–४–१) इत्यादिश्रुतेः ॥

(४) ये पुनर्जागरितावस्थापि मायामात्रम् – इत्याद्योवयन्ति ते सूत्रकाराभिप्रायं नाशयन्तः श्रोत्रियजनं मोहयन्ति ॥ सू. भा. १६१.

विवृतः सूत्रकाराभिप्रायः 'आरम्भणशब्दादिभ्यः' इत्यत्र । न च सर्वस्यापि जगतस्तदनन्यत्वमिच्छन् सूत्रकारः, जाग्रदवस्थायाः, तदन्तर्गतभेदप्रपञ्चस्य वा, तदन्यत्वम् आतिष्ठते इति वक्तुम् उचितम् । अतो मायामात्रत्वोक्तिरियं जागरितस्यापि मायामात्रत्वं न व्यवच्छिनत्ति । अपि च स्वप्नस्य स्वप्नत्वं जागरितस्य च तद्वैलक्षण्यं व्यावहारिकदृष्ट्या सर्वैरप्यङ्गीकृतं प्रतिवादिनाप्युररीकृतं सिद्धवत् कृत्वैवेदं वैधर्म्यमुक्तं सूत्रकारेण । वस्तुतस्तु विचार्यमाणे जाग्रत्स्वप्नयोर्वैलक्षण्यं नैव शक्यसाधनम् । स्वप्नेऽपि हि जागरितवदेव तदनुभवकाले ग्राह्यग्राहकादिविभागोऽनुभूयत एव, तत्रापि जागरितवदेव जागरितावस्थाबुद्धिरनुवर्तत एव यावद्बाधम् । तस्मात्, 'स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः' (गौ. का. २–५) इत्यभियुक्तोक्तिर्दुर्धर्षैव । तदेतदनुभवमवलम्ब्य स्वप्नजागरितस्थानयोरुभयोरपि मायामात्रत्वम्, आत्मन एव तु सत्यत्वं च वितत्य विचार्य प्रतिष्ठापितं **वैतथ्यप्रकरणे**। तत्प्रकारस्तत एवाधिगन्तव्यः । श्रौती चेयं प्रक्रिया – 'त्रयः स्वप्नाः' (ऐ. ३–१२) इति हि तिसृणामपि स्थानानां स्वप्नत्वमवगम्यते आगमशासनात् । तस्मान्न श्रोत्रियजनव्यामोहनमिदम्, अपि तु श्रुतिसूत्रानुभवसंगानेन अवस्थात्रयाध्यारोपापवादप्रक्रियाप्रदर्शनेन मुमुक्षुजनानुग्रह एवेत्यलं पल्लवितेन ॥

जाग्रद्दृष्टया त्विदं स्वप्नस्य मायामात्रत्वकथनमिति संतोष्टव्यम् । आह हि भाष्यकारः –

" प्राक्तु ब्रह्मात्मत्वदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति । संध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यते-इत्यतो वैशेषिकमिदं संध्यस्य मायामात्रत्वमुदितम् ॥ " सू. भा. ३-२-४, पा. ३४७.

इति ॥

(५) तदभावः स्वप्नदर्शनाभावः तदात्मनि नाडीषु च न विकल्पेन इत्यर्थः । .... नाडीभिर्द्वाभिर्हृदयाकाशं परमात्मानम् आसाद्य स्वपिति । .... नाडीषु सुप्तस्य निःसंज्ञत्वे हेत्वभावात् । इतरत्र तु सति संपद्य न विदुः – इति ॥ भा. सू. ३-२-७, पा. १६२, १६३.

(६) सुषुप्तिप्रलययोः कथम् उपाधियोगः शक्यते वक्तुम् इत्युत्तरं पठति – पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् । तुशब्दोऽवधारणे । सत एवास्य बुद्धिसंबन्धस्य प्रबोधकाले चाभिव्यक्तिः ॥

भा. सू. २-३-३१, पा. १३८.

[कथं तर्हि सत्संपत्तिः ? उपाधिना हि भेदरूपो भवति जीवः । यदि सुषुप्तप्रलययोर्जीवोपाधिरवतिष्ठत एव, न तर्हि कृत्स्नसंपत्तिः ॥]

(७) ब्रह्माप्येति प्रपञ्चोऽयं रूपं हित्वा तु वैकृतम् ।
जहाति कठिनावस्थां जलस्थं लवणं यथा ॥

भा. सू. २-१-९, पा. ९१.

[प्रलयेऽपि ब्रह्मणि जगदप्ययो न मुख्यः, जगत्स्वरूपस्यापरित्यागादित्युक्तं भवति ॥]

(८) यत् सूक्ष्मशरीरं करणायतनम् आपीतेः आविमोक्षात् सम्यग्ज्ञाननिमित्तात् अनुवर्तते । न मरणवेलायामेव विलीयते ॥

भा. सू. ४-२-८, पा. २२९.

सर्वत्रैवंविधस्थलेषु बीजभावावशेषो भाष्यकारैरपि यद्यप्यङ्गीक्रियते, तथाप्यस्ति तत्र विशेषः –

" यथा हि अविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः, स्वप्नवदव्याहतः स्थितौ दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते ॥ " सू. भा. २-१-९, पा. १९२.

परमात्मा नित्यनिरस्तविभागव्यवहार एव सन् मिथ्याज्ञानेन निमित्तेन प्रबोधाद्यवस्थासु विभागव्यवहारविषय इव भवति । निरस्ते तु सम्यग्ज्ञानेन मिथ्याज्ञाने सर्वव्यवहारप्रहाणिर्भवतीति भाष्यकाराभिप्रायः । भास्करमते तु न सम्यग् ज्ञाननिमित्तो विभागपरिहारः संभवति, वास्तविकत्वादेव सर्वावस्थास्वपि विभागशक्त्यवस्थानस्येति वैषम्यम् ॥

मुक्तिसाधनविचारः –

१७३. यथैव भेदाभेदवादः, तथैव ज्ञानकर्मसमुच्चयवादोऽपि भास्करमते भर्तृप्रपञ्चैरिव स्वीकृतः –

(१) तच्चोभयत्र ब्रह्मज्ञानं प्रति हेतुत्वम्, आरम्भे फलप्राप्तौ च । कर्मणि पूर्ववृत्ते तदपेक्षा ब्रह्मजिज्ञासा कर्तुं शक्यत इति आरम्भे हेतुत्वम् । कर्मणा समुच्चितं ज्ञानं क्षेमप्राप्तिनिमित्तम् इति फलप्राप्तौ हेतुत्वम् ॥

भा. सू. १-१-१, पा ४.

(२) अत्र हि ज्ञानकर्मसमुच्चयान्मोक्षप्राप्तिः सूत्रकारस्याभिप्रेता । तथा च वक्ष्यति । 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इति । कर्मणि चापरिज्ञाते विद्यायाः केन समुच्चयः, केन न–इति विभागो न शक्यते वदितुम् । हेयोपादेयप्रतिपत्त्यभावात् । पूर्ववृत्ते तु कर्मज्ञाने काम्यं प्रतिषिद्धं च हेयम्, नित्येन कर्मणा समुच्चयः – इति प्रतिपादयितुं शक्यते ॥

भा. सू. १-१-१, पा. २.

(३) अन्ये पुनरन्यथा संबन्धं वर्णयन्ति । देवादिभ्योऽनृणीभावः पूर्ववृत्तः प्रज्ञाकषायपरिपाकश्च । एतदानन्तर्यमथशब्देनोच्यत इति । कथम् ? वेदेन किल बुद्धिपूर्वं स्वाध्यायाध्ययनप्रभृति पुरुषः कर्मस्वेव प्रवर्त्यते । ततः शास्त्रीयनैसर्गिकवासनयोर्भवाभिभवौ । ततश्च पुण्यापुण्ययोरुपचयापचयौ । ततश्च उत्तमाधिकारविधियोग्यः पुरुषो भवति । कः पुनरुत्तमाधिकारविधिः ? ... आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति । .... तदिदं संबन्धकथनं न्यायविदो न श्रद्दधते । न हि धर्माधिकारस्य कृत्स्नस्य पुरुषसंस्कारद्वारेणोत्तमाधिकारोपयोगित्वेऽस्ति किञ्चित् प्रमाणम् ॥ भा. सू. १-१-१, पा. ४-५.

[ज्ञानकर्मसमुच्चयवादनिरासप्रकारः सुप्रसिद्धः शाङ्करप्रस्थानत्रयभाष्येषु कृतपरिश्रमाणाम् । कर्मणां पुरुषसंस्कारहेतुत्वं प्रसिद्धम् " इदं मेऽनेनाङ्गं संस्क्रियते (शत. ब्रा. ११-२-६-१३) इत्यादौ (बृ. भा. ३-३-१, पा. ८०१) । संस्कारपक्षश्च स्वीकृत एव समुच्चयवादिनाप्याचार्यमण्डनमिश्रेण ॥ ब्र. सि. 36]

(४) एवं पूर्वो वेदभागः परं नापेक्षते । स पुनः पूर्वमपेक्षते । वेदान्तवाक्यैरेव ज्ञानसहकारितया नित्यकर्मोपदेशात् 'तमेतं वेदानुवचनेन' इति ॥ भा. सू. १-१-४, पा. १६.

(५) सर्वेषु आश्रमवस्तु अपेक्षा सा सर्वापेक्षा । कुतः ? 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' – इति श्रुतेः, ज्ञानं प्रति अपवर्गसिद्धौ यज्ञादयस्तृतीयया विभक्त्या अङ्गत्वेन प्रयाजादिवद् विधीयन्ते । .... तस्मात्, यथैव शमादयो यावज्जीवम् अनुवर्तन्ते विदुषाम् अपवर्गप्राप्तये, तथा आश्रमकर्माणि-इति नान्तराले परित्यागः ॥
भा. सू. ३-४-२६, पा. २०७.

[अत्र विविदिषोत्पत्तौ, विद्योत्पत्तौ वा कर्मणां कारणत्वं श्रूयते, न तु समुच्चयः ॥]

(६) आत्मज्ञानं कर्माङ्गप्रत्ययश्रवणं च स्तुतिमात्रम् । ऐकाश्रम्यं श्रौतम्, आश्रमान्तरं स्मार्तं विकलेन्द्रियादिविषये चरितार्थम् – इति मीमांसकमतम् । तदत्र निरस्यते । स्थितेऽस्मिन् पुरुषार्थे ज्ञाने कर्मसमुच्चितता ततः सिद्धिः ॥ भा. सू. पा. २०१.

(७) 'तुल्यं तु दर्शनम्' (वे.सू. ३-४-९) । अकर्माङ्गत्वेऽप्यस्तीत्यर्थः । 'एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे । 'एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति । किमर्था वयमिति संहिताविज्ञानस्तुत्यर्थं नाध्ययनादित्यागविधानम्, सर्वथा ज्ञानस्य प्राधान्यमभिप्रेतम् ॥ भा. सू. पा. २०३.

[अत्र 'व्युत्थाय' इति कर्मत्याग एव श्रूयते, न तु समुच्चयः ॥]

(८) पुत्रादिलिङ्गात् गार्हस्थ्याद् व्युत्थाय, आश्रमान्तरं प्रतिपद्यन्ते-इति स्मृतिप्राप्तमेवानूद्यते । स्मृत्यनपेक्षत्वे तु शाक्यक्षपणादिभिक्षाचरणमपि

श्रौतं प्रसज्येत । स्मृतौ च मननादौ त्रिदण्डयज्ञोपवीतादिनियमात् उत्तमाश्रमः स्वरूपतो धर्मतश्च निर्ज्ञात इति नातिप्रसङ्गः ॥

भा. सू. ३०४-२६, पा. २०८.

[श्रुतिस्मृतिवाक्यानां भिन्नाधिकारिविषयत्वं बृहदारण्यकभाष्ये (पा. ८१५) निर्णीतम्, स्मृत्यनपेक्षमात्रेण न शाक्यादीनां श्रौतत्वप्रसक्तिः । तेषां श्रुतेरप्यनपेक्षणात् ॥]

(९) ब्रह्मसंस्थता च ब्रह्मनिष्ठोच्यते । सा च सर्वाश्रमिणाम् अविशिष्टा । .... अत एव ज्ञानकर्मणोरेकप्रयोजनत्वात् अविरोधः । तथा चाह 'स य आत्मानमेव लोकमुपास्ते न ह्यस्य कर्म क्षीयते, इति । स्वतः क्षणिकमपि अक्षयफलत्वादक्षयमुच्यत इति । यदि च कर्मसंबन्धमात्रेणामृतत्वं नास्तीत्युच्यते परिव्राजकस्यापि न स्यात् । तस्यापि शौचाचमनस्नानभिक्षाटनादिकर्म कायिकं वाचिकं मानसिकम् । तच्च अपरिहार्यं ध्रियमाणशरीरस्येति न कस्यचिन्मुक्तिः स्यात् ॥ भा. सू. पा. २०५-२०६.

[मैवम् । परिव्राजकस्य शौचादेर्विध्यपेक्षाभावे सति तेन ज्ञानसमुच्चयाभावात् । अधिकं त्वत्र गीताभाष्यच्छान्दोग्यभाष्यसूत्रभाष्येभ्योऽवगन्तव्यम् ॥]

(१०) श्वेताश्वतरे 'अत्याश्रमिभ्यः प्रोवाच' इत्यत्र, 'अति सु इत्यभिपूजितार्थे' (नि. १-१-४, पा. १२) इति निरुक्तकारवचनात् पूजिताश्रमिणो वृत्तस्वाध्यायसंपन्ना निर्दिश्यन्ते । तेभ्यः प्रोवाचेति मन्त्रार्थः ॥

भा. सू. पा. २०८.

[नैष्कर्म्यसिद्ध्यापि पूजिताश्रमवत्त्वं भवेदेवेति न वक्तव्यं किञ्चिदत्र ॥]

(११) यत्पुनरत्र (जाबालश्रुतौ अ)यज्ञोपवीती कथं ब्राह्मणः स्यात् इति पठ्यते तत् संदिग्धम् । पुरस्ताच्चोपवीतन्यासत्यागयोरभावात् । कथम् अकस्मात् एवमाशङ्कावचनम् उत्तिष्ठेत ? ब्राह्मणं (णग्रहणं) चानर्थकम् । क्षत्रियादिरपि कथमयं यज्ञोपवीती स्यात् ? अतिदुर्विदग्धेन केनापीदं वाक्यं प्रक्षिप्तम् इत्याशङ्कामहे ॥ भा. सू. पा. २०८.

[वाक्यशेषे 'मुण्डोऽपरिग्रहः' इत्युपलभामहे । अतो नाकस्मिकमिदं वचनम् 'ब्रह्मचर्यादेव प्रव्रजेत्' इत्यस्यैवायं प्रपञ्च इति युक्तम् । न च ब्राह्मणग्रहणमनर्थकम् । ब्राह्मणस्यैव संन्यासे विशेषतोऽधिकार इत्यर्थद्योतनात् । 'ब्राह्मणो निर्वेदमायात्' (मुं.) - इत्यादिश्रुत्यन्तरात् । उत्तरत्र 'अव्यक्तलिङ्गा अव्यक्ताचाराः', 'त्रिदण्डं कमण्डलुं शिक्यं पात्रं जलं (?) पवित्रं शिखां यज्ञोपवीतं च इत्येतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेत्' इति च त्रिदण्डिनामपि पारमहंस्यविधानाच्चैवमवसीयते ॥]

(१२) यथा प्रधानं जगत्कारणम् इति ज्ञानमपस्मृतिः, तथा तेषामेव सांख्यादीनां सर्वकर्मापवादेन ज्ञानादेव केवलात् अपवर्गः इत्यपस्मृतिः। तामनुसरन्तो येऽपि कर्मत्यागं वर्णयन्ति, तेऽपि अपसिद्धान्तिन एव। तथा च आपस्तम्बेनोपन्यस्य निरस्तम् 'तच्छास्त्रैर्विप्रतिषिद्धम्। बुद्धौ चेत् क्षेमप्रापणम् इहैव न दुःखमुपलभेत' (आप. ध. सू. २-२१-१६) इति॥
भा. सू. पा. २०९.

[नियमपस्मृतिः। 'ब्रह्मचर्यादेव' इत्यादिश्रुतिमूलवत्वात्। 'नैव कुर्वन् न कारयन्' (गी. ५-१३) इत्यादिस्मृतेः। 'इति होक्त्वा याज्ञवल्क्यो विजहार' (बृ. ४-५-१५) इत्याचारदर्शनाच्च। न चापस्तम्बेन इदं सिद्धान्तत्वेन विवक्षितं वचनम्। तत्र सर्वेषामप्याश्रमाणां दूषणभूषणोपलब्धेः। 'बुद्धौ चेत् क्षेमप्रापणम्' इति चेदित्याक्षेपानुपपत्तिः, 'अमृत इह भवति' (तै. ना.) इत्यादिश्रुत्या बुद्धस्य क्षेमप्राप्तिविज्ञापनात्। न च दुःखोपलम्भनम् ज्ञानस्यापवादकरम्, उपलभ्यस्य दुःखस्य कस्याप्युपलब्धुर्धर्मत्वानुपपत्तेः॥]

ज्ञानकर्मफलम् –

१७४. कर्मापि ज्ञानवत् कैवल्यप्रतिबन्धनिवर्तकमिति भास्करमतम्–

(१) इदं चात्र वक्तव्यं केन प्रकारेण विद्यापवर्गोपयोगिनी? स्यान्मतम्, भेदज्ञानम् अविद्या। तन्निवृत्त्या इति। तदसत्। दृष्टविरोधात्। न हि वाक्यार्थज्ञानोत्पत्तौ कस्यचित् कृत्स्नं द्वैतज्ञानं निवर्तते। म्रियमाणशरीरस्य शरीरेन्द्रियमनांसि रूपादिज्ञाननिमित्तानि। न हि निमित्ते सति नैमित्तिकं नोत्पद्यते। यथाग्नीन्धनसंयोगे धूमः॥ भा. सू. पा. २०९.

[द्वैतज्ञाननिवृत्तिरिति कोऽर्थः? द्वैतप्रतीतिनिवृत्तिर्वा, उत द्वैतसत्यत्वबुद्धिनिवृत्तिरिति? यदि प्रथमः कल्पः, न सा अभ्युपगता अद्वैतिभिः; अथ द्वितीयः, इष्यत एव तादृशी निवृत्तिः। न ह्यधिगतशुक्तितत्त्वस्य रजतावभाससत्यबुद्ध्यनुवृत्तिरस्तीति॥]

(२) यदि च भेदप्रतिभासो नास्ति पारमेश्वराश्च गुणाः सर्वज्ञत्वादयः प्रादुर्भूताः ततो लौकिकं वैदिकं वा कर्म युगपत् निवर्तते॥ भा. सू. पा. २०९.

[असदेतत्। न हि कस्यचित् जीवतः सर्वज्ञत्वादयः प्रादुर्भवन्ति। अथोपासनाफलमिति। तर्हि भावनामात्रपरिप्रापितत्वात्। तेषां पारमार्थिकत्वं श्रद्धामात्रगम्यम् इति भवति॥]

(३) कथं पुनरात्मनः कर्तृत्वम् शुद्धचैतन्यस्वभावत्वात्? यथा तव लौकिके कर्मणि। किञ्चौपाधिकमिदं कर्तृत्वं यावदुपाधि अनुवर्तते। यथा

इन्धनसंयोगे वह्नेर्धूमकर्तृत्वम् । आरब्धकर्मविनाशाच्च कर्तृत्वभोक्तृत्वे यावच्छरीरभाविनी । विशेषस्त्वयं विद्वदविदुषोः–नौपाधिकं कर्तृत्वं मन्यते विद्वान्, इतरस्तु स्वाभाविकमिति ॥ भा. सू. पा. २१०.

[शाङ्करसिद्धान्ते लौकिककर्मकर्तृत्वमाभासमात्रतः । किं तवाप्येवम् ? नो चेत्, औपाधिकं नाभिमन्यते कर्तृत्वम्, कर्तृत्वमप्यस्यानुवर्तते इति कोऽर्थः ?]

(४) कथं पुनः कर्मणो मुक्त्युपायत्वम् ? यथैव ज्ञानस्य तव । ननु ज्ञानमविद्यां निवर्तयति । सत्यम् । न भेदज्ञानं निवर्तयतीत्युक्तम् । अनात्मन्यात्मज्ञानं प्रतिबन्धकं निवर्तयतीति चेत्, तथा कर्म । .... माहारजनादिरूपाणां चात्मानं धूप(ष?)यित्वा स्थितानाम् अपकर्षणं ज्ञानकर्मभ्याम् । शास्त्रलभ्यत्वादपुनर्भावस्य । केन द्वारेणोपकरोतीति चेत्, को जानीयात् मातृतुल्या श्रुतिरेव चेति (चाहेति?) ॥ भा. सू. पा. २१०.

[ज्ञानस्य द्वैतसत्यत्वबाधकत्वमुपपादितम् । अनात्मन्यात्मज्ञानं कर्म निवर्तयतीति दृष्टविरुद्धा कल्पना । अज्ञानं ह्यनात्मन्यात्मत्वज्ञानम् । तच्च ज्ञानमात्रबाध्यं न कर्मबाध्यं दृष्टम् । 'को जानीते' इत्यदृष्टफलकल्पनात उपपन्नमस्मिन् प्रस्थाने । तत्रोपासनाव्यतिरिक्तं वस्तुतन्त्रज्ञानमपि दृष्टफलकमस्तीति तु समालोचयितव्यम् ॥]

श्रवणाद्यावृत्तिः –

१७५. ज्ञानमात्रं नालम् अपवर्गप्रदानायेति तदर्थमुपासनमेष्टव्यमित्याह भास्करः –

(१) श्रवणमननयोरसकृत् क्रियमाणयोरज्ञानसंशयविपर्ययनिवर्तकम् आत्मविषयकत्व(कं?)ज्ञानम् उत्पद्यते । दृष्टार्थत्वात् अवहन्त्यादिवत् ॥
भा. सू. पा. २१८.

(२) सकृदेव श्रवणमननाभ्यां साक्षात्कारिज्ञानमुत्पद्यते इति वार्तमेतत् । श्वेतकेतोरपि यत्र बहुश्रवणमन्तरेणाज्ञानसंशयादिनिवृत्तिर्नासीत्, किं नु खलु मनुष्याणां रागादिदोषकलुषितचेतसाम् ॥ भा. सू. पा. २१९.

(३) आत्मस्वरूपविषये विशेषज्ञाने वाक्यादुत्पन्ने समानप्रत्ययावृत्तिलक्षणमुपासनं यावज्जीवं कर्तव्यम् ॥ भा. सू. पा. २१९.

(४) अनात्मसु देहादिषु विपरीतप्रतिपत्तिः, ब्रह्मस्वरूपाप्रतिपत्तिश्च अविद्या. सा सम्यग्ज्ञानोत्पत्तौ निवर्तते । तच्च सम्यग्ज्ञानमुत्पन्नम् इति (?)

यावज्जीवम् अभ्यस्यमानं परिपक्वम् अपवर्गक्षमं भवतीति शास्त्रादवगम्यते ॥
भा. सू. पा. २१९.
[अत्रापि वस्तुतन्त्रज्ञानानादरणं स्पष्टम् ॥]

ज्ञानयोगयोः संबन्धः –

१७६. योगोऽपि अत्रांशेन परिगृहीतः –

(१) भवतु श्रुतिसंवादात् सम्यग्दर्शनोपायोपदेशांशस्य तथात्वम् । विप्रतिपन्नांशस्य तु मिथ्यात्वम् । पुरुषाणाम् अन्यथार्थदर्शित्वसंभवात् ॥
भा. सू. २-१-३. पा. ८९.

(२) सनकादौ च योगशास्त्रे अयमेव (काठकोक्तः) योगः प्रदर्श्यते । ध्यानं धारणा समाधिरिति । ध्यानम् अभिप्रेतार्थप्राप्त्यर्थं चित्तैकाग्र्यतोच्यते । प्राणेन्द्रियबुद्धिमनसां युगपत् संधानं धारणा । श्रद्धाप्रयत्नाभ्यां नित्यचिन्ता समाधिः ॥ भा. सू. १-४-१. पा. ७२.

(३) ज्ञानातिशयमादाय(?) योगाभ्यासं कुर्याद् ज्ञानपरिपाकाय इत्यर्थः । विध्यादिवत् । यथा अग्निहोत्रादि अविदुषो विधीयते फलातिशयार्थिनः, तथा अयं विदुषो व्युत्थायिनोऽपवर्गार्थिनः संन्यासिनो नैष्ठिकस्य विधीयते ॥ भा. सू. ३-४-४५. पा. २१६.

(४) यथा प्रकाशः सौर्यः, आदित्यग्रहणात् आकाशो वा, जलघटाद्युपाधिधर्मानुविधायी विगतेषु उपाधिविधिषु(उपाधिषु?) अवैशेष्यं प्रतिपद्यते, अभिन्नः सन्, एवमयं जीवः प्रागपि अभिन्नः सन्नेव परं रूपं प्रतिपद्यते । परस्वरूपप्रकाशोऽभिव्यक्तिः । स च तस्मिन् कर्मणि उपास्ये परमात्मनि संराधनाभ्यासात्, नान्यथा इति । सति चैवं ये समाधिमन्तरेण ब्रह्मभूता वयम् इति मन्यन्ते तेषां मिथ्याभिमानः स इति सूत्रकारेण सूचितं भवति ॥
भा. सू. ३-२-२५. पा. १७०.

[ज्ञानप्रकरणेषु नियमेन योगविधानादर्शनात् । 'विजज्ञौ' इत्युपदेशमात्रेण विज्ञानसिद्धिप्रदर्शनाच्च नायं समीचीनो वादः । किञ्च समाधिप्राप्त्यैव चेत् प्राप्तिर्ब्रह्मभावस्य, तर्हि क्वाचित्कत्वादनित्यत्वप्रसङ्गस्तद्भावस्य । तस्मात् समाध्यनुभवोऽप्यात्मनो निर्विशेषत्वे प्रमाणम्–इत्येव सूत्रार्थः, न तु तत्र विधिरपि । न हि सूत्रे विधायकशब्दः कोऽपि दृश्यत इति ॥]

मुक्तिनिरूपणम् –

१७७. मुक्तिविषये भास्कराभिप्रायाविष्करणाय कतिचिद् वाक्यान्युदाह्रियन्ते –

(१) न भेदज्ञाननिवृत्तिरविद्यानिवृत्तिः, किं तर्हि, शरीरादौ अनात्मन्यात्मबुद्धिनिवृत्तिः। ... तन्निवृत्तौ शरीरपातादनन्तरं सर्वज्ञः सर्वशक्तिः, निरतिशयसुखसंवेदी मुक्तो भवति ॥ भा सू. १-१-५, पा २१.

(२) द्विधा मुक्तिः। जीवदवस्थायां रागद्वेषमोहैः तद्जैश्च मदादिभिर्विमुक्तिः। पातोत्तरकालमात्यन्तिकीति ॥ भा. सू. ४-१-१४, पा. २२४.

['अत्र ब्रह्म समश्नुते' – इति श्रुत्यर्थोऽनालोचितोऽत्र ॥]

(३) द्विधा मुक्तिः सद्य एव मुक्तिः क्रममुक्तिश्चेति । ये साक्षाद् ब्रह्मैव उपासते (ते) सद्य एव मुच्येरन्; इतरे तु हिरण्यगर्भं प्राप्य शुद्धान्तःकरणाः तत्रैव ज्ञानप्रकर्षमासाद्य 'छायातपयोरिव ब्रह्मलोके' इति विविक्तबोधोत्पत्तिसंकीर्तनात् तेन सह मुच्येरन् ॥ भा.सू. ४-३-१४, पा. २४०.

(४) परमात्मना संपन्नस्य एका(वा?)त्मनः कर्तृभोक्तृस्वरूपविनिवृत्तिः। सा च श्रुत्या दर्शिता 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां.)। 'अस्माच्छरीरात् समुत्थाय' (छां.) इति च। प्रारब्धकर्मफलभोगस्यावश्यंभावित्वात्, म्रियमाणशरीरस्य अवश्यंभावी सुखदुःखानुभवः । तस्मात् जीवदेव (जीवन्तमेव ?) मुक्तमिति ये प्रतिजानते ते श्रुतिमतिवर्तन्ते । दृष्टानुभवं बाधन्ते ॥ भा. सू. पा. ५८.

['अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (बृ. ४-४-७) इति श्रुत्यर्थोऽत्र समालोचनीयः । तत्र वाक्यशेषे 'अथायमशरीर' इत्यपि विज्ञायते ॥]

(५) यदि च जीवन्नेव मुक्तो भवान् सर्वज्ञत्वात् परात्कत्वावेदनमपि प्राप्नोति । ननु सर्वश्चासौ ज्ञश्चेति विग्रहः । मैवम् । त्वत्पक्षे सर्वस्य निवृत्तत्वात् चैतन्यमात्रमवशिष्यते । तत्र निःसंबोधो मोक्षोऽभ्युपेयः; श्रुत्यनुसारित्वाद् वा सर्वज्ञत्वं सर्वशक्तित्वं चेति। अतो जीवदवस्थायां न मोक्षः। मुक्त्युपायभूतं ज्ञानं कर्म चानुष्ठेयम् ॥

भा. सू. ३-४-२६, पा. २१०.

[सर्वज्ञत्वं नाम न सर्वविषयकज्ञानवत्त्वम्, किं तु अद्वितीयचैतन्यस्वरूपत्वम्। यत्तु सर्वस्य निवृत्तत्वादिति। तत् सत्यम्; तथापि सर्वमपि चैतन्यमेव संपद्यते। यदपि 'निःसंबोधो मोक्षः' इति, तदपि सत्यम्; संबोध एव तु तस्य स्वरूपमिति निरवद्यम् ॥]

भास्करप्रस्थानपरीक्षोपसंहारः –

१७८. अध्यारोपापवादप्रक्रियाप्रत्यर्थिषु प्रस्थानेषु भास्करीयमेव अद्य यावत् परिपूर्णाकारेणोपलभ्यमानं प्राचीनतमम् । तत्र भर्तृप्रपञ्च-प्रस्थानं न यथावदनुसृतम्, द्वैताद्वैतप्रक्रियोपष्टम्भिकाः काश्चनाभिनवा युक्तयः प्रत्युपस्थापिताः, शाङ्करीययुक्तयश्च तत्र तत्राभिनिवेशपूर्वकं खण्डिताः । तत्र शाङ्करप्रक्रिया न सर्वत्र मूलानुरोधेनानूदिताः ; विशिष्य च माहायानिकवादेभ्यो शाङ्करवादस्य वैलक्षण्यं न सम्यग् ज्ञातमिति स्पष्टम् । वाक्यानां स्वाभिलषितसिद्ध्यनुगुणं व्याख्यानम्, तत्रानुगुणयुक्तीनां केवलं दृष्टान्तबलेन साधर्म्यवैधर्म्यप्रदर्शनार्थमानयनम्, वेदान्तवाक्यस्य वाक्यत्वे-नैव प्रमाणीकरणं च–इत्येतत् सर्वमसाधारणमस्य प्रस्थानस्य । ब्रह्मजिज्ञासा अनुभवावसाना, वस्तुनि क्रियास्विव विकल्पासंभवः, वाक्यस्य ज्ञापकत्वं न कारकत्वम् – इत्येतादृशाः शङ्करभगवत्पादानुसृता न्याया नैकान्तेन मनसि कृता इति वाचकैरवधेयम् । वेदान्तविचारे इतः परमयमेव पन्थाः प्रायशः सर्वैः प्रस्थानान्तरावलम्बिभिराद्रियत इत्येतद् वयम् तत्र तत्र यथावसरं दर्शयिष्यामः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

भास्करप्रस्थानपरीक्षा नाम नवमः काण्डः

---

१०. भामतीप्रस्थानपरीक्षा

भाष्यव्याख्यातृपद्मपादसुरेश्वरवाचस्पतिसंबन्धः –

१७९. माधवीयशङ्करविजये सुरेश्वरपद्मपादवाचस्पतिमिश्रप्रस्थान-संबन्धं द्योतयितुं प्रवृत्तं कथानकमेकमुपलभ्यते । श्रीसुरेश्वराचार्ये गुर्वनुज्ञया शारीरकभाष्यवार्तिकचिकीर्षाव्यासक्तमनसि, (शं. वि. १३, श्लो. ४, ५), भगवत्पादीयशिष्यास्तदसहमाना रहसि आचार्यमुपेत्य प्रोचुः 'अयं कर्मवासनावासितधीर्यदि भाष्यवार्तिकं निबध्नीयात्, तर्हि नूनं सर्वं भाष्यं कर्मपरं योज्येत (श्लो. १०, ११)। तस्मात् पद्मपादाचार्यः, गिरिः, हस्तामलको वा (श्लो. १९, २०, २२) अत्र वार्तिकं भवदनुज्ञया विरचयतु' इति । तं च स्वविधिस्थिते विघ्नमाचरितं श्रुत्वा सुरेश्वरः, 'यद्यन्ये वार्तिकं कुर्युः, तन्मा लोके प्रचयं गच्छतात्' इति शशाप । तस्य शोकं शिशमयिषुणा आचार्येण 'त्वमिदानीं बृहदारण्यकतैत्तिरीयभाष्ययोरेव वार्तिके प्रणय विस्रब्धम्' इत्याज्ञप्तस्तथैव चकार (श्लो. ६६)। पद्मपादस्तु गुर्वनुज्ञया सूत्रभाष्यटीकां चकार (श्लो. ७१)। तां च दृष्ट्वा संतुष्टोऽप्याचार्यः कालगतिज्ञः 'अत्र पञ्चैव पादाः, तत्रापि विशेषतश्चत्वार्येव सूत्राणि, प्राचुर्यं गच्छेयुः' (श्लो. ७२) इति सुरेश्वरमुक्त्वा तस्य मनःसमाधानार्थम् इदमूचे–

> प्रारब्धकर्मपरिपाकवशात् पुनस्त्वं ।
> वाचस्पतित्वमधिगम्य वसुन्धरायाम् ।
> भव्यां विधास्यसितमां मम भाष्यटीका-
> माभूतसहँयमधिक्षिति सा च जीयात् ॥ श्लो. ७३ ॥

इति । तदेतत् प्रचलितपञ्चपादिकाग्रन्थे सूत्रचतुष्टयमात्रपरिमितत्वम्, वाचस्पतिटीकायाश्च परिपूर्णत्वम् आलक्ष्य वेदान्तसिद्धान्तरहस्यान्यनेकानि वार्तिकद्वये विवृतवतामपि सुरेश्वराचार्याणां सूत्रभाष्यव्याख्यायामप्रवृत्तिं कथञ्चिदुपपादयितुं पाठकमनसि चमत्कृतिजननार्थं च कविताचातुरीमात्रं प्रदर्शितं शङ्करविजये – इत्यतिरोहितम् । न हि वार्तिके बृहदाकारेऽपि

क्वचित् पञ्चपादिका सकृदपि परामृष्टा, तदीयविचारा वा तत्र तत्र स्वप्रस्थानेऽसंप्रतिपन्ना अपि कटाक्षिताः। न च सुरेश्वरवाचस्पतिप्रस्थानयोः प्रधानविषयेष्वपि प्रतिपादनरीतिसाम्यं भूरिश उपलभ्यते ; वैषम्यमेव तु तत्र तत्र स्फुरतीति यथावकाशं दर्शयिष्यामः। तस्मात्, भिन्नप्रस्थानत्वमेवैषां दरीदृश्यमानं न काव्याख्यायिकाश्रवणमात्रेण शक्यप्रत्याख्यानमिति बोध्यम् ॥

वाचस्पतिमिश्रकृता ग्रन्थाः –

१८०. तत्र वाचस्पतिमिश्रकृतित्वेन प्रसिद्धा अनेके ग्रन्थाः समुल्लसन्ति गीर्वाणवाङ्मये। यद्यपि ते सर्वे नैककर्तृका इति प्रमाणान्तरान्निश्चीयते तथापि प्रकृतभाष्यटीकाकारेण विरचितत्वेन सुनिश्चेया इमे – (१) **न्यायकणिका** मण्डनमिश्रकृतविधिविवेकटीका ; (२) **तत्त्वपरीक्षा** ब्रह्मसिद्धिव्याख्यानरूपा ; (३) **तत्त्वबिन्दुः**, वाक्यार्थविचारमधिकृत्य कृतं स्वतन्त्रं प्रकरणम् ; (४) **न्यायवार्तिकतात्पर्यटीका**, (५) **न्यायसूची** चेति न्यायदर्शने ग्रन्थौ ; (६) **साङ्ख्यतत्त्वकौमुदी** नाम्नी साङ्ख्यकारिकाटीका ; (७) **तत्त्ववैशारदी** योगभाष्यटीका चेति। त इमे ग्रन्था अनुक्रमेण विरचिताः, पर्यन्ते च भामतीनाम्नी शाङ्करभाष्यव्याख्या निर्मिता – इत्युन्नीयते। यत्कारणम् अत्र निर्दिष्टेषु निबन्धेषु पूर्वपूर्वस्मिन् उत्तरोत्तरग्रन्थपरामर्शो न दृश्यते ॥

अनेन नैकशास्त्रपारदृश्वाऽत्रभवान् श्रीवाचस्पतिमिश्रः व्याचिख्यासिततत्तत्प्रस्थानप्रेमाविष्टः स्वोदाहृतमूलग्रन्थवाक्यान्यपि व्याख्येयग्रन्थानुगुण्येन क्वचिद् विपरिणमयन् दृश्यते। तद्यथा 'गुणानां परमं रूपं न दृष्टिपथमृच्छति। यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकम् ॥' इतीदं **वार्षगण्यवचनं** 'मायेव न तु माया। सुतुच्छकम्–विनाशि। यथा हि माया अह्नायैव अन्यथा भवति, एवं विकारा अपि आविर्भावतिरोभावधर्माणः प्रतिक्षणम् अन्यथा। प्रकृतिर्नित्यतया मायाविधर्मिणी परमार्था' इति

तत्त्ववैशारद्याम् (यो. सू. भा. १८८) लिखितवतीमेव लेखिनीं 'तन्मायैव सुतुच्छकम्' इति पाठान्तरं प्रकल्प्य 'योगं व्युत्पिपादयिषता निमित्तमात्रेण इह गुणा उक्ताः, न तु भावतः। तेषाम् अतात्त्विकत्वात् इत्यर्थः॥' इति भामत्याम् (वा. भा. २–१–३, पा. ४३८) गुणानामतात्त्विकत्वं स्फोरयितुं व्यापारितवान्। आत्मनैवान्यत्र परमार्थत्वेन वर्णिता प्रकृतिः, कथं वार्षगण्यवचनपाठमेवादृत्यैवमत्र तद्वैपरीत्येन स्वीकृता इति तु विस्मयते विमर्शकानां मनः॥

भामतीप्रस्थानस्य स्थानं वेदान्ते –

१८१. भामतीग्रन्थप्रणयनकाले भास्करप्रस्थानं केवलाद्वैति-प्रस्थानाभिभवपूर्वकं बहुत्र लब्धप्रचारमासीदिति गम्यते। यतो वाचस्पति-मिश्रैरद्वैते भास्करोत्थापितानां दोषाणामुद्धारे भेदाभेदवाददोषोद्घाटने च बलवान् प्रयत्नः कृतो दृश्यते। एतद्दृष्ट्या, अद्यापि भास्करप्रभावित-भाष्यान्तरेषु दरीदृश्यमानाक्षेपान् उद्दिधीर्षूणामद्वैतिनां भामत्यवलोकनम् उपकारकं भवेत्। वेदान्तप्रक्रियां प्रत्यभिजिज्ञासूनां कियदत्र साहाय्यं भवेदिति दृष्ट्यैव त्वत्र प्रस्थानमिदं परीक्ष्यते॥

किञ्च, शाङ्करभाष्यटीकापदेशेनात्र बहुषु स्थलेषु मण्डनाभिप्राया एव भाष्यकारीयत्वेन प्रत्युपस्थापिता दृश्यन्ते। ब्रह्मतत्त्वसमीक्षाया अद्यापि मुद्रणद्वारेण नेत्रपथमनानीताया अल्पावशेषा भामत्यामेव दृग्गोचरीभवन्ति। यद्यपि सुरेश्वरवार्तिकेऽपि, विशेषतः संबन्धवार्तिके, मण्डनाभिप्राया ग्रन्थ-शरीरे यत्किञ्चिदक्षरविपरिणामपूर्वकं प्रवेशिताः सन्ति, तथापि मण्डन-प्रस्थानप्रवाहमपि शङ्करप्रस्थानविचारधारायां गङ्गायामिव यमुनास्रोतस्विनीं मिथुनीकृत्याभिनवमेव प्रस्थानं लोके प्रप्रथमं प्रसार्य जिज्ञासुजनचित्ताकर्षणं भामत्यैव कृतम्। अपि च पञ्चपादिकायामनुपलभ्या नैके उपदेशविशेषा भामत्यामेव शक्योपलम्भनाः। भामत्या प्रभाविता बहवो विद्वांसः

स्वव्याख्यानोपव्याख्यानैस्तामलञ्चक्रिरे । अतो भाष्यप्रस्थानद्वारेण वेदान्त-प्रक्रियानिर्दिधारयिषूणाम् अवश्यविजिज्ञास्या संजाता भामती ॥

भामतीप्रस्थाने अविद्याद्वयम् –

१८२. ग्रन्थारम्भश्लोकेनैव आचार्यवाचस्पतिमिश्रः, अविद्या-मेवमुपनिबध्नाति –

(१) 'अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्ता यस्यैते वियदनिलतेजोऽबवनयः'

इति । अत्र अविद्याद्वितयम् अनिर्वचनीयमिति प्रतिज्ञातम् । 'कार्यकारणा-विद्याद्वयम्' इति पदेपदे भामत्यां परामर्श उपलभ्यते । तद्यथा –

(२) 'कार्यकारणाविद्याद्वयाधारोऽहङ्कारास्पदं संसारी' (वा. भा. पा. ४५)[1] । 'अविद्याद्वयप्रतिबन्धापनयमात्रेण च विद्याया मोक्षसाधन-त्वम्' (पा. १२१), 'द्विधाऽविद्यातमः' (पा. १०२०) ॥

एवं लयविक्षेपाभिधानाभ्यां चाविद्याद्वितयं परामृष्टमत्र । तद्यथा –

(३) स्वच्छतारूपमिव रूपमस्येति स्वच्छतारूपः, न तु स्वच्छतैव । लयविक्षेपसंस्कारयोस्तत्र भावात् (वा.भा. पा. ४०९), 'यदा तु लयलक्षणा-विद्योपबृंहितो विक्षेपसंस्कारः समुदाचरति, तदा विशेषविज्ञानोत्पादात् स्वप्नजागरितावस्थातः, परमात्मनो रूपाद् भ्रंशरूपमागमनम् । (वा.भा. पा. ४१०), 'न चाविद्या केवला' इति लयाभिप्रायम् (पा. ४८४), कारणभूतया लयलक्षणया अविद्यया प्राक्सर्गोपचितेन च विक्षेपसंस्कारेण यत् प्रत्युपस्थापितं नामरूपं तदेव माया (पा. ४९४) ॥

(४) प्रत्यगात्मनि अनात्माध्यास एव सर्वानर्थहेतुः, न पुना रजतादिविभ्रमा इति स एवाविद्या ॥ वा. भा. पा. ४०.

(५) अध्यासो भेदाग्रहेण व्याप्तः (पा. ८); 'इतरेतराविवेकेन' विवेकाग्रहेण – इत्यर्थः ॥ पा. १६.

---

1. वा. भा. इति सङ्केतेन परामृष्टपत्रपृष्ठानि निर्णयसागर (1917) मुद्रित वाचस्पतिमिश्रकृतभामतीपुस्तकस्थानीति बोध्यम् ॥

यथोदाहृतवाक्यैरिदमभ्यूहितुं शक्यते यद् ब्रह्मसिद्धाविवात्रापि अग्रहणविपरीतग्रहणलक्षणे एव द्वे अविद्ये स्वीकृते इति । यतो ब्रह्मसिद्धावपि एते एव लयविक्षेपसंज्ञाभ्यां निर्दिष्टे दृश्येते –

(६) अथ मतम् – द्विप्रकारेयम् अविद्या प्रकाशस्याच्छादिका विक्षेपिका च ; स्वप्नजागरितयोर्विक्षेपिका, सुषुप्ते आच्छादिका लयलक्षणा । तत्राच्छादिकाविद्यानिवृत्तिर्ज्ञानविधेः फलम् । तच्चासत् ; यतो नाच्छादिकाया अविद्याया निवृत्तिः पुरुषेणार्थ्यते तथा, यथा विक्षेपस्य ; स हि विविधदुःखात्मकः । लयस्तु विविधदुःखनिवृत्तेरसकृदानन्दत्वेन श्रुतौ गीतः प्रत्युतार्थनीयः स्यात् । अपि च विपर्यासमनिच्छतोऽविद्याभेद एव न स्यात्, अवस्थात्रयेऽप्यग्रहणमात्रत्वात् । तस्मादग्रहणविपर्ययग्रहणे द्वे अविद्ये कार्यकारणभावेनावस्थिते ॥ ब्र. सि. पा. 149.

अत्राभावरूपैवाविद्या लयलक्षणत्वेन व्यपदिष्टा, कारणत्वेन च – इति स्पष्टम् । तस्मात्, भामत्यामपि अग्रहणविपर्ययावेव लयविक्षेपापरपर्यायौ अनिर्वाच्याविद्याद्वितयशब्देन विवक्षितौ–इत्यभ्यूहितुं शक्यते ॥

परं तु भामतीप्रस्थाने पञ्चपादिकोपात्ताविद्याशक्तिशब्दोऽपि तत्र तत्र प्रयुक्तो दृश्यते ब्रह्मसिद्धौ शाङ्करभाष्ये वा क्वचिदप्यदृष्टचरः । तत्र कानिचिद् वचनान्येतच्छब्दगर्भितान्युदाहरिष्यामः –

(१) तेन 'सदैक्षत' इत्यादौ उपचर्यतां ब्रह्मणो जगद्योनिता अविद्याशक्त्याश्रयत्वेन, इह तु अविद्याशक्तेरेव जगद्योनित्वसंभवेन न द्वारद्वारिभावो युक्तः इति प्रधानमेवात्र वाक्ये जगद्योनिरुच्यत इति पूर्वः पक्षः ॥

वा. भा. पा. २५६.

[अत्र प्रकृतिरेव 'अविद्याशक्ति'शब्दव्यपदिष्टा इति स्पष्टम् ॥]

(२) यद्यपि महाप्रलयसमये नान्तःकरणादयः समुदाचरद्वृत्तयः सन्ति, तथापि स्वकारणेऽनिर्वाच्यायाम् अविद्यायां लीनाः ; सूक्ष्मेण शक्तिरूपेण कर्मविक्षेपकाविद्यावासनाभिः सहावतिष्ठन्त एव ॥

वा. भा. पा. ३३३

[अत्रापि यस्यामविद्यायामन्तःकरणादयो लीनाः, सैव प्रकृत्याख्या लयलक्षणा अविद्या – इति गम्यते ॥]

(३) ब्रह्मणस्त्विय मविद्याशक्तिर्मायादिशब्दवाच्या न शक्या तत्त्वेनान्यत्वेन वा निर्वक्तुम् । इदमेवास्या अव्यक्तत्वं यदनिर्वाच्यत्वं नाम । सोऽयमव्याकृतवादस्य प्रधानवादाद् भेदः ॥ वा. भा. पा. ३७७.

[इह सुस्पष्टं यदव्याकृताख्या जगत्प्रकृतिरेवाविद्याशक्तिशब्दवाच्या इति ॥]

उपरिनिर्दिष्टैर्वाक्यैः पञ्चपादिकावदेवात्रापि जगत्प्रकृतिरविद्याशक्तिशब्देन व्यपदिश्यत इत्यवगम्यते । तत्र किमग्रहणम् अध्यासलक्षणाविद्यानिमित्तभूतं कारणाविद्याशब्देन न व्यपदिश्यते ? किं सापि ब्रह्मसिद्धयुक्तप्रकारेण लयलक्षणाविद्यात्वेनाभ्युपगम्यते—इत्येतत्तु न स्पष्टतया कुत्राप्युक्तं भामत्याम् ॥

अध्यासलक्षणम् –

१८२. भाष्ये अध्यासलक्षणं 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति वाक्येन निर्दिष्टमत्र न पञ्चपादिकावत् प्राधान्येनार्थाध्यासपरतया व्याख्यातम् –

(१) अवसन्नोऽवमतो वा भासोऽवभासः । प्रत्ययान्तरबाधश्च अस्य अवसादोऽवमानो वा । एतावता 'मिथ्याज्ञानम्' इत्युक्तं भवति ॥

वा. भा. पा. १८.

अत्र अध्यासो मिथ्याज्ञानम् – इति व्याख्यानात् ज्ञानाध्यासस्यैव प्रामुख्यता गम्यते । अत एव 'मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य अहमिदम् ममेदम्—इति नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यवाक्यम्, मिथ्या च तदज्ञानं च' इति पञ्चपादिकानुसारेण न विगृहीतम् । न चाध्यास एव व्यवहार इति पञ्चपादिकामतमनुसृतम् –

(२) मिथ्याज्ञानम् अध्यासः, तन्निमित्तः । तद्भावाभावानुविधानाद् व्यवहारभावाभावयोः—इत्यर्थः । तदेवम् अध्यासस्वरूपं फलं च व्यवहारम् उक्त्वा तस्य निमित्तमाह – इतरेतराविवेकेन । विवेकाग्रहेणेत्यर्थः ॥

वा. भा. पा. १६.

अत्राध्यासस्य मिथ्याज्ञानत्वमेवोररीकृतम् । लक्षणवाक्यशेषव्याख्यानेन त्वारोपणीयस्य अनिर्वचनीयत्वं विशदीकृतम् –

(३) पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः। मिथ्याप्रत्ययश्च आरोपविषया-(?)रोपणीयस्य मिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेन अनृतमारोपणीयम् उपस्थापयति। तस्य च दृष्टत्वमात्रम् उपयुज्यते न वस्तुसत्ता-इति दृष्ट-ग्रहणम्। तथापि वर्तमानं दृष्टं दर्शनं नारोपोपयोगीति 'पूर्व' इत्युक्तम्। तत्र पूर्वदृष्टं स्वरूपेण सदपि आरोपणीयतया अनिर्वाच्यम् इत्यनृतम्। आरोप-विषयं सत्यमाह – परत्रेति। परत्र शुक्तिकादौ परमार्थसति। तदनेन सत्यानृतमिथुनमुक्तम्॥ वा. भा. पा. १८.

अध्यासस्यासंनिहितविषयत्वं चाह लक्षणवाक्यव्याख्यानव्याजेन–

(४) स्मृते रूपमिव रूपम् अस्येति स्मृतिरूपः। असंनिहित-विषयत्वं च स्मृतिरूपत्वम्॥ वा. भा. पा. २०.

अर्थाध्यासविचारः –

१८३. तदेवम् अध्यासस्य ज्ञानप्राधान्येनैव लक्षयन्त्यां भामत्याम् अर्थाध्यासो विस्मृत इति तु न शङ्क्यम्। यत आह –

(१) हन्त तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तावन्न सत्। तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेः। नाप्यसत्। वस्त्वन्तरमेव हि वस्त्वन्तरस्य असत्त्वमास्थीयते। 'भावान्तरमभावोऽन्यो न कश्चिद-निरूपणात्' इति वदद्भिः। न चारोपितं रूपं वस्त्वन्तरम्। तद् हि मरीचयो वा भवेत्, गङ्गादिगतं तोयं वा। पूर्वस्मिन् कल्पे मरीचय इति प्रत्ययः स्यात्, न तोयमिति। उत्तरस्मिंस्तु गङ्गायां तोयमिति स्यात्, न पुनः 'इह' इति। देशभेदास्मरणे 'तोयम्' इति स्यात्, न पुनः 'इह' इति। न च इदमत्यन्तमसत्, निरस्तसमस्तस्वरूपम्, अलीकमेवास्तु-इति सांप्रतम्। तस्यानुभवगोचरत्वानुपपत्तेरित्युक्तमधस्तात्। तस्मात् न सत्, नाप्यसत्; नापि सदसत्, परस्परविरोधात् – इत्यनिर्वाच्यमेवारोपणीयं-मरीचिषु तोयमास्थेयम्। तदनेन क्रमेणाध्यस्तं तोयं परमार्थतोयमिव, अत एव पूर्वदृष्टमिव; तत्त्वतस्तु न तोयम्, न च पूर्वदृष्टम्। किं तु अनृतमनिर्वाच्यम्॥ वा. भा. पा. २३–२४.

अध्यासलक्षणस्य लक्ष्येषु समन्वयः –

१८४. उक्तलक्षणस्य स्वप्नज्ञानादावपि व्याप्तिर्दर्शिता भामत्याम् –

(१) स्वप्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात् । तत्रापि हि स्मर्यमाणे पित्रादौ निद्रोपप्लववशादसंनिधानापरामर्शे तत्र तत्र पूर्वदृष्टस्यैव संनिहितदेशकालत्वस्य समारोपः ॥ पा. २०–२१.

[अत्र 'पूर्वदृष्टस्यैव' इत्यवधारणं किं तात्पर्येण, उत नेति विमर्शनीयम् । यत अधस्तादुदाहृतमरीचितोयवाक्ये 'तत्त्वतस्तु न तोयं न च पूर्वदृष्टम्' इत्युक्तमस्ति ॥]

(२) एवं 'पीतः शङ्खः', 'तिक्तो गुडः' इत्यत्राप्येतल्लक्षणं योजनीयम् । तथा हि बहिर्विनिर्गच्छद्व्यच्छनयनरश्मिसंपृक्तपित्तद्रव्यवर्तिनीं पीततां पित्तद्रव्यरहितामनुभवन्, शङ्खं च दोषाच्छादितशुक्तिमानमनुभवन्, पीततायाश्च शङ्खासंबन्धमननुभवन्, असंबन्धाग्रहणसारूप्येण 'पीतं तपनीयपिण्डम्', 'पीतं बिल्वफलम्' इत्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोरारोप्याह 'पीतः शङ्ख' इति । एतेन 'तिक्तो गुड' इति प्रत्ययो व्याख्यातः ॥
वा. भा. पा. २१.

(३) एवं विज्ञातृपुरुषाभिमुखेषु आदर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा सौर्येण तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंयुक्तं मुखं ग्राहयत्, दोषवशात् तद्देशताम् अनभिमुखतां च मुखस्याग्राहयत्, पूर्वदृष्टाभिमुखादर्शोदकदेशताम् अभिमुख्यं च मुखस्य आरोपयतीति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति ॥ पा. २१.

[तदेतत् पञ्चपादिकास्थवर्णनेन (पं. पा. २३) विरुध्यत इव ॥]

(४) एतेन द्विचन्द्रदिङ्मोहालातचक्रगन्धर्वनगरवंशोरगादिविभ्रमेष्वपि यथासंभवं लक्षणं योजनीयम् ॥ वा. भा. पा. २१.

अत्र सर्वत्राध्यासस्य मिथ्याज्ञानत्वं लोकसिद्धं दृष्टान्तत्वेन वेदान्ताभियुक्तैः प्रपञ्चाध्यासस्य जिज्ञासुहृदयारोपणार्थमादर्शितमिति सर्वसंप्रतिपन्नम् । तद् विहाय मिथ्याज्ञानं केन प्रकारेण जायते इत्येतद् विशदयितुं तत्र सर्वत्रापि स्वाभिमतानिर्वचनीयख्यातिं प्रदर्शयितुं च किमिति वृथा प्रयस्यत इति न विद्मः । मण्डनमिश्रेण (ब्र. सि. 138–147)

विपरीतख्यातिस्थापनार्थं प्रयुक्ता युक्तयोऽत्र बाहुल्येन दृश्यन्ते। पञ्चपादिकायां (पा. ९, १०) वितत्यदर्शितस्य कारणत्रितयजन्यत्वरूपाध्यासलक्षणस्य परामर्शो नैवास्तीति तु स्फुटमेव ॥

एवमेव 'तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति' इत्यारभ्य मतान्तरोपन्यासं भाष्ये कृतं व्याजीकृत्य यः ख्यातिबाधविचारोऽत्र प्रतानितः, तस्यापि परमप्रकृतप्रक्रियानिर्धारणप्रयत्नेऽनुपयोगात् फल्गुप्रयोजनत्वाच्च न समालोचनमिह क्रियते। तत्र वाचस्पतिमिश्राभिप्रायस्तु एकस्मिन् वाक्ये संगृह्य प्रदर्शितः –

(५) स चायमेवंलक्षणकोऽध्यासोऽनिर्वचनीयः सर्वेषामेव संमतः परीक्षकाणाम्, तद्भेदे परं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढयितुमाह ॥
वा. भा. पा. २५.

भाष्यकृदेवोत्तरत्र स्वाशयं संगृह्य दर्शयत्यध्यासविषये – "अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम" इति। तत्र भामतीकारोऽप्याह –

(६) 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इत्यस्य संक्षेपाभिधानमेतत् ॥ वा. भा. पा. ४४.

इति। तत्रैवं स्थिते किमित्यध्यासस्यानिर्वचनीयत्वमत्र विवक्षितमित्यधिकावापः क्रियत इति न जानीमः। यद्यपि भाष्यकृन्मतेऽपि सर्वमनात्मभूतम् आत्मत्वतदन्यत्वाभ्यामनिर्वचनीयमिति स्वीकृतमेव, तथापि तदेतदत्रोल्लिख्य न कथनमर्हति। 'आत्मनि सर्वमध्यस्तम्' इत्युक्तेनैव सर्वेष्टसिद्धेः। भामत्यां तु अनिर्वचनीयवादस्य प्रामुख्यं जिज्ञासूनां लक्ष्ये पदे पदे आनीयते। अत एव 'अध्यासो मिथ्याप्रत्ययरूपः' इति भाष्यवाक्यस्य विवरणावसरे एवं लिखितम् –

(७) मिथ्याप्रत्ययानां रूपम् अनिर्वचनीयत्वम्। तद् यस्य स तथोक्तः। अनिर्वचनीय इत्यर्थः ॥ वा. भा. पा. ४५.

भाष्यप्रस्थाने हि 'सर्वोऽप्यब्रह्मप्रत्ययो मिथ्या' इत्यस्य ब्रह्मैवेदं परमार्थतः – इत्येवाभिप्रायः। न पुनः प्रत्ययस्य मिथ्यात्वं नाम कश्चन धर्मोऽपि विवक्ष्यते। यथोक्तं छान्दोग्यभाष्ये –

'सत एव द्वैतभेदेन अन्यथा गृह्यमाणत्वान्नासत्त्वं कस्यचित् क्वचित्– इति ब्रूमः' छां. भा. ६-२-३, पा. ५१०

इति । अतोऽनिर्वचनीयत्वनिर्धारणेन किमत्राधिकं लभ्यत इति न विद्मः ॥

अध्यासानादिता –

१८५. उक्तमेतत्, यद् भामतीप्रस्थाने न केवलम् अग्रहण-मिथ्याज्ञाने अविद्याशब्देन व्यवह्रियेते, किं तु जगतो बीजशक्तिरपि तच्छब्देन तत्र तत्र व्यपदिश्यत इति (पा. ३९८ द्वितीयम् उदाहरणम्) । तेनाध्यासस्यापि सा अविद्याशक्तिरुपादानम् इति पञ्चपादिकायामिवात्रापि स्वीकृतेत्यर्थादाप्नोति । तथासमुल्लिख्यवचनं तु भामत्यां नोपलभ्यत इत्यन्यत् । यद्ययं तर्कः समीचीनः, तर्हि अध्यास एवाविद्या, तस्य शक्तिरूपमेव च लयलक्षणाविद्या–इत्युक्तं भवति वाचस्पतिमिश्रैः । तदा तु भाष्यकारीयप्रस्थानात् विलक्षणमेवेदं भामतीदृष्टमध्याससतत्त्वमित्यपि प्राप्नोति । यतोऽव्याकृतादिशब्दवाच्यजगद्बीजशक्तिकार्यत्वादध्यासस्य अनादित्वं भाष्योक्तं न तदा निरुपचरितमङ्गीकृतं भवेत् ॥

(१) एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ॥

इति हि भाष्यम् । यद्यपि भामत्यामपि भाष्यवाक्यमेतत् –

(२) अनाद्यनन्तत्वे हेतुरुक्तः, 'नैसर्गिक' इति ॥ वा. भा. पा. ४५

इति व्याख्यातम् । तथा चाध्यासस्यानादित्वमप्युररीकृतमिव तत्र, तथाप्येतत्प्राक्तनवाक्ये –

(३) तदनेन अन्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः, कर्ता भोक्ता कार्यकारणाविद्याद्वयाधारोऽहङ्कारास्पदं संसारी सर्वानर्थसंभार-भाजनं जीवात्मा इतरेतराध्यासोपादानः, तदुपादानश्चाध्यासः – इत्यनादि-त्वात् बीजाङ्कुरवन्नेतरेतराश्रयत्वम् इत्युक्तं भवति ॥ वा. भा. पा. ४५.

इत्यनादित्वं गौणमेव, अध्यासजीवत्वयोर्बीजाङ्कुरन्यायेनानादित्वादित्युक्तम् ॥

एवं पूर्वमपि, युष्मत्प्रत्ययापेतत्वात् प्रत्यगात्मनोऽविषयत्वाङ्गीकारात् कथं तस्मिन् विषयतद्धर्माणामध्यासः ? – इत्याक्षेपसमाधानार्थं प्रवृत्तस्य 'न तावदयमेकान्तेनाविषयः, असत्प्रत्ययविषयत्वात्' इति वाक्यस्य व्याख्यानावसरे –

(४) न चाध्यासे सति विषयत्वम्, विषयत्वे चाध्यासः - इत्यन्योन्याश्रयत्वमिति सांप्रतम् । बीजाङ्कुरवदनादित्वात् । पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्य, उत्तरोत्तराध्यासविषयत्वाविरोधात् – इत्युक्तं 'नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यग्रन्थेन ॥ वा. भा. पा. ३९.

इति सर्वव्यवहारप्रवर्तकस्याप्यध्यासस्य क्वाचित्कत्वम्, अध्यासव्यक्तीनां कालाधारकत्वं बीजाङ्कुरदृष्टान्तानयनेन समापादितम् ॥

यद्यपि बीजाङ्कुरदृष्टान्तोऽयं पञ्चपादिकायामपि क्वचिदुपात्तः, तथापि भामत्यामिव वारं वारं स तत्र नैवानीतः । यथा 'नैसर्गिकोऽयं लोकव्यवहारः' इत्यत्रैव यथा –

(५) नैसर्गिक इति । स्वाभाविकोऽनादिरयं व्यवहारः । व्यवहारानादितया तत्कारणस्याध्यासस्यानादितोक्ता । ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रियशरीरादेरुत्तरोत्तराध्यासोपयोग इत्यनादित्वात् बीजाङ्कुरवत् । न परस्पराश्रयत्वमित्यर्थः ॥ वा. भा पा. १७.

अत्रेदमवधेयम् । व्यवहारे कालाधारणां बीजाङ्कुरादीनां संतत्यनादित्वं क्वचिद् यद्यप्यङ्गीक्रियते, तथापि शरीरादिसंघातधर्माधर्मादिविमर्शनस्थले स न्यायो नैवाञ्जसः । यथोक्तं भाष्ये –

(६) शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य च इतरेतराश्रयत्वप्रसङ्गादन्धपरम्परैषा अनादित्वकल्पना ॥ सू. भा. १-१-४, पा. २२.

इति । गौडपादीयकारिकास्वपि शरीरधर्माधर्मादिसंबन्धविचारप्रसङ्गे एव –

(७) बीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सः ।
न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ॥
गौ. का. ४-२०, पा. २३३.

[भाष्यं च 'यथा इदानीमुत्पन्नोऽपरोऽङ्कुरो बीजादादिमान्, बीजं च परम् अन्यस्मादङ्कुरादिति क्रमेणोत्पन्नत्वादादिमत्, एवं पूर्वः पूर्वोऽङ्कुरो बीजं च पूर्वं पूर्वम् आदिमदेवेति प्रत्येकं सर्वस्य बीजाङ्कुरजातस्य आदिमत्त्वात् कस्यचिदप्यनादित्वानुपपत्तिः, एवं हेतुफलयोः। अथ बीजाङ्कुरसंततेरनादित्वमिति चेत्। न। एकत्वानुपपत्तेः। न हि बीजाङ्कुरव्यतिरेकेण बीजाङ्कुरसंततिर्नामैका अभ्युपगम्यते हेतुफलसंततिर्वा तदनादित्ववादिभिः॥]

इति बीजाङ्कुरदृष्टान्तोऽपि प्रत्याख्यातः। सर्वत्रानादित्ववादप्रसङ्गे बीजाङ्कुरदृष्टान्तमानयन्तो मिश्राः कुतस्तद्युक्तिं न विमृष्टवन्तः—इति तु न ज्ञातम्॥

विशिष्य चाध्यासस्य सर्वव्यवहारप्रत्युपस्थापकस्य बीजाङ्कुरवद् व्यक्तित्वेन पौर्वापर्यकल्पनं न केवलमसमञ्जसम्, किं तर्हि अध्यारोपापवादप्रक्रियास्वरूपविपरिलोपकमपीति सर्वथा हेयम्, न ह्यात्मव्यतिरिक्तस्य सर्वस्यापि अनध्यस्तत्वे तदपह्नवेनात्मोपदेश उपपद्यते। मूलाध्यासविषयेऽपि हि शुक्तिरजताद्यध्यासवत् कालाधारकत्वकल्पने कालो नैवाध्यस्तः स्यात्, ततश्च 'अद्वैतम्' इति श्रुतिकृतो विशेषो नैव स्यादिति॥

अविद्याश्रयः –

१८६. अविद्याविषये भास्कराचार्यकृताक्षेपाः प्रागेवानूदिता अस्माभिः। तत्र 'कस्येयमविद्या? न तावज्जीवस्य वस्तुभूतस्य। तस्यानभ्युपगमात्, नापीश्वरस्य। (तस्य) नित्यविज्ञानप्रकाशत्वात् अज्ञानं विरुध्यते' (भा. सू. पा. ८२)—इत्यादिरूपेणाक्षेपे तत्परिहारार्थं भामत्यां मण्डनमिश्रप्रस्थानमेवानुसृतम् –

> (१) यत्तु कस्याविद्येति। जीवानामिति ब्रूमः। ननु न जीवा ब्रह्मणो भिद्यन्ते। .... सत्यं परमार्थतः; कल्पनया तु भिद्यन्ते। कस्य पुनः कल्पना भेदिका? न तावद् ब्रह्मणः। तस्य विद्यात्मनः कल्पनाशून्यत्वात्। नापि जीवानाम्, कल्पनायाः प्राक् तदभावात्, इतरेतराश्रयप्रसङ्गात्। ..... अनादित्वादुभयोरविद्याजीवयोर्बीजाङ्कुरसन्तानयोरिव नेतरेतराश्रयप्रक्लृप्तिमाहवति॥ (ब्र. सि. 10)

इति मण्डनमिश्रः॥

(२) नाविद्या ब्रह्माश्रया, किं तु जीवे। सा त्वनिर्वचनीया इत्युक्तम्॥
वा. भा. पा. १२६.

(३) अनाद्यविद्यावच्छेदलब्धजीवभावः पर एवात्मा स्वतो भेदेनावभासते। तादृशानां च जीवानाम् अविद्या। न तु निरुपाधिनो ब्रह्मणः। न चाविद्यायां सत्यां जीवात्मविभागः, सति च जीवात्मविभागे तदाश्रया अविद्या इत्यन्योन्याश्रयमि(य इ?)ति सांप्रतम्। अनादित्वेन जीवाविद्ययोर्बीजाङ्कुरवदनवक्लृप्तेरयोगात्॥ वा. भि. पा. २३५.

इति वाचस्पतिमिश्रः॥

अत्रोभयत्रापि मिश्रप्रस्थानं दोषमिश्रम्। अविद्याजीवयोरन्यतरस्यापि स्वेतरविरहेण–बीजस्येवाङ्कुरविरहेण – सत्त्वानुपलब्धेः। बीजाङ्कुरसंतानन्यायस्यैव यथोक्तरीत्या दोषग्रस्तत्वाच्च॥

(४) निरंशस्यापि चानाद्यनिर्वाच्याविद्यातद्वासनासमारोपितविविधप्रपञ्चात्मनः सांशस्येव कस्यचिदंशस्याग्रहणात् विभ्रम इव। परमार्थतस्तु न विभ्रमो नाम कश्चित्, न च संसारो नाम; किं तु सर्वमेतत् सर्वानुपपत्तिभाजनत्वेन अनिर्वचनीयमिति युक्तमुत्पश्यामः॥ वा. भा. पा. ९३८–९३९.

अत्राप्यविद्याया अनादित्वं स्वीकृत्यैव तद्बलाद् ब्रह्मणि सांशत्वमुपपादितमिति यथोक्तदोषस्तदवस्थः॥

अविद्यानानात्वम् –

१८७. 'अथ ब्रह्मैव संसरति ब्रह्मैव मुच्यते, एकमुक्तौ सर्वमुक्तिप्रसङ्गः' (ब्र. सि. 12) इति मण्डनमिश्रेण ब्रह्माश्रिताविद्यावादिनां पक्षो दूषितः। भास्कराचार्येण तु – "सा चाविद्या प्रतिपुरुषमेका वा अनेका वेति? यद्यनेका ततोऽर्थत्वं प्राप्नोति; तत्त्वान्यत्त्वाभ्यामनिर्वचनीयेति हीयते। एकत्वे च युगपत् सर्वमुक्तिप्रसङ्गः॥' (भा. सू. पा. २१९) इति जीवाश्रिताविद्यावादिपक्षोऽप्याक्षिप्तः। तत्र वाचस्पतिमिश्रोक्तः परिहारो द्वेधा –

(१) अविद्योपस्थापितानां बुद्ध्यादिसंघातानां भेदात् तत्तद्बुद्ध्यादिसंघातभेदोपधान आत्मा, एकोऽपि भिन्न इव, विशुद्धोऽप्यविशुद्ध इव। ततश्च, एकबुद्ध्यादिसंघातापगमे तत्र मुक्त इव, इतरत्र बद्ध इव। यथा मणिकृपाणाद्युपधानभेदादेकमेव मुखं नानेव दीर्घमिव वृत्तमिव श्याममिवावदातमिव, अन्यतमोपधानविगमे तत्र मुक्तमिव, अन्यत्रोपहितमिवेति नैकमुक्तौ सर्वमुक्तिप्रसङ्गः॥ वा. भा. पा. ६१७.

[एतदपि मण्डनमिश्रप्रस्थानमेव ब्र. सि. 11, 12]

अत्राविद्याया एकत्वं नानात्वं वा कण्ठतो नोक्तम्। तत्राविद्याया एकत्वे तन्नाशात् सर्वोपाधिनाश एव प्रसज्येतेति शङ्काप्रसङ्गनभयात् स्यात् द्वितीयः परिहारः –

(२) न वयं प्रधानवदविद्यां सर्वजीवेष्वेकाम् आचक्ष्महे येनैवमुपालभ्येमहि, किं त्वियं प्रतिजीवं भिद्यते। तेन यस्यैव जीवस्य विद्योत्पन्ना, तस्यैवाविद्या अपनीयते, न जीवान्तरस्य। भिन्नाधिकरणयोर्विद्याविद्ययोरविरोधात्॥ वा. भा. पा. ३७७, ३७८.

अत्र भास्करकृतम् आक्षेपान्तरम् 'यद्यनेका ततोऽर्थत्वं प्राप्नोति' इत्येतद् असारतया उपेक्षितमित्युन्नीयते। अत्राविद्यानानात्वकृतं वा जीवनानात्वम्, आहोस्वित् जीवनानात्वकृतं वा अविद्यानानात्वम् – इति शङ्काया भामत्या उत्तरम्, अनादित्ववादब्रह्मास्त्रमाश्रित्य –

(३) न च अविद्योपाधिभेदाधीनो जीवभेदः, जीवभेदाधीनश्चाविद्योपाधिभेदः – इति परस्पराश्रयादुभयासिद्धिरिति सांप्रतम्। अनादित्वाद् बीजाङ्कुरवदुभयसिद्धेः॥ वा. भा. पा. ३७८.

प्रपञ्चे अनेके जीवाः, प्रत्येकमेकैककार्यकरणसंघातावच्छिन्ना दृश्यन्त इति तन्मूलभूता अविद्या नाना भवितुमर्हति; एवं हि बन्धमोक्षादिव्यवस्था सुस्था भवेदिति कृत्वा अविद्यानानात्वमुररीकृतम् अस्मिन् प्रस्थाने। नानात्वमेव तावदविद्याप्रत्युपस्थापितम्, अतोऽविद्याया एकत्वनानात्वविकल्पनमसङ्गतम् – इति कस्मान्नालोचितमिति न विज्ञायते॥

अविद्यायाः कारणम् –

१८८. अविद्याया अनादित्वाङ्गीकारादेव स्यात्, तस्याः कारणगवेषणमत्र प्रस्थाने न क्रियते । परं तु अविद्याशब्दव्यपदेश्याध्यासस्य जीवस्य च बीजाङ्कुरन्यायेन प्रवाहतोऽनादित्वोक्तेः, जगत्प्रकृतेरविद्याशक्तिशब्देन व्यपदेशाच्च शक्योत्प्रेक्षणमिदं यद् भामतीकारा अपि पञ्चपादिकाकृत इवाध्यासस्याविद्याशक्त्युपादानकत्वं मेनिरे इति । तादृशोल्लिख्यवचनं तु नोपलभ्यतेऽत्र । जीवात्मा इतरेतराध्यासोपादानः, तदुपादानश्चाध्यासः' (वा. भा. पा. ४५) इति तु नोपादानकारणपरम् इति स्पष्टमेव । तस्मात्–

(१) न च अध्यासे सति विषयत्वम्, विषयत्वे चाध्यासः – इत्यन्योन्याश्रयत्वमिति सांप्रतम् । बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यासतद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधात् इत्युक्तम् 'नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यग्रन्थेन ॥ वा. भा. पा. ३९.

इति वदन्तोऽमी

(२) किं तर्हि निमित्तम् ? अनादिरप्रयोजना चाविद्या – इत्युक्तम् । तत्र च हेत्वनुयोगो निरवकाशः । विपर्यासतत्संस्कारयोश्च परस्परहेतुफलभावेन व्यवस्थानान्न दोषः ॥ ब्र. सि. पा. 33

इति मण्डनोक्तिमेवात्राप्यनुसरुः – इति मन्तुमुचितं भाति ॥

प्रमाणप्रमेयव्यवहारस्याविद्यकत्वम् –

१८९. 'तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः। सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि' इति भाष्यवाक्यमेवं व्याख्यातं भामत्याम् –

(१) यदुक्तं 'सत्यानृते मिथुनीकृत्य विवेकाग्रहादध्यस्य अहमिदं ममेदम् – इति लोकव्यवहारः' इति, तत्र व्यपदेशलक्षणो व्यवहारः कण्ठोक्तः; इतिशब्दसूचितं लोकव्यवहारमादर्शयति 'तमेतमविद्याख्यमिति' इति ॥ वा. भा. पा. ४०.

व्यवहारशब्देनैव प्रत्ययव्यपदेशादिः सर्वोऽपि व्यवहारोऽत्र विव्रियत इति कुतो न व्याख्यातमिति न विज्ञायते ॥

'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ?' इति भाष्योत्थापितशङ्कातत्परिहारग्रन्थौ प्रायशः पञ्चपादिकानुसारेणैवात्र व्याख्यातौ । तत्र निगमनमित्थं कृतम् –

(२) तस्मात्, इतरेतराध्यासात् चिदात्मकर्तृस्थं प्रमाफलं सिध्यति, तत्सिद्धौ च प्रमातृत्वम् । तामेव प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः । प्रमातृत्वेन च प्रमा उपलक्ष्यते । प्रमायाः फलस्याभावे प्रमाणं न प्रवर्तेत । तथा च प्रमाणमप्रमाणं स्यादित्यर्थः ॥ वा. भा. पा. ४२.

अत्र 'प्रमाणानि कथमविद्यावद्विषयाणि ? नाविद्यावन्तं प्रमाणान्याश्रयन्ति । तत्कार्यस्य विद्याया अविद्याविरोधित्वात् ।' इति, तत्पूर्वम् 'तत्त्वपरिच्छेदो हि प्रमा विद्या, तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि ?' इति च स्वोत्थापितशङ्काद्वयपरिहारत्वेनैव भाष्यग्रन्थो योजितः । भाष्ये तु 'प्रमाणप्रमेयव्यवहारप्रवृत्तिमात्रम् अविद्यापुरःसरमिति कथम् ?' इति शङ्कैव प्राधान्येन कृता, न पुनः प्रमाविषये, प्रमाणवृत्तविषये वा आक्षेपः--इति प्रस्थानयोर्वैलक्षण्यं स्फुटम् । प्रमातृत्वमेव ह्यविद्यापुरःसरम्, तन्निवृत्त्यर्थमेव च शास्त्रप्रवृत्तिः – इति भाष्याशयो नानेन स्फुटितं भवेद् । तथाहि भाष्यम् –

(३) न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाणि, अप्रमातृकाणि च प्रमाणानि भवितुमर्हन्ति ॥ सू. भा. १-१-४, पा. २३.

[अत्र 'प्रमातृत्वाभावे न केवलं प्रमाणप्रवृत्तिर्नास्तीति, यावत् प्रमाणानां प्रमाणत्वमेव न संभवतीत्युक्तम् ॥]

(४) सिद्धे ह्यात्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति ॥
गी. भा. २-१८, पा. १६.

[अत्रापि प्रमातृत्वसिद्धिपुरःसरमेव प्रमाणप्रवृत्तेरात्मलाभः – इति सूचितम् ॥]

(५) प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्त्यं प्रमाणम् ॥
गी. भा. २-६९, पा. ३९.

[अत्रापि प्रमातृत्वमेव शास्त्रजन्यज्ञानेन प्राधान्येन निवर्त्यम्, तन्निवृत्तिनान्तरीयकी तु प्रमाणप्रमेयव्यवहारनिवृत्तिरित्युक्तम् ॥]

शास्त्रप्रामाण्यम् –

१९०. 'शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धमधिक्रियते, तथापि न वेदान्तवेद्यम्, ... असंसार्यात्मतत्त्वम् अधिकारेऽपेक्ष्यते । अनुपयोगात्, अधिकारविरोधाच्च । प्राक्च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रम् अविद्यावद्विषयत्वं नातिवर्तते' इति भाष्यम्, कर्मशास्त्रस्यापि अविद्यापुरःसरैव प्रवृत्तिरित्युपपादयितुं प्रवृत्तम् इति स्फुटम् । 'अविद्यावद्विषयत्वं नातिवर्तते' इत्युपसंहारात् । भामत्यां तु अविद्यापुरःसरत्वोपपादनं विहाय शङ्कान्तरोत्तरत्वेनैव वाक्यमिदं योजितम्

(१) यद्यपि विरोधानुपयोगाभ्याम् औपनिषदः पुरुषोऽधिकारे नापेक्ष्यते, तथापि उपनिषद्भ्योऽवगम्यमानः शक्तोत्यधिकारं निरोद्धुम् । तथा च परस्परोहतार्थत्वेन कृत्स्न एव वेदः प्रामाण्यम् अपजह्यादित्यत आह– प्राक्च तथाभूतात्मेति ॥ वा. भा. पा. ४४.

इति । नेह भाष्ये शास्त्रप्रामाण्यापहानिः शङ्क्यत इति प्रकरणालोचनयैव सिध्यति । स्वात्मानं कर्तृभोक्तृरूपं मत्वैव प्रवर्तते कर्मणि ; सा च कर्तृत्वभोक्तृत्वमतिरध्यासपुरःसरैवेत्यविद्यावन्तमेव पुरुषं बोधयितुं प्रवृत्तं शास्त्रम्–इति खलु भाष्याशयः । तथा व्याख्यानमेव तु प्रकृतानुसारि वेदान्तप्रक्रियानुगुणं च, न तु वेदप्रामाण्यस्थापनपरत्वेन व्याख्यानमिति । एतदेव च ग्रन्थकारेणाप्यनुसृतं प्रतिज्ञावाक्यव्याख्यानावसरे –

(२) तस्मात्, अनाद्यविद्यालब्धकर्तृत्वभोक्तृत्वब्राह्मणत्वाद्यभिमानिनं नरम् अधिकृत्य विधिनिषेधशास्त्रं प्रवर्तते ॥ वा. भा. पा. ४३.

इति। एवं वेदान्तशास्त्रमप्यविद्यां पुरस्कृत्यैव प्रवृत्तमिति साधु लिखितमत्र–

(३) एवं वेदान्ता अपि, अविद्यावत्पुरुषविषया एव। न हि प्रमात्रादिविभागादृते तदर्थाधिगमः। ते तु, अविद्यावन्तम् अनुशासन्तो (?) निर्मृष्टनिखिलाविद्यमनुशिष्टं स्वरूपे व्यवस्थापयन्ति – इत्येतावानेषां विशेषः। तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धम्॥ वा. भा. पा. ४३.

[अध्यारोपापवादप्रक्रियया अविद्यापनयनार्थं शास्त्रप्रवृत्तिरिति यावत्॥]

अध्यासभाष्ये 'युष्मदस्मत्प्रत्ययगोचरयोः' इत्यारभ्य 'मिथ्येति भवितुं युक्तम्'–इत्येतदन्तं भाष्यभागं आत्मतत्त्वस्य 'अहम्' इत्यसन्दिग्धाविपर्यस्तापरोक्षानुभवसिद्धत्वात्, विषयतद्धर्माणां भिन्नत्वेन स्फुटतरग्रहणात् नास्ति तयोर्मिथोऽध्यास इत्येवंपरतया व्याख्याय तदुत्तरग्रन्थो यथोक्तपूर्वपक्षपरिहारेण सिद्धान्तोपस्थापनपरतया योजितः। तत्रेदमुक्तम्–

(४) भवेदेतदेवं यद्यहम् इत्यनुभवे आत्मतत्त्वं प्रकाशेत, न त्वेतदस्ति। तथा हि – समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसम् उदासीनमेकम् अद्वितीयम् आत्मतत्त्वम् श्रुतिस्मृतीतिहासपुराणेषु गीयते। न चैतानि, उपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेणेदृगात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम्। अभ्यासे हि भूयस्त्वमर्थस्य भवति। यथा 'अहो दर्शनीया, अहो दर्शनीया!' इति। न न्यूनत्वम्, प्रागेवोपचरितत्वमिति। अहमनुभवस्तु प्रादेशिकम् अनेकविधशोकदुःखादिप्रपञ्चोपप्लुतमात्मानम् आदर्शयन् कथमात्मतत्त्वगोचरः? कथं वा अनुपप्लवः? वा. भा. पा. ८–९.

अत्रेत्थं नः प्रतिभाति। यद्यप्यद्वितीयात्मतत्त्वं सर्वस्यात्मभूतं सर्वसाक्षि च शास्त्रैकगम्यम्, तथापि न शास्त्रप्रामाण्यं सिद्धवत्कृत्यैवात्मानात्माध्यासमुपपादयितुं प्रववृते भाष्यकार इति। तदेतत् कुतः? अध्यासपुरःसरत्वमेव हि सर्वप्रमाणप्रमेयव्यवहारस्य प्रदर्श्य, तस्यानर्थहेतोः प्रहाणाय सर्ववेदान्तानाम् अन्यप्रमाणभूतानामारम्भमुपपादयितुमध्यासभाष्यप्रणयनप्रयासः। तत् कथमध्यासापह्नववादिनं प्रत्यादावेव श्रुत्यादि-

वचनानि प्रमाणत्वेनानीय परिहरं वदेत् ? यदवसानात् सर्वप्रमाणानामपि प्रमाणत्वं सिध्येत्, तमनुभवं स्वयंप्रमाणमनुसृत्य ह्यत्राविद्याशङ्कापरिहारो वक्तव्य इति ॥

अत एवात्र वाक्यशेषे श्रुतिप्रत्यक्षयोर्विरोधे कतरस्य प्राबल्यमिति निर्णयाय प्रवृत्तिरप्यनवसरप्राप्तेति मन्महे वयम् –

(५) न च ज्येष्ठप्रमाणप्रत्यक्षविरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यम् उपचरितार्थत्वं च – इति युक्तम् । तस्यापौरुषेयतया निरस्तसमस्तदोषाशङ्कस्य बोधकतया स्वतःसिद्धप्रमाणभावस्य स्वकार्ये प्रमितावनपेक्षत्वात् । प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वात् तद्विरोधादनुत्पत्तिलक्षणम् अप्रामाण्यम् इति चेत्, न । उत्पादकाप्रतिद्वन्द्वित्वात् । न ह्यागमज्ञानं सांव्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहन्ति, येन कारणाभावान्न भवेत्, अपि तु तात्त्विकम् । न च तत्तस्योत्पादकम् । अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यवहारिकप्रमाणेभ्यस्तत्त्वज्ञानोत्पत्तिदर्शनात् । .... ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुः, न बाधकत्वे । रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात् । तदनपबाधने तदपबाधात्मनस्तस्योत्पत्तेरनुत्प(पप?)त्तेः । दर्शितं च तात्त्विकप्रमाणभावस्यानपेक्षितत्वम् । तथा च पारमर्षं सूत्रम् 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' (जै. ६-५-५४) इति । तथा 'पूर्वात् परबलीयस्त्वं तत्र नाम प्रतीयताम् । अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्' इति ॥

वा. भा. पा. ९-११.

अत्रत्या युक्तयः प्रायेण ब्रह्मसिद्धितर्ककाण्डावतरणिकाग्रन्थात् (ब्र. सि. 40-43) संगृहीताः । तत्र हि मीमांसान्यायमनुसृत्य पूर्वस्य प्रत्यक्षस्य दौर्बल्यम्, शब्दे निर्दोषत्वम्, शास्त्रबलादेव प्रत्यक्षादिषु दोषसंभवानुमानम्, देहात्माभिमानदृष्टान्तेन तन्निश्चयः, तेषां व्यावहारिकप्रामाण्यस्य तात्त्विकप्रामाण्यवता आगमेनानपबाधात् सावकाशत्वम्, शब्दस्य प्रमितिजनकत्वे प्रत्यक्षाद्यनपेक्षता–इत्यादिसर्वमिदं वितत्य प्रतिपादितम् ॥

तदेतत् सर्वमनुभवैकाधारेणाध्यासप्रदर्शनपरभाष्यव्याख्यानावसरे नाकाङ्क्षितमिति स्पष्टमेव । यस्तु मिश्रवर्याभ्यां शब्दस्य प्रत्यक्षाद्यपेक्षया

प्राबल्यस्थापनपन्थाः, तत्र तेनैव पथा प्रस्थितानां, किं वेदबाह्यधार्मिक-ग्रन्थानां प्रत्यक्षाद्यपेक्षया प्राबल्यं न प्राप्नोतीति तु प्रश्नान्तरं दुरुत्तरम् ॥

वेदस्य नित्यनिर्दोषत्वं तस्यापौरुषेयत्वमवष्टभ्यैव मीमांसकैः स्वीक्रियते। अत्रापि विधानान्तरेण तदेवापौरुषेयत्वं स्वीक्रियते। तद् यथा –

(६) सृष्टिप्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रत्यस्मादृशगुरुशिष्यपरम्परामविच्छिन्नाम् अनादिमाचक्षते। वैयासिकं तु मतमनुवर्तमानाः श्रुतिस्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यम्। पूर्वपूर्वसर्गानुसारेण तादृशतादृशानुपूर्वीविरचनात्। ... पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि। तच्च अस्माकमपि समानम् अन्यत्राभिनिवेशात्। न चैकस्य प्रतिभाने अनाश्वासः–इति युक्तम्। न हि बहूनामप्यज्ञानां विज्ञानां वा आशयदोषवतां प्रतिभाने युक्त आश्वासः। तत्त्वज्ञानवतश्च अपास्तसमस्तदोषस्य, एकस्यापि प्रतिभाने युक्त एवाश्वासः। सर्गादिभुवां प्रजापतिदेवर्षीणां धर्मज्ञानवैराग्यैश्वर्यसंपन्नानाम् उपपद्यते तत्स्वरूपावधारणम्; तत्प्रत्ययेन च अर्वाचीनानामपि तत्र संप्रत्ययः–इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वम्, शास्त्रस्य चापौरुषेयत्वम्, प्रामाण्यं चेति ॥

वा. भा. पा. ९९.

(७) स हि भगवान् यादृशं पूर्वस्मिन् सर्गे चकार शास्त्रम्, तदनुसारेणास्मिन्नपि सर्गे प्रणीतवान्। एवं पूर्वतरानुसारेण पूर्वस्मिन्, पूर्वतमानुसारेण च पूर्वतरे – इत्यनादिरयं शास्त्रेश्वरयोः कार्यकारणभावः ॥

वा. भा. २–१–२, पा. ४३६.

(८) तत्रेश्वरस्य न शास्त्रार्थज्ञानपूर्वा शास्त्रक्रिया, येनास्य कपिलादिवत् स्वातन्त्र्यं भवेत्। शास्त्रार्थज्ञानं चास्य स्वयमाविर्भवदपि न शास्त्रकारणतामुपैति। द्वयोरप्यपर्यायेणाविर्भावात् ॥ वा. भा. २–१–२, पा. ४३६.

ब्रह्मसिद्धौ (ब्र. सि. 82, 155) अपौरुषेयत्वं मीमांसकमतमनुसृत्यैव सिद्धवत्कृत्य विचारः प्रतानितः। पञ्चपादिकायां तु ब्रह्मणः शास्त्रयोनित्वे सापेक्षत्वं स्याद्वेदस्येत्याशङ्क्य –

"नन्वेवं सति बुद्धिपूर्वत्वात् सापेक्षं स्यात्। न स्यात्। ब्रह्मवदनादित्वात्। कूटस्थनित्यत्वाच्च। कथं पुनस्ततो जन्म? तत्परप्रन्त्रत्वाद् रज्जुसर्प-

वत् । तथा च श्रुतिः 'निःश्वसितमेतत्' इति । यथा अपेक्षारहितैव लोके निःश्वासप्रवृत्तिः, तथा अस्यापीति न सापेक्षतादोषः ॥ " पं. पा. ८२.

इत्येतावन्मात्रं संग्रहेणोक्तम् । अतो वाचस्पत्युपज्ञवेदं विस्तरेण शास्त्रयोनित्व-वेदापौरुषेयत्वयोरविरोधोपपादनं सूत्रभाष्यानुसारेणेति गम्यते ॥

तथा हि भाष्ये –

(१) तथा च मन्त्रवर्णः 'यज्ञेन वाचः पदवीयमायन् तामन्व-विन्दन्नृषिषु प्रविष्टाम्' इति स्थितामेव वाचमनुविन्नां दर्शयति ॥
सू. भा १-३-२९, पा. १२८.

(२) सत्यपि सर्वव्यवहारोच्छेदिनि महाप्रलये परमेश्वरानुग्रहादीश्वराणां हिरण्यगर्भादीनां कल्पान्तरव्यवहारानुसंधानोपपत्तेः । यद्यपि प्राकृताः प्राणिनो न जन्मान्तरव्यवहारमनुसंदधाना दृश्यन्त इति. तथापि न प्राकृत-वदीश्वराणां भवितव्यम् ॥ सू. भा. १-३-३०, पा. १२९

इति पूर्वकल्पस्थितानामेव वेदानाम् ऋषिभिरनुसंधानपूर्वकम् अनुविन्नत्व-मुक्तम् । बृहदारण्यकभाष्ये च –

(३) पुरुषनिःश्वासवदप्रयत्नोत्थितत्वात् प्रमाणं वेदः,, न यथान्यो ग्रन्थ इति ॥ बृ. भा. २-४-१०, पा. ७६६.

इतीत्थमेव प्रामाण्यमुक्तम् । परं तु वेदान्तप्रधानार्थविषये न वेदान्तवाक्यं केवलं वाक्यत्वेनैव प्रमाणमित्युदाह्रियते, किं तर्हि अद्वितीयात्मप्रति-पादकत्वेन अनाकाङ्क्षानुभवपर्यन्तत्वात् तदुपदेशजनितज्ञानस्येति भगव-त्पादैरुक्तमिहावधेयम् –

(४) प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः । कर्मफले हि स्वर्गादौ अनुभवानारूढे स्यादाशङ्का 'भवेद् वा न वा' इति । अनुभवारूढं तु ज्ञानफलम् 'यत् साक्षादपरोक्षाद् ब्रह्म' इति श्रुतेः । 'तत्त्वमसि' इति च सिद्धवदुपदेशात् ॥ सू. भा. ३-३-३२, पा. ४०७.

(५) अपि चान्यमिदं प्रमाणम् आत्मैकत्वस्य प्रतिपादकम्, नातः परं किञ्चिदाकाङ्क्ष्यमस्ति ॥ सू. भा. २-१-१४, पा. १९९.

यदपि 'अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य' इति भाष्यवाक्य-व्याख्यानावसरे भामत्युक्तम् –

(६) सर्वमेव हि वाक्यं नेदंतया वस्तुभेदं बोधयितुमर्हति। न हीक्षुक्षीरगुडादीनां मधुररसभेदः शक्य आख्यातुम्। एवमन्यत्रापि सर्वत्र द्रष्टव्यम्। तेन प्रमाणान्तरसिद्धे लौकिके एवार्थे यदा गतिरीदृशी शब्दस्य, तदा कैव कथा प्रत्यगात्मन्यलौकिके? वा. भा. १–१–४, पा. १२५

इति, तद्भाष्याशयासंस्पर्शीति मन्महे। न हीक्षुक्षीरादीनां मधुररसभेद-वाचकशब्दः कस्यचिज्झटिति न स्फुरतीत्येतावता शब्दाविषयत्वं तद्भेदा-नाम्। शब्दप्रवृत्तिनिमित्तवन्त एव हि ते भेदाः स्वभावतः। प्रत्यगात्मा त्वलौकिक इति हेतोरेव केवलात् शब्दागम्यः। न हि भगवतो वेदस्य सर्वज्ञकल्पस्य शब्ददारिद्र्यम्, येन प्रत्यगात्मा शब्दागम्यः स इति स्वाशक्तिप्रकटनाय ब्रूयात्। तस्मात्, वस्तुवृत्तत एवाविषयः प्रत्यगात्मा। सर्वविकल्पवर्जितः। ईदृशोऽप्यात्मा स्वयंसिद्ध इति ज्ञापयितुं तस्मिन्नध्या-रोपितवेद्यवेदितृवेदनादिभेदम् वाच्यवक्तृवचनादिभेदं च अपनयन्नेव स्वात्मानं समर्पयतीति भाष्याशयोऽत्रावसेयः॥

शास्त्रतर्कसंबन्धः –

१८९. ब्रह्म प्रसिद्धम्, अप्रसिद्धं वा? यदि प्रसिद्धम्, न जिज्ञासितव्यम्, अथाप्रसिद्धम्, नैव शक्यं जिज्ञासितुम्' इत्याशङ्क्य भाष्ये लिखितम् – '**अस्ति तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते**' इति॥

तत्र भामतीव्याख्या –

(१) प्रागपि ब्रह्ममीमांसाया अधीतवेदस्य निगमनिरुक्तव्याकरणादि-परिशीलनविदितपदतदर्थसंबन्धस्य 'सदेव सोम्येदमग्र आसीत्' इत्युपक्रमात्,

'तत्त्वमसि' इत्यन्तात् संदर्भात् नित्यत्वाद्युपेतब्रह्मस्वरूपावगमस्तावदापाततो विचाराद् विनाप्यस्ति ॥ वा. भा. पा. ७९.

[अत्र वेदान्तवाक्यादापाततो ब्रह्मास्तित्वसिद्धौ विचारेण तत्स्वरूप-निर्धारणार्थं मीमांसाशास्त्रलक्षणतर्के प्रवृत्तिरित्युक्तं भवति ॥]

'वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयस-प्रयोजना प्रस्तूयते' इति भाष्यवाक्यस्य भामतीव्याख्यानम् –

(२) वेदान्तमीमांसा तावत् तर्क एव । तदविरोधिनश्च येऽन्येऽपि तर्काः, अध्वरमीमांसायां न्याये च वेदप्रत्यक्षप्रामाण्यपरिशोधनादिपूक्ताः, ते उपकरणं यस्याः सा तथोक्ता ॥ वा. भा. पा. ८३.

(३) शब्दाविरोधिन्या तदुपजीविन्या च युक्त्या विवेचनं मननम् । युक्तिश्च अर्थापत्तिः, अनुमानं वा ॥ वा. भा. पा. ८९.

(४) तर्को हि प्रमाणविषयविवेचकतया तदितिकर्तव्यताभूतः, तदाश्रयः, असति प्रमाणे अनुग्राह्यस्याश्रयस्याभावात् शुष्कतया नाद्रियते । यस्त्वागमप्रमाणाश्रयस्तद्विषयविवेचकस्तदविरोधी स मन्तव्य इति विधीयते ॥ वा. भा. पा. ४४४.

(५) श्रुत्यनुगृहीत इति । श्रुत्याः श्रवणस्य पश्चात्, इतिकर्तव्यता-त्वेन गृहीतः । अनुभवाङ्गत्वेनेति । मतो हि भाव्यमानो भावनाया विषयतया अनुभूतो भवतीति मननम् अनुभवाङ्गम् ॥ वा. भा. पा. ४४५.

(६) केवलागमगम्येऽर्थे स्वतन्त्रतर्काविषये न सांख्यादिवत् साधर्म्य-वैधर्म्यमात्रेण तर्कः प्रवर्तनीयः, येन प्रधानादिसिद्धिर्भवेत् । शुष्कतर्को हि स भवति, अप्रतिष्ठानात् ॥ वा. भा. पा. ४४८.

(७) वैदिकं चेदं चेतनजगदुपादानविषयं विज्ञानं वेदोत्थकर्मेति-कर्तव्यताकं वेदजनितं व्यवस्थितम् । वेदानपेक्षेण तु तर्केण जगत्कारणमेदम् अवस्थापयतां तार्किकाणामन्योन्यं विप्रतिपत्तेस्तत्त्वनिर्धारणकारणाभावाच्च न ततस्तत्त्वव्यवस्था–इति न ततः सम्यग्ज्ञानम् ॥ वा. भा. पा. ४४९.

अत्र मीमांसारूपतर्कस्य, श्रुत्यनुगृहीततदविरुद्धतर्कयोः, शुष्कतर्कस्य च विवेचनं न स्पष्टतया कृतमित्यसन्मतिः । मीमांसायाः प्राधान्येन

वाक्यधर्मनिर्धारणे प्रवृत्तिः, तस्या एव विषयविवेचने प्रकृते श्रुत्यनुगृहीततदनुकूलतर्कान्यतरोपक्षेपे प्रवृत्तिः, श्रुत्यनुगृहीततर्कस्यानुभवाङ्गत्वात् सार्वत्रिकानुभवानुसारेणैव श्रुत्यर्थनैर्मल्याय प्रयतनम्, श्रुत्यविरुद्धतर्कस्य लोकसिद्धस्यापि श्रुत्यनुगृहीततर्कोपबृंहणे विनियोगः, केवलतर्कस्य तु तत्तद्वादाभ्युपगमानुसारेण साधर्म्यवैधर्म्ये अवष्टभ्य तत्तत्सिद्धान्तांशसाधने बाधने वा उपयोगः – इति हि मीमांसाश्रुत्यनुगृहीततदनुकूलतर्कैकेवलतर्काणां विवेक आश्रीयते भाष्ये ॥

शास्त्रतात्पर्यम् –

१९१. समन्वयाधिकरणभाष्ये वर्णकद्वयव्याख्याने वाचस्पतिमिश्रेण प्रायशो मण्डनसरणिरेवानुसृता। 'अज्ञातसंगतित्वेन शास्त्रत्वेनार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद् ब्रह्मनिश्चयः ॥' (वा. भा. पा. १०८) इति श्लोकेन प्रतिपत्तिविधिशेषत्वेनैव ब्रह्मणः शास्त्रप्रमाणकत्वम् आतिष्ठमानानां कार्यार्थत्वमेव शास्त्रस्य प्राधान्येनेति वादिनां मतं संगृह्य– तन्मतं विस्तरेणानूद्य सिद्धान्तः प्रदर्शितः ॥

(१) आत्यन्तिकं त्वशरीरत्वम् अनतिशयं स्वभावसिद्धतया नित्यम् अकार्यम् आत्मज्ञानस्य फलम्। तद्धि फलमिव फलम्। अविद्यापनयमात्रेणाविर्भावात् ॥ वा. भा. पा. ११४.

(२) ब्रह्मभूयस्य अविद्यापिधानापनयमात्रेणाविर्भावात्, अविद्यापनयस्य च वेदान्तार्थविज्ञानाद् अवगतिपर्यन्तादेव संभवात्, उपासनायाः संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारोपजनने[1] मनःसाचिव्यस्य च मानान्तरसिद्धत्वात्, 'आत्मेत्येवोपासीत' इति न विधिः। अपि तु विधिसरूपोऽयम् ॥ वा. भा. पा. ११५.

[अत्र संस्कारविषये यद्वक्तव्यम्, तदनुभवविचारावसरे वक्ष्यामः ॥]

(३) तत्र तावदेवम् अकार्येऽर्थे न संगतिग्रहः, यदि तत्परः प्रयोगो न लोके दृश्येत, तत्प्रत्ययो वा व्युत्पन्नस्य उन्नेतुं न शक्येत। न तावत्

1. द्वितीयसंस्करणपाठोऽयम् ॥

तत्परप्रयोगो न दृश्यते लोके कुतूहलभयादिनिवृत्त्यर्थानाम् अकार्यपराणां पदसंदर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः । तद् यथा .... 'पर्वतराजः सुमेरुः' इति, 'नैष भुजङ्गो रज्जुरियम्' इत्यादि । नापि भूतार्थबुद्धिर्व्युत्पन्नपुरुषवर्तिनी न शक्या समुन्नेतुम् । हर्षादेरुन्नयनहेतोः संभवात् ॥ ..... तथा च प्रयोजनवत्तया भूतार्थाभिधानस्य प्रेक्षावत्प्रयोगोऽप्युपपन्नः । एवं च ब्रह्मस्वरूपज्ञानस्य परमपुरुषार्थहेतुभावात्, अनुपदिशतामपि पुरुषप्रवृत्तिनिवृत्ती वेदान्तानां पुरुषहितानुशासनात् शास्त्रत्वं सिद्धं भवति ॥

वा. भा. पा. १३१.

['अत्राकार्थे' न संगतिग्रहः – इति पूर्वपक्षो भाष्यानारूढोऽपि शक्यसंभावन इत्याचार्यमण्डनमनुसृत्य तत्परिहारोऽर्वाचीनवेदान्तिभिः कृतो जिज्ञासुबुद्धिवैशद्यार्थं भवतीति न दोषः ॥]

(४) यद्यपि गवादिवन्मानान्तरगोचरत्वमात्मनो नास्ति, तथापि प्रकाशात्मन एव सतः, तत्तदुपाधिपरिहाण्या शक्यं वाक्यार्थत्वेन निरूपणम्, हाटकस्येव कटककुण्डलादिपरिहाण्या । न हि प्रकाशः स्वसंवेदनो न भासते. नापि तद्वच्छेदकः कार्यकरणसंघातः । तेन 'स एष नेतिनेत्यात्मा' इति तत्तद्वच्छेदपरिहाण्या बृहत्त्वादापनाच्च स्वयंप्रकाशः शक्यो वाक्यात्, ब्रह्मेति चात्मेति च निरूपयितुम् इत्यर्थः ॥ वा. भा. पा. १३३.

[इदमपि मण्डनस्यैवानुकरणम् 'संहृताखिलभेदोऽतः सामान्यात्मा स वर्णितः । हेमेव पारिहार्यादिभेदसंहारसूचितम् ॥' (ब्र. सि. 37) इति वर्णयतः । भाष्ये तु ब्रह्मात्मादिपदवाच्यत्वं नेतिनेतीत्यादिवाक्यार्थत्वं वा ब्रह्मणो न तात्पर्येण विवक्षितम्, किं तर्हि भूतवस्तुप्रतिपादको वेदभागोऽप्यस्ति, तच्च ब्रह्मवस्तु सर्वस्यात्मत्वादेव स्वयंसिद्धम् अहेयमनुपादेयं चेत्येव तत्र शिष्यत इति स्फुटम् । अतः भामतीकारस्यापि 'स्वयंप्रकाशः' इति विशेषणमाददानस्यात्रैव परमतात्पर्यमिति नेतव्यं वाक्यम् ॥]

वेदान्तवाक्यानां किमित्यर्थवादता न स्वीकार्या ? – इत्यत्रेमानि भामतीवाक्यानि अनुसंधेयानि –

(५) यथा एकस्मिन् वाक्ये पदानां पदार्था द्वारतो वाक्यार्थश्च तात्पर्यतो विषयः, एवं वाक्यद्वयैकवाक्यतायामपि । .... तत्र यद् द्वारतः, तत् प्रमाणान्तरविरोधेऽन्यथा नीयते ।....यत्र तु तात्पर्यम्, तत्र मानान्तर-

विरोधे पौरुषेयम् अप्रमाणमेव भवति ; वेदान्तास्तु पौर्वापर्यपर्यालोचनया निरस्तसमस्तभेदप्रपञ्चब्रह्मप्रतिपादनपरा अपौरुषेयतया स्वतःसिद्धतात्त्विकप्रमाणभावास्सन्तः, तात्त्विकप्रमाणभावात् प्रत्यक्षादीनि प्रत्याख्य सांव्यवहारिके तस्मिन् व्यवस्थापयन्ति । न च 'आदित्यो वै यूपः' इति वाक्यम् आदित्यस्य यूपत्वप्रतिपादनपरम्, अपि तु यूपस्तुतिपरम् । (वा. पा. ३४३) ... तस्मात्, विधिवाक्यादर्थवादवाक्यम् अन्यदिति वाक्ययोरेव स्वस्ववाक्यार्थप्रत्ययावसितव्यापारयोः पश्चात् कुतश्चिदपेक्षायां परस्परान्वय इति सिद्धम् ॥ वा. भा. पा. ३४६.

[अत्र तात्पर्यवतां वेदान्तानां प्रत्यक्षापेक्षया प्रबलत्वं द्वारभूतार्थवादानामप्यसति बाधकेऽवान्तरतात्पर्येणार्थवत्त्वं चोक्तम् । वस्तुतो प्रमाणानां परस्परविरोध एव नास्तीति भाष्यवार्तिकपक्षस्तु भामत्यां स्पष्टमुल्लिखितो न दृश्यते ॥]

(५) 'सदेव सोम्येदग्र' इति ब्रह्मोपक्रमात् 'तत्त्वमसि' इति च जीवस्य ब्रह्मात्मना उपसंहारात् तत्परैव वाक्यस्य । एवं वाक्यान्तराणामपि पौर्वापर्यालोचनया ब्रह्मपरत्वम् अवगन्तव्यम् ॥ वा. भा. पा. १०३-१०४.

कार्यकारणप्रक्रिया –

१९२. कार्यकारणप्रक्रिया अत्र भाष्यवदेव, अध्यारोपापवादप्रक्रियानुगुणैव रचिता –

(१) यथा रज्ज्वज्ञानसहितरज्जूपादाना धारा, रज्ज्वां सत्यामस्ति, रज्ज्वामेव च लीयते । एवम् अविद्यासहितब्रह्मोपादानं जगत् ब्रह्मण्येवास्ति तत्रैव च लीयत इति सिद्धम् ॥ वा. भा. १-१-२, पा. ५५.

(२) पूर्वसिद्धस्याप्यनिर्वचनीयविकारात्मना परिणामोऽनिर्वचनीयत्वात् भेदेनाभिन्न इवेति सिद्धस्यापि साध्यत्वम् इत्यर्थः ॥

वा. भा. १-१-२६, पा. ४२८.

(३) इयं चोपादानपरिणामादिभाषा न विकाराभिप्रायेण, अपि तु यथा सर्पस्योपादानं रज्जुः, एवं ब्रह्म जगदुपादानं द्रष्टव्यम् । न खलु नित्यस्य निष्कलस्य ब्रह्मणः सर्वात्मनैकदेशेन वा परिणामः संभवति नित्यत्वात्, अनेकदेशत्वादियुक्तम् । न च मृदः शरावादयो भिद्यन्ते, न चाभिन्नाः, न वा भिन्नाभिन्नाः, किं तु अनिर्वचनीया एव । यथाह श्रुतिः–

'मृत्तिकेत्येव सत्यम्' इति । तस्मात् अद्वैतोपक्रमात् उपसंहाराच्च सर्व एव वेदान्ता ऐकान्तिकाद्वैतपराः सन्तः, साक्षादेव क्वचिदद्वैतमाहुः. क्वचिद् द्वैतनिषेधेन. क्वचिद् ब्रह्मोपादानत्वेन जगतः । एतावतापि तावद् भेदो निषिद्धो भवति । न तूपादानत्वाभिधानमात्रेण विकारग्रह आस्थेयः । न हि वाक्यैकदेशस्यार्थोऽस्तीति ॥ वा. भा. १-४-२७, पा. ४२९.

(४) यथा कार्यं स्वरूपेण सदसत्त्वाभ्यां न निर्वचनीयम् । अपि तु कारणरूपेण शक्यं सत्त्वेन निर्वक्तुमिति । एवं च कारणसत्तैव कार्यस्य सत्ता न ततोऽन्येति कथं तदुत्पत्तेः प्राक् सति कारणे भवत्यसत् ? स्वरूपेण तूत्पत्तेः प्राक्, उत्पन्नस्य ध्वस्तस्य वा सदसत्त्वाभ्यामनिर्वाच्यस्य न सतोऽसतो वा उत्पत्तिरिति निर्विषयः सत्कार्यवादप्रतिषेध इत्यर्थः ॥

वा. भा. २-१-७, पा. ४४६.

[अत्र जगतः प्रतीयमानरूपेणाऽनिर्वचनीयस्याभ्युपगमात्, तस्य चोत्पत्तिनिषेधात्, अनिर्वचनीयप्रातिभासिकरजताद्युत्पत्तिरस्मिन् प्रस्थाने नाङ्गीक्रियत इति भाति । निर्णेयं त्वेतत् तत्त्वान्वेषकैः ॥]

अत्र कार्यस्य कारणरूपेण सत्त्वम्, स्वतस्तु अनिर्वचनीयतेत्यतः सत्कार्यवादः साधितः । भाष्ये परं 'न तु शब्दादिमत् कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीं वा अस्ति' (सू. भा. २-१-७) इति कारणात्मनैव सत्त्वं सर्वास्ववस्थासु जगतः—इत्येतावन्मात्रमुक्तम्, न तु कार्यस्य सदसत्त्वाभ्याम् अनिर्वचनीयत्वम् । यद्यप्यन्यत्र भाष्येऽपि —

(१) सर्वज्ञस्येश्वरस्यात्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्याम् अनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्य ईश्वरस्य माया शक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते ॥ सू. भा. २-१-१४, पा. २०१.

इत्युक्तम्, तथापि भामतीसंमतानिर्वचनीयतावादाद् भाष्योक्तानिर्वचनीयतावादस्येषद्वैलक्षण्यं विद्यते । भाष्ये हि तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वमुक्तम्, भामत्यां तु मण्डनानुसारेण सदसद्भ्यामनिर्वचनीयत्वम् । तथा ह्युपदेशसाहस्र्यां विवृतं भाष्यकारसंमतमनिर्वाच्यत्वम् —

(२) तच्चाकाशाख्यं भूतम् अनेन प्रकारेण परमात्मनः संभूतं प्रसन्नादिव सलिलान्मलमिव फेनम् । न सलिलं न च सलिलादत्यन्तभिन्नं फेनम् । सलिलव्यतिरेकेणादर्शनात् । सलिलं तु स्वच्छम्, अन्यत् फेनान्मलरूपात् । एवं परमात्मा नामरूपाभ्यामन्यः फेनस्थानीयाभ्यां शुद्धः प्रसन्नस्तद्विलक्षणः ॥ उ. सा. गद्य, पा. २४-२५.

एतच्च तत्त्वान्यत्वाभ्यामनिर्वचनीयत्ववचनं यथाप्रतीतनामरूपाद् वैलक्षण्यं द्योतयितुं परमात्मनः, न तु प्रतीतस्यानिर्वचनीयत्वं द्रढयितुम् । तदेतद् बृहदारण्यके स्पष्टमुक्तम्

(३) यः कारणं सर्वस्य जगतः, यदात्मके नामरूपे सलिलादिव स्वच्छान्मलमिव फेनम् अव्याकृते व्याक्रियेते । यश्च ताभ्यां नामरूपाभ्यां विलक्षणः । स्वतो नित्यशुद्धबुद्धमुक्तस्वभावः ॥

बृ. भा. १-४-७, पा. ६५५.

अत्र ह्यनुल्लिख्यैव नामरूपयोरनिर्वचनीयत्वं परमात्मनस्तद्विलक्षणत्वमवधारितम् । अत एव बृहदारण्यकभाष्ये नामरूपयोरभाव एव परमात्मनि निर्धारितः –

(४) नामरूपोपाध्यस्तित्वे 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इति श्रुतयो विरुध्येरन् इति चेत् । न । सलिलफेनदृष्टान्तेन परिहृतत्वात्, मृदादिदृष्टान्तैश्च । यदा तु परमार्थदृष्ट्या परमार्थतत्त्वात् श्रुत्यनुसारिभिरन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवद् वस्त्वन्तरे तत्त्वतो न स्तः, सलिलफेनघटादिविकारवदेव, तदा तदपेक्ष्य 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते । यदा तु स्वाभाविक्या अविद्यया ब्रह्मस्वरूपं रज्जुशुक्तिकागगनस्वरूपवदेव स्वेन रूपेण वर्तमानं केनचिदस्पृष्टस्वभावमपि सत्, नामरूपकृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते, नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी, तदा सर्वोऽयं वस्त्वन्तरास्तित्वव्यवहारः ॥ बृ. भा. ३-५-१, पा. ८११.

अत्र हि नामरूपयोरनिर्वाच्यत्वं नोल्लिखितम्, तयोरात्मरूपत्वादेव अद्वैतश्रुत्यनुपरोधः, स्वाभाविकदृष्ट्यैव तु तेषामस्तित्वव्यवहारः, शुक्तिरजतादिभ्रान्तिदृष्ट्यैव च रजतादिशब्दव्यवहार इति स्फुटीकृतम् ॥

तस्मात् यद्यात्मरूपेणैव जगतः सत्त्वान्न सत्कार्यवादनिषेधः, सत्कार्यत्वं च तस्य सतोऽव्यतिरेकेणैव प्रतीतेरितीष्यते, तर्हि न भाष्य-प्रस्थानादन्यत्वमस्य। यावता तु सदसत्त्वाभ्यामनिर्वचनीयत्वादेव तस्य नोत्पत्तिरिति सत्कार्यवादनिषेधः प्रत्यारुयायते तावता त्वंशेन विलक्षणत्व-मस्त्येव भाष्यप्रस्थानात्। अपि च किमिदमभिप्रेयते सदसद्भ्यां विलक्षणं जगदिति–इति वक्तव्यम्। अत्र हि सच्छब्देन यदि ब्रह्मैव विवक्ष्यते, तर्हि ब्रह्मैवेदं सर्वमिति, असच्छब्दव्यपदेश्यमपि सर्वान्तर्भावितमेवेति नास्त्येव सदसद्विलक्षणत्वं जगतः। तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वं तु संभविष्यति। न हि प्रतीयमानरूपेण जगद् ब्रह्म, नापि तदन्यदेव यथा अश्वान्महिषः; ब्रह्माननुविद्धस्य तस्यानुपलम्भात् इति॥

अव्याकृतम् –

१९३. जगतः प्रागवस्थापि अव्याकृतादिशब्दवाच्या अविद्या-शक्तिशब्देन अस्मिन् प्रस्थाने तत्र तत्र व्यपदिष्टेत्यवोचाम अविद्यास्वरूप-निरूपणप्रसङ्गेन (१८२, पा. ३९८)। कार्यकारणप्रक्रियानिरूपणप्रसङ्गेन पुनरप्यत्र किञ्चिदुच्यते॥

(१) यद्यपि महाप्रलयसमये नान्तःकरणादयः समुदाचरद्वृत्तयः सन्ति, तथापि स्वकारणे अनिर्वाच्यायामविद्यायां लीनाः सूक्ष्मेण शक्ति-रूपेण कर्मविक्षेपकाविद्यावासनाभिः सहावतिष्ठन्त एव॥

वा. भा. पा. ३३३.

[अत्र अनिर्वाच्यायामविद्यायामेवान्तःकरणादीनां शक्तिरूपेणावस्थान-मुक्तम्। अतोऽव्याकृतमेवाविद्याशब्देन व्यपदिष्टमिति भाति॥]

(२) अनिर्वचनीयानाद्यविद्याशक्तिमच्चेतनोपादानं जगदागमिकमिति ब्रह्मविदः॥ वा भा. १-१-५, पा. १६२.

[अत्राविद्याशक्तेः साहाय्यमात्मन उक्तमुपादानत्वे॥]

(३) तथा च सर्वं विकारजातं तदविद्याशक्तिपरिणामस्तस्य शरीरेन्द्रियस्थाने वर्तते ॥ वा. भा. १-२-१८, पा. २५३.

[अत्रान्तर्यामिणो जीवशरीरेन्द्रियनियमने शरीरेन्द्रियादिकं नास्तीति – शङ्काव्युदासार्थमिदमुक्तम् ॥]

(४) न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे, येनैवमुपालभ्येमहि, किं त्वियं प्रतिजीवं भिद्यते । .... अविद्यात्वमात्रेण चैकत्वोपचारः अव्यक्तमिति चाव्याकृतमिति च ॥ वा. भा. १-४-३, पा. ३७७, ३७८.

[अत्र स्पष्टमेवाव्याकृतम् अविद्याशब्देन व्यपदिष्टम्, तस्य नानात्वमप्युक्तम् ॥]

(५) न ह्यचेतनं चेतनानधिष्ठितं कार्याय पर्याप्तम् इति स्वकार्यं कर्तुं परमेश्वरं निमित्ततया उपादानतया चाश्रयते । प्रपञ्चविभ्रमस्य हीश्वराधिष्ठानत्वम् अहिविभ्रमस्येव रज्ज्वधिष्ठानत्वम् । तेन यथाऽहिविभ्रमो रज्जूपादानः, एवं प्रपञ्चविभ्रम ईश्वरोपादानः ॥ वा. भा. १-४-७, पा. ३७८.

[अत्र स्पष्टमेव जगतोऽध्यस्तत्वं परमात्मनि, रज्ज्वामिवाहेः–इत्युक्तम् । अत एवाविद्याशक्तेः परिणामो नाम न विकार इत्युक्तं भवति ॥]

(६) तस्माज्जीवाधिकरणाप्यविद्या निमित्ततया विषयतया चेश्वरमाश्रयते इतीश्वराश्रयेत्युच्यते, न स्वाधारतया । विद्यास्वभावे ब्रह्मणि तदनुपपत्तेः ॥ वा. भा. १-४-३, पा. ३७८.

['अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया' इत्यस्य भाष्यस्य व्याख्यानमिदम् । भाष्ये नामरूपात्मिका शक्तिरविद्याकल्पितापि परमेश्वरोपाधिरिव भवतीति कृत्वा 'परमेश्वराश्रया' इत्युक्तम् । इह तु अध्यासस्य, तच्छक्तेश्चाव्याकृतस्याभेदमेव विवक्षित्वा जीवाश्रयत्वमुच्यते – इति स्पष्टम् ॥]

(७) अपि च स्थित्युत्पत्तिप्रलयकालेषु त्रिष्वपि कार्यस्य कारणादभेदमभिदधती श्रुतिरनतिशङ्कनीया सर्वैरेव वेदवादिभिः । तत्र स्थित्युत्पत्त्योर्यः परिहारः स प्रलयेऽपि समानः कार्यस्याविद्यासमारोपितत्वं नाम ; तस्माद्यापीतिमात्रमनुयोज्यम् ॥ वा. भा. २-१-९, पा. ४४७.

[अत्रापि कार्यस्याविद्यासमारोपितत्वं तिसृष्वप्यवस्थासु – इत्युक्त्या अविद्याशक्तेरप्यव्याकृतापराभिधाया अविद्यासमारोपितत्वमुक्तं भवति । एवं च 'मिथ्याज्ञानप्रतिबद्धैव विभागशक्तिरनुमास्यते' (सू. भा. २-१-९) इति

भाष्याभिप्राय एवेहादृतो भवति । तस्मादविद्याशक्तिरिति तावदेवोक्तं भवति यावदुक्तं भवति अविद्यावस्थायामनुमिता शक्तिरिति ॥]

(८) अविद्याशक्तेर्नियतत्वादुत्पत्तिनियमः इत्यर्थः ॥

वा. भा. पा. ४४७.

['अत्राविद्याशक्तिः' इत्यविद्याकल्पिता विभागशक्तिरेवोच्यत इति स्पष्टम् ॥]

(९) मिथ्याज्ञानविभागशक्तिप्रतिनियमेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः प्रत्युक्तः । कारणाभावे कार्याभावस्य प्रतिनियमात् तत्त्वज्ञानेन च सशक्तिकमिथ्याज्ञानस्य समूलघातं निहतत्वादिति ॥

वा. भा. २-१-९, पा. ४४७, ४४८.

[मिथ्याज्ञानतत्कल्पितशक्त्योरित्यर्थः ॥]

(१०) अविद्याकल्पितेन तु नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मना तत्त्वान्यत्वाभ्यामनिर्वचनीयेन परिणामादिव्यवहारास्पदत्वं ब्रह्म प्रतिपद्यते ॥ वा. भा. २-१-२६, पा. ४७५.

[भाष्यवाक्यमेवेदमनूदितम् । 'ननु शब्देनापीति चोद्यमविद्याकल्पितत्वोद्घाटनाय' इत्युत्तरवाक्ये अव्याकृतस्याविद्याकल्पितत्वं स्पष्टतरमनुमतम् । तर्हि अविद्यैवाव्यक्तमव्याकृतं चेत्युक्तं कथमनेन संगमनीयम् ?]

(११) कारणभूतया लयलक्षणया अविद्यया प्राक्सर्गोपचितेन च विक्षेपसंस्कारेण यत् प्रत्युपस्थापितं नामरूपं तदेव माया तदावेशेनास्य चोद्यस्यासकृत् प्रत्युक्तत्वात् । एतदुक्तं भवति । नेयं सृष्टिर्वस्तुसती येनाद्वैतिनो वस्तुसतो द्वितीयस्याभावाद् अनुयुज्येत । काल्पनिक्यां तु सृष्टौ, अस्ति काल्पनिकं द्वितीयं सहायं मायामयम् । यथाहुः – 'सहायास्तादृशा एव यादृशी भवितव्यता' इति । न चैवं ब्रह्मोपादानत्वव्याघातः । ब्रह्मण एव मायावशेनोपादानत्वात् तदधिष्ठानत्वात् जगद्विभ्रमस्य । रजतविभ्रमस्येव शुक्तिकाधिष्ठानस्य शुक्तिकोपादानत्वम् इति निरवद्यम् ॥

वा भा. २-२-२, पा. ४९४, ४९५.

['एकत्वात् प्रवर्त्याभावे प्रवर्तकत्वानुपपत्तिरिति चेत् । न । अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत्प्रत्युक्तत्वात्' इति भाष्यस्य व्याख्यानम् । व्याकृतस्याव्याकृतस्य च नामरूपलक्षणस्याविद्याकल्पितत्वमूरीकृत्यापि किमिति प्राक्सर्गोपचितसंस्काराद्यन्नानीयत इति न विद्मः ॥]

यथोदाहृतानां भामतीवाक्यानामेकवाक्यताकरणेनेदं स्पष्टं भवति यत्, अत्रापि भाष्ये इवाविद्याकल्पितमेव नामरूपव्याकृतं जगत्, तच्छक्तिरूपं चेति ; अव्याकृतस्याविद्याशब्दव्यपदेश्यता तस्याविद्याकल्पितत्वादेव स्यादिति च । अविद्यानानात्वोक्तिस्तु अविद्याया एव द्रव्यगुणसंख्यादिसर्वव्यवहारमूलत्वानालोचनकृतेत्युपेक्ष्या – इत्यवोचाम ॥

जीवत्वाध्यासः –

१९४. अथासिन् प्रस्थाने जीवब्रह्मविभागव्यवहारसिद्ध्यर्थं जीवत्वाध्यास एव तावत् परीक्ष्यते –

(१) येऽप्यहङ्कारास्पदम् आत्मानम् आस्थिषत तैरपि अस्य न तात्त्विकत्वमभ्युपेतव्यम्, 'अहमिहैवास्मि सदने जानानः' इति सर्वव्यापिनः प्रादेशिकत्वेन ग्रहात् । उच्चतरगिरिशिखरवर्तिषु महातरुषु भूमिष्ठस्य दूर्वाप्रवालनिर्भासप्रत्ययवत् । न च – इदं देहस्य प्रादेशिकत्वमनुभूयते न त्वात्मनः – इति सांप्रतम् ; न हि तदा एवं भवति 'अहम्' इति । गौणत्वे वा न 'जानानः' इति ॥ वा. भा. पा. ११.

(२) न त्वहङ्कारस्य मुख्योऽर्थो निर्लुठितगर्भतया देहादिभ्यो भिन्नोऽनुभूयते । येन परशब्दः शरीरादौ गौणो भवेत् । न च अत्यन्तनिरूढतया गौणेऽपि न गौणत्वाभिमानः सार्षपादिषु तैलशब्दवत् इति वेदितव्यम् । तत्रापि स्नेहात् तिलभवाद् भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वाभिमानः, न त्वर्थयोस्तैलसार्षपयोरभेदाध्यवसायः । तत् सिद्धं गौणत्वमुभयदर्शिनो गौणमुख्यविवेकविज्ञानेन व्याप्तम् । तदिह व्यापकं विवेकविज्ञानं निवर्तमानं गौणतामपि निवर्तयतीति ॥ वा. भा. पा. १३.

(३) न च बालस्थविरशरीरभेदेऽपि 'सोऽहम्' इत्येकस्यात्मनः प्रतिसंधानात् देहादिभ्यो भेदेनास्यात्मानुभव इति वाच्यम् । परीक्षकाणां खल्विदं कथा, न लौकिकानाम् ॥ वा. भा. पा. १३–१४.

[अत्र 'सोऽहम्' इत्यनुसंधानमस्ति ; परं तदेतदनुसंधानम् आत्मविषयकम् इत्यत्र मानाभावाद् भ्रान्तिरेवेयमिति किं न स्यात्–इति न विवेचितम् 'पश्चादिभिश्चाविशेषात्' इति भाष्यवाक्यमुदाहरतापि ॥]

(४) न च अहङ्कारप्रामाण्याय देहादिवदात्मापि प्रादेशिक इति युक्तम् । तदा खल्वयम् अणुपरिमाणो वा स्यात्, देहपरिमाणो वा । अणुपरिमाणत्वे 'स्थूलोऽहम् दीर्घः' – इति च न स्यात् । देहपरिमाणत्वे तु सावयवतया देहवदनित्यत्वप्रसङ्गः ॥ वा· भा· पा· १४·

[अत्र तदप्यस्तु इति वदतश्चार्वाकस्य मतमपि विचारयितव्यतया प्राप्नोति । न हि तत्र केवलश्रुतिप्रामाण्योदाहरणेन पूर्वपक्षनिवारणं कर्तुं शक्यमिति ॥]

(५) एवं च देहेन्द्रियादिप्रपञ्चोऽप्यनिर्वाच्यः । अणूर्वोऽपि पूर्वमिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्त इत्युपपन्नम् । अध्यासलक्षणयोगात् । ... चिदात्मा तु श्रुतिस्मृतीतिहासपुराणगोचरः, तन्मूलतदविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः सत्त्वेनैव निर्वाच्यः । अबाधिता स्वयंप्रकाशतैवास्य सत्ता सा च स्वरूपमेव चिदात्मनः, न तु तदतिरिक्तं सत्तासामान्यसमवायः, अर्थक्रियाकारिता वा–इति सर्वमवदातम् ॥

वा· भा· पा· २४–२५·

[अत्राबाधितस्वयंप्रकाशत्वमात्रमेवोक्तमलम् । श्रुत्यादिप्रसिद्धत्वस्य भाष्येऽनुल्लेखनात् तत्परामर्शोऽत्र नापेक्षित इत्यभाणि ॥]

(६) कर्ता भोक्ता चिदात्मा अहंप्रत्यये प्रत्यवभासते । न चोदासीनस्य तस्य क्रियाशक्तिर्भोगशक्तिर्वा संभवति । यस्य च बुद्ध्यादेः कारणसंघातस्य क्रियाभोगशक्ती न तस्य चैतन्यम् । तस्मात्, चिदात्मैव कार्यकरणसंघातेन ग्रथितो लब्धक्रियाभोगशक्तिः, स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात् कथञ्चित् 'अस्मत्प्रत्ययविषयः', 'अहङ्कारास्पदम्', 'जीवः'–इति च 'जन्तुः' इति च, 'क्षेत्रज्ञः' इति चाख्यायते ॥ वा· भा· पा· ३९·

[अत्र पञ्चपादिका(पा· २९)प्रकारेणैव 'कथञ्चित्' इत्युपचारेणास्मत्प्रत्ययविषयत्वम् उपपादितम् । तत्तु 'न तावदेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्' इति भाष्योक्तेर्दौर्बल्यापादकम् । अविषये विषयस्याध्यासः कथमिति चोदिते खल्विदं भाष्यसमाधानम् । युष्मत्प्रत्ययविषयत्वमेव केवलं नास्त्यात्मनः, न तु सर्वथा अविषयत्वम् ; यस्मात् अस्मत्प्रत्ययविषयत्वमप्यस्तीत्यत्र हि भाष्यवाक्यस्वारस्यम् । अस्मत्प्रत्ययविषयस्य विषयित्वं कथमिति तु पूर्वपक्षिणा नाक्षिप्तं नापि सिद्धान्तिना परिह्रियते अत्रेत्यन्यत् ॥]

ब्रह्मजीवसंबन्धः –

१९५. **वाक्यान्वयाधिकरणे** जीवपरमात्मसंबन्ध आश्मरथ्याद्याचार्यमतभेदेन त्रेधा वर्णितः। तत्र आश्मरथ्यपक्षः परजीवयोः प्रकृतिविकारभावमाश्रित्य प्रस्थितः, औडुलोमिपक्षस्तु संसारदशायामत्यन्तभिन्नस्यापि जीवस्य मुक्त्यवस्थायामभेद इति मतमाश्रित्य। तृतीयपक्षस्तु 'अवस्थितेरिति काशकृत्स्नः' (वे. सू. १-४-२२) इति सूत्रेण निबद्धः। सूत्रं तु 'अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते' इति भाष्ये व्याख्यातम्। तदिदं भास्करेण दूषितमनूद्य भामत्यां समाहितम्। तत्र काशकृत्स्नमतं सिद्धान्ते तावदित्थं प्रदर्शितम् –

(१) न जीव आत्मनोऽन्यः, नापि तद्विकारः, किं तु आत्मैवाविद्योपधानकल्पितावच्छेदः, आकाश इव घटमणिकादिकल्पितावच्छेदो घटाकाशो मणिकाकाशो न तु परमाकाशादन्यस्तद्विकारो वा। ततश्च जीवात्मनोपक्रमः परमात्मनैवोपक्रमः, तस्य ततोऽभेदात्॥ वा. भा. पा. ४१६.

(२) आत्यन्तिके हि जीवपरमात्मनोरभेदे तात्त्विकेऽनाद्यविद्योपाधिकल्पितो भेदः 'तत् त्वमसि' इति जीवात्मनोर्ब्रह्मभावतत्त्वोपदेशश्रवणमननिदिध्यासनप्रकर्षपर्यन्तजन्मना साक्षात्कारेण विद्यया शक्यः समूलकाषं कषितुम्, रज्ज्वाम् अहिविभ्रम इव रज्जुतत्त्वसाक्षात्कारेणः राजपुत्रस्येव च म्लेच्छकुले वर्धमानस्यात्मनि समारोपितो म्लेच्छभावो 'राजपुत्रोऽसि' इत्याप्तोपदेशेन। न तु मृद्विकारः शरावादिः शतशोऽपि 'मृत्' 'मृत्' इति चिन्त्यमानस्तज्जन्मना मृद्भावसाक्षात्कारेण शक्यो निवर्तयितुम्। तत्कस्य हेतोः? तस्यापि मृदो भिन्नाभिन्नस्य तात्त्विकत्वात्। वस्तुतस्तु ज्ञानेनोच्छेत्तुमशक्यत्वात्॥ वा. भा. पा. ४१७.

[साक्षात्कारवादपरीक्षा अग्रे स्वावसरे भविता। मृद्विकारदृष्टान्तस्तु आश्मरथ्यमतेन कार्यस्य कारणाद्भेदाभेदमङ्गीकृत्य इति भाति। श्रुत्यनुसारेण हि शरावादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्यतिरेकेणानुपलब्धेरसदेव। 'मृत्तिकेत्येव सत्यम्' इति श्रुतेरिति शक्यत एव तत्सत्यत्वबुद्धिर्निवर्तयितुमिति॥]

(३) अपि च जीवस्यात्मविकारत्वे तस्य ज्ञानध्यानादिसाधनानुष्ठानात् स्वप्रकृतावप्यये सति नामृतत्वस्याशास्तीति अपुरुषार्थत्वम्, अमृतत्वप्राप्ति-श्रुतिविरोधश्च । काशकृत्स्नमते त्वेतदुभयं नास्ति ॥ वा. भा. पा. ४१७.

भास्कराक्षेपस्येदं समाधानम् –

(४) द्वैतदर्शननिन्दया चैकान्तिकाद्वैतप्रतिपादनपराः पौर्वापर्या-लोचनया सर्वे वेदान्ताः प्रतीयन्ते । तत्र यथा बिम्बादवदातात् तात्त्विके प्रतिबिम्बानामभेदेऽपि नीलमणिकृपाणकाचाद्युपधानभेदात् काल्पनिको जीवानां (प्रतिबिम्बानां?) भेदो बुद्धिव्यपदेशभेदौ वर्तयति 'इदं बिम्ब-मवदातम्, इमानि च प्रतिबिम्बानि नीलोत्पलपलाशश्यामलानि वृत्त-दीर्घादिभेदभाञ्जि बहूनि' इति, एवं परमात्मनः शुद्धस्वभावात् जीवानाम् अभेदे ऐकान्तिकेऽपि, अनिर्वचनीयानाद्यविद्योपधानभेदात् काल्पनिको जीवानां भेदो बुद्धिव्यपदेशभेदौ 'अयं च परमात्मा शुद्धविज्ञानानन्द-स्वभावः, 'इमे च जीवा अविद्याशोकदुःखाद्युपद्रवभाज' इति वर्तयति । अविद्योपधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति, तथापि तत्प्रतिबिम्बकल्पजीवद्वारेण परस्मिन् उच्यते । न चैवम् अन्योन्याश्रयः, जीवविभागाश्रयाविद्या, अविद्याश्रयश्च जीवविभाग इति । बीजाङ्कुर-वदनादित्वात् ॥ वा. भा. पा. ४२०-४२१.

[अत्र मण्डनप्रस्थानाश्रयणं मणिकृपाणादिनिदर्शने, (ब्र. सि. 7) बीजाङ्कुरदृष्टान्तेन अनादित्वाश्रयणे (ब्र. सि. 10) चेति स्पष्टम् ॥]

(५) न च ब्रह्मस्वभावस्य जीवात्मनः कूटस्थनित्यस्य स्वत इच्छा-द्वेषानुषङ्गसंभव इति बुद्धिगुणानां तेषां तद्भेदाध्यासेन तद्धर्मत्वाध्यासः । उदशरावाध्यस्तस्येव चन्द्रमसो बिम्बस्य तोयकम्पे कम्पवत्त्वाध्यासः ॥

वा. भा. पा. ६१०, ६११.

(६) अद्वैते भाविके स्थिते जीवभावस्तस्य ब्रह्मणोऽनाद्यनिर्वचनीया-विद्योपधानभेदात् एकस्येव बिम्बस्य दर्पणाद्युपाधिभेदात् प्रतिबिम्बभेदाः । एव चानुज्ञापरिहारौ लौकिकवैदिकौ सुखदुःखमुक्तिसंसारव्यवस्था चोपपद्येत । न च मोक्षस्यानर्थबहुलता । यतः प्रतिबिम्बानामिव श्यामतावदाततादि-र्जीवानामेव नानावेदनाभिसंबन्धः; ब्रह्मणस्तु बिम्बस्येव न तदभिसंबन्धः ।

यथा च दर्पणापनये तत्प्रतिबिम्बं बिम्बभावेऽवतिष्ठते, न कृपाणे प्रतिबिम्बिमपि । एवम् अविद्योपधानविगमे जीवे ब्रह्मभाव इति सिद्धम् ॥

वा. भा. पा. ६२२, ६२३.

[एवं व्यवस्थार्थमेवाविद्यानानात्वं स्वीकृतं स्यादत्र प्रस्थाने ॥]

(७) [अ] सत्यमयं परमात्मा सर्वज्ञत्वाद् यथा जीवान् वस्तुत आत्मनोऽभिन्नान् पश्यति, पश्यत्येवं न भावत एषां सुखदुःखादिवेदनासङ्गोऽस्ति, अविद्यावशात्तु एषां तद्वदभिमान इति । तथा च तेषां सुखदुःखादिवेदनायामपि अहमुदासीन इति न तेषां बन्धनागारनिवेशेऽप्यस्ति क्षतिः काचिन्ममेति ॥ वा. भा. पा. ४७२.

[आ] किं नाम ततोऽद्वितीयादसहायादुपजायते ? न हि तस्य शुद्धबुद्धमुक्तस्वभावस्य वस्तुगत् कार्यमस्ति.... (इति परमार्थदृष्ट्या) । यदि कुलालादिवत् अत्यन्तव्यतिरिक्तसहकारिकारणाभावात् अनुपादानत्वं साध्यते, तत्र क्षीरादिभिर्व्यभिचारः । तेऽपि हि बाह्यचेतनादिकारणानपेक्षा एव कालपरिवास(?)वशेन स्वत एव परिणामान्तरमासादयन्ति । अत्रा(अथा?)न्तरकारणानपेक्षत्वं हेतुः क्रियते तदसिद्धम् । अनिर्वाच्यनामरूपबीजसहायत्वात् । तथा च श्रुतिः 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति । कार्यक्रमेण तत्परिपाकोऽपि क्रमवान् उन्नेयः । एकस्मादपि च विचित्रशक्तेः कारणात् अनेककार्योत्पादो दृश्यते । यथा एकस्माद् वह्नेर्दाहपाकौ, एकस्माद् वा कर्मणः संयोगविभागसंस्काराः (इति व्यवहारदृष्ट्या) ॥

वा. भा. पा. ४७४.

[इ] नेयं पारमार्थिकी सृष्टिर्येनानुयुज्येत प्रयोजनम्, अपि तु अनाद्यविद्यानिबन्धना । अविद्या च स्वभावत एव कार्योन्मुखी न प्रयोजनमपेक्षते । न हि द्विचन्द्रालातचक्रगन्धर्वनगरादिविभ्रमा समुद्दिष्टप्रयोजना भवन्ति । न च तत्कार्या विस्मयभयकम्पादयः स्वोत्पत्तौ प्रयोजनमपेक्षन्ते । सा च चैतन्यविच्छुरिता जगदुत्पादहेतुरिति चेतनो जगद्योनिराख्यायते ॥ वा. भा. पा. ४८२.

[क्वचिदविद्यैव जगदुपादानमिति, क्वचिच्च तद्द्वारा ब्रह्मैव तदुपादानं रज्जुरिव सर्पादेरिति च द्वेधा भामतीप्रवृत्तिः ॥]

[ई] अभ्युपेत्य च सृष्टेस्तात्त्विकत्वमिदमुक्तम् । अनिर्वाच्या तु सृष्टिरिति न प्रसक्तव्यमत्रापि । तथा च मायाकारस्येवाङ्गसाकल्यवैकल्य-

भेदेन विचित्रान् प्राणिनो दर्शयतो न वैषम्यदोषः । सहसा संहरतो वा न नैर्घृण्यम् । एवमस्यापि भगवतो विविधविचित्रप्रपञ्चमनिर्वाच्यं विश्वं दर्शयतः संहरतश्च स्वभावाद् वा लीलया वा न कश्चिद्दोषः ॥

वा. भा. पा. ४८३.

अत्रोदाहृतैर्वाक्यैः, ब्रह्मजगतोः संबन्धविषये, ब्रह्मजीवसंबन्धविषये च वाचस्पतिमिश्रप्रस्थानं यथा मण्डनमिश्रप्रस्थानप्रभावितं तत्पृष्ठगाम्येव धायशः, तथा आविष्कृतं भवति । अनिर्वाच्याविद्यावादलक्षणैकमूलिका-प्रयोगो यथा सर्वशङ्काव्याधिनिवारणेऽत्र भिषक्कर्मेति च ॥

भेदाभेदवादनिरासः –

१९६. 'परिणामिनित्यता न पारमार्थिकी' इति प्रतिज्ञाय तत्प्रसङ्गेन भेदाभेदवादोऽपि भास्करसंमतोऽत्र निरस्तः –

(१) तथा हि तत् सर्वात्मना परिणमेत् एकदेशेन वा ? सर्वात्मना परिणामे कथं न तत्त्वव्याहतिः ? एकदेशपरिणामे वा स एकदेशस्ततो भिन्नो वा अभिन्नो वा ? भिन्नश्चेत् कथं तस्य परिणामः ? न ह्यन्यस्मिन् परिणमानेऽन्यः परिणमते, अतिप्रसङ्गात् । अभेदे वा कथं न सर्वात्मना परिणामः ? भिन्नाभिन्नं तदिति चेत् । .... अत्रोच्यते – कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत् ? परस्पराभाव इति चेत् । किमयं कार्यकारणयोः कटकहाटकयोरस्ति न वा ? न चेत्, एकत्वमेवास्ति, न च भेदः । अस्ति चेत्, भेद एव नाभेदः । न च भावाभावयोरविरोधः । सहावस्थानासंभवात् । संभवे वा कटकवर्धमानकयोरपि तत्त्वेनाभेदप्रसङ्गः । भेदस्याभेदाविरोधात् । अपि च कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते एवं कटकात्मनापि न भिद्येरन्, कटकस्य हाटकादभेदात् । तथा च हाटकमेव वस्तुसत् न कटकादयः, भेदस्याप्रतिभासनात् । अथ हाटकत्वेनैवाभेदो न कटकत्वेन । तेन तु भेद एव कुण्डलादेः । यदि हाटकादभिन्नः कटकः, कथमयं कुण्डलादिषु नानुवर्तते ? नानुवर्तते चेत्, कथं हाटकादभिन्नः कटकः ? ये हि यस्मिन् अनुवर्तमाने व्यावर्तन्ते ते ततो भिन्न एव । यथा सूत्रात् कुसुममेदाः । नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः । तस्मात् तेऽपि हाटकाद् भिन्ना

एवेति । सत्तानुवृत्त्या च सर्वतस्त्वनुगमे 'इदमिह नेदम्', 'इदमस्मा-न्नेदम्', 'इदमिदानीं नेदम्', 'इदमेवं नेदम्' – इति विभागो न स्यात् । कस्यचित् क्वचित् कदाचित् कथञ्चिद् विवेकहेतोरभावात् । अपि च दूरात् कनकम् इत्यवगते न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन् । कनकादभेदात्तेषाम्, तस्य च ज्ञातत्वात् । अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽप्यज्ञातास्ते । नन्वभेदोऽप्यस्तीति किं न ज्ञाताः? प्रत्युत ज्ञानमेव तेषां युक्तम् । कारणाभावे हि कार्याभाव औत्सर्गिकः, स च कारणसत्तया अपोह्यते । अस्ति चाभेदे कारणसत्ता – इति कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः । तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत्ततो भिद्यते । यथा करभे गृह्यमाणेऽ-गृह्यमाणो रासभः करभात् । गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः । तस्मात् ते हेम्नो भिद्यन्ते । कथं तर्हि हेम कुण्डलम् इति सामानाधिकरण्यम् इति चेत्, न ह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम् । अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम्? न खल्वयोद ऐकान्तिकेऽनैकान्तिके चैत-दुभयम् उपपद्यते इत्युक्तम् । तस्माद् भेदाभेदयोरन्यतरस्मिन्नवहेयेऽभेदो-पादानैव भेदकल्पना, न भेदोपादानेऽभेदकल्पनेति युक्तम् । भिद्यमान-तन्त्रत्वाद् भेदस्य, भिद्यमानानां प्रत्येकमेकत्वात् । एकाभावे चानाश्रयस्य भेदस्यायोगात्, एकस्य च भेदानधीनत्वात्, 'नाथमयम्' इति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वात्, एकत्वग्रहस्य चान्यानपेक्षत्वात्, अभेदोपादानै-वानिर्वचनीयभेदकल्पनेति सांप्रतम् । तथा च श्रुतिः – 'सृत्तिकेत्येव सत्यम्' इति ॥ वा भा पा ११७-११९.

[अत्र शक्तिविक्षेपलक्षणः परिणामो भास्करसंमतः (भा. सू. पा. ८५) किमिति न परीक्षित इति न ज्ञायते ॥]

(२) यद्यपि गोत्वस्य सामान्यस्य विशेषा अनिर्वाच्याः, न परमार्थ-सन्तः, तथा च क्वास्य प्रत्येकपरिसमाप्तिरिति, तथापि, अभ्युपेत्येदमुदित-मिति सन्तव्यम् ॥ वा. भा पा. ४६९.

['गोत्ववत् प्रत्येकं परिसमाप्तेर्न दोष इति चेत्' (सू. भा. २-१-१८) इत्यवयवावयविसंबन्धपरीक्षावसरे इदमुक्तम् ॥]

(३) कारणमेव विशेषवद्वस्थान्तरमापद्यमानं कार्यम्, तच्च सामा-न्यात्मकम् । तथा हि, मृद् वा सुवर्णं वा सर्वेषु घटरुचकादिष्वनुगतं

सामान्यम् अनुभूयते, न चैते घटरुचकादयो मृत्सुवर्णाभ्यां व्यतिरिच्यन्त इत्युक्तम् । अग्रे च वक्ष्यामः ।....तस्मात् सामान्यस्य परमार्थसतोऽनिर्वाच्य-विशेषावस्थान्तरधिष्ठाना भुजङ्गादय इव रज्ज्वाद्युपादाना उपजनापायधर्माण इति सांप्रतम् ॥ वा. भा. पा. ५१५.

(४) वस्तुतः कार्यतत्त्वं न कारणाद् भिद्यते कारणस्वरूपमेव हि तत् । अनिर्वाच्यं तु कार्यरूपं भिन्नमिवाभिन्नमिव चावभासते । .... वस्तुतः परमार्थतोऽन्यत्वं न विशेषदर्शनमात्राद् भवति । सांव्यावहारिके तु कथञ्चित् तत्त्वान्यत्वे भवत एवेत्यर्थः ॥ वा. भा. पा. ४७०

अत्रापि वाचस्पतिमिश्रस्य मण्डनमिश्राधमर्ण्यं नाल्पं भेदाभेदनिरासे इति ब्रह्मसिद्धितर्कपादे कृतपरिश्रमाणां स्फुटम् । ब्रह्मसिद्धि–वार्तिक–भामतीतुलनाद् भेदाभेदवादनिरासयुक्तिविकासप्रकारो पाठकानां हृदयमागच्छेत् । कार्यस्य विशेषाणामंशस्य चानिर्वचनीयत्वस्वीकारेण भेदाभेद-निरासप्रकारस्त्वसाधारणो भामत्याः ॥

पञ्चकोशविवेकः –

१९७. आनन्दमयाधिकरणे वृत्तिकारमतेनाधिकरणरचनावर्णनप्रस्तावे 'यथा परमेश्वराद् भिन्नो जीवात्मा द्रष्टा न भवति । एवं जीवात्मनोऽपि द्रष्टुर्न भिन्नः परमेश्वर इति जीवस्यानिर्वाच्यत्वे परमेश्वरोऽप्यनिर्वाच्यः स्यात् । तथा च न वस्तुसन्' इति पूर्वपक्षमुत्थाप्योक्तम् –

(१) रजतं हि समारोपितं न शुक्तितो भिद्यते । न हि तद्भेदेना-भेदेन वा शक्यं निर्वक्तुम् । शुक्तिस्तु परमार्थसती निर्वचनीया अनिर्वच-नीयाद् रजताद् भिद्यत एव ॥ वा. भा. पा. १८४

इति । अत्र यद्यपि वृत्तिकारा इमे अद्वैतवादिनः, निर्विशेषब्रह्मस्वीकर्तारश्च इति गम्यते 'तस्मादणुमात्रमपि विशेषमनाश्रित्य न स्वत एव प्रियशिर-स्त्वादि ब्रह्मण उपपद्यते । न चेह सविशेषं ब्रह्म प्रतिपिपादयिषितम्, वाङ्मनसगोचरातिक्रमश्रुतेः । तस्मादन्नमयादिष्विवानन्दमयेऽपि विकारार्थ

एव मयड् विज्ञेयो न प्राचुर्यार्थः ॥' (सू. भा. १-१-२०, पा. ४३) इति भाष्यस्वारस्यात् । न हि पूर्वपक्षिणो निर्विशेषब्रह्मानङ्गीकारपक्षे तस्येत्थमनिष्टापादनमाञ्जसं भवेदिति । तथापि तु किममी वृत्तिकाराः शुक्तिरजतादीनां भामतीसंमतप्रक्रियानुरोधेनानिर्वचनीयताम् आतिष्ठन्ते स्म -इत्यत्र न नोऽस्ति विनिगमना । किञ्च, वृत्तिकारमतात् सिद्धान्तपक्षस्य ज्यायस्त्वप्रदिदर्शयिषया भामत्याम् एष श्लोकः संगृहीतः -

(२) प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम् ।
पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनम् ॥

इति। विवृतश्च श्लोकाभिप्राय इत्थम् -

(३) पुच्छपदं हि वालधौ मुख्यं सत्, आनन्दमयावयवे गौणमेवेति मुख्यशब्दार्थलङ्घनम् अवयवपरतायाम् अधिकरणपरतायां च तुल्यम् । अवयवप्रायलेखबाधश्च विकारप्रायलेखबाधेन तुल्यः । ब्रह्मपदम्, आनन्दमयपदम्, आनन्दपदमिति त्रितयलङ्घनं स्वधिकम् । तस्मात्, मुख्यत्रितयलङ्घनादसाधीयान् पूर्वः पक्षः, मुख्यत्रयानुगुण्येन तूत्तर एव पक्षो युक्तः ॥
वा. भा. पा. १८७.

इति । परं तु 'स्वप्रधानमिह ब्रह्म पुच्छं ज्ञेयत्वेन' (विवक्षितम्) इत्युपसंहरद्भिरपि पञ्चकोशविवेकेन कथङ्कारं पुच्छब्रह्मज्ञानं समुदेतीति नेह प्रतिपादितम् । वृत्तिकाराणाम् आनन्दमयं ब्रह्मोपास्यत्वेनाभिमतमित्यपि कथं निश्चीयते, येन 'तस्मादानन्दमयविकारावयवो ब्रह्मेति तदवयवयोग्यानन्दमयो विकार इह नोपास्यत्वेन विवक्षितः' (वा. भा. पा. १९१) इति निगम्यते ? - इत्यपि न विवेचितम् ॥

वयं तु पश्यामः- **वृत्तिकारा** इमे निर्विशेषवादिन एव। यथोक्तरीत्या 'प्रियशिरस्त्वादिधर्मोपदेशात्, सविशेषमेव ब्रह्मोपदिष्टं स्यात् भवत्पक्षे' - इत्यनिष्टापत्तिदोषप्रदर्शनात् भाष्यकारैः । न चेमे ब्रह्मेहोपास्यत्वेन निर्दिष्टमिति स्वीकुर्वन्ति । कथमिदं गम्यते ? अन्नमये

आत्मत्वबुद्धिं लोकसिद्धमनूद्य प्राणमयादीनप्यात्मत्वेन ग्राहयति अरुन्धती-निदर्शनन्यायेन मुख्यमात्मानमुपदिदिक्षु शास्त्रम् – इति युक्त्यानयन-दर्शनात्, प्रियादीनां शिरस्त्वादिकल्पनमप्यतीतानन्तरोपाधिजनितत्वोक्त्या आभासीकृत्य निरवयवस्यैव ब्रह्मणः प्रतिष्ठापनात् । 'शारीरत्वमपि' न शरीरे भव इत्यभिप्रेत्य, किं तर्हि अन्नमयादिशरीरपरम्परया प्रदर्श्य-मानत्वादित्यशरीरत्वस्यापि मुख्यात्मन उपपादनात् । 'आनन्दमय' इति मयट्प्रत्ययस्यापि प्रचुरानन्दत्वेनानन्दमीमांसाश्रुतिमालम्ब्य विकारार्थकत्व-प्रत्याख्यानात्, आनन्दहेतुत्वादेव प्रचुरानन्दत्वमुपपद्यत इति स्वोक्तयुक्ति-दृढीकरणाच्च । सर्वान्तरत्वनिर्देशेनैव मन्त्रवर्णे प्रकृतस्यैव सत्यज्ञानानन्त-विशेषणस्य ब्राह्मणेऽपि प्रत्यभिज्ञानम् इति गम्यते – इत्युपक्रमादि-लिङ्गप्रदर्शनाच्च । तस्मात्, यथोपदर्शितेभ्यो हेतुभ्य इह निर्विशेषं परं ब्रह्मैवानन्दमयशब्देन ज्ञेयत्वेन निर्दिष्टमिति वृत्तिकाराशयः । यद्यप्यद्वैत-मेवेदं ब्रह्म परमार्थतः, तथाप्यविद्याकल्पितात्, शारीरात् कर्तुर्भोक्तु-र्विज्ञानात्माख्यादन्य इति कृत्वा 'नेतरोऽनुपपत्तेः', 'भेदव्यपदेशाच्च' इति सूत्रितमिति ते अवयन्ति ॥

तदेवं ज्ञेयं ब्रह्मैव निर्विशेषमविद्याकल्पितात्मभ्योऽन्नमयादिभ्यो विलक्षणम् आनन्दमयशब्देनात्र ज्ञेयत्वेनोपदिष्टमिति वृत्तिकाराः कल्पयन्ति। न त्वेव क्वचिदप्युपास्यं ब्रह्मात्र निर्दिष्टमिति तेषामभिप्रायो गम्यते, भाष्यकारकृततन्मतानुवादानुसरणेन । भास्करस्तूपास्यब्रह्मवादी वृत्तिकारमत-मेव भगवत्पादाभिप्रेतमिति बभ्राम । वृत्तिकारसिद्धान्तमेवानुसृत्य सूत्राणि व्याख्यायापि भेदव्यपदेशाच्चेति सूत्रव्याख्याने निर्दिष्टं मायाविदृष्टान्तमुप-लभ्यातीवोद्वेजितः प्राह – 'अत्र केचित् स्वमतिकल्पितदर्शनपरित्राणाय सूत्रार्थं विनाशयन्तो व्याचक्षते' (भा.सू.पा.२६) इत्यादि । तत्खण्डनव्यग्रैः स्याद्भामतीकारैरपीह वृत्तिकारमते उपास्यं ब्रह्म विवक्षितमिति कल्पितम् । वस्तुतस्तु 'ब्रह्म पुच्छं प्रतिष्ठा' इति निर्दिष्टस्य ब्रह्मणः स्वातन्त्र्येण

प्रतिपिपादयिषितत्वे एव ज्ञेयब्रह्मवाक्यान्वयः सूपपादनो भवति, न त्वानन्दमयपुच्छत्वेन स्वीकृतत्वे–इत्येतावदभिप्रेत्य भाष्ये वृत्तिकारमतं दूषितमिति ॥

भवतु वेदं यथा तथा । पञ्चानामपि कोशानां पूर्वस्य पूर्वस्य उत्तरस्मिन्नुत्तरस्मिन् प्रविलापनार्थमेव 'अन्योऽन्तर आत्मा' इति कोशेषु आत्मबुद्धिरुपदिष्टा । तथा च सर्वस्यापि द्वैतप्रपञ्चस्य सर्पादेरिव रज्ज्वादौ प्रविलापनेन सर्वविकल्पास्पदं ब्रह्म विज्ञेयमित्युपदेश एव पञ्चकोशविवेक-प्रक्रियार्थः – इति पुच्छब्रह्मप्रक्रियाया ऐदंपर्यमिति तु निर्विवादम् । तदेतदत्र प्रस्थाने कुतः स्पष्टतया न निर्दिष्टमिति चिन्त्यमेतत् ॥

अवस्थात्रयविवेके स्वप्नविचारः –

१९८. भाष्यवार्तिकयोरिवात्रावस्थात्रयस्य प्रामुख्यं न दृश्यते । **'वैधर्म्याच्च न स्वप्नादिवत्'** (वे. सू. २–२–२९) इति सूत्रभाष्ये 'अपि च स्मृतिरेषा यत् स्वप्नदर्शनम्' इति भाष्यमित्थं व्याख्यातमत्र –

> (१) संस्कारमात्रजं हि विज्ञानं स्मृतिः । प्रत्युत्पन्नेन्द्रियसंप्रयोग-लिङ्गशब्दसारूप्यान्यथानुपपद्यमानयोग्यप्रमाणानुत्पत्तिलक्षणसामग्रीप्रभवं तु ज्ञानमुपलब्धिः । तदिह निद्राणस्य सामग्र्यन्तरविरहात् संस्कारः परि-शिष्यते । तेन संस्कारजत्वात् स्मृतिः । सापि निद्रादोषाद् विपरीता भवतीमानमपि पित्रादि वर्तमानतया भासयति । तेन स्मृतेरेव तावदुपलब्धि-र्विशेषः, तस्याश्च स्मृतेर्वैपरीत्यमित्यतो महदन्तरम् इत्यर्थः ॥
>
> वा. भा. २–२–२९, पा. ५५५, ५५६.

[अत्र जाग्रत्, स्वप्नः – इति च व्यपदेशभेदादेव लोको जाग्रद्दर्शनम् अनुभवत्वेनोपगम्य, तद्दृष्ट्या स्वप्नं स्मृतित्वेनावगच्छतीति स्पष्टम् । तदेतदेतयो-रन्तरं स्वीकृत्यैव च सौगतेनाप्यनुमानं कियते स्वप्नादिप्रत्ययवज्जागरित गोचरा अपि स्तम्भादिप्रत्यया विनैव बाह्येनार्थेन भवितुमर्हन्तीति । तदेतदयुक्तमनु-भवापलापप्रसङ्गात्, न ह्युपलब्धेः स्मृतेश्चान्तरमनुभवतैव शक्यमनुमातुम् स्मृतिवदुपलब्धिः स्यादिति–इत्येतावान् भाष्याशयः । न तु स्वप्नः स्मृतिरिति निर्धारणमत्र विवक्षितम् । अन्यत्रावस्थयोरुभयोः साम्यस्थापनात् ॥]

'आत्मनि चैवं विचित्राश्च हि' (वे. सू. २-१-२८) इति सूत्रभाष्यटीकायाम् –

(२) 'अनेन स्फुटितो मायावादः । स्वप्नदृगात्मा हि मनसैव स्वरूपानुपमर्देन रथादीन् सृजति ॥ वा. भा. पा. ४७७.

[अत्र सृष्टिरविवक्षितेत्यनुपदमेव स्पष्टीभविष्यति ॥]

(३) यद्यपि ब्रह्मणोऽन्यस्यानिर्वाच्यतया जाग्रत्स्वप्नावस्थागतयोरुभयोरपि सर्गयोर्मायामयत्वम्; तथापि यथा जाग्रत्सृष्टिर्ब्रह्मात्मभावसाक्षात्कारात् प्रागनुवर्तते, ब्रह्मात्मभावसाक्षात्कारात्तु निवर्तते । एवं किं स्वप्नसृष्टिः, आहोस्वित् प्रतिदिनमेव निवर्तते ? – इति विमर्शार्थः ॥

वा. भा. पा. ६८७–६८८.

[नायं विमर्शार्थः । स्वप्नः प्रतिदिनं बाध्यत इति लोकप्रसिद्धत्वात् । 'ब्रह्मणोऽन्यस्यानिर्वाच्यतया' इत्येतत् स्वप्नस्थानानुगुणम् । वस्तुतस्तु सर्वस्यापि ब्रह्मणोऽनन्यत्वेन, उभयोरपि दर्शनमविद्याप्रत्युपस्थापितमिति मायामयमित्येव वक्तुं युक्ततरम् । साक्षात्कारात् सृष्टिनिवृत्तिस्तु तत्परीक्षावसरे एव विम्रश्यते ॥]

(४) इह हि सर्वाण्येव मिथ्याज्ञानान्युदाहरणम् । तेषां सत्यत्वं ज्ञायते प्रकृतोपयोगितया तु स्वप्नज्ञानमुदाहृतम् ॥ वा. भा. पा. ६८८.

[यद्यपि स्वप्नज्ञानविमर्शनेन शुक्तिरजतादिमिथ्याज्ञानान्यपि विमृष्टानि भवन्ति, तथापि सर्वेषामपि मिथ्याज्ञानानां परीक्षणं नात्र विवक्षितमिति भाति । न हि शुक्तिरजतादीनां सत्यत्वं लौकिका आतिष्ठन्ते । न च ज्ञानसामान्यं वेदान्ते विमृश्यते । स्वप्नविचारस्तु अवश्यकरणीयोऽत्र । यदि हि स्वप्नदृश्यं सत्यं तत्कालेऽपि, तर्हि नात्मनोऽसङ्गता ; अथ मिथ्या तत्, तत्सिद्धिरप्रत्यूहेति । अपि च शुक्तिरजतादिप्रतीतिः, वस्त्वन्तरदर्शनं न विरुणद्धि । तत्र पाषाणमस्ति, अत्र तु रजतम् – इत्यपि भ्रान्तिवेलायां सत्यवस्त्वन्तरपरामर्शसंभवात् । स्वप्ने पुनर्जाग्रत्परामर्शः सर्वथा नास्त्येवेति वैषम्यम् । जाग्रद्बुद्ध्युत्पादकत्वाच्च स्वप्नस्य न तत्काले मिथ्यात्वनिश्चयावकाशः । श्रुतिश्च 'सृजते' इति स्वप्नस्य तत्काले सत्यतामाचष्टे । अतः स्वप्नः किं स्वकाले सत्य एव, उत मिथ्यैव सन् सत्यबुद्धिकारणमात्रमिति विमर्श इति युक्तमिति भाति ॥]

'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्' (वे. सू. ३-२-३) इत्यस्य टीकायाम् –

(५) 'न तावत् क्षीरस्येव दधि रजतस्य परिणामः शुक्तिः संभवति इत्यादि, 'अध्यवसेयश्च सन्तान' इत्यन्तम् ॥ वा. भा. पा. ६८९-६९२.

[अत्र शुक्तिरजतादेः सत्यत्ववादप्रतिक्षेपो नापेक्षित इत्युक्तम् । 'एतेन स्वप्नप्रत्ययो मिथ्यात्वेन व्याख्यातः' इति तु भाष्योक्तप्रकारेण सर्वसंप्रतिपन्नम् ॥]

अत्र 'संध्ये सृष्टिराह हि' इति पूर्वपक्षस्य दौर्बल्यप्रदर्शनपरो भाष्यग्रन्थो न व्याख्यातः । तत्र भाष्यार्थविभाग इत्थं करणीयः –

(१) यथा 'लाङ्गलं गवादीन् उद्वहति' इति निमित्तमात्रत्वादेवमुच्यते, न तु प्रत्यक्षमेव लाङ्गलं गवादीन् उद्वहति ; एवं निमित्तमात्रत्वात् सुप्तो रथादीन् सृजते स हि कर्ता' इत्युच्यते न तु प्रत्यक्षमेव सुप्तो रथादीन् सृजति । निमित्तत्वं स्वस्य रथादिप्रतिभाननिमित्तमोदत्रासादिदर्शनात् तन्निमित्तभूतयोः सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यम् । ..... एतेन निर्माणश्रवणं व्याख्यातम् ॥ सू. भा ३-२-४, पा. ३४६.

[अत्र सुप्तस्य स्रष्टृत्वं नास्त्येव, कर्तृत्वं तु गौणं पूर्वकृतकर्मफलभूतमोदत्रासाद्यनुभवदृष्ट्या-इत्युक्तम् ॥]

(२) यदप्युक्तं 'प्राज्ञमेनं निर्मातारमामनन्ति' (वे. सू. ३-२-२) इति, तदप्यसत् । श्रुत्यन्तरे 'स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति' इति जीवव्यापारश्रवणात् । इहापि 'य एषु सुप्तेषु जागर्ति' इति प्रसिद्धानुवादात्, जीव एवायं कामानां निर्माता संकीर्त्यते ॥ सू. भा. पा. ३४६.

[अत्र स्वप्नदृश्यनिर्माणं जीवकर्तृकमेव, न प्राज्ञकर्तृकम् ; तदप्युक्तेन प्रकारेण गौणम्-इत्युक्तम् ॥]

(३) अपि च जागरिते विषयेन्द्रियसंयोगात्, आदित्यादिज्योतिर्व्यतिकराच्च, आत्मनः स्वयञ्ज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः । तत्र यदि रथादिसृष्टिवचनं श्रुत्या नीयेत, तदा स्वयञ्ज्योतिष्ट्वं न निर्णीतं स्यात् । तस्मात्, रथाद्यभाववचनं श्रुत्या, रथादिसृष्टिवचनं तु भक्त्या इति व्याख्येयम् ॥ सू. भा. ३-२-४.

[स्वयञ्ज्योतिष्ट्वमेव तात्पर्येण प्रतिपिपादयिषितमिति रथाद्यभाव एव प्राधान्येन श्रूयते, सृष्टिस्तु पूर्वोक्तप्रकारेण जीवस्य निमित्तमात्रत्वात् ॥]

(४) न चास्माभिः स्वप्नेऽपि प्राज्ञव्यवहारः प्रतिषिध्यते । तस्य सर्वेश्वरत्वात्, सर्वास्ववस्थास्वधिष्ठातृत्वोपपत्तेः ॥ सू. भा. पा. ३४६.

[प्राज्ञकर्तृकसृष्टिमात्रं प्रतिषिध्यते, न तु जीवस्य भोदत्रासाद्यनुभवफलप्रदातृत्वम् । सर्वकर्माध्यक्षत्वात्, तन्निमित्त एव हि जीवानां फलानुभवः इत्यर्थः ॥]

(५) पारमार्थिकस्तु नायं संध्याश्रयः सर्गो वियदादिसर्गवत् – इत्येतावत् प्रतिपाद्यते ॥ सू. भा. ३-२-४, पा. ३४६.

[यथा श्रुतिः 'आत्मन आकाशः संभूतः' इति प्राज्ञकर्तृकां सृष्टिं ब्रूते, एवं 'स्वप्नः संभूतः' इति न वक्ति । अतः स्वप्नः परमार्थ इति न श्रुतिप्रमाणेन प्रत्यवस्थातव्यम् इत्यर्थः ॥]

(६) न च वियदादिसर्गस्याप्यात्यन्तिकं सत्यत्वमस्ति । प्रतिपादितं हि 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (वे. सू. २-१-१४) इत्यत्र समस्तस्य प्रपञ्चस्य मायामात्रत्वम् । प्राक् तु ब्रह्मात्मत्वदर्शनात् वियदादिप्रपञ्चो व्यवस्थितरूपो भवति । संध्याश्रयस्तु प्रपञ्चः प्रतिदिनं बाध्यत इति । अतो वैशेषिकमिदं संध्यस्य मायामात्रत्वमुदितम् ॥ पा. ३६६-३४७.

[वियदादिसर्गस्य प्राज्ञसृष्टत्वं यथा, न तथा संध्यस्य सृष्टत्वम् । मायात्वं तु समानम् उभयोः – इति ॥]

अङ्गीकृत्यापि जाग्रत्प्रपञ्चस्य सत्यत्वम्, तदपेक्षया न सन्त्येव रथादयः स्वप्ने । प्रतिभानमात्रं तु तेषामित्युक्तमत्र । सर्वस्यापि स्वप्नदृश्यस्य बाह्यस्येवाध्यात्मिकस्यापि मिथ्यात्वे निश्चिते स्वयञ्ज्योतिर्ब्रह्म सिध्यतीति च । वियदादिसर्गस्यापि मायामात्रत्वमुदितं कार्यकारणानन्यत्वन्यायमालम्ब्य । उभयोरप्यवस्थयोः सर्वसमत्वं वैतथ्यं च गौडपादीयवैतथ्यप्रकरणे प्रतिपादितमेवमनेन भाष्येणैकवाक्यतां भजते । तदिह भामतीप्रस्थाने नैव सूचितम् ॥

अवस्थात्रयविवेके सुषुप्तिविचारः –

१९९. सुषुप्तिविचारे मण्डनप्रस्थानमेव प्रायशोऽनुसृतमत्र –

(१) यद्यपि चात्राभावप्रत्ययालम्बना वृत्तिर्नेष्यते, तथापि विक्षेप-संस्कारलक्षणा मनोवृत्तिरिहास्त्येवेति सर्वमवदातम् ॥

वा. भा. २-४-१३, पा. ६४२.

(२) यद्यपि प्राग्मात्रावशेषतातन्निःशेषते सुषुप्तिप्रलयावस्थयो-र्विशेषः, तथापि कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्यावशेषसाम्येन स्वापप्रलयावस्थयोरभेद इति द्रष्टव्यम् ॥ वा. भा. १-३-३, पा. ३३५.

[अत्र पुरुषान्तरदृष्ट्यैव सुषुप्तिः परीक्षिता न सुप्तपुरुषदृष्ट्या - इति न प्रस्मर्तव्यम् । सौषुप्तानुभवदृष्ट्या तु नास्त्येव सुषुप्तिप्रलययोर्भेदः । 'सुषुप्ता-व्याकृतयोस्त्वेकत्वं सिद्धमेव, निर्विशेषत्वात्' इति माण्डूक्यभाष्यम् (पा. १८०) इहानुसंधेयम् ॥]

(३) तस्माद्यत्रास्य आत्मनो यतो निःसंबोधोऽतः स्वच्छतारूपमिव रूपमस्येति स्वच्छतारूपः । न तु स्वच्छतैव ; लयविक्षेपसंस्कारयोः तत्र भावात् ॥ वा. भा. १-४-१८, पा ४०९.

(४) यथा घटाकाशो नाम न परमाकाशादन्यः, अथ चान्य इव यावद्घटम् अनुवर्तते ; न चासौ दुर्विवेचः, तदुपाधेर्घटस्य विविक्तत्वात् ; एवम् अनाद्यनिर्वचनीयाविद्योपधानभेदोपाधिकल्पितो जीवो न वस्तुतः परमात्मनो भिद्यते, तदुपाध्युद्भवाभिभवाभ्यां चोद्भूत इव, अभिभूत इव प्रतीयते । ततश्च सुषुप्तादावपि अभिभूत इव, जाग्रदवस्थादिषूद्भूत इव । तस्य च, अविद्यातद्वासनोपाधेरनादितया कार्यकारणभावेन प्रवहतः सुविवेक-तया तदुपहितो जीवः सुविवेक इति ॥ वा. भा. ३-२-९, पा. ७०५.

[अत्र सुषुप्तिप्रबोधयोः कार्यकारणभावोऽविद्यातद्वासनयोः कार्यकारण-भावादित्युक्तम् । कार्यकारणयोः कालाधारापेक्षणात्, सुषुप्तौ च सर्वथा काला-भावात्, कथमेतद् घटते इति तु न कुत्रापि विवेचितं प्रस्थानेऽत्र ॥]

(५) अथ तु परमात्मैव नाडीपुरीतत्सृप्तिद्वारा सुषुप्तिस्थानम्, ततो विपरीतज्ञाननिवृत्तेरस्तिमात्रया परमात्मभाव उपयोगः । तया हि तावदेष जीवस्तदवस्थानो भवति केवलम् । तत्त्वज्ञानाभावेन समूलकाषम् अविद्याया अकाषात् जाग्रत्स्वप्नलक्षणं जीवस्य व्युत्थानं भवति ॥ वा. भा. पा. ६९६.
[सत्यप्यविद्याव्यवधाने कथमात्मैव सुप्तिस्थानम् - इति तु न विवेचितमत्र ॥]

(६) तस्मात् सुषुप्तमोहावस्थयोर्ब्रह्मणा संपत्तावपि सुषुप्ते यादृशी संपत्तिः, न तादृशी मोहे इत्यर्धसंपत्तिरुक्ता ॥ वा. भा. पा. ७०७.

[अत्र न संपत्तौ कश्चिद्विशेषः । अनुभवे विशेषाभावात् । 'न ब्रूमो मुग्धेऽर्धसंपत्तिर्जीवस्य ब्रह्मणा भवतीति' इति भाष्यविरोधश्चार्धसंपत्तिस्वीकारपक्षस्य । सुषुप्ते कृत्स्नसंपत्तिरेव तथा मोहेऽपीति खलु पूर्वः पक्षः ; तच्चानुमतमेव भाष्ये । तदिह प्रस्थाने सुषुप्ते मात्रया परमात्मभावः, मुग्धेऽर्धसंपत्तिरिति च विनाकारणं तारतम्यं स्वीकृतमनयोः ॥]

इदमत्रावधेयम् । देहेन्द्रियादिष्वहंममाभिमानयुक्तानाम् अविविक्तमिव स्वात्मनो ज्योतिःस्वरूपमिति तद्विवेकायावस्थात्रयपरीक्षणे प्रवृत्ताः श्रुतयः क्वचित् पूर्वपक्षेण तत्र तत्र दोषमुद्भाव्य तद्विवेकार्थमवस्थान्तरमुपन्यस्य पर्यन्ते सर्वावस्थातीतं परमात्मस्वरूपं दर्शयन्ति । यथा **दहरविद्यायाम्** 'अन्धो भवति', 'घ्नन्ति त्वेवैनम् .... रोदितीव'[1], 'नाह खल्वयमेवं संप्रत्यात्मानं जानाति' इति दोषमुद्भाव्य शरीरादिभ्यो विविक्तं निरवद्यं स्वरूपं दर्शितम् 'असाच्छरीरात् समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छां. ८-१२-३) इति । क्वचिच्च तत्तदवस्थोपहितात्मानं तत्तत्समष्ट्युपाधिपरिच्छिन्नमिव दर्शयित्वा जीवत्वनिरसनेन वैश्वानरहिरण्यगर्भाव्याकृतात्मरूपमापाद्य पर्यवसाने सर्वावस्थासंपर्कविधुरं निरुपाधिकं तुरीयरूपं दर्शयन्ति । यथा **माण्डूक्ये** पादचतुष्टयकल्पनेन पर्यन्ते 'नान्तःप्रज्ञम्' इत्यादिना 'चतुर्थं मन्यन्ते स आत्मा' (मां. ७) इति निरवद्यं स्वरूपं दर्शितम् । क्वचित् पुनः सुषुप्तावस्थायामेवाविद्याकामकर्मरहितं परिशुद्धं स्वरूपं दर्शयन्ति यथा छान्दोग्ये सद्विद्यायाम् 'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति' (छां. ६-८-१) इति, यथा वा

1. भामत्यां तु व्युत्क्रमेण व्याख्यातमिदम् । 'अन्धो भवती'ति स्वप्नावस्था दर्शिता, बाह्येन्द्रियव्यापाराभावात् ; 'रोदितीव' इति जाग्रदवस्था, दुःखशोकाद्यात्मकत्वात् (वा. भा. पा. १००६) - इति । लेखकप्रमादोऽयमिति श्रुत्यनुक्रमदर्शनेनावगम्यते ॥

बृहदारण्यके 'तद् वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपम्। .... प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' (बृ. ४-३-२१) इति। तत्राविद्याशक्तिं लयलक्षणाविद्यापराभिधां यदि मिथ्याज्ञानबाधनेनैव बाधितामेव मन्यन्ते भामतीकाराः, तर्हि न कोऽपि विरोधो भाष्यभामती-प्रस्थानयोः। अविद्याशक्तेर्मिथ्याज्ञानप्रतिबद्धानुमानमात्रप्रमितत्वाभ्युपगमात् उभयोरपि। तथा ह्याहुर्भामतीकाराः –

(६) मिथ्याज्ञानविभागशक्तिप्रतिनियमेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः प्रत्युक्तः। कारणाभावे कार्याभावस्य प्रतिनियमात्, तत्त्वज्ञानेन च सशक्तिक[1] मिथ्याज्ञानस्य समूलघातं निहतत्वात्॥ वा. भा. पा. ४४७-४४८

इति। अवस्थापरीक्षया नावस्थावत्त्वं विवक्षितमित्यप्युभयोः समेव। तथा हि 'न बुद्धान्तावस्थोपन्यासेनावस्थावत्त्वं संसारित्वं वा विवक्षति, किं तर्हि अवस्थारहितत्वम् असंसारित्वं च' (सू. भा. १-३-४२) इति भाष्यम्, तट्टीका च –

(७) नानेनावस्थावत्त्वं विवक्ष्यते, अपि तु, अवस्थानाम् उपजनापायादिधर्मकत्वेन तदतिरिक्तमवस्थारहितं परमात्मानं विवक्षति। उपरितनवाक्यसंदर्भालोचनादिति॥ वा. भा. पा. ३६९, ३७०.

[न केवलमन्योन्यव्यभिचारात्, किं तु स्वरूपव्यभिचाराच्च सुषुप्ते स्वप्नजागरयोर्मिथ्यात्वम्-इत्यपि वार्तिके स्फुटतरमेतद् विज्ञापितम्॥]

मोक्षस्य स्वरूपावस्थानलक्षणत्वान्नित्यत्वम् –

२००. 'मोक्षास्त्यमशरीरत्वं नित्यम्' (सू. भा. १-१-४) इति भाष्यव्याख्यानम् –

(१) यत् किल स्वाभाविकं तन्नित्यम्, यथा चैतन्यम्। स्वाभाविकं चेदम्, तस्मान्नित्यम्॥ वा. भा. पा. ११६, ११७.

(२) साध्यं हि साधनविशेषाद् विशेषवद् भवति। न च मुक्तिर्ब्रह्मणो नित्यस्वरूपावस्थानलक्षणा नित्या सती साध्या भवितुमर्हति॥ वा. भा. पा. ९२६.

---

1. 'स्वशक्तितो' इति पाठान्तरम्॥

(३) यद्यपि मुक्तिरदृष्टचरी, तथापि सवासनाविद्योच्छेदेनात्मनः स्वरूपावस्थानलक्षणायास्तस्याः श्रुतिसिद्धत्वात् .... ॥ वा. भा. पा. ९२९.

(४) क्षणिकं ज्ञानमात्मेति बौद्धाः । तथा च विशुद्धविज्ञानोत्पादो मोक्ष इति निर्वर्त्यो मोक्षः । अन्येषां तु संसाररूपावस्थाम् अपहाय या कैवल्यावस्थावाप्तिरात्मनः स मोक्ष इति विकार्यो मोक्षः । .... तदेतयोः पक्षयोरनित्यता मोक्षस्य कार्यत्वात् दधिघटादिवत् । ....नाविद्या ब्रह्माश्रया, किं तु जीवे ; सा त्वनिर्वचनीयेत्युक्तम् । तेन नित्यशुद्धमेव ब्रह्म । अभ्युपेत्य त्वशुद्धिं क्रियासंस्कार्यत्वं दूष्यते ॥ वा. भा. पा. १२६.

जीवन्मुक्तिः –

२०१. यथैव मण्डनमिश्रः जीवन्मुक्तिमनुमन्यते (ब्र. सि. 132), एवमेव वाचस्पतिरप्यनुमन्यते । अत एव भास्करोक्तजीवन्मुक्तिनिराकरणमनादृत्य भाष्यानुसारेणार्चिरादिमार्गेण ब्रह्मप्राप्तिरपरब्रह्मविद एव न ज्ञानिन इति व्यवस्थापयति –

(१) कार्यमप्राप्तपूर्वत्वादप्राप्तप्रापणी गतिः ।
प्रापयेद् ब्रह्म न परं प्राप्तत्वाज्जगदात्मकम् ॥ ....

—विदुषोऽपि देहपातात् पूर्वं स्थितप्रज्ञस्य यथाभासमात्रेण सांसारिकधर्मानुवृत्तिरभ्युपेयते, एवम् आ लिङ्गशरीरपातात् विदुषस्तद्धर्मानुवृत्तिः । तथा च प्राप्तप्राप्तिर्गत्युपपत्तिः । तद्देशप्राप्तौ च लिङ्गदेहनिवृत्तेर्मुक्तिः श्रुतिप्रामाण्यात् इति चेत् । न । परविद्यावत उत्क्रान्तिप्रतिषेधात् ॥ वा. भा. पा. ९९४.

(२) न खलु 'ब्रह्मैवेदं विश्वम्', 'अहं ब्रह्मास्मि' – इति परिभावनाभुवा जीवात्मनो ब्रह्मभावसाक्षात्कारेणोन्मूलितायाम् अनवयवेनाविद्यायाम् अस्ति गन्तव्यगन्तृविभागो विदुषः, तदभावे कथमयम् अर्चिरादिमार्गे प्रवर्तेत ? .... न च अर्चिरादिमार्गभावनायाः परब्रह्मप्राप्त्यर्थम् अविदुषः प्रत्युपदेशः ; तथा च कर्मान्तरेष्विव नित्यादिषु तत्रापि स्यात् तस्य प्रवृत्तिरिति सांप्रतम् । विकल्पासहत्वात् । किमियं परविद्यानपेक्षा परब्रह्मप्राप्तिसाधनम्, तदपेक्षा वा ? न तावदनपेक्षा ; 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति परब्रह्मविज्ञानादन्यस्याध्वनः साक्षात् प्रतिषेधात् । परविद्यापेक्षत्वे तु मार्गभावनायाः किमियं विद्याकार्ये मार्गभावना

साहायकम् आचरति, अथ विद्योत्पादे ? न तावद् विद्याकार्ये ; तया सह तस्या द्वैताद्वैतगोचरतया मिथो विरोधेन सहासंभवात् । नापि यज्ञादिवद् विद्योत्पादे, साक्षाद् ब्रह्मप्राप्त्युपायत्वश्रवणात् 'एतान् ब्रह्म गमयति' इति । यज्ञादेस्तु विविदिषासंयोगेन श्रवणाद् विद्योत्पादाङ्गत्वम् । तस्मात्, उपन्यस्तबहुश्रुत्यनुरोधादुपपत्तेश्च ब्रह्मशब्दोऽसंभवन्मुख्यवृत्तिः, ब्रह्मसामीप्यादपरब्रह्मणि लक्षणया नेतव्यः ॥ वा. भा. पा. ९९४, ९९५.

[अत्र मुक्तिहेतोः परब्रह्मणोऽर्चिरादिमार्गेण प्राप्यत्वं प्रत्याख्यातम् ॥]

(३) यद्यप्यद्वैतब्रह्मतत्त्वसाक्षात्कारोऽनाद्यविद्योपदर्शितप्रपञ्चमात्रविरोधितया तन्मध्यपतितसकलकर्मविरोधी ; तथाप्यनारब्धविपाकं कर्मजातं द्रागित्येव समुच्छिनत्ति, न तु आरब्धविपाकं संपादितजात्यायुर्वितत्पूर्वापरीभूतसुखदुःखोपभोगप्रवाहं कर्मजातम् । तद् हि समुदाचरद्वृत्तितया इतरेभ्यः प्रसुप्तवृत्तिभ्यो बलवत् । अन्यथा देवर्षीणां हिरण्यगर्भमनूद्दालकप्रभृतीनां विगलितनिखिलक्लेशजालावरणतया परितः प्रद्योतमानबुद्धिसत्त्वानां न ज्योगजीविता भवेत् । श्रूयते चैषां श्रुतिस्मृतीतिहासपुराणेषु तत्त्वज्ञता च महाकल्पकल्पमन्वन्तरादिजीविता च । न चैते महाधियो न ब्रह्मविदः, अब्रह्मविदश्चाल्पपुण्यमेधसो मनुष्या इति श्रद्धेयम् । तस्मात्, आगमानुसारतोऽस्ति प्रारब्धविपाकानां कर्मणां प्रक्षयाय तदीयसमस्तफलोपभोगप्रतीक्षा सत्यपि तत्त्वसाक्षात्कारे ॥ वा. भा. पा. ९५७–९५८.

(४) 'तावदेव चिरम्' इति न चिरता विधीयते अपि तु श्रुत्यन्तरसिद्धां चिरताम् अनूद्य देहपातावधिमात्रविधानम् ॥ वा. भा. पा. ९५८.

[अयमपि पक्षो मण्डनाभ्युपगत एव । तावदेव चिरम् इति स्थैर्यमाह (ब्र. सि. 130) इति । सद्योमुक्तिपक्षस्तु तदुक्तोऽत्र नाद्रियते इति भाति ॥]

(५) यदा लोकेऽपि विरोधिनोः कञ्चित् कालं सहानुवृत्तिरुपलब्धा, तदा इहागमबलाद् दीर्घकालमपि भवतीति न शक्या निवारयितुम् । प्रमाणसिद्धस्य नियोगपर्यनुयोगानुपपत्तेः ॥ वा. भा. पा. ९५८, ९५९.

[अत्र विरोध एव कथमिति नोपपादितम् । न ह्यकर्त्रात्मबोधस्य मिथ्याज्ञानाभासानुवृत्त्या विरोधिता, अपि तु मिथ्याज्ञानेन । तत्तु मिथ्याज्ञानं विद्योत्पत्तिसमकालमेव बाधितमिति को विरोधो नामेति ॥]

(६) स्थितप्रज्ञश्च न साधकः । तस्योत्तरोत्तरध्यानोत्कर्षेण पूर्वप्रत्ययानवस्थितत्वात् । निरतिशयस्तु स्थितप्रज्ञः । स च सिद्ध एव ॥

वा. भा. पा. ९५९.

[श्रुतिस्मृत्युक्तेन स्थितप्रज्ञलक्षणेन जीवन्मुक्तिः सिध्यतीति भाष्याभिप्रायं विवरीतुमेतदुक्तम् । मण्डनस्तु 'स्थितप्रज्ञस्तावन्न विगलितनिखिलाविद्यः सिद्धः, किं तु साधक एवावस्थाविशेषं प्राप्तः स्यात्' (ब्र. सि. 130) इत्याह । तदपीह प्रतिक्षिप्तम् । अत्र साधकस्य ध्यानोत्कर्षेण तारतम्यम्, स्थितप्रज्ञस्य च निरतिशयावस्थत्वमित्युक्तं न भाष्यानुगुणम् । न हि भाष्यकारः साधनोत्कर्षेण साधकस्य स्थितप्रज्ञत्वमाप्यत इत्यनुमन्यते, किं तु निदिध्यासनपूर्वकमात्मलक्षणविवेचनेन । तथा हि गीताभाष्ये 'स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो विद्वान्' (गी. भा. २-५५) इति ॥]

(७) न च ज्ञानकार्या भयकम्पादयः । ज्ञानमात्रादनुत्पादात् । सर्पावच्छेदो हि तस्य भयकम्पादिहेतुः । स च सासन्, अनिर्वचनीय इति कुतो वस्तुसतः कार्यस्योत्पादः ? न च कार्यमपि भयकम्पादि वस्तुसत् । तस्यापि विचारासहत्वेनानिर्वाच्यत्वात् । अनिर्वाच्याच्चानिर्वाच्योत्पत्तौ नानुपपत्तिः । यादृशो हि यक्षस्तादृशो बलिरिति सर्वमवदातम् ॥

वा. भा. पा. ९५९.

अत्र 'अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति । बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्तत एव । अपि च नैवात्र विवदितव्यं ब्रह्मविदा कञ्चित् कालं शरीरं ध्रियते न वा इति ।' इत्यादिभाष्याशयसमालोचनेनेदमवगम्यते यन्मिथ्याज्ञानकृतत्वात् कर्तृत्वभोक्तृत्वयोः सर्वाण्येव कर्माणि तत्कारकफलानि च विदुषो दृष्ट्या सर्वथा बाधितान्येव भवन्तीति । यदुक्तं त्रयोदशसूत्रभाष्ये – 'त्रिष्वपि कालेष्वकर्तृत्वभोक्तृत्वस्वरूपं ब्रह्माहमस्मि ; नेतः पूर्वमपि कर्ता भोक्ता वा अहमासम्, नेदानीम्, नापि भविष्यत्काले– इति ब्रह्मविदवगच्छति' (सू. भा. ४–१–१३) इति, स एव सिद्धान्तः । 'सशरीर एव सन् साधको साधनानुगुणमेव ज्ञानमवाप्य मोक्षमवाप्नोति' इति संव्यवहारदृष्टिमवलम्ब्येदं सूत्रं प्रववृते 'अनारब्धकार्ये एव तु ....'

(वे. सू. ४-१-१५) इति, **भाष्यं च** 'स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं च' इतीति वेदितव्यम्। अन्यथा हि 'शरीरे पतिते अशरीरत्वं स्यात्, न जीवतः -इति चेत्। न। सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्' (सू. भा. १-१-४) इति परमसिद्धान्तदृष्ट्या प्रागुपन्यस्तौ चोद्यपरिहारौ निरवकाशीक्रियेयातामिति। **भामतीप्रक्रियानुसारेण** ज्ञानभयकम्पादीनामनिर्वचनीयत्वेन चोद्यसमाधानं तु मण्डनप्रक्रियानुसरणव्यसनितयेति ब्रह्मसिद्धिस्थसमानप्रकरणग्रन्थ(ब्र. सि. 131)समालोचकानां स्फुटं भवति ॥

मोक्षसाधनविचारः -

२०२. मुक्तिसाधनसोपानमित्थं वर्णितं भामत्याम् -

(१) नित्यकर्मानुष्ठानाद् धर्मोत्पादः, ततः पाप्मा निवर्तते। स हि अनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्यातिलक्षणेन विपर्यासेन चित्तसत्त्वं मलिनयति। अतः पापनिवृत्तौ प्रत्यक्षोपपत्तिद्वारापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्य अनित्याशुचिदुःखरूपताम् अप्रत्यूहम् अवबुध्यते। ततोऽस्य अस्मिन् अनभिरतिसंज्ञं वैराग्यम् उपजायते। ततस्तज्जिहासा उपावर्तते। ततो हानोपायं पर्येषते। पर्येषमाणश्चात्मतत्त्वज्ञानम् अस्योपाय इत्युपश्रुत्य तज्जिज्ञासते। ततः श्रवणादिक्रमेण तज्जानाति -इत्यारादुपकारकत्वं तत्त्वज्ञानोत्पादं प्रति चित्तसत्त्वशुद्ध्या कर्मणां युक्तम्॥
वा. भा. पा. ६२-६३.

(२) विविदिषुः खलु युक्त एकाग्रतया श्रवणमनने कर्तुमुत्सहते। ततोऽस्य 'तत्त्वमसि' इति वाक्याद्विविचिकित्सज्ञानमुत्पद्यते। न चानिर्विचिकित्सं तत्त्वमसीति वाक्यार्थमवधारयतः कर्मण्यधिकारोऽस्ति, येन भावनायां वा भावनाकार्ये वा साक्षात्कारे कर्मणामुपयोगः। एतेन वृत्तिरूपसाक्षात्कारकार्ये अपवर्गे कर्मणाम् उपयोगो दूरनिरस्तो वेदितव्यः। तस्मात्, यथैव शमदमादयो यावज्जीवमनुवर्तन्ते, एवम् आश्रमकर्मापि' (भा. सू. पा. २०७) इत्यसमीक्षिताभिधानम्॥ वा. भा. पा. ८९९.

[अत्र वाक्याज्ज्ञानोत्पत्तावपि बलवत्संस्कारसामर्थ्यान्मिथ्यावभासानुवृत्तिर्भवति। तन्निवृत्तयेऽस्ति ज्ञानाभ्यास यज्ञाद्यनुष्ठानापेक्षा - इति ब्रह्मसिद्धि (पा. 35)पक्षम् उपेक्ष्य समुच्चयवादो निराकृतः। भास्कराचार्यपक्षस्तु कण्ठरवेणैव निरस्तः॥]

(३) अन्तःकरणवृत्तौ ब्रह्मसाक्षात्कारे जनयितव्येऽस्ति तदुपासनायाः कर्मापेक्षा इति चेत् । न तस्याः कर्मानुष्ठानेन सहभावाभावेन तत्सहकारित्वानुपपत्तेः ॥ वा. भा. पा ५८.

(४) यद्युच्येत निश्चितेऽपि तत्त्वे विपर्यासनिबन्धनो व्यवहारोऽनुवर्तमानो दृश्यते ... तस्मादविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानम् । तेन च विद्यासहकारिणा तत्समुच्छेद उपपस्स्यते । न च कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति, कर्मणो वा तदुच्छेदकस्य कुत उच्छेद इति वाच्यम् । सजातीयस्वपरविरोधिनां भावानां बहुलमुपलब्धेः । .... अत्रोच्यते – सत्यम् 'सदेव सोम्येदम्' इत्युपक्रमात् 'तत् त्वमसि' इत्यन्तात् शब्दात् ब्रह्ममीमांसोपकरणात्, असकृदभ्यस्तात्. निर्विचिकित्सेऽनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्तौ अनुवर्तन्ते सांसारिकाः प्रत्ययाः, तद्व्यवहाराश्च ; तथापि तानप्ययं व्यवहारप्रत्ययान् मिथ्येति मन्यमानो विद्वान् न श्रद्धत्ते पित्तोपहतेन्द्रिय इव गुडं थूत्कृत्य त्यजन्नपि तस्य तिक्तताम् । तथा चायं क्रियाकर्तृकरणेतिकर्तव्यताफलप्रपञ्चम् अतात्त्विकं विनिश्चिन्वन् कथमधिकृतो नाम ? विदुषो ह्यधिकारः । .... । न खल्वयं सर्वथा मनुष्याभिमानरहितः, किं त्वविद्यासंस्कारानुवृत्त्याऽस्य मात्रया तदभिमानोऽनुवर्तते । ... तथा च सांसारिक इव श्रद्धावगतब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्तमानः प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः । तस्मान्नोपासनायाः कार्ये कर्मापेक्षा । अत एव नोपासनोत्पत्तावपि । निर्विचिकित्सशब्दज्ञानोत्पत्त्युत्तरकालमनधिकारः कर्मणीत्युक्तम् । तथा च श्रुतिः – 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।' तत्किमिदानीम् अनुपयोग एव सर्वथेह कर्मणाम् ? तथा च 'विविदिषन्ति यज्ञेन' इत्याद्याः श्रुतयो विरुध्येरन् । न । आरादुपकारकत्वात् कर्मणां यज्ञादीनाम् ॥ वा. भा. पा. ५८–६१.

[अत्र मण्डनवाचस्पत्योः, उभयोरपि यद्यपि समानैव शाब्दज्ञानाभ्यासापेक्षा, तथापि उपासनाकर्मसमुच्चयविषये नास्ति संप्रतिपत्तिरिति स्फुटम् । शाब्दज्ञानोत्पत्त्यनन्तरं विहितकर्मणि नाधिकार इति वाचस्पतिमतं शाङ्करमतानुसारीति च ॥]

(५) न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणम्, अपि तु साक्षात्कारपर्यन्तम् । ब्रह्मसाक्षात्कारश्च अन्तःकरणवृत्तिभेदः श्रवणमननादिजनित-

संस्कारसचिवमनोऽन्भा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः। स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन् आत्मानमपि प्रपञ्चत्वाविशेषात् उन्मूलयतीत्युपपादितमधस्तात्। तस्मात्, रज्जुस्वरूपकथनतुल्यतैवात्रेति सिद्धम्। अत्र च वेदप्रमाणमूलतया वेदप्रमाणजनितेत्युक्तम्॥ वा. भा. पा. १५०.

[‘नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्। वेदप्रमाणजनितब्रह्मात्मभावविरोधात्।’ (सू. भा. १-१-४, पा. २१) इति वस्तुमात्रकथनेनापि प्रयोजनसद्भावविषये पूर्वपक्ष्युत्थापितशङ्कानिवृत्त्यर्थं भाष्यम्। तद्व्याख्यानत्वेनोक्तमिदं भामत्यां न भाष्यानुसारीति स्पष्टम्। न हि भाष्ये वेदप्रमाणजनितब्रह्मात्मभावः, वेदप्रमाणज्ञानाभ्यासनिर्वृत्तसाक्षात्कारफलम् इत्युक्तमस्ति। ब्रह्मसिद्धिमतस्यैव (ब्र. सि. 86, 87) त्वनुसरणमिदम्॥]

(६) स्यादेतत् – अतिनिरूढनिबिडवासनानुविद्धा अविद्या विद्यया अपबाधितापि स्ववासनावशात् पुनरुद्भविष्यति। प्रवर्तयिष्यति च वासनादिकार्यं स्वोचितम् इति। अत आह – तत्रैवं सति, एवं भूतवस्तुतत्त्वावधारणे सति, यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते। .... एतदुक्तं भवति – तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स तादृशः, यदनादिमपि निरूढनिबिडवासनमपि मिथ्याप्रत्ययमपनयति। तत्त्वपक्षपातो हि स्वभावो धियाम्॥ वा. भा. पा. ४०.

[अत्र भाष्ये अविवेकादतद्रूपाध्यासोऽविद्या, विवेकेन वस्तुस्वरूपनिर्धारणं विद्या – इत्येतावदुक्तम्। न तु विवेकज्ञानेन निर्धारणे सति तदभ्यासः करणीय इत्यपीति स्पष्टम्। मण्डनपक्षपातितया (ब्र. सि. 35) तु संस्कारानुवृत्तिं ज्ञानाभ्यासं च भाष्यकारीयत्वेन व्याख्याति भामतीकारः–इत्यत्र न संशयलेशोऽपि। एवं (वा. भा. पा. ४५, ५८, ७८, ८९, १०७, इत्यादिषु स्थलेषु) पदे पदे वासनाशब्दापरपर्यायः संस्कारः, तत्त्वज्ञानाभ्यासजनितसाक्षात्कारनिवर्त्य इत्युच्यते भामत्याम्। बृहदारण्यकभाष्ये तु (बृ. भा. १-४-७, पा. ६७८) एतन्मतं कण्ठरवेण निरस्तम्॥]

(७) तस्मात् निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम्। न चायमनुभवो ब्रह्मस्वभावः, येन न जन्येत; अपि तु अन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः। न चैतावता ब्रह्मणोऽपराधीनप्रकाशता।

न हि शब्दज्ञानप्रकाश्यं ब्रह्म स्वयंप्रकाशं न भवति । सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि । यथाह स भगवान् भाष्यकारः 'नायमेकान्तेनाविषयः' इति । न चान्तःकरणवृत्तावपि अस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः, तस्यैव तदुपाधेर्विनश्यदवस्थस्य स्वपरोपाधिविरोधिनो विद्यमानत्वात् । अन्यथा चैतन्यच्छायापत्तिं विना अन्तःकरणवृत्तेः स्वयमचेतनायाः स्वप्रकाशत्वानुपपत्तौ साक्षात्कारत्वायोगात् । न चानुमितभावितवह्निसाक्षात्कारवत् प्रतिभात्वेन अस्याप्रामाण्यम्, तत्र वह्निस्वलक्षणस्य परोक्षत्वात्, इह तु ब्रह्मरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षत्वात् । न हि शुद्धबुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यन्ते ; जीव एव तु तत्तदुपाधिरहितः शुद्धबुद्धादिस्वभावो ब्रह्मेति गीयते । न च तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यते । तस्मात्, यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासादितसंस्कारसचिवश्रोत्रेन्द्रियेण षड्जादिस्वरग्राममूर्छनाभेदम् अध्यक्षमनुभवति, एवं वेदान्तार्थज्ञानाभ्यासाहितसंस्कारो जीवस्य ब्रह्मभावमन्तःकरणेनेति ॥

वा. भा. पा. ५७-५८.

अत्र मण्डनमिश्रसंमता साक्षात्करणप्रक्रिया वितानितास्ति सर्वपरिकरोपेता । अत्रेमे उपदेशा भाष्यानुगुणा न वेति समालोचनीयं सुधीभिः —

(१) 'अन्तःकरणवृत्तिभेदः साक्षात्कारशब्दितो ब्रह्मविषयक इति' ॥

नैतादृशाभिप्रायकं वचनं प्रस्थानत्रयभाष्येषूपलभ्यत इत्यसन्मतिः । माण्डूक्ये मनोनिग्रहशब्दवाच्य उपाय उपदिष्टोऽस्ति कारिकासु । तत्र चित्तस्य ब्रह्मरूपेण निष्पत्तिरुपदिष्टा भाष्ये, न तु साक्षात्कारस्य ब्रह्मविषयकत्वम् । तदपि मध्यमाधिकारिणां कृते समुपदिष्टम् आत्मसत्यानुबोधरहितानामेव ॥

(अ) 'येषां पुनर्ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत् कल्पितमेव मनः इन्द्रियादि च न परमार्थतो विद्यते, तेषां ब्रह्मस्वरूपाणामभयं मोक्षाख्या चाक्षया शान्तिः स्वभावत एव सिद्धा नान्यायत्ता ॥'

गौ. का. भा. ३-४०, पा. २२५.

इति मनोनिग्रहानपेक्षयापि पुरुषार्थसिद्धिः स्पष्टमेवोद्घुष्टा तत्र ॥

(२) 'जीवस्य प्रागपरोक्षत्वेऽपि ब्रह्मस्वरूपभावाय, अविद्यासंस्कार-विनाशाय च–गान्धर्वशास्त्रोदितषड्जादिसाक्षात्कारवत् – ज्ञानाभ्यासोऽपेक्ष्यते ब्रह्मभावानुभवार्थमिति वर्णनम्, नाध्यारोपापवादप्रक्रियानुगुणमिति स्पष्टमेव। न ह्यध्यासभाष्ये वस्तुस्वरूपविवेचनातिरिक्तं किञ्चिदत्यवश्यकर्तव्यत्वेनोपदिष्टम्। न चाध्यस्तविवेचनातिरिक्तं किञ्चित्कर्तव्यमवशिष्टं मन्यन्ते लौकिका अध्यासास्पदस्वरूपनिर्धारणार्थम्। षड्जादिस्वरसाक्षात्कारस्तु विषयविषयः, करणव्यापारजन्य इति तत्र संस्कारजननार्थमभ्यासोऽपेक्ष्यत इति विषम उपन्यासः। न हि प्रागप्यपरोक्षमेव सत् आत्मचैतन्यम् अनुभवम् अपरमपेक्षते स्वविवरणायेति युक्तिमत्। तथा हि भाष्यवचनम्–

(आ) प्रत्यक्षं हि देहे छिद्यमाने दह्यमाने वा 'अहं छिद्ये, दह्ये' इति च मिथ्याभिमानो दृष्टः; तथा बाह्यतरेष्वपि पुत्रमित्रादिषु संतप्यमानेषु 'अहमेव संतप्ये' इत्यध्यारोपो दृष्टः। तथा दुःखित्वाद्यभिमानोऽपि स्यात्। देहादिवदेव चैतन्यात् बहिरुपलभ्यमानत्वात्, दुःखित्वादीनां सुषुप्तादिषु चानानुवृत्तेः। चैतन्यस्य तु सुषुप्तेऽप्यनुवृत्तिम् आमनन्ति 'यद् वै तन्न पश्यति पश्यन् वै तन्न पश्यति' इत्यादिना। तस्मात् 'सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहम्' इत्येष आत्मानुभवः। न चैवम् आत्मानम् अनुभवतः किञ्चिदन्यत् कर्तव्यमवशिष्यते॥ सू. भा. ४–१–२, पा. ४६३.

इति। एवं मनोवृत्तेरप्यात्मचैतन्यविषयत्वेनैव बहिरुपलभ्यमानत्वात्, सुषुप्तादिष्वनुवृत्तेश्च नास्ति चैतन्यापरोक्षानुभवार्थं वृत्त्यपेक्षा–इति सिद्धम्। अतद्रूपाध्यारोपनिवृत्तिरेवात्मज्ञानमिति गीताभाष्येऽपि स्पष्टमुक्तम्

(इ) तस्मात् अविद्याध्यारोपितनिराकरणमात्रं ब्रह्मणि कर्तव्यम्। न तु ब्रह्मविज्ञाने यत्नः, अत्यन्तसुप्रसिद्धत्वात्॥ गी.भा. १८-५०, पा. २८०

इति। तथा सूत्रभाष्येऽपि –

(ई) ब्रह्मैवाऽविद्याध्यस्तप्रपञ्चप्रत्याख्यानेन आवेदयितव्यम् 'एकमेवाद्वितीयं ब्रह्म। तत् सत्यं स आत्मा तत् त्वमसि' इति; तस्मिन् आवेदिते विद्या स्वयमेवोत्पद्यते तथा चाविद्या बाध्यते। ततश्चाविद्याध्यस्तः सकलोऽयं नामरूपप्रपञ्चः स्वप्नप्रपञ्चवत् प्रविलीयते॥ सू. भा. ३-२-२१

इति। अतः प्रस्थानान्तरमेवेदमध्यारोपापवादप्रक्रियात इति युक्तमुत्पश्यामः॥

श्रवणमनननिदिध्यासनानि –

२०३. मण्डनप्रस्थानानुसारेण श्रवणादीनां विधिसरूपत्वं साक्षात्कारोपयोगित्वं चात्रापि स्वीकृतम्; तेषां प्रवृत्तिविशेषकरत्वं तु भाष्यानुसारेणोक्तम् –

(१) अन्यतः प्राप्ता एव हि श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते। न चानुवादोऽप्यप्रयोजनः, प्रवृत्तिविशेषकरत्वात्। .... आत्मश्रवणादिविधिसरूपैस्तु वचनैर्मनसो विषयस्रोतः स्खलीकृत्य प्रत्यगात्मस्रोतस्तया उद्वाह्यते॥

वा. भा. पा. १३०.

[अत्र ब्रह्मसिद्धिः (पा. 155) द्रष्टव्या॥]

(२) अत्र चागमाचार्योपदेशाभ्यां सत्यस्य श्रवणम्; अथागमाविरोधिन्यायनिवेशनं मननम्; मत्वा च गुरुशिष्यसब्रह्मचारिभिरनसूयुभिः सह संवाद्य तत्त्वं श्रद्धत्ते। श्रद्धानन्तरं च विषयान्तरदोषदर्शी विरक्तः, ततो व्यावृत्तस्तत्त्वज्ञानाभ्यासं[1] करोति। सेयमस्य कृतिः प्रयत्नः। अथ तत्त्वज्ञानाभ्यासेऽस्य निष्ठा भवति, यदनन्तरमेव तत्त्वविज्ञानम्, अनुभवः प्रादुर्भवति। तदेतद् बाह्या अप्याहुः 'भूतार्थभावनाप्रकर्षजपर्यन्तजं योगिज्ञानम्' इति॥ वा. भा. पा. २७९.

[अत्र तत्त्वज्ञानाभ्यास एव निदिध्यासनशब्दार्थ इत्युक्तं भवति (ब्र.सि. 35)। अनुभव इति साक्षात्कारोऽभ्यासफलभूतः (ब्र. सि. 154) इति च योगाचारवाक्यमुदाहृतं निदिध्यासनस्य भावनारूपत्वेंऽशे संवादायेति सर्वत्रापि ब्रह्मसिद्ध्यनुसरणं स्पष्टम्॥]

(३) आगमाचार्योपदेशाभ्यां श्रवणं तदविरोधिना तर्केण मननं च तदन्वेषणम्। तत्पूर्वकेण चादरनैरन्तर्यदीर्घकालासेवितेन ध्यानाभ्यासपरिपाकेन साक्षात्कारो विज्ञानम्। विशिष्टं हि तज्ज्ञानं पूर्वेभ्यः॥

वा. भा. पा. २९०.

[अत्रापि विज्ञानशब्दार्थत्वेन योगशास्त्रोपदिष्टक्रमेण ध्यानाभ्यास एवोपदिष्टः। न तु तत्त्वनिरीक्षणमात्रं मनस ऐकाग्र्येण, यथोक्तं गीताषष्ठाध्यायभाष्ये। यथा वा प्रकृतदहरविद्यासमनन्तरखण्डे भाष्ये 'विपरीताधिगमनिवृत्तिर्दृष्टं

1. 'ध्यानाभ्यासं' इति नूतनसंस्करणपाठः॥

फलमिति नियमार्थतैव ' इत्यत्र । दहरवाक्यं ह्युपासनविषयम्, तदुत्तरखण्ड-वाक्यं तु ज्ञानविषयम् । अथ चात्र दहरवाक्ये एव श्रवणादीनां विनियोगो दर्शित इत्यवधेयमेतत् । भावनायां न मन्तव्यतावसरः – इति वार्तिककारैरुक्त-मप्यत्रानुसंधेयम् – ' वस्तुतत्त्वविवक्षेह मन्तव्य इति शासनात् । योविदश्यादिदृष्टौ हि नैव मन्तव्यताविधिः ॥ ' बृ वा. २-४-२१५, पा. १०६८]

(४) तदनेन श्रवणमननध्यानाभ्यासाद् विवेकविज्ञानमुत्पन्नं तस्य विवेकविज्ञानस्य फलं केवलात्मरूपसाक्षात्कारः स्वरूपेणाभिनिष्पत्तिः, स च साक्षात्कारो वृत्तिरूपः प्रपञ्चमात्रं प्रविलापयन् स्वयमपि प्रपञ्चरूपत्वात् कतकफलवत् प्रलीयते । तथा च निर्मृष्टनिखिलप्रपञ्चजालमनुपसर्गम्, अपराधीनप्रकाशम् आत्मज्योतिः सिद्धं भवति । तदिदमुक्तं ' परं ज्योति-रुपसंपद्य ' इति ॥ वा. भा. पा. ३०४.

[किमात्मकं शरीरात् समुत्थानम्, किमात्मिका वा स्वरूपेणाभिनिष्पत्तिः ? – इति प्रश्नमुत्थाप्य स्फटिकदृष्टान्तेन ' प्रमाणजनितविवेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छ्येन शौक्ल्येन च स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते प्रायपि तथैव सन् ' (सू. भा. १-३-१९) इति भाष्ये ' श्रुतिकृतं विवेकविज्ञानं शरीरात् समुत्थानम् विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः ' इति स्पष्टतरमुक्तम् । विवेकमात्रेण स्वरूपेणाभिनिष्पत्तिः– इति ग्रन्थेऽपि ध्यानाभ्यासतत्फलसाक्षात्कारौ बलादानीय प्रवेश्येते मण्डनाश्रयणव्यसनितया–इतीदं न पृथग् वक्तव्यम् ॥]

(५) आत्यन्तिके हि जीवपरमात्मनोरभेदे तात्त्विकेऽनाद्यविद्योपाधि-कल्पितो भेदः 'तत्त्वमसि' इति जीवात्मनोर्ब्रह्मभावतत्त्वोपदेशश्रवणमनन-निदिध्यासनप्रकर्षपर्यन्तजन्मना साक्षात्कारेण विद्यया शक्यः समूलकाषं कषितुम् । रज्ज्वामहिविभ्रम इव रज्जुतत्त्वसाक्षात्कारेण .... ॥

वा. भा. पा. ४१७.

[परमात्मन एवानेनापि जीवात्मना अवस्थानादुपपन्नमिदमभेदेनोप-क्रमणम्–इति काशकृत्स्नीयमतस्य प्रतिपिपादयिषार्थानुसारित्वात्, तदेव श्रुत्यनु-सारीति भाष्यकाराभिप्रायवर्णनावसरे किमिति निदिध्यासनप्रकर्षपर्यन्तप्रयत्न-जन्मसाक्षात्कार आनीयते ? – इति तु न ज्ञायते । स्वोदाहृतरज्जुसर्प-दृष्टान्तेऽपि न हि नियतो निदिध्यासनप्रकर्षपर्यन्तज एव रज्जुसतत्त्वसाक्षात्कार इति । रज्जुरियमित्याप्तोपदेशश्रुतिमात्रेणापि कस्यचिद्रज्जुतत्त्वज्ञानोदयो हि न दण्डवारित इति ॥]

(६) समाधिरिति संयममुपलक्षयति । धारणाध्यानसमाधयो हि संयमपदवेदनीयाः । यथाहुः 'त्रयमेकत्र संयमः' इति । अत्र 'श्रोतव्यो मन्तव्य' इति धारणोपदेशः, 'निदिध्यासितव्य' इति ध्यानोपदेशः, 'द्रष्टव्य' इति समाधेरुपदेशः । यथाहुः 'तदेव ध्यानमर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' इति ॥ वा. भा. पा. ६१५.

['समाध्यभावाच्च' इत्यत्र 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः', 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इति, 'ओमित्येवं ध्यायत आत्मानम्' इत्येवंलक्षणः समाधिरुपदिष्टो वेदान्तेषु – इति भाष्यकारैर्निदिध्यासन – विजिज्ञासन – ध्यानशब्दैः वस्तुतत्त्वैकचिन्तनं निदिध्यासनापरपर्यायं विवक्षितमिति स्पष्टम् । निदिध्यासनेन परमात्मा द्रष्टव्य इति विधानं जीवस्य कर्तृत्वमन्तरेणानुपपन्नम् – इत्येतावति पर्यवसन्नं सूत्रम् । तत्र योगशास्त्रस्यैव कृत्स्नस्य प्रक्रिया संयमेन समाधिप्राप्त्युपदेशिनी किमित्यस्थाने आनीयते इति न विज्ञायते । न हि 'द्रष्टव्य' इति समाध्युपदेश इति कथञ्चिदपि संभवि । श्रवणादिफलस्यैव दर्शनशब्दवाच्यात्मानुभवस्यात्र परामर्शादिति ॥]

प्रतिपत्तिविधिनिरासः, साक्षात्कारवादश्च –

२०४. वाचस्पत्येऽपि प्रस्थाने मण्डनप्रस्थाने इवैव प्रतिपत्तिविधिनिरासः क्रियते, प्रतिपादनशैली चाक्षरशस्तदनुकारिणी –

(१) अपि च चतस्रः प्रतिपत्तयो ब्रह्मणि । प्रथमा तावत्, उपनिषद्वाक्यश्रवणमात्राद् भवति, यां किलाचक्षते 'श्रवणम्' इति । द्वितीया मीमांसासहितात् तस्मादेवोपनिषद्वाक्यात्, यामाचक्षते 'मननम्' इति । तृतीया चिन्तासन्ततिमयी, याम् आचक्षते 'निदिध्यासनम्' इति। चतुर्थी साक्षात्कारवती वृत्तिरूपा । नान्तरीयकं हि तस्याः कैवल्यमिति ॥

वा. भा. पा. ८९८.

['सर्वापेक्षाधिकरणे यथोक्तप्रतिपत्तिचतुष्टये एकतमस्यापि कर्मापेक्षा नास्तीति शङ्काम् उद्भाव्य 'उत्पत्तौ ज्ञानस्य कर्मापेक्षा विद्यते विविदिषोत्पादद्वारा' इति समाहितम् । अयमेव ह्येको मण्डनप्रस्थानाद् भेदोऽत्र प्रस्थाने । अत्र मननलक्षणं पूर्वोदाहृतवाक्याद् किञ्चिद् विलक्षणम् । निदिध्यासनस्वरूपं तु तथैव स्थितम् ॥]

(२) न तावद् ब्रह्मसाक्षात्कारे पुरुषो नियोक्तव्यः। तस्य ब्रह्मस्वाभाव्येन नित्यत्वादकार्यत्वात्। नाप्युपासनायाम्, तस्या अपि ज्ञानप्रकर्षे हेतुभावस्य अन्वयव्यतिरेकसिद्धतया प्राप्तत्वेन अविधेयत्वात्। नापि शाब्दबोधे। तस्याप्यधीतवेदस्य पुरुषस्य विदितपदतदर्थस्य समधिगतशाब्दन्यायतत्त्वस्य अप्रत्यूहमुत्पत्तेः। .... अपि च आत्मज्ञानविधिपरेषु वेदान्तेषु नात्मतत्त्वविनिश्चयः शाब्दः स्यात्। न हि तदा आत्मतत्त्वपरास्ते, किं तु तज्ज्ञानविधिपराः। यत्पराश्च ते त एव तेषामर्थाः। न च बोधस्य बोध्यनिष्ठत्वादपेक्षितत्वात्, अन्यपरेभ्योऽपि बोधतत्त्वनिश्चयः। समारोपेणापि तदुपपत्तेः। तस्मान्न बोधविधिपरा वेदान्ता इति सिद्धम्॥

वा. भा. पा. ७१.

अत्रोदाहरणद्वयेऽपि ब्रह्मसिद्धिगतनियोगकाण्डार्थः संक्षेपतोऽनूदितः। 'कार्यमर्थमवगमयन्ती चोदनैव भूतादिकमप्यर्थमवगमयतीति ये मन्यन्ते तत्प्रतिबोधनाय प्रयत्यते। तिस्रश्च प्रतिपत्तयो ब्रह्मणि भवन्ति। प्रथमा तावच्छब्दात्; अन्या शब्दात् प्रतिपद्य तत्सन्तानवती ध्यानभावनोपासनादिशब्दवाच्या; अन्या ततो लब्धनिष्पत्तिः, विगलितनिखिलविकल्पा साक्षात्करणरूपा' (ब्र. सि. 74) इत्यनुक्रम्य सर्वत्रापि चोदनापेक्षत्वं विस्तरेण निराकृतम् ब्रह्मसिद्धौ॥

भाष्ये पुनः –

'या हि चोदना धर्मस्य लक्षणम्, सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति। ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वात् न पुरुषोऽवबोधे नियुज्यते। यथा अक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत्।'॥ सू. भा. १-१-१, पा. ५

इति यथाप्रमाणं यथाविषयं च वेदान्तवाक्यात् ब्रह्मज्ञानं समुपजायते प्रत्यक्षादिविषयेष्विव, न तत्र चोदनायाः प्रवर्तकत्वमस्ति। प्रमाणव्यापारमात्रेणान्यनिरपेक्षं जायमानत्वात् ज्ञानस्य-इत्युच्यते। प्रस्थानान्तराकृष्टचित्ततया तु भामत्यां शाब्दबोधे, उपासनायां, तज्जन्यसाक्षात्कारे च नियोगानपेक्षा–इति वृथा व्याख्यानायासः समाहृत इति स्पष्टम्। किञ्चान्यत्,

'आत्मज्ञानविधिपरेषु वेदान्तेषु नात्मतत्त्वविनिश्चयः शाब्दः स्यात्' इत्युपालम्भरूपोऽत्र विसृष्टो बाणो सृत्यन्तरेण लब्धवेगो विसृष्टारमपि विध्येदिति न पर्यालोचितम्। 'वेदप्रमाणमूलतया' साक्षात्काररूपं ज्ञानं वेदप्रमाणजनितम् (वा. भा. पा. १५०) इत्यङ्गीकुर्वाणस्य न साक्षात्कारः शाब्दः स्यात् – इति प्रत्युपालम्भसंभवात् ॥

(३) त्वयाप्युपासनाविधिपरत्वं वेदान्तानाम् अभ्युपगच्छता नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्या आस्थीयते। सा चोपासनाविषयस्य विधेर्न फलम्; नित्यत्वादकार्यत्वात्। नाप्यनाद्यविद्यापिधानापनयः; तस्य स्वविरोधिविद्योदयादेव भावात्। नापि विद्योदयः, तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्। उपासनासंस्कारवत्, उपासनापूर्वमपि चेतःसहकारी इति चेत् – दृष्टं च खलु नैयोगिकं फलम् ऐहिकमपि, यथा चित्राकारीर्यादिनियोगानाम् अनियतनियतफलानाम्। न। गान्धर्वशास्त्रोपासनावासनाया इवापूर्वानपेक्षाया षड्जादिसाक्षात्कारे वेदान्तार्थोपासनावासनाया जीवब्रह्मभावसाक्षात्कारेऽनपेक्षाया एव सामर्थ्यात्' ॥ वा. भा. पा. ११४.

एवमादिस्थलेषु मण्डनप्रस्थानोदितसाक्षात्कारप्रक्रियाप्रलोभितत्वमेव कारणम् अनवसरेऽपि तदानयने। प्रकृतं हि कर्मब्रह्मविद्याफलयोर्वैलक्षण्यप्रदर्शनं भाष्ये –

'तदेतदशरीरत्वं मोक्षाख्यम्' इति। पारमार्थिकत्वकूटस्थनित्यत्व–सर्वव्यापित्व–सर्वविक्रियारहितत्व–नित्यतृप्तत्व–निरवयवत्व–स्वयंज्योतिष्ट्वलक्षणलक्षितम्, न तत्कर्तव्यशेषत्वेनोपदेशार्हमिति वदद्भिराचार्यैः 'श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति, मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति' इति च ब्रुवाणैः कथङ्कारं श्रुतिप्रमाणजनितस्यापि ज्ञानस्य पुनरपि मननभावनातत्प्रकर्षापेक्षत्वमुच्येतेति ॥

(४) ' न हि यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेद् वषट्करिष्यन् । ' इत्यस्माद् विधेः प्राग् देवताध्यानं प्राप्तम् । प्राप्तं तु अधीतवेदान्तस्य विदितपदतदर्थसंबन्धस्याधिगतशब्दन्यायतत्त्वस्य 'सदेव सोम्येदम्' इत्यादेः 'तत् त्वमसि' इत्यन्तात् संदर्भात् ब्रह्मात्मभावज्ञानं शब्दप्रमाणसामर्थ्यात् । इन्द्रियार्थसंनिकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्तिकुम्भानुभवः । न ह्यसौ स्वसामग्रीबललब्धजन्मा सन्, मनुजेच्छया अन्यथाकर्तुम् अकर्तुं वा शक्यो देवताध्यानवत् । येनार्थवान् अत्र विधिः स्यात् । न चोपासना वा, अनुभवपर्यन्तता वा अस्य विधेर्गोचरः । तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वा, अविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छया अन्यथाकर्तुम् अकर्तुं वा अशक्यत्वात् । तस्मात्, ब्रह्मज्ञानं मानसी क्रियापि न विधिगोचरः ॥

वा. भा. पा. १२८–१२९.

[अत्र ' ज्ञानं तु प्रमाणजन्यम् ' इति फलरूपत्वस्य भाष्ये स्पष्टमुद्घोषितत्वेऽपि क्रियात्वं किं कारणमुररीकियत इति न ज्ञायते । शब्दाऽजनितस्य ज्ञानस्य संतानकरणरूपा उपासना मण्डनप्रस्थानादत्रानीय बलात् प्रवेशिता, तस्य नियमेन उपासनाजनितसाक्षात्काररूपानुभवापेक्षिता चेति स्पष्टमेव । ' अन्वयव्यतिरेकसिद्धे उपासनातदनुभवपर्यन्तते ' इत्यपि मण्डनानुसरणं प्रसङ्ह्यानमतस्यैव रूपान्तरेण दिष्टहतव्याघ्रस्य संजीवनमन्त्रोच्चारणेनेवोज्जीवनम् । अङ्गीकृतं चेदं मतं मण्डनेन – " अथ तु वाक्यान्तरात् तत्त्वनिष्ठात् अधिगते तद्विषयप्रत्ययप्रवाहविधानमिष्यते । भवतु न कश्चिद्विरोधः । तथा च 'विज्ञाय प्रज्ञां कुर्वीत' इत्यात्मतत्त्वविज्ञानस्य सिद्धतां दर्शयति " (ब्र. सि. 154) इति । परमतसाङ्कर्यभीत्या तु पुनरप्युक्तं तेन ' तदपि वा व्यर्थमेव । प्राप्तार्थत्वात् ' (ब्र. सि. 154) इत्यादि ; तत्र त्वशाब्दत्वं स्यात् साक्षात्कारविज्ञानस्येत्युक्तम् ॥]

(५) यद्यपि मुक्तिरदृष्टचरी, तथापि सवासनाविद्योच्छेदेनात्मनः स्वरूपावस्थानलक्षणायास्तस्याः श्रुतिसिद्धत्वात्, अविद्यायाश्च विद्योत्पादविरोधितया विद्योत्पादेन समुच्छेदस्य अहिविभ्रमस्येव रज्जुतत्त्वसाक्षात्कारेण समुच्छेदस्योपपत्तिसिद्धत्वात्, अन्वयव्यतिरेकाभ्यां च श्रवणमननिदिध्यासनाभ्यासस्यैव स्वगोचरसाक्षात्कारफलत्वेन लोकसिद्धत्वात् । ' सकलदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहम् ' इत्यपरोक्षरूपानुभवस्यापि श्रवणाद्यभ्याससाधनत्वेनानुमानात्, तदर्थानि श्रवणादीनि दृष्टार्थानि भवन्ति ।

न च दृष्टार्थत्वे सति अदृष्टार्थत्वं युक्तम् । न चैतानि असकृदनावृत्तानि सत्कारदीर्घकालनैरन्तर्येण साक्षात्कारवते तादृशानुभवाय कल्पन्ते । न चा साक्षात्कारवद् विज्ञानं साक्षात्कारवतीम् अविद्याम् उच्छेत्तुमर्हति । न खलु-पित्तोपहतेन्द्रियस्य गुडे तिक्तताऽसाक्षात्कारोऽन्तरेण माधुर्यसाक्षात्कारं सहस्रे-णाप्युपपत्तिभिर्निवर्तितुमर्हति । अतद्वतो नरान्तरवचांसि वा उपपत्ति-सहस्राणि परामृशतोऽपि धूत्कृत्य गुडत्यागात् । तदेवं दृष्टार्थत्वात्, ध्यानो-पासनयोश्चान्तर्णीतावृत्तिकत्वेन लोकतः प्रतीतेरावृत्तिरेवेति सिद्धम् ॥

वा. भा. पा ९२९–९३०.

अनेन प्रत्युपस्थापितो मण्डनप्रस्थानसारसंग्रहः । अत्रेमे विषयाः परिभावनीयाः –

(1) अत्र 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादि-शास्त्रावगतानां श्रवणादीनां किं सकृत् प्रत्ययः कर्तव्यः, आहोस्वित् आवृत्त्या कर्तव्यः ? – इति संशयः । सकृत् कर्तव्यः, तावतैव शास्त्रस्य चरितार्थत्वादिति पूर्वः पक्षः । आवृत्त्या कर्तव्यः; असकृदुपदेशात्, दृष्टार्थत्वाच्च इति सिद्धान्तः । किमत्र 'दर्शनपर्यवसायित्वात्' (सू. भा. पा. ४६०) इति भाष्ये रज्ज्वादिसाक्षात्कारदृष्टान्तबलेन श्रवणाद्यनुष्ठानस्य साक्षात्कारफलवत्त्वस्य लोकसिद्धत्वात्, आत्मानुभवस्यापि श्रवणादिफलत्वेन अनुमानमभिप्रेत्य दृष्टार्थत्वमुक्तं भाष्यकारेण यथाहुर्भामतीकाराः, उत श्रुतिसिद्धत्वादेवेति ? वयं तु मन्यामहे 'द्रष्टव्यः श्रोतव्यः' इत्यादि-श्रुतिवाक्येषु दर्शनप्रज्ञाविज्ञानादिशब्दितात्मानुभवमनूद्यैव श्रवणादि-विधानात्, नात्रानुमानेन किञ्चित् कर्तव्यमस्ति । अवगते तु श्रुत्या तेषां दर्शनपर्यवसायित्वे अवहन्त्यादिष्विव सकृदुपदेशेऽप्यावृत्तिसिद्धिः । दृष्ट-तण्डुलनिष्पत्त्यर्थत्वात् अवघातविधेरिति दृष्टान्तादानमिति । सिद्धे हि दर्शनार्थत्वे श्रवणादीनां यावद्दर्शनं न भवति तावदावृत्तिः कर्तव्येति शास्त्रबलादेव सिध्यति ॥

(2) एवं रज्जुसर्पादिदृष्टान्तानयनं भाष्ये किं रज्जुतत्त्व-साक्षात्कारादहिविभ्रमस्य समुच्छेदवत्, आत्मसाक्षात्कारेणाविद्यासमुच्छेद

इत्यंश सारूप्येण विवक्षित्वा, यथाह भामती, उताहो सर्पादिभ्रान्त्यपनयनेन रज्जुतत्त्वज्ञानसिद्धिवत्, आत्मन्यध्यारोपितानात्मांशापनयनेनात्मज्ञानसिद्धिरिति ?

वयं तु पश्यामः। आत्मनो नित्यापरोक्षत्वात्, अविद्यामात्रव्यवहितत्वाच्च आप्तोक्त्या समारोपितसर्पापह्नवे सति रज्जुतत्त्वविनिश्चय इव वेदान्तोक्त्या समारोपितानात्मापह्नवे सति आत्मविनिश्चय एव विवक्षितोंऽशः—इति। न हि रज्जुरिवात्मापि विषयः, येन तत्साक्षात्कारोऽपि काङ्क्षणीयः स्यादिति ॥

(३) 'दर्शनपर्यवसानानि हि श्रवणादीनि आवर्त्यमानानि दृष्टार्थानि भवन्ति' इति भाष्यकारैः 'किम् असाक्षात्कारवद्विज्ञानं साक्षात्कारवतीमविद्यां नोच्छेत्तुमर्हति' इत्यभिप्रायेणोच्यते, यथाह भामती, किं वा 'द्रष्टव्यः' इति दर्शनार्थत्वेन विधानात् तेषाम्, यावद्दर्शनं भवति तावदवश्यमावर्तनीयानि भवन्तीत्येतद्विवक्षया ? अत्रापि वयमुत्पश्यामः —

अविद्या साक्षात्कारवती आत्मसाक्षात्कारं न तिक्ततासाक्षात्कृतिरिव माधुर्यसाक्षात्कारम् अभिभूय विजृम्भते, येन केवलासवचनेन युक्तिसहितेन वा नात्मज्ञानं प्रादुर्भवेत्, अपि तु साक्षाद्भवन्नप्यात्मा असाक्षात्कृत इव भवत्यविद्यया। अविद्या चात्मन्यविद्यमानानात्माध्यारोपमात्रलक्षणा। तेन श्रुत्याचार्योपदेशात् समारोपितानात्मापह्नवमात्रेणात्मस्वरूपस्मरणेन च आत्मा साक्षात्कृत इव भवतीति वैषम्यं दृष्टान्तदार्ष्टान्तिकयोः। आहुर्हि भाष्यकाराः —

(अ) अविद्यावतोऽविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यात् इति चेत्। न। अविद्याकल्पनाविषयत्वाभ्युपगमात् रज्जूपरशुक्तिकागगनानां सर्पोदकरजतमलिनत्वादिवददोष इत्यवोचाम। तिमिरातिमिरदृष्टिवद् अविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यात् इति चेत्। न। 'ध्यायतीव लेलायतीव' इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात्। अनेकव्यापारसंनिपातजनितत्वाच्चाविद्याभ्रमस्य। विषयत्वोपपत्तेश्च। यस्य चाविद्या-

भ्रमो घटादिवद् विविक्तो गृह्यते, स नाविद्याभ्रमवान्। अहं न जाने मुग्धोऽस्मीति प्रत्ययदर्शनात् अविद्याभ्रमवत्त्वमेव - इति चेत्। न। तस्यापि विवेकग्रहणात्॥ बृ. भा. ४-४-६, पा. ९१९.

[अनेन तिक्ततामाधुर्यानुभववैधर्म्यं स्फुटितम्। तत्र तिक्ततानुभवेन सर्वथा अभिभूतत्वात् माधुर्यानुभवस्य, इह पुनरविद्यावत्त्वतद्विषयत्वकालेऽपि तत्साक्षितया तद्विविक्तत्वात्, तज्ज्ञापनमात्रेणात्मानुभवोपपत्तेः, न तत्साक्षात्करणाय यत्नान्तरापेक्षेति॥]

(आ) परमार्थतो ब्रह्मरूपस्यापि सतोऽस्य जीवस्य भूतमात्राकृतबाह्यपरिच्छिन्नान्नमयाद्यात्मदर्शिनः, तदासक्तचेतसः, प्रकृतसङ्ख्यापूरणस्यात्मनोऽव्यवहितस्यापि बाह्यसङ्ख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत् परमार्थब्रह्मस्वरूपाभाव(दर्शन ?)लक्षणया अविद्यया अन्नमयादीन् बाह्यानन्नात्मन आत्मत्वेन प्रतिपन्नत्वात् अन्नमयाद्यनात्मभ्यो नान्योऽहमस्मि इत्यभिमन्यते। एवमविद्यया आत्मभूतमपि ब्रह्मानाप्तं स्यात्। तस्यैवम् अविद्यया अनाप्तब्रह्मस्वरूपस्य प्रकृतसङ्ख्यापूरणस्यात्मनोऽविद्यया अनाप्तस्य सतः केनचित् स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मण आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव॥

तै. भा. २-१, पा. २८१-२८२.

[अत्रापि माधुर्यसाक्षात्कारवदात्मसाक्षात्कारस्य प्राप्यत्वशङ्का निवर्तिता भवति। न ह्यात्मा गुडरसवत् केनचिद् व्यवहितः, येन तद्व्यवधानापोहनेन साक्षात्कर्तव्यो भवेत्, किं तु प्रकृतदशसंख्यापूरणस्येव स्वस्यात्मभूत एव सन् अविद्यया विस्मृत इति॥]

वाक्यश्रवणमात्रान्न साक्षात्कार इति प्रस्थानम् –

२०५. निरुपाधिकब्रह्मविषये आवृत्तिर्निरर्थिका इति पूर्वपक्षेणाक्षिप्य समाहितमस्ति भाष्ये, तद्व्याख्यानावसरे भामती प्रस्थानान्तरमेवादृतवतीति प्रतिभाति नः। तत्र पूर्वपक्षयुक्तय इमाः –

(१) यदि हि 'तत्त्वमसि' इत्येवञ्जातीयकं वाक्यं सकृच्छ्रूयमाणं ब्रह्मात्मत्वप्रतीतिं नोत्पादयेत्, ततस्तदेव आवर्त्यमानं उत्पादयिष्यतीति का प्रमा ? (२) अथ युक्त्यपेक्षमेव वाक्यं ब्रह्मात्मत्वमनुभावयिष्यतीति,

सापि हि युक्तिः सत्कृत्प्रवृत्तैव स्वमर्थमनुभावयिष्यति, किमावृत्त्या ? (३) अथापि स्यात्, युक्त्या वाक्येन च सामान्यविषयमेव विज्ञानं क्रियते, विशेषानुभवश्चाविद्याया निवर्तक इति तदर्था आवृत्तिरिति । न । असकृदपि तावन्मात्रे क्रियमाणे विशेषानुभवोत्पत्त्यसंभवात् । (४) न च सकृत्प्रयुक्ते शास्त्रयुक्ती कस्यचिदप्यनुभवं नोत्पादयत - इति शक्यं नियन्तुम्, विचित्रप्रज्ञत्वात् प्रतिपत्तॄणाम् । (५) अपि चानेकांऽशोपेते पदार्थे, एकेनावधानेन एकमंशमवधारयति, अपरेणापरम् इति स्यादावृत्त्युपयोगः, न तु निर्विशेषे ब्रह्मणि – इति ॥

तत्र भाष्यकृतं समाधानम् भामतीव्याख्यासहितम् अनुक्रम्यते प्रस्थानभेदस्फुटनार्थम् ॥

भाष्यम् –

(१) 'भवेदानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात् ; यस्तु न शक्नोति तं प्रत्युपयुज्यत एवावृत्तिः' ॥

[इदं पूर्वपक्षक्रमेण प्रथमस्य चतुर्थस्य चाक्षेपस्य समाधानम् । अत्र सकृत्प्रयुक्तमपि वाक्यं ब्रह्मात्मत्वप्रतीतिम् उत्पादयेदित्यङ्गीकृतम् ॥]

भामती –

(१) सकृदुक्तमेवेति । श्रुत्वा मत्वा क्षणमवधाय प्राग्भवीयाभ्यास जातसंस्कारात् – इत्यर्थः ॥ वा. भा. पा. ९३३.

[सकृदुक्तमात्रात् प्रतीतिर्न भवेदिति कृत्वा मननिदिध्यासनप्राग्भवीयाभ्याससंस्काराः सहकारित्वेन स्वीकृताः । प्रसङ्ग्यानमतानुसरणमिदम् । द्रष्टव्यम्– 'सकृदुक्तं न गृह्णाति' (उप. १८–१०), 'यदि वा दृश्यते कश्चिद्वाक्यार्थश्रुतिमात्रतः । निर्दुःखोऽतीतदेहेषु कृतभावोऽनुमीयते ॥ (उप. १८–१५, १६)]

भाष्यम् –

(२) "अपि च 'तत् त्वमसि' इत्येतद् वाक्यं त्वंपदार्थस्य तत्पदार्थभावमाचष्टे । तत्र येषाम् एतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां 'तत् त्वमसि' इत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति । .... अतस्तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः" ॥

[पदार्थविषयकाज्ञानमेव प्रतिबन्धकं वाक्यार्थज्ञानोत्पत्तौ इत्युक्तमत्र ॥]

भामती –

(२) तदेवं वाक्यमात्रस्यार्थेऽपि न द्रागित्येव प्रत्यय इत्युक्तम् । 'तत् त्वमसि' इति तु वाक्यम् अत्यन्तदुर्ग्रहपदार्थं न पदार्थज्ञानपूर्वके स्वार्थज्ञाने द्रागित्येव प्रवर्तते, किं तु विलम्बिततमपदार्थज्ञानमिति विलम्बेनेत्याह[1] ॥

वा. भा. पा. ९३३–९३४.

[लौकिकवाक्यस्याप्यर्थो न द्रागिति जायते । तत्त्वमसीत्यस्य तु विलम्बिततरमेव जायते इत्यत्रोक्तम् ॥]

भाष्यम् –

(३) 'यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथाप्यध्यारोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम् । तत्रैकेनावधानेन एकमंशम् अपोहति, अपरेणापरम् इति युज्यते तत्र क्रमवती प्रतिपत्तिः ॥

[इदं पञ्चमाक्षेपस्य समाधानम् । वास्तविकांशाभावेऽप्यध्यरोपिता अंशा भवन्त्यात्मनीति ॥]

भामती –

(३) निरंशोऽप्यह(य?)मपरोक्षोऽप्यात्मा तत्तद्देहाद्यारोपव्युदासाभ्याम् अंशवानिव, अत्यन्तपरोक्ष इव । ततश्च वाक्यार्थतया क्रमवत्प्रत्यय उपपद्यते ॥

वा. भा. पा. ९३५.

[भाष्यानुसारीदं व्याख्यानम् । 'वाक्यार्थतया' इति त्वधिकावापः ॥]

भाष्यम् –

(४) 'तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः' ॥

[बह्वंशत्वम् आत्मप्रतिपत्तेः पूर्वरूपमेव । अध्यारोपितबह्वंशत्वदर्शिनां क्रमवती प्रतिपत्तिरिष्यत एवेत्यर्थः ॥]

भामती –

(४) तत्किम् इयमेव वाक्यजनिता प्रतीतिरात्मनि, तथा च न साक्षात्प्रतीतिरात्मनि ? अवगतफलत्वादस्याः इत्यत आह – तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः साक्षात्कारवत्याः । एतदुक्तं भवति – वाक्यार्थश्रवण-

---

1. भामतीद्वितीयसंस्करणगतोऽयं पाठः । 'स्वार्थे जाते', 'विलम्बिततम पदार्थज्ञानम् अतिविलम्बेन' इति तु प्रथमसंस्करणे। उभयथापि संदिग्धो वाक्यार्थः ॥

मननोत्तरकाला विशेषणत्रयवती भावना ब्रह्मसाक्षात्कारायावकल्पत इति वाक्यार्थप्रतीतिः साक्षात्कारस्य पूर्वरूपम् – इति ॥ वा. भा. पा. ९३५.

[नायमक्षरार्थो भाष्यस्य । न हि तत्र वाक्यार्थप्रतीतेरूर्ध्वं साक्षात्कारार्थं यत्न उपदिष्ट उपलभ्यत इति ॥]

अत्र भाष्ये सकृच्छ्रुतवाक्यानामपि निपुणमतीनां ब्रह्मात्मत्वानुभवो भवेत् ; यस्तु न शक्नोति सकृच्छ्रवणेनैव वाक्यार्थमनुभवितुम्, तं प्रत्येव शास्त्रावृत्तिर्युक्त्यावृत्तिर्वा इति स्पष्टमुक्तम् । 'तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः' इति तु बह्वंशत्वमात्मनो वाक्यार्थप्रतिपत्तेः पूर्वरूपम्, अप्रतिपन्नवाक्यार्थविषय एव हि क्रमवत्प्रतिपत्त्यभ्युपगमः इत्यभिप्रायकः । वाक्यशेषादप्येतदेवमिति गम्यते –

(अ) येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुम् इति तान् प्रत्यावृत्त्यानर्थक्यम् इष्टमेवेति ॥ सू. भा. पा. ४६२.

इति खलु पदार्थज्ञानवत एवावृत्त्यभ्युपगमः । न च वाक्यार्थज्ञानादन्यत् ज्ञानसाक्षात्कारसंज्ञकं परामृष्टमस्त्यत्र ॥

(आ) यस्तु स्वयमेव मन्दमतिः, अप्रतिभानात् तं वाक्यार्थं जिहासेत्, तस्य एतस्मिन्नेव वाक्यार्थे स्थिरीकार आवृत्त्यादिवाचोयुक्त्या अभ्युपेयते ॥ सू. भा. पा. ४६३

इति च पदार्थशोधनं वाक्यार्थे स्थिरीकारार्थमेव, एषैव चावृत्त्याख्या न तु जातवाक्यार्थज्ञानस्यापि साक्षादनुभवाख्यापरज्ञानार्थं वाक्यार्थभावना–इति विस्पष्टमुद्घुष्टम् । भामती त्वत्राश्रुतं ज्ञानाभ्यासमानयति –

(५) यत्र परोक्षप्रतिभासिनि वाक्यार्थेऽपि व्यक्ताव्यक्तत्वतारतम्यं तत्र मननोत्तरकालध्यानाभ्यासनिकर्षप्रकर्षक्रमजन्मनि प्रत्ययप्रवाहे साक्षात्कारावधौ वृत्तितारतम्यं प्रति कैव कथा ? – इति भावः ॥

वा. भा. पा. ९३३.

तदेतत् सर्वं मण्डनभुजावलम्बनाभिरुचिफलमित्यत्र न काचन संशीतिः। स एष साक्षात्कारवादः प्रसङ्ख्यानवादस्यैव वेपान्तरम्। न त्वध्यारोपापवादप्रक्रियानुसारिणां वेदान्तानां तात्पर्यानुगतमित्येतत् भगवत्पादीयाया उपदेशसाहस्र्या अष्टादशप्रकरणावलोकिनां स्पष्टं भवेत्। वाक्यार्थज्ञानमात्रेण तु कृतकृत्यता मुमुक्षूणामिति भाष्यवाक्यान्तरेष्वपि सुस्पष्टमुक्तम् –

(इ) यथा विधिविषये कर्त्राद्यनेककारकोपसंहारद्वारेण वाक्यार्थज्ञानकालादन्यत्र अनुष्ठेयोऽर्थोऽस्ति, अग्निहोत्रादिलक्षणः, न तथेह परविद्याविषये, वाक्यार्थज्ञानसमकाल एव तु पर्यवसितो भवति ॥ मुं. भा. पा. १४५.

(ई) "अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालम् अग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयं 'कर्ताहम्, मम कर्तव्यम्' इत्येवंप्रकारकविज्ञानवतो यथानुष्ठेयं भवति, न तु तथा 'न जायते' इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालमपि किञ्चिदनुष्ठेयं भवति। किं तु 'नाहं कर्ता. नाहं भोक्ता' इत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञानादन्यन्नोत्पद्यते" ॥

गी. भा. २–२१, पा. १९.

(उ) आत्मस्वरूपसमर्पकैरेव वाक्यैः 'तत् त्वमसि' इत्यादिभिः श्रवणकाल एव तद्दर्शनस्य कृतत्वात् द्रष्टव्यविधेर्नानुष्ठानान्तरं कर्तव्यम् ॥

बृ. भा. १–४–७, पा. ६६२.

उपसंहारः –

२०६. भामतीटीकाप्रादुर्भावानन्तरं भास्करसंमतं भेदाभेदमतं शिथिलतां गतम्। पञ्चपादिकया भामतीटीकाया क्वचित् यत्किञ्चित्प्रतिपादनरीतिसाम्येऽपि मण्डनप्रस्थानस्यैवावान्तरप्रक्रियाः, बहुशोऽत्रानीय भाष्यार्थत्वेन प्रत्युपस्थापिताः। मण्डनोक्तसाक्षात्कारवादस्य योगदर्शनोपदेशैरुपबृंहणेनात्रासकृत् साभिनिवेशं संमेलनात् केवलवाक्यार्थविचारणेन मननसहितेनापि न कस्यचिदप्यात्मानुभव उदीयादित्यभिप्रायो वेदान्तजिज्ञासूनां हृदये रूढमूलो बभूव। युक्त्या द्वैतस्यानिर्वचनीयत्वसाधनम्

अद्वैतरक्षणे परमोपाय इति च । अविद्यास्वरूपाश्रयविषयगता विचाराश्च प्राधान्यमत्र नीताः । अनेनाध्यारोपापवादप्रक्रियाचन्द्रिकाया कियत्यप्यंशो राहुग्रासप्रयुक्ताभिभूतिरिवाभवत् । इतः परं वेदान्तविचारस्रोतसः प्रवृत्तिर्यथा दिगन्तरानुसारिणी बभूव तथा आगामिप्रस्थानान्तरविमर्शेन स्फुटीभविष्यतीत्यलमधिकप्रपञ्चेन भामतीप्रस्थानपरीक्षाया इति शम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

भामतीप्रस्थानपरीक्षा नाम दशमः काण्डः

---

१०. इष्टसिद्धिप्रक्रियापरीक्षा

मूलाविद्यावादोज्जीवनपूर्वकं भामतीप्रस्थाननिराकरणम् –

२०७. मण्डनाचार्यप्रक्रिया कैश्चित् किञ्चिद्विपरिणमिता यावता कालेन भाष्यप्रस्थानसंभिन्ना भामतीप्रक्रियारूपं भेजे, तावता अविद्योपादानवादिपञ्चपादिकानुयायिनां प्रतिक्रिया नान्तरीयकी अभवत् । अध्यासमेवाविद्यात्वेन स्वीकुर्वाणस्यापि यदा अविद्याशक्तिरवश्याङ्गीकार्या अभूत्, तदा प्रपञ्चस्याविद्याशक्त्युपादानकत्वमेवालम् अद्वैतसिद्धान्तस्थापनायेति भामतीकारेणाप्यनुमतमेव भवति। तत्किं नवीनप्रक्रियान्तराह्वानविडम्बनया ? –इति **विमुक्तात्माचार्या** मेनिरे। भास्कराचार्येणाद्वैतप्रक्रियायामासञ्जितकतिपयदोषोद्धारपूर्वकं भेदाभेदमते बहवो दुरुद्धरा दोषाः उद्भाविता बभूवुर्भामतीग्रन्थे । विमुक्तात्माचार्यास्तु न केवलं भेदाभेदवादे, किं तु मण्डनवाचस्पत्युभयादृताद्वैतप्रक्रियाभेदेऽप्यनुपपत्तिग्रासो दुर्निवारण इति स्वनिबद्धायाम् इष्टसिद्धौ मूलाविद्यावादोपबृंहणपूर्वकं दिदर्शयिषन्ति ॥

इष्टसिद्धिकर्तृविमुक्तात्मसंस्तवः –

२०८. इष्टसिद्धिकर्तारो विमुक्तात्माचार्या **'अव्ययात्मशिष्याः'** इति प्रत्यध्यायान्तपुष्पिकातोऽवगम्यते; **प्रमाणवृत्ताख्यप्रकरणान्तरनिबन्धार** इति च, ग्रन्थशरीरे (पा. ३७) एव तयोल्लिखितत्वात् । **आनन्दबोधविरचितायां प्रमाणमालायां** 'गुरुभिः' इति परामृष्टाः (प्र. मा. पा. ४) इत्यत इमे आनन्दबोधगुरव आसन् इति संभाव्यते । इष्टसिद्धिरपि ब्रह्मसिद्धिवदेव कञ्चित् कालमज्ञातवासमनुभूय बरोडाप्रान्तीयप्राच्यकोशशोधकालये (ई. 1933) प्राकाश्यं नीता त्रिंशतो वत्सरेभ्यः प्राक् । ब्रह्मसिद्धिवदेव श्लोकतद्विवरणोभयरूपेण निबद्धमस्तीदं प्रकरणम् ॥

अनिर्वचनीयाविद्यासिद्धिप्राधान्यं ग्रन्थस्य –

२०९. नेह ब्रह्मसिद्धाविव सर्वेऽपि शारीरमीमांसाविषया यथानुक्रमं परिशीलिताः, किं तु मङ्गलश्लोके सर्वं सिद्धान्तसारं संगृह्य तद्विवरणे मतान्तरनिरासे च ग्रन्थो विनियुक्तः । 'समस्तवेदान्तार्थ-सारसंग्रहभूतमिदं प्रकरणम्' – इति 'विवरणे' (इ. सि. पु. ३७) यद्यप्युक्तम्, तथापि प्राधान्येनानिर्वाच्याविद्यासतत्त्वनिरूपणमेव प्रकरण-कर्तुर्हृदये स्थितमित्यवगम्यते ॥

सदसत् किमनिर्वाच्यं तदनात्मन्युतात्मनि ।
इति तत्र नयाढ्यत्वादन्त्यं पक्षमतिष्ठिपम् ॥ इ. सि. ८–१५.

प्रत्यक्षादिप्रमाणानां कर्मविज्ञानकाण्डयोः ।
प्रामाण्यमविरोधश्च नर्तेऽविद्यां यथोदिताम् ॥
धर्मार्थकाममोक्षाख्याश्चत्वार इतरेऽपि च ।
इष्टानिष्टाः प्रसिध्यन्ति सर्वतीर्थदृशां तथा ॥
दर्शनानि विरुद्धानि जगद्वैचित्र्यमेव च ।
तस्मात् सर्वस्य सिद्ध्यर्थं विचार्यं निरधारि सा ॥
इ. सि. ८–२२ प्रभृति २४ पर्यन्तम् ।

सर्वेष्टः परमानन्दो वेदान्तात्मप्रमाणतः ।
इत्येषोऽर्थो विशेषेण मयेष्टो वेदविन्मतः ॥
अर्थश्चायमनिर्वाच्या यद्यविद्या प्रसिध्यति ।
व्यचीचरमविद्यां तामत इष्टार्थसिद्धये ॥ इ. सि. ८–८–२७, २८

इति ग्रन्थोपसंहारे सर्वसिद्धिरनिर्वचनीयाविद्याप्रसिद्ध्या इत्यतस्तत्त्व-निर्धारणायात्र प्रयतितमिति कण्ठरवेणाविद्याप्राधान्यं ग्रन्थस्य प्रोक्तम् ॥

ग्रन्थविषयविभागः –

२१०. अष्टाध्यायात्मकोऽयं ग्रन्थः । तत्र प्रथमेऽध्याये प्रायशः सर्वेऽपि ग्रन्थप्रतिपाद्यविषयाः समासेनोदिताः । तेन कृत्स्नस्य ग्रन्थस्य

अर्धादप्यधिको भागोऽनेनैवाध्यायेन समाक्रान्तः। जगत् सर्वमनिर्वचनीया-विद्याकार्यमित्येतच्छुक्तिरजतदृष्टान्तेन वितत्य व्याख्यातमत्र। अत ऊर्ध्वं ख्यात्यन्तरवादिभिरप्यकामैरवश्यम् आश्रयणीया सा – इत्यध्यायचतुष्टयेन प्रतिपादितम्। अविद्याया जीवाश्रयत्वं षष्ठे निरस्तम्। आत्मानात्म-विभागादिव्यवस्था अविद्याभ्युपगन्तुरेव सिध्येत् नान्यस्येति सप्तमे प्रतिपादितम्। अविद्यानिवृत्तिविषये शङ्का अष्टमे समाहिताः। तदेवं ग्रन्थविभागसमालोचनेन ग्रन्थस्य 'अनिर्वचनीयाविद्यासिद्धिः' इति नामकरणमपि निबन्द्धॄणां नानभीष्टमिति विज्ञायते॥

ग्रन्थार्थसंग्राहकः श्लोकः –

२११. अयमत्राद्यो मङ्गलश्लोकः –

याऽनुभूतिरजामेयानन्तात्मानन्दविग्रहा।
महदादिजगन्मायाचित्रभित्तिं नमामि ताम्॥ इ. सि. १-१.

श्लोकस्यास्य व्याख्यानम् ईषदूनाष्टात्रिंशत्पत्रपार्श्वं यावत् विस्तृतम्। व्याख्यानसारस्तु –

अनुभूतिस्तावत् स्वतः सिद्धा। अनुभूतेरनुभाव्यत्वे घटादिव-दननुभूतित्वप्रसङ्गात्। अत एव सा जन्मादिभावविकाररहिता। चेत्यानां चिद्धर्मत्वाभावादमेया सा। अत एव च देशतः कालतो वस्तुतश्चानन्ता। देशादीनां मेयत्वेनातद्धर्मत्वात् (इ. सि. पा. १–२)। अतोऽनन्तत्वात् सैव परमात्मा (इ. सि. पा. २५)। अत एवानन्दविग्रहा। ज्ञानानन्दयो-र्भेदाभावात्, अपर्यायशब्दत्वेऽपि ज्ञानानन्दलक्षणयोरर्थभेदस्यानुमातु-मशक्यत्वात्। अनुमानस्यागमविरुद्धत्वाच्च (इ. सि. पा. २५–२६)। 'तस्माद्वा एतस्मादात्मन आकाशः संभूतः' इति सूत्रवाक्यनिर्दिष्टं ब्रह्म-परामृश्य, तत्रैव चात्मशब्दं प्रयुज्य, ब्रह्मात्मनोर्जगत्प्रकृतितां प्रदर्श्य, 'आनन्दो ब्रह्मेति व्यजानात्' इति ब्रह्मानन्दयोरेकतामुक्त्वा, 'आनन्दा-

द्धयेव खल्विमानि भूतानि' इति ब्रह्मानन्दस्य जगत्प्रकृतितादर्शनात् ब्रह्मात्मानन्दानामेकतैव निश्चीयते (इ. सि. पा. २७)। एषैव चानुभूतिः स्वाविद्यामायाव्यपाश्रयेण समस्तजगदुत्पत्त्यादिहेतुः। न चाद्वैतविरोधः। माया ह्यनुभूतेः पृथक्त्वापृथक्त्वाभ्यामनिर्वचनीयेति (इ. सि. पा. ३२-३६) इति ॥

तर्कस्य प्राधान्यम् –

२१२. मङ्गलश्लोके 'या' इति स्वतःसिद्धतां द्योतयति इत्यभ्युपगम्य स्वतःसिद्धतामपि, तथानङ्गीकर्तुरनिष्टप्रसञ्जनरूपेण तर्केण साधयितुं प्रववृते इष्टसिद्धिः। स्वतःसिद्धे संशय एव कथम्? तत्रापि संशयानं प्रति तर्केण वा कथं तत्त्वं शक्यसाधनमिति नालोचितमत्र। न ह्यनुभूतेः परं किञ्चिदस्ति यद्बलात् सा, तद्धर्मा वा साध्येरन्। न च तर्केण तत्सिद्धिराशंसनीया, तर्कस्याप्यनुभवाश्रयेण स्वात्मधारणात्। उक्तं हि **नैष्कर्म्यसिद्धौ** वार्तिककारैः – 'अनुभवमात्रशरणत्वात् सर्वतार्किकप्रस्थानानाम्' – इति प्रतिज्ञाय

> इमं प्राश्निकमुद्दिश्य तर्कज्वरभृशातुराः।
> स्वाच्छिरस्कवचोजालैर्मोहयन्तीतरेतरम् ॥ नै. सि. २-५९

इति। 'अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गात्' इत्ययमपि हि तर्कः, कञ्चिदनुभवमाश्रित्यैवास्थेयः। अन्यथा वादिप्रतिवादिनोरन्योन्यभावानवबोधे कथाया एवानारभ्यत्वप्रसङ्ग इति। न च वेदान्ते अनुभवानङ्गस्यानुभवनिरपेक्षस्य वा तर्कस्याप्यवकाशः स्वसिद्धान्तसाधने। यथोक्तं भाष्ये –

> 'नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः संभवति। श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते' ॥ सू. भा. २-१-६

इति ॥

दृग्दृश्यभेदनिरासः –

२१३. अनुभूतेरानन्त्यम् आक्षिपन् प्रतिवादी प्राह – ननु इदंतया चेत्यं भाति ; अनिदंतयैव तु चित् । अतस्तयोर्भेदः प्रसिद्धतरो लोके, इतरेतराभावश्च । .... तस्मात्, चिच्चेत्ययोर्भेदोऽभ्युपेयः प्रसिद्धेरिति (इ. सि. पा. २) । भेदसद्भावात्, वस्तुकृतपरिच्छेदे सति अनुभूत्यानन्त्यमसिद्धमिति तस्य हृदयम् ॥

अत्र इष्टसिद्धिर्दृग्दृश्यसंबन्धपरीक्षामारभते यथोक्ताक्षेपप्रतिक्षेपार्थम् । तस्या एतस्याः परीक्षाया अतिविस्तृतत्वात् (इ. सि. पा. २–२४) तत्सारः संगृह्यते ग्रन्थकर्तृविचारसरणिसंस्तावनार्थम् –

(१) यद्यपि दृग्दृश्ययोर्भेददृष्टिः समस्ति, तथापि न सा दृग्दृश्ययोः संभवेत् । दृशोऽदृश्यत्वात् । न ह्यदृष्टस्य दृष्टात्, दृष्टस्य वा अदृष्टात्, भेदो द्रष्टुं शक्यः धर्मिप्रतियोग्यपेक्षत्वाद् भेददृष्टेः । अपि च कोऽयं भेदो नाम ? भेदिनः स्वरूपं चेत्, भेददृष्टेः प्रतियोग्यपेक्षा न स्यात् । न हि स्वरूपदृष्टिः प्रतियोग्यपेक्षा । अन्यथा प्रतियोगिनोऽपि प्रतियोग्यपेक्षत्वात् भेददृष्टेरनवस्था, अन्योन्याश्रयता वा स्यात् । अथ भेदिनोर्धर्मो भेदः, सोऽपि तस्माच्च भिन्नः । उक्तदोषप्राप्तेः । अतो भिन्नो ज्ञानान्तरज्ञेय एष्टव्यः । अन्यथा इतरेतरभावप्रसङ्गात् । ज्ञानान्तरेणापि वस्तुस्वरूपाद् भिन्नो भेदो न प्रतीयते । भेदभेदिनोर्भिन्नत्वे अनवस्थाप्रसक्तिश्च दुर्वारा । एवमन्योन्याभावोऽपि न संभवति, यदि स भेदादनन्यः । तस्य भेदादन्यत्वपक्षे तु भेदपक्षोक्तयुक्तयस्तत्रापि संचारयितव्याः । एवं च दृग्दृश्ययोर्न भेदः, नाप्यन्योन्याभावः । किञ्च, दृश्यत्वे भेदाभावयोर्न दृग्धर्मत्वम् । दृश्यान्तरवत् । अदृश्यत्वे तु तयोरसिद्धिः । स्वयंप्रभत्वे दृशोस्तयोर्न भेदः स्यात् । तस्माच्च दृशो भेदाभावौ धर्मौ, नापि स्वरूपम् । न चैकस्यैव द्वे रूपे । न च तयोरपि भेदः ॥

इ. सि. पा. २–१०.

[अत्रत्यभेदनिरासप्रकारो ब्रह्मसिद्धितर्ककाण्डस्थप्रकारेण तुलयितव्यः ॥]

(२) न चैवं दृग्दृश्ययोरभेदः, इतरेतरभावश्च प्रसज्येयाताम् इति शङ्क्यम् । यतो न तावदभेदो भाति । भेदप्रसिद्धिस्तु सार्वत्रिकी । न च सहोपलम्भनियमात् दृग्दृश्ययोरभेदः । न हि सहोपलभ्यत्वमस्ति तयोः,

दृशोऽनुपलभ्यत्वात् । न च सहैव भानं तयोः । दृशो नित्यत्वात्, स्वयंप्रभत्वाच्च । दृश्यस्य विद्युदादेरतथात्वात् । ननु तयोर्भेदज्ञानासंभवस्त्वयैवोक्तः, अतोऽभेदः प्राप्तः । न प्राप्तः । अभेदज्ञानासंभवस्यापि मयैवोक्तत्वात् । तस्मात्, दृग्दृश्ययोरभेदो न प्रतीतितः, तद्भावात् । नापि न्यायतः । तमःप्रकाशवद्विरुद्धस्वभावत्वात् ॥ इ. सि. पा. १०-१८.

(३) यद्यपि दृग्दृश्ययोः स्वात्मना न भेदः, तथापि ब्रह्मात्मना तयोरभेदोऽप्यस्ति-इत्यपि न युक्तम् । न ह्येकस्मात् ब्रह्मणोऽनन्यत्वे तयोर्मिथो भेदो न्याय्यः । स्वेन रूपेण भिन्ने, रूपान्तरेणाभिन्ने ब्रह्मण इति चेत् । ते रूपे तयोरभिन्ने चेत् ब्रह्मणोऽपि पूर्ववद् भेदः, तयोर्वा भेदो न स्यात् । भिन्ने चेत्, तयो रूपयोर्नाभेदोऽस्तीति नाभेदो दृग्दृश्ययोः । न चानयो रूपद्वयं समस्ति । न हि दृशो दृश्यं रूपम्, नापि दृश्यस्य दृक् । न च तृतीयं रूपमस्ति । तस्मात्, न दृशो रूपद्वयम्, नापि दृश्यस्य – इति तयोर्भेदः, अभेद एव वा अन्योन्यम् ; न भेदाभेदौ, रूपद्वयाभावात् । न चैकरूप एव भेदाभेदज्ञाने, ऐकार्थ्यप्रसङ्गात् । एकं द्विरूपमिति च विप्रतिषिद्धम् । एकस्यैव रूपद्वयवत्त्वे हि किं रूपिण एकस्मादभिन्नान्येव रूपाणि, उत भिन्नान्येव, अथवा भिन्नाभिन्नानि ?–इति विकल्पा भवन्ति । सर्वथापि तु दुर्निरूपमेव भवत्येकस्य द्विरूपत्वम् । तस्मात्, 'ब्रह्मात्मना अभेदः, स्वरूपेण तु भेदः' इति भेदाभेदपक्षोऽपि न निर्दूषणः ॥

इ. सि. पा. १८-२२.

ग्रन्थकारस्य तर्कसरणिः –

२१४. अत्यन्तसंक्षेपतः प्रदर्शितो दृग्दृश्ययोः संबन्धविषयकविचारग्रन्थः प्रदर्शनार्थम् इष्टसिद्धिसमादृतविषयनिरूपणरीतेः, तर्कशैल्याश्च । तत्र तत्र किमिदं सत्, असत्, सदसद्वा ; किञ्चेदममुकापेक्षया भिन्नम्, अभिन्नम्, भिन्नाभिन्नं वा ?–इत्येवं विकल्पनम्, प्रतिविकल्पं दोषोद्घाटनं चेति निरूपणक्रमो बहुशो विजृम्भतेऽत्र । अत्रापरं ग्रन्थभागम् उदाहरामो वाचकानाम् अत्रत्यविचारक्रमो यथा हृदयमागच्छेत् –

अतो भेदाद्यभावात् जन्मादिदोषगन्धोऽपि दृशं न ढौकत इति स्थितम् । किञ्च दृश्येऽप्येते दोषाः प्रमाणतो निरूप्यमाणा न संभावयितुं शक्यन्ते, कुतस्तत्संबन्धाद् दृशि स्युः ? तथा हि – अन्यत्वे अनन्यत्वे च

न धर्मधर्मिभावः । अन्यानन्यत्वं च निरस्तम् । अतोऽधर्मकत्वात् गुणानप्यसंस्पृशद् वस्तु कथं दोषान् संस्पृशेत् ? किञ्च, भेदस्य वस्तुनो भेदे, भेदाभेदे च तस्य तस्य भेदाद् वस्तुनश्च अन्योऽन्यो भेदः –इत्यनवस्थानात, न कश्चिद् भेदो वस्तु संस्पृशेत् । अभेदे तु एकमेव । तच्च वस्त्वेव ; न तु भेद एव । वस्त्वभावे तस्याप्यभावात् । तदेव वस्तु–इति चेत् । अस्तु । तथाप्येकमेव वस्तु । तच्च न दृश्यम् । तस्य सापेक्षत्वाद्द्वितीयतासिद्धेः । अतो दृगेव । तस्याः स्वतस्सिद्धेरेकत्वोपपत्तेः । न चास्या एकत्वं धर्मः । उक्तदोषप्रसङ्गात् । अतो निर्भेदम् । अधर्मकं वस्तु एकशब्देन विवक्ष्यते । भेदधर्माभाव इतरे धर्माः प्रत्युक्ताः । तदधीनत्वात् तेषाम् । भिन्नयोर्हि इतरेतराभावः । अतो भेदाभावे स न स्यात् । अतश्च वस्त्वसंकरासिद्धेरेकं वस्तु स्यात् । भावाभावानाम् इतरेतराभावाभ्युपगमे अनवस्था, अनभ्युपगमे वस्त्वसंकरासिद्धिः । न चाभावं विना जन्मादिसिद्धिः । न ह्यज्ञाते प्रागभावे कस्यचिज्जन्मनिश्चयः स्यात् । न ह्यदृष्टस्य दृष्टिमात्रं जन्म साधयेत् । न चादर्शने असिद्धे अदृष्टदृष्टिः सिध्येत् । अतः प्रागभावाभावे दृश्यस्य दर्शनस्य च जन्माभावः । जन्माभावे नान्येऽपि भावविकाराः स्युः । जन्मपूर्वकत्वात् तेषाम् । अतः कूटस्थं सदैकरूपं वस्तु स्वतः सिद्धम्, असिद्धमेव वा । द्वैरूप्यायोगाच्च । असिद्धमेव चेत् असत्कल्पम् । सिद्धमेव चेत्, दृगेव वस्तु, नान्यत् । ... अतो जन्म नाम न किञ्चित् कस्यचिदुपपन्नं पश्यामः । एवं नाशादयोऽपि निरूप्यमाणा नावतिष्ठन्ते । तस्मात् सुष्ठूक्तं दृश्येऽपि नैते दोषा निरूप्यमाणाः संभवन्ति, कुतस्तत्संबन्धाद् दृशि स्युरिति । तस्मादनन्तैवानुभूतिरिति स्थितम् ॥ इ. सि. पा. २३–२४.

अत्र तैत्तिरीयभाष्ये ब्रह्मण आनन्त्यनिरूपणग्रन्थेन एतावत्पर्यन्तोऽत्रत्यग्रन्थस्तुलनीयः, येनानुभवानुसारियुक्त्यपेक्षया स्वतन्त्रतर्कस्य प्राचुर्यं प्रकरणेऽस्मिन् कियदिति विशदतया विस्फुरेत् । अलातशन्तिप्रकरणे श्रीगौडपादादृतावीतन्यायतर्काद् वैलक्षण्यमपीष्टसिद्धीष्टतर्कस्य विस्पष्टं भवेत् ॥

जगतोऽनिर्वाच्यत्वान्नाद्वैतहानिः –

२१५. यद्येवं दृश्यं न वस्तु नावस्तु, न ब्रह्मणो भिन्नं नाप्यभिन्नम् न वा भिन्नाभिन्नमपि, का तर्हि द्वैतप्रपञ्चस्य गतिः ? न च प्रपञ्चो

नास्त्येव, तथा हि प्रत्यक्षादेर्निर्विषयत्वप्रसङ्गः, कर्मज्ञानकाण्डयोराश्रया-सिद्धिश्च स्याताम् । अथास्ति प्रपञ्च इत्यभ्युपेयते, तदा ब्रह्मणो भिन्नः, अभिन्नः, भिन्नाभिन्नो वा स्यात्, नान्यथा । तत्र प्रकारत्रयेऽपि यथोक्तं ब्रह्म न सिध्येत् इत्याशङ्क्य विमुक्तात्माचार्याः प्राहुः –

(१) 'नैकोऽपि दोषोऽस्मत्पक्षे । प्रपञ्चस्य मायानिर्मितत्वाभ्युपगमात् । मायायाः सकार्याया अपि वस्तुत्वावस्तुत्वाभ्यामनिर्वचनीयत्वात्, वस्त्ववस्तुपक्षद्वयाश्रया दोषा नास्मत्पक्षं कटाक्षेणापि वीक्षन्ते ॥
इ. सि. पा. ३२.

न चानिर्वचनीयत्वे प्रत्यक्षादिप्रामाण्याभावप्रसङ्गः –

(२) 'यथा स्वप्नप्रपञ्चस्य अनिर्वचनीयत्वेऽपि आ बोधात् तदाश्रयः सर्वो लौकिकवैदिकक्रियाकारकप्रमाणप्रमेयादिव्यवहारोऽप्रतिहतो वर्तते, स्वाप्नैरेव निमित्तैस्तत्प्रपञ्चनुत् सत्यार्थबोधो जायते, एवं जाग्रत्यपि सर्वमविरुद्धं द्रष्टव्यम्' ॥ इ. सि. पा. ३४.

(३) तस्मात्, यथोक्तलक्षणत्वेऽप्यनुभूतेः, स्वाविद्यामायाव्यपाश्रयेण समस्तजगदुत्पत्त्यादिहेतुत्वेन महदाद्यशेषकार्यविचित्रविग्रहत्वात्, प्रत्यक्षादीनां कर्मोपासनादिवाक्यानां च विषयत्वोपपत्तेः, न विरोधगन्धोऽप्याशङ्कनीयः ॥
इ. सि. पा. ३५.

भामतीकारेण सर्वस्याप्यस्य जगतोऽनिर्वचनीयत्वाभ्युपगमेन सकलदोषनिवारणं येन प्रकारेण, तेन समान इष्टसिद्ध्याद्दतप्रकारोऽपि । तस्यैव त्वयं प्रपञ्चः – इत्यपि वक्तुं शक्यते ॥

जगतोऽनिर्वचनीयाविद्यामायाकार्यत्वे प्रमाणम् –

२१६. कथं मायानिर्मितत्वं जगतः ? –

(१) मायानिर्मितत्वं जगतः 'मायां तु प्रकृतिं विद्यात्', 'इन्द्रो मायाभिः पुरुरूप ईयते', 'माया ह्येषा मया सृष्टा' इत्यादिशास्त्रेभ्योऽवगम्यते ॥ इ. सि. पा. ३६.

(२) मायेति सदसत्त्वाभ्याम् अनिर्वचनीया अविद्या उच्यते । ननु 'उच्यते अनिर्वचनीया' इति च विप्रतिषिद्धम् । नायं दोषः । 'सदसत्त्वाभ्याम्' इति विशेषणात् । सा हि युक्त्या निरूप्यमाणा न 'अस्ति' इति

निश्चित्य वक्तुं शक्या । नापि नास्तीति । सदसद्विलक्षणत्वेन तद्वचनानर्हत्वात् । तेन अनिर्वचनीया न पुनरवाच्येति । सदसत्त्वाभ्यामिति विशेषणं श्रुतवतोऽपि ईदृक् चोद्यं तवैव शोभते ॥ इ. सि. पा. ३५.

['सत्त्वासत्त्वाभ्यामनिर्वचनीया इति चेत् । अनिष्टोत्तरमेतत्' (भा. सू. पा. ९५) इति भास्करोक्तदूषणोद्धारयत्न एषः ॥]

(३) ननु सदसत्त्वाभ्याम् अनिर्वचनीयाविद्याकार्यम् अनिर्वचनीयं नाम किञ्चित् प्रसिद्धं नैव लोकेऽस्ति । यदि स्यात्, तद्वत् जगदपि अनिर्वचनीयमिति प्रतिज्ञायेत । न त्वस्ति । .... नैष दोषः । उक्तलक्षणस्य शुक्तिरजतादेः प्रसिद्धत्वात् ॥ इ. सि. पा. ३८–३९.

अत्र प्रस्थाने अविद्यामाययोरैक्यमिष्टम् । 'स्वाविद्यामायाव्यपाश्रयेण समस्तजगदुत्पत्त्यादिहेतुत्वेन महदाद्यशेषकार्यविचित्रविग्रहं ब्रह्म (इ. सि. ३५) इति निरुपचरितैक्यप्रतिज्ञानात् । भाष्यप्रस्थाने तु –

(अ) अविद्याकल्पिते नामरूपे सर्वज्ञस्येश्वरस्य माया· शक्तिः, प्रकृतिरिति – इति च श्रुतिस्मृत्योरभिलप्येते ॥ सू. भा. २-१-१४.

(आ) अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः .... ॥ सू. भा. १-४-३

इति चाविद्याकल्पितत्वेनैव नामरूपमाया निर्दिष्टा । युक्तं च तत् । विद्याविद्ययोरैकाधिकरण्याय अविद्याया अन्तःकरणावच्छिन्नात्माश्रयत्वेनैव स्वीकर्तुमुचितत्वात् 'नामरूपे व्याकरवाणि' (छां. ६–३–२) इत्यादिश्रुतिभ्यो व्याकरणविषयत्वेनाभिमताया नामरूपमायायाश्च विषयकुक्षावेव निवेशयितव्यत्वाच्च –

(४) तदेकम् अनेकम्, वस्तु नो वा, भिन्नमभिन्नं वा, सावयवं निरवयवम् – इत्यादिप्रकारैश्च निश्चित्य वक्तुमशक्यत्वाच्च ॥ इ.सि.पा. ६३.

इदं त्विह प्रस्थाने वक्तव्यं कथं मायाया अनिर्वचनीयत्वमिति । शुक्तिरजतस्य हि शुक्तिवदस्तित्वं नास्ति, न च नृशृङ्गादिविकल्पवन्नास्तित्वमपि तस्येत्यनिर्वचनीयत्वं भवेदपि । न हि मायाव्यतिरिक्तमसन्नाम किञ्चिदपि संभाव्यते येन तस्य सदसद्विलक्षणत्वं भवेदिति । सर्वस्यापि मायाकार्यत्वात् तदतिरिक्तत्वानुपपत्तेः ॥

ब्रह्ममायाजगतां संबन्धः –

२१७. 'मङ्गलश्लोके महदादिजगन्मायाचित्रभित्तिं नमामि' इति ब्रह्म वर्णितम् इत्यवोचाम। तस्य विवरणमिदम् –

(१) मायया निर्मितं चित्रम् मायाचित्रम्। चित्रमिव चित्रम्। तस्य भित्तिरिव भित्तिः, आश्रयो या अनुभूतिः, सा महदादिजगन्मायाचित्रभित्तिः। चित्रं चायनीयम् दर्शनीयम्। दृश्यमित्यर्थः। दृश्यम् अनुभूत्याश्रयमिति तस्य दौस्थ्यं प्रकटयति; 'सहस्रकिरणाश्रयं तमः'. 'अश्याश्रयं शैत्यम्' इतिवत्। अथवा चित्रं विचित्रम्। नानारूपम् इत्यर्थः। तस्य एकरूपा अनुभूतिराश्रयः-इत्युक्त्या तदेव दौस्थ्यं द्रढयति। 'आकाशाश्रयाः स्पर्शरूपरसगन्धाः', 'रज्ज्वाश्रयाश्च सर्पधाराभूच्छिद्रदण्डबल्लीवर्दमूत्रितत्वादयः' इतिवत्। यथा चित्रम् अत्यन्तसमायामपि भित्तौ अविद्यमाननिम्नोन्नतादिभ्रमान् जनयति, एवम् एकरूपायामपि अनुभूतौ विक्रियाविषयत्वभेदानात्मत्वासुखित्वपूर्वापरान्तर्बहिर्भावादिदिग्विभागात्युच्चातिनीचादिभ्रमान् जनयतीति जगत् चित्रमिव चित्रम्। यथा च चित्रं भित्तिं मुक्त्वा पृथगात्मानं न लभते, तत्रैव चोत्पत्तिस्थितिनाशाननुभवति, एवं जगदपीति तत् चित्रम्। चित्रस्यापृथक्त्वेऽपि चित्रोपादानद्रव्यं भित्तः पृथक् आत्मवत्, नैवं जगच्चित्रोपादानम् इत्याह-मायाचित्रमिति। माया ह्यनुभूतेः पृथक्त्वापृथक्त्वाभ्याम् अनिर्वचनीया। मायानिर्मितत्वं जगतः 'मायां तु प्रकृतिं विद्यात्' .... इत्यादिशास्त्रेभ्योऽवगम्यते। यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' .... इत्यादिशास्त्रेभ्यो यथोक्तलक्षणं ब्रह्म अवगतम्, एवं तस्य मायाव्यपाश्रयमेव जगस्स्रष्टृत्वं बहुरूपत्वं चावगन्तव्यम्। शास्त्रबलात्। अन्यथा अद्वैतविरोधाच्च॥ इ. सि. ३५-३६.

अत्र चित्ररज्जुसर्पादिनिदर्शनाद् दृश्यमात्मन्यध्यस्तमेवेति गम्यते। तत्र न्यायप्राप्तम् अध्यासविचारमनादृत्य जगत्कारणपरिशीलनमेव कुतोऽभ्यर्हिततया प्रथममानीतमिति शङ्कायाम् अस्य प्रस्थानस्याविद्यामायोपादानकभेदवादप्रभेदत्वादित्येव समाधानं प्रतिभाति॥

कार्यकारणप्रक्रिया –

२१८. यद्यप्यध्यासं विना न कश्चिदपि व्यवहार आत्मानं लभत इति स एव प्रथमं विचारणीयः, तथाप्यध्यासस्यापि कारणत्वेनात्र

प्रस्थाने स्वीकृताया मायाया एवाद्यत्वमुचितमिति कृत्वा सैवात्र निरूप्यते –

(१) माया, अविद्या, तमः, कारणम्, लयः, शक्तिः, सुप्तिः, महासुप्तिः, निद्रा, अक्षरम्, आकाशम् – इत्यादिशब्दैः 'मायां तु प्रकृतिं विद्यात्' इत्यादिश्रुतिस्मृतीतिहासपुराणादिवाक्येषु उक्ता या माया, सैव महदादेः समस्तस्य जगतः प्रकृतिरिति यदुक्तमाद्यश्लोके तदुपपन्नमेव। यतो लोकेऽपि शुक्तिरूप्यादिभ्रमाः सविषया मायामयाः प्रदर्शिताः। तस्मात् रूप्यादिभ्रमवत् आत्मनोऽब्रह्मताभ्रमस्यापि ज्ञानमात्रापनोद्यत्वं सिद्धम्॥

इ. सि. १-३४, पा. १४४.

अत्रेदमवधेयम् –

(१) 'माया अविद्यादिशब्दैरुच्यते' इत्युक्तमत्र **पञ्चपादिका-प्रक्रियाम्** (पा. २०) अवष्टभ्यैव। परमियान् विशेषः। तत्र भाष्यानुसारेणाध्यासविचारमेव प्रस्तुत्य अविद्याशक्तिर्मायादिशब्दैः श्रुत्यादिषु व्यपदिश्यत इत्युक्तम्। इहपुनर्दृग्दृश्यविवेकं प्रस्तुत्य दृश्यस्य दृशः सकाशाद् भिन्नत्वम् अभिन्नत्वं भिन्नाभिन्नत्वं वा नोपपन्नमित्यनिर्वचनीयत्वमेव परिशिष्यत इति प्रतिपाद्य, मायाया एव दृश्यभ्रमबीजत्वमुक्तम्; तस्यैव चाविद्यादिशब्दव्यपदेश्यत्वं प्रतिज्ञायत इति च। उभयत्रापि तु मायाविद्ययोः पर्यायत्वं प्रकृतिशब्दवाच्यत्वं च श्रुत्यन्तेषु कुत्राप्यदृष्टमेव स्वीक्रियत इत्यश्रुतप्रक्रिया समाना, भाष्यविगानं च॥

(२) ननु मायाशब्दः प्रज्ञानामस्वपि पठ्यते। अतो जगत्प्रकृतेर्मायाया अनिर्वचनीयतैवेति कुतः सिद्धम्? – इति चेत्, तन्न। तत्कार्यस्य द्वैतप्रपञ्चस्य तज्ज्ञानस्य च श्रुतिमुखादेवानिर्वचनीयतावगमात्। तथा हि यथा 'इह घटो नास्ति' इति, अन्यत्र सिद्धो घटोऽन्यत्र निषिध्यते, न तथा 'नेह नानास्ति किञ्चन', 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इत्यादिवाक्यैरन्यत्र सिद्धं द्वैतं तद्दर्शनं वा अन्यत्र निषिध्यते। किं तु तत्रैवाविद्योपस्थापितं 'नेदं रजतम्' इतिवत्। अतो रूप्यवत् द्वैततद्दृष्ट्योः श्रुत्यैवानिर्वचनीयत्वनिश्चयात्, तत्कारणमपि तादृगेव श्रुत्युक्तम् इति निश्चीयते। कार्यानुरूपत्वात्, कारणस्य। न च वस्तुनः कार्यकारणभावो

युक्तिमान् इत्युक्तम्, वक्ष्यते च। प्रज्ञानामत्वेऽपि मायाशब्दस्य न ब्रह्मनामत्वम्। इतरेषां नाम्नाम् अब्रह्मनामत्वात्। 'मायिनं तु महेश्वरम्' इति ब्रह्मणः पृथक्कृतत्वात्। तस्य च कूटस्थस्य बोधमात्रवपुषः साक्षाज्जगत्प्रकृतित्वायोगात्। अतो बुद्धिनाम स्यात्। बुद्धेश्च न कारणत्वम्। अनित्यत्वात्, स्वयं कार्यत्वात्, कार्यस्य च कारणत्वस्य प्रत्युक्तत्वात्। बुद्धिकार्यत्वे चाकाशादेस्तदनन्यत्वादनित्यत्वं तदबोध्यत्वं च प्रसज्येत। न हि बुद्धेर्बुद्धिबोध्यत्वमित्युक्तम्, वक्ष्यते च। न च बुद्धिकार्यं जगदिति वेदवादिनामिष्टम्। अतो जगत्प्रकृतिर्माया अनिर्वाच्या अविद्यैवेति सिद्धम्॥
इ. सि. १-३५, पा. १४४-१४५.

अत्र बहुपरिशीलयितव्यमस्ति। अतो यथोदाहृतग्रन्थभागं विभज्य विमर्क्ष्यामः —

(१) यत्तावदुच्यते जगत्प्रकृतिर्माया अनिर्वाच्या अविद्यैवेति। तद्वेदान्तमर्यादाविरुद्धम्। 'यतो वा इमानि भूतानि जायन्ते।' (तै. ३-१), 'ऊर्ध्वमूलोऽवाक्शाखः' (का. ६-१), 'अक्षरात् संभवतीह विश्वम्' (मुं. १-१-७), 'आत्मन एष प्राणो जायते' (प्र. ३-३), 'एष सर्वेश्वरः .... प्रभवाप्ययौ हि भूतानाम्' (मां. ६), 'स इमाँल्लोकानसृजत' (ऐ. १-२), 'तत्तेजोऽसृजत' (छां. ६-२-३), 'अस्मादात्मनः .... सर्वाणि भूतानि व्युच्चरन्ति' (बृ. २-१-२०)— इति सर्वेष्वपि वेदान्तेषु ब्रह्मण एव प्रकृतित्वावगमात्। 'अहमादिश्च मध्यं च भूतानामन्त एव च' (गी. १०-२०) इति भगवद्वचनात्। 'जन्माद्यस्य यतः' (वे. सू. १-१-२), 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (वे. सू. १-४-२३) इति बादरायणीयसूत्राच्च॥

(२) यत्तूच्यते 'नेह नानास्ति किञ्चन' इत्यादिश्रुतिभिर्ब्रह्मण्येवाविद्योपस्थापितं निषिध्यते 'नेदं रजतम्' इतिवदिति। तत्रोमिति ब्रूमः। जगतो ब्रह्मात्मत्वज्ञापनार्थमेव हि तत्कारणकत्वं श्रुत्या बोध्यते। अतस्तन्निषेधः, तदात्मत्वप्रतिपादनं च युज्यत एव। 'अथात आदेशो नेति नेति' (बृ. २-३-६), 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-१२) इति च॥

(३) यत्पुनरुच्यते रूप्यवद् द्वैततदृष्टेः श्रुत्यैवानिर्वचनीयत्वनिश्चयात् तत्कारणमपि तादृगेव श्रुत्युक्तमिति निश्चीयत इति । तन्नानुमन्यामहे । न हि रूप्यवदनिर्वचनीयत्वोक्तिरनिर्वचनीयकारणसूचनार्था, किं तर्हि सत एव ब्रह्मणो जगद्रूपेण भावोऽविद्यया शुक्त्यादेरिव रूप्यादिरूपेणेति निदर्शनार्था । यथाहुरभियुक्ताः –

(अ) प्रभवः सर्वभावानां सतामिति विनिश्चयः ॥ गौ. का. १-६.

(आ) अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ गौ. का. २-१७

इति च ॥

(४) यत्तु कार्यानुरूपत्वं कारणस्य । न च वस्तुनः कार्यकारणभाव इति च, तत्र ब्रूमः । न तावत् कार्यकारणभावे आनुरूप्यं तन्त्रम् । अत एव हि 'न विलक्षणत्वात्' (वे. सू. २-१-४) इत्यत्र जगद् ब्रह्म-प्रकृतिकमिति नोपपद्यते, तस्य विलक्षणत्वाद् ब्रह्मणः – इति साङ्ख्येन चोदिते भगवान् बादरायणः प्रत्याह 'दृश्यते तु' (वे. सू. २-१-६) इति । वस्तुनः कार्यकारणभावो नेति तु अर्धसत्यम् । यतो कारणात्मना विद्यमानस्यैव मायया कार्यात्मना जन्म, विद्यमानादेव च कारणात् कार्यस्य मायया जन्म – इत्याहुरभियुक्ताः ।

(अ) सतो हि मायया जन्म युज्यते न तु तत्त्वतः ॥ गौ. का. ३-२७

इत्यादिवचनदर्शनात् । न च 'मायया जन्म' इत्युक्त्या मायाप्रकृतिकत्व-मेवोक्तं भवतीति प्रत्युत्थातव्यम् । न हि 'मायया जन्म' इति कारण-प्रतिपादनार्थं वचनम्, किं तु तात्त्विकजन्मप्रतिषेधार्थमेवेति प्रकरणा-देवावगम्यते । उक्तं चैतदन्यत्रापि –

(आ) प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ गौ. का. १-१७

इति । किमर्थं तर्हि शुक्तिरूप्यादिवचनमिति चेत्, पुरस्तात् ख्यातिबाध-वादपरीक्षायां तद्वक्ष्यामः ॥

(५) एतेन 'कूटस्थस्य बोधमात्रवपुषः साक्षाज्जगत्प्रकृतित्वायोगात्' – इत्यपि व्याख्यातम्। न हि वेदान्तिनो ब्रह्मणः साक्षात्कारणत्वं प्रतिपादयितुं प्रवृत्ताः, अपि तु सर्वस्यापि जगतो ब्रह्मात्मनैव सत्त्वम्। कथं तर्हि ब्रह्मणो जगद्रूपेण परिणामं ब्रूते श्रुतिरिति चेत्। अत्र भाष्यकाराः –

> (उ) अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते। पारमार्थिकेन च रूपेण सर्वव्यवहारातीतम् अपरिणतमवतिष्ठते॥ सू. भा. २-१-२७, पा. २१३.

इति। नन्विष्टसिद्ध्याप्येतदेवोक्तं मायैव कारणं न ब्रह्मेति ब्रुवत्या। न। कार्यकारणभावः मृषैवात्मनि विभाव्यते, तच्च विभावनम् अविद्याकल्पितनामरूपलक्षणोपाधिवशात्, न स्वतः; ते च नामरूपे व्याकृते अव्याकृते वा अविद्याकल्पिते एवेति न परमार्थतः कार्यकारणभाववानात्मा – इति **भाष्यकारीया प्रक्रिया। इष्टसिद्धौ तु** जगत् अनिर्वचयीयमिति श्रुतियुक्तिभ्यां निर्धार्यते; अनिर्वचनीयस्य अनिर्वचनीयमेव कारणमिति युक्तम् इत्यतः, अनिर्वचनीयैव माया अविद्यापराभिधाना कारणम्, तादृशमायारचितजगच्चित्रभित्तित्वमात्मन इति प्रक्रियान्तरम् इति वैषम्यात्॥

(६) यदप्युच्यते प्रज्ञानामत्वेऽपि न ब्रह्मनाम स्यात् मायेति, 'मायिनं तु महेश्वरम्' इति ब्रह्मणः पृथक्कृतत्वात् इति–तत्तथैवास्तु; त्वदिष्टा प्रकृतिरविद्याशब्दिता इति तु न ततः सेत्स्यति। तत्कथम्? न हि माया नाम लोकतः सिद्धं किञ्चिद् वस्तु, येन तदनूद्य तस्याः प्रकृतित्वं विधीयेत। जगतः प्रकृतिः किं वास्तवी उत नेति विशये, तां मायां विद्यात् इत्युच्यते। अविद्याकल्पितां मिथ्याप्रतीतिमात्रलक्षणां विद्यात् इत्यर्थः। 'मायिनं तु महेश्वरम्' इति वाक्यशेषादप्येष एवार्थ इत्यवसीयते। न हि कञ्चिन्मायिनमुद्दिश्य तस्य महेश्वरत्वं विधीयत

इति शक्यं वक्तुं तत्र । यथैव मायाव्यधीना माया, एवं परमेश्वराधीना प्रकृतिः, सा च मायासरूपा इति खलु ऋज्वी व्याख्या वाक्यस्येति । 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिस्थलेषु 'मायाभिः' इति प्रज्ञावाचक एव मायाशब्दः । तत्राप्यवास्तवत्वमेव गम्यते बहुरूपत्वस्य । तथा ह्यभियुक्ताः –

(ऊ) नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि ।
अजायमानो बहुधा मायया जायते तु सः ॥ गौ. का. ३-२४.

इति । भाष्यं च –

(ए) ननु प्रज्ञावचनो मायाशब्दः । सत्यम् । इन्द्रियप्रज्ञाया अविद्यामयत्वेन मायात्वाभ्युपगमात् अदोषः । मायाभिः इन्द्रियप्रज्ञाभिः, अविद्यारूपाभिः–इत्यर्थः ॥ गौ. का. भा. ३-२४, पा. २१८.

प्रातिभासिकार्थस्य कारणमज्ञानम् –

२१९. अविद्याज्ञानादिशब्दा मायावाचकाः (इ.सि. पा. १४४) अज्ञानम् इति ज्ञानविरोधात्, ज्ञानपर्युदासेन वा उच्यते; तदेवानिर्वचनीयं जडात्मकं मायादिशब्दैरपर्युदासेनाप्युच्यते (इ. सि. पा. ६९) । अज्ञानकार्यं जगदित्यत्र च शुक्तिरजतादिरेव दृष्टान्तः (इ. सि. पा. ३९) इति विमुक्तात्मदर्शनम् । तत्रैतद्दृष्टान्ताधारेणैव इष्टसिद्धेः प्रक्रिया प्रायशो वितानितेत्यतः, तत्परीक्षा इदानीं कर्तव्यत्वेन प्राप्ता ॥

(१) सत्त्वे न भ्रान्तिबाधौ स्तां नासत्त्वे ख्यातिबाधकौ ।
सदसद्भ्यामनिर्वाच्याविद्या वेद्यैः सह भ्रमाः ॥ इ. सि. १-९

इति संग्रहश्लोकः । अस्य विवरणम् –

सत्त्वे शुक्तिरूप्यस्य तद्धीर्न भ्रान्तिः स्यात् । सत्यरूप्यधीरिव । तद्वदेव च नास्या बाधः । असत्त्वे तु नृशृङ्गवत् तस्य न ख्यातिः । अतो न भ्रान्तिबाधौ स्याताम् । .... ननु रूप्यस्य सत्त्वेऽसत्त्वे च न भ्रान्तिबाधौ संस्त इत्यवोचः ; न च सदसत्त्वे विरोधात् । न च प्रकारान्तरमस्ति ।

अतस्तत्प्रसिद्धिर्निर्मूला इति चेत् । तन्न । सदसत्त्वाभ्यामनिर्वचनीयाविद्यात्मकत्वाभ्युपगमात् रूप्यतज्ज्ञानयोः ॥ इ. सि. १-९, पा. ४७.

(२) न हि ज्ञेयस्यानिर्वाच्यत्वे तज्ज्ञानस्य निर्वचनीयत्वं न्याय्यम् । तज्ज्ञानत्वहानात्, ज्ञानान्तरवत् । ज्ञानस्य च निर्वाच्यत्वे ज्ञेयस्यापि तथात्वं स्यात् । अन्यज्ञानज्ञेयवत् । अतस्तयोरनिर्वचनीयत्वं सिद्धम् ॥

इ. सि. पा. ४८.

(३) कादाचित्कत्वाच्च तयोः कारणं मृग्यम् । न च निमित्तकारणमात्रात् कार्यसिद्धिः । अत उपादानं च मृग्यम् । न चासत्यस्य साक्षात् सत्यमुपादानं दृष्टम् । सत्योपादानत्वे च घटादिवत् सत्यत्वं मानगम्यत्वं च स्यात् । तच्च नेष्टम् । अतः, तदनुरूपम् अनिर्वचनीयमेवोपादानम् एष्टव्यम् । तच्च नान्यदज्ञानात् अनादि समस्ति । न च सादेरुपादानता । अनन्वयात्, अनवस्थानाच्च ॥ इ. सि. १-९, पा. ४८.

इदं त्विह वक्तव्यम् सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वात्, शुक्तिरूप्यादीनां किं स्वरूपेण मिथ्यात्वमात्रं विवक्षितम्, आहोस्वित् अनिर्वचनीया नाम ये केचित् पदार्थास्तत्स्वरूपत्वम् ? इति । आद्ये न विवादः । द्वितीये तु न सर्ववादिसंप्रतिपन्नास्ते, न च लोकसिद्धाः । न च तेषां स्वरूपं निर्धारणार्हम् । निष्फलत्वात् तद्विचारणस्य । न हि ते विद्यमानाः पदार्थाः, येन तन्निर्धारणप्रयासः सार्थको भवेत् । शुक्त्यादिरूपेणैव तेषां निर्धारणं तु सप्रयोजनम्, रागद्वेषभयादिदूरीकरणात् । यथोक्तमभियुक्तैः –

(अ) भावैरसद्भिरेवायमद्वयेन च कल्पितः ।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥ गौ. का. २-३३.

इति । भाष्यकाराश्चैनां कारिकामित्थं व्याचक्रुः –

(आ) यथा रज्ज्वाम् असद्भिः सर्पधारादिभिरद्वयेन च रज्जुद्रव्येण सता 'अयं सर्पः, इयं धारा' 'दण्डोऽयम्' इति वा रज्जुद्रव्यमेव कल्प्यते, एवं प्राणादिभिरनन्तैरसद्भिरेवाविद्यमानैः न परमार्थतः .... अद्वयेन च परमार्थसता आत्मना रज्जुवत् सर्वविकल्पास्पदभूतेनायं स्वयमेवात्मा कल्पितः, सदा एकस्वभावोऽपि सन् । ते च प्राणादिभावा अपि अद्वयेनैव सता आत्मना विकल्पिताः । न हि निरास्पदा काचित् कल्पना उपपद्यते ।

अतः सर्वकल्पनास्पदत्वात्, स्वेनात्मना अद्वयस्य अव्यभिचारात् कल्पनावस्थायामपि अद्वयता शिवा। कल्पना एव त्वशिवाः। रज्जुसर्पादिवत् त्रासादिकारिण्यो हि ताः। अद्वयता अभया; अतः सैव शिवा॥
का. भा. पा. २०५.

यत्तूच्यते ज्ञेयस्यानिर्वाच्यत्वे तज्ज्ञानस्याप्यनिर्वचनीयत्वं युक्तम्। ज्ञानस्य च निर्वाच्यत्वे ज्ञेयस्यापि तथात्वं स्यात् – इति। तत्र विभज्य वदनीयम्। प्रथमं तावत् ज्ञानशब्देन किं वृत्तिरुच्यते, किं वा ज्ञेयावगतिः? यदि वृत्तिलक्षणं ज्ञानम्, शुक्त्यादीनां रूप्यादित्वेन ज्ञानम् अतस्मिंस्तद्बुद्धिरूपत्वात् मिथ्याध्यास एवेति सर्वैरप्यङ्गीकर्तव्यम्। 'न हि तत्र रूप्यमासीत्। भ्रान्तेन तु तथा विकल्पितं मया' इति बाधकाले ज्ञानस्यापि मिथ्याविकल्पत्वेन निर्धारणात्। अथावगतिर्ज्ञानम्। न तस्या मिथ्यात्वमस्ति। न हि शुक्तिं रूप्यत्वेन निश्चिन्वानः, रूप्यं मिथ्येत्यध्यवस्यन्नपि मिथ्यारूप्यावगतिमपि मिथ्येति मन्यते कश्चित् 'न मया तदानीं रूप्यमित्यवगतम्' इति वा। अत एव भाष्यकारा आहुः –

(इ) 'यद्यपि स्वप्नदर्शनावस्थस्य सर्पदंशनोदकस्नानादिकार्यमनृतम्, तथापि तदवगतिः सत्यमेव फलम्। प्रतिबुद्धस्याप्यबाध्यमानत्वात्। न हि स्वप्नादुत्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्यमानः, तदवगतिमपि मिथ्येति मन्यते कश्चित्॥ सू. भा. २–१–१४, पा. १९९

इति। एतेन 'ज्ञानस्य निर्वाच्यत्वे ज्ञेयस्यापि तथात्वम्' इत्यपि व्याख्यातम्। यदि ज्ञानं तत्तद्विषयवृत्तिरूपं मतम्, तर्हि नास्ति ज्ञानस्य सत्यत्वं तद्विषयस्य वा रूप्यादेः। अथावगतिः, न तस्या मिथ्यात्वमस्ति 'यद्यपि रूप्यमित्येवावगतं मया, तथापि शुक्तिकैव तथा विकल्पिता तदानीमपि' इति बाधकालीनावगत्यापि सत्यभूतया मिथ्यारूप्यस्य तज्ज्ञानस्य च मिथ्यात्वेनैव विषयीकरणदर्शनात्। न ह्यवगतिरूपस्य ज्ञानस्य बाधकालीनस्य सत्यत्वेऽपि तावता रूप्यस्यापि तथात्वं शक्यमास्थातुमिति। वक्ष्यति हीष्टसिद्धिरपि –

(ई) सत्यविषयत्वं तद्भावश्च प्रामाण्यमप्रामाण्यं च, न स्वरूप-सत्यत्वम् असत्यत्वं च ॥ इ॰ सि॰ १-९, पा॰ ६२.

इति । तेन ज्ञानस्य सत्यत्वेऽपि ज्ञेयस्य मिथ्यात्वमक्षतम् । मिथ्याभूतस्य मिथ्यात्वेनैव निश्चये ज्ञानस्य प्रामाण्यम्, सत्यत्वेनावसितौ तु न प्रामाण्यं भविष्यतीत्यन्यदेतत् ॥

यत्पुनरुच्यते 'कादाचित्कत्वाच्च तयो रूप्यतज्ज्ञानयोः कारणं मृग्यम्' इति । अत्र ब्रूमः । शुक्तिरूप्यादेः कादाचित्कत्वेऽपि मिथ्या-विकल्पमात्रत्वात् न तस्य कारणं मृग्यम् । तज्ज्ञानस्य च मानसविकल्पना-मात्रत्वात्, विकल्पनायाश्च शुक्त्यादितत्त्वाविवेकनिबन्धनत्वात् तन्निमित्त-कारणं तावन्निश्चितम्, तदुपादानकारणं च मनस्त्वेन निश्चितमेवेति तस्या अपि कारणं न मृग्यम् । न हि भ्रान्तिविषया वस्तुसन्तः, येन तेषां कारणादिमार्गणमर्थवत् स्यात् । न च मानसविकल्पनाया वस्तुतत्त्व-विवेकाभावपूर्वानुभूतवस्त्वन्तरवासनादिव्यतिरेकेण कारणान्तरं शक्य-कल्पनमिति ॥

भ्रान्तिसंशयज्ञानाभावादिविलक्षणत्वमज्ञानस्य –

२२०. आभासमात्रशरीराणां शुक्तिरजतादीनां मनोविकल्पनामात्रत्व-मविज्ञाय तेषां जन्मनाशादिकल्पनं तत्कारणादिगवेषणं च यत् पञ्च-पादिकायां बीजरूपेणोपक्षिप्तम्, तदेव च प्रपञ्चितमिष्टसिद्ध्यादिप्रस्थानेषु। मण्डनादयस्तु भ्रान्तिरेव विपरीतग्रहणलक्षणा अविद्या परमात्मनि जीवत्व-कल्पनाहेतुरिति मन्यन्ते स्म । तन्निराकरणाय भ्रान्तिव्यतिरिक्तमेवाज्ञान-मुपादानं प्रातिभासिकविषयस्येति सिषाधयिषतीष्टसिद्धिः –

(१) भ्रान्तिरेव भ्रान्त्यन्तरकारणम्, तस्या अप्यन्या तस्या अप्यन्येति अनादित्वाद्भ्रान्तीनामेव – भ्रान्तितत्संस्काराणां वा – बीजाङ्कुरवत् कार्य-कारणतायोगात् नान्यत् कल्प्यम् इति चेत् । तन्न । अनन्वयादिना उक्तोत्तरत्वात् । न हि कार्यस्य कार्यान्तरे अन्वयः पिण्डस्येव घटे ;

अनन्वितं च नोपादानम्, पिण्ड इव घटस्य। या त्वन्विता मृत् सैवोपादानं पिण्डादीनां न तु तेऽन्योन्यस्य। एवं भ्रान्तिसंशयतत्संस्काराणामपि कार्यत्वे नान्योन्योपादानता। यत्तु तेष्वागमापायिष्वन्वेति, तदेव तेषामुपादानमज्ञानम्। तस्य भावे तेषां भावात्। अभावे चाभावात्॥

इ. सि. १-९, पा. ४८.

अत्र भ्रान्तिसंशयतत्संस्कारेष्वनुगतम् अज्ञानमस्ति तदुपादानम् इति तर्केणोपपादितम्। परं तु मृदिव घटघटिकोदञ्चनादिष्वनुगता किमज्ञानमस्ति सर्वेषामनुभवे? अस्ति चेत् किमिति वादिविप्रतिपत्तिस्तत्सद्भावे? किमिति वा अत्र प्रयासस्तत्साधने? – इति न विचारितम्। एतच्चोत्तरत्राविद्याया अनुभवगम्यत्वपरीक्षावसरे पुनरपि विम्रक्ष्यामः॥

वार्तिककारैश्च 'न जानामीत्यविद्या' (तै. वा. २-१७६) इति ब्रुवद्भिर्ज्ञानाभाव एवाविद्यात्वेन स्वीकृतः। तदिदं निराचकारेष्टसिद्धिः –

(१) ज्ञानाभावव्यतिरेकेणाज्ञानं न जानामीति चेत्, मैवं वोचः। 'नाज्ञासिषं शुक्तिम्, इदानीं तु जानामि'; 'अज्ञानं निवृत्तम्, पुनर्न जानामि' इत्यज्ञानतन्निवृत्त्योः प्रसिद्धत्वात्। तदेवाज्ञानं ज्ञानाभाव इति चेत्। तन्न। अभावप्रमाणाप्रमेयत्वात्। प्रत्यक्षम् अभावो वा अभावस्य प्रमाणम्। न ताभ्यां ज्ञानाभ्यां ज्ञायतेऽज्ञानम्। अपरोक्षत्वाच्च नाभावज्ञेयम्। प्रत्यक्षविशेषणश्चाभावः प्रत्यक्षज्ञानगम्यः। न चात्मा प्रत्यक्षज्ञानप्रमेयः। घटादिवदनात्मत्वप्रसङ्गात्। प्रमेयत्वे एकस्य प्रमातृत्वप्रमेयत्वानुपपत्तेः। प्रमात्रन्तराभावाच्च। भावेऽपि तस्यैवात्मत्वात्। अत एवात्मनोऽप्रमेयत्वात् तस्याज्ञानं नाभावप्रमाणेनापि प्रमेयम्। न ह्यभावाश्रयमप्रतीत्य अभावं प्रतियन्ति, अभाववादिनोऽपि। कथमप्रमाणं भातीति चेत्। रूप्यवत्। न हि शुक्तिरूप्यं केनचित् प्रमाणेन भाति। अमिथ्यात्वप्रसङ्गात्। तथापि भाति। एवमज्ञानमपि भाति, अनुभवादेव॥

इ. सि. १-९, पा. ६५-६६.

(२) यदि नाज्ञानं प्रमाणाभावः, कस्तर्ह्यसौ? विमृश्यतां स यदि कोऽप्यन्यः प्रामाणिकः समस्ति। नान्योऽपि समस्ति। आत्मनि ज्ञानाभावस्य

अप्रमेयत्वात्, अन्यत्र तस्याभावात्। इतरेतराभावोऽन्यत्राप्यस्ति इति चेत्। सोऽपि ज्ञानस्यात्मसंबन्धिनोऽप्रमेयत्वात्, न प्रमेयः। तस्मात्, न कश्चिज्ज्ञानाभावः प्रामाणिकोऽस्ति। अतोऽज्ञानमेव ज्ञानाभावः–इति चेत्। अस्तु। एवमपि नाज्ञानस्यानिर्वचनीयत्वहानिः। ज्ञानाभावस्य अभाव-प्रमाणागम्यत्वादसत्त्वाप्राप्तेः॥ इ. सि. पा. ६६.

अत्राज्ञानसतत्त्वं विभज्य विमर्शनीयम्। यदि 'शुक्तिं न जानामि इत्ययमज्ञानानुभवः, तर्हि शुक्तेः प्रत्यक्षप्रमेयत्वात्, किमिति तदज्ञानस्य प्रत्यक्षाप्रमेयता? 'शुक्तिं जानामि, अतोऽज्ञानं नास्ति मे' इति शुक्ति-गताज्ञानस्य अभावप्रमाणगम्यत्वं वा किमिति न संभवति? ये हि प्रत्यक्ष-गम्यत्वं शुक्त्यादेः, मानसप्रत्यक्षगम्यत्वं वा तज्ज्ञानस्य प्रतिजानते, अवश्यं तेऽज्ञानस्यापि प्रत्यक्षगम्यत्वमभावप्रमाणगम्यत्वं वा स्वीकुर्युरेव। अथ मनीषा, आत्मनः प्रत्यक्षागम्यत्वात् तदज्ञानस्य नास्ति प्रत्यक्षगम्यत्वम् अभावगम्यत्वं वा, अभावाश्रयाप्रतीतेरिति; यत्तु भात्यज्ञानम् अनुभवादेव भाति तदिति च। अस्त्वेवम् अभावाज्ञानवादिनोऽपि। न ह्यनात्माभाववत् आत्मज्ञानाभावेनापि प्रमाणगम्येन भाव्यम् इति नियन्तास्ति कश्चित्। न चैवमप्यज्ञानस्यानिर्वचनीयत्वमायातीति बिभीषिका। अनिर्वचनीयमेव खल्वात्माज्ञानम्, अविचारसिद्धत्वात् **यथाहुर्नैष्कर्म्यसिद्धिकृतः** –

(अ) 'सोऽयमेवमनुदितानस्तमितावगतिमात्रशरीर आत्मापि सन्न-विचारितप्रसिद्धाविद्यामात्रव्यवहित एवातथैवेक्ष्यते'॥ नै. ३-११३.

इति। न चैवं ज्ञानाभाववाचोयुक्तिरयुक्ता भवेत्। अनिर्वचनीयवादिनापि ज्ञाननिषेधस्यावश्याश्रयणीयत्वात्, यथैवानिर्वचनीयम् इति व्यपदेशमात्रम्, एवं ज्ञानाभाव इत्यपीति यत्किञ्चिदेतत्॥

(३) न चाज्ञानमेव सर्वो ज्ञानाभावः इति नियन्तुं शक्यम्। इतरेतराभावस्य विषयाश्रयत्वात्; अज्ञानस्य चात्मैकाश्रयत्वात्। प्रध्वंसस्य चोत्पत्तेरिष्टत्वात्, 'अज्ञानमुत्पन्नं मम' इति प्रतीत्यभावात्; अज्ञानस्य निवृत्तिप्रतीतेः, प्रध्वंसस्य च निवृत्त्यनिष्टेः। अथोच्येत – उत्पत्तिमत्त्वात्

प्रध्वंसोऽपि विनाशी । न हि भावादन्यस्योत्पत्तिः, भावस्य चोत्पन्नस्य घटवन्नाशो न्याय्यः । तस्मात्, उत्तरोत्तरो भावः पूर्वस्य पूर्वस्य प्रध्वंसः, पूर्वः पूर्वं उत्तरोत्तरस्य प्रागभाव इति । तदापि द्वयोरप्यभावयोर्जनिमत्त्वात्, अज्ञानस्य च तद्प्रतीतेः, न तयोरज्ञानता । ननु 'नष्टं ज्ञानम्' इति नाशजन्म भाति । भातु ; तथापि नाज्ञानस्य जन्म भाति, तस्य प्रागभावाप्रतीतेः । ज्ञानस्यैव हि प्रागभावो भाति, न पुनरज्ञानस्यापि । .... तस्मान्नाज्ञानं ज्ञानाभावः ॥ इ. सि. पा. ६७.

ज्ञानप्रागभाव एवाज्ञानं ज्ञानभावे तन्निवृत्तेरिति चेत्, तन्न । अतस्प्रागभावस्यापि ज्ञानभावे निवृत्त्युपपत्तेः । प्रदीपभावेनेव तमसः । न हि प्रदीपस्य प्रागभावस्तमः । तथापि भवन्नेव स तन्निवर्तयति । ... तथैव ज्ञानमप्यज्ञानम् अस्वाभावमपि भावमात्रेणैव निवर्तयितुमलम् इति, अज्ञानं न ज्ञानाभाव इति सिद्धम् ॥ इ. सि. पा. ६७-६९.

अत्र स्वेष्टमज्ञानं तार्किकमीमांसोभयसंमतज्ञानप्रागभावादिलक्षणज्ञानाभावाद् विलक्षणमिति तर्केणोपपादितम् । तत्र

(अ) प्रध्वंसाभावोऽप्यारभ्यत इति न संभवति । अभावस्य विशेषाभावाद् विकल्पमात्रमेतत् ॥ तै. भा. अव. पा. २५९.

(आ) यदि पुनरभावस्यापि विशेषोऽभ्युपगम्येत, उत्पलादीनामिव नीलत्वादिः, ततो विशेषवत्त्वादेवाभावस्य भावत्वम् उत्पलादिवत् प्रसज्येत ॥ सू. भा. २-२-२६, पा. २४५-२४६.

(इ) एकस्याभावः, द्वयोरभावः, सर्वस्याभावः, प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावः – इति लक्षणतो न केनचित् विशेषो दर्शयितुं शक्यः ॥ षो. भा. १८-४८, पा. २७७.

इति च प्रस्थानत्रयभाष्येष्वपि प्रत्याख्यातत्वादभावे विशेषस्य 'कीदृशोऽभावोऽज्ञानम्?' इति विकल्पनमेवाज्ञानजम् इत्यपि शक्यं भणितुम् । अतो ज्ञानाभाव एवाज्ञानम्, तच्चाविचारितसिद्धमात्मनीति युक्तम् । वस्तुतस्तु विचार्यमाणे 'आत्माश्रितमज्ञानम्' इति चिन्तितुमपि न शक्यम्, यतो नात्मनि देशसंबन्धोऽस्ति यत्राज्ञानमाश्रयं लभेत, नापि कालसंबन्धोऽस्ति

येन इदानीमज्ञानमस्ति भविष्यत्काले निवर्तिष्यते' इति बुद्धिः समीचीना भवेत् यथाहुर्वार्तिककाराः –

(ई) देशकालाद्यसंबन्धाद्देशादेर्मोहकार्यतः ।
नानुत्पन्नमदग्धं वा ज्ञानमज्ञानमस्यतः ॥ बृ. वा. १-४-१४५२.

इत्यपि शक्यं वक्तुम् । अस्तु वैतद् यथा तथा । भावाभावविलक्षणमज्ञानं शुक्तिरजताद्युपादानकारणत्वेनाभिमतं किं तत्रान्वितं सर्वत्र मृदिव घटादिषु ? – येनोच्यते 'भ्रान्तिसंशयतत्संस्काराणामपि कार्यत्वे नान्योन्योपादानता, यत्तु तेष्वागमापायिष्वन्वेति तेषामुपादानमज्ञानम्' (इ. सि. पा. ४८) इति, 'अज्ञानजमपि ब्रह्मज्ञानमज्ञानं दन्दहीति' (इ. सि. पा. ६९) इति च ? ओमिति चेत्, 'अज्ञानजमिदं रजतम्', 'अज्ञानरूपोपादाननाशान्नष्टमदो रजतम्' इति वा किमिति न प्रतीयत इत्यस्य प्रश्नस्य नोत्तरं दृश्यत इष्टसिद्धाविति प्रागुक्तं न प्रसर्तव्यमत्र ॥

ख्यातिबाधविचारः –

२२१. शुक्तिरजतादिप्रातिभासिकविषयतज्ज्ञानयोरनिर्वचनीयत्वं साधयितुं ख्यातिबाधविचारः प्रवर्तितोऽत्र –

रजतं भाति यद्भ्रान्तौ तत्सदेकं परे त्वसत् ।
अन्येऽनिर्वचनीयं तदाहुस्तेन विचार्यते ॥
असतः ख्यात्ययोगात् सद् बाधायोगादसत् सतः ।
अतोऽनिर्वचनीयं तदिति पक्षेषु युक्तयः ॥
इ. सि. १-२, ३, पा. ३९.

इति प्रस्तुत्य (१) असत्ख्यातिः, (२) अन्यथाख्यातिस्त्रिविधा, (३) अख्यातिः, (४) आत्मख्यातिश्चेति वादचतुष्टयं निराकृत्य स्वाभिमता अनिर्वचनीयख्यातिः प्रतिष्ठापितात्र । भाष्ये 'कोऽयमध्यासो नाम ?' इत्यध्यासलक्षणप्रणयनसमये 'तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति ; केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति ; अन्ये तु यत्र

यदध्यासः, तस्यैव विपरीतधर्मत्वकल्पनाम् आचक्षते' इति मतान्तराण्युपन्यस्य 'सर्वथापि तु, अन्यस्यान्यधर्मावभासतां न व्यभिचरति' इति स्वमतस्य सर्वतन्त्रसंमतत्वं प्रदर्श्य, तत्र निदर्शनमुपन्यस्तम् "तथा च लोके अनुभवः 'शुक्तिका हि रजतवदवभासते', 'एकश्चन्द्रः सद्वितीयवदिति'" इति। शुक्तिकादे रजताद्यात्मना भानस्य लोकानुभवसिद्धत्वात् न तत्र विवादोऽस्तीति ख्यात्यन्तरपरीक्षायाः फलगुप्रयोजनत्वात्, न तत्र भाष्यकारैः प्रयतितम्। **पञ्चपादिकाकारैस्तु** अध्यासस्यानिर्वचनीयाविद्याशक्त्युपादानत्वं स्वीकुर्वद्भिः ख्यात्यन्तरपरीक्षा वितानिता, तथा **भामतीकारैरप्यविद्याया** अध्यासरूपत्वमङ्गीकृत्यापि लयलक्षणाविद्यात्वेनाविद्याशक्तिं स्वीकुर्वद्भिः। अत्र पुनः भावरूपानिर्वचनीयाविद्यां शुक्तिरजतदृष्टान्तेनैव हृदयं गमयितुं महान् प्रयत्न आस्थितः ख्यात्यन्तरखण्डने। तत्र यथोदाहृतद्वितीयश्लोकोक्तयुक्त्या असतः ख्यात्ययोगात्, सतश्च बाधायोगात् वादान्तरेषु न भ्रान्तिसिद्धिः, तस्मात् अनिर्वचनीयमेव रूप्यादीति ग्रन्थकृदभिप्रायः॥

अत्र यद्वक्तव्यं तत्प्रागेवोक्तम् – रूप्यादीनां यथाप्रतिभासरूपेण विकल्पमात्रत्वात्, न स्वास्पदशुक्त्यादिव्यतिरिक्तरूपसतत्त्वनिर्धारणं सप्रयोजनमिति। इष्टसिद्धिमते तु अनिर्वचनीयख्यातिसाधनं तेन च प्रपञ्चस्यानिर्वचनीयत्वसिद्धिः, ततश्च ब्रह्मणोऽद्वितीयत्वसिद्धिः। तादृशब्रह्मदर्शनाच्च मोक्षसिद्धिरिति प्रयोजनानि कल्पितानीत्युक्तम्॥

तत्रानिर्वचनीयख्यातिवादे आक्षेपपरिहाराः ग्रन्थकारैरेवं प्रदर्शिताः –

(१) ननु यत् सन्न भवति न तत् ख्याति खपुष्पादि, यच्चासन्न भवति न तद्बाध्यते सत्यरूप्यादि। अतोऽनिर्वचनीयत्वे रूप्यस्य सदसद्विपर्ययात् ख्यातिबाधौ अयुक्तौ स्याताम्। अतः ख्यातेर्बाधाच्च अनिर्वचनीयं रूप्यादीत्ययुक्तम् (इ. सि. १–४२, पा. १५०) इति सत्ख्यातिवाद्याक्षेपे समाधानम् –

(a) त्वयाप्यसतः ख्यातिजाती नेष्टे । न च सतः शुद्धस्य बाधनाशौ युक्तौ । शुक्तेर्ब्रह्मणश्च तत्प्रसङ्गात् । अतोऽनिर्वचनीयत्वं रूप्यादेः सिद्धम् ॥
इ. सि. पा. १५१.

(b) जगतोऽपि सत्त्वाविशेषाद् ब्रह्मणोऽनन्यत्वाच्च कारणं नास्ति । अस्ति चेत् ब्रह्मणोऽपि तत् स्यात्, तदनन्यत्वात् । स्वतोऽनन्यस्यापि चेत् जगतो ब्रह्म कारणं स्यात्, स्वस्यापि स्यात् । न चेत् न जगतोऽपि, अविशेषात् । अन्यत्वेऽपि सचेत्, जगदजमकारणं च भवेत्, ब्रह्मवत् । अतो न सतो जन्मनाशौ । असतस्तु त्वयापि तौ नेष्टौ । जगतश्च तौ श्रुतौ । अतोऽस्य अनिर्वचनीयत्वं श्रुतियुक्तितः सिद्धम् ॥ इ. सि. पा. १५२.

[अत्र जगतो यद्यसत्त्वं नास्ति, सत्त्वेऽपि जन्मनाशौ नोपपद्येते, तावन्मात्रेण अनिर्वचनीयत्वं कथम् ? यतो जगतो जन्मनाशौ श्रुतौ इति चेत् । तन्न । 'उपायः सोऽवताराय' (गौ. का. ३-१५) इत्यभियुक्तैः सृष्टिश्रुतेः प्रयोजनान्तरस्यैव कथनात्, 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-१), 'आत्मैवेदं सर्वम्' (छां. ७-२५-२) इत्यादिसावधारणश्रुतेः प्रपञ्चस्य परमार्थतो ब्रह्ममात्रत्वावधारणार्थैव श्रुतिरित्यर्थापत्तेरन्यथैव प्रक्षीणत्वात् ॥]

(२) 'यद्यसदिव अनिर्वाच्यमपि सतः प्रतियोगि प्रसिद्धं स्यात् तदा 'सन्न भवति' इत्युक्ते संदेहः स्यात् अनिर्वाच्यं नु तत्, असन्नु तदिति । न तु तथा संशेरते जनाः' (इ. सि. पा. १६०) इत्यसद्वाद्याक्षेपे समाधानमिदम् –

(अ) किमसन्नाम सतो भेदेन अस्ति, उत नास्ति । अस्ति चेत् न तस्य तुच्छता । सत्त्वादेव । नास्ति चेत् असत् ख्याति – इत्यादिवचोऽयुक्तम् । अतस्तद्भ्रान्तिमूलमेव ॥ इ. सि. पा. १६१.

(आ) अख्यातस्वभावस्य च ख्यानासंभवात्, अख्यातस्य ख्यातता चेत् क्रियेत, अनिर्वाच्यस्यैव सा स्यात् । न क्रियते चेत्, न ख्यातिस्तस्य । स्वतोऽख्यातेः । अतः ख्यातिरप्यनिर्वाच्यस्यैव जनिवत् । स्वयं चानिर्वाच्यैव अतोऽभिव्यक्त्यनभिव्यक्ती अपि मयोक्ते मायाकल्पिते एव, न तु सत्ये जनिध्वंसवदेव । अतोऽप्यख्यातस्वभावस्य असतो न ख्यातिर्युक्ता । ननु अख्यातस्वभावत्वात् मायाया अपि न ख्यातिर्युक्तिमती । सत्यम्, अत एव सा माया, अन्यथा तत्ख्यातेः सत्यत्वात् सापि सत्यैवेति न माया स्यात् ॥
इ. सि. १-११९, पा. १९१.

(इ) अनिर्वाच्यं चेद् रूप्यं कथम् 'अस्ति' इति भातीति चेत् भ्रान्तित्वादोषः । अनिर्वचनीयस्य च तद्रूपासत्त्वे प्रमाणाभावात् नासत्ख्यात्याशङ्का ॥ इ. सि. पा. १२१.

(ई) अनुमानादयश्च अपरोक्षेऽप्यर्थे प्रवर्तन्ते । अतः, तैश्चन्द्रादितत्त्वं प्रतिपद्य द्विचन्द्रादेस्तत्प्रतिभासस्य च अनिर्वचनीयाज्ञानशरीरमात्रत्वं प्रतिपद्यते । प्रत्यक्षबाधे तथा व्युत्पत्तेः । न स्वभावं द्विचन्द्रादीनां वेत्ति । उक्तहेतुभ्यः प्रत्यक्षबाधे चान्यथैव व्युत्पत्तेः । तत्र हि अयथार्थप्रतिभासस्य तदर्थस्य च अर्थयाथात्म्याज्ञानजत्वं तज्ज्ञानहेयत्वं च प्रतिपन्नम् । न पुनरभावज्ञानहेयत्वं भ्रान्त्यर्थस्य । अत इहापि तथैव युक्तं प्रतिपत्तुं चन्द्रादीनामेकत्वादौ ज्ञाते । न चैकत्वादिज्ञानं विना द्विचन्द्रादिज्ञानानां भ्रान्तित्वं ज्ञातुं शक्यम् 'न च द्वौ चन्द्रौ', 'नेयं प्राची दिक्'-इत्येतावदेवासवाक्यं यद्यपि भवेत्, तथापि पूर्वोक्तव्युत्पत्तिबलात् अनिर्वाच्यतैव चन्द्रद्वित्वादेः प्रतीयते न त्वभावः । 'नेह नानास्ति' इत्यागमवाक्यस्याप्येवमेवार्थो ग्राह्यः ॥

इ. सि. १-९, पा. १२१-१२२

सर्वत्राप्यत्र रूप्यादेरनिर्वचनीयत्वसाधनव्यसनिता स्फुटति । यद्यत् प्रतिभासिकं तद् स्वास्पदवस्तुमात्रं न तु तद्व्यतिरिक्तं किमपीति मन्यते लोकः, न तु प्रतिभातवस्तुनोऽनिर्वचनीयतां निश्चिनोति । न हि प्रतिभासमात्रशरीरस्य सत्त्वम् असत्त्वं वा निश्चेतुमयं प्रवृत्तः, किं तु रूप्यमेवेदम्, उत न – इति संशेते । निरूपणान्ते तु निश्चिनोति शुक्तिकैवेयं न रूप्यमिति । न च रूप्याभावो नाम शुक्तिव्यतिरिक्तोऽन्यः पदार्थोऽस्ति योऽत्र निश्चीयतेऽभावप्रमाणेन । शुक्तिरेव तु स्वप्रमाणेन निश्चीयत इति निर्विवादमेतत् । तस्मात् 'नेदं रजतम्', 'न द्वौ चन्द्रौ', 'नेयं प्राची दिक्' इत्यादिनिषेधस्थलेषु रजतद्वितीयचन्द्रप्राचीप्रमुखपदार्था यैर्निषिध्यन्ते, न ते निषेधा निषेधप्रधानाः, नापि रजतादिप्रतीतवस्तुस्वलक्षणनिर्धारणप्रधानाः ; अपि तु तत्तद्विकल्पास्पदवस्तुमात्राध्यवसायप्रधाना इत्येव सम्यङ्मतिः । एवं नेह नानास्तीत्यादिश्रुतीनामपि तात्पर्यं बोध्यम् । अत एवाहुर्वृद्धाः –

(अ) अलाते स्पन्दमाने वै नाभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पन्दान्नालातं प्रविशन्ति ते ॥
न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ।
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ॥
विज्ञाने स्पन्दमाने वै नाभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पन्दान्न विज्ञानं विशन्ति ते ॥
न निर्गतास्ते विज्ञानाद् द्रव्यत्वाभावयोगतः ।
कार्यकारणताभावाद् यतोऽचिन्त्याः सदैव ते ॥
गौ. का. ४–४९....५२.

[अत्र ऋजुवक्राद्याभासानामचिन्त्यस्वभावानां कार्यकारणता नास्ति, अलातमेकमेव त्वस्ति यथा, तथा विज्ञानमेकमेव तथ्यं वस्तु न तु द्वैताभास इत्युक्तम् ॥]

(आ) तद्धि द्वितीयचन्द्रस्यासत्त्वं यदतैमिरिकेण चक्षुष्मता न गृह्यते। नैवं न गृह्यत इति चेत् । न । सुप्तसमाहितयोरग्रहणात् ॥
तै. भा. २–८, पा. ३०९.

[द्वितीयचन्द्रो नास्त्येव, अदृष्टचक्षुषा अगृह्यमाणत्वात् इत्युक्तमत्र ॥]

(इ) येन करणेन ब्रह्मविद् हविरग्नौ अर्पयति तद् ब्रह्मैवेति पश्यति, तस्यात्मव्यतिरेकेणाभावं पश्यति । यथा शुक्तिकायां रजताभावं पश्यति । तदुच्यते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकैवेति ॥
गी. भा. ४–२४, पा. ७३.

[अत्र रजतस्य शुक्तिकायामभाव एव, शुक्तिकैव तस्य तत्त्वम्–इत्युक्तम्। न तु अनिर्वचनीयं रजतमुत्पन्नमज्ञानादिति । एवं हविरपि ब्रह्मविदृष्ट्या ब्रह्मैवेत्यवधारितम् ॥]

(ई) निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते ।
रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः ॥ गौ. का. २–१८.

[अत्र तत्त्वनिश्चये सर्पधारादिविकल्पो विनिवर्तते, रज्जुरेव भवतीत्युक्तम्। न तु निश्चये सति सर्पादेरनिर्वचनीयत्वमवतिष्ठत इति ॥]

शुक्त्यज्ञानसतत्त्वम् –

२२२. शुक्तिरूप्यकारणमज्ञानम् अनादीति प्रस्थानेऽस्मिन्

स्थापितम्, ब्रह्मविद्याविनाश्याज्ञानमेव तदिति च। तत्रेमानि वाक्यान्यनुसंधेयानि –

(१) कार्यस्य कारणत्वानुपपत्तेः, नित्यमेव कारणमिति कारणभावे कार्यं भवत्येवेति नियमो नास्त्येवेति स्थितम् ॥ इ. सि. पा. ५४.

(२) कालयोगिनां कार्याणां कालेनैवोत्पत्त्यादिनियमाभ्युपगमेन कार्याणां कालनियमः कथम् ? – इत्यस्य चोद्यस्य परिहृतत्वात्, अकालयोगिनि तु कार्ये अस्य चोद्यस्यैवानुपपत्तेः, नित्यकारणपक्षे न कश्चिद्दोष इति स्थितम्। अत अनादिकस्यैव शुक्त्यज्ञानस्य शुक्तिरूप्यतज्ज्ञानोपादानता न्याय्या, न त्वन्यस्य कस्यचित् ॥ इ. सि. पा. ५५–५६.

अविद्याया अध्यासरूपत्वमङ्गीकृतं मण्डनभामत्यादिप्रस्थानेषु, ज्ञानाभावत्वमुररीकृतं वार्तिकप्रस्थाने। तदुभयं प्रतिक्षिप्य 'अनाद्युपादानलक्षणैव सा इति न्याय्यम्, सर्वत्र कार्येष्वनुगमात्; न चाभावत्वमस्याः, अभावस्यानुपलब्धिप्रमाणविषयत्वात्' इत्यादियुक्त्यवष्टम्भादनाद्यज्ञानम् अध्यासादिविलक्षणं प्रत्युपस्थापितमत्र। तत्र भ्रान्तिलक्षणाविद्यावादिनस्तावदविद्यां न भेदोपादानकारणमाहुः, किं तु तत्कल्पिताम्। कल्पनाधीनो भेदः, भेदाश्रया च कल्पना – इतीतरेतराश्रयदोषपरिहाराय तु अविद्यातत्संस्कारयोः अविद्याजीवयोश्च बीजाङ्कुरसंतानयोरिवानादित्वमातिष्ठन्ते (ब्र. सि. 10, 33; वा. भा. पा. १७, ३९, ४५, ...)। तत्रैवं सति बीजाङ्कुरन्यायेनाविद्यातत्कार्यसन्तानमनादिमातिष्ठमानानामपि कार्ये कारणस्याननुगमान्नोपादानत्वमिति दूषणं न स्थाने, अनुक्तपर्यनुयोगात्; किमु वक्तव्यमध्यासरूपाविद्याया अनादित्वम्, कालादेरपि कार्यत्वम्, तस्याश्च रज्जुसर्पादिवन्मिथ्याविकल्पमात्रत्वमातस्थुषामध्यारोपापवादप्रक्रियासंप्रदायाध्वजुषां मते न तद्दूषणं प्रसरं लभेतेति। अतोऽभियुक्तवाक्यानि कानिचित् सांप्रदायिकप्रक्रियास्मारणार्थमत्रोदाहरामः –

(अ) एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ॥ अध्या. भा. पा. ४.

(आ) तस्यापरमार्थरूपमविद्याकृतं रज्जुसर्पादिसममुक्तं पादत्रय-लक्षणं बीजाङ्कुरस्थानीयम् । अथेदानीमबीजात्मकं परमार्थस्वरूपं रज्जुस्थानीयं सर्पादिस्थानीयोक्तस्थानत्रयनिराकरणेनाह ॥ मां॰ भा॰ ७, पा॰ १८६.

[अत्र कार्यकारणभावेन संबद्धं स्थानत्रयं सर्पादिस्थानीयम् अविद्याकृत-मध्यारोपप्रक्रियया उपन्यस्तम् अपह्नुत्य रज्जुस्थानीयं तुरीयं ज्ञाप्यत इत्याह ॥]

(इ) एतेन दिक्कालमनःपरमाण्वादीनां कार्यत्वं व्याख्यातम् ॥
सू॰ भा॰ २-३-७, पा॰ २६८.

[अत्राकाशवत कालस्यापि कार्यत्वप्रतिज्ञानात्, कार्यत्वं ब्रह्मण्यध्यस्तत्व-मेवेति गम्यते । कालयोगिपदार्थानामिवैव कालस्यापि कार्यत्वे कालान्तरापेक्षादोष-प्रासप्रसङ्गात् ॥]

(ई) संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै ।
सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै ॥ गौ॰ का॰ ४-५७

भाष्यम् – संवरणं संवृतिः, अविद्याविषयो लौकिको व्यवहारः । तया संवृत्या जायते सर्वम् । तेनाविद्याविषये शाश्वतं नित्यं नास्ति वै । अत उत्पत्तिविनाशलक्षणः संसारः आयत इत्युच्यते । परमार्थसद्भावेन तु अजं सर्वम्, आत्मैव ॥ पा॰ २४४.

[अत्र कार्यं नामाविद्याकल्पितत्वमेवेत्युक्तम् ॥]

(उ) तस्मात् क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां लभन्ते – इति न कारणादन्यत् कार्यं वर्षशतेनापि शक्यं निश्चे-तुम्, तथा मूलकारणमेवान्त्यात् कार्यात् तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते ॥ सू॰ भा॰ २-१-१८, पा॰ २०७.

[अत्र 'नटवत्' इति, 'सर्वव्यवहारास्पदत्वम्' इति विकल्पास्पद-सूचकशब्दप्रयोगेन च कार्यं नाम रज्जुसर्पादिवन्मिथ्याकल्पितमेवेति गम्यते । अतोऽविद्यापरिणामलक्षणकार्यकारणप्रक्रिया न भाष्यकारस्य मनसि स्थितेति च ॥]

(ऊ) 'चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते'। (सू॰ भा॰ २-१-२४, पा॰ २१०) चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद् देवादिवच्च अनपेक्ष्य बाह्यसाधनं स्वयं परिणममानं जगतः कारणमिति स्थितम् ॥ सू॰ भा॰ २-१-२६, पा॰ २१२.

[अत्र सुस्पष्टमुक्तम् अद्वितीयमेव ब्रह्म जगत्कारणमिति । तेनाप्यध्यास-लक्षणाविद्यावशेनैव ब्रह्म कारणमिति गम्यते ॥]

(ए) प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः संभवति इत्येतदपि अविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव ॥

सू. भा. २-१-३१, पा. २१५.

[अत्रापि निर्विशेषं ब्रह्मैव, अविद्याकल्पितनामरूपलक्षणेन व्याकृताव्याकृतात्मकेन सर्वशक्तियुक्तं कारणं च भवतीत्युक्तम् ॥]

यथोदाहृतवाक्यैर्ब्रह्मैव जगत्कारणम्, जगच्च तस्मिन् अविद्याध्यस्तमिति तत्कार्यमित्युच्यते एषैव च वेदान्ताभियुक्ताभिमता प्रक्रियेति स्पष्टं विज्ञायते । इष्टसिद्धिस्तु अनिर्वचनीयजगतः कारणमनिर्वचनीयाज्ञानं कूटस्थब्रह्मणः साक्षाज्जगत्प्रकृतित्वायोगात्' (इ. सि. पा. १४५) इति स्वाभीष्टप्रक्रियासिद्ध्यर्थम् शुक्तिरूप्यादिस्थलेऽपि रूप्यादेरनिर्वचनीयमज्ञानम् अविद्यामायापराभिधानम् उपादानकारणं प्रसाधयितुं प्रयतत इति स्फुटम् । वक्ष्यति हि कण्ठरवेण –

मायाविद्यादिशब्दैर्या श्रुतिषु स्मृतिषूदिता ।
सा जगत्प्रकृतिर्माया यतो मायामया भ्रमाः ॥

इ. सि. १-३४, पा. १४४.

इति । तद्विवरणे च –

'तस्मात्, रूप्यादिभ्रमवत्, आत्मनोऽब्रह्मताभ्रमास्यापि ज्ञानमात्रापनोद्यत्वं सिद्धम्' इति ॥

(३) ननु शुक्तेरादिमत्या अज्ञानं कथमनादि स्यात् ? नायं दोषः अशुक्त्याश्रयत्वात् तस्य । ज्ञाश्रयं हि तत् । ज्ञश्रानादिः ॥ इ. सि. पा. ५६

(४) कथमशुक्त्याश्रयत्वे 'शुक्त्यज्ञानम्' इति शुक्त्या व्यपदेश इति चेत्, शुक्तिज्ञानवत् । न हि शुक्तिज्ञानं शुक्त्याश्रयम् । तस्या जडत्वात् । अतः शुक्तिविषयत्वात् शुक्तिज्ञानं तत् । तथा शुक्त्यज्ञानमपि ॥

(५) न हि शुक्तिरूप्ये कस्यचित् ज्ञानाज्ञाने स्तः, सत्यत्वप्रसङ्गात् । सत्यरूप्यवत् । न च तत् सत्यम्, बाधात् । अतः शुक्त्यज्ञानजमेव तत् ॥

इ. सि. पा. ५६.

(६) ज्ञाश्रयाज्ञानजस्यापि रूप्यस्य शुक्तिसामानाधिकरण्यख्यातिः, खस्थस्येवार्कस्य कूपे ख्यातिवन्न विरुध्यते । भ्रान्तित्वात् । .... असच्चेत् रूप्यं

ख्याति, तस्य शुक्तिसामानाधिकरण्यम् असत् किं न ख्यायात् ? विषयाश्रयमज्ञानम् इति चाप्रसिद्धेः, 'ममात्राज्ञानम्' इति च ज्ञस्य संवित्तेः। विषयाश्रयाज्ञानाभ्युपगमेऽपि ज्ञाश्रयस्याभ्युपेयत्वात्। तेन विना रूप्यज्ञानासिद्धेः, तेनैव च रूप्यस्यापि सिद्धेः, तदेव च रूप्यतज्ज्ञानाद्युपादानमिति सिद्धम्॥ इ. सि. पा. ५७.

यदुक्तं पञ्चपादिकायाम् 'अवश्यमेषा अविद्याशक्तिर्बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या, (पं. पा. ४) इति, तत्रात्माश्रितामविद्यामङ्गीकृत्य बाह्यशुक्त्याद्याश्रिता सा स्पष्टं निराकृतात्र। तदङ्गीकारे, लोकानुभवाननुरूपत्वं गौरवं च स्यादिति हेतुरप्युपन्यस्तः। ज्ञाश्रया चाविद्या भ्रान्तिरेव, शुक्तिविषयकाज्ञानं वा स्यादिति पक्षद्वये भ्रान्तिर्निराकृता, ज्ञानाभावश्चेत्यतः, तदुभयविलक्षणं भावाज्ञानमेव ज्ञाश्रयं शुक्त्यज्ञानम् इत्युक्तं भवति॥

(७) ननु शुक्त्यज्ञाने नष्टेऽपि रूप्यादि पुनर्दृश्यते। .... तन्न। पुनरपि हि सत्येव शुक्त्यज्ञाने रूप्यादि दृश्यते, न तु ज्ञायमानायामेव शुक्तौ। किमनन्तानि शुक्त्यज्ञानानि ? बाढम्, अनन्तान्येव, यद्यनन्तानि शुक्तिज्ञानानि .... अथ सर्वेष्वेव पदार्थेषु – तत्रापि भिन्नज्ञानज्ञेयेषु शब्दादिषु विषयेषु – सकृत्सकृदज्ञानं निवर्तनीयमस्ति, तर्हि, अनन्तान्यज्ञानानि एकस्य पुंसो निवर्त्यानि सन्तीति, एकस्मिन्नपि विषये अनेकाज्ञानाभ्युपगमे न कश्चिद्दोषः॥ इ. सि. पा. ६३-६४.

(८) नन्वज्ञानभावाच्चेन्न भाति, शुक्तिज्ञान उदितेऽपि न भासेत। एकाज्ञानाभावेऽपि अज्ञानान्तराणां तत्र भावात्। .... अतः सा स्वत एव न भाति, जडत्वात्। ज्ञानभावे तु भाति। अभावे स्वत एव न भाति। अतोऽस्या ज्ञानं प्रकाशकमेव, नाज्ञानं नाम तन्निवर्त्यं तत्र किञ्चिदस्तीति चेत्। तन्न। अज्ञानाभावेऽज्ञाताभावात्, ज्ञानस्याप्यभावप्रसङ्गात्। यद्यपि शुक्तेः स्वत एवाभानमिति प्रकाशकमेव तस्या ज्ञानम्, तथापि ज्ञानाभावे तस्या अभानाद् तवापि ज्ञानाभावो ज्ञानेन निवर्त्यत इति निवर्त्यं न नास्ति तवापि॥ इ. सि. पा. ६४-६५.

(९) अथोच्येत – ज्ञानस्य भानहेतुत्वात् तद्भावे सा भाति। अभानहेतुत्वाभावात् ज्ञानाभावस्य तदनिवृत्तावपि नाभानं तस्या इति। तच्चा-

युक्तम् – ज्ञानस्याभावानिवृत्तौ भावायोगात् .... अथ मतम्, नानिवृत्तेऽपि तस्याभावे ज्ञानस्य भावः, किं तु निवृत्त एव । अतः कादाचित्कं शुक्तिभानं स्यात् । तद्धेतोर्ज्ञानस्य कादाचित्कत्वात् । अन्येषु तु ज्ञानाभावेषु अनिवृत्तेष्वपि शुक्तिभानं स्यात् । तेषां शुक्त्यभानाहेतुत्वादिति । तर्हि, अज्ञानेष्वप्येतत् समानम् । शुक्त्यभानाहेतुत्वात् तेषामपि ॥

इ. सि. पा. ६५.

अत्र भ्रान्तिव्यतिरेकेण ज्ञाननिवर्त्यमभावरूपं भावरूपं वा किमस्ति? – इति प्रश्नो नोत्थापितः, नाप्युत्तरितः । ज्ञानस्योदय एवाज्ञाननिवृत्तिः, न तु तद्व्यतिरेकेण निवर्त्यो ज्ञानाभावो नामावशिष्यते – इति ज्ञानाभाववादिमतं नोद्भावितं नापि प्रतिविहितम् । न च भाष्यकारीयं मतं प्रातिभासिकविषयमत्र परीक्षितम् –

(अ) प्रत्येत्येव हि केवलं रजतमिति, न तु तत्र रजतमस्ति ॥

सू. भा. ४–१–५, पा. ४६७.

(आ) रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते ॥

छां. भा. ६–२–३, पा. ५१०.

(इ) गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रम् ॥ बृ. भा. १–४–७, पा. ६६६.

[अत्र हि भाष्यकारा रजतायुत्पत्तिं तस्योपादानकाङ्क्षां च वारयन्ति ॥]

(ई) यथा मृगतृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्यते स तस्या अन्तः, तथेमे देहाः स्वप्नमायादेहादिवच्चान्तवन्तः ॥

गी. भा. २–१८, पा. १६.

[मृगतृष्णिकादिषु सद्बुद्ध्यनुवृत्तिविच्छेद एव तेषामन्तः – इत्युक्त्या न तेषामज्ञानादुत्पत्तिः ज्ञानाच्चाशो वा ; अविद्यया तेषु सद्बुद्ध्यनुवृत्तिमात्रमेव तु तेषां स्थितिर्नामेति दर्शयति ॥]

(उ) भ्रान्तिनिमित्तात् सर्पो भवति यथा रज्जुः, पश्चात् कृतप्रकाशा रज्ज्वात्मना स्वेन रूपेणाभिनिष्पद्यते .... ॥ छां. भा. ८–१२–३, पा. ६००.

[अत्रापि सर्पभावो भ्रान्तिमात्रात् इत्युक्तम्, न त्वज्ञानलक्षणोपादानकारणपरिणामादिति ॥]

अथ यथा शुक्तिज्ञानं तदज्ञानं निवर्तयति, एवं ब्रह्मज्ञानं तदज्ञानं निवर्तयतीति प्रतिपादनार्थं दृष्टन्तादानम्। तत्र पूर्वपक्षिणा, अनेकाज्ञानपक्षे दोषं दृष्ट्वा ब्रह्मज्ञानस्यापि शुक्त्यज्ञानस्येव दग्धस्यापि पुनःपुनर्भावादनिर्मोक्षप्रसङ्गः – इति चोदिते, इष्टसिद्ध्युत्तरम् –

(८) न हि शुक्त्यज्ञानमपि दग्धं पुनर्भवति – अदग्धत्वप्रसङ्गात्, प्रतीतिविरोधाच्च-न चान्यदपूर्वं जायते; किं तु पूर्वमेवानाद्यज्ञानं साकल्येनादग्धम्, शुक्तेः साकल्येनाप्रकाशितत्वात्। न हि शुक्तिस्वज्ञानक्षण एवास्ति। उत्तरकालेऽपि भावात् तस्याः। न च सर्वकालसंबन्धिरूपग्राहि प्रत्यक्षम्। अतोऽनेकज्ञानप्रकाश्यानेकरूपत्वात् शुक्तेः, एकैकेन ज्ञानेन कार्त्स्न्येनाप्रकाशितत्वात् तदज्ञानस्यापि कार्त्स्न्येनानिवृत्तिर्युज्यते॥ इ. सि. पा. ७०.

(९) नन्वज्ञानं चेत् सांशम्, घटवत् कार्यं स्यात्; न चेत्, कार्त्स्न्येन निवृत्तिरनिवृत्तिर्वा स्यात्। सत्यम्। अत एव सांशत्वानंशत्वादिभिरनिर्वाच्यं तदित्यवादिष्म। .... तस्मात्, यावज्जडं वस्त्वस्ति तावत् नास्याज्ञानमशेषं निवर्तते॥ इ. सि. पा. ७०, ७१.

शुक्तिविषयकमज्ञानं नाना वा, उत एकमेव शुक्त्यादिवस्तु अनेकज्ञाननिवर्त्यस्वगतानेकरूपविषयकानेकाज्ञानवद् वा–इति द्वेधा कल्पनम्, अज्ञानस्य सांशत्वे निरंशत्वे च दोषात् सांशत्वादिभिरनिर्वाच्यत्वमेवेति कल्पनं च वेदान्ताभियुक्तसंमतपरिभाषाविरुद्धम् –

(1) क्रियायामिव वस्तुनि विकल्पाभावः। सू. भा. पा. १६४.
(2) दृष्टविपरीतकल्पनानुपपत्तिः। सू. भा. पा. १६५.
(3) न च शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य प्रसिद्धिर्भवति। सू. भा. पा. २३४.
(4) ज्ञापकं हि शास्त्रं न कारकम्। बृ. भा. पा. ६७१.
(5) अविद्यमानार्थकल्पनायां सर्वार्थसिद्धिप्रसङ्गः। सू. भा. पा. २३७.

इति ह्यभियुक्तानां परिभाषाः। तदिह परिभाषापञ्चकमपि विरुणद्धीदं कल्पनम्। अज्ञानं नाना वा एकमेव वा इति विकल्पस्य, मिथ्यैव रजतत्वेन

विकल्पिता शुक्तिरिति दृष्टवैपरीत्येन शुक्तिरूप्यकार्यत्वस्य, 'ज्ञानं जातम् अज्ञानं नष्टम्' इति शब्दार्थव्यवहारमात्रेण लोकसिद्धज्ञानाभावसंशय-विपर्ययव्यतिरेकेणाज्ञानान्तरसिद्धेः, ज्ञानसार्थक्यायाज्ञाननिवर्तकलक्षण-कारकत्वस्य, अविद्यमानरजतकारणत्वेनाविद्यमानाज्ञानकल्पनस्य च समाश्रयणात् तर्कमात्रावष्टम्भेनेति ॥

(१०) त्वयाप्येते दोषाः परिहर्तव्या एवेति चेत् । न, मायावादित्वात् । वस्तुन्येव हीष्टे कार्ये कारणे च एते दोषाः परिहर्तव्याः, न तु मायायाम् । मायात्वेनैव परिहृतत्वात् । यथा अनग्नित्वादयो दोषा गृहस्थादिभिरेव परिहार्या न तु भिक्षुणा, भिक्षुत्वादेव । अत उक्तेन न्यायेन कस्यचिदपि पक्षेऽज्ञानस्य वस्तुत्वे निवृत्यसंभवात् तन्निवृत्तेश्च प्रसिद्धत्वात्, मदुक्तलक्षणमेवाज्ञानं तन्निवृत्तिश्च ॥ इ. सि. पा. ९३.

इति यत् परवाददूषणपूर्वकं स्वपक्षसाधनम्, तदप्यविद्यमानकल्पनमेव तर्कावष्टम्भेनेति न किञ्चित् तत्र वक्तव्यमस्ति । न हि तर्कमात्र-कल्पितस्याज्ञानस्य तन्निवृत्तेर्वा सर्वलोकानुभवसिद्धत्वमस्तीति ॥

शुक्तिविषयकाज्ञानमपि नास्त्येव वस्तुतः –

२२३. शुक्तिविषयकाज्ञानस्य ज्ञाश्रयत्वेऽपि अज्ञानकार्यस्य रूप्यस्य शुक्तौ ख्यातिर्न विरुद्धा इति यत् प्रागुक्तम् (पा. ४९३, इ. सि. पा. ५७) तच्छुक्तिविषयकमज्ञानमङ्गीकृत्य । वस्तुतस्तु नास्त्येव जडविषयकमज्ञानमितीष्टसिद्धिराद्धान्तः –

(१) अज्ञानभ्रमसम्यग्ज्ञानानाम् एकाश्रयत्वप्रसिद्धेः, जडस्य च वेद्यत्वाद्विद्याभावात् नाविद्यास्ति । न ह्येकस्यैव वेद्यत्वं वेदितृत्वं च युज्यते ॥ इ. सि. पा. १९३.

(२) न च अर्थानर्थौ मुक्तिबन्धौ स्वर्गनरकौ वा जडस्य युक्तौ । अतोऽपि नाविद्या जडस्य न्याय्या । .... यदि जडस्याविद्या स्यात् । न सा निवर्तेत असत इव तस्य विद्याभावात् ॥ इ. सि. पा. १९३

(३) 'अज्ञान्यस्मि न जानामि' – इति चाज्ञानानुभवो यथा पुंसो भवति नैवं जडस्य स्यात्, अदृक्स्वभावत्वात्। अतो न स्वानुभवसिद्धं जडस्याज्ञानम्। नाप्यस्य प्रमाणसिद्धम्, प्रमाणागम्यत्वाद्ज्ञानस्य प्रमाण-प्रवृत्तेः प्रागेव तत्सिद्धेः॥ इ. सि. पा. १९४

(४) अन्तःकरणादीनां चानित्यत्वादनाद्यज्ञानाश्रयत्वानुपपत्तिः। अन्यदपि जडं विभक्तं चेत् कार्यत्वादनित्यमेवेत्यनाद्यज्ञानाश्रयो न स्यात्; अविभक्तं च जडं न सिध्येत्, स्वतोऽसिद्धेः। अजडस्य तु आत्मनो विभागः कुतश्चिदपि न संभवतीत्युक्तम्। अतो स एवानादित्वादनादिनोऽज्ञानस्य आश्रयो युक्तः। अज्ञानं चानादि उक्तम्, अन्यथा अज्ञानमेव तन्न स्यात्। प्राङमुक्तानां बन्धहेत्वज्ञानाभावे पुनरपि तद्भावदनिर्मोक्षप्रसङ्गात्। तस्मात् आत्मन एवाज्ञानं युक्तम्, न त्वनात्मनो जडस्य॥

इ. सि. पा. १९५

[अज्ञानं ज्ञानं वा चेतनस्यैवेति वस्तुस्वभावाल्लोचनयैव सिद्धं यद्यपि, तथापि इष्टसिद्धिसंमतं लोकसिद्धाज्ञानविलक्षणमिति तस्य जडाश्रितत्वशङ्कापि भवेत्। उररीकृतं च पञ्चपादिकायां बाह्यवस्तुस्वरूपसत्तानुबन्धि समस्तज्ञान-मितीत्यतोऽपि अज्ञानस्य जडाश्रितत्वनिषेधो नाप्राप्तस्य॥]

एवं भावाज्ञानस्य जडाश्रितत्वं नास्तीति प्रसाधितम्। वस्तुतस्तु न जडं प्रमाणगम्यम्, अतो न तस्याज्ञानम् तस्मिन्नपि नाज्ञानमितीष्ट-सिद्धिराद्धान्तः –

(५) ननु जडमज्ञानं कथमजडस्यात्मनः स्यात्? न हि जडमजडस्य स्वरूपम्, गुणः, धर्मः, विकारो वा स्यात् तव। रूपादिवत्। सत्यम्। यद्यप्यात्मनः स्वरूपादि न भवत्यज्ञानम्, तथापि तत् तस्याज्ञानं भवत्येव। यज्जडं तदात्मनोऽज्ञानं न भवति, अमुकवत् – इति न शक्यं वक्तुम्। दृष्टान्ताभावात्। सर्वमेव जडम् आत्माज्ञानम् इति मया इष्टत्वात्। तदुप-पादयिष्यैव सत्यपि प्रमाणगम्ये जडे अज्ञानातिरिक्ते तस्य क्वचिदज्ञानं न संभवतीत्युक्तम्। तेनैव न्यायेन तस्मिन्नपि आत्मनोऽज्ञानं न संभवति। जडस्याज्ञानम् इतिवत्, जडेऽज्ञानम् इत्यपि ज्ञातुम् अशक्यत्वात्। अज्ञानस्याप्रमेयत्वात्, जडस्य च प्रमेयत्वात्, तयोः संबन्धाप्रतीतेः॥

इ. सि. पा. १९६

[अत्र नैष्कर्म्यसिद्धितृतीयाध्यायावतरणिका तुलनीयानेन युक्तिसंदर्भेण। तत्र आत्मानात्मनोर्मध्ये अनात्मनोऽध्यस्तरूपत्वात्, आत्मानात्मनोः संबन्धोऽज्ञान-

मन्तरेण न संभवति । तच्चाज्ञानं नानात्मनः, नाप्यनात्मनीति प्रतिपादितम् । तत्र प्रस्थाने अज्ञानं ज्ञानाभाव इति तु विशेषः ॥]

(६) नन्वज्ञानं यदि जडे नास्ति, ज्ञानमपि तत्र न स्यात् । अतश्च 'नाज्ञासिषं पूर्वं घटम् इदानीं तं जानामि' इत्यादिव्यवहारो न स्यात् - इति चेत् । नायं दोषः, 'पूर्वं द्वितीयं चन्द्रं नाद्राक्षम्, इदानीं तं पश्यामि' इतिवत् तदुपपत्तेः । इ. सि. पा १९६

(७) अज्ञाते घटे, 'घटेऽज्ञानम्' इति न शक्यं ज्ञातुम् । ज्ञातेऽपि तथा, तदा तदज्ञानाभावात् । ज्ञाते घटे, 'अयं पूर्वं न ज्ञातः' इति घटे अज्ञानं न सिध्यतीति चेत्, तन्न । अज्ञातघटासिद्धेः । न ह्यज्ञातरूपो घटः प्रमाणात् सिध्यति । प्रमाणप्रवृत्तेः प्रागेव तस्येष्टत्वात् । ऊर्ध्वं चेदज्ञातत्वं स्यात् । अज्ञातत्वमेव मानात्स्यात् न तु ज्ञातत्वम् । उभयार्थत्वायोगात् मानस्यैकस्यैव । विरोधात् । ज्ञातत्वं तु प्रागेव स्यात्, ऊर्ध्वं तदयोगात् । प्रागपि ज्ञातत्वे तद्धेतुमानं च व्यर्थं स्यात् । न च ज्ञातत्वं प्रागपि जडस्य, स्वतो ज्ञातत्वासिद्धेः मानाच्च तदयोगात् । स्वतःसिद्धत्वे जडत्वहानिः । तस्मात् मानादज्ञातत्वे न जातु ज्ञातत्वं स्यात्, जडस्य । अज्ञातत्वासिद्धौ च ज्ञातत्वासिद्धिः, अज्ञातस्यैव सतो ज्ञातताया इष्टत्वात् ॥

इ सि. पा. १९६-१९७.

(८) यथा कृष्णं कृष्णात्मनैव बोधयति मानम्, न शुक्लीकरोति । एवम् अज्ञातेऽर्थे स्वरूपमप्यतिशयम् अकुर्वत् यथावस्थिताज्ञातस्वरूपमात्र-पर्यवसाय्येव मानं मानं भवतीति न तस्य नैष्फल्यम् इति । तर्हि नार्थस्या-ज्ञातत्वसिद्धिर्मानात्, प्रवृत्तेऽपि मानेऽर्थे अतिशयाभावस्य इष्टत्वात् । अतो यथा मानात् प्राङ् नाज्ञातत्वं सिद्धम् । तथा ऊर्ध्वमपि न सिध्येत् । अन्यथा प्रागपि सिध्येत्, विशेषाभावात् । न चेत् नोर्ध्वमपि, अविशेषादेव । उभयथापि मानं व्यर्थम् । एवं चेत् प्रमाणवृत्तम्, अन्यत्रापि तदा जडं न किञ्चित् सिध्येत् । मानात् प्रागूर्ध्वं च तस्य विशेषाभावात्, स्वतश्चासिद्धेः ॥

इ. सि. पा. १९९.

(९) ननु न मानं वस्तुविकारकृत् तथापि । सत्यम्, अत एव न जडस्य मानात् सिद्धिः, कथञ्चित् कदाचिदपीत्यवोचं जडे मानस्य नैष्फल्यम् । नन्वजडस्यापि मानात् प्रागूर्ध्वं च विशेषाभावात् स्वतःसिद्धत्वाच्च तन्मानस्यापि तदसाधकत्वाद् वैफल्यम् समानम् इति चेत् । तन्न, अज्ञान-निवर्तकत्वान्मानस्य । इ. सि. पा. १९९

[एवं च 'जडेषु रूपान्तरावभासहेतुरेवाज्ञानम्' इति पञ्चपादिकाकार-कृन्मतं परित्यक्तं भवति ॥]

(१०) जडस्य तु अज्ञानाभावात्, न तन्निवर्तनेनापि तन्मानस्य साफल्यम् । निवर्तितेऽप्यज्ञाने जडस्य स्वतोऽसिद्धेर्मानाच्च विशेषाभावात् तस्यासिद्धिरेव । अथ मनुषे, अन्यविशेषाभावेऽपि मानात् जडस्य ज्ञातत्वं भवत्येव, अन्यथा जडासिद्धेस्तन्मानवैफल्याच्चेति । तर्हि यावत् किञ्चि-न्मानस्पृष्टं तत् सर्वं ज्ञातमेवेति नाज्ञातजडसिद्धिर्मानात् । अथ मानस्पृष्टमपि किञ्चिज्जडमज्ञातं भवेत्, तर्हि सर्वं जडं तथैवेति न किञ्चिज्जडं सिध्येत् । अनेनापि न्यायेन अज्ञानस्य मानगम्यत्वं प्रत्युक्तम् । तस्यापि जडत्वात्, मानस्यापि तथा । अतो जडं वस्त्वस्ति तदज्ञातं सत् मानाज्ज्ञायत इत्याद्या प्रसिद्धिरज्ञानमूलैव ॥ इ. सि. पा. १९९-२००.

(११) प्रयोजनाभावादपि शून्यजडयोर्नाविद्या कल्पनीया । न तावत् तयोर्भ्रमः प्रयोजनम् । न हि ते भ्रमतः । अज्ञत्वात् । यस्याज्ञानं समस्ति तस्यैव भ्रमोऽपीत्युक्तत्वात् । न च तयोरविद्यया द्रष्टुर्भ्रमः । अतिप्रसङ्गात् । अन्यस्याविद्यया चेदन्यो भ्रमेदपि, सर्वः सर्वदा भ्रमेत् । ... शून्यजडयो-रविद्यया चेद् द्रष्टुर्भ्रमः स्यात्, न स द्रष्टुर्विद्यया निवर्तेत । न च तयोर्विद्या अस्ति ॥ इ. सि. पा. २००-२०१.

(१२) यद्यपि द्रष्टृविद्ययैव रूप्यादिज्ञानं सिध्येत्, तथापि दृश्यबाह्य-दूरस्थशुक्त्यर्कमण्डलादिस्थतया स्फुरतो रूप्यसुषिरादेर्दृश्यरूपस्य दृश्यस्थाविद्यां विना न सिद्धिः स्यात् । द्रष्टृविद्याजश्चेत् तदाश्रयो भासेत रूप्यादिः, तज्ज्ञानादिवत्, न तु शुक्त्याद्याश्रयः। अतदविद्याजत्वात्। सर्पोदकपुरुषादिवत् .... इति चेत् । तन्न । स्वप्नेऽप्यस्य यथोक्तस्य रूप्यादेर्यथोक्तशुक्त्यादि तत्स्थाविद्याभावेऽपि दर्शनात् ॥ इ. सि. पा. २०१.

[शुक्त्यादिविषयकं तदाश्रितं वा अज्ञानं नास्त्येवेति ग्रन्थकृन्मतम् ॥]

(१३). कथं शुक्त्याद्यज्ञानजा रूप्यादिभ्रान्तय इति प्रसिद्धिरिति चेत् ? शृणु । शुक्त्यादीदमंशावस्थापर्यन्तं विकसितात् आत्ममोहाज्जाता रूप्यादिभ्रमाः शुक्त्यादिमोहजाः कथ्यन्ते । शुक्त्यादीनामपि रूप्यादिवदज्ञान-जत्वाविशेषात् तेषामप्यज्ञानाभावात् रूप्यादिवत् । यथा स्वप्ने । यथा

चाकाशादिक्रमेण मृद्वस्थान्तं परिणतादात्मनो जातो घटो मृज्ज इत्युच्यते । कार्यस्य कारणत्वायोगात्, मूलकारणस्यैव आ चरमकार्यात् कारणत्वात् ॥

इ. सि. पा. २०४.

[रूप्यादेरिव शुक्त्यादेरज्ञानजत्वमपि तर्केणैव सिद्धम्, यथा अज्ञानस्य स्वाभिमतस्यैव कारणत्वमिति स्मर्तव्यमत्र ॥]

(१४) यत आत्मन एव स्वतो ज्ञातत्वं ज्ञत्वं च युक्तम्, अज्ञेयत्वात् । न तु जडशून्ययोः, तयोर्ज्ञेयत्वस्य इष्टत्वात् । ज्ञेयस्य च स्वतो ज्ञातत्व-ज्ञत्वायोगात् । अज्ञेयत्वे च तयोरसिद्धेः, स्वयंप्रकाशस्याप्यात्मनोऽन्यस्या-सिद्धेः, अत एव आत्मैवाविद्यया जडादिरूपेण भाति नान्यत्किञ्चि-दित्युक्तं युक्तमेव ॥ इ. सि. पा. २०६.

(१५) स्वतो ज्ञातत्वं चात्मनः परज्ञेयत्वव्युदासेन स्वयंज्योतिष्ट्व-मेवोच्यते न त्वेकस्यैव ज्ञातृज्ञेयत्वे । तदसंभवात् । ज्ञेयस्य च घटादेरज्ञेत्व-प्रसिद्धेः । अतो नात्मा अहंप्रत्ययादिवेद्यः । ....

ज्ञेयज्ञात्रोः ज्ञातृत्वज्ञेयत्वयोः-प्रकाश्यप्रकाशकयोरिव प्रकाशताप्रकाश्य-त्वयोः-असंभवात्, जडशून्ययोश्च स्वतो ज्ञातत्वज्ञत्वाभ्युपगमे अज्ञेयत्वा-त्मत्वप्राप्तेः, तयोरज्ञातत्वाज्ञत्वार्थमपि स्वाश्रयाविद्या नार्थनीया । स्वतःसिद्ध-त्वात् तयोरज्ञातत्वाज्ञत्वयोः । अत एव नात्माविद्यापि तत्रार्थवतीति न तयोः प्रमाणगम्यत्वम् । तत्राज्ञानाभावात् । अतो नात्माज्ञानातिरेकेण जडं नाम सिध्येत् । नतरां शून्यम् । अत आत्मन एव स्वात्मन्येव अविद्यैव सर्व-व्यवहारास्पदत्वम्, न त्वन्यस्य कस्यचित्, स्वरूपेण अविद्यया वा इति सिद्धम् ॥ इ. सि. पा. २०६-२०७.

(१६) नन्वविद्या स्वयंज्योतिरात्मानं द्वौकते कथम् ।
कूटस्थमद्वितीयं च सहस्रांशुं यथा तमः ॥ १-१३६.

इति चोदिते तत्रोत्तरमाह —

प्रसिद्धत्वादविद्यायाः सापह्नोतुं न शक्यते ।
अनात्मनो न सा युक्ता तयानात्मा विना न हि ॥ १३७.

... अतोऽविद्यायाः स्वातन्त्र्यजडाश्रयत्वापह्नवानामसंभवात् पुमानेवाविद्या-श्रयोऽभ्युपेयः । 'न वेद्मि, अविद्वान्, मूढोऽस्मि' इति च पुंसोऽविद्या-श्रयत्वप्रसिद्धेश्च ॥ इ. सि. पा. २०७-२०८.

(१७) यादृश्यविद्या तद्वत्ताप्यस्य तादृश्यथ स्वतः ।
अविद्यात्वक्षतिस्तस्या निवृत्तिश्च न बोधवत् ॥ १३९.

.... यथा अविद्या न पुंसः स्वरूपं नाप्यन्या अन्यानन्या वा। न च सा सती, नासती, नापि सदसती, किं त्वनिर्वचनीयैव स्वत एव नाविद्यान्तरात् । एवं पुंसोऽविद्यासंबन्धोऽपि द्रष्टव्यः । अविद्यासंबन्धत्वादेव । .... अतोऽविद्यैव सर्वः संबन्ध इति न संबन्धान्तरं तस्य मृग्यम् ॥

इ. सि. पा. २०८-२०९.

अत्रायं संक्षेपः –

अज्ञानसंशयमिथ्याज्ञानान्यतमलक्षणा, अविद्या ज्ञातुरेव न ज्ञेयस्य, आत्मनोऽप्यज्ञानाश्रयत्वमज्ञानादेव नान्यथेत्येतत् भाष्यवार्तिकयोः स्पष्टम् । अज्ञानादित्रयव्यतिरिक्ता त्वविद्या वादिविप्रतिपन्ना शुक्तिरजतादिकारणाज्ञानवत् जगत्कारणलक्षणेत्येतदभिनिवेशमात्रादत्र स्वीक्रियत इति विशेषः । अतो विप्रतिपत्तिस्थानाविद्याविषयेऽत्र रचिता सर्वापि प्रक्रिया यथाप्रसिद्धायामेव संचारयितव्या । शून्याश्रया तद्विषया वा अविद्या शून्यवादिभिरपि नैवाभ्युपेयत इति तत्र जडाश्रयविषयकाविद्यानिरासप्रकारातिदेशनं व्यर्थप्रयासमात्रमिति नः प्रतिभाति ॥

यद्यपि च सिद्धान्ते आत्मव्यतिरिक्तं सर्वमप्यविद्याकृतमिति जडविषयतत्प्रमाणादेरपि तथात्वमेवेति युक्तम्, तथापि यावज्जडचेतनविभागः स्वीक्रियते, तावत् जडविषयकमज्ञानम्, तन्निवर्तकत्वं च प्रमाणादीनाम् आ तत्त्वबोधात् किमिति नाङ्गीक्रियत इति न विज्ञायते। किञ्च शुक्तिरज्ज्वाद्याच्छादकतमोनिवर्तनेन यथा दीपादीनां तत्प्रकाशकत्वम्, तथा प्रमाणानामपि प्रमितिरूपापन्नानां जडविषयप्रकाशकत्वमपीति लोकानुभवानुसारेणाङ्गीकर्तव्यमेव । तथा हि भाष्यकाराः –

(अ) अविद्यातमोनिवर्तकस्य ज्ञानस्य दृष्टं कैवल्यफलावसानत्वम् । रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदीपप्रकाशफलवत् । विनिवृत्तसर्पादिविकल्परज्जुकैवल्यावसानं हि प्रकाशफलम्, तथा ज्ञानम् ॥

गी. भा. १८–६६, पा. २८९.

(आ) यदा पुनर्घटतमसोर्विवेककरणे प्रवृत्तं प्रमाणम् अनुपादित्सित-तमोनिवृत्तिफलावसानम् – छिदिरिव छेद्यावयवसंबन्धविवेककरणे प्रवृत्ता तदवयवद्वैधीभावफलावसाना – तदा नान्तरीयकं घटविज्ञानम्, न तत् प्रमाणफलम् ॥ मां. भा. ७, पा. १८७.

अत्र प्रथमोदाहरणे दीपादिना यथा घटो व्याप्यते स्वप्रकाशेन तथा रज्ज्वादिजडवस्त्वपि प्रमाणप्रकाशेन व्याप्यते इत्युक्तम्, अज्ञात-ज्ञापकं प्रमाणम् इति लोकसिद्धमङ्गीकृत्य। द्वितीयोदाहरणे तु यथा घटप्रकाशप्रतिबन्धकतमोनिवृत्तिव्यतिरेकेण घटज्ञानस्य कृत्यान्तरं नास्ति, तथा आत्मज्ञानस्याप्यज्ञाननिवृत्तिव्यतिरेकेण कृत्यान्तरं नास्तीत्युक्तम्; ज्ञानोदयमात्रेणाज्ञानविनाशः, तन्नान्तरीयकश्च ज्ञेयप्रकाशः – इत्येतत् स्फुटयितुम् । उभयथापि जडविषयकं प्रमाणमङ्गीकृतमेवेति बोध्यम् ॥

प्रमाणव्यवहारः कथम् ? –

२२४. यदि जडवस्तु नास्त्येव शुक्त्यादिरूपम्, नापि तद्विषयकं ज्ञानम्, कथं तर्हि प्रत्यक्षादीनां प्रामाण्यव्यवहारः, भ्रान्तिबाधव्यवहारो वा ?–इत्यत्र इष्टसिद्धेरुत्तरमिदम् –

(१) अतः परमार्थसत्य आत्मैव स्वाविद्यामायया सर्वस्य लौकिक-वैदिकव्यवहारस्य आ प्रबोधात् मायावीव स्वमायया गिरिनदीसमुद्रादि-व्यवहारस्यास्पदं भवति – इत्यभ्युपेयम् न्यायमनुसरद्भिः सर्वैरेव । अस्यै-वार्थस्य प्रदिदर्शयिषया लोकव्यवहारसिद्धसत्यत्वशुक्त्याद्यज्ञानजरूप्या-दयोऽसत्या इति दर्शितम् । अतो न विरोध आशङ्कनीयः, दृष्टान्ताभावो वा । लोकप्रसिद्धदृष्टान्तोपादानात् ॥ इ. सि. पा. २००.

[लोकव्यवहारसिद्धाश्रयेण चेत् दृष्टान्तादानम्, यथा लोकव्यवहारं दृष्टं च तर्हि दृष्टान्तांश उपादेयः, न तु दृष्टान्त एव विचारास्पदीकर्तव्यः । अज्ञानं चेत् देवदत्तादिचेतननिष्ठं शुक्त्यादिजडविषयं चेति दृष्टम्, तथैव तद् गृह्यताम् । ज्ञानं च तस्यैवेति । तथा आत्मा चेत् सर्वव्यवहारास्पदं तर्हि देवदत्तादिनिष्ठा-ज्ञानमेव तद्विषयकमिति गृह्यताम्, किमित्यात्मन्येव केवले अदृष्टमनिर्वचनीय-मज्ञानं कल्प्यते ? तदेतदुत्तरत्र विमृष्टव्यमित्यास्तां तावत् ॥]

(२) अ) यथा स्वप्नप्रपञ्चस्य अनिर्वचनीयत्वेऽपि आ बोधात् तदाश्रयः सर्वो व्यवहारोऽप्रतिहतो वर्तते, स्वाप्नैरेव निमित्तैस्तत्प्रपञ्चानुत्सत्यार्थबोधो जायते, एवं जाग्रत्यपि सर्वमविरुद्धं द्रष्टव्यम् ॥ इ. सि. पा. ३४.

आ) मायात्मकत्वेऽपि सर्वस्य स्वप्नवत् प्राक् प्रबोधान्मम नियमो युज्यते ॥ इ. सि. पा. १५३.

इ) दृश्यं जडम्, अजडमिश्रं शुद्धमेव वा शुक्तिस्थानीयं स्वप्नावस्थायामपि यद्यपि संभवति, तथापि तत्र प्रतिभासमानरूपादिमन्नानाविधप्रपञ्चानुरूपस्य तदाश्रयस्य रूप्याश्रयशुक्तिवत् चक्षुरादिसंप्रयुक्तदृश्यस्यासंभवात् दृश्याविद्याजत्वे च बाधाद्यसंभवात्, न दृश्याविद्याजः स्वप्नप्रपञ्चः ॥
इ. सि. पा. २०३.

ई) अनात्मस्वविद्याभावेऽपि स्वप्नादिदृश्येष्विव मानमेयफलादिव्यवहारः आत्मविद्ययैव समस्तीत्यसकृन्मया उक्तम् ॥ इ. सि. पा. २१४.

उ) शब्दाद्यनात्मवस्तुतदज्ञानतज्ज्ञानतज्ज्ञात्रादेरा बोधात् स्वप्न इवाविद्ययैव सिद्धेः ॥ इ. सि. पा. २१६.

ऊ) कर्मोपासनादिवाक्यानां चाविद्यावत्कल्पितेष्टानिष्टप्राप्तिपरिहारोपायज्ञापकानाम् अविद्यावस्थायामेव प्रत्यक्षादीनामिव आ बोधात् स्वप्नावस्थायामिव प्रामाण्यम् ॥ इ. सि. पा. २१७.

उपर्युदाहृतजातीयकानि स्वप्नोदाहरणानि पदे पदे समानीतानि दृश्यन्ते इष्टसिद्धौ । अज्ञानं च शुक्तिरजतादिदृष्टान्तबलेन (इ. सि. पा. ३९) तर्कसिद्धमत्र । 'मूढोऽहम्' इत्याद्यनुभवोपन्यासस्तु चेतनाश्रयत्वेनोपलभ्यतेऽज्ञानमिति प्रदर्शनमात्रपरः, न तु शुद्धाद्वितीयात्मसमाश्रयमज्ञानमित्यपि प्रसाधितुमलम् ॥

'प्रपञ्चस्य मायानिर्मितत्वाभ्युपगमात्' (इ. सि. पा. ३२) 'सदसत्वाभ्यामनिर्वचनीयाविद्यात्मकत्वाभ्युपगमात् रूप्यतज्ज्ञानयोः' (इ. सि. पा. ४७), 'तदनुरूपमनिर्वचनीयमेवोपादानमेष्टव्यम्, तच्च नान्यदज्ञानात् अनादि समस्ति' (इ. सि. पा. ४८) 'न च वयं

भावाभावप्रमाणागम्यतया अज्ञानस्यानिर्वाच्यतां ब्रूमः, अपि तु ज्ञानमात्रापनोद्यत्वात्' (इ. सि. पा. ६३) इत्यादिस्थलेषु स्वाभीष्टाविद्यायास्तर्कसिद्धत्वमेव प्रदर्श्यते । तस्याश्चात्माश्रयत्वं तद्विषयत्वं च शुक्त्यादिजडाश्रयत्वतद्विषयत्वनिराकरणलक्षणतर्केणैव प्रसाध्यते । तर्हि प्रमाणाप्रमाणव्यवहारः कथमित्याशङ्क्य स्वप्नदृष्टान्तबलेनैव सोऽप्युपपाद्यते । न क्वचिदपि अविद्या सर्वसंप्रतिपन्नानुभवसमाश्रयणेन प्रत्याय्यते – नापि स्वप्नव्यवहार इव जागरितव्यवहारोऽप्यविद्यावस्थामात्रप्रतिबद्ध इत्यनुभवमारोप्यते । भाष्यकारप्रस्थाने तु अविद्यातत्प्रयुक्तव्यवहारबाधयोरुपपादनमन्यथैव तद्यथा –

(क) कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ? उच्यते - देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः ॥ अ. भा.

[अत्र विषयलक्षणैर्देहेन्द्रियादिभिरध्यासं मुक्त्वा न कोऽप्यन्यः संबन्धः समस्तीत्यतः, प्रमाणप्रमेयव्यवहारोऽविद्यापुरःसर इत्येतत् सार्वत्रिकानुभवसिद्धमिति दर्शितम् ॥]

(ख) न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थं उपलभ्यते । तस्मात्, भ्रान्तिप्रत्ययनिमित्त एवायं संसारभ्रमो, न तु परमार्थः इति सम्यग्दर्शनादत्यन्तमेवोपरम इति सिद्धम् ॥ गी. भा. १८-६६, पा. २९६.

[अत्र अविद्याया देहादितादात्म्याभिमानस्य भ्रान्तिलक्षणाविद्यानिमित्तत्वं सार्वत्रिकसुषुप्त्याद्यनुभवेनैव सिध्यतीत्युपपादितम् । सुषुप्त्यनुभवदर्शनबलाद् देहाद्यात्मभावप्रदर्शको जाग्रदनुभवो भ्रान्तिमात्रमिति दृढीकृतम् ॥]

(ग) अपि च न कदाचित् जीवस्य ब्रह्मणा संपत्तिर्नास्ति स्वरूपस्य अनपायित्वात् । स्वप्नजागरितयोस्तु उपाधिसंपर्कवशात् पररूपापत्तिमिव अपेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्विवक्ष्यते ॥

सू. भा. ३-२-७, पा. ३५१.

[अत्र सुषुप्ते सत्संपत्तिः श्रूयमाणा न तदवस्थामात्रपरिच्छिन्ना विवक्षिता 'स्वं ह्यपीतो भवति' इति स्वरूपसंपत्तिश्रवणात्, स्वरूपस्य च स्वाभाविक-

त्वात् । जाग्रत्स्वप्नयोस्तु परिच्छिन्नजीवभावः प्रतीयमान आभासमात्रम् उपाध्यासनिमित्तम्, तत्रापि वस्तुतो देहादिविलक्षणस्वरूपस्य साक्षिलक्षणस्य सर्वानुभवसिद्धत्वात्-इति प्रतिपादितम् ॥]

(घ) सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मतविज्ञानाद् सत्यत्वोपपत्तेः । स्वप्नव्यवहारस्येव प्राक् प्रबोधात् ॥ सू. भा. २-१-१४.

[अत्राध्यासलक्षणाविद्याप्रत्यये सत्यत्वबुद्ध्यनुवृत्तिर्यावन्न विच्छिद्यते, तावत् प्रत्यक्षादिप्रमाणप्रमेयव्यवहारः सत्यो भातीत्युक्तम् । स्वप्नदृष्टान्तेऽपि प्रबोधे यथा स्वप्नव्यवहारो बाध्यते तन्मिथ्यात्वाध्यवसायात्, एवं प्रत्यक्षादिबुद्धिरपि देहादितादात्म्याध्यासबाधे सति मिथ्येत्यध्यवसीयते इत्युक्तम् । न तु केवलं स्वप्नदृष्टान्तबलेन प्रमाणव्यवहारस्य मिथ्यात्वमनुमानेनास्थितम् ॥]

(ङ) 'न बुद्धान्ताद्यवस्थोपन्यासेन अवस्थावत्त्वं संसारित्वं वा प्रतिपाद्यते, किं तर्हि अवस्थारहितत्वम् असंसारित्वं च' (सू. भा. १-३-४२; पा. १४४) 'स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारात् आत्मनोऽनन्वागतत्वम् संप्रसादे च प्रपञ्चपरित्यागेन सदात्मना संपत्तेर्निष्प्रपञ्चसदात्मत्वम्' ॥ सू. भा. २-१-६, पा. १८९.

[अत्र आत्मनोऽवस्थात्रयोपलभ्यमानदोषादूषितत्वं निष्प्रपञ्चत्वं चानुभवानुसारितर्केण प्रतिपाद्यते, न तु प्रपञ्चस्य अनिर्वचनीयत्वं तर्केण प्रसाध्य, तत्कारणत्वेनानिर्वचनीयमज्ञानमपि तर्केणैव वादग्रस्तेनोपस्थाप्यते ॥]

(च) तथा च लोकेऽनुभवः । 'शुक्तिका हि रजतवदवभासते', 'एकश्चन्द्रः सद्वितीयवत्' इति ॥ अध्या. भा.

[अत्र अन्यथावभासस्य ज्ञानबाध्यत्वं लोकानुभवमाश्रित्यैव निदर्श्यते । न तु तत्र शुक्तिरजतादीनामुत्पत्त्यादिचिन्तामारभ्य दृष्टान्तोऽपि विवादपदम् अध्यारोप्यते यथेष्टसिद्धौ ॥]

अज्ञाननिवृत्तिः –

२२५. यथा शुक्त्यज्ञानं शुक्तिज्ञानेन निवर्त्यते, एवं ब्रह्माज्ञानं ब्रह्मज्ञानेन निवर्त्यते इति सदृष्टान्तं वेदान्ताभियुक्तैः प्रतिपादितम् । सा च निवृत्तिर्न कारकनिष्पाद्यक्रियालक्षणा, किं तु ज्ञेयेऽध्यारोपिता-

तद्धर्मबुद्धिबाधलक्षणैव इति हृदयमागमयितुं दृष्टान्तप्रणयनम् 'अस्थूल-मनणु', 'नेति नेति' इत्यादिश्रुत्यवष्टम्भात् । तत्रैवं स्थिते, अत्र प्रस्थाने दृष्टान्तस्य विवक्षितांशसाम्यप्रदर्शनमार्गं प्रविहाय दृष्टान्तदार्ष्टान्तिकयोरुभयोरपि वादिविवादपदाध्यासीनत्वं तर्कबलात् क्रियत इति चित्रमेतत् । तत्र दृष्टान्तभूतशुक्तिरूप्यस्य अनिर्वचनीयाज्ञानकार्यत्वमुररीकृत्य ख्यात्यन्तर-परीक्षणक्षेत्रं यथा तर्कावलम्बनेन विस्तारितम्, एवमज्ञाननिवृत्तिरपि तर्कभूयिष्ठक्षेत्रे समानीय प्रदर्श्यते । यथा चैतत्तथा दिङ्मात्रमिह प्रदर्श्यते ॥

(१) तत्र 'ज्ञानम्' इत्यजडो बोधः, तदाभासा वा चित्तवृत्तिः सत्यार्था यथायोगम् आश्रयणीया । उभयत्र ज्ञानशब्दप्रयोगात्, एको अमुख्योऽर्थः अपरो वाच्य इति । तत्र 'शुक्तिज्ञानं जायमानं तदज्ञानं निवर्तयति' इत्यत्र बुद्धिवृत्तिर्ज्ञानम्, अज्ञानं च रूप्यादिकारणं तन्निवर्त्यम् । 'ब्रह्मज्ञानम्' इत्यत्रापि बुद्धिवृत्तिरेव ब्रह्माभासा सती ज्ञानमुच्यते; ब्रह्माज्ञानम् इति सर्वजडोपादानभूता जडात्मिका अविद्याशक्तिरुच्यते । अज्ञानशरीरत्वेऽपि ब्रह्मज्ञानस्य सत्यार्थत्वात् ब्रह्मैकाभासत्वाच्च ज्ञानत्वम्, तदज्ञाननिवर्तकत्वं चेष्यते । सत्यार्थत्वात् प्रामाण्यं न स्वरूपसत्यत्वात् ज्ञानस्य इति ह्युक्तम् ॥

इ. सि. पा. ६९.

[ब्रह्मज्ञानम्, शुक्तिज्ञानवद् वृत्तिरेव चिदाभासा इति सम्यक् । भूतवस्तु-विषयकस्य ज्ञानस्य प्रमाणजन्यत्वं हि लोकानुभवसिद्धमिति । दृष्टान्ते अज्ञानं रूप्यादिकारणमिति, दार्ष्टान्तिके जडोपादानभूता जडात्मिका अविद्याशक्तिरिति तु विवादपदारूढम् । तादृशाविद्याशक्तेः सर्वसंप्रतिपन्नाज्ञानविलक्षणाया अलोकवेद-सिद्धत्वात्, अज्ञानपदार्थस्यान्यथैवाभियुक्तैर्दर्शितत्वाच्च ॥]

(२) यथा वेणुजोऽप्यग्निः, तं समूलं दहति स्वयं च शाम्यति । एवम् अज्ञानजमपि ब्रह्मज्ञानम् अज्ञानं दन्दहीति, तदात्मकत्वात् स्वयं च शाम्यति । ब्रह्मैव वा अजडबोधरूपं तन्मात्राभासबुद्धिवृत्त्युपेतं स्वाज्ञानं दहत् तत्कार्यमन्यत्, तां च वृत्तिं दग्ध्वा एकमवशिष्यते । यथा राजा एकं चोरं लब्ध्वा असाध्यानप्यन्यान् सर्वांश्चोरान् निघ्नन् तं च चोरं हत्वा स्वस्थो भवति, यथा वर्त्यादियोगात् केवलमदाह्यमपि तैलघृतादि

दहन् वह्निर्वर्त्याद्यपि दहति, एवं केवलम् अदाह्यमप्यज्ञानं विशिष्टबुद्धिवृत्ति-युक्तं ब्रह्म दहेत् ॥ इ. सि. पा. ६९-७०.

अत्राज्ञानं नाम जडोपादानभूता जडात्मिका शक्तिः – इत्यभ्युपगम्य ज्ञानस्य तन्निवर्तकत्वे, वेणुजाग्नेर्वेणुदाहकत्वस्वयंशाम्यत्वे इव ब्रह्मज्ञानस्याज्ञानदाहकत्वस्वयंशाम्यते – इत्युपपत्तिप्रदर्शनं ज्ञानस्य कारकत्वं प्रापयतीति स्पष्टम् । तथा च दृष्टविरोधः, अभियुक्तसंमताध्यारोपापवादप्रक्रियाविरोधश्च । न हि प्रपञ्चस्य, तत्कारणस्याज्ञानस्य वा, विद्यमानस्य ज्ञानेन निवृत्तिमिच्छन्ति वेदान्ताभियुक्ताः, विकल्पमात्रस्य तु बाधम् । न च बाधो नाम तात्त्विकी निवृत्तिः, येन वेणुजाग्न्यादिनिदर्शनं स्थाने स्यात् । समारोपितस्यासत्यत्वात् तन्निह्नवेन स्वास्पदानन्यत्वज्ञापनमात्रं हि बाध इति । तथा हि संप्रदायविदां वचनम् –

(१) प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥
विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥
गौ. का. १-१७, १८.

इति । भाष्यवचनं च –

(१) सत्यम् एवं स्यात्, प्रपञ्चो यदि विद्येत । रज्ज्वां सर्प इव कल्पितत्वात् । न तु स विद्यते । विद्यमानश्चेन्निवर्तेत, न संशयः । न हि रज्ज्वां भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानः सन् विवेकतो निवृत्तः ॥
गौ. का, भा. १-१७, पा. १९०.

[अत्र प्रपञ्चस्य कल्पितत्वोक्त्या अध्यासप्रत्युपस्थापितत्वमात्रमुक्तम् । न तु अनिर्वचनीयाज्ञानोपादानकत्वम् । तथा दृष्टान्ते सर्पस्यापि भ्रान्तिबुद्धि-कल्पितत्वोक्त्या अनिर्वचनीयाज्ञानोपादानकत्वं वारितम् ॥]

(२) यथायं प्रपञ्चो माया रज्जुसर्पवत्, तथायं शिष्यादिभेद-विकल्पोऽपि प्राक् प्रतिबोधादेव उपदेशनिमित्तः ; अत उपदेशादयं वादः, 'शिष्यः, शास्ता, शास्त्रम्' इति । उपदेशकार्ये तु ज्ञाने निर्वृत्ते ज्ञाते परमार्थतत्त्वे द्वैतं न विद्यते ॥ गौ. का. भा. १-१८, पा. १९१.

(३) अन्तःप्रज्ञत्वादिनिवृत्तिसमकालमेव प्रमातृत्वादिभेदनिवृत्तेः । तथा च वक्ष्यति 'ज्ञाते द्वैतं न विद्यते' इति । ज्ञानस्य द्वैतनिवृत्तिक्षणव्यतिरेकेण क्षणान्तरानवस्थानात् । अवस्थाने चानवस्थाप्रसङ्गाद् द्वैतानिवृत्तिः । तस्मात् प्रतिषेधविज्ञानप्रमाणव्यापारसमकालैव आत्मन्यध्यारोपितान्तःप्रज्ञत्वाद्यनर्थनिवृत्तिरिति सिद्धम् ॥ मां॰ भा॰ ७, पा॰ १८७.

अत्र अन्तःप्रज्ञत्वादेरध्यारोपितत्वम्, तस्य च प्रतिषेधविज्ञानसमकालमेव निवृत्तिः, गुरुशिष्यबोधादिविकल्पस्यापि विकल्पत्वादेव ज्ञानसमकालमेव निवृत्तिः, ज्ञानस्यापि द्वैतकुक्षिनिक्षिप्तत्वाविशेषात् अन्तःप्रज्ञत्वादिनिवृत्तिसमसमयमेव निवृत्तिः – इति सर्वम् अध्यारोपापवादप्रक्रियाया एवोपष्टम्भकम् । अतो वेणुजाड्यादेः स्वपरविनिवर्तकत्वनिदर्शनं प्रस्थानान्तरमातस्थुषां 'पयः पयोन्तरं जरयति स्वयं च जीर्यति' (ब्र. सि. 13) इत्यादिदृष्टान्तानाहरतां मण्डनादीनामनुकरणमेवेति निश्चीयते ॥

(४) एवमन्यत्रापि बुद्धियुक्तो बोध एवाज्ञानतत्कार्यं दहति । बुद्ध्यादेस्तु तत्र सत्यत्वेनादाह्यत्वान्न तु तं दहति । यथा वायुयुतोऽग्निः, तृणादि दहति न वायुम्, अदाह्यत्वात् तस्य । अतो बुद्धिर्वा बोधदीप्ता, बोधो वा बुद्धीद्धः, अज्ञानं दहतीत्यज्ञानतत्कार्यदाहस्सिद्धो ज्ञानविभावसोः ॥
इ॰ सि॰ पा॰ ७०.

दृष्टान्तभूतशुक्त्यज्ञानादिदाहो नाम यदि नाशः, न तर्हि बोधस्य केवलस्य बुद्धियुक्तस्य वा तत्कर्तृत्वमुपपद्यते । बोधे विकारासंभवात्; अथ बाध एव विकल्पास्पदस्वरूपज्ञापनेन रजतादेर्मिथ्यात्वबोधनम्, न तर्हि विषयवैलक्षण्येन ज्ञापनविधौ कश्चिद् विशेषः, शुक्तिं सत्यत्वेन रजतं च मिथ्यात्वेन बोधयद् हि ज्ञानं स्वाश्रयं बुद्धिमपि सत्यत्वेनैव बोधयति, न तु क्वचिदपि किञ्चिदपि नाशयति निवर्तयति वेति । 'मुधैवामुहं रजतमिति, न तु तत्र रजतमासीत्' इति खलु सम्यग्ज्ञानरूपम् । तेन मोहापसरणमेव ज्ञानकृत्यं न तु तदतिरिक्ताज्ञाननिवर्तनमपीति । तत्रापि 'रजतं प्रत्येति' इति प्रत्ययजन्म बुद्धिवृत्तिविकारलक्षणम्; तद्गतचिदाभासकृत्यं तु स्वगोचराभासनमेव । 'तथा इदानीं

शुक्तिं शुक्तिरित्येव प्रत्येति इत्यत्रापि वृत्तिजन्म तद्भ्रताभासकृत्यं च विवेचनीयम् । उभयत्रापि अवगतिलक्षणो बोधः स्वरूपेणैवोदासीनोऽवतिष्ठते । यथाहुः –

> सम्यक्संशयमिथ्योक्ताः प्रत्यया व्यभिचारिणः ।
> एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः ॥ उप. सा. १८-१२१.

इति । अतोऽत्राप्यज्ञाननिवृत्त्यानयनं बुद्धिबोधयोस्तत्कर्तृत्वे विकल्पनं च नापेक्षितमिति भाति ॥

अनिर्वचनीयाज्ञाननिवृत्तिः किंलक्षणा ? –

२२६. 'अज्ञाननिवृत्तिरेव भ्रमनिवृत्तिः, तच्छरीरत्वात् तस्य' – इति चेत्, कासौ अज्ञाननिवृत्तिः ? तस्याः सत्त्वे, असत्त्वे, सदसत्त्वे, अनिर्वचनीयत्वे वा दोषादनिस्तारात्, तुच्छत्वानङ्गीकाराच्च नास्त्येवाज्ञाननिवृत्तिः–इति विस्तरशः पूर्वपक्षं प्रदर्श्य 'अतोऽनिर्वचनीयस्य निवृत्त्यसंभवात्, अज्ञाननिवृत्तेश्च प्रसिद्धत्वात्, नानिर्वचनीयमज्ञानम्' इत्याक्षिप्ते इष्टसिद्धिकृतः परिहारोऽयम् –

> (१) सदसत्सदसदनिर्वचनीयप्रकारेभ्यो ह्यन्यप्रकारैवाज्ञानस्य निवृत्तिर्युक्ता । अनिर्वचनीयत्वात् तस्य, उक्तप्रकाराणां त्वयैव निरस्तत्वात् । निर्वाच्यानामेव हि ते निवृत्तिप्रकाराः अनिर्वचनीयान्ताः । अनिर्वचनीयापि निवृत्तिः सत एव, आत्माकाशादेः । अतोऽन्यप्रकारैवाज्ञानस्यानिर्वाच्यस्य-निवृत्तिरनुरूपा । यक्षानुरूपो हि बलिः ॥ इ. सि. पा. ८५–८६.
>
> (२) उच्यते यादृगज्ञानभावोऽभावोऽपि तादृशः ।
> मिथ्याभावेन भूतं किं मिथ्यानाशाच्च नङ्क्ष्यति ॥
> इ. सि. ८-२, पा. ३६४.

यस्तवाज्ञाननाशः, स सत्यो मिथ्या वा ? – इति विकल्प्याक्षेपे परिहारः –

> (३) किं त्वया नाशस्य सत्यत्वं मिथ्यात्वं च विवक्षितमिति, याभ्यां द्वैतसत्यताज्ञानसद्भावौ स्याताम् ? (१) यद्यात्माज्ञानाभ्याम् अन्यवस्तुत्वं

सत्यत्वम्, तन्मया नेष्टम् । अज्ञानभावेऽपि नात्मनोऽन्यद् वस्त्वस्ति । किं पुनस्तदभावे । (२) अथ अमायात्मकत्वेन आत्मनाशवद्बाध्यत्वम्, तत्तु इष्टम् । (३) अतो मिथ्यात्वमपि मायात्मत्वं चेत्, नेष्टम् । अथ नाशिनोऽवस्तुत्वात् नाशस्य अवस्त्वन्तरजन्मत्वं मिथ्यात्वम्, तदिच्छामि । अतो नोक्तदोषो मत्पक्षे ॥ इ. सि. पा. ३६४-३६५.

अज्ञाननिवृत्तिर्नाम किञ्चिदज्ञानव्यतिरिक्तमिति कृत्वा आक्षेपः, तस्यानुरूपोऽयं परिहारः इति स्पष्टम् । तथाजातीयक एवान्योऽपि –

(४) यथा अनिर्वचनीयम् अप्रसिद्धमपि अनात्मविदा न्यायबलादभ्युपेतम् । एवं तन्निवृत्तिप्रकारोऽपि न्यायबलादेवाप्रसिद्धोऽप्यभ्युपेयः ॥
इ. सि. पा. ८६.

[अज्ञानतन्निवृत्ती प्रसिद्धिबलादभ्युपेये । 'यस्य स्वरूपेऽपि नास्ति प्रमाणम्, तस्य निवृत्तौ कः प्रमाणं मृगयते ?' इतीष्टसिद्ध्युक्तिर्यद्यपीष्टा सर्वेषामज्ञानवादिनाम्, तथापि ग्रन्थकृदभिमतमेव तदज्ञानमित्यत्र तु विप्रतिपत्तिरपरिहार्या ॥]

'अज्ञानदाहस्य स्वरूपं ब्रूहि तन्मानं च' इत्यस्य प्रतिवचनम् –

(५) ज्ञातोऽर्थः, तज्ज्ञप्तिर्वा तदज्ञानहानिः ॥ इ. सि. पा. ३६९.

अपरोक्षस्वभावस्याप्यात्मनः, अनादिजडानिर्वाच्याज्ञानाच्छन्नतया स्फुरणम् अज्ञातत्वम् । तस्य च वेदान्तजन्मनोऽपूर्वादिलक्षणौपनिषदपुरुषाकारतयैव समाप्तज्ञानात् या अपरोक्षता सा तस्य ज्ञातता । सा चाविद्यानिवृत्तिरेव । अविद्या चानादित्वान्निर्हेतुः । अतो नष्टा सा नोद्भवेत् । हेत्वभावात् । प्रागसतो हेतुं विना अनुद्भवाच्च । अजनिमत्त्वाच्चास्याः । न च जनिमतोऽविद्यात्वम्, तद्धेतुत्वात्तस्याः । न च तां विना अन्यस्यापि जन्म । अतो निवृत्तेर्न सा अन्यद्वा किञ्चित् जायते । अकार्यत्वादेवास्या निवृत्तिर्न कस्यचिज्जन्म । नापि कारणभावः । कार्याणामेव तथा दृष्टत्वात्, इष्टत्वाच्च महाप्रलयादौ । .... अतो अज्ञाननिवृत्तिरात्मनः श्रुतिजज्ञानादपरोक्षब्रह्मात्मनोऽपरोक्षानुभव एव, स यद्यपि नात्मनोऽन्यः । तथापि न ज्ञानोदयात् प्रागिति न सदा अज्ञाननिवृत्त्यादिदोषप्रसङ्गः ॥ इ. सि. पा. ३७१-३७२.

(६) वस्तुज्ञप्तिरेव तदज्ञानादिनाशो लोके, तथा वेदेऽपीति चेत्, अस्त्वेवम् । उक्तं च 'ज्ञप्तिर्वा अज्ञाननाश' इति । एवमात्मन एवाजडस्य

फलत्वात् तस्यैव सत्यता इति न द्वैतसत्यत्वाशङ्का । आत्मैव अजडत्वात् कूटस्थोऽपि मानमेयसंबन्धात् फलायत इत्युक्तम् । तस्य नित्यत्वेऽपि फलात्मनैवाज्ञाननाशत्वम् । मानोदये च फलात्मता इति न सदा अज्ञान-नाशप्रसङ्गदोषः ॥ इ. सि. पा. ३७३.

अत्र सर्वत्रापि ज्ञानेनाज्ञानबाध एव न वस्तुवृत्तेन निवृत्तिः – इत्यनुसंधाने सति नास्त्येव कश्चिच्छङ्कातङ्कः । अनाद्यध्यासस्यैवाज्ञानत्व-स्वीकारे न तस्य तर्केण साधनापेक्षा यथा, तथा तद्बाधस्यात्मज्ञानत्व-स्वीकारेऽपीति च । तथैव हि भाष्याकाराः –

(१) कस्य पुनरयमप्रबोध इति चेत्, यस्त्वं पृच्छसि तस्य ते-इति वदामः । नन्वहमीश्वर एवोक्तः श्रुत्या । यद्येवं प्रतिबुद्धोऽसि, नास्ति कस्यचिदप्रबोधः । योऽपि दोषश्चोद्यते कैश्चित्, अविद्यया किलात्मनः सद्वितीयत्वात् अद्वैतानुपपत्तिरिति । सोऽप्येतेन प्रत्युक्तः ॥

सू. भा. ४-१-३.

इति आत्मनोऽद्वितीयत्वं प्रत्याययितुमेव सर्वोऽयं विद्याविद्याविभागः, विद्याविद्ययोर्बाध्यबाधकविभागश्च । वस्तुतस्तु 'ज्ञाते द्वैतं न विद्यते' इत्यभियुक्तोक्तिरेव सर्वतर्कज्वरनिवारिणीत्यनवद्यम् ॥

ब्रह्माज्ञानं क्रमेणैव निवर्त्यत इति प्रक्रिया –

२२७. यथा शुक्तिविषयकमज्ञानं नैकेनैव ज्ञानेन कार्त्स्न्येन निवर्त्यते, (इ. सि. पा. ७०), एवं ब्रह्माज्ञानमपीति प्रत्याययितुं स्वयं-प्रकाशस्य ब्रह्मणः प्रमाणप्रकाश्यत्वमेव कथमित्याशङ्क्य तत्सिद्ध्यर्थं ब्रह्मणोऽज्ञानविषयत्वमेव तावदुपपादयितुमाह –

(१) स्वयंप्रकाशापि सती संवित्तिर्नास्ति न प्रकाशते च केषाञ्चित्, तथैव ते वदन्ति श्रेयोऽर्थिनोऽपि । न च सा नास्ति, न च न प्रकाशते । तथैव ब्रह्मापि स्वयंप्रकाशं सच्च नास्ति न प्रकाशते चाज्ञानाम् । अतः प्रमाणं तत्रार्थवत् । यथासंवित्तेः सत्त्वात्मप्रकाशकत्वप्रतिपादनम् अर्थवत् । संवित्तेरसत्त्वादिवचनं भ्रान्तिमूलम् इति चेत् । भ्रान्तिरप्यज्ञानमूलैवेति सा तेषां न प्रकाशत एव । अतस्तद्वचोऽर्थवत् । .... तस्मात्

स्वयंप्रकाशमपि प्रमाणप्रकाश्यमेव । तस्य च अप्रकाशनम्, अज्ञानमेवेति तन्निवर्तनमेव तत्प्रकाशकत्वं प्रमाणस्य । यथा मूर्तद्रव्यापनयनमेव कूपाकाशादिकरणम् ॥ इ. सि. पा. ७१-७२.

[अत्राध्यासलक्षणानाद्यविद्याव्यतिरेकेण ब्रह्माकारकमज्ञानान्तरमङ्गीकर्तव्यमित्याग्रहात् स्वयंप्रकाशस्यापि तादृशाज्ञानावृतत्वं युक्त्या प्रसाध्यते । तत्र ब्रह्मणः प्रमाणविषयत्वमनिष्टमापद्येतेति कूपाकाशकरणदृष्टान्तानयनम् । तत्र परं मृच्छिलादिप्रतिबन्धो दृष्टोऽस्ति, ब्रह्मणस्तु सर्वप्रकाशकत्वात् सर्वस्यात्मत्वादेव च न केनचित् प्रतिबद्धत्वं शक्यकल्पनमिति वैषम्यम् ॥]

(२) तस्मात् प्रकाशकमेव प्रमाणम् इत्यस्मिन्नपि पक्षे अज्ञाननिवर्तकत्वं सिद्धं तस्य प्रकाशकत्वायैव । यदा तु निवर्तकमेव, अर्थात् प्रकाशनमिति स्थितिः, तदा सुतरां निवर्तकत्वं सिध्येत् । 'सिद्धं तु निवर्तकत्वात्' इति चोक्तं वाक्यकारैः ॥ इ. सि. पा. ७२.

'प्रकाशकं प्रमाणम्' इति प्रमेयविषये यद्यपि लोकदृष्ट्या सम्यगेव, ब्रह्म तु वेदितुरात्मैव स्वयंप्रकाशम् इति न तत्र प्रमाणव्यापारावसरः । शास्त्रं तु प्रमात्रादिभेदभ्रान्तिनिषेधकृत् । यथोक्तं बृहदारण्यकभाष्ये –

(अ) ननु विरुद्धमिदमुच्यते अप्रमेयम्, ज्ञायत इति च । .... नैष दोषः । अन्यवस्तुवत् अनागमप्रमाणप्रमेयत्वप्रतिषेधार्थत्वात् ॥

(आ) प्रमातृप्रमाणादिव्यापारप्रतिषेधेनैव आगमोऽपि विज्ञापयति न त्वभिधानाभिधेयलक्षणवाक्यधर्माङ्गीकरणेन । .... प्रतिपादयित्रात्मभूतं हि तत् । प्रतिपादयितुः प्रतिपादनस्य प्रतिपाद्यविषयत्वात् । भेदे हि सति तद्भवति ॥ बृ. भा. ४-४-२०, पा. ९२८.

यदापि निवर्तकमेव प्रमाणम्, तदापि न मूर्तद्रव्यापनयनतुल्या निवृत्तिः, किं त्वविद्याप्रत्ययस्य बाधनमेवेत्युक्तम् । रज्जुसर्पादिवत् द्वैतस्याध्यस्तत्वात्, तद्बाध एव कर्तव्यो न तु वास्तवं किञ्चिन्निवर्तनमपीति वेदान्तसिद्धान्तः । तथा हि माण्डूक्यभाष्यम् –

(इ) कथं पुनः स्वरूपे व्यापाराभावे शास्त्रस्य द्वैतविज्ञाननिवर्तकत्वम् ? नैष दोषः । रज्ज्वां सर्पादिवदात्मनि द्वैतस्याविद्याध्यस्तत्वात् । .....

यतोऽविद्याध्यारोपितसुखित्वादिविशेषप्रतिबन्धादेवात्मनः स्वरूपेणानवस्थानम्, स्वरूपावस्थानं च श्रेयः – इति सुखित्वादिनिवर्तकं शास्त्रम् आत्मन्यसुखित्वादिप्रत्ययकरणेन नेति नेत्यस्थूलादिवाक्यैः । आत्मस्वरूपवत् असुखित्वाद्यपि सुखित्वादिभेदेषु नानुवृत्तोऽस्ति धर्मः ॥

गौ. का. भा. २-३२, पा. २०५.

यदप्युच्यते निवर्तकत्वपक्षेऽपि अज्ञाननिवर्तकत्वमिति, तत्राध्यास एवाज्ञानं चेत्, ओमिति ब्रूमः । अध्यासस्य भ्रान्तिप्रत्ययत्वज्ञापनमेव हि तन्निवृत्तिरिति । अथ प्राप्तस्यैव कस्यचित् निवृत्तिरज्ञाननिवृत्तिरिष्यते, न तत्र ज्ञानव्यापारः । मोक्षोऽनित्यश्च भवेत् प्राप्तापनयनपक्षे । यत्तूदाहरणं 'सिद्धं तु निवर्तकत्वात्' इति तस्याप्यध्यासबाधने तात्पर्यम्, भाष्यकारैरेव तथोक्तत्वात् । क्रमेणात्र सर्वसंप्रतिपन्नप्रमाणवाक्यान्युदाह्रियन्ते –

(ई) आत्मनीह यथाऽध्यासः प्रतिषेधस्तथैव च ।
मलाध्यासनिषेधौ खे क्रियेते च यथाऽबुधैः ॥
प्राप्तश्चेत् प्रतिषिध्येत मोक्षोऽनित्यो भवेद् ध्रुवम् ।
अतोऽप्राप्तनिषेधोऽयं दिव्यग्निचयनादिवत् ॥

उप. १८-२२, २३.

(उ) न हि कश्चित् साक्षाद्वस्तुधर्मस्य अपोढ्री द्रष्टा कर्त्री वा विद्या। अविद्यायास्तु सर्वत्रैव निवर्तिका दृश्यते ॥ बृ. भा. १-४-१०, पा. ६६९.

(ऊ) तस्मान्निर्विशेष एवात्मनि सुखित्वादयो विशेषाः कल्पिताः । यत्तु असुखित्वादिशास्त्रम् आत्मनः, तत्सुखित्वादिविशेषनिवृत्त्यर्थमेव इति तु सिद्धम् । 'सिद्धं तु निवर्तकत्वात्' इत्यागमविदां सूत्रम् ॥

मां. का. भा. २-३२, पा. २०५.

[निषेधशास्त्रं निषेधप्रतियोगिनिह्नवार्थमेव, न त्वात्मवस्तुनि विशेषाधानार्थम् । विद्यमानधर्मापनयनार्थं वेत्यर्थः । एतदुपष्टम्भकत्वेन 'सिद्धं तु' वाक्योदाहरणात्, अध्यासनिषेधार्थं शास्त्रम् इति सूत्रार्थोऽवसीयते । इदं च सूत्रं द्रविडाचार्याणाम् । ते च छान्दोग्यभाष्यकृतः – इति गम्यते तद्भाष्यटीकातः ; इह तु वाक्यकारोक्तित्वेनोदाहृतम् । कतरन्न्याय्यमित्यत्र पुरातत्त्वान्वेषका एव शरणम् ॥]

(३) यथोक्तपरिपूर्णलक्षणब्रह्मात्मभावं साक्षादनुभवतोऽपि पूर्ववत् पुनरपि जन्मान्तरादिहेत्वज्ञानावशेषसद्भावे प्रमाणाभावात् न पुनस्तस्य संसारः

संभवेत् । प्राक्तु यथोक्तब्रह्मात्मानुभवात् स्वयंप्रकाशे स्वात्मभूते ब्रह्मण्य-ज्ञाननिवृत्तिः क्रमेणैवेष्यते । अत एवास्तित्वोपक्रमम् आत्मनोऽशनायाद्यती-ताद्वितीयब्रह्मात्मत्वान्तं रूपं श्रावयित्वा, तदसंभावनाविपरीतभावनानिवृत्त्यर्थं युक्तीश्चाह वेदस्तत्र तत्र । तथा 'तत्त्वमसि' 'तत्त्वमसि' इति तं तं भ्रमं नुदन् नवकृत्व ऊचिवान् । सर्वाज्ञाननिवृत्तौ 'तद्धास्य विजिज्ञौ' इति च । श्रवणमनननिदिध्यासनानि दर्शनसाधनानि जगौ । शमदमादीनि च सर्व-कर्मसंन्यासान्तानि विधत्ते(स्म) । यज्ञादीनि च सत्त्वशुद्धिद्वारेण दर्शनार्थानि विदधौ । यद्येतैः साधनैर्विना सकृच्छ्रवणमात्रेणैव ब्रह्मात्मानुभवो भवेत् एतान्यनर्थकानि स्युः ॥ इ. सि. पा. ७३.

अत्र वाक्यं विभज्य प्रक्रियायाः सारासारतां विम्रक्ष्यामः । तत्र तत्र प्रमाणमप्युपन्यसिष्यामः ॥

१. यत्तावदुच्यते ब्रह्मात्मभावम् अनुभवतो न पूर्ववत् अज्ञान-शेषसद्भावे हेतुरस्तीति तदङ्गीकरणीयमेव । ज्ञानमेव हि तन्न भवेत् यद-ज्ञानम् अत्यन्तं न विनाशयति । तथा चोक्तं बृहदारण्यकभाष्ये –

(1) आत्मविषयं विज्ञानं यत्कालम्, तत्काल एव तद्विषयाज्ञान-तिरोभावः स्यात् .... किञ्च न च विपरीतप्रत्ययो विद्यावत उपपद्यते । निर्विषयत्वात् ॥ बृ. भा. १-४-१०, पा. ६७६.

इति ॥

२. यत्तूच्यते प्रागनुभवात् अज्ञाननिवृत्तिः क्रमेणैव भवतीति तत्राज्ञानं यद्यध्यासातिरिक्तम्, तत्र यद्वक्तव्यं तत् प्रागेवोक्तम्, न तादृशाज्ञानस्य निवृत्तिरस्तीति । अथाध्यास एवाविद्या; तर्हि भवत्यपि कस्यचिदेवम्, न तु सर्वस्येति व्यवस्थितविकल्पः । तथा हि भाष्यकाराः–

(2) यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथापि अध्यारोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम्; तत्रैकेनावधानेन एकमंशमपोहति, अपरेणापरमिति युज्यते तत्र क्रमवती प्रतिपत्तिः । तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः ॥ सू. भा. ४-१-२, पा. ४६२.

(3) येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान् प्रत्यावृत्त्यानर्थक्यमिष्टमेव ॥ सू. भा. पा. ४६२.

३. यत्तु अस्तित्वोपक्रमम् अशनायाद्यतीताद्वितीयब्रह्मात्मत्वान्तं रूपं श्रावयित्वा तदसंभावनाविपरीतभावनानिवृत्यर्थं युक्तीश्चाह वेद इति, तत्र यद्ययमभिप्रायः, अस्तित्वं प्रथमं श्राव्यते, तदनन्तरमात्मस्वरूपमिति अस्त्वेवम् , 'अस्तीत्येके नायमस्तीति चैके, (का. १–१–२०) इत्यादिस्थलेषु परोक्षत्वात् प्रेतस्यास्तित्वनास्तित्वसंशयावकाशात् तत्परिहाराय युक्तिरपीति । यत्र पुनः अस्तीत्येवोपलब्धव्यः' (का. २–३–१३) इत्यादिश्रावणम् , तत्र दृष्टफलत्वात् श्रवणस्य नैवास्तित्वे संशयः । न च तत्परिहाराय युक्तय उच्यन्त इति विशेषः । अशनायाद्यतीतत्वश्रवणानन्तरं तु नास्त्येव संशयः, न वा युक्तिः श्राव्यते इति स्पष्टम् ॥

(4) सर्वविशेषरहितोऽपि 'जगतो मूलम्' इत्यवगतत्वात् अस्त्येव । कार्यप्रविलापनस्य अस्तित्वनिष्ठत्वात् । तथा हीदं कार्यं सूक्ष्मतारतम्यपारंपर्येणानुगम्यमानं सद्बुद्धिनिष्ठामेवावगमयति । यदापि विषयप्रविलापनेन प्रविलाप्यमाना बुद्धिः, तदापि सा सत्प्रत्ययगर्भैव विलीयते । बुद्धिर्हि नः प्रमाणं सदसतोर्याथात्म्यावगमे । मूलं चेत् जगतो न स्यात्, असदन्वितमेवेदं कार्यम् असत् असत् इत्येव गृह्येत, न त्वेतदस्ति ; सत् सत् इत्येव तु गृह्यते, यथा मृदादिकार्यं घटादि मृदाद्यन्वितम् । तस्मात्, जगतो मूलम् आत्मा अस्तीत्येवोपलब्धव्यः ॥ का. भा. २·३–१२, पा. १०२.

['अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते इत्यस्य भाष्यम् ॥]

(5) तस्मात् अपोह्य असद्वादिपक्षम् आसुरम् अस्तीत्येवात्मा उपलब्धव्यः, सत्कार्यबुद्ध्याद्युपादिभिः । यदा तु तद्रहितोऽविक्रिय आत्मा कार्यं च कारणव्यतिरेकेण नास्ति 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुतेः, तदा तस्य निरुपाधिकस्य अलिङ्गस्य सदसदादिप्रत्ययविषयत्ववर्जितस्यात्मनस्तत्त्वभावो भवति तेन च रूपेण आत्मा उपलब्धव्यः ॥ का. भा. २–३–१३, पा. १०२.

['अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति' इत्यस्य भाष्यमिदम् । अत्रास्तित्वमपरोक्षम् । तस्यासम्भावनापरिहारार्थं न युक्तिः प्रदर्श्यते श्रुत्या, किं तर्हि अस्तित्वोपाधिं पूर्वमधिगमय्य, पश्चात् तस्याप्यपवादेन निरुपाधिकं रूपं समर्पयितुं प्रयत्यत इत्युक्तम् ॥ ।

(6) **कतमो याज्ञवल्क्य सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति । एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति ॥ बृ. ३-५-१.**

[अत्राशनायाद्यतीतत्वं श्रावयित्वा तत्रासंभावनादिनिवारणाय न काचन युक्तिरुच्यते, साक्षादपरोक्षाद् ब्रह्मण एव सर्वान्तरात्मत्वेन समर्पणात् । तत ऊर्ध्वं कर्तव्याभावद्योतनाय हि एषणात्रयाद् व्युत्थानं श्राव्यत इति ॥]

४. यत्तु 'तत्त्वमसि', 'तत्त्वमसि' इति तं तं भ्रमं नुदन् नवकृत्व ऊचिवान् इति, तत्सत्यमेव । 'भूय एव मा भगवान् विज्ञापयतु' (छां. ६-८-७) इति पुनः पुनः शङ्कान्तरप्रत्युपस्थापनात् । यत् पुनः सर्वाज्ञाननिवृत्तौ तद्धास्य विजज्ञौ इत्याह – इति, तदपि सत्यमेव यदि श्वेतकेतोः तत्तदुपदेशानन्तरं जाततत्तच्छङ्कानिवारणेन परमार्थसत्यार्थ-ज्ञानमभूत् – इत्यभिप्रायः । एवं हि तत्र भाष्यम् –

(7) **अथेदानीं पित्रा प्रतिबोधितः तत्त्वमसीति दृष्टान्तैर्हेतुभिश्च तत् पितुरस्य ह किलोक्तं सदेवाहमस्मीति विजज्ञौ विज्ञातवान् ॥**

छां. भा. ६-१६-३, पा. ५३९.

[अत्र तत्तच्छङ्कानिवारणार्थमेव हेतुदृष्टान्तोपन्यास इति, सर्वशङ्कानिवारणे सति सद्ब्रह्माहमस्मीति बोधजन्म – इति चोक्तम् ॥]

(8) **किं तु पुनरत्र षष्ठे वाक्यप्रमाणेन जनितं फलमात्मनि ? कर्तृत्वभोक्तृत्वयोरधिकृतत्वविज्ञाननिवृत्तिः तस्य फलं वयमवोचाम ॥**

छां. भा. पा. ५३९.

[अत्र वाक्यप्रमाणजनितं फलं कर्तृत्वभोक्तृत्वभ्रमनिवृत्तिरेवेति स्पष्ट-मुक्तम्, न तु 'तत्तदुत्तरेण तत्तदज्ञानांशनाशे सति वाक्यज्ञानात् निरवशेषम् अज्ञानबाधः' इति ॥]

५. यदप्युच्यते श्रवणमननिदिध्यासनानि दर्शनसाधनानि जगौ – इति, तदप्युक्तरीत्यैव संगमनीयम्। न हि श्रवणेन अज्ञानस्यैकोंऽशः, मननेनापरोंऽशः, निदिध्यासनेन चान्योंऽशो विनाश्यत इति श्रुत्यभिप्रायः ॥

(9) ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनात्, न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्। अत्रोच्यते। नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्, वेदप्रमाणजनितब्रह्मात्मभावविरोधात् ॥

सू. भा. १-१-४, पा. २१.

(10) यत् पुनरुक्तं श्रवणात् पराचीनयोर्मननिदिध्यासनयोर्दर्शनाद् विधिशेषत्वं ब्रह्मणः, न स्वरूपपर्यवसायित्वमिति। न। अवगत्यर्थत्वान्मननिदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत् तदा विधिशेषत्वम् ॥ सू. भा. १-१-४, पा. २३.

[वाक्यद्वयेन श्रवणादीनाम् अवगत्यर्थत्वमुक्तं भाष्ये। श्रवणेनैव चेदवगतिर्जाता, नास्ति कृत्यं मननिदिध्यासनयोरिति च। न त्वेव जातुचिदुक्तं श्रवणेनैकोंशोऽज्ञानस्य नाश्यते, मननेनापरः – इत्यादि ॥]

६. यत्तु साधनविधानान्यथानुपपत्त्या साधनैर्विना श्रवणमात्रेण नानुभवप्राप्तिरित्यवसीयत इति। तत्रेदं तु वक्तव्यं यत् ज्ञानसाधनविधिर्नैकान्तेन समुच्चयमेव साधनानां सर्वत्रापि सर्वेषामपेक्षते। उक्तं हि बृहदारण्यकभाष्ये –

(11) लोके हि नैमित्तिकानां कार्याणां निमित्तभेदोऽनेकधा विकल्प्यते। तथा निमित्तसमुच्चयः। तेषां च विकल्पितानां समुच्चितानां च पुनर्गुणवद्गुणवत्त्वकृतो भेदो भवति। ... एवमेव आत्मैकत्वज्ञानेऽपि क्वचिज्जन्मान्तरकृतं कर्म निमित्तं भवति। यथा प्रजापतेः। क्वचित् तपोनिमित्तम् ...। क्वचित् 'आचार्यवान् पुरुषो वेद', 'श्रद्धाधाँल्लभते ज्ञानम्', 'तद्विद्धि प्रणिपातेन', 'आचार्याद्धैव', 'द्रष्टव्यः श्रोतव्यः' इत्यादिश्रुतिस्मृतिभ्य एकान्तज्ञानलाभनिमित्तत्वम् ॥ बृ. भा. १-४-२, पा. ६४९

इति। न च सर्वेषामपि साधनानाम् अज्ञाननिवर्तकत्वमेव साक्षादिति नियोक्ता कश्चिदस्ति। यतः –

(12) श्रद्धाप्रभृतीनाम् अधर्मादिनिमित्तवियोगहेतुत्वात्, वेदान्त-श्रवणमनननिदिध्यासनानां च साक्षाज्ज्ञेयविषयत्वात् । पापादिप्रतिबन्धक्षये चात्ममनसोर्भूतार्थज्ञाननिमित्तत्वाभाव्यात् ॥ बृ॰ भा॰ पा॰ ६४५.

तस्मात्, क्वचिद् दुरितक्षयद्वारेण, क्वचित् प्रत्यक्प्रावण्यसमासादनेन, क्वचिच्चैकाग्र्यसंपादकत्वेन क्वचित् पुनः साक्षादात्मविषयकानात्माध्यारोपनिवर्तनेन च साफल्यम् साधनस्येति न विविधसाधनविधानान्यथानुपपत्त्या अज्ञानस्य सांशत्वं क्रमेणैव निवारणं च कल्पनीयम् । न च सांशत्वानंशत्वाभ्यामनिर्वचनीयस्य सांशत्वं संभवति युक्त्यापि । तस्मात्, अनेकरूपत्वाच्छुक्त्यादेर्जडस्य, एकैकेन ज्ञानेन कार्त्स्न्येनाप्रकाशित्वात् तदज्ञानस्यापि न कार्त्स्न्येन निवृत्तिरिति न युक्तं कल्पनम् । तथा च नैकान्येवाज्ञानानीति कल्पान्तरमिष्टसिद्धावप्युक्तमनादेयम् । तत्रापि, अग्रहणसंशयविपरीतग्रहणान्येव आत्मनस्तत्तद्रूपप्रकाशनेन निवर्त्यत्वेन कल्पितान्यलं तत्त्वज्ञानसार्थक्यायेति न तदर्थमज्ञानान्तरगवेषणा भवेदिति दूषणं स्थितमेवेति द्रष्टव्यम् ॥

ब्रह्मज्ञानस्य तदज्ञाननिवृत्तिद्वारा साक्षात्कारहेतुत्वम् –

२२८. न केवलं श्रवणादीनि, किं तु दर्शनमप्यपेक्षितं कार्त्स्न्येनाज्ञाननिवृत्तये, तच्च महावाक्याद् भवतीतीष्टसिद्धिप्रक्रिया ॥

(१) श्रवणादिभिर्निश्चितेऽप्यात्मतत्त्वे अनुमानादिनिश्चित इव चन्द्रादौ भेदप्रतिभासानिवृत्तेः, दर्शननिवर्त्यमप्यज्ञानमस्ति ॥ इ॰ सि॰ ७४.

(२) न चैकत्वादिज्ञानं विना द्विचन्द्रादिज्ञानानां भ्रान्तित्वं ज्ञातुं शक्यम् 'न च द्वौ चन्द्रौ', 'नेयं प्राची दिक्' – इत्येतावदेव आप्तवाक्यं यद्यपि भवेत्, तथापि पूर्वोक्तव्युत्पत्तिबलादनिर्वाच्यतैव चन्द्रद्वित्वादेः प्रतीयते न स्वभावः । 'नेह नानास्ति' इत्यागमवाक्यस्याप्येवमेवार्थो ग्राह्यः । तस्मात्, द्विचन्द्रादिभ्रमस्य अपरोक्षत्वात् अपरोक्षज्ञानेनैव निवृत्तिः । एवम् आत्मनोऽब्रह्मत्वभ्रमस्यापरोक्षत्वात् अपरोक्षज्ञानमेव श्रौतं तन्निवर्तयति ॥ इ॰ सि॰ पा॰ १२२.

(३) न च परोक्षं वस्तु परोक्षज्ञानैरेवाभ्यस्यमानैरपरोक्षीभवेत् । अनुमेयादिष्वदर्शनात् ॥ इ. सि. पा. ७४.

शाब्दी चेन्मानजा न मोहनुत्, नतरामन्या । सा हि अमानजत्वात् भ्रान्तिर्भावनादिर्वा न तु विद्या । न ह्यक्षजादि अस्या मानं तेऽपीष्टम् । शब्दजा चेत्, शाब्द्येव नान्या । सा चेत् आत्मस्वरूपम्, तच्चेन्मोहनुत्, सदा नुदेत् ; अतः शाब्द्येव मोहनुत् । न चेत्, सा व्यर्था ॥

इ. सि. पा. ३३४.

[अत्र मण्डनादिसम्मतो ज्ञानाभ्यासजसाक्षात्कारो निरस्तः, शाब्द एव साक्षात्कार इत्युक्तम् ॥]

(४) शाब्दमपि ज्ञानम् अपरोक्षार्थं भवति, अपरोक्षात्मविषयत्वात्, यथा आत्मनः स्वयंप्रकाशताव्युत्पादकं पौरुषेयं वाक्यम् ॥ पा. १२२.

(५) न हीच्छामि रूप्यादिज्ञानं बोधकम् । तस्यापि सत्त्वप्राप्तेः । रूप्यादिवत् तज्ज्ञानमपि अज्ञानविलसितमित्युक्तम् । तदुभयं यदज्ञानविलसितं तज्ज्ञानमेव तदज्ञाननिवर्तकं बाधकमुच्यते । नान्यदज्ञाननिवर्तकमपि । यथा, अन्नमेवादन् अन्नाद उच्यते, न तु मृदमपि ; एवं सविलासमेवाज्ञानं निवर्तयज्ज्ञानं बाधकम्, न त्वज्ञानमात्रम् । बाधकादेव सविलासाज्ञाननिवृत्तौ 'नेदं रजतम्' इत्यादिपरामर्शज्ञानम्, न तु रजताद्यभावबोधकम् । परामर्शकाभावे तु तदपि नास्त्येव ॥ इ. सि. पा. ९४.

(६) ज्ञानं ह्यज्ञानमेव निवर्तयितुं क्षमते न तु वस्तु अण्वपि । तथा दृष्टत्वात् । अन्यथा अतिप्रसङ्गाच्च । .... न च बोधनमेव बाधनम्, सर्वज्ञानानां स्वार्थबाधकत्वप्रसिद्ध्यभावात् । निवर्तकत्वं तु स्वोत्पत्त्यैव ज्ञानस्य । तच्च प्रसिद्धम् । संभावितं च तत् ॥ इ. सि. पा. ९४.

(७) स्वयंप्रकाशमपि प्रमाणप्रकाश्यमेव । तस्य चाप्रकाशनमज्ञानमेव इति तन्निवर्तनमेव तत्प्रकाशकत्वं प्रमाणस्य । .... अत एव न तद्विषयीकरोति जडमिव प्रमाणं बोधयदपि ॥ इ. सि. पा. ७२.

(८) यथा अनुमानादिभिश्चन्द्रैकत्वे निश्चिते चन्द्रभेददर्शनस्य प्रत्यक्षाभिमतस्यापि भ्रान्तित्वं ज्ञायते प्रागप्यपरोक्षबोधात्, न च प्रत्यक्षविरोधाशङ्का, अत्राप्येवं द्रष्टव्यम् । 'नेह नानास्ति', 'इन्द्रो मायाभिः', 'मृत्योः स मृत्युम्' इत्यादिवाक्यैः, अनिर्वचनीयत्वव्यासैराद्यन्तवत्त्वादिभि-

हेतुभिश्च जगतो मायामायत्वमवगम्यते इत्युक्तम् । अतोऽस्मत्पक्षेऽज्ञानज-त्वात् भ्रमस्य ज्ञानान्निवृत्तिर्युक्ता ॥ इ. सि. पा. १२२.

अत्र बहुविचिन्त्यमस्ति

(1) 'माया', 'अविद्या', ... 'आकाशम्' इत्यादिशब्दैर्व्यपदेश्यं महदादेः प्रकृतिरिति प्रतिज्ञातमत्र । (पा. १४४)', अतो जगदुपादान-कारणमविद्या-इति गम्यते । तथा भ्रान्तिसंशयतत्संस्काराणामपि कार्यत्वात्, नान्योन्योपादानत्वम्' । यत्तु तेष्वागमापाविष्यन्त्वेति तदेव तेषामुपादान-मज्ञानम् (पा. ४८) इत्यप्युक्तम् । तेन ज्ञानपक्षस्याप्यज्ञानमिदमित्युक्तं भवति । किञ्च शुक्तिविषयकमेवाज्ञानम् – इत्यभ्युपगमवादेन आत्माश्रित-मेवाज्ञानं शुक्तिरूप्यस्योपादानम् (पा. ६३) इत्युक्तम्; वस्तुतस्तु जड-विषयकमज्ञानं नास्त्येव, यतो न तत्प्रमाणगम्यम्, अत आत्माश्रयाज्ञान-मेव सर्वमपि जडं नाम (पा. १९६) इत्युपसंहृतम् । एवं चाज्ञानविलसित-मेव सर्वं व्याकृताव्याकृतरूपं जगत् ज्ञानज्ञेयरूपं च इत्युक्तं भवति । यद्यपि भाष्यकारीयप्रस्थानेऽपि सर्वं जगदज्ञानकार्यमेव, तथापि तत्राज्ञानं नामानादिभ्रान्तिरध्यासः, इह पुनर्जडशक्तिरिति (पा. ६९) विशेषः ॥

(2) प्रपञ्चभ्रमस्य जीवत्वभ्रमस्य च अपरोक्षत्वात्, अपरोक्ष-ज्ञानेनैव तस्य निवृत्तिर्युक्ता इत्युक्तम् (पा. १२२) प्राक्तु तादृशज्ञानोत्पत्तेः 'नेह नानास्ति किञ्चन' इत्यादिश्रुतिभिश्च आद्यन्तवत्त्वादिहेतुभिश्चा-निर्वाच्यत्वेन मायामयत्वं जगतोऽवगम्यत इति चोक्तम् । तत्र श्रुतिभिर्हेतु-भिर्वा किं नामापरोक्ष्यमिति न विचार्य निर्धारितम् । 'नेह नानास्ति किञ्चन' (का. २–१–११) इति श्रुतिस्तावत् ब्रह्मात्मैवेदं सर्वं नान्य-दस्तीति आचार्यागमसंस्कृतेन मनसैव ज्ञायते इत्याह । एवं 'मृत्योः स मृत्युं गच्छति' इति वाक्यशेषोऽपि अविद्यया नानेव पश्यत्यज्ञः–इत्याह

1. अत्र दत्ताः सर्वत्रेष्टसिद्धिपुटसङ्ख्या एव ।

न पुनरनिर्वचनीयमिदमिति। तथा 'आदावन्तेऽपि यन्नास्ति' इति युक्तिरपि 'वर्तमानेऽपि तत्तथा' इति मिथ्यात्वं जाग्रत्स्वप्नयोरेकत्वसिद्धं समर्पयति ; तया जगतोऽनिर्वचनीयाज्ञानकार्यत्वं ज्ञाप्यत इति तु इष्टसिद्धि-कृत्प्रस्थानम् ॥

(3) श्रवणादिभिः प्रत्येकं तत्तदज्ञानं तदंशो वा निरस्यते, न त्वज्ञानहानिस्तावता कार्त्स्न्येन ; दर्शनेन तु, अपरोक्षज्ञानाख्येन, कृत्स्ना-ज्ञाननिवृत्तिः—इत्युक्तमत्र (पा. ७४)। शाब्दज्ञानमेवापरोक्षज्ञानमपरोक्ष-भ्रमनुत् (पा. १२२) इति च। तथा निवर्तकत्वं तु ज्ञानस्य स्वोत्पत्त्यैव इत्यप्युक्तम्। तत्र सकृच्छ्रूयमाणवाक्यजन्यज्ञानेनैव ब्रह्मात्मत्वदर्शनमपि कस्यचिद् भवेदेवेति भाष्यकारैरावृत्त्यधिकरणे यदुक्तम्, तत् किं न श्रवणमात्रजन्यमपरोक्षज्ञानम् ?—इत्यस्य, तथा 'प्रकृतसङ्ख्यापूरणस्यात्मनोऽ-विद्यया अनाप्तस्य सतः केनचित् स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मणः आत्मत्वदर्शनेन विद्यया तदाप्तिरुपपद्यत एव' (तै. भा. २–१) इत्यादिस्थलेषु दशमज्ञानदृष्टान्तेन ब्रह्मात्मदर्शनं भाष्ये यदुक्तम्। तत्र दृष्टान्ते किमस्ति दशमस्यावरणं द्विचन्द्रादिवदनिर्वच-नीयदर्शनं वा, यद्दर्शनेन निवर्त्यते ?' इत्यस्य वा प्रश्नस्योत्तरं न स्पष्टं प्रदर्शितमत्र। दशमवाक्यश्रवणादिव तत्त्वमसिवाक्यश्रवणाज्जातमेव ज्ञानं किं न प्रभवत्यज्ञाननिवर्तनाय, अपरोक्षानुभवजननाय च ? इत्यपि न विमृष्टमत्र ॥

(4) यत्तूच्यते 'ज्ञानं ह्यज्ञानमेव निवर्तयितुं क्षमते, न तु वस्तु अण्वपि, तथा दृष्टत्वात्' इति, तत्र ज्ञानाभावसंशयविपर्ययज्ञानानामेव ज्ञाननिवर्त्यत्वं लोकदृष्टं प्रविहाय तद्विलक्षणं भावरूपाज्ञानं तर्केण ज्ञान-निवर्त्यतया प्रसाध्यते, तच्च निवर्त्यत्वं लोकदृष्टत्वेन समुदाह्रियते ब्रह्माज्ञान-निवर्त्यत्वसाधनार्थम्—इति प्रस्थानेऽस्मिन् विशेषः ॥

अपरोक्षज्ञानिनोऽप्यविद्यालेशः –

२२९. विदुषो जन्मान्तरहेत्वज्ञानानवशेषेऽपि यावच्छरीरपातमज्ञानलेशोऽनुवर्तत एवेति स्वीक्रियतेऽस्मिन् प्रस्थाने –

(१) अज्ञानलेशोऽस्त्येव, विदुषोऽपि कञ्चित् कालं शरीरस्थितेरिष्टत्वात् । तस्याश्च अज्ञानमूलभेददर्शनादिसापेक्षाशनपानाद्यपेक्षत्वात् ॥

इ. सि. पा. ७४.

(२) इतश्च, आचार्याद् विद्याप्राप्तिः, स च विद्वान् जीवंश्च । विद्वानप्यदृष्टतत्त्वः स इति चेत्, तन्न । 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इति तत्त्वदर्शिभिरेवोपदिष्टं ज्ञानं पुमर्थसाधनमिति यत ईश्वरोऽनुशशास । दृष्टतत्त्वस्य चेत् तदैव शरीरं पतेत्, तदा आचार्याभावात् विद्यालाभान्मोक्षाभावः ॥ इ. सि. पा. ७५.

(३) प्रारब्धकर्मान्तरफलाविरोधेनैव कर्माणि स्वफलं प्रयच्छन्ति । यतोऽश्वमेधादीनि बलवत्तराण्यपि कर्माणि प्रारब्धभोगक्षयं प्रतीक्षन्ते स्वफलदानाय, अतः कर्मान्तरारब्धभोगायतनशरीर एव स्वफलं दातुं समर्थानि विद्योदयफलानि कर्माणि तदविरोधेनैव स्वफलं दातुमर्हन्तीति न्याय्यं विद्याप्रारब्धभोगयोरविरोधित्वम् .... तस्मात्, विदुषोऽपि कञ्चित् कालं शरीरस्थितेरभ्युपेयत्वात् तावन्मात्रहेतुरविद्याशेषगन्धोऽभ्युपेयः ॥ ·

इ. सि. पा. ७५–७६.

[यद्यपीमानि वाक्यानि पूर्वपक्षिण एव, तथापि 'साधीयानयं प्रतिभासः' इत्यादिना (पा. ७७) संवादात् सिद्धान्तिनोऽपि संमतमिदं मतमिति गम्यते ॥]

(४) संस्कारादेव अविद्यां विनापि देहादिस्थितिर्विदुषः संभवति सर्पभ्रान्तिनिमित्तभयकम्पपलायनादय इव तत्संस्काराद् रज्जुज्ञानेऽपीति चेत्, तन्न । अविद्याभावे संस्काराभावात् । अविद्याशरीरत्वात् संस्कारतद्वतोः । भयकम्पादयस्तु न रज्ज्वज्ञानशरीरा इति न दृष्टान्तः । यस्तु रज्ज्वज्ञानशरीरः सर्पभ्रमः, सोऽज्ञानाभावे पुनर्न भवत्येव । .... भवतु वा संस्कारादेव भ्रमोऽपि कम्पादिरिव लोके, तत्र संस्कारतद्वतोर्भावात्, इह तु तदभावान्न संस्कारात् किञ्चित् संभवेत् । अतोऽज्ञानलेशादेव तद्विदः शरीराद्याभास एष्टव्यः । सावशेषोऽप्यज्ञानदाह आत्मन्यपि संभवतीति हि उक्तम् ॥ इ. सि. पा. ७६.

[अविद्यासंस्कारात् कम्पादिरिव देहाहङ्कारादेरनुवृत्तिः पञ्चपादिकाब्रह्मसिद्धि-भामतीप्रस्थानेषूपपादितः (पं. पा. ४०, ब्र. सि. 133, वा. भा. ९५९), तन्निराकरणेनात्राज्ञानलेशसद्भाव एव साधित इति स्पष्टम् । अज्ञानलेशोऽज्ञानमेव । तत्र ज्ञानोदयेऽप्यज्ञानलेशावशेषः कथमिति तु नालोचितम् ॥]

(५) साधीयानयं प्रतिभासः । अहमपीच्छाम्येवेत्थम् । देहान्तरादि-संसारबीजमेव त्वज्ञानशेषं विदुषो नेच्छामि । स तु त्वयापि निरस्तः । एवं च सति 'विमुक्तश्च विमुच्यते' ....इत्यादीनि जीवन्मुक्तिवचनानि स्थितप्रज्ञ-गुणातीतलक्षणवचनानि चोपपन्नार्थानि भवन्ति ॥ इ. सि. पा. ७७.

अविद्यालेशस्य तत्संस्कारस्य वा जीवन्मुक्तेऽङ्गीकर्तृभिः सर्वैरप्य-द्वैतिभिर्व्यवहारदृष्ट्यैव तदभ्युपगम्यत इति स्पष्टम् । तत्र संस्कारपक्ष एव ज्यायानिति श्लिष्यते । अन्यथा ह्यज्ञानं ज्ञानेन बाध्यमेव ज्ञानेनैव च तद् बाध्यमिति सर्वसंप्रतिपन्नो नियमो भज्येत । जीवन्मुक्ते ज्ञानेन सहा-प्यज्ञानानुवृत्त्यङ्गीकारात्, स्वयमेव विनाशाङ्गीकारप्रसङ्गाच्चाज्ञानस्य । वाक्यप्रामाण्याच्छूद्धामात्रगम्यश्च स्यात् आत्यन्तिकाविद्यामोक्षः आशरीर-धारणमज्ञानलेशानुवृत्त्यभ्युपगमात् इति च स्फुटम् । अत एव भाष्य-कारैरुक्तम् –

(१) बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशाद् कञ्चि-त्कालमनुवर्तत एव । अपि च नैवात्र विवदितव्यं ब्रह्मविदा कञ्चित्कालं शरीरं ध्रियते न वा ध्रियत इति । कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणं चापरेण प्रतिक्षेप्तुं शक्येत ? ॥ सू. भा. ४–१–१५, पा. ४७५.

[अत्र मिथ्याज्ञानं बाधितम् इति वचनात्, न मिथ्याज्ञानशेषः, समर्थ-क्रियाकारिमिथ्याज्ञानसंस्कारशेषो वा अभ्युपगम्यते ·तत्रभवता आचार्येण, किं तु तदाभासानुवृत्तिरेव निश्चितशुक्तितत्त्वस्यापि रजतावभासानुवृत्तिवत् । बाधितप्रतीत्यनुवृत्त्या हि प्रत्येतुर्न कश्चिदुपकारोऽपकारो वेति । एवं शरीरधारण-मपि बाधित एवेति गम्यते । एतच्चाध्यारोपापवादप्रक्रियानुगुणम् । तदाभासानु-वृत्तिरेवेति मिथ्याज्ञानानुवृत्तिमध्यारोप्य शरीरधारणादिप्रतीतेः प्रारब्धकर्माभास-प्रयुक्तत्वोपपादनात्, तात्त्विकशरीरानुवृत्त्याद्यपवादात् । तस्य बाधितत्वोक्त्या मिथ्याज्ञानानुवृत्तेरप्यपवादाच्च । इष्टसिद्ध्यादिपक्षान्तरे तु अव्याकृतलक्षणमज्ञान-

मभ्युपगम्य तस्य च देहादेश्च कार्यकारणभाव एवाभ्युपगम्यते । जीवन्मुक्ते तच्छेषसंस्काराद्यनुवृत्तिश्चेति विशेषः ॥]

(२) न च विपरीतप्रत्ययो विद्यावत उपपद्यते । निर्विषयत्वात् । .... क्वचित् विद्यायाः पूर्वोत्पन्नविपरीतप्रत्ययजनितसंस्कारेभ्यो विपरीतप्रत्ययावभासाः स्मृतयो जायमाना विपरीतप्रत्ययभ्रान्तिम् अकस्मात् कुर्वन्ति । यथा विज्ञातदिग्विभागस्यापि अकस्मात् दिग्विपर्ययविभ्रमः । सम्यग्ज्ञानवतोऽपि चेत् पूर्ववद् विपरीतप्रत्यय उत्पद्यते सम्यग्ज्ञानेऽप्यविस्रम्भात् शास्त्रार्थविज्ञानादौ प्रवृत्तिरसमञ्जसा स्यात् ॥ बृ. भा. १-४-१०, पा. ६७८

[अत्रापि बाधितविभ्रमानुवृत्तिरेव विवक्ष्यते इति स्पष्टम् ॥]

(३) विद्वांस्तु पुनर्विद्यया अविद्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुम् । अविद्याध्यारोपितस्य शेषानुपपत्तेः । न हि तैमिरिकदृष्ट्याध्यारोपितस्य द्विचन्द्रादेः तिमिरापगमे शेषोऽवतिष्ठते ॥

गी. भा. १८-४८, पा. २७८.

[अतोऽविद्यापगमेऽपि या तदनुवृत्तिरिव सा बाधितानुवृत्तिरेवेत्युक्तं भवति ॥]

(४) तस्मात्, मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् । तथा च ब्रह्मविद्विषया श्रुतिः – 'तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ. ४-४-७) इति । 'सचक्षुरचक्षुरिव .... ' इति च । स्मृतिरपि च 'स्थितप्रज्ञस्य का भाषा ... ' (गी. २-५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति ॥ सू. भा. १-१-४, पा. २३.

[अत्र सशरीरत्वस्य मिथ्यात्वात् सर्वप्रवृत्त्यभावो निवृत्तमिथ्याज्ञानस्य विदुषः–इत्युपपादितम् । विद्यमानामपि बाधितानुवृत्तिमकिञ्चित्करीं गृहीत्वा । तत्र च श्रुतिस्मृतयः प्रमाणत्वेनोदाहृताः । इष्टसिद्धौ तु विदुषो मिथ्याप्रत्ययकारणस्य अज्ञानस्य शेषसद्भावस्ताभ्य एव श्रुतिस्मृतिभ्यः साधितः–इति स्फुटं प्रस्थानवैलक्षण्यम् ॥]

मण्डनादिप्रक्रियाखण्डनम् –

२३०. ब्रह्मैवाविद्याश्रय इति पक्षे एकमुक्तौ सर्वमुक्तिप्रसङ्गः – इत्यतो जीवाश्रितैवाविद्या स्वीकार्या इति (ब्र. सि. 10; वा. भा. १२६)

इति मण्डनमिश्रवाचस्पतिमिश्रौ मेनाते। तन्मतमत्र विस्तरेणखण्डितम्। तत्रार्थसंग्राहकश्लोकाविमौ –

जाड्यान्न कल्पितस्येष्टाविद्या प्रागुक्तहेतुभिः।
नाजडं कल्प्यते सिद्धेर्नात एव जडाजडे॥ इ. सि. ६-४.
न स्याद् ब्रह्मण्यविद्या सा नेष्टा चेद् ब्रह्मणस्तदा।
न ब्रह्मधीर्न सा मुक्त्यै तन्मोहान्न हि संसृतिः॥ इ. सि. ६-५.

(१) ब्रह्म चेन्नाज्ञं तर्हि नाज्ञातं स्यात्, तद्व्यतिरिक्तस्य च चेतनस्याभावात् अहं ब्रह्मास्मीति श्रौती ब्रह्मधीर्न स्यात्। ब्रह्माज्ञानाभावाच्च न तज्जः संसारः। अज्ञानाभावे ब्रह्मधीनाश्यमेव न स्यात्। तथा च ज्ञानान्मुक्तिरिति श्रुतेर्बाधः। जीवानां कल्पितत्वात् तेषां जडत्वापत्त्या नाविद्याश्रयत्वोपपत्तिः। तेषु कल्पिते ह्यज्ञानाश्रयत्वे अज्ञानकल्पितेऽज्ञानमिति स्यात्। तथा चात्माश्रयता, अन्योन्याश्रयता, अनवस्था वा स्यात्। न च ब्रह्मणि विद्यात्मकेऽविद्यानुपपत्तिरिति मण्डनवाचस्पत्युद्भावितो दोषोऽस्ति। न हि वेदजन्यविद्यात्मकत्वं ब्रह्मणः, किं तु चिदात्मत्वमिति। न च सादेर्भ्रमस्यानादिब्रह्माश्रयत्वम्। न च भ्रमप्रवाहोऽप्युक्तदोषापनोदकः; प्रवाहस्य भ्रमत्वे कार्यत्वात्, अभ्रमत्वे अकल्पकत्वाच्च। अतो न कल्पितजीवोऽज्ञानी। अविद्यावतोऽन्यविषयकमज्ञानमिति न संभवति। तस्मिन्नज्ञाते ज्ञाते च तदसंभवात्। अज्ञस्य अविद्यादेहत्वे न विद्या हन्त्यविद्याम्। अज्ञबाधप्रसङ्गात्; ज्ञानेनाज्ञबाधे च नाचार्यः, न चाज्ञात् शिष्याणां विद्याप्राप्तिः। न चाज्ञानकल्पितभेदस्यैवाविद्या इति युक्तम्, तदापि हि कल्पितस्य भेदस्य नाविद्येति जीवस्यैवाविद्येति स्यात्। कल्पितभेदस्यैव भेदः कल्प्यते इति चेत् अनवस्था। अज्ञस्याविद्याकल्पितत्वे तर्हि स्वाप्नविद्येव सा नाविद्यानिवर्तिका स्यात् – इति मण्डनखण्डनसारः। इ. सि. पा. ३२४-३३१.

(२) सर्वजीवभेदकल्पनाहेतुरेकैव चेदविद्या एकस्य धिया एकमुक्तौ सर्वमुक्तिः स्यात्; अस्मत्पक्षे तु एकमुक्तौ एकमुक्तिरेव, अनेकाभावादित्यतः परोक्तदोषः परस्यैव स्यात्। तेषु एकस्मिन् मूढेऽन्यस्य विदुषोऽप्यमुक्तिश्चेति द्रष्टव्यम्। प्रत्येकमेका अविद्या इति वाचस्पतिपक्षे बहुकल्पना। मुक्तामुक्तादिभेदव्यवस्थासिद्ध्यर्थमनेका अविद्याः कल्प्यन्ते इति न दोष इति चेत्। व्यवस्था चेत् पारमार्थिकी न तत्सिद्ध्यर्थमविद्यापेक्षा; कल्पिता चेत् नाविद्याभेदः कल्प्यः, एकयापि सिद्धेः। अन्यथा हि एकस्यापि जीवस्य कल्पितानन्तभावभानात्, अनन्ताविद्याकल्पनाप्रसङ्गः। अनेकजीवा भान्तीति

तेषामप्यविद्या एषितव्येति चेत्, तेषामपि कल्पितत्वात् एकस्यैवाविद्यया तेषां भानावक्लृप्तेर्नान्ये तदविद्या वा कल्पनीयाः। जीवस्वरूपकल्पिका तदन्यत्वकल्पिका अविद्या च एकैव चेत्, कल्प्यभेदान्नाविद्याभेदः। स्वाश्रया चाविद्या स्यात् स्वकल्पिकाश्रयत्वात्। एकस्याविद्यया चेदन्यः कल्पितः तत्कल्पनया चायम्, तर्हि अन्योन्याश्रयः। अथ एकः अन्याविद्याकल्पितः स चान्याविद्याकल्पितः, तर्हि अनवस्था। तस्य तस्यान्याविद्याकल्पितान्याविद्याकल्प्यत्वात्। न चानादित्वाददोषो बीजाङ्कुरवत्। संतानस्यानादित्वेऽपि एकैकस्य जीवस्य सादित्वात् बीजादिवत्। अत एव अन्तवत्ता च। अतो न मुक्तिः। पूर्वपूर्वाज्ञानाक्षये उत्तरोत्तरक्षयाभावाच्चैवम्। पूर्वाविद्यायाः कल्पितत्वेऽकल्पितत्वे वा तस्या नाशे सर्वाविद्यानाशः, अनाशे नैकस्या अपि। यद्यमोहिनोऽन्यमोहिमोहतज्जं न भाति, तदा गुरुशिष्यसंगतिर्न स्यात्। न चाविद्यावान् गुरुः। न चामोहनुद् विद्या। विद्वद्देहस्थितिस्तु अविद्यासंस्कारमात्रात् त्वत्पक्षे। न च शाब्दज्ञानी गुरुर्न साक्षात्कृतिमानिति विवेचनं युक्तम्। शाब्दज्ञानसाक्षात्कारयोर्वैलक्षण्यासिद्धेः। शाब्दी चेन्न विद्या तर्हि न मोहनुत् सा। न च शाब्दज्ञानमग्रहनुत्, तदभ्यासाच्चाज्ञाननाशः इति न्याय्यम्, अग्रहणादभावाद् भ्रमरूपभावोत्पत्तिरिति चान्याय्यत्वात्। विद्याफलं विद्याभ्यासात् इति चायुक्तम्। विद्यार्थं चान्यदभ्यस्यते, न तु विद्या साक्षात्। अतोऽन्यमोहादिकल्पना व्यर्था। न हि अन्यमोहमन्यः कल्पयतीति युक्तम्। बहुमोहकल्पितं बहुदृष्टं चैकमस्ति इन्द्रजालमरीच्युदकद्विचन्द्रादि – इति चेत्। न। स्वन्मोहकल्पितं त्वद्विद्या सर्वं नश्यति चेत्, त्वन्मुक्त्या सर्वमुक्तिः। अन्यथा न तेऽपि मुक्तिः। एकदृष्टौत्पातिकार्कसुष्यादौ अन्येषां विवादात् तस्यैकमोहजत्वासिद्धेः, अन्यस्यापि तथात्वप्राप्तेः, मायादावपि एकस्यानेकमोहजत्वाद्यसिद्धिः। संवादस्तु तत्र सर्वेषामेकरूपभ्रमोत्पत्तेः। अन्येऽपि यत्र कल्पिताः स्वप्ने, न तत्र ते तत्कार्यं वा तिष्ठेत् तद्धेतुमोहक्षये। एकैकं सर्वमोहजम्। बहूनां हि द्रव्यैः क्रीतं पक्वं च तेषां स्वं भोज्यं च एकद्रव्यलोपे च तस्य न तत् स्वं भोज्यं च; एवमत्रापीति चेत्। तन्न। सर्वमोहजमेकमोहजमेव एकमोहजस्वप्नार्कसुष्यादिवदिष्युक्तत्वात्। कल्पितस्य जडत्वात्, जडस्य चामोहित्वात्, अजडस्य चान्यादृश्यत्वात् अन्यत्वासिद्धेः तस्मान्नास्त्यन्योऽज्ञः नापि तस्याज्ञानम्। एकैकं सर्वमोहजं चेत् नैकमोहक्षयादेकोऽपि मोहजोऽणुमात्रोऽपि नश्येत्। तद्धेतुसर्वमोहाक्षयात्, ततश्च सर्वमोहनाशादेव सहैव सर्वमुक्तिरिति स्यात्॥ इ. सि. पा. ३३२–३३९[1].

---

1. अत्र ग्रन्थविस्तरभिया सारमात्रं संगृहीतं प्रायशो ग्रन्थकृदक्षरानुकारेणेति ज्ञेयम्॥

यथासंगृहीतनानाविद्यावादखण्डनेन, इष्टसिद्धिनिर्माणकाले मण्डनवाचस्पतिप्रस्थानं बहुशाखोपशाखाभिः प्रवृद्धमासीदिति गम्यते। तर्कप्रधानैः प्रस्थानैः कस्यापि सिद्धान्तस्य न प्रतिष्ठेत्यपि स्फुटं भवति॥

अविद्या कस्य? – इति प्रश्नो भाष्येऽपि तत्र तत्रोत्थाप्य प्रत्युक्तः। जीवस्य वा ब्रह्मणो वा अविद्यादिसंसारः? – इत्याकारेण तु प्रश्नो नोपन्यस्त इति विशेषः। न ह्यद्वैतवेदान्तिसमये शङ्करानुसारिणि जीवब्रह्मणोर्भेद उपगम्यते। परं पूर्वपक्षिभिः प्रश्नोऽयं तत्र तत्रोपन्यस्यते 'कस्यायं संसारः?' 'कस्यायमप्रबोधः?' – इत्यादि। तत्र ब्रह्मणो नित्यशुद्धबुद्धमुक्तत्वाभ्युपगमात्, तस्य संसारित्वाद्यभावे कस्यान्यस्य स्यात्तत्? भवत्सिद्धान्ते ब्रह्मणोऽन्यस्य चेतनस्यानभ्युपगमात्, न कस्यापि संसार इति प्राप्नोतीत्यनिष्टापत्तिदर्शनार्थमेवायमपि क्लेश इति तत्र तत्र परिहारवचनादवगम्यते। तत्र कतिचिदुदाहरणान्यत्र वाचकानां परिशीलनाय प्रदर्श्यन्ते –

(अ) यदप्येकत्वात् ब्रह्मण आत्मान्तराभावात् शारीरस्य भोगेन ब्रह्मणो भोगप्रसङ्ग इति। अत्र वदामः – इदं तावद्देवानांप्रियः प्रष्टव्यः। कथमयं त्वया आत्मान्तराभावोऽध्यवसित इति। 'तत्त्वमसि', 'अहं ब्रह्मास्मि', 'नान्योऽतोऽस्ति विज्ञाता' इत्यादिशास्त्रेभ्य इति चेत्, यथाशास्त्रं तर्हि शास्त्रीयोऽर्थः प्रतिपत्तव्यः, न तत्रार्धजरतीयं लभ्यम्। शास्त्रं च 'तत्त्वमसि' इति अपहतपाप्मत्वादिविशेषणं ब्रह्म शारीरस्यात्मत्वेनोपदिशत् शारीरस्यैव तावत् उपभोक्तृत्वं वारयति। कुतस्तदुपभोगेन ब्रह्मण उपभोगप्रसङ्गः? अथागृहीतं शारीरस्य ब्रह्मणा एकत्वम्, तदा मिथ्याज्ञाननिमित्तः शारीरस्योपभोगः, न तेन परमार्थरूपस्य ब्रह्मणः संस्पर्शः॥

सू. भा. १-२-८, पा. ६९.

[परमार्थाद्वैतदृष्ट्या न कस्याप्यविद्यादिसंसार इत्युक्तं भवति॥]

(आ) कस्य पुनरयमप्रबोध इति चेत्, 'यस्त्वं पृच्छसि तस्य ते' इति वदामः। नन्वहम् ईश्वर एवोक्तः श्रुत्या, यद्येवं प्रतिबुद्धोऽसि, नास्ति कस्यचिदप्रबोधः॥ सू. भा. ४-१-३, पा. ४६५.

(इ) कः पुनरसौ श्वेतकेतुस्त्वंशब्दार्थः ? योऽहं श्वेतकेतुः, उद्दालकस्य पुत्रः–इति वेद, आत्मानमादेशं श्रुत्वा मत्वा विज्ञाय च, अश्रुतममतमविज्ञातं विज्ञातुं पितरं पप्रच्छ 'कथं नु भगवः स आदेशो भवति ?' इति । स एषोऽधिकृतः श्रोता मन्ता विज्ञाता तेजोबन्नमयं कार्यकरणसंघातं प्रविष्टा परैव देवता नामरूपव्याकरणाय आदर्श इव पुरुषः सूर्यादिरिव जलादौ प्रतिबिम्बरूपेण । स आत्मानं कार्यकरणेभ्यः प्रविभक्तं सद्रूपं सर्वात्मानं प्राक् पितुः श्रवणान्न विजज्ञौ । अथेदानीं पित्रा प्रतिबोधितः तत्त्वमसीति दृष्टान्तैर्हेतुभिश्च तत्पितुरस्य ह किल उक्तं सदेवाहमस्मीति विजज्ञौ ॥

छां. भा. ६–१६–३, प्र. पा. ५३९.

[अज्ञानदशायामेव ज्ञानाज्ञानव्यवहार इत्युक्तं भवति ॥]

(ई) अत्राह – सा अविद्या कस्येति ? यस्य दृश्यते तस्यैव । कस्य दृश्यत इति ? अत्रोच्यते – अविद्या कस्य दृश्यत इति प्रश्नो निरर्थकः । कथम् ? दृश्यते चेदविद्या, तद्वन्तमपि पश्यसि । ... अप्रत्यक्षेण अविद्यावता अविद्यासंबन्धे ज्ञाते किं तव स्यात् ? अविद्याया अनर्थहेतुत्वात् परिहर्तव्या स्यात् । यस्याविद्या स तां परिहरिष्यति । ननु ममैवाविद्या । जानासि तर्हि अविद्यां तद्वन्तं चात्मानम् ॥ गी. भा. १३–२, पा. १९५, १९६.

(ए) यदि पुनरविद्या ज्ञेया अन्यद्वाज्ञेयम्, ज्ञेयमेव ; तथा ज्ञातापि ज्ञातैव, न ज्ञेयं भवति । यदा चैवम् अविद्यादुःखिल्वाद्यैः ज्ञातुः क्षेत्रज्ञस्य न किञ्चिद् दुष्यति ॥ गी. भा. १३–२, पा. १९६.

यथोदाहृतैर्वाक्यैरिदमवगम्यते यदविचारदशायाम् अविद्या जीवस्यैव, यो मन्यते 'नाहं परमात्मानं वेद' इति । विचारात् परं तु सर्वस्यापि स्वात्मनो नित्यशुद्धबुद्धमुक्तत्वावगमात् नाविद्यावत्त्वमस्ति कस्यचिदपीति । यत्रापि क्वचिद्ब्रह्मण एवाविद्येति भणन्तीव वाक्यानि दृश्यन्ते, तत्रापि जीवाश्रिताविद्यावाद एवेष्ट इत्यवसीयते । तद्यथा –

(ओ) न ब्रूमः शुक्तिकायामिव ब्रह्मण्यतद्धर्माध्यारोपणा नास्तीति, किं तर्हि न ब्रह्म स्वात्मन्यतद्धर्माध्यारोपनिमित्तम् अविद्याकर्तृ चेति । भवत्वेवं नाविद्याकर्तृ भ्रान्तं च ब्रह्म । किं तु नैवाब्रह्म अविद्याकर्ता चेतनो भ्रान्तोऽन्य इष्यते ॥ बृ. भा. १–४–१०, पा. ६७०.

(औ) ब्रह्मणि साधकत्वकल्पना अस्मदादिष्विव अपेशला तदात्मानमेवावेत् तस्मात् तत्सर्वमभवत् – इति, इति चेत् । न । शास्त्रोपालम्भात् । न ह्यस्मत्कल्पनेयम् । शास्त्रकृता तु ॥ बृ. भा. १-४-१०, पा. ६७२.

(क) न चैतावत्येव अक्षमा युक्ता भवतः । सर्वं हि नानात्वं ब्रह्मणि कल्पितमेव ॥ बृ. भा. १-४-१०, पा. ६७२.

(ख) इदं शरीरस्थं यद् गृह्यते अग्रे प्राक् प्रतिबोधादपि ब्रह्मैवासीत्, सर्वं चेदम् । किं तु अप्रतिबोधात् 'अब्रह्मास्मि', 'असर्वं च' – इत्यात्मन्यध्यारोपात् 'कर्ताहं, क्रियावान्, फलानां च भोक्ता, सुखी, दुःखी संसारी' इति चाध्यारोपयति । परमार्थतस्तु ब्रह्मैव तद्विलक्षणं सर्वं च । तत् कथञ्चित् आचार्येण दयालुना प्रतिबोधितं नास्ति संसारीति, आत्मानमेवावेत् स्वाभाविकम् । अविद्याध्यारोपितविशेषवर्जितम् इति एवशब्दस्यार्थः ॥

बृ. भा. १-४-१०, पा. ६७२.

अत्र सर्वत्रापि अविद्यादशायां तदपगमदशायां च निर्विशेषं निरविद्यमेव ब्रह्म नित्यशुद्धम्; तस्य चाविद्यादशायामविद्याश्रयत्वमिव भवति, विद्यया तदपगमे तु नित्यशुद्धबुद्धमुक्तस्वभाव एवाहमिति विज्ञायते – इत्येवार्थोऽवसीयते । अविद्या च नित्यनिर्विशेषे नैसर्गिकं सविशेषत्वाध्यारोपणमेव भ्रान्त्यपराभिधानम्; न तु भ्रान्तेरस्याः क्वचित् कार्यत्वं स्वविलक्षणानिर्वचनीयाज्ञानोपादानकत्वं ब्रह्माश्रितत्वं वा श्रूयते विवक्ष्यते वा भाष्ये–इति स्पष्टम् ॥

शब्दब्रह्माद्वैतनिरासः –

२३१. असद्वादनिरासप्रकरणे 'नाभिन्नेऽसति वा वाच्ये वाच्यवाचकते यतः' (इ. सि. १-७२) इति वाच्याभावे वाचकोऽपि न स्यात् । वाच्यवाचकयोरप्यबोधे तथा, न हि वक्तैव उच्यते – इति दोष उद्घाटितः । तत्र प्रसङ्गेन शब्दः स्वयमेव वाच्यो वक्ता च – इति वादिनां वैयाकरणानां शब्दाद्वैतवादो निराकृत इष्टसिद्धौ ॥

(१) यदा हि स वक्ता स्यात् तदा वक्तृत्वेनैव समाप्तत्वात् तस्य शब्दस्य न तद्वाच्यत्वम् । यदापि वाच्यः, तदापि वाच्यत्वेनैव समाप्तत्वात् न तस्य तद्वक्तृता । अतो नोभयं युगपत् क्रमेण वा एकस्यैव संभवेत् । ध्वनेरेकोंऽशो वक्ता, अन्यो वाच्यः – इति चेत्, तदापि वक्त्रंशस्य न वाच्यता स्यात्, वाच्यांशस्य च न वक्तृता ॥ इ. सि. पा. १७०.

(२) ननु 'शब्दः', 'ध्वनिः', 'अभिधा', 'वाचकः' इत्यादयः शब्दाः स्वात्मानमपि वदन्तीति चेत्, तथाप्यन्यं वदन्त एव स्वात्मानमपि वदन्तीति शब्दवाच्या अपि ते नात्यन्तमभिन्नार्थाः । अर्थवाच्यास्तु घटादि-शब्दा नात्मानं स्पृशन्ति । अतो वक्तृवाच्ययोः शब्दार्थयोर्भेदसिद्धेः शब्द एव स्वयं वाच्य इत्यप्ययुक्तम् ॥ इ. सि. पा. १७०.

(३) अतो न शब्दाद्वैतसिद्धिः, शब्दार्थराश्योर्वाचकतद्वाच्ययो-र्भेदात् । अभेदेऽपि तयोः सर्वार्थानां तत्तच्छब्देभ्योऽभेदात्, तेषामपि तद्वाचकाच्छब्दशब्दादभेदः स्यात् । अतश्च इन्द्रियमनोबुद्ध्यात्मार्थानां तच्छब्दानां च शब्दशब्दादनन्यत्वात् तस्य च जडत्वात् न किञ्चित् प्रकाशेत । अजडात्माभेदात् आत्मशब्दोऽप्यजड एवेति चेत्, तर्हि शब्दार्थ-योरभेदात् शब्दस्यार्थभावः न पुनरर्थस्य शब्दभावः ॥

इ. सि. पा. १७०–१७१.

[अनेन 'वाग्रूपाधीनमेव चितश्चितित्वम् । वाक्शक्तिरेव वा चितिः' (ब्र. सि. 19) इति मण्डनमतं तुलयितव्यम् ॥]

(४) असच्छब्दे असत् कल्पितमिति तत्रैवासद्व्यवहार इति चेत्, तर्हि नाभिन्नं शब्दात् । असदभेदे शब्दस्यापि कल्पितत्वम्, असतोऽप्य-कल्पितत्वं वा स्यात्, अतश्च द्वयोरपि कल्पितत्वमकल्पितत्वं वा इति शब्दे असत् कल्पितमित्ययुक्तम् । अर्थ एव कल्पितः, न शब्द इति चेत् । तर्हि तयोरभेदो न युक्तः कल्पिताकल्पितयोः ॥ इ. सि. पा. १७१.

(५) यद्यपि वाच्यवाचकौ मिथो भिन्नावेव कल्पितौ, तथापि तयोः शब्दब्रह्मविवर्तत्वात् । .... तदभेदात् तयोः शब्दत्वोपपत्तेः शब्द एव वाच्यो वाचकश्चेति नायुक्तम् इति चेत्, मैवं मंस्थाः । कल्पिताकल्पितयो-रभेदायोगात्, ब्रह्मणश्च शब्दत्वे प्रमाणाभावात् ॥ इ. सि. पा. १७२.

(६) न च शब्दो ब्रह्मेति श्रुतिरस्ति । यदि नामास्ति तथापि सा अन्यपरा । .... 'यद्वाचानभ्युदितं येन वागभ्युद्यते', 'यच्छ्रोत्रेण न

शृणोति', 'अशब्दमस्पर्शम्' इत्यादेर्न शब्दो ब्रह्म, नापि शब्दवदिति श्रुतम् । .... अतो ब्रह्मविवर्तत्वेऽपि जगतोऽशब्दविवर्तत्वात् 'ब्रह्मैवेदम्', 'आत्मैवेदम्' इतिवत् शब्द एव वाच्यो वाचकश्चेत्ययुक्तं वक्तुम् । अतो न शब्दाद्वैतसिद्धिः ॥ इ. सि. पा. १७४.

साध्वेवेदं शब्दब्रह्मवादखण्डनम् । परं 'नामरूपे व्याकरवाणि' इति श्रुतेः शब्दार्थयोरुभयोरपि आत्मचैतन्यविषयत्वेन अनुभूयमानत्वात्, न तयोरन्यतरस्यापि स्वेन रूपेण ब्रह्मत्वम् । अत एव उभयोरपि ब्रह्मणि कल्पितत्वात् शब्दार्थरूपेण प्रतिभासमात्रं ब्रह्मणो व्यवहारे, तयोस्तत्त्वं तु तदुभयविलक्षणं ब्रह्मेति भाष्यकाराः –

(1) न च ब्रह्मणोऽन्यत् नामरूपाभ्यामर्थान्तरं संभवति, सर्वस्य विकारजातस्य नामरूपाभ्यामेव व्याकृतत्वात् ॥

सू. भा. १-३-४१, पा. १४२.

(2) सदेव तु सर्वमभिधानम् अभिधीयते च यदन्यबुद्ध्या । यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते यथा वा पिण्डघटादि मृदोऽन्यबुद्ध्या पिण्डघटादिशब्देनाभिधीयते लोके । रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धी निवर्तेते, यथा च मृद्विवेकदर्शिनां घटादिशब्दबुद्धी । तद्वत् सद्विवेकदर्शिनाम् अन्यविकारशब्दबुद्धी निवर्तेते ॥ छां. भा. ६-२-३, पा. ५१०.

(3) अभिधानाभिधेययोरेकत्वेऽपि अभिधानप्राधान्येन निर्देशः कृतः, 'ओमित्येतदक्षरमिदं सर्वम्' इत्यादि । अभिधानप्राधान्येन निर्दिष्टस्य पुनरभिधेयप्राधान्येन निर्देशो अभिधानाभिधेययोरेकत्वप्रतिपत्त्यर्थः । ... एकत्वप्रतिपत्तेश्च प्रयोजनम् अभिधानाभिधेययोरेकेनैव प्रयत्नेन युगपत् प्रविलापयन् तद्विलक्षणं ब्रह्म प्रतिपद्येतेति ॥ मां. भा. अव. २, पा. १७८.

भावाद्वैतवादस्वीकारः –

२३२. भावाद्वैतवाद इष्टसिद्धेरिष्ट इति भाति । यत आह –

(१) ननु मयोक्तं 'सच्च, असच्च', न तु सदेव सर्वम् इति । मैवं वोचः । असति द्वितीये तत्समुच्चयार्थस्य चकारस्यानुपपत्तेः । असतश्च अवाच्यत्वात्, तत्र शब्दाप्रवृत्तेरुक्तत्वात् ॥ इ. सि. पा. १६८.

(२) यदि असदपि सतो द्वितीयं स्यात्, सद् वा असतः, तदा तृतीयं चतुर्थं परार्धसंख्यापूरकं च स्यात्। तद्विशेषाभावात्। असतो भेदाभावात् न तृतीयादिभाव इति चेत्, न द्वितीयभावोऽप्यत एव। न ह्यभिन्नं द्वितीयं स्यात्। सतोऽसत् द्वितीयं स्यात्, न त्वसत इति चेत्, न। अविशेषात्॥ इ. सि. पा. १६९.

(३) सोऽन्याभाव आत्मैव चेत्, उक्तो दोषः। अन्यश्चेत् अद्वैतहानिः – इति चेत्, किं तदद्वैतं यदन्याभावविरोधि? आत्मैव चेत्, सोऽज्ञानतत्कार्यैश्चाविरुद्धः; सुतरां तदभावेन। अस्यैव द्वैतरहितत्वम् अद्वैतम् इति चेत्। तदप्यात्मैव चेत् तन्न जातु विरुद्धम्; अन्यथा न जातु बन्धः। ज्ञानदग्धाविद्यातज्जद्वैतत्वम् अद्वैतम् इति चेत्। तदाहोऽपि आत्मैव चेत् उक्तो दोषः; अन्यश्चेत् तवाप्यद्वैतविरोधः। उक्तदोषप्रसङ्गात् नात्मैव तदाह इति तत्रान्यत्ववाचोयुक्तिः, न पुनरन्यत्वविवक्षया सर्वान्यदाहस्यान्यत्वायोगादिति चेत्। तर्हि सर्वान्यभावेनापि नाद्वैतविरोधः॥

इ. सि. पा. ३६६.

मण्डनोऽपि भावाद्वैतमनुमन्यते इव (ब्र. सि. 4)। परं तदेव स्वमतमिति स्वीकृतवान् इति तु विप्रतिपत्तिस्थानम् इत्युक्तं प्राक् (खं. १०२, पा. २०८)। इष्टसिद्ध्यां तु स्पष्टमेवाभावेन नाद्वैतविरोध इत्युक्तमत्र। तत्र यद्ययमेव परमसिद्धान्तः, अभावो नाद्वैतं विहन्तीति भावाद्वैतमेव मतमिति च, तर्हि निर्विशेषत्वमद्वितीयत्वं चोपचरितमेव स्यात्। अद्वैताविघातकाभावेनापि सविशेषत्वस्य यस्यकस्यचिदभ्युपगन्तव्यत्वात्। अथ ज्ञानदग्धाविद्यातज्जद्वैतत्वमद्वैतमिति चेत्, तर्हि न निरुपचरितमद्वैतत्वं स्यात्। न हि व्यावहारिकाविद्यातत्कार्यादिव्यतिरेकेण अद्वैतविघातकृदन्यत् समस्ति वेदान्तनये। उपदेशार्थमेव हि विद्याविद्याविभागः क्रियते वेदान्तेष्विति। आत्मैव चेत् अज्ञानहानिः, सा सदा अस्तीति बन्धाभावः सदैव स्यादिति बिभीषिका त्वकिञ्चित्करी। यस्मात् अज्ञानतद्धानी आत्मैव, सदापि बन्धाभाव एव इति विनिश्चय एव खल्वज्ञानहानिर्नाम नापरेति। अत्रानुसंधेयमिदं भाष्यवाक्यम् –

(१) नन्वहमीश्वर एवोक्तः श्रुत्या । यद्येवं प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रबोधः । योऽपि दोषश्चोद्यते कैश्चित् अविद्यया किलात्मनः सद्वितीयत्वाद् अद्वैतानुपपत्तिरिति सोऽप्येतेन प्रत्युक्तः ॥ सू. भा. ४-१-३.

यथा ब्रह्मण एव सतोऽप्रबुद्धत्वं न दोषाय, अप्रबोधकल्पितत्वात् अप्रबुद्धत्वस्य, एवमेव अविद्यया सद्वितीयत्वमपि न दोषाय, अविद्याकल्पितत्वादेवाविद्यावत्त्वस्येत्यर्थः । एतद्दृष्ट्या न भावो न चाभावोऽस्ति अद्वैतविरोधी । अविद्याकल्पितत्वादेव भावाभावयोः, वस्तुतश्च नित्यनिरस्तभावाभावविभागत्वादद्वैतात्मन इति द्रष्टव्यम् ॥

परमतोत्थापिताक्षेपपरिहाराः–

२३३. अन्यथास्यातिरपि मायां विना न सिध्यतीति प्रतिज्ञाय 'अन्यस्यान्यथाभावो युज्यते न वा?' इत्येतद् विमर्शयितुं पूर्वपक्ष उद्भाव्य निरस्त इष्टसिद्धौ –

ननु यद्यन्यथाभावो नास्ति शास्त्रमनर्थकम् ।
कर्मणा विद्यया वा किं तदवस्थः पुमान् यदि ॥ इ.सि. २-६४.
देवो भूत्वा ब्रह्म वेद ब्रह्मैव भवतीत्यपि ।
श्रुतोऽन्यस्यान्यथाभावो यं यं वापीति च स्मृतिः ॥ २-६५.

इति पूर्वः पक्षः ।

उच्यतेऽविद्यया सिद्धमन्यथाभावमिच्छताम् ।
व्यनक्ति साधनं शास्त्रं तयोः सत्तां व्यनक्ति न ॥ २-६६.

इति सिद्धान्तः । कूटस्थस्य कर्तृत्वाद्यन्यथाभावः कथमित्याशङ्क्य परिहारः –

स्थास्नोरप्यन्यथाभावः पुंसो भ्रान्त्यैव संभवेत् ।
देहाद्भिन्नोऽपि जन्मादीनात्मीयान् मन्यते यथा ॥ २-६७.
यदि पुंसोऽन्यथाभावः कर्मणा विद्ययापि च ।
पुंसस्ताभ्यां फलं किं स्यान्नात्मनाशोद्भवौ फलम् ॥ २-६८.

इति । अध्यारोपदृष्ट्यैव क्रियाकारकफलभेदबुद्धिः, तामनुसृत्यैव कर्मोपासनादिविधानम् इति वेदान्ताभियुक्तप्रक्रियानुसार्येवायं परिहार इति न किञ्चिदत्र वक्तव्यमस्ति ॥

एवं ब्रह्म जीवेभ्यो जगतश्च भिन्नाभिन्नम् इति भास्करमतमप्यत्र निराकृतम् ; भाट्टसंमतभेदाभेदवादः, भावान्तरमेवाभावो नामेति वादश्च तत्र तत्र खण्डितः। (इ. सि. पा. २४१, ३५९, २२२–३१६, ५२, ६०, २९५, ३६७, २४२–२४३, २४८–२४९, ३५९) ग्रन्थविस्तरभिया नात्र तद्युक्तयः प्रदर्श्यन्ते। प्रकृतप्रक्रियया अविरुद्धत्वात् भेदाभेदखण्डनस्य, वेदान्तादृतप्रक्रियानिर्धारणे केवलयुक्तिपरीक्षणस्यानुपयोगाच्चेति ज्ञेयम् ॥

एवं द्वैतशङ्कापरिहारग्रन्थोऽपि न विस्तरेण विचार्यते उक्तहेतोरेव –

> तस्मादयुक्तमैकात्म्यं ज्ञानाज्ञानाव्यवस्थितेः।
> गुरुशिष्याव्यवस्थानान्मुक्तामुक्ताव्यवस्थितेः ॥
> अतः पुंभेद एष्टव्यो द्वैतं च परमार्थसत्।
> तद्भावे गुरुशिष्यादिव्यवस्था युज्यते यतः ॥ इ.सि. ७–१०, ११.

इति शङ्कायाम्।

> उच्यते दोषतो नास्मान्मुक्तिः पुंसु बहुष्वपि।
> इष्टेष्वैकात्म्यमेवातो न्याय्यत्वादभ्युपेयताम् ॥

इति (इ. सि. ७–१२) परिहारः ॥

एवं चार्वाकाक्षेपपरिहारोऽपि नात्र परीक्ष्यते। उक्तहेतोरेव ॥

उपसंहारः –

२३४. अयमत्र संक्षेपः। अनुभूतिः स्वतःसिद्धेति प्रतिज्ञया तदनुभाव्यजगतोऽनिर्वाच्यत्वसाधनेनैवाद्वैतसिद्धान्तस्तर्केण प्रतिपिपादयिषितोऽस्मिन् ग्रन्थे। तर्करसिकता च तावदातता अस्मिन् प्रकरणे यावता स्वतःसिद्धतामपि हेतूपन्यसेनैव साधयितुं प्रयत्यते 'अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गात्' इति परवाद्यनिष्टप्रसञ्जकतर्काहरणेन। ब्रह्माश्रिताविद्यामायाकार्यं जगत्, शास्त्रजन्यब्रह्मात्मस्वरूपज्ञानान्मोक्षः इति च

ग्रन्थकृदभिमता प्रक्रिया । यद्यप्यविद्योपादानकप्रपञ्चवादः पञ्चपादिका-कारेणैवोपस्थापितः, तथापि जडाश्रिताविद्यानिरासः, शुक्तिरजतदृष्टान्तेनै-वानिर्वचनीयाविद्यासाधनम्, माययैव सर्वविधभेदविभागव्यवस्थापनम्, प्रमाणप्रमेयव्यवहारस्य स्वप्नदृष्टान्तेनोपपादनम्, यत्र यत्र युक्तिविरोधः, तत्र तत्र सर्वत्रापि 'मायिकत्वान्न दोषः' इति युक्तिब्रह्मास्त्रप्रयोगः—इत्येते विशेषाः इष्टसिद्धावेव सुस्फुटं वैशद्येन दृश्यन्ते प्रप्रथमम् । प्रतिवादि-वाक्स्तम्भने यथा तथा स्वसिद्धान्तमण्डनेऽपि केवलतर्कस्यैवानुभवा-नपेक्षयैव भूरिश आदानमत्र प्रस्थाने दृश्यते । अद्वैतज्ञानस्यापरोक्षरूपस्य शास्त्रजन्यत्वादरणेन यद्यपि मण्डनाद्यादृतज्ञानाभ्यासवादो दूरीकृतः, तथापि जीवन्मुक्तेऽपि अविद्यालेशाभ्युपगमेन, विदेहमुक्तिरेवात्यन्तिकी सर्वथा अविद्याविरहिता—इत्यत्र विचारपर्यवसानात् ज्ञानफलमद्वैतात्मप्राप्तिरित्येतत् शास्त्रगम्यमेव—इत्यर्थात् स्वीकृतं भवत्यत्र । एवं च अध्यारोपापवाद-प्रक्रियामभिभूय कार्यकारणवादप्रक्रियैव अनिर्वचनीयवादसमर्थनमिषेणात्र विजयते इत्यकामैरप्यद्वैतिभिरभ्युपेयं संपन्नमित्यहो मायाविलासः ! ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्त-वेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

इष्टसिद्धिप्रक्रियापरीक्षा नाम एकादशः काण्डः

---

१२. विवरणप्रस्थानपरीक्षा

ग्रन्थसंबन्धः–

२३५. इष्टसिद्धौ अविद्योपादानवादः, ख्यातिबाधनिरूपणं चेति द्वयमेव प्राधान्येन विचिन्तितम् । प्रकाशात्मविरचिते पञ्चपादिकाव्याख्यानेऽस्मिन् तदुक्तानुक्तदुरुक्तचिन्तनं विस्तरेण कृतमिति 'पञ्चपादिकावार्तिकम्' इत्यपि नामान्वर्थं भवेदस्य ग्रन्थस्य । तथापि इष्टद्वयादृतयुक्तीः संक्षिप्य नवीनयुक्त्युपबृंहणपूर्वकं पञ्चपादिकादृतवेदान्तप्रक्रियासर्वस्वसमर्पणेन, ग्रन्थप्रणयनकालं यावत् प्रचलितसर्वाद्वैतप्रक्रियाणां समाहरणात् अनिर्वचनीयाविद्याप्रक्रियानुगुणविविधवादानां स्वोपज्ञानां सविस्तरम् उपन्यासाच्च ग्रन्थकाराः '**विवरणाचार्या**' इत्येव प्रथां गताः । एतैर्ग्रन्थकर्तृभिः **शारीरकन्यायसंग्रहशब्दनिर्णयादयोऽन्येऽपि निबन्धा** विरचिता इति श्रूयते । परमत्र पञ्चपादिकाव्याख्याने दृश्यमाना एव वादा विवरणप्रस्थानीयत्वेन परिभाष्यन्ते इति बोध्यं पाठकैः ॥

मिथ्याज्ञानोपादनकोऽध्यासः –

२२६. पञ्चपादिकाव्याख्याने प्रवृत्तोऽप्ययं ग्रन्थो बहुत्र संगृह्णातीष्टसिद्धिसमादृतविचारसरणिमिति तत्र तत्रोभयग्रन्थपत्रपार्श्वपरामर्शपूर्वकं प्रदर्शयिष्यामः ॥

'मिथ्याज्ञाननिमित्तः' (अध्यासः) इति भाष्यवाक्यं 'मिथ्या च तदज्ञानं च मिथ्याज्ञानम्' – इति विगृह्य 'मिथ्येति अनिर्वचनीयता उच्यते, अज्ञानम् इति जडात्मिका अविद्याशक्तिः' (पं. पा. ४) इति लिखितं टीकायाम् । विवरणे तु –

(१) तत्र 'अज्ञानम्' इत्युक्ते ज्ञानाभावमात्रमुक्तं स्यात् ; मिथ्या इत्युक्ते भ्रान्तिज्ञानम् इति स्यात् । तदुभयव्यावृत्त्यर्थं निरुच्य पदार्थौ दर्शयति । 'मिथ्या च तद्ज्ञानं च' इत्यादिना ॥ पं. वि. ११.

[अत्र टीकायां मिथ्यापदमनिर्वचनीयवक्तृ, अज्ञानपदं च जडशक्तिवाचकम् इत्युक्तम् । विवरणे तु इष्टसिद्धिमनुसृत्य (इ. सि. पा. ४८, ६५) भ्रान्तिज्ञानाभावनिरासार्थे द्वे पदे इति व्याख्यातम् । उभयत्रापि च मिथ्याज्ञानस्याध्यासलक्षणस्यैव प्रकृतस्य वाक्यशेषे चाक्षेपपरिहाराभ्यां निर्णेष्यमाणस्य हानम्, अप्रकृतस्य भाष्ये क्वचिदप्यश्रुतचरस्य प्रक्रिया चेति दोषौ अपरिहार्यौ ॥]

(२) ननु कथं मिथ्याज्ञानम् अध्यासस्योपादानम् ? तस्मिन् सति अध्यासस्योदयात्, असति चानुदयात्–इति ब्रूमः । नन्वध्यासस्य प्रतिबन्धकं तत्त्वज्ञानं तद्भावश्चाज्ञानमिति प्रतिबन्धकाभावविषयतया अज्ञानस्याध्यासेनान्वयव्यतिरेकौ अन्यथासिद्धौ । नैतत् सारम् । पुष्कलकारणे हि सति कार्योत्पादविरोधि प्रतिबन्धकम् । न च अध्यासपुष्कलकारणे सति तत्त्वज्ञानं कार्यप्रतिबन्धकतया ज्ञायते । किं तु असत्येवाध्यासकारणे तत्त्वज्ञानोदयः । तस्मात्, नाज्ञानान्वयव्यतिरेकौ प्रतिबन्धकाभावविषयौ । तथापि विरोधिसंसर्गाभाव इति चेत्, न । कार्यस्य कारणापेक्षा हि प्रथमम् उत्पद्यते, न विरोधिसंसर्गाभावापेक्षा । तस्मात् प्रथमापेक्षितकारणक्लृप्तिमेवान्वयव्यतिरेकौ न्यायसहितौ कुर्वाते ॥ पं. वि. पा. ११.

[अत्राज्ञानान्वयव्यतिरेकेणाध्यासान्वयव्यतिरेकोक्तिरिष्टसिद्ध्यनुसारेण (इ. सि. पा. ४८), अज्ञानस्याभावत्वनिरासश्च (इ. सि. पा. ६५–६७) तस्य प्रतिबन्धकाभावत्वेन शङ्का तु स्वोपज्ञा ॥].

(३) ननु क्लृप्तं विषयेन्द्रियादिदोषः कारणमिति । सत्यम् । निमित्तं तु तत् । उपादानापेक्षायाम् अज्ञानमनुप्रविशति । सर्वं च कार्यं सोपादानम् । भावकार्यत्वात्, घटादिवत्–इत्यनुमानात् ॥

पं. वि. पा. ११–१२.

[इदमपि इष्टसिद्ध्यनुसार्येव (इ. सि. ४८) दोषसापेक्षतावचनं तु टीकोक्तम् ॥]

(४) मिथ्यार्थतज्ज्ञानात्मकं मिथ्याभूतमध्याससमुपादानकारणसापेक्षं प्रति अनाश्रयस्थानतया काचादिनिमित्तकारणेषु भिद्यमानेषु मिथ्याभूतस्यैव

1. अत्र सर्वत्र विवरणपुटसंख्या एव निर्दिष्टाः 'पं. वि.' इति ॥

सर्वकार्यस्वभावानुकूलस्य सर्वत्रानुगमात्, अज्ञानस्यात्माश्रयतया भ्रान्तिज्ञानाश्रयकोटिनिक्षिप्तत्वाच्च मिथ्याज्ञानमेवाध्यासोपादानं नात्मान्तःकरणकाचादिदोषा इति सूक्तम् ॥ पं. वि. १२ ; इ. सि. ५६.

अविद्यास्वरूपसिद्धिः –

२३७. पञ्चपादिकोक्त एवाविद्याशक्तिसिद्धिप्रकार आदृतोऽत्र । तत्र 'अवश्यमेषा अविद्याशक्तिर्बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या ; अन्यथा मिथ्यार्थावभासानुपपत्तेः' (पं. पा. ४) इति, विद्यत एवात्रापि अग्रहणाविद्यात्मको दोषः (पं. पा. १४) इति च टीकायाम् श्रुत्यर्थापत्तिदृष्टार्थापत्ती एव प्रमाणत्वेनोदाहृते । विवरणे तु, 'अवश्यम्' इत्यनुमानम्, 'एषा' इति प्रत्यक्षं प्रमाणं सूचितमित्यधिकावापः कृतः –

(१) प्रत्यक्षं तावद् 'अहमज्ञः', 'मामन्यं च न जानामि' इत्यपरोक्षावभासदर्शनात् । ननु ज्ञानाभावविषयोऽयम् अवभासः । न । अपरोक्षावभासत्वात् 'अहं सुखी' इतिवत् । अभावस्य च षष्ठप्रमाणागोचरत्वात् । प्रत्यक्षाभाववादिनोऽपि नात्मनि विज्ञानाभावावगमः संभवति । 'मयि ज्ञानं नास्ति' इति प्रतिपत्तौ आत्मनि धर्मिणि प्रतियोगिनि चार्थे अवगते तत्र ज्ञानसद्भावाद् ज्ञानाभावप्रतिपत्त्ययोगात् ; अनवगतेऽपि धर्म्यादौ सुतराम् अभावानवगमात् । षष्ठप्रमाणगोचरे फललिङ्गाभावानुमेयेऽपि ज्ञानाभावे आत्मादौ अवगतेऽनवगतेऽपि आत्मनि ज्ञानाभावप्रतिपत्त्ययोगात् । इह च 'त्वदुक्तमर्थं सङ्ख्यां वा शास्त्रार्थं वा न जानामि'-इति विषयव्यावृत्तमज्ञानम् अनुभूय तच्छ्रवणादौ प्रवर्तते ॥ पं. वि. १२ ; इ. सि. २८८, ३०५.

[इष्टसिद्ध्याशयोऽत्र युक्त्या समुपष्टम्भितः ॥]

(२) भावरूपाज्ञानप्रत्यक्षवादे तु सत्यप्याश्रयप्रतियोगिज्ञाने ज्ञानाभावस्येव भावान्तरस्यापि नानुपपत्तिर्नियन्तुं शक्यते । न चाश्रयप्रतियोगिज्ञानभूतमपि साक्षिचैतन्यं भावान्तरस्याज्ञानस्य निवर्तकम् । तस्याज्ञानविषयप्रतिभासत्वात् । न हि स्वज्ञानेनैव स्वयं निवर्तते । ननु अज्ञानस्य व्यावर्तको विषयः कथं साक्षिचैतन्येनावभास्यते ? प्रमाणायत्तत्वाद् विषयसिद्धेरिति । उच्यते । सर्वं वस्तु ज्ञाततया वा अज्ञाततया वा साक्षिचैतन्यस्य विषय एव । तत्र ज्ञाततया विषयः प्रमाणव्यवधानम् अपेक्षते, अन्यस्तु सामान्याकारेण

विशेषाकारेण वा अज्ञानव्यावर्तकतया सदा भासते इत्युपपत्तिसहितम् अज्ञानप्रत्यक्षं भावरूपमेवात्मनि अज्ञानं गमयतीति सिद्धम् ॥

पं. वि. १२-१३.

[इयं स्वोपज्ञा स्वोत्प्रेक्षिताक्षेपप्रतिक्षेपिका च परिहृतिः । अज्ञानस्य प्रत्यक्षसिद्धत्वं कथं वादग्रस्तमभूदिति नोक्तमत्र ॥]

(३) अनुमानमपि विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्त-स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हति । अप्रकाशि-तार्थप्रकाशकत्वात् । अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्-इति । ततश्च ज्ञानेन समानाश्रयविषयं भावरूपम् अज्ञानं सिद्धम् ॥ पं. वि. १३.

(४) विशुद्धब्रह्मात्मनि शुक्तिकायां च अहङ्काररजताध्यासस्य अर्थ-ज्ञानात्मकस्य मिथ्याभूतस्य मिथ्याभूतमेव किञ्चिद् उपादानम् अन्वेषणीयम् । सत्योपादानत्वे कार्यस्य कारणस्वभावतया अध्यासस्यापि सत्यत्वप्रसङ्गात्, तस्यापि मिथ्योपादानस्य सादित्वे तथाविधोपादानान्तरकल्पनाप्रसङ्गात्, अनाद्येव तन्मिथ्योपादानम् इति कल्पनीयम् । यच्चानादि स्वयं मिथ्या मिथ्योपादानम् आत्मसंबन्धि च तदज्ञानमिति मिथ्याध्यास एव तथा-विधाज्ञानोपादानं कारणमन्तरेणानुपपद्यमानः, तत्कल्पयतीत्युक्तम् ॥

पं. वि. १३ ; इ. सि. ४७, १८.

(५) न तावत् सुषुप्तादौ स्वयंप्रकाशब्रह्मस्वरूपानवभासः, पुरुषान्तर-संवेदनवद् द्रष्टुर्भिन्नत्वादिति शक्यं वक्तुम् । एकत्वश्रुतेः । नापि मिथ्याज्ञान-प्रतिबन्धात् । तत्र तस्याभावात् । नापि तत्संस्कारप्रतिबन्धात् । भ्रान्ति-संस्काराणां तत्त्वावभासप्रतिबन्धकत्वाभावात् ; सत्स्वपि रजतभ्रमसंस्कारेषु शुक्तिकावबोधदर्शनात् । नाप्यग्रहणप्रतिबन्धात् । स्वरूपग्रहणस्य नित्यत्वात् । स्वयंप्रकाशमाने संवेदने तद्विषयकादाचित्काग्रहणस्याप्रतिबन्धकत्वात् । नापि कर्मणां स्वरूपावभासविरोधिता । सर्वदा अणुमात्रस्यापि चैतन्यस्य अनवभासप्रसङ्गात् । अज्ञानेऽपि तुल्यम् इति चेत् । न । तस्य स्वविषय-चैतन्यावभासं प्रति अप्रतिबन्धकत्वात् । ... तस्मात् सुषुप्तादौ स्वरूपानव-भासव्यवहारोऽग्रहणमिथ्याज्ञानतत्संस्कारकर्मभ्योऽन्यदेव किञ्चित् प्रति-बन्धकम् अज्ञानं कल्पयति ॥ पं. वि. १६.

[संस्कारशेषं तिष्ठत्यज्ञानं सुषुप्तादौ – इति टीका (पं. पा. ५) यथाश्रुता संस्कारस्येवाज्ञानत्वं प्रसज्जयेत् इति भीत्या 'संस्कारशेषं तिष्ठति, न संस्कारादय एवाज्ञानम्' (पं. वि. १६) इति विवरणे व्याख्यातम् । सुषुप्तादौ स्वयंप्रकाश-

ब्रह्मस्वरूपानवभासव्यवहारो यत्र जागरिते, यदध्यासप्रतिबन्धात्, सोऽध्यास-स्तत्र विद्यत एव । सुषुप्ते तु सत्यपि स्वरूपप्रतिष्ठत्वे ज्ञानसामग्र्याद्यभावादेव तदज्ञानमिति कुतो न स्यादित्याक्षेपस्तु अत्र नालोचितः ॥]

(६) सुषुप्ते मिथ्याज्ञानाभावाद् तत्संस्कारस्य चाप्रतिबन्धकत्वात् कादाचित्कग्रहणाभावस्य च स्वतःसिद्धग्रहणविरोधित्वाभावात् स्वरूपचैतन्ये-नैव ब्रह्मस्वरूपावभासे प्राप्ते तदवभासप्रतिबन्धनिमित्तमनृतं दर्शयति 'अनृतेन हि प्रत्यूढाः', 'त इमे सत्याः कामाः अनृतापिधानाः' इति । ततश्च मिथ्याज्ञानतत्संस्काराग्रहणकर्मभ्यो व्यतिरिक्तम् अनवभासनिमित्तम् अनृतं मिथ्यावस्तु सिद्धम् ॥ पं. वि. ४२.

[अत्र सर्वदा स्वरूपप्रतिष्ठे एवात्मनि, 'तस्मात् पराक् पश्यति नान्तरात्मन्' इत्यादिश्रुत्युक्तहेतोः । इन्द्रियप्रज्ञायां बहिष्प्रावण्यस्वाभाव्यात्, 'पराचः कामा-ननुयन्ति बालाः' इत्युक्तरीत्या स्वरूपे प्रकाशमानेऽप्यनाद्यध्यासप्रयुक्तकाम-वशात् बहिरेव विषयापकृष्टचित्ता भवन्त्यविवेकिन इति स्थिते जागरिते एव तावत् प्रत्यगात्मनि तादृशाप्रतिभासोपपत्त्यर्थं नालोकवेदसिद्धमज्ञानं कल्पयितव्यम् इति प्रत्यवस्थानं संभवति । प्रकृतश्रुतावपि अनृतशब्दस्तृष्णातन्निमित्तस्वेच्छाप्रचार-परत्वेनैव व्याख्यातो भाष्यकृद्भिः, न तु भावाज्ञानपरत्वेन । तस्मात् सुषुप्तौ स्वाप्ययः, स्वरूपप्रतिभासश्च विद्यत एव । तज्ज्ञानसामग्र्यभावादेव तु तथा अनिश्चयः-इत्यपि श्रुतिरन्यथैव नेतुं शक्यते ॥]

(७) अत्र च साक्षिवेद्यस्याज्ञानस्य प्रमाणैरभावव्यावृत्तिः प्रदर्श्यत इति न तस्य प्रमाणवेद्यत्वप्रसङ्गः ॥ पं. वि. ४३, इ. सि. ६१.

[अनुभववेद्यं चेदज्ञानं न तत्र वादिविप्रतिपत्तिः स्यात् । भूरिशः प्रमाणप्रदर्शनप्रयासः केवलं भावत्वप्रतिपादनपरः-इति च न सम्यगिति भाति । न हि लोको विप्रतिपद्यते स्वमूढत्वादिविषये, तद्गतभावत्वाभावत्वविषये वा । न च वादिनः सर्वे संप्रतिपन्ना मोहव्यतिरिक्तभावरूपानिर्वचनीयाविद्यानुभवविषये । 'न जानामि', 'संशये', 'मूढोऽहम्' इति चानुभवन्त एव ह्यग्रहणसंशयविपरीत-ग्रहणलक्षणान् अविद्याभेदान् भावाभावत्वेन विभक्तान् लौकिका जनाः प्रतिवादिनः परीक्षकाश्च प्रतिजानते नास्तित्वं त्वदभिमतानिर्वचनीयभावरूपाविद्यायाः । न च भाष्ये यथोक्ताविद्यात्रयातिरिक्ता भावाविद्या क्वचिदप्युल्लिख्योक्ता सूचिता वा - इति समालोचनीयमेतत् ॥]

आत्मन्यनात्माध्यासस्य कारणत्रितयजन्यत्वोपपत्तिः –

२३८. अनात्माध्यासस्य सर्वस्यापि जन्यत्वमङ्गीकृत्य तत्कारण-स्वरूपमित्थं निर्णीतमत्र –

"अद्वितीयचैतन्यप्रकाशात्मनि द्रष्टरि अहङ्कारादिसंघातस्य अध्यस्तत्वात्, अध्यस्यमानव्यतिरिक्तम् अधिष्ठानम्, अध्यासाधिष्ठानयाथात्म्य-विषयप्रमाणज्ञानम्, द्रष्टा च – इति त्रितयम् आत्मा इति वक्तव्यम्। ततश्च, अधिष्ठानगतो दोषः, द्रष्टुर्दोषो प्रमाकरणदोषो वा सर्वं दोषजातम् आत्मन्येवेति वक्तव्यम्। तदभावात् चैतन्यस्याध्यासविषयज्ञानस्य अजन्यत्वात्, कारणत्रितयजन्यविज्ञानस्य आत्मन्यनात्माध्यासे असंभवात्, अगृहीतविशेषस्य सामान्यग्रहणस्य अधिष्ठानत्वनिमित्तस्य आत्मन्यसंभवाच्च 'परत्र' इत्ययोगात्, नाध्यासलक्षणं बहिरुक्तमपि आत्मनि संभवतीति चोदयति – ननु बहिरर्थे इत्यादिना" पं. वि. ४०.

इत्यध्यासलक्षणसमन्वयाभावम् आशङ्क्य विवरणोक्तः परिहारः –

(१) तत्राद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणस्य चैतन्यस्य अविद्याकारण-दोषसंसर्गं प्रथमं दर्शयति – उच्यते, विद्यत एवेति ॥ पं. वि. ४२.

(२) स्वयंप्रकाशत्वेऽपि अविद्यया अगृह्यमाणविशेषत्वात्, आत्मनोऽ-धिष्ठानयोग्यत्वकथनेन परत्र परावभास इति लक्षणांशो दर्शितः। कारणत्रितयेऽपि अद्वितीयात्मावभासिचैतन्यप्रमाणतद्गताविद्याकारणदोषौ लब्धौ; संस्कारमिदानीं लम्भयति – अनादित्वाच्चेति। .... आत्मचैतन्य-मेव आत्मानात्मसंभेदावभासिस्वरूपेणाजन्यत्वेऽपि विशिष्टविषयोपरक्ताकारेण जन्यते। भ्रान्तित्वाच्च विषयविषयिणोरेकस्मिन् प्रत्यये संभेदावभासः संभवतीति कारणत्रितयजन्यम् आत्मन्यनात्मावभासिज्ञानमध्यासः सिद्धः इति ॥ पं. वि. ४८.

[अत्र भाष्यस्याध्यासलक्षणवाक्ये स्मृतिरूपत्वं पूर्वदृष्टत्वं चेति विशेषणद्वयस्य अभिप्रायवर्णनप्रकारो भामत्यामादृतः सर्वथा उपेक्षित इति स्पष्टम्। अध्यासस्यानादेरपि क्वाचित्कशुक्तिरजतादध्यासानामिव जन्यत्व-मुपपादयितुं चैतन्यस्यैव प्रमाणत्वम्, विवादपदाध्यासीनाया अविद्याया एव कारणदोषत्वम्, 'अनादित्वाच्च पूर्वदृष्टत्वं स्मृतिरूपत्वं च' इति टीकायाः संस्कारलम्भकत्वं च कथञ्चित् संपादितम्। आत्मनश्च निरंशस्याप्युक्ताविद्या-बलादगृह्यमाणविशेषत्वमित्यूरीकृत्य, अध्यासाधिष्ठानत्वमुपपादितम्। सर्वत्रापि

विवादपदापन्नस्यैवानिर्वचनीयाज्ञानस्य सर्वानुपपत्त्युपपादकत्वेन स्वीकारात् एकासिद्धौ सर्वासिद्धिरिति न्यायस्यावकाशो दत्त इति स्फुटम् ॥]

अविद्याश्रयविषयौ –

२३९. अविद्या नान्तःकरणाश्रया, नापि तद्विशिष्टचैतन्याश्रया ; किं तु स्वरूपमात्राश्रया – इति प्रतिपादितमत्र ॥

(१) ननु 'अहमज्ञः' इति प्रतिभास एव विशिष्टाश्रयत्वे प्रमाणम् । न । 'अहमनुभवामि' इत्यनुभवस्यापि चैतन्यप्रकाशस्य विशिष्टाश्रयत्व-प्रसङ्गात् । ननु यथा 'अयो द्रवति' इति दग्धृत्वायसोरेकाग्निसंबन्धात् परस्परावभासः, तथा अनुभवान्तःकरणयोरेकात्मसंबन्धात् तथावभासः, नान्तःकरणस्य अनुभवाश्रयत्वात् इति चेत्, एवम् अज्ञानान्तःकरणयो-रेकात्मसंबन्धादहमज्ञः इत्यवभासः, नान्तःकरणस्याज्ञानसंबन्धात् इति तुल्यम् । प्रतीतेरन्यथासिद्धौ परस्परसंबन्धकल्पनायोगात् । आत्मन्य-विद्यासंबन्धस्य सुषुप्तेऽपि संप्रतिपन्नत्वाच्च । अथ स्वरूपमात्राश्रयत्वानुपपत्तेः, विशिष्टाश्रयत्वं कल्प्यत इति चेत् । न विशिष्टेऽपि स्वरूपसंबन्धस्य विद्यमानत्वात् । जडस्य चाज्ञानाश्रयत्वे भ्रान्तिसम्यग्ज्ञानयोरपि तदाश्रयत्व-प्रसङ्गात् । ननु स्वरूपेऽपि ब्रह्मण्यनुपपत्तिस्तुल्या । सत्यम् । अनुपपन्नद्वया-श्रयत्वकल्पनाद् वरं संप्रतिपन्नस्वरूपाश्रयत्वोपादानम् मोक्षावस्थासंबन्धिन एव संबन्धाश्रयत्वात् ॥ पं. वि. ४५.

[जडस्याविद्या नास्ति । बन्धमुक्तिव्यवस्थायै चेतनस्यैव सा कल्प्या, अन्तःकरणादीनां चानित्यत्वात्तदाश्रयत्वानुपपत्तिः इत्यादियुक्तयः द्रष्टव्याः ॥ इ. सि. १९३–१९६.]

अत्र भाष्यवाक्यमिदमत्रानुसंधेयम् –

(क) न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रहीतुः चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनात् न ग्रहीतुर्धर्मो यथा । तथा सर्वत्रैवाग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचिद् भवितुमर्हन्ति । न ज्ञातुः क्षेत्रज्ञस्य । संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवन्न ज्ञातृधर्मित्वम् । संवेद्यत्वादेव स्वात्मव्यतिरिक्तसंवेद्यत्वम् ॥

गी. भा. १३–२, पा. १९२.

यत्तु अनुपपन्नद्वयाश्रयत्वकल्पनाद् वरमेकाश्रयत्वमिति, तदयुक्तम् । उभयोरप्यनुपपत्तौ एकस्य सेति कल्पनस्यैवान्याय्यत्वात् । किमर्था तर्हि

अन्तःकरणाश्रयत्वोक्तिर्भाष्ये इति चेत्, अत्र कर्तृत्वभोक्तृत्ववदविद्याया अप्युभयत्रानुपपत्तौ चेतनस्य निरविद्यत्वेन ब्रह्मस्वभावतां वक्तुम्–इति प्रतिपत्तव्यम्। तथा हि भाष्यम् –

(ख) नेयं श्रुतिः, अचेतनस्य सत्त्वस्य भोक्तृत्वं वक्ष्यामीति प्रवृत्ता, किं तर्हि चेतनस्य क्षेत्रज्ञस्य अभोक्तृत्वं ब्रह्मस्वभावतां च वक्ष्यामीति। तदर्थं सुखादिविक्रियावति सत्त्वे भोक्तृत्वमध्यारोपयति। इदं हि कर्तृत्वं भोक्तृत्वं च सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते। परमार्थतस्तु नान्यतरस्यापि संभवति। अचेतनत्वात् सत्त्वस्य, अविक्रियत्वाच्च क्षेत्रज्ञस्य। अविद्याप्रत्युपस्थापितस्वभावत्वाच्च सत्त्वस्य सुतरां न संभवति॥

सू. भा. १-२-१२, पा. ७४.

इति। अविद्याया अपि तुल्यन्यायोऽनुसंधेयः॥

(२) न तावदज्ञानम् आश्रयविषयभेदापेक्षम्, किं तु एकस्मिन्नेव वस्तुनि आश्रयत्वम् आवरणं च इति कृत्यद्वयं संपादयति। स्वाश्रयापवरकप्रदेशे कृत्यद्वयसंपादितमोवत्, अक्रियात्मकत्वात्, आवरणत्वाच्च।....नापि स्वाश्रयचित्प्रकाशेन विरुध्यते अज्ञानम्। स्वावभासकेन संवेदनेन चित्प्रकाशेन अज्ञानस्याविरुद्धत्वात्, साक्षिचैतन्यस्य चाज्ञानावभासकत्वात् अतो न चिदाश्रयत्वविरोधः। किं च जन्यज्ञानेन आत्मन्यवस्थान्नये अवभासमाने एव स्वपरविषयाज्ञानाश्रयत्वं सर्वैरेवोपगन्तव्यम् इति नावभासमाने अज्ञानाश्रयत्वविरोधः। न च प्रकाशमात्रम् अज्ञानविरोधि। स्वज्ञाने अभावात्। न च स्वयंप्रकाशमाने अज्ञानसंसर्गविरोधः क्वचिद् दृष्टः। विषयाणां परप्रकाश्यानामेव तत्संसर्गविरोधात्। ....अथ ब्रह्मणः सर्वज्ञत्वविरोधात् ऐक्ये सति नाज्ञानमुपपद्यत इति। न। जीवाश्रयत्वोपगमात्। नन्वैक्यमुक्तम्। सत्यम्। सत्यप्यैक्ये प्रतिबिम्बात्मनि अध्यस्तश्यामत्वादेर्बिम्बेऽदर्शनात् अवदाततायाश्च अविरोधदर्शनात्। एवं सर्वज्ञत्वाविद्याश्रयत्वयोः सत्यप्यैक्ये अविरोधात्। तस्मान्नैक्यमविद्याश्रयत्वेन विरुध्यते, किं तु अविद्यामेवोपपादयति। .... ऐक्ये स्वयंप्रकाशत्वे सर्वज्ञत्वे च सत्येव अनवभासदर्शनात् आच्छादिका अविद्या कल्प्यते। अन्यथा भेदजाड्यकिञ्चिज्ज्ञत्वे ग्रहणाभावमात्रमेव स्यात्; ततश्च तमोऽनृतनीहाराज्ञानावृतत्वादिशब्दा अनवभासाध्यासनिमित्तभावरूपाज्ञानप्रतिपादका बाध्येरन् इति॥ पं. वि. ४३.

अत्राविद्या ब्रह्मण एव न जीवस्य इति (इ. सि. पा. ३२५) इष्टसिद्धिकृताग्रहः परित्यक्तः । 'अत एवार्थात् जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका अविद्या कल्प्यते' (पं. पा. १४) इति टीकाभिप्रायश्च । जीवाश्रयत्वोपगमात् अविद्यायाः । तथा च सर्वज्ञत्वादिसामानाधिकरण्योपपादनार्थं चिन्ता अनिवार्या जाता । 'अधिकोपदेशात्तु बादरायणस्य' (वे.सू. ३-४-८) इति सूत्रभाष्योक्तनीत्या 'तथा हि तमधिकं शारीरादीश्वरमात्मानं दर्शयन्ति श्रुतयः' (सू. भा. ३–४–८, पा. ४३५) इत्यभियुक्तपथानुसरणे च नैव सर्वज्ञत्वाज्ञत्वयोः सामानाधिकरण्यशङ्का भवति । न च सर्वज्ञस्य स्वयंप्रकाशस्य अविद्याश्रयत्वमुपपन्नम् । यावद्धि अविद्याश्रयत्वम्, तावन्न सर्वज्ञत्वस्वयंप्रकाशत्वावगमः ; यदा तु तदवगमः नास्त्येव तदा अविद्याश्रयत्वं कस्यचिदपीति । यथोक्तं भाष्ये –

> **(ग) यावद् हि अविद्या न निवर्तते तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते । तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसि' इति श्रुत्या प्रत्याय्यते । न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद् विशेषोऽस्ति ॥**
>
> **सू. भा. १–४–६, पा. १५४.**

इति । एवं ब्रह्माश्रिताविद्यावादिनामेवेयं चिन्ता अर्थवती, नाविद्याया जीवाश्रितत्ववादिनामिति युक्तमुत्पश्यामः ॥

> **(३) ननु 'त्वदुक्तमर्थं न जानामि' इति प्रतिभासमानमेव अज्ञानस्य व्यावर्तकम् अवभासते । ननु तत्र विशेषाकारस्य अनवगतस्य व्यावर्तकता । न । अनवभासमानस्य व्यावर्तकतया प्रतिभासानुपपत्तेः । नन्ववभासमानस्यापि तद्व्यावर्तकत्वम् अनुपपन्नमेव । न । अज्ञानसंबन्धस्य प्रतिभासमात्रशरीरत्वात् अनुपपत्तेरलङ्कारत्वात् । प्रतिभासस्तु विद्यत एव ॥**
>
> **पं. वि. ४६ ; इ. सि. २०७–२१०.**

[अत्राध्यासलक्षणाविद्यायामपि अविचारसिद्धो जीवाश्रयत्वाभास इति शक्यं वक्तुम् – इत्यनुसंधेयम् ॥]

जीवब्रह्मविभागः –

२४०. चैतन्याश्रितैवाविद्या जीवाश्रया इत्यङ्गीकारो जीवब्रह्मविभागमपेक्षते इति स्पष्टम् । कस्तर्हि जीवावच्छेदक उपाधिरिति ? अत्र विवरणकारोत्तरमिदम् –

(१) आत्मावरणमात्माज्ञानमेव जीवब्रह्मविभागाद्यध्यासोपादानं यतः, अतो जीवावच्छेदनिमित्तमज्ञानम् इत्यवच्छेदस्यापि प्रातिभासिकाध्यासस्य तदुपादानत्वात् सत्यतो निरवयवस्य द्वैधीभावायोगात् कर्तृत्वभोक्तृत्वदोषसंयोगानां बीजाङ्कुरवदनादिप्रवाहस्य दर्शितत्वात् तदुपादानमप्यज्ञानमनादि ॥ पं. वि. ४४.

(२) अनादिजीवविभागाध्यासप्रवाहस्य अनाद्यविद्यैव कारणं नान्तःकरणादि ॥ पं. वि. ४४.

(३) न चान्तःकरणम् अवच्छेदकम् । अर्थतो विदारणाभावात्, अवच्छेदस्य विभ्रममात्रत्वात् अज्ञानस्यैव तदुपादानत्वात् । अन्तःकरणस्य च सम्यग्ज्ञाननिरस्यतया अविद्याध्यासत्वात् स्वकारणावच्छिन्नस्यैव अवच्छेदकत्वसंभवात् । सत्यत्वेऽपि सादेरनाद्यवच्छेदोपाधित्वाभावात्, सुषुप्तादौ चान्तःकरणाभावादनवच्छेदप्रसङ्गात् । तदापि सूक्ष्मावस्थमन्तःकरणम् अवच्छेदकम् इति चेत् । ...कार्यसंस्कारविशिष्टशक्तिमत्कारणावस्थानमेव सूक्ष्मतापत्तिः । अतो नान्तःकरणम् अवच्छेदकमस्ति ॥ पं. वि. ४४.

(४) जीवस्य ब्रह्मण्यविद्या इत्यविद्यापूर्वमेव विभागमपेक्षत इति चेत् । न । कस्य कस्मादतिरेक इत्यतिरेकस्यापि विभागपुरस्सरत्वप्रतीतेः । यथा भेदाधीनोऽपि धर्मिप्रतियोगिभावो भेदेनोपरज्यते, 'कस्य कस्मात् भेदः' इति, एवम् अतिरेकाधीनोऽपि जीवब्रह्मभावस्तस्मिन् उपरज्यते । जीवाद् ब्रह्मणोऽतिरेक इति (इति) चेत् । अविद्यायामपि तुल्यमेतत् । निरंशत्वात्, नांशांशिभावेन भेदः संभवति । तस्मादविद्यैव भेदाध्यासनिमित्तम् इति ॥ पं. वि. ४४.

(५) चित्स्वरूपमात्रसंबन्ध्यज्ञानं तत्र जीवब्रह्माद्यवहारभेदं प्रवर्तयति । कथं पुनः स्वरूपमात्रसंबन्धिनोऽज्ञानस्य ब्रह्मस्वरूपं परिहृत्य जीवविभागैकपक्षपातिता ? दर्पणघटादेर्मुखाकाशभेदे हेतुतया मुखादि-

संसर्गिणोऽपि बिम्बाकाशौ परिहृत्य प्रतिबिम्बघटाकाशादिपक्षपातित्ववदिति वदामः ॥ पं॰ वि॰ ४५॰

अत्र सर्वत्र कार्यकारणोपाध्यध्यासव्यतिरेकेणाप्यस्ति किञ्चित् तदुपादानभूतमज्ञानं नामेति कल्पनं भाष्यविरुद्धं कार्यकारणव्यवहारस्याप्यध्यासनिमित्तत्वमुपेक्ष्यैवेति स्पष्टम् । अविद्याकल्पितनामरूपबीजोपाधित्वमीश्वरस्य नामरूपकृतकार्यकारणोपाधित्वं च जीवस्य – इति हि सर्वत्र कारिकासु भाष्ये च जीवब्रह्मविभागदर्शनक्रमः । तत्र तु अध्यारोपापवादप्रक्रियया एकस्यैवात्मनो भेदव्यवहारस्तदपह्नवश्च सिध्यतीति स्पष्टम् ॥

(१) मरणे संभवे चैव गत्यागमनयोरपि ।
स्थितौ सर्वशरीरेषु चाकाशेनाविलक्षणः ॥ गौ॰ का॰ ३–९॰

['घटाकाशजन्मनाशगमनागमनस्थितिवत् सर्वशरीरेष्वात्मनो जन्ममरणादिः आकाशेनाविलक्षणः प्रत्येतव्यः' इति भाष्यम् । यथा जन्ममरणादिरविद्याकृतोपाधिनिमित्त एवाकाशस्य न वस्तुकृत इति जन्मादिरहित एवाकाशः, एवमात्मन्यपीति आकाशेनाविलक्षणोऽयमात्मा नित्यं जन्ममरणादिरहित एव प्रत्येतव्य इति तदर्थः ॥ पा॰ २१२॰]

(२) संघाताः स्वप्नवत् सर्वे आत्ममायाविसर्जिताः ।
आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते ॥ गौ॰ का॰ ३–१०॰

['घटादिस्थानीयास्तु देहादिसंघाताः स्वप्नदृश्यदेहादिवत्, मायाविकृतदेहादिवच्च आत्ममायाविसर्जिताः, आत्मनो माया अविद्या तया प्रत्युपस्थापिताः न परमार्थतः सन्तीत्यर्थः' – इति भाष्यम् । आत्मनो माया अविद्या – इति व्याख्यानं लक्षणया मायाशब्दस्याविद्यावाचकत्वं स्वीकृत्य ॥ पा॰ २१२॰]

(३) अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्तोऽयं शारीरान्तर्यामिणोर्भेदव्यपदेशो न पारमार्थिकः ॥ सू॰ भा॰ १–२–२०, पा॰ ८१॰

(४) एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति । व्योमेव घटकरकाद्युपाध्यनुरोधि । स च स्वात्मभूतानेव घटाकाशस्थानीयान् अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रति ईष्टे व्यवहारविषये ॥ सू॰ भा॰ २–१–१४, पा॰ २०१॰

[अत्राविद्याशब्देनाध्यास उच्यते, न माया । अविद्याया नामरूपशब्दितमायाप्रत्युपस्थापकत्वेन तद्व्यतिरेकेणैव निर्देशात् ॥]

अहङ्काराध्यासः –

२४१. 'अहम् इति तावत् प्रथमोऽध्यासः' इति पञ्चपादिका-वाक्यं व्याख्यास्यद् विवरणम् ।

(१) निष्कलङ्कचैतन्यैकताने निरंशानन्दैकरसे अज्ञानादिसाक्षिणि अनादिसिद्धेऽपि अज्ञानाध्यासे कादाचित्कम् अध्यासमाश्रित्याह–अहमिति तावत् प्रथमोऽध्यास इति ॥ पं. वि. २७.

[अज्ञानाध्यासस्यानादिसिद्धत्वे अध्यास एव प्रभुर्भवेत् सर्वत्रेत्यज्ञानोपादानकत्वं तस्य किमित्यास्थेयम् ? न हि ज्ञानेनाध्यासातिरिक्तं किञ्चित् निवर्त्यं संभवतीत्यनालोचितमत्र ॥]

(२) ननु सविकल्पकाध्यासस्य सविकल्पकमेवाधिष्ठानं वक्तव्यं तथा दर्शनात्, न निर्विकल्पकचिन्मात्रम् । तत्र कथमहङ्काराध्यासेन सविकल्पकेऽहङ्काराध्यास इति चोदयति 'ननु व्यवहारयोग्यस्व' इति । निर्विकल्पेऽपि सविकल्पाध्यासदर्शनात् अज्ञानाध्यासेन सविकल्पे पूर्वाहङ्काराध्यासेन वा सविकल्पके चिदवभासे संभवत्येवोत्तराहङ्काराध्यास इत्याह–नानादिस्वेनेति ॥ पं. वि. ६८.

[अज्ञानाध्यासोऽपि वा कथं निर्विकल्पके इति चोद्यं रूपान्तरेणात्र पुनरावर्तत एव। 'पूर्वाध्यासेन सविकल्पकेऽध्यास' इत्यपि न समाधानम्; पूर्वापरत्वस्याप्यध्यासमात्रत्वात्, तत्रापि चोद्यस्य लब्धप्रसरत्वात्। तस्मादध्यासो नैसर्गिकः–इत्येव परमं समाधानम् । अस्मत्प्रत्ययविषयत्वमध्यस्यैवाध्यासान्तरं क्रियते व्यवहारे। स्वप्ने इव पूर्वापरत्वरहितेऽपि गोवत्साध्यासदर्शनम् इत्यध्यासस्यानादित्वमेवास्थेयमिति युक्तम् । तादृशसमाधानं तु नास्मिन् प्रस्थाने संभवत्यध्यासस्य क्वाचित्कत्वेनोपादानापेक्षाङ्गीकारात् ॥]

अहङ्कारस्योपादानाद्युपन्यासकृत्पञ्चपादिकाग्रन्थविवरणम् –

(३) 'येयम्' इत्याद्युपादानसंकीर्तनम् । 'अविद्या[1] कर्मपूर्वप्रज्ञा' इति भ्रान्तिकर्मपूर्वानुभवसंस्कारा इत्यर्थः । 'तस्या' इति निमित्तकारणनिर्देशः । 'विज्ञानक्रियाशक्तिद्वयाश्रयः' इति स्वरूपं दर्शयति । 'कर्तृत्वभोक्तृत्व' इति कार्यप्रदर्शनम् । 'कूटस्थचैतन्य' इति प्रमाणोपन्यासः । 'यत्संभेदात्'

1. बृहदारण्यके (बृ. ४-४-२) तु 'विद्याकर्मणी .... पूर्वप्रज्ञा च' इत्यस्ति ॥]

इत्यात्मनि सर्वातदारोपनिमित्तत्वं कार्यान्तरमाह । किमिति तर्हि सुषुप्ते न स्यात् इति, अत आह – 'स च सुषुप्ते' इति । अज्ञानकार्यलिङ्गशरीर-प्रविलयो हि सुषुप्तिरित्यर्थः ॥ पं. वि. ५८.

(४) ननु अज्ञानव्यवहितोऽहङ्कारः कथमव्यवधानात् इदंतावभासा-भावः स्यात् इत्यत्राह – 'अत एवाहम्' इति । अनिदंताप्रतिभासादेव, अज्ञानमात्रव्यवधानादेव इत्यर्थः ॥ पं. वि. ६१–६२.

[अत्र यद्वक्तव्यं तत् पञ्चपादिकापरीक्षणेनैव उक्तप्रायम् ॥]

जीवस्य ब्रह्मप्रतिबिम्बत्वम् –

२४२. अथ कोऽयं जीवो नाम ? – इति प्रश्नमुत्थाप्य विवरणे उत्तरं दत्तम् – 'ब्रह्मैवाविद्याप्रतिबिम्बितम् इति वदामः' (पं. वि. २६४) इति । अस्य प्रतिबिम्बवादवैशद्यार्थं पञ्चपादिकोक्तं बिम्बप्रतिबिम्ब-भावं विवृत्योक्तम् ।

(१) जीवः प्रतिबिम्बश्चेत् न बिम्बात्मतामवगन्तुमलं प्रतिबिम्बत्वात् अक्षिपात्रगतदेवदत्तप्रतिबिम्बवत् – इत्येतन्निराचष्टे 'देवदत्तस्याचेतनांशस्य' इति । अचेतनत्वप्रयुक्ता तत्रानवगतिः, न प्रतिबिम्बत्वप्रयुक्ता, घटादिषु तथा दर्शनात् इति भावः ॥ पं. वि. ६४.

[ननु चानवगमवदचेतनत्वमप्यस्तु जीवस्य प्रतिबिम्बत्वादेवेति प्रति-वादिना आक्षिप्ते कः परिहारः ? न च चेतनत्वं दृष्टमित्यचोद्यमेतत् । चेतनत्वस्य दृष्टत्वादेव प्रतिबिम्बत्वमेव न घटत इत्यभ्युपगम्यताम्, न हि प्रतिबिम्बस्य चेतनत्वं क्वचिद् दृष्टम् – इति तर्केण प्रत्युत्थानं दुष्परिहरमत्रेति भाति ॥]

(२) ननु देवदत्तस्यैव बिम्बस्य भ्रमनिवर्तकतत्त्वज्ञानाश्रयत्वं दृष्टम् । एवं बिम्बत्वात् ब्रह्मण एव भ्रमनिरासितत्त्वज्ञानाश्रयत्वं स्यात्, इति । नेत्याह– 'यस्य हि भ्रान्तिः' इति । न बिम्बत्वकृतं तत्त्वज्ञानाश्रयत्वम्, किं तु भ्रान्तत्व-कृतम्, तदप्यज्ञत्वकृतम्, तदपि जीवत्वनिमित्तमिति भावः ॥ पं. वि. ६५.

(३) ननु जीवलक्षणप्रतिबिम्बात्मताम् आत्मनो ब्रह्म जानीयाद् वा न वा ? न चेत् सर्वज्ञताहानिः ; जानाति चेत् ब्रह्म स्वात्मन्येव संसारं पश्येत् इति । नेत्याह – 'यस्तु जानीते देवदत्त' इति । देवदत्तो हि

स्वात्मानम् अक्षिपात्रे अल्पत्वादिगुणम् अवगच्छन्नपि तत्त्वज्ञानप्रतिहतत्वाज्ञानुशोचति । एवं ब्रह्मपि स्वात्मनि जीवे प्रतिबिम्बे संसारं पश्यदपि तत्त्वज्ञानित्वात् नानुशोचति । तत्त्वज्ञानसंसरणे च अवदातश्यामत्वादिवत् नेतरेतरत्र व्यवतिष्ठेते इति भावः ॥ पं. वि. ६५.

[इदं भामतीस्थ (वा. भा. पा. ४२१)समाधानेन तुलयितव्यम् ॥]

(४) नन्वेकतावगमेऽपि न तत्र विच्छेदविभ्रमो निवर्तते । सत्यम् । न प्रतिबिम्बकृतं तत्, किंतु उपाधेरज्ञानजन्यत्वात् ज्ञानानिवर्त्यत्वकृतमित्याह – 'नापि ज्ञानमात्रात्' ॥ पं. वि. ६५.

(५) 'रूपं रूपं प्रतिरूपो बभूव', 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्', 'अत एव चोपमा सूर्यकादिवत्' इति च श्रुतिस्मृतिसूत्रैर्जीवस्य प्रतिबिम्बभावस्य दर्शितत्वात् । अमूर्तस्य चाकाशस्य साभ्रनक्षत्रस्य जले प्रतिबिम्बवदमूर्तस्य ब्रह्मणोऽपि प्रतिबिम्बसम्भवात् । जानुमात्रप्रमाणेऽपि जले दूरविशालाकाशदर्शनात्, जलान्तराकाश एवाभ्रादिबिम्बयुक्तो दृश्यत इति वक्तुमशक्यत्वात् । तत् प्रतिबिम्बत्वं चिद्रूपत्वं च शास्त्रप्रतिपन्नं प्रत्यक्षप्रतिपन्नं च न निराकर्तुं शक्यत इति भावः ॥ पं. वि. ६५.

[अत्राकाशस्याप्रत्यक्षस्यापि प्रतिबिम्बकल्पनम्, तच्च सिद्धवत्कृत्य तद् दृष्टान्तेन ब्रह्मणोऽपि द्रव्यत्वमापाद्य प्रतिबिम्बसंभावना चेति स्पष्टम् ॥]

पञ्चपादिकाविवरणप्रस्थाने 'जीवो नाम तथ्यत एवाहङ्कारोपाधौ तत्कारणाविद्योपाधौ च संजातो ब्रह्मप्रतिबिम्ब एव, तस्यैव तु संसारित्वं न तु ब्रह्मणः' इतीष्टसिद्धिविरुद्धैव प्रक्रिया समादृता – इति यदि यः कश्चन तर्कयेत, न तत्र चित्रं किञ्चिदिति यथोदाहृताक्षेपपरिहारवचनैर्दृढीभवति । भाष्ये तु जलसूर्यकादिदृष्टान्तः कर्मफलाव्यतिकरोपपादनाय संसारस्य च मिथ्यात्वोपपादनाय भवतीत्यध्यारोपापवादप्रक्रियानुगुणः –

(अ) आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः, न स एव साक्षात्, नापि वस्त्वन्तरम् ॥

सू. भा. २-३-५०, पा. ३०२.

(आ) अतश्च यथा नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते। एवं नैकस्मिन् जीवे कर्मफलसंबन्धिनि जीवान्तरस्य तत्संबन्धः। ....आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति। तद्व्युदासेन च पारमार्थिकस्य ब्रह्मात्मभावस्योपदेशोपपत्तिः॥

सू. भा. पा. ३०२.

[अत्र 'जीवः' चेतनब्रह्मतदध्यस्ताभासोभयांशयुतः पदार्थः। तत्र आभासनिराकरणपूर्वकं ब्रह्मात्मतावगमनं श्रुत्या क्रियते इत्युक्तम्॥]

(३) किं पुनरत्र विवक्षितं सारूप्यमिति? तदुच्यते – वृद्धिह्रासभाक्त्वम् इति। जलगतं हि सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते जलह्रासे ह्रसति, जलचलने चलति। जलभेदे भिद्यत इत्येवं जलधर्मानुविधायि भवति। न तु परमार्थतः सूर्यस्य तथात्वमस्ति। एवं परमार्थतोऽविकृतम् एकरूपमपि सद् ब्रह्म देहाद्युपाध्यन्तर्भावात् भजत इवोपाधिधर्मान् वृद्धिह्रासादीन्॥

सू. भा. ३-२-२०, पा. ३५९.

[अत्र प्रतिबिम्बोदाहरणं किञ्चित्सामान्यविवक्षया, न तु जीवः परमार्थत एव प्रतिबिम्ब इत्युच्यते॥]

अवच्छेदवादनिराकरणम् –

२४३. न केवलं प्रतिबिम्बवादपक्षपातिनो विवरणकाराः, किं त्ववच्छेदवादविद्वेषिणश्च। यतस्ते इत्थमाहुः –

(१) ननु घटाकाशवदुपाध्यवच्छिन्नो जीवः किं न स्यात्? न। सामान्यविशेषाभ्याम् उपाधिभिरण्डान्तर्वर्तिब्रह्मणः सर्वात्मना जीवभावेनावच्छिन्नत्वात् अनवच्छिन्नस्य ब्रह्मणोऽण्डाद् बहिरेव सद्भावप्रसङ्गात्। तत्र सर्वगतसर्वनियन्तृत्वादि ब्रह्मणो न स्यात्। अवच्छिन्नप्रदेशेष्वनवच्छिन्नस्य द्विगुणीकृत्य वृत्त्ययोगात्। स्वरूपापेक्षया तत्सर्वं न बहिःस्थितब्रह्मापेक्षया इति चेत्, न। 'यो विज्ञाने तिष्ठन्' इत्यादौ जीवव्यतिरिक्तस्यैव ब्रह्मणो जीवसंनिधानेन विकारान्तरावस्थानश्रवणात्। प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनात् एकत्रैव द्विगुणीकृत्य वृत्त्युपपत्तेः, जीवावच्छेदेषु ब्रह्मणोऽपि नियन्तृत्वादिरूपेणावस्थानम् उपपद्यत इति प्रतिबिम्बपक्ष एव श्रेयान् इति॥ पं. वि. ६५-६६.

प्रतिबिम्बवादावच्छेदवादयोः कतरः श्रेयानित्येतद् विवादपदम् अध्यारोपितमासीत् ग्रन्थकर्तृकालात् पूर्वमेवेति गम्यते यथोदाहृतवचनात् । वाचस्पतिमिश्राः प्राचीनवेदान्त्यनुसारेण घटाकाशप्रतिबिम्बदृष्टान्तौ सममेव तत्र तत्र यथोचितमुदाजहुः –

(अ) सत्यम्, प्रत्यगात्मा स्वयंप्रकाशस्वात् अविषयोऽनंशश्च । तथापि अनिर्वचनीयानाद्यविद्यापरिकल्पितबुद्धिमनःसूक्ष्मस्थूलशरीरेन्द्रियावच्छेदेन अनवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इव, अभिन्नोऽपि भिन्न इव । अकर्तापि कर्तेव । अभोक्तापि भोक्तेव, अविषयोऽप्यस्मत्प्रत्ययविषय इव जीवभावमापन्नोऽवभासते, नभ इव घटमणिकमल्लिकाद्यवच्छेदभेदेन भिन्नमिव अनेकविधधर्मकमिवेति ॥ वा. भा. १-१-१, पा. ३८.

(आ) तस्माद्द्वैते भाविके स्थिते जीवभावस्तस्य ब्रह्मणोऽनाद्यनिर्वचनीयाविद्योपधानभेदात् एकस्येव बिम्बस्य दर्पणाद्युपाधिभेदात् प्रतिबिम्बभेदाः । एवं चानुज्ञापरिहारौ लौकिकवैदिकौ सुखदुःखमुक्तिसंसारव्यवस्था चोपपद्यते । न च मोक्षस्य अनर्थबहुलता ; यतः प्रतिबिम्बानामिव श्यामतावदाततादिर्जीवानामेव नानावेदनाभिसंबन्धो ब्रह्मणस्तु बिम्बस्येव न तदभिसंबन्धः । यथा च दर्पणापनये तत्प्रतिबिम्बं बिम्बभावे अवतिष्ठते, न कृपाणे प्रतिबिम्बितमपि । एवम् अविद्योपधानविगमे जीवे ब्रह्मभावः इति सिद्धम् ॥ वा. भा. २-३-४३, पा. ६२२-६२३

– इत्यादिस्थलेषु । अतः यथैवाविद्याया जीवाश्रितत्वं वाचस्पतिप्रस्थाने ब्रह्माश्रितत्वं तु विवरणप्रस्थाने इति प्रथा, तथैव अवच्छेदवादो वाचस्पतेः, प्रतिबिम्बवादस्तु विवरणकारस्य – इति प्रथापि निर्हेतुकयेवाधुनातनेष्वित्यवगच्छामः । विवरणप्रस्थानं तु प्रतिबिम्बवादपक्षपातीत्यत्र नास्ति संशीतिः ॥

सुषुप्तेऽविद्या –

२४४. पञ्चपादिकायां 'अतोऽनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमेकरसं ब्रह्म' इत्यविद्याया जीवावच्छेदोपाधित्वमुक्तमेकत्र

(पं. पा. १५), अन्यत्र तु (पं. पा. २३), अहङ्कारस्य । तत् कथमिदं संगच्छतामिति शङ्कापरिहारप्रसङ्गेन अवस्थात्रयप्रक्रिया अवतारिता विवरणे-

(१) निर्विकल्पकचैतन्यमात्रैकरसम् अविद्यासंबन्धात् ईषद्विकल्पव्यवहारालम्बनं भवति सुषुप्ते । ततस्तदुपादानान्तःकरणावच्छेदात् तदेव स्थूलतरव्यवहारालम्बनं भवति स्वप्ने । पुनरन्तःकरणसंसृष्टस्थूलशरीरोपरागात् स्थूलतमं भवति जागरणे । न च, उपाधिभेदाज्जीवभेदप्रसङ्गः । पूर्वपूर्वोपाध्यवच्छिन्नस्यैवोत्तरोत्तरेणावच्छेदात् । निरपेक्षोपाधिभेदे हि जीवभेदः ॥ पं. वि. ६६.

अत्र यद्यप्यविद्याकल्पितोपाध्यैक्यात् जीवैकत्वव्यवहारः इति कृत्वा सूत्रकृतोक्तम् –

(अ) 'स एव तु कर्मानुस्मृतिशब्दविधिभ्यः' (वे. सू. ३-२-९) इति,

तथापि सुषुप्तौ अविद्यासद्भावे न किञ्चित् प्रमाणमस्ति । अविद्याया अध्यासरूपाया विशेषज्ञानलक्षणत्वात् । विशेषज्ञानस्य सुषुप्तावभावात्, तदभावे नित्यविज्ञानस्वरूपात्मविभक्तद्वितीयवस्त्वभावस्यैव हेतुत्वेन श्रुत्यैव बोध्यमानत्वात्, 'यद् वै तन्न विजानाति विजानन् वै तन्न विजानति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद् विभक्तं यद् विजानीयात्' (बृ. ४–५–३०) इति । अत एव हि भाष्यकृतोक्तम् –

(आ) तत्र सति संपन्नस्तावदेकत्वान्न विजानातीति युक्तम् । 'तत् केन कं विजानीयात्' इति श्रुतेः ॥ सू. भा. ३-२-७, पा. ३५१.

(इ) इदानीं योऽसौ सर्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यम्, स प्रत्यक्षतो निर्दिश्यते यत्र अविद्याकामकर्माणि न सन्ति ॥ बृ. भा. ४-३-२१, पा. ८९१.

इति च । सुषुप्तौ स्वरूपेऽप्ययः उपाधिकृतविशेषाभावादिति प्रतिपादनस्थले मनइन्द्रियलक्षणोपाधिद्वयस्यैव नियमेनोक्तेश्चैतदेवमिति निश्चीयते –

(ई) स उपाधिद्वयोपरमे सुषुप्तावस्थायाम् उपाधिकृतविशेषाभावात् स्वात्मनि प्रलीन इवेति 'स्वं ह्यपीतो भवति' इत्युच्यते ॥

सू. भा. १-१-९, पा. ३२-३३.

(उ) श्रान्तः शरणं प्रेप्सुरुभयरूपादपि शरीराभिमानात् समुत्थाय सुषुप्तावस्थायां परं ज्योतिराकाशशब्दितं परं ब्रह्मोपसंपद्य विशेषविज्ञानवत्त्वं च परित्यज्य स्वेन रूपेणाभिनिष्पद्यते ॥ सू. भा. १-३-२५, पा. ११६.

(ऊ) बुद्ध्याद्युपाधिस्थानविशेषयोगादुद्भूतस्य विशेषविज्ञानस्योपाध्युपशमे य उपशमः स परमात्मना संबन्ध इत्युपाध्यपेक्षयैव उपचर्यते न परिमितत्वापेक्षया ॥ सू. भा. ३-२-३४, पा. ३७१.

[अत्र सर्वोपाध्युपशम एवोच्यते न त्वविद्यालक्षणोपाध्यवशेष इतीदमवधेयम् ॥]

सुषुप्तिगता विवरणाभिप्रायाः कतिचिद् परिशीलनमर्हन्ति –

(२) सुषुप्तादौ चान्तःकरणाभावादनवच्छेदप्रसङ्गात्, अविद्यैवात्मावच्छेदिका। (पा. ४४) सौषुप्तदुःखाभाव उत्थितेन स्मर्यत इति पञ्चपादिकोक्तं परमतमाश्रित्य (पं. वि. ५७)। अनुभूतमेव सुखमुत्थितस्य अनुस्मर्यमाणं तत्र विरोधिदुःखाभावम् अर्थापत्त्या गमयति 'अनुभूतं चेत् सुखम्, नास्ति दुःखम्' इति। अतो दुःखाभावो नानुस्मर्यते, किं तु प्रमीयते इति। एवम् उत्थितस्य ज्ञानाभावपरामर्शोऽपि ज्ञानविरोधिनोऽज्ञानस्यानुभूततया स्मर्यमाणस्यानुपपत्त्यैव प्रमीयते नानुस्मर्यते ॥ पं. वि. ५६.

[अत्र सुखपरामर्श आत्मसंबन्धित्वेनानुस्मर्यत इति युक्तम्। अज्ञानमनुस्मर्यते प्रमीयते वा – इति तु, आग्रहमात्रम्, 'न किञ्चिदवेदिषम्' इति खलु परामर्शः ॥]

(३) ननु अज्ञानसुखानुभवयोः साक्षिचैतन्यस्य चाविनाशिनः संस्काराभावे कथमुत्थितस्य त्रयाणामनुस्मरणं स्यात्? उच्यते। अज्ञानगतचैतन्याभासजन्मोपाधित्वात् अज्ञानसुखसाक्षिविकल्पानुभवस्य अज्ञानावस्थाभेदेन चैतन्याभासानां भिन्नत्वात्, तद्विनाशसंस्कारजस्मरणम् अज्ञानसुखसाक्षिचैतन्याकारम् अज्ञानविशिष्टात्माश्रयमेव संभाव्यते ॥ पं. वि. ५७.

[अज्ञानगतचैतन्याभासजन्मोपाधित्वमनुभवस्येति, अज्ञानावस्थाभेदेन चैतन्याभासानां भिन्नत्वमिति च दुरूहमेतत् ॥]

अत्र सुषुप्ताविद्यावस्थायां न केवलं भावरूपाज्ञानावस्थानम्, किं तर्हि अवस्थानां कार्यकारणभावः, अज्ञानस्यावस्थाभेदाः, तत्र चिदाभासत्रयम्, चिदाभासानां नाशसंस्कारस्मरणादयश्चाज्ञानाश्रयेण – इत्येतत् सर्वं सार्वत्रिकानुभवमनवलम्ब्यैवाभ्युपगतमस्मिन् प्रस्थाने। 'नावेदिषम्' इति न सौषुप्तानुभवस्मरणम्, किं तु विकल्प एव (बृ. वा. १–४–३००) इति वार्तिकोक्तिमनादृत्य भावरूपाविद्या तद्वृत्तितत्स्थचिदाभासविशेषाभ्युपगमो विवरणप्रस्थाने एव प्रप्रथमं दृश्यते ॥

(४) अज्ञानकार्यलिङ्गशरीरप्रविलयो हि सुषुप्तिरित्यर्थः। ननु सति प्राणे क्रियात्मनि कथमहङ्कारस्य क्रियाशक्तेः प्रविलयः? उच्यते। नाहङ्कारमात्रत्वं प्राणस्योच्यते, किं तु प्राणस्य पृथक् सतः पञ्चधा व्यापारहेतोरहङ्कारस्य क्रियाशक्तिरस्तीत्येतावदुच्यते मनोऽधीनतादर्शनात् प्राणवृत्तेरिति। प्राणलक्षणक्रियाशक्त्यंशं वा विहाय विज्ञानशक्त्यंशस्य लयः कल्प्यताम्। सांशत्वादन्तःकरणस्य। स्वप्नादिवद् दृष्टिसृष्टिमाश्रित्य वा सुषुप्तपुरुषदृष्टयभिप्रायेण सर्वस्य तत्र लयो दर्शितः। सुषुप्तप्राणशरीरादिदर्शनस्य पुरुषान्तरस्य विभ्रमत्वादिति ॥ पं. वि. पा. ५८.

अत्र वस्तुनि विकल्पाभावः क्रियास्विव – इति नालोचितं शङ्कापरिहरणव्यग्रैः। दृष्टिसृष्टिवादाद्यवान्तरप्रक्रियाभेदा विवरणनिर्माणकालात् पूर्वमेव लब्धप्रचारा आसन्निति च गम्यते यथोदाहृतवाक्येन ॥

दृष्टिसृष्टिशब्देन च किं विवक्ष्यत इति नोक्तम्। स्वप्नदृष्टान्तादानेन तूलीयते यथा स्वप्नप्रपञ्चः सुप्तपुरुषदृष्ट्यैव समस्ति, एवं सुप्तपुरुषदृष्ट्या किमपि नास्ति सुषुप्तौ इति। एतावांश्चेदभिप्रायः, तर्हि समीचीन एव सः। अज्ञाने सर्वोपादाने सर्वं विलीनं भवतीति चेत्, न समीचीनः। श्रुतिभाष्ययुक्त्यनुभवविरोधात्। श्रुतिस्तावत् –

(अ) 'यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति ....' (कौ. ४–१९), 'एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः' कौ. ४–२०.

इत्यात्मन्येव प्रभवप्रलयौ प्राह, नाज्ञाने । आत्मस्वरूपप्रतिबुबोधयिषया चैतदेवं श्रूयते । तेन विरुध्येत यदि सुषुप्तेऽज्ञाने प्रलयोऽङ्गीक्रियेत । न ह्यज्ञानयुक्ते आत्मनि विवक्षिते गार्ग्याजातशत्रुसंवादप्रकरणं विशुद्धपरमात्मज्ञानविषयकमित्यवकल्पेत । सर्वं चेदं प्रकरणं परमात्मविषयकमिति गम्यते । वाक्यान्वयात् । 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म' इति प्रतिज्ञावाक्यात्, विस्फुलिङ्गदृष्टान्तेन यथोक्तात्मन एव सृष्टेस्तस्मिन्नेव चाप्ययस्य श्रवणात्, 'एवमेवैष प्राज्ञ आत्मेदं शरीरमनुप्रविष्टः' इति सृष्टावनुप्रवेशवचनात्, 'यावद्ध इन्द्र एतमात्मानं न विजज्ञौ तावदेनमसुरा अभिबभूवुः स यदा विजज्ञावथ हत्वासुरान् विजित्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति' इति च (कौ. ४–२०) फलसंकीर्तनेन संस्तुतत्वाच्चात्मज्ञानस्येति ॥

(आ) सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति । परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा ॥ सू. भा. १-४-१८.

इति **भाष्यम्** । तेन विरुध्यतेऽयमज्ञानेऽहङ्कारादिप्रलयाभ्युपगमः । न हि जीवत्वविनिर्मुक्तायामवस्थायाम् अविद्याऽभ्युपगमो युक्त इति ॥

युक्तिरपि—यदि सुषुप्तौ अज्ञानं स्यात्, तर्हि अज्ञानादेव जगज्जातम् इति निश्चीयेत जनैरुत्थितैः । न त्वेतदस्ति, 'सुषुप्ते न किञ्चिच्चेतितं मया यथेदानीम्' इत्येव तु सौषुप्तपरामर्शो लोकस्येति ॥

(इ) अपि च न कदाचिज्जीवस्य ब्रह्मणा संपत्तिर्नास्ति, स्वरूपस्यानपायित्वात् । स्वप्नजागरितयोस्तूपाधिसंपर्कवशात् पररूपापत्तिमिवापेक्ष्य तदुपशमात् सुषुप्ते स्वरूपापत्तिर्वक्ष्यते । अतश्च सुप्तावस्थायां कदाचित् संपद्यते कदाचिन्न संपद्यते इत्ययुक्तम् ॥ सू. भा. ३-२-७.

इति भाष्यं सुषुप्ते नियमेन स्वरूपभूतपरमात्मसंपत्तिमाह । तेन च विरुध्यतेऽहङ्कारादेरज्ञाने विलय इति वचनम् ॥

अनुभवोऽपि सौषुप्तो विरुध्यतेऽनेनाभ्युपगमेन । न हि सुषुप्ते किञ्चिदप्यनुभूयते लोकैः । आत्मानुभवस्तु निर्विकल्पोऽस्ति तत्र 'न किञ्चिदवेदिषम्' इत्यनुभूतविषयनिराकरणावधित्वात् परामर्शे आत्मानुभवस्य । यथाहुर्वार्तिककाराः –

> न चेदनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते ।
> नावेदिषं सुषुप्तेऽहमिति धीः किंबलाद् भवेत् ॥
>
> बृ. वा. ३-४-१०३.

तथा अज्ञानाभावमित्याहुस्त एवात्रावस्थायाम् –

> तत्तु द्वितीयं नेहास्ति तमोऽनर्थस्य कारणम् ।
> द्रष्टादिरूपसंभेदाद् यत्पश्येज्जागरे यथा ॥ बृ. वा. ३-४-१४१९

इति ॥

जीवब्रह्मविभागस्य नाविद्योपादानकत्वम् –

२४५. सुषुप्तेऽविद्यैव केवला अवच्छेदिका इत्यङ्गीकारात् जीवब्रह्मविभागस्य तत्राभावः प्रसज्यते । ब्रह्मण एव चाविद्येति । तदेतदाशङ्क्य परिहृतं विवरणे –

> (१) ब्रह्मण्यविद्यादिसाङ्कर्यपरिहाराय सुषुप्त्यादावपि अस्त्येव जीवब्रह्मविभाग इति कल्प्यते । नन्वर्थगत एव तर्हि विभागो न विभ्रमगतः । सत्यम् । सुषुप्त्यादिगतविभागादन्यत्र जीवब्रह्मविभागो विभ्रममात्रतया अविद्योपादान उच्यते । नन्वर्थगतो विभागस्तर्हि नाविद्योपादानः ; अनादित्वात्. अविभ्रमत्वाच्च । सत्यम् । तथाप्यविद्यातन्त्रो विभागः, अनादित्वेऽपीति ब्रूमः । यथा हि स्वात्माविद्यासंबन्धोऽविद्यातन्त्रो नाविद्योपादानः, संबन्धजननात् प्राक् स्वातन्त्र्येणावस्थानानुपपत्तेः । अज्ञानस्यानादित्वाच्च आत्माविद्यासंबन्धस्य नाविद्योपादानता ॥ पं. वि. ६६, ६७.

[ब्रह्मण्यविद्यासाङ्कर्यं स्यादिति भिया जीवब्रह्मविभागः स्वीक्रियते इति न साधु कल्पनम् । न ह्यभिलषितसिद्धिनिबन्धना वस्तुव्यवस्थितिः । यद्यज्ञानमवस्थात्रयेऽप्यनुगतमुपाधित्वेन, तदिह मा भूत्तवाभिलषितस्य ब्रह्मण्यविद्यासाङ्क-

र्याभावस्य सिद्धिः, न केवलं तदर्थं केनाप्यननुभूतचरो विभागः सुषुप्तावप्यस्तीति कल्पयितुं युक्तम् ॥

एतेनासिद्धस्य विभागस्य असिद्धेनाविद्यासंबन्धेन साधनं तस्य चाविद्यातन्त्रत्वं नाविद्योपादानत्वमिति कल्पनं च प्रत्युक्तम् । लोकप्रसिद्धाज्ञानव्यतिरिक्तस्य त्वदभीष्टस्यासिद्धया सर्वस्याप्यस्याभ्युपगमस्यामित्तिचित्रत्वादिति द्रष्टव्यम् ॥

इष्टसिद्धौ 'दुर्घटत्वमविद्याया भूषणम्' (१-१४०) इति कारिकाव्याख्याने आत्माविद्यासंबन्धोऽविद्याशरीर एव, कल्पित एव सर्वसंबन्धः-इत्युक्तम् (इ. सि. २११)। इह त्वविद्यातन्त्र इति विधान्तरेण तदेवोक्तमिति स्फुटम् ॥]

(२) ननु जीवब्रह्माश्रयो विभागः कथमविद्यातन्त्रः स्यात् ? उच्यते- अनाद्यविद्याविशिष्टं चैतन्यम् अनादिजीवभावेन काल्पनिकानादिभेदस्य आश्रयः । न स्वरूपेण । तस्यैकत्वात् । अतो विशिष्टाश्रयो विभागः स्वरूपेणाप्युपरज्यमानो विशेषणाविद्यातन्त्रो विशिष्टः इत्यविद्याकृतो विभाग उच्यते । अविद्यातन्त्राणां चानिर्वचनीयत्वम् अनादित्वं च अविद्यासंबन्धवन्न विरुध्यते । लोके च दर्पणघटादिविशिष्टयोरेव मुखाकाशयोर्मिथ्याभेदावभासो न स्वरूपेणेति उपाधितन्त्रता भेदस्योच्यते ॥ पं. वि. ६७.

[अत्र यद् वक्तव्यं तत्पूर्वोदाहृतवाक्यपरिशीलनेनैवोक्तप्रायम् ॥

'अत्रानाद्यविद्याविशिष्टं चैतन्यम् अनादिजीवभावेन **काल्पनिकानादिभेदस्य** आश्रयः' – इत्युक्तं परिभावनीयम् । एवमन्यत्र 'अनादिमिथ्याज्ञानसंबन्धोऽप्यात्मनि अज्ञानवत् 'काल्पनिकत्वात्' आकाशकार्ष्ण्यवत् आत्मनः कूटस्थतां न विहन्ति' (पं. वि. १७) इत्युक्तमस्मिन् ग्रन्थे । 'अनादिसिद्धेऽप्यज्ञानाध्यासे कादाचित्कम् अध्यासमाश्रित्याह–अहमिति तावत् प्रथमोऽध्यास इति' (पं. वि. १७) इति चाज्ञानस्याध्यस्तत्वं कण्ठरवेणोक्तम् । इत्थं च अविद्यायाः, तत्संबन्धस्य, सहाविद्यातन्त्रविभागादिभिः काल्पनिकत्वे सिध्येदपि भवद्राद्धान्तः । 'परम् अविद्यमानार्थकल्पनायां सर्वार्थसिद्धिप्रसङ्गः' इत्यभियुक्तोदाहृतन्यायभाजनं भवेद् भवान् । अपि च सर्वस्याप्यस्यार्थजातस्य काल्पनिकत्वेऽभ्युपगते सर्वस्याप्यस्याध्यस्तत्वमङ्गीकृतमेव भवति । एवं स्थितेऽपि इयमविद्या अध्यासस्योपादानकारणमिति प्रक्रियायाः प्राधान्यमास्थाय सर्वकल्पकाध्यासस्यानादरणे को हेतुरिति तु न स्पष्टीकृतमत्र प्रस्थाने ॥

प्रमात्रादिव्यवस्थोपपादनम् –

२४६. प्रमातृत्वस्यैवाविद्याकृतत्वं भाष्योक्तम् अविगणय्य, प्रमात्रादिव्यवस्थोपपदनार्थम् –

(१) नन्वविकारिचैतन्यैकतानस्य निष्कलङ्कस्वभावानन्दस्य असङ्गस्यात्मनो न प्रमातृत्वमुपपद्यते । प्रमाणक्रियापरिणामाभावात् । न च प्रमातृत्वहीनस्य कर्तृत्वभोक्तृत्वे संभवत इति प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोगभोक्तव्यसंसर्गलक्षणस्य व्यवहारस्यात्मन्यसंभवात्, अहङ्कारस्य च अचेतनतया तदाश्रयत्वायोगात् उच्छिन्नव्यवहारमिदं जगदापद्येतेति प्राप्तम् ॥

पं. वि. ६८.

इति चोद्यमुद्भाव्य मतान्तरप्रक्रियापरिशीलनपूर्वकमुपसंहृतम् –

(२) तस्मात्, न सर्ववादिनां प्रमाणादिव्यवहारसंभव इति । सत्यम् । अस्मत्पक्षे तु कथञ्चित् संभवं दर्शयिष्यामीत्याह – 'तत्रैवंभूतस्याहङ्कर्तुः' ॥ पं. वि. ६९-७०.

इति ॥

[अत्र पञ्चपादिकाग्रन्थभाग अनुसंधेयः 'तत्रैवंभूतस्याहङ्कर्तुः' इत्यादि 'कर्मकारकमपि....तस्यैवापरोक्षम्, गन्तृसंबन्ध इव ग्रामस्य'(पं. पा. २४) इति पर्यन्तम् । विवरणग्रन्थस्यापि संक्षेप एवात्रोपन्यस्यते ॥]

स्वपक्षे व्यवस्थासंभावनं च प्रकारद्वयमाश्रित्य दर्शितम् –

(३) सर्वत्राविद्यावृततया अनभिव्यक्तस्वभावमपि चैतन्यम् अन्तःकरणं येन येनावस्थाविशेषेण विवर्तते तेन तेनाकारेण व्यज्यते, अयःपिण्डेनेव चतुष्कोणत्वाद्यवस्थाविशेषम् आपाद्यमानेन कृशानुः – इति, विषयसंसृष्टान्तःकरणावच्छिन्नं चैतन्यं तदाकारमवभासत इति भावः । ननु प्रमातृरूपावच्छिन्नं चैतन्यं तद्रूपेण भासताम्, कथं चैतन्यस्य विषयावच्छेद इति ? तदाह – कर्मकारकमपीति । स्वव्यापाराविष्टमिति परिणामसंसर्गाद् आपन्नजाड्याभिभवलक्षणयोग्यत्वम् उच्यते । अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि चैतन्याभिव्यक्तियोग्यताम् आपादयतीति भावः ॥

पं. वि. ७०.

(a) नन्ववच्छेदकभेदे चित्प्रकाशभेदात् कथं विषयावच्छिन्नानुभवस्य प्रमातृरूपावभाससंसर्गः ? असंसर्गे वा कथं 'मया इदमवगतम्' इति प्रमातृप्रमेयसंसर्गावभासिसंवेदनं स्यात्, अनुभवभेदात्, एकस्मिन् संबन्धावगमे पदार्थयोरवभासायोगादिति ? तत्राह – 'प्रधानक्रियाहितप्रमात्रवस्थाविशेषावच्छिन्नापरोक्षतैकरूपाम् – इति । एकाम् इत्यर्थः ।

परिणामस्य उभयसंसर्गात् व्यञ्जकाभेदेन व्यङ्ग्याविच्छेदः – इति भावः ॥
पं. वि. ७०.

(b) कर्तुर्हि प्रमातृता न कर्मणः । तत्रान्तःकरणस्य कर्तृत्वात् तद्वच्छिन्नः प्रमातेत्यर्थः ॥ पा. ७०.

(c) विषयानुभवसंशब्दितो विषयस्यापरोक्ष्यैकरसः फलम् इत्यन्तःकरणावच्छिन्नतया प्रमाता विषयावच्छिन्नतया फलम् इति भावः। (पा. ७०) .... अन्तःकरणात्मनोरैक्याध्यासेनैकाश्रयत्वं चैतन्यस्यापि घटावच्छेदादेकविषयत्वम् (पा. ७१) ...

(d) परिणामसंसृष्टकर्मोपाधिनियमात्, नासंसृष्टेषु चैतन्याभिव्यक्तिरिति नैकस्य प्रमातुः सर्वविषयावभासः (पा. ७१) ....

(e) एतत्प्रमातृचैतन्याभिन्नतयैवाभिव्यक्तं तद्विषयचैतन्यं न प्रमात्रन्तरचैतन्याभेदेनाभिव्यक्तम् ; अतो न सर्वेषामवभास्यत्वम् इत्यर्थः। (पा. ७१) ....

(f) युक्त एवायमुपाधिः सर्वगतस्यापि जीवस्यासङ्गितया सर्वेणासंयोगात्। प्रकाशस्य च संयुक्तवस्त्ववभासित्वात्। ब्रह्म तु सर्वोपादानतया स्वात्माभिन्नं जगत् आत्मानमिवावभासयति, न तु जीवः। अनुपादानत्वात्। (पा. ७२) .... यथा गोत्वादयो जातिविशेषाः केसरादिमद्व्यक्त्यन्तरप्रदेशसंनिहिता अपि स्वभावविशेषात् अश्वादिव्यक्त्यसङ्गितया तैरनभिव्यक्ता अपि सास्नादिमत्पिण्डसङ्गितया अभिव्यज्यन्ते, यथा वा प्रदीपप्रभावाय्वाकाशरसगन्धादिप्रदेशव्यापिन्यपि स्वभावविशेषात् तानि न प्रकाशयन्ती रूपसंसर्गितया तदेव प्रकाशयति, एवं चैतन्यमपि स्वभावविशेषात् अन्तःकरणे संसृज्यते नान्यत्रेति युक्तम्। यथा च केवलेन वह्निना न दाह्यमपि तृणादि अयःपिण्डसमारूढेन दह्यते तथा अहङ्कारसमारूढेनात्मना केवलेनाप्रकाश्या अपि विषयाः प्रकाश्यन्त इति युक्तमहङ्कारोपाधिवर्णनम् ॥ पं. वि. ७२.

यथावर्णितम् आत्मा सर्वगत इति पक्षमाश्रित्य । परिच्छिन्नपक्षे तु –

(३) जीवावच्छेदनिमित्तान्तःकरणपरिणामसंसर्गकृताभिव्यक्तित्वात्, विषयावच्छिन्नचैतन्यस्य जीवचैतन्यता च न विरुध्यते । ब्रह्माकारपरिणतान्तःकरणसंसर्गाभावाच्च न नित्यवद् ब्रह्मणः प्रकाशप्रसङ्गः। न चान्तःकरणस्वरूपमात्रसंसर्गिणोऽभिव्यक्तिरङ्गीकृता । तद्गतधर्मादीनामपि प्रसङ्गात्। जीवाकाराहंवृत्तिपरिणतान्तःकरणेन च जीवोऽभिव्यज्यते। अन्यथा सुषुप्तेः[1]।

1. 'अन्यथा जीवस्य सुषुप्तेः' इति पाठान्तरम् ॥

अतः परिच्छिन्नत्वात्, न सर्वविषयावभासिता । अथवा अज्ञानावृतः स्वयम् अप्रकाशमानतया विविधविषयान् अनवभासयन् अन्तःकरणोपरागात् आवरणतिरोधाने तत्रैवाभिव्यक्तः, तत्संसृष्टमेव विषयम् अवभासयति । दृष्टं च वृश्चिकवृक्षादिकार्यस्य गोमयमृदादिकारणस्वभावतिरोधायकत्वम् – इति सिद्धैवात्मनि प्रमातृत्वादिव्यवस्था इति ॥ पं. वि. ७३.

अत्र वेदान्ते आत्मैकत्वाभ्युपगमादेव प्रमाणप्रमेयादेर्वस्तुतो विद्यमानत्वाभावात्, न तावत् परमार्थदृष्ट्या 'उच्छिन्नव्यवहारमिदं जगदापद्येत' इति चोद्यस्यावसरोऽस्ति । इष्टापत्तिर्हि सिद्धान्तिनस्तदा स्यादिति । व्यवहारे तु यत्र यथा दृष्टः प्रमाणादिविभागः, तत्र तथैव स इति न चोदयितव्यः परिहर्तव्यो वेति मुधैवात्र खिद्यते व्यवस्थापनार्थमिति स्पष्टम् ॥

यत्तु जीवात्मनः सर्वगतत्वे एवं व्यवस्था, तस्यान्तःकरणपरिच्छिन्नत्वपक्षे एवं व्यवस्था वदितव्येति, तत्र क्रियायामिव वस्तुनि विकल्पासंभवः –इत्यभियुक्तपरिभाषा पृष्ठतः क्रियते । न हि 'जीवः सर्वगतो वा स्यात्, परिच्छिन्नो वा'–इति विकल्पः शक्यते समाश्रयितुम् । तद्गुणसारत्वाधिकरणन्यायेनोपाधिपरिच्छिन्न एव हि जीवोऽभ्युपेयो व्यवहारे । ततश्च यथैव कर्मफलसंबन्धव्यवस्था दर्शिता सूत्रकृता 'असन्ततेश्चाव्यतिकर' (वे. सू. २–३–४९) इति, तथैव प्रमाणप्रमेयव्यवस्थापि भविष्यति । उपाधितन्त्रत्वात् जीवत्वस्येति ॥

यच्चोच्यते चैतन्यमज्ञानावृतम् जीवाकाराहंवृत्त्या परिणतान्तःकरणेनाभिव्यज्यते, अन्तःकरणोपरागादावरणाभिभवे तत्रैवाभिव्यज्यते–इत्यादि, तत्रात्मनो निराकारत्वे सति तदाकारवृत्त्यसंभवात्, असिद्धाज्ञानावरणस्याभिभवार्थमसिद्धात्माकारवृत्तिकल्पनं वृथाप्रयास इत्यत इदमपि चिन्त्यमेव ।

(४) अन्तःकरणपरिणामसंसर्गकृतयोग्यत्वापत्त्या विषयस्य चैतन्यं प्रति व्यञ्जकत्वम्, तदनुमेयादिष्ववर्तमानत्वसंभवात्, तेषु वर्तमानधर्मद्वयोत्पत्त्ययोगात् नापरोक्षता ॥ पं. वि. ८४.

[अत्रापि पूर्ववाक्योक्तविमर्शोऽनुसंधेयः । व्यवहारे यत्र यथादृष्टं परोक्षत्वमपरोक्षत्वं वा तत्र तथैव सः इति नात्रैकात्मवादिभिर्वृथायासस्तदुपपादने आस्थेय इति ॥]

अध्याससिद्धिः –

२४७. अत्र प्रस्थाने अध्याससिद्धिरित्थं क्रियते –

(१) व्यवहारत्रितयम् अध्यासोपादानम् – इत्यत्र अर्थापत्तिव्यतिरेक्यनुमानप्रदर्शनाय यत्र यत्राध्यासाभावः संप्रतिपन्नः, तत्र तत्र व्यवहाराभावो दृष्टः–इति व्यतिरेकव्याप्तिं भाष्यार्थं दर्शयति 'न हि देहेन्द्रियादिषु' इति ॥ पं. वि. ८८.

(२) देवदत्तस्य जाग्रत्स्वप्नकालौ तस्यैव कर्तुः करणभूतदेहेन्द्रियादिषु अहंममाध्यासपुरःसरप्रमातृत्वादिव्यवहारवन्तौ, तस्यैव सुषुप्तिकालादन्यकालत्वात् । यः कालस्तथाविधव्यवहारवान् न भवति न स तस्यैव सुषुप्तिकालादन्यकालः, यथा तस्यैव सुषुप्तिकालः ॥ पं. वि. ८८.

(३) व्यवहारत्रितयं वा दर्शिताध्यासोपादानमन्तरेणानुपपन्नम्, अध्यासाभावे व्यवहारादर्शनात् सुषुप्ते इत्यर्थापत्तिः ॥ पं. वि. ८८.

(४) न चात्मानात्मनोः संयोगसमवायौ व्यवहारनिमित्तम्, सुषुप्तेऽपि भावात् । ....अतः परिशेषात् अर्थापत्त्यनुमानाभ्याम् अध्यास एव व्यवहारमूलं सिद्धः ॥ पं. वि. ८८-८९.

(५) पदार्थद्वयदर्शने सति प्रत्यक्षानुमानागमैर्भेदाप्रतिपत्तौ अध्यासः परिशिष्यते ॥ पं. वि. ९०.

(६) न च केवलं प्रत्यक्षानुमानार्थापत्तिभिरेवाध्याससिद्धिः, किं तु आगमोऽपि विधेर्बोद्धारमधिकारिणं ब्राह्मणादिशब्दैरनुवदन् चेतनाचेतनयोरैक्यावभासं दर्शयति ॥ पं. वि. ९२-९३.

(७) ननु सर्वशरीरसंनिधानाविशेषे सति, आत्मनः कथमस्मिन्नेव शरीरेऽध्यासनियम इति ? अनादित्वादविद्याध्यासः । तत्परिणामत्वात् लिङ्गशरीरे । तत्कार्यभूतसूक्ष्मशरीरारब्धत्वात्, तत्संश्लेषाद् वा स्थूलशरीरेऽध्यासनियमो न विरुध्यते ॥ पं. वि. ८९.

'अध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि' इति भाष्यप्रतिज्ञाम् अनादृत्य तद्वैपरीत्येन अध्यास एवात्र प्रमाणैः प्रसाध्यते । शरीरेन्द्रियाद्यनभ्युपगम्य प्रमाणव्यवहारो नोपपद्यते, अतः प्रमाणप्रवृत्तिसिद्धय एव सिद्धवदविचाराभ्युप-

गताः शरीरादय इति भाष्यम् अनादृत्य 'कथम् अस्मिन्नेव शरीरेऽध्यासो-त्पत्तिनियमः ?' इत्याक्षेपसमुत्थापनमप्यध्यासवृत्तमविगणय्यैवेति स्पष्टम्। सर्वविधव्यवहारस्याप्यध्यासपुरःसरत्वात्, ज्ञानबाध्यत्वमुपपन्नमिति सिद्धान्त-सरणिं दूरीकृत्य अध्यासो नाम काचित्कः कार्यविशेषः—इत्यभ्युपगम्य तस्य निमित्तोपादानादिकारणगवेषणं वेदान्तिभिरवश्यकर्तव्यमिति भावनैव प्रमाणैरध्याससाधने प्रवर्तेत इति स्पष्टम् ॥

अध्यासदृष्टान्तभूतशुक्तिरजतादिविषये कल्पना —

२४८. अध्यासस्याविद्योपादानकत्वावधारणमत्र विशेषतोऽभि-लषितमित्यतो भाष्याक्षराणि तदानुगुण्येनैव व्याख्यायन्तेऽत्र सर्वत्र —

(१) प्रतिपन्नोपाधौ निरस्यमानमर्थम् अविद्यान्वयव्यतिरेकाभ्याम् अविद्यां मन्यन्त इत्यर्थः ॥ पं. वि. ८७.

'तमेतमेवंलक्षणम् अध्यासं पण्डिता अविद्येति मन्यन्ते' इति 'आत्मानात्मनोरितरेतराध्यासम्' इति वाक्यशेषेण भाष्यकारैरेव सुस्पष्ट-मनूद्यमानमप्यनादृत्य प्रतिपन्नोपाधौ निरस्यमानोऽर्थ एवाविद्याशब्दार्थ इति व्याख्यातमत्र, तत्र चाविद्याशब्दप्रवृत्तिनिमित्तत्वम् अविद्यान्वयव्यतिरेकः— इत्यप्रकृतमविद्योपादानकत्वं साग्रहमानीय दर्शितम्। एवं 'यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न लिप्यते' इति अध्यारोप-मात्रेण विकल्पकृतगुणदोषासंस्पृष्टत्वं तदास्पदवस्तुनः सुस्पष्टभाषया अभिदधदपि भाष्यं वक्रमार्गेणैव व्याख्यातमत्र —

(२) अविद्याध्यासविषयत्वप्रयुक्तस्तावद् गुणदोषाभावः सिद्धः। अत्राध्याससपरिणामितया आश्रयत्वप्रयुक्तदोषगुणाभावः कथ्यते। कथम् ? अनाद्यविद्याध्यासस्य नित्यचैतन्यावभासत्वात् न तत्राध्यासपरिणामः। कादाचित्काध्यासपरिणामस्य अविद्योपादानत्वात् अविद्यासंभेदात् आत्मा-श्रयत्वादिसिद्धिरिति ॥ पं. वि. ८७.

अत्र भाष्याक्षरबाह्यमेव अध्यासपरिणामादिकम्, अनाद्यविद्याध्यासकादाचित्काध्यासविभागः, तत्राक्षेपपरिहारौ च स्वाभिलषितसिद्ध्यर्थमानीता इति सुस्पष्टम् ॥

(३) यदा ज्ञानविशिष्टोऽर्थः एवाध्यासः तदा स्मर्यमाणसदृशोऽन्यात्मना अवभास्यमानोऽन्योऽर्थोऽध्यास – इत्येवंलक्षणपरतया वाक्यं योजितम्; यदा पुनरर्थविशिष्टं ज्ञानमेवाध्यासः, तदा स्मृतिसमानोऽन्यस्यान्यात्मना अवभासो अध्यास इत्येवंलक्षणपरतयापि तदेव वाक्यं योजयितुं शक्यत इत्याह – यतोऽर्थादिति ॥ पं. वि. २२.

[पञ्चपादिकावाक्यमस्य मूलमिति तत्रत्यविमर्शोऽत्राप्यन्वेति। सम्यग्ज्ञानेन मिथ्याज्ञानमेव हातव्यमिति प्रसिद्धेः, 'अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्त्ये सर्वे वेदान्ता आरभ्यन्त' इत्युपसंहारभाष्यावलोकनाच्च नात्रार्थाध्यासो भाष्यकारमनसि स्थित इति तु न पृथग् वक्तव्यम् ॥]

(४) यथाप्रतिभासमेव मिथ्यारजतस्य उत्तरज्ञानेन निरसनयोग्यस्योपगमात्. लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वाद् रजते त्रैकाल्याभावज्ञानस्य – इति संविद्द्वयानुरोधेन व्यवस्थासिद्धेः, अन्यतरसंविदपह्नवायोगात्। तथा च उभयसंविद्विषयानुभवः, 'नास्त्यत्र रजतम्, मिथ्यैव रजतमभात्' इति ॥ पं. वि. २१.

[अत्र लौकिकपरमार्थरजनविषया संविदेका, उत्तरज्ञाननिरसनीयरजतविषया अपरा – इति संविद्द्वयमस्ति वा न वा इति परीक्षकैः स्वानुभवमनपह्नुत्य वदितव्यम्। किं 'मिथ्यैवाभात्' इति प्रतिपत्तिः, उत 'मिथ्यारजतमभात्' इति ? – इत्यपि विमर्ष्टव्यमेतत् ॥]

"कारणदोषः कार्यविशेषे तस्य शक्तिं निरुन्धन्नेव संस्कारविशेषमप्युद्बोधयति। कार्यगम्यत्वात् कारणदोषशक्तेः। अतः संस्कारदुष्टकारणसंवलिता एका सामग्री। सा च एकमेव ज्ञानम्, एकफलं जनयति। तस्य च दोषोत्थापितसंस्कारविशेषसहितसामग्रीसमुत्पन्नज्ञानस्य उचितमेव शुक्तिगतमिथ्यारजतम् आलम्बनम् अवभासते। तेन मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानं न स्वतो ज्ञानस्य मिथ्यात्वमस्ति। बाधाभावात्" इति (पं. पा. ९) इति पञ्चपादिकावाक्यम्। तत्तु विवरणमन्यथैव व्याचष्टे –

(५) न रजततत्संभिन्नशुक्तिविषयम् एकं ज्ञानं समस्ति ; किं तु अविद्यैव बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यत इति ते मतम् । तत्र कथम् एकज्ञानत्वमिति ? तत्राह – 'एकफलम्' इति । विषयावच्छिन्नं हि फलमवभासते, न ज्ञानावच्छिन्नम् । विषयश्च सत्यमिथ्यावस्तुनोरन्योन्यात्मतया एकतामापन्नः, तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञानद्वयमपि एकम् इत्युपचर्यत इति भावः ॥ पं. वि. २९.

[मूलमूलिग्रन्थयोर्भिन्नप्रस्थानत्वं स्पष्टमेव । रजततज्ज्ञानयोरविद्यात्मकत्वम् इष्टसिद्धि(पा. ४७)प्रक्रियानुसारेणोक्तमिहेति च ॥]

(६) ननु क्लृप्तं विषयेन्द्रियादिदोषः कारणम् इति । सत्यम् । निमित्तं तु तत् । उपादानापेक्षायाम् 'अज्ञानमनुप्रविशति । सर्वं च कार्यं स्वोपादानं भावकार्यत्वात् घटादिवत्' इत्यनुमानात् । क्रियागुणादेरपि साश्रयस्यैवोत्पत्तेः उत्पद्यमानाश्रयस्यैवोपादानत्वात् । .... तस्मात् मिथ्यार्थतज्ज्ञानात्मकं मिथ्याभूतम् अध्यासमुपादानकारणसापेक्षं प्रति अनाश्रयस्थानतया काचादिनिमित्तकारणेषु विद्यमानेषु मिथ्याभूतस्यैव सर्वकार्यस्वभावानुकूलस्य सर्वत्रानुगमात् अज्ञानस्य आत्माश्रयतया भ्रान्तिज्ञानाश्रयकोटिनिक्षिप्तत्वाच्च मिथ्याज्ञानमेवाध्यासोपादानम्, नात्मान्तःकरणकाचादिदोषाः ॥ पं. वि. ११-१२.

[इहापि मिथ्यारजतादेः कारणसापेक्षत्वम्, तस्य भ्रान्त्यादिव्यतिरिक्तत्वं स्वाभिलषिताज्ञानसिद्ध्यर्थम् इष्टसिद्धिसंमततर्कावलम्बेन (इ. सि. ४८, ५६) प्रसाध्यत इति स्पष्टम् ॥]

'जडाश्रितमज्ञानं न तत्स्वरूपावभासं प्रतिबध्नाति, प्रमाणवैकल्यादेव अनवभाससिद्धेः' इति **पञ्चपादिकां** (पं. पा. ४) विवृण्वन्नाह –

(७) अनात्मप्रमाणस्य चैतन्यस्य वैकल्यादावरणादेव विषयानवगतिसिद्धेर्न विषये पृथगावरणं कल्पनीयम् इत्यर्थः । ... ननु शुक्तिकाविषयम् अज्ञानम् अन्यदेव तज्ज्ञानात् तन्निवर्तते, अन्यच्चात्मविषयम् अज्ञानमात्मनि दृश्यमानम् इति । तन्न । आत्माश्रयम् आत्मविषयं चाज्ञानमन्तरेण अनात्मसु प्रतिविषयं भावरूपाज्ञानसद्भावे प्रमाणाभावाद्, विषयाग्रहणस्य प्रमाणवैकल्यादप्युपपत्तेः ॥ पं. वि. १४.

[आत्माज्ञानादेव शुक्तिरजतादिधीरिति इष्टसिद्धि(पा. २०२-२०३)रत्र द्रष्टव्या ॥]

'तत्र रूपान्तरावभासहेतुरेव केवलम्' (पं. पा. ५) इति मूलमेवं व्याख्यातमत्र –

(८) नन्वत्रापि अनुपपत्तिः समाना। कथम्? शुक्तिकाज्ञानं हि रूपान्तरावभासं निवर्तयत् तदुपादानमज्ञानमपि निवर्तयतीति ते मतम्। तत्र कथं शुक्तिकाज्ञानात् सहाज्ञानेनाध्यासे निवर्त्यमाने पुनरात्मन्यज्ञानं दृश्येत? अतः प्रतिविषयम् अज्ञानभेदः, अध्यासस्याज्ञानानुपादानत्वं वा, उपादाननिवृत्तिमन्तरेणाध्यासनिवृत्तिर्वा समाश्रयणीया इति। उच्यते। अस्मिन् पक्षे शुक्तिकादिज्ञाने रजताद्यध्यासानां स्वकारणे प्रविलयमात्रं क्रियते, मुसलप्रहारेणेव घटस्य; अथवा मूलाज्ञानस्यैवावस्थाभेदा रजताद्युपादानानि शुक्तिकादिज्ञानैः सहाध्यासेन निवर्तन्त इति कल्प्यताम्॥

पं. वि. १४.

[कल्पनाराज्ये किं किं न सिध्येत्? इष्टसिद्धौ शुक्तिकाज्ञानेन तदज्ञानं साकल्येनादग्धम् – इति कल्प्यते। अत्र तु एकस्या एवाविद्यायाः प्रविलयः, अविद्याया अवस्थाभेदा वा विनाश्यन्ते इति विकल्प्यते। विवरणनिर्माणकालात् प्रागेव प्रातिभासिकरजतोत्पत्तिनिवृत्तिविषये विविधविकल्पाः इष्टसिद्धिगतकेवलतर्कसरणिमनुसृत्य व्याख्यानवेदान्तिभिरभ्यूहिता आसन् इति गम्यतेऽनेन वाक्येन॥]

(९) शुक्तिकाद्यवच्छिन्नं चैतन्यं रजताद्यालम्बनम् इति बाह्यालम्बनं रजतादि कथ्यते। सर्वत्र तु चैतन्यमेव साक्षाद् वा अन्यावच्छिन्नतया वा विभ्रमालम्बनम् इति युक्तः परत्र परावभास इत्यर्थः॥ पं. वि. ३४.

[अत्रापीष्टसिद्धि(पा. २०४)रनुसृता ॥]

इष्टसिद्धौ अनात्मभूतशुक्तिकादिविषयज्ञानाज्ञाने व्यावहारिकदृष्ट्या स्वीकृते। अनात्मव्यवहारस्तु सर्वोऽपि स्वप्नव्यवहारवद् व्यवतिष्ठत इत्युपपादितम्। इह पुनरात्माज्ञानमेव, तदवस्थाज्ञानविशेषो वा शुक्त्यादिविषयकाज्ञानमित्युक्तम् इति विशेषः॥

ख्यातिबाधविचारः –

२४९. पञ्चपादिकेष्टसिद्ध्योः ख्यात्यन्तरखण्डनप्रकारा ये आश्रिताः, त एव स्वाभिमतयुक्त्युपबृंहणपूर्वकमत्र स्थापिताः –

(१) यस्मात् भ्रान्तित्वव्यवहारः सदसज्ज्ञानयोरनुपपन्नः, यतश्च पक्षान्तरेषु अनुभवविरोधः, यतश्च ज्ञानद्वयपरोक्षस्मृतित्वस्मरणाभिमान-प्रमोषतद्धेत्वविवेकतन्निमित्तप्रवृत्तयो जन्मान्तरानुभूतस्मृतिश्च इत्यप्रतिपन्नम् अपूर्वं बहु कल्पनीयम् अख्यातौ. अन्यथाख्यातौ च अन्यत्र प्रतिपन्नस्य अन्यत्र सत्त्वम्. इन्द्रियस्य च जन्मान्तरानुभूतदेशकालव्यवहितार्थग्राहित्वम्. दोषस्य च तथाविधादृष्टसामर्थ्यम्, संसर्गस्य च शून्यस्य प्रत्यक्षता–इति प्रमाण-विरुद्धं बहु कल्पनीयम्, अतः सर्वदोषपरिहाराय यथाप्रतिपन्नस्य मिथ्यात्वं नामैकः स्वभावो 'नास्ति रजतम्, मिथ्यैव रजतमभात्' इत्यनुभवसिद्धः समाश्रयणीयः। अविद्योपादानकल्पनायाश्च अन्वयव्यतिरेकसिद्धत्वात् ॥

पं. वि. ३१.

[परपक्षद्वये दोषभूयिष्ठे सिद्धे स्वपक्षः परिशुध्यतीत्येष न युक्तोऽवगमः। 'शुक्तिका हि मिथ्यैव रजतमित्यभात्' इति सार्वत्रिकानुभवमनुसरद्भिः शुक्तिकैव तथा रजतत्वेनाध्यवसिता, नासीदेव तत्र रजतमित्यनुव्यवसायाच्च रजतोत्पत्त्यङ्गीकारोऽनुभवविरुद्ध एवेत्यवसीयते। न च तत्राज्ञानोपादानकत्व-मनुगम्यते। अज्ञानपदार्थश्च क्लृप्तविपरीतज्ञानान्यन्यतम एव–इति यथासंभव-मूह्यम्, न तु विप्रतिपत्तिस्थानमज्ञानं कल्पनीयम् इत्येव सम्यगिति भाति ॥]

यथैव 'शुक्तिरजतज्ञानस्थले विषयः सत्यमिथ्यावस्तुनोरन्योन्यात्म-तया एकतामापन्नः तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञान-द्वयमपि एकमित्युपचर्यते' (पं. वि. २९) इत्युक्तम्। एवम् आत्मानात्म-नोरितरेतराध्यासस्थलेऽपि योजितं विवरणे –

(२) एकतराध्यासे अन्यतरस्य सामान्यावभासः, अन्यतरस्यैव विशेषावभासश्च स्यात्। अत्र चिज्जडरूपेण द्वयोर्विशेषावभासो द्वयोरितरे-तराध्यासं गमयति। अध्यासे विशेषावभासस्य अध्यस्यमानताप्रयुक्तत्वात्। न च द्वयोरपि मिथ्यात्वापातः। चेतनस्याचेतने स्वरूपाध्यासाभावात्, संसृष्टतयैवाध्यासात्। न च विशेषावभासात् अधिष्ठानत्वविरोधः। अधिष्ठान-धर्मतया विशेषस्याप्रतीतेः, अधिष्ठानान्तरधर्मतया प्रतीतेः ॥

पं. वि. ९४–९५.

'एवमहंप्रत्ययिनम् अशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यसति' इति

भाष्यमेव संविदनुसारीति यथाश्रुतमेवात्र ग्राह्यम्—इत्यस्मदभिप्रायः । न हि 'संसृष्टचेतनोऽहम्' इति कस्यचिदपि प्रत्ययः । निरुपचरितं हि 'अहम्' इति प्रत्यगात्मत्वेन सर्वसाक्षित्वेन चाभिमन्यते सर्वोऽपीति प्रसिद्धमेतत् । न च प्रत्यगात्मनः स्वरूपतोऽप्यहमि समारोपितत्वे द्वयोरपि मिथ्यात्वापातः । न ह्यध्यस्तरूपेण मिथ्यात्वेऽपि सर्वसाक्षिणः साक्षित्वमसङ्गित्वं वा अणुमात्रमपि हीयत इति ॥

(३) ननु तवापि 'अस्ति' इति प्रतिपन्नस्य अनिर्वचनीयत्वे अनुभव-विरोधः समानः । तन्न । इदन्तासंसर्गवद् रजतस्य शुक्तिकासत्तासंसर्गोऽय-मवभासते न रजतस्य अपरसत्त्वम् । अथवा त्रिविधं सत्त्वम् परमार्थसत्त्वं ब्रह्मणः, अर्थक्रियासामर्थ्यसत्त्वं मायोपाधिकम् आकाशादेः, अविद्योपाधिक-सत्त्वं रजतादेः – इति परमार्थसत्त्वापेक्षया अनिर्वचनीयमिति नानुभव-विरोधः । यथानुभवम् अर्थसत्त्वाभ्युपगमात् ॥ पं. वि. ३०–३१.

नेदं युक्तम् । सत्त्वस्य विशेषाननुभवात् त्रैविध्यानुपपत्तेः । 'नासतो विद्यते भावो नाभावो विद्यते सतः' (गी. २–१६) इति भगवदुक्तिविरुद्धा हि सत्त्वेनाभिमतस्य शुक्तिशुक्तिरजतादेरभावत्वप्राप्तिः । अथ असदेव शुक्तिकादि, तर्हि नास्त्येव तस्य सत्त्वम् । न ह्यसतो भावोऽस्तीति । न चैकजातित्वं विद्यते आत्मशुक्तिरजतानाम्, येन प्रातिस्विकं संस्यात् सत्त्वसमाक्रान्तत्वम् । न च सत्त्वस्य विशेषाः सन्ति, येन स्वरूपापेक्षया सत्त्वं पररूपापेक्षया चानिर्वचनीयत्वं स्यात्, शुक्तिरजतादेः । आहुश्च भाष्यकाराः —

(अ) यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति । एकं च पुनः सत्त्वम् । अतोऽपि अनन्यत्वं कारणात् कार्यस्य ॥ सू. भा. २–१–१६, पा. २०३.

इति । कार्यत्वं नाम जगतोऽध्यस्तत्वमेवेति वक्तुं खलु शुक्तिरजतोदाहरणम् । ततश्च सिद्धमिदं यद् रजतस्य सत्त्वं नाम शुक्तिकागतसत्त्वमेव । तच्च वस्तुत आत्मसत्त्वमेवेति । अत एव हि **गीताभाष्ये** लिखितम् —

(आ) यद्विषया बुद्धिर्न व्यभिचरति तत् सत्, यद्विषया व्यभिचरति तदसत्–इति सदसद्विभागे बुद्धितन्त्रे स्थिते, सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते सामानाधिकरण्येन नीलोत्पलवत्, सन् घटः, सन् पटः, सन् हस्ती इत्येवं सर्वत्र। तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति। तथा च दर्शितम्। न तु सद्बुद्धिः॥ गी. भा. २–१६, पा. १४–१५.

इति। तत्र ह्यात्मनः सर्वत्र सद्बुद्धिगम्यत्वमनात्मनश्चासद्बुद्धिविषयत्वं विवक्षितमिति न सत्तात्रयवादस्यावकाशः। न च वस्तुनि विकल्पावकाश इति सत्तैकत्ववाद एव ज्यायानिति सिद्धम्। अध्यस्तशुक्त्यादेस्तु सत आत्मनस्तत्वान्यत्वाभ्यामनिर्वचनीयत्वम् इति च। आत्मनिश्चयपर्यन्तं तु शुक्त्यादौ अध्यस्तात्मसत्त्वमेवावलम्ब्य व्यवहारः 'सती शुक्तिका, रजतं तु मिथ्या' इतीत्यन्यदेतत्॥

अथ कोऽयं बाधो नाम? – इति पृच्छायाम् –

(१) अन्यार्थिनोऽन्यत्र प्रवृत्तिनिरोधः। (२) अविविक्ततया प्रतिपन्नस्य विवेको बाधः, (३) अन्यात्मना प्रतिपन्नस्य इतरेतराभावप्रतिपत्तिर्बाधः –

इत्येकदेशिप्रणीतलक्षणानि निराकृत्य बाधलक्षणं व्याचष्टे विवरणम् –

(४) अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः। तथाविधानवबोधनिवृत्तौ बाधप्रसिद्धेः॥ पं. वि. ३४.

प्रतिपन्नोपाधौ अभावप्रतियोगित्वमेव मिथ्यात्वं नाम। तच्च बाधकज्ञाने रजतं प्रतिपन्नोपाधावभावप्रतियोगितया अवभासत इति प्रत्यक्षम्॥ पं. वि. ३३.

अत्र प्रतिपन्नोपाधौ न केवलमभावप्रतियोगित्वम्, किं तु तादृशोपाधिव्यतिरेकेण सर्वथा सर्वदापि स्वस्य यथाप्रतिभातस्य सत्त्वाभावः, तादृशोपाधिनैवात्मवत्त्वं चावगम्यते बाधकाले – इति विवेक्तव्यम्। न तु ज्ञानस्य प्रस्थानविशेषाभिमतस्य सह कार्येण निवृत्तिरवगम्यते तत्त्वनिर्धारणकाले इति नासौ बाधलक्षणकुक्षौ अन्तर्भावनीया। किं तु, अध्यारोपिततदास्पदयोरितरेतरविवेकेन वस्तुस्वरूपनिर्धारणलक्षणेन सम्यग्ज्ञानेन मिथ्याज्ञानापगम एव बाधत्वेनावसेयः। तथा हि **गीताभाष्यवचनम्** –

(इ) इतरेतरतद्धर्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभाव-निबन्धनः, रज्जुशुक्तिकादीनां तद्विवेकज्ञानाभावात् अध्यारोपितसर्परजतादि-संयोगवत् । सोऽयमध्यासस्वरूपः क्षेत्रक्षेत्रज्ञसंयोगो मिथ्याज्ञानलक्षणः । .... निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्म स्वरूपेण यः पश्यति, क्षेत्रं च माया-निर्मितहस्तित्वप्रदृष्टवस्तुगन्धर्वनगरादिवत् 'असदेव सदिवावभासते' इत्येवं निश्चितविज्ञानो यः, तस्य यथोक्तसम्यग्दर्शनविरोधात् अपगच्छति मिथ्या-ज्ञानम् ॥ गी भा. १३-२६, पा. २१३.

इति समारोपितस्य मिथ्यावभासताम्, ततो विविच्य तत्तद्विकल्पास्पदस्य स्वरूपेण सत्यत्वज्ञानस्यैव सम्यग्ज्ञानताम्, तेन च ज्ञानेन मिथ्याज्ञानस्यापगमं च सुस्पष्टमाह । एवं हि यथा 'शुक्तिकैवेदं न रजतम्' इति सम्यग्ज्ञानाद् रजतस्य शुक्तिकामात्रस्वरूपत्वेन निर्धारणं भवति दृष्टान्ते, तथा 'ब्रह्मैवेदं विश्वम्', 'आत्मैवेदं सर्वम्', 'नेह नानास्ति किञ्चन' – इत्यादिश्रुति-जन्यज्ञानात् सर्वस्यापि प्रपञ्चस्य शुक्त्यादौ रजतादिवद् ब्रह्मण्येवाध्यस्तता, प्रतिभातरूपेणानृतता, ब्रह्मणा नित्यमेवात्मवत्ता च निर्धारिता भवतीति समञ्जसं भवति यथोक्तबाधलक्षणवर्णनम् । अन्यथा हि ब्रह्मण्यभावं जगतः प्रतिबोधयति बाधकज्ञानम्, बाधश्च वादिविशेषपरिभाषिताज्ञाननिवृत्तिः – इत्युभयमपि नावकल्पेत । ब्रह्मणि जगतो भावस्य वा अभावस्य वा अप्रसङ्गात् बाधज्ञानकाले, वादिसंमताज्ञाननिवृत्तेश्च सार्वत्रिकानु-भवानारूढत्वाच्चेति ॥

अविद्यामाययोरैक्यम् –

२५०. पञ्चपादिकायाम् 'अव्याकृतम्, अविद्या, माया, प्रकृतिरग्रहण-मव्यक्तम्' (पं. पा. २०) इत्यादिना अविद्यामाययोरव्याकृतपदार्थैनैकता प्रतिज्ञाता । तत्र मायाविद्ययोर्भेदमुररीकुर्वाणानां मतं निराकृत्य तदैक्यमेव द्रढयति स्म विवरणम् –

(१) अध्यासोपादानाविद्याकल्पितवत् कादाचित्कमायोपादानानिर्वच-नीयानादिवस्तुकल्पना । तत्र च 'मायां तु प्रकृतिम्' इति श्रुतौ प्रकृतौ

मायाशब्दप्रयोगात् प्रकृतिभूतयोर्माया-विद्ययोः, तद्विकारयोश्च अध्यास-मायथोः लक्षणाभेदात् एकत्वमवगम्यते ॥ पं. वि. ३१-३२.

[अत्राध्यासस्योपादानतया कल्पिताया अविद्यायाः सर्ववादिसंप्रतिपत्त्य-भावात् न लक्षणत ऐक्यमिति प्रत्यवस्थानं संभवति ॥]

(२) ननु स्वाश्रयव्यामोहाव्यामोहहेतुत्वाभ्यां लक्षणभेदो दर्शितः । यद्याश्रयो द्रष्टा, व्यामुह्यत्येव पार्श्वस्थो मायां पश्यन् । अथ कर्ता, न तस्य मायावित्वाद् व्यामोहाभावः, किं तु बाधनिश्चयप्रतीकारज्ञानाभ्याम् । अन्यथा पार्श्वस्थवत् कर्तापि व्यामुह्येदेव । अथेच्छया कर्तुं शक्यते माया, न तथा अविद्येति । न तदपि । मन्त्रौषधादौ निमित्तकारणे कर्तुः स्वातन्त्र्यात्, न मायायाम् । अविद्यायामपि अङ्गुल्यवष्टम्भादिना द्विचन्द्र-केशोण्डुकादिभ्रमाः, मन्त्रौषधादिनिषेवणात् स्वप्नभ्रमाः, तत्त्वज्ञानेऽप्यनु-वृत्तप्रतिभासाश्च कर्तुरिच्छया निष्पाद्यन्ते ॥ पं. वि. ३२.

[अत्र व्यामुग्धा एवाविद्यावन्त इति व्यपदिश्यन्ते, व्यामोहकदृश्य-प्रसारक एव मायावीति व्यपदिश्यते । न विपर्ययेण । व्यामोह एव चाविद्या नाम, न तु व्यामोहकं दृश्यमिति । युक्तं चैतत् । अविद्येति हि विद्यासमानाश्रया कथ्यते । न तु दृश्यविशेषो मायाख्यः । तस्यामेव हि अविद्याशब्दप्रवृत्तिनिमित्तम् उपलभ्यत इति । यत्तु, अविद्या स्वेच्छया कर्तुं शक्यत इति । तन्न समीचीनम् । यतोऽङ्गुल्यवष्टम्भादिना निष्पादितं द्विचन्द्रादिदर्शनं न तथा निष्पादयितुरविद्या भवति 'एकश्चन्द्रः सद्वितीयवद् भासते' इति निष्पादनकाले एवादर्शन-स्याभासमात्रतया निश्चयात् । न ह्यविद्या 'मया निष्पादितेयम्' इति कस्यचिदपि भासत इति ॥]

(३) न च शास्त्रव्यवहारान्मायाविद्याभेदः । 'तस्याभिध्यानात् योजनात्तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः' इत्यादिश्रुतौ सम्यग्ज्ञान-निवर्त्याविद्यायां मायाशब्दप्रयोगात् । 'तरत्यविद्यां वितर्तां हृदि यस्मिन् निवेशिते । योगी माया ममेयाय तस्मै विद्यात्मने नमः ॥' इत्यादिस्मृतौ मायाविद्ययोः सामानाधिकरण्येन तत्त्वज्ञानेन कर्तव्यत्वाभिधानात् । 'माया-मात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्' इति सूत्रे सूत्रकारेण स्वप्ने मायाशब्दप्रयोगात् । भाष्यकारेण च 'अविद्या माया', 'अविद्यात्मिका मायाशक्तिः' इति तत्र तत्र निर्देशात् । टीकाकारेण च 'अविद्या माया अक्षरम्' इत्युक्तत्वात् । ब्रह्मसिद्धिकारेण च 'एवमेवेयम् अविद्या माया मिथ्याप्रत्ययः' इत्युक्तत्वात् ॥ पं. वि. ३२.

[श्रुतौ तावत् 'मायामेतां तरन्ति ते' इति स्मृताविव परमात्मदर्शनात् अविद्यानिवृत्तौ मायामोहनिवृत्तिरुक्ता। पुराणस्मृतौ तु 'योगी मायाम्' इत्यस्य स्थाने 'योगमायाम्' इति पाठान्तरमस्ति। तत्रापि यद्विद्याबलादविद्यानिवृत्तौ मायानिवृत्तिर्भवतीत्युक्तम्; 'विद्यात्मने नमः' इति विशेषणात्। भाष्यकारस्य तु 'अविद्या माया' इति नास्ति सामानाधिकरण्येन प्रयोगः। 'एक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुः, अविद्यया – मायया मायावित्-अनेकधा विभाव्यते नान्यो विज्ञानधातुरस्ति' (सू. भा. १-३-१९) इत्यत्र तु नैव सामानाधिकरण्यम्। दृष्टान्तदार्ष्टान्तिकवाक्यस्थितयोः पदयोः सामानाधिकरण्याप्रसङ्गात्। 'अविद्यात्मिका मायाशक्तिः' इत्यपि भाष्यवाक्यं नास्ति। 'अविद्यात्मिका हि बीजशक्तिः' (सू. भा. १-४-३) इति तु मायाख्य-बीजशक्तेः, अविद्याकल्पितत्वप्रदर्शनार्थम्। स्थलान्तरे 'अविद्याकल्पिते नाम-रूपे' (सू. भा. २-१-१४) इति प्रक्रम्य 'अविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति', 'अविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वम्' इति चैकार्थत्वेन अविद्याकृताविद्यात्मकशब्दयोः अविद्याकल्पितशब्देन समानार्थकत्वेन प्रयोग-दर्शनात्। टीकाकारेण तु सामानाधिकरण्यप्रयोगः साध्यसमः। ब्रह्मसिद्धि-कारेण तु प्रस्थानान्तरत्वात् अविद्या यद्यग्रहणम् यदि वा विपरीतग्रहणम्, सदसद्विलक्षणत्वात् अनिर्वचनीयत्वादेव न ब्रह्मणः स्वभावः इति दर्शयितुम्। एवमेवेयम् अविद्या माया मिथ्यावभासः-इत्युच्यत' (ब्र. सि. 9) इत्युक्तम्। तत्रापि मिथ्यावभासमानत्वादेव माया न त्वविद्यात्वेनेति विशेषः। 'मिथ्याव-भासः' इत्यस्य स्थाने 'मिथ्याप्रत्ययः' इति धृतं त्वपपाठः। न हि प्रत्ययत्वे-नेयं मायेत्युच्यते किं त्ववभासत्वेनेति। न चाविद्या विवरणप्रस्थाने मिथ्याप्रत्यय-मात्रम्, किं तु तदुपादानकारणम् इति यत्किञ्चिदेतदुक्तम्॥]

(४) तस्मात्, लक्षणैक्यात्, वृद्धव्यवहारे चैकत्वावगमात्, एक-स्मिन्नपि वस्तुनि विक्षेपप्राधान्येन माया आच्छादनप्राधान्येन अविद्या-इति व्यवहारभेदः। इच्छाधीनत्वतद्वैपरीत्येन वा व्यवहारभेदः – इति युक्तं 'मायामयम्' इति॥ पं. वि. ३२.

[विषयविषयिस्वभावेन लक्षणभेदः स्पष्टोऽऽविद्यामाययोर्लोके। दर्शिता च वृद्धव्यवहारस्यान्यथा गतिः। यत्तु 'विक्षेपप्राधान्येन माया' इति, तत्र विक्षिप्तदृश्यरूपेणेति चेदभिप्रायः, ओमिति ब्रूमः; 'आवरणविक्षेपशक्तिद्वयवत्त्वात्' इति चेद् विवक्षा, न नामरूपलक्षणाव्याकृतस्याच्छादकत्वमस्ति, तस्या अविद्या-प्रत्युपस्थापितशरीरत्वात्। अव्याकृतलक्षणजगच्छक्तित्वेन च तस्य स्वयमेव

शक्तिस्वरूपत्वं न तु शक्तिमत्त्वमित्यपि मन्तव्यम् । इच्छाधीनत्वतदनधीनत्वाभ्यां विवेचनं स्वाभ्युपगमविरुद्धमिति च ॥]

अविद्यानिवृत्तिः –

२५१. अनाद्यध्यासस्य निवृत्तिः कथम् इत्याक्षिप्य समाधानावसरे एवमुक्तं विवरणे :–

(१) लोके तावदनादिः प्रागभावो निवर्तते । सुगतानां तत्त्वपरिभावनाप्रकर्षेण अनादिवासनासंतानानां निवृत्तिरिष्टा । नैयायिकादीनामपि अनादिर्मिथ्याज्ञानप्रवाहः, परमाणुश्यामता च निवर्तते । साङ्ख्यानामपि अविवेको निवर्तते विवेकेन । मीमांसकादीनाम् इदानींतनधर्मतत्त्वज्ञानप्रागभावोऽनादिर्निवर्तते ॥ पं. वि. ९६.

[तत्र प्रागभावनिवृत्तिर्न दृष्टान्तः, अविद्याया भावरूपत्वात्, भावत्वाभ्युपगमो हि अभाववैलक्षण्यसाधनार्थः । परतन्त्रदोषप्रकटनमात्रेण स्वाभ्युपगमस्य निर्दुष्टत्वासिद्धेश्च । अभियुक्तवचनविरोधश्चास्त्यनादेरन्तवत्त्वमभ्युपगच्छतः यस्मात्, 'अनादेरन्तवत्त्वं च संसारस्य न सेत्स्यति' (गौ. का. ४-३०) 'बन्धमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बन्धावस्था पूर्वं प्रकल्प्या अनादिमती अन्तवती च । तच्च प्रमाणविरुद्धम्' (गौ. भा. १३-२) इति ह्यभियुक्ताः ॥]

(२) अनादिभावरूपम् आत्मवन्न निवर्तत इति चेत्, न । अनिर्वचनीयत्वादज्ञानस्य । अनादिर्न निवर्तत इति सामान्यव्याप्तिः, ज्ञानेनाज्ञाननिवृत्तिरिति विशेषव्याप्तिः । अतः सैव बलवती । ननु स्वोपादानगतोत्तरावस्थाविनाशः; तत्र कथम् अनादेर्निरुपादानस्य विनाशः ? न । स्वाश्रयगतोत्तरावस्था – इत्येतावत्त्वात् । अन्यथा अणुश्यामत्वादीनामनिवृत्तिप्रसङ्गात् । अभाववैलक्षण्यात् आत्मवदज्ञानस्यानिवृत्तिरिति चेत्, न । सद्वैलक्षण्यात् प्रागभाववन्निवृत्तिः किं न स्यात् ? कस्तर्हि निर्णयः ? ज्ञानाज्ञानकृतो विशेषान्वय इत्युक्तम् ॥ पं. वि. ९६.

[अनाद्यनिर्वचनीयनिवृत्तिविषये इष्टसिद्धिः (पा. ८६, ३६८) द्रष्टव्या । तत्परीक्षा च प्राक्कृता । मुख्यवृत्त्या तु अज्ञानत्वं प्रकृतेर्विप्रतिपन्नमिति, नाज्ञानत्वकृता तस्या निवृत्तिर्भवेत् ॥]

(३) ननु ज्ञानम् अज्ञानस्यैव निवर्तकम्, कथमध्यासस्य निवृत्तिरिति ? तत्राह – 'ततः कारणनिवृत्तौ' इति ॥ पं. वि. पा. ९६.

['तत्त्वमसीत्यादिवाक्याद् ब्रह्मस्वरूपावगाहि ज्ञानान्तरोत्पत्तेरिष्टत्वात् । तद् हि ब्रह्मणोऽवच्छिद्यैव चैतन्यस्य ब्रह्मरूपत्वप्रच्छादनेन जीवरूपत्वापादिकाम् अनादिसिद्धाम् अविद्याम् अहङ्कारादिविक्षेपहेतुम्, निराकुर्वदेवोत्पद्यते । ततः कारणनिवृत्तौ तत्कार्यम् अहमिति जीवे भोक्तृत्वरूपता सपरिकरा निवर्तत इति युज्यते' (पं. पा. ३७) इति पञ्चपादिकावाक्यव्याख्यानमेतत् । अध्यासमात्रनिवर्तकत्वं ज्ञानस्य दृष्टं लोके, संशयग्रहणनिवर्तकत्वं च । एवमेव त्रिविधम् अज्ञानाविद्यान्यतरशब्दव्यपदेश्यमिति गीताबृहदारण्यकभाष्ययोरुक्तं लोकदृष्टमनुसृत्य । इहापि स्थलान्तरे लिखितम् –

'तत्त्वावभासविरोधिनोऽग्रहणमिथ्याज्ञानादेस्तत्त्वज्ञानेन निवृत्तिदर्शनात् । इहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात् तस्य ब्रह्मज्ञानान्निवृत्तेरुपपत्तेः' (पं. वि. १५.) – इति । तत्र क्लृप्ताग्रहणमिथ्याज्ञानलक्षणाध्यासादेरविद्याशब्दवाच्यस्य लोकदृष्टानुसारेण विनिवर्त्यत्वे सिद्धे, तत् स्वोक्तमपि प्रस्मृत्य किमिति कल्प्यमानतदुपादानलक्षणाविद्यानिवृत्तिद्वारा तस्य निवृत्तिरिहास्थितेति तु न ज्ञायते ॥]

(४) किं तन्निःश्रेयसम् ? कर्तृत्वभोक्तृत्वदोषसंयोगाध्यासप्रवाहोपादानस्याज्ञानस्य निवृत्तिः । न । निवृत्तेऽप्यज्ञाने द्वैतदर्शनस्यानपायात् । न हि पृथिव्यादिप्रपञ्चः कर्तृत्वाद्यध्यासनिवृत्तिमात्रान्निवर्तते । उच्यते । सत्स्वपि पृथिव्यादिषु, अन्तःकरणाध्यासनिवृत्तौ प्रमातृत्वाभावादात्मचैतन्यस्य स्वतो विषयोपरागाभावाद्, द्वैतदर्शनं न प्राप्नोति अनिन्द्रियस्येव रूपादिदर्शनम् ॥ पं. वि. २०३.

(३) ननु ब्रह्मात्मानुभवद्वैतदर्शनयोः कुतः साहित्यमुच्यते ? न वयं साहित्यं ब्रूमः । कदाचित् असंप्रज्ञातात्मैकत्वदर्शनं कदाचिदारब्धकर्मोपस्थापितदोषनिमित्तद्वैतदर्शनं चेति ॥ पं. वि. २८४.

[अत्र प्रथमे कल्पे प्रमातृत्वनिवृत्तावपि पृथिव्यादिसद्भावे प्रमाणाभावः । तत्सद्भावाङ्गीकारे चाद्वैतमिति श्रुतिकृतविशेषाभावप्रसङ्गः । द्वितीये तु द्वैतव्यवहाराभावस्य कादाचित्कावस्थाविशेषनिबद्धत्वस्वीकारप्रसङ्गात् सिद्धान्तहानम् । 'तत्त्वमसि' इति ब्रह्मात्मभावस्य अनवस्थाविशेषनिबन्धनत्वोपगमात् । न च वस्तुनि क्रियायामिव विकल्पसंभवः, येन द्वैतावशेषः कृत्स्नद्वैतनिवृत्तिश्चेत्युभयपक्षस्वीकार उपपद्येत ॥]

अविद्याविनिवृत्तेस्तर्कमात्रसिद्धत्वे, कालान्तरेऽनुभूयमानत्वे च स्वीक्रियमाणे 'अत्र ब्रह्म समश्नुते' इत्यादिश्रुतिविरोधः स्फुट एव ॥

अविद्यासंस्कारवादः –

२५२. अविद्यानिवृत्तिविचारेणेदं निष्पद्यते यद् विवरणरीत्या न कस्याप्यज्ञानं कार्त्स्न्येन जीवदवस्थायां निवर्तते इति; यतो द्वैतदर्शनं सर्वस्यापि जीवतोऽवश्यमनुवर्तते। अत्र च मण्डनादिवत् अविद्यासंस्कार-पक्षश्च इष्टसिद्धिवादवदविद्यालेशपक्षश्चाश्रितः ॥

(१) तत्त्वज्ञानात् अविद्यानिरोधेऽपि पुनरनुवृत्तिर्युज्यत इत्याह–न। संस्कारात् इति ॥ पं. वि. १०५.

(२) ननु क्रियाज्ञानयोरेव संस्कारः संभवति, नाज्ञानतत्कार्ययोः। न। गन्धादिसंस्कारदर्शनात्। प्रलयावस्थायां सर्वकार्यसंस्कारोपगमात्। सर्वत्र विनाशमात्रप्रयुक्तसंस्कारजन्मानुमानात्। अविद्यातत्कार्यस्य भ्रान्ति-ज्ञानात्मकत्वात्। अज्ञानादौ च साक्षिचैतन्यावच्छेदकज्ञानाभासोपगमात् संस्कारसिद्धेः। ननु संस्कारात् स्मृतिमात्रहेतोः कथमपरोक्षद्वैतावभासः स्यात्। अविद्यावत्संस्कारस्यापि चैतन्यदोषत्वादिति वदामः। अपरोक्षाव-भासकारणगतो दोषोऽपरोक्षभ्रमहेतुरिति सिद्धत्वात्। आत्ममात्रस्यैव अविद्याश्रयत्ववत् संस्काराश्रयत्वोपपत्तेश्च। अविद्यासंस्कारव्यतिरिक्त-कार्याणामेव अविद्योपादानत्वात्। आत्मनो मिथ्याभूतसंस्कारोपादानत्वा-भावेऽपि आश्रयोपाधित्वस्याविद्योपाधित्ववत् अविरोधात्। तत्त्वज्ञानानु-संधानादेव च क्रमेण संस्कारनिवृत्तेः, कञ्चित् कालमवस्थायैव विदेहमुक्तिर्न विरुध्यते। अविद्यालेशो वा तमोलेशवत् संस्कारशब्देनाभिधीयत इति निरवद्यम् ॥ पं. वि. १०५–१०६.

[अज्ञानस्य तत्त्वेन कल्पनमेव तावद्वादिविप्रतिपत्तिस्थानम्। तस्याः संस्कारा-भ्युपगमः, लेशावशेषाभ्युपगमो वा, तस्यां साक्षिचैतन्यावच्छेदकज्ञानाभासोपगमो वा, संस्कारादपरोक्षद्वैतावभासः, संस्कारस्याप्यविद्यादोषत्वाभ्युपगमः, आत्मन-स्तादृशसंस्काराश्रयत्वम्, तत्त्वज्ञानादेव संस्कारनिवृत्तिः, जीवन्मुक्ते तादृश-संस्काराज्ञानलेशान्यतरानुवृत्तिः – इत्येतत् सर्वमपि सुतरां वादिविप्रतिपत्ति-स्थानम्। तदुपष्टम्भकश्रुतियुक्त्याद्यभावादिति नैव पृथग्वक्तव्यम् ॥]

व्यवहारदृष्ट्या जीवस्य सशरीरत्वं कर्माशयापेक्षयैव ज्ञानोत्पत्तिं चाश्रित्य, प्रारब्धकर्मानुवृत्तिरुक्ता 'अनारब्धकार्ये एव तु पूर्वे तदवधेः' (वे. सू. ४–१–१५) इति सूत्रे तद्भाष्ये च। यद्यप्यकर्त्रात्मबोधेन सर्वं मिथ्याज्ञानं बाधितमेवेति न तत्कार्यस्य कस्यचित् कर्मणः सावशेषत्वमवकल्पते, तथापि 'बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्तत एव' इति भाष्योक्तिर्व्यवहारदृष्ट्या न दुष्यति। 'शुक्तिका हि रजतवदवभासते' इति लोकानुभवानुसारित्वात्। तदेतद् दृष्टं परित्यज्य मिथ्याज्ञानस्याप्युपादानभूतानिर्वचनीयाज्ञानमदृष्टं परिकल्प्य तस्य लेशसंस्कारादिकल्पनम, विदेहमुक्तेरेव मुख्यत्वापादनेन 'अत्र ब्रह्म समश्नुते', 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुत्यर्थबाधनं च किमर्थमाश्रीयतेऽत्रेति न विज्ञायते। आश्रिते च तस्मिन् ज्ञानस्य दृष्टार्थता सर्ववादिसिद्धा बाध्यते, अध्यारोपापवादप्रक्रिया च सांप्रदायिकी विना कारणं हीयते — इति स्पष्टमेव ॥

शास्त्रकारणत्वं ब्रह्मणः —

२५३. वेदस्येश्वरप्रणीतत्वेन प्रामाण्यवर्णनं निराकृत्य (पं. वि. २२४–२२७), वेदाप्रामाण्यवादिनां सौगतार्हतलोकायतानां मतं च निरस्य (पं. वि. २२७–२२८), अनादित्वादपौरुषेयत्वाच्च प्रमाणं वेदः इति सांप्रदायिकमतमङ्गीकृत्य (पं. वि. २२९), अनादेरपि वेदस्य ब्रह्मकारणकतात्र समुपन्यस्ता शास्त्रयोनित्वाधिकरणभाष्यप्रथमवर्णकमाधृत्य —

(१) अत्र शास्त्रशब्दोपलक्षितसर्वशब्दानां वर्णानाम् एकपदार्थबुद्ध्यवच्छेदकवर्णनियामकक्रमविशिष्टपदानां वाक्यार्थबुद्ध्यवच्छेदकवाक्यनियामकक्रमविशिष्टवाक्यानाम्, महावाक्यार्थबुद्ध्यवच्छेदकवाक्यनियामकक्रमविशिष्टप्रकरणानां परिपूर्णपुरुषार्थसाधनबुद्ध्यवच्छेदकानेकप्रकरणनियामकक्रमविशिष्टशास्त्राणां च प्रवाहरूपेण ब्रह्मोपादानतया कार्यत्वमस्तीत्याह— 'तत्परतन्त्रत्वात्' इत्यादिना ॥ पं. वि. २३०.

वेदानां चानिर्वचनीयत्वमुक्तम् –

(२) विशिष्टार्थतत्प्रत्यययोर्भावाद् विज्ञानव्यतिरेकेणार्थस्यानिर्वचनीयत्वेऽप्यर्थक्रियासमर्थतया तुच्छव्यावृत्तसत्ताभ्युपगमात् अस्त्येवार्थावबोधसमर्थो वेदः ॥ पं. वि. २३०.

शास्त्रकारणत्वाच्च ब्रह्मणः सर्वज्ञत्वमित्येतदेवमुपपादितम् –

(३) अस्ति तावद् वर्णानां क्रमसंख्यादिभेदभाजां मुख्यलक्षणादिद्वारेण सर्वार्थप्रकाशनसामर्थ्यम् । अव्यपदेश्यस्य वस्तुनोऽभावात् । तत्र कार्यगतमर्थप्रकाशनसामर्थ्यमुपादानकारणधर्म एव भवति । प्रदीपगतप्रकाशनसामर्थ्यस्य वह्निधर्मत्वदर्शनात् , कार्योपादानयोः शक्तिद्वयकल्पनायोगात् । एवं सर्वार्थप्रकाशनसमर्थत्वात् सर्वज्ञं ब्रह्म । ..... तस्मात् सर्वार्थप्रकाशनसमर्थसर्वशब्दोपादानतया सर्वज्ञं ब्रह्म ॥ पं. वि. २३१.

वेदस्य सर्वार्थप्रकाशकत्वात्, तदुपादानस्यैवेदं प्रकाशनसामर्थ्यं भवितुमर्हति इत्युक्तं यद्यपि सम्यगेव, तथापि भाष्ये निःश्वसितश्रुत्युदाहरणेन पाणिन्यादिदृष्टान्तादानेन च लीलान्यायेनोत्पन्नत्वमेव प्राधान्येन विवक्षितमिति गम्यते । उक्तं च **बृहदारण्यकभाष्ये** –

(क) 'पुरुषनिःश्वासवदप्रयत्नोत्थितत्वात् प्रमाणं वेदो न यथा अन्यो ग्रन्थः' इति ॥ बृ. भा. २-४-१०, पा. ७६३.

एवं सर्वकारणत्वेन चैतन्यरूपेण सर्वप्रकाशनसामर्थ्यात् सर्वज्ञं ब्रह्मेत्यपि सम्यगेव । यथोक्तं **तैत्तिरीयभाष्ये** –

(ख) नित्यस्वरूपत्वात्, सर्वभावनां च तेनाविभक्तदेशकालत्वात्, कालाकाशादिकारणत्वान्निरतिशयसूक्ष्मत्वाच्च, न तस्य अन्यत् अविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद् भविष्यद् वा अस्ति' ॥ तै. भा. पा. २८५.

इति ; तथापि कैमुतिकन्यायेनात्र अप्रयत्नेनैव सर्वज्ञानाकरस्य वेदस्योत्पादनात् पाणिन्यादितोऽप्यतिशायिविज्ञानवत्त्वसाधनात्, तत एव हेतोः सर्वज्ञत्वं सिषाधयिषितं भाष्ये इति गम्यते । सर्वार्थप्रकाशनसामर्थ्यलक्षणहेतुस्तु 'जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्' इत्यनेनैव भाष्येण गत इति ॥

भूतवस्तुत्वेऽपि ब्रह्मणः शास्त्रप्रमाणकत्वम् –

२५४. सर्वोऽपि वेदार्थो पूर्वमीमांसायां न विचारितः–इत्यतो वस्तुविषयोऽपि विचार्यत्वेनावशिष्यत इति गम्यते ; कार्यनिष्ठ एव हि वेदभागस्तत्र विचार्यतया प्रक्रान्तो विचारितश्च न वस्तुनिष्ठः – इत्यतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुं शारीरकमीमांसा प्रारभ्यते (पं. पा. ५१) – इति पञ्चपादिकोक्तमेव व्याख्याय प्राह विवरणकारः –

(१) तत्र श्रुतिसूत्रयोर्ब्रह्मशब्दप्रयोगसामर्थ्यादेव जात्यादिव्यतिरिक्तं किञ्चिद्वस्तु प्रतिपत्तुं शक्यते । ... वाक्यार्थप्रमितिविवक्षया प्रसिद्धार्थैः पदान्तरैः सहाप्रसिद्धार्थपदप्रयोगानुपपत्तिरेव प्रतिपाद्येन संबन्धग्रहणानपेक्षया पूर्वपदार्थं पदवाच्यत्वेन प्रतिपादयति । .... तत्र च निगमनिरुक्तव्याकरणादिकं नियामकं भवति पदार्थविशेषग्रहणे (१८३)[1] । सत्यज्ञानानन्दप्रत्यगात्माद्वितीयब्रह्मपदार्थे अप्रसिद्धेऽपि बहुत्वमात्रस्य प्रसिद्धत्वात्, तदनुवादेन संनिहितपदार्थसंसर्गसामर्थ्याद् विशिष्टं ब्रह्म प्रतिपत्तुं शक्यते (२२१) । प्रमाणान्तरगृहीते अर्थे प्रयोगसामर्थ्यादेव अर्थप्रतिपत्तौ अल्पं वा महद् वा यथा प्रमाणान्तरेण प्रतिपद्यते तथैव शब्दार्थः प्रतिपत्तव्यः । यदा पुनः प्रयोगसामर्थ्यमनपेक्ष्य शब्दानयनसामर्थ्यादेवार्थोऽनुगम्यते, तदा प्रमाणान्तरोपपदप्रकरणानां सङ्कोचहेत्नामभावात् यथासामर्थ्यं मुख्य एवार्थः प्रतिपत्तव्यः (१८५) – इति देशकालवस्तुपरिच्छेदरहितनिरतिशयमहद्वस्तु ब्रह्मशब्दार्थः ॥

(२) प्रमाणेन हि प्रमीयमाणस्यार्थस्य प्रमाणान्तरानुत्पादो मिथ्यात्वं नावहति । सर्वप्रमाणानामनधिगतार्थगन्तृत्वात् । अन्यथा चक्षुषा गृह्यमाणस्य रूपस्य द्रव्यस्य वा स्पर्शेनाग्रहणात् मिथ्यात्वशङ्का स्यात् । कथञ्चित् सापेक्षप्रमाणस्य पुरुषवचसः प्रमाणान्तराभावे मिथ्यात्वाशङ्का स्यात्, न त्वपौरुषेयस्य वेदवचसः । अनपेक्षत्वात् ॥ पं. वि. २४०.

(३) भूतार्थविषयत्वेन नदीतीरफलसत्तावाक्यवत् प्रमाणान्तरसंभिन्नार्थतेति चेत् । न । पौरुषेयवचनप्रयुक्तत्वात् संभेदस्य । भूतार्थप्रयुक्तत्वे

1. अत्र खण्डे सर्वत्र पं. वि. इति सङ्केताक्षरग्रहणं कर्तव्यं कंसान्तर्गतसंख्यानिर्देशात् पूर्वम् । अत्र ग्रन्थकर्त्रभिप्रायाः प्रायेण यथाक्षरमेव संगृहीताः ॥

प्रत्यक्षादीनामपि संभेदः स्यात् । ननु भूतार्थस्मृतौ संभेदो दृश्यत इति चेत् । तर्हि स्वार्थप्रवृत्तज्ञानान्तरजन्यता संभेदहेतुः । कार्यभूतार्थनिष्ठयो-र्लौकिकवचसोस्तथा दर्शनात्। पुरुषो हि प्रमाणान्तरेणार्थमुपलभ्य तन्निमित्तं परस्मै शब्दं विरचयति । न तु वेदवचसः प्रमाणान्तरजन्यता इत्यनपेक्षता । किञ्च । तुच्छव्यावृत्तमात्रं प्रमाणान्तरयोग्यम् इति विधिवाक्यानामपि संभिन्नार्थतया सापेक्षता स्यात् । लौकिकविधीनां प्रमाणान्तरयोग्यता-दर्शनात् । अयोग्यत्वे वा तत्र संबन्धाग्रहणाद् वेदेऽप्यर्थप्रतिपत्तिर्न स्यात् । ननु कार्यस्य साध्यस्वभावत्वात्, न प्रमाणान्तरगम्यतेति । ब्रह्मापि तर्हि रूपादिहीनत्वात्, न प्रमाणान्तरेण गम्यते ॥ पं. वि. २४०.

(४) (प्रमाणान्तरयोग्यार्थत्वात् तत्सिद्धार्थानुवादशङ्कापि न) । स्पर्शज्ञानयोग्यद्रव्यविषयस्य चक्षुषोऽनुवादकत्वादर्शनात् । शब्दविषयोऽयं नियम इति चेत् । विधिवाक्यस्यापि स्यात् तस्यापि लौकिकस्य मानान्तर-योग्यत्वात् । शब्दावगतस्य वा प्रमाणान्तरमनुवादः किं न स्यात् ?

पं. वि. २४०.

(५) अपौरुषेयस्य शब्दस्यानपेक्षप्रमाणत्वात्, मानान्तरसंवाद-विसंवादाभ्यां न किञ्चित् परिहीयते ॥ पं. वि. २४३.

(६) इदं निरूपणीयम् । पुरुषः खलु इष्टानिष्टप्राप्तिपरिहारमात्रं प्रार्थयते किं वा तयोः प्रवृत्तिनिवृत्तिसाध्यतामपीति ? तत्र प्रवृत्तिनिवृत्ति-साध्येष्टानिष्टप्राप्तिपरिहारप्रार्थनाकल्पनात् लघीयसी हिताहितप्राप्तिपरिहार-कल्पना । .... फलमेव हि मुख्यं प्रार्थयते, नान्तरायिका साधनप्रार्थना ॥

पं. वि. २४४.

(७) यस्मिन्नर्थे वाक्यस्योपक्रमोपसंहारैकरूप्यम्, यस्य चार्थस्य पुनः पुनरभ्यासः, यस्मिन्नर्थे फलविशेषसंकीर्तनम् अपूर्वार्थप्रमेयता च, यत्र चार्थवादोपादानमुपपत्तिभिरुपपादनं च – इत्यादीनि लिङ्गानि भवन्ति, तस्य वाक्यस्य तस्मिन्नर्थे तात्पर्यमिति गम्यते । .... सर्वेषु वेदान्तेषु ब्रह्मात्मैकत्वप्रमितौ तात्पर्यलिङ्गानि द्रष्टव्यानि । एवं तात्पर्येण समन्वयात्, ब्रह्मैव वेदान्तप्रमेयमिति ॥ पं. वि. २३५–२३६.

(८) सर्वे जगत्कारणविषया शब्दा मुख्यलक्षणोपाधिभिरेकरसमेव ब्रह्म प्रतिपादयन्ति । न चानिर्वचनीयभेदाभावयोः शब्दप्रवृत्तिनिमित्तयोः परमार्थसत्यैकरसभेदनिमित्तता ॥ पं. वि. २३७.

['पदानां परस्परानवच्छिन्नार्थानाम् अनन्याकाङ्क्षाणाम् अव्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वयः' (समन्वयः)–इति पञ्चपादिकोक्तिव्याख्यानावसरे ॥]

(९) क्रियाकारकसंसर्गविषयतया पदानामन्वयं व्यावर्तयति 'परस्परानवच्छिन्नार्थानाम्' इति । तत्र उद्भिदादिशब्दस्य यजतिसामानाधिकरण्येनोद्भिद्यागमात्रवर्तिनोरुद्भिद्यागशब्दयोरनवच्छिन्नार्थत्वेऽपि नियोगाकाङ्क्षा विद्यते; तथेहापि स्यादिति, नेत्याह 'अनन्याकाङ्क्षाणाम्' इति । .... ननु नीलोत्पलवद् भेदाभेदविषयतयाप्यभिधेयाव्यतिरेक इति, नेत्याह 'एकरस' इति । तत्रोद्भिद्यागशब्दयोर्यागविशेषैकरसार्थवर्तिनोरपि अर्थस्य नियोगाकाङ्क्षावत् इहाप्यन्याकाङ्क्षेति, नेत्याह 'प्रातिपदिकार्थ' इति । तत्रापि लिङ्गसंख्ययोरवश्याभ्युपगमनीयतेति, नेत्याह 'मात्रान्वय' इति ॥

पं. वि. २३६.

(१०) तत्र द्विविधा वाक्यप्रवृत्तिः । एका ब्रह्मात्मनोरेकत्वविषया, अपरा सत्यज्ञानादिलक्षणब्रह्मविषया । तत्र प्रथमं ब्रह्मात्मैकत्वे दृष्टान्तमाह – सोऽयमित्यादिवाक्यस्थपदानामिवेति । .... तत्र न तद्देशकालयोरेतद्देशकालयोश्च परस्परैक्यं प्रत्यभिजानाति भेदप्रत्ययात् । अत एव विशिष्टयोरप्यैक्यं न प्रत्यभिज्ञायते । किं तु सोऽयमिति विशिष्टद्वयोपलक्षितः प्रत्यभिज्ञागोचरः । प्रत्यभिज्ञातं चार्थं परस्मै सोऽयमिति विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशपरित्यागेन, एकदेशलक्षणया देवदत्तस्वरूपैक्यमेव प्रतिपादयति । (पं. वि २३७) ... तथा तत्त्वमसिवाक्यस्यापि त्वंपदेनैकदेशपरित्यागेन लक्ष्यमाणद्रष्टृस्वरूपस्य पारोक्ष्यपरित्यागेन तत्पदाभिधेयब्रह्मस्वरूपैक्ये वाक्यजन्यज्ञानगोचरेऽपि जीवब्रह्मपदार्थप्रतीतिसमये प्रतिपन्नैक्यविषयतया अनुवादप्राप्तावपि भेदप्रतिभासविरोधित्वा प्रामाण्यम् उपपद्यते ॥

पं. वि. २३८.

(११) ननु पदार्थयोः प्रत्येकम् असाधारणम् ऐक्यं पदार्थप्रत्ययगोचरः, पदार्थयोरितरेतरैक्यं वाक्यगम्यम् इत्यस्त्येव प्रमेयभेदः । नैतत् सारम् । भिन्नद्रव्ययोरैक्यप्रतिपादने तथा स्यात् । यदा एकमेव द्रव्यं भिन्नोपाधिपरिकल्पितभेदप्रतिभासव्युदासेन प्रतिपाद्यते, तदा निवर्त्यविशेषादेव प्रामाण्यं न प्रमेयविशेषात् । तदुक्तं 'सिद्धं तु निवर्तकत्वात्' इति । इह तु कार्यकारणद्रव्यव्यतिरिक्तत्वे सति द्रव्याभिधायिपदयोः सामानाधिकरण्यम् 'सोऽयम्' इतिवदेकस्य द्रव्यस्योपाधिपरिकल्पितभेदव्युदासेनैकद्रव्यपर्यवसायीत्यवगम्यते ॥ पं. वि. २३८.

अत्रोदाहृतानि वाक्यानि सर्वाण्यपि शब्दधर्मस्वभावमाश्रित्य विचारं प्रतन्वन्ति । स्वभावतश्च शब्दः प्रमेयविषय एवेति ब्रह्मविषयकत्वं तस्य कथमित्यत्र विशेषहेतुर्वक्तव्यः । तत्र वेद्यवेदित्रादिविभागरहितं ब्रह्मेति ज्ञापयदेव शास्त्रं तत्र प्रमाणमिति स्पष्टं भाष्ये –

(क) न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति । किं तर्हि प्रत्यगात्मत्वेन अविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृ-वेदनादिभेदमपनयति ॥ सू भा. १–१–४, पा १६.

इति । एतदप्यभ्युपगम्य विवरणे लिखितम् –

(१२) ननु 'मनसैवानुद्रष्टव्यम्', 'तं त्वौपनिषदं पुरुषम्' इति ज्ञानक्रियाकर्मत्वमपि श्रूयते । नैष दोषः । वेदान्तजनितापरोक्षज्ञानस्याकार-समर्पकतया व्यावर्तकत्वं शास्त्रप्रमेयत्वं नाम, ज्ञानजन्यप्रकाशातिशयशून्यत्व-मविषयता नाम – इति व्यवस्थोपपत्तेः । न हि प्रकाशगुणे पुनः प्रकाश-गुणान्तरोदय इति ॥ पं. वि. २६४.

इति । तत्र यदुच्यते शास्त्रप्रमेयत्वं नामापरोक्षज्ञानाकारसमर्पकतया व्यावर्त-कत्वमिति, तदुत्तरत्र विभ्रक्ष्यामः । शब्दप्रामाण्यं तु न परमात्मविषयक-ज्ञानोत्पादनेन, किं तु यथोदाहृतभाष्योक्तनीत्या वेद्यवेदित्रादिविभागाध्या-रोपनिराकरणमात्रेणेत्येवावश्यमभ्युपगन्तव्यमित्येतावदिह ब्रूमः ।

(ख) तस्मादविद्याध्यारोपितनिराकरणमात्रं ब्रह्मणि कर्तव्यम्, न तु ब्रह्मविज्ञाने यत्नः । अत्यन्तप्रसिद्धत्वात् ॥ गी. भा. १८–५०, पा. २८०.

इत्यादिभाष्यप्रामाण्यात् । 'मनसैवानुद्रष्टव्यम्' (बृ.), 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ.) इत्यपि न ज्ञानक्रियाकर्मत्वमुच्यते । 'यन्मनसा न मनुते' इति श्रुतिकोपप्रसङ्गात् । 'नेह नानास्ति किञ्चन', 'स एष आत्मा नेति नेति' इति वाक्यशेषेण अविद्याध्यारोपितव्यतिरेकेण द्वैतं नास्त्ये-वेत्यवधारणात् । न च विज्ञातेर्विज्ञातुरन्यज्ज्ञानं दर्शनाख्यं काङ्क्षितव्यमस्ति । तथा हि बृहदारण्यकभाष्ये –

(ग) ननु विप्रतिषिद्धं 'न विज्ञातेर्विज्ञातारं विजानीयाः' इति श्रुतेर्विज्ञातुर्विज्ञानम् । न । एवंविज्ञानान्न विप्रतिषेधः । एवं दृष्टेर्द्रष्टा इति विज्ञायत एव । अन्यज्ञानानपेक्षत्वाच्च । न च द्रष्टुर्नित्यैव दृष्टिरित्येवं विज्ञाते द्रष्टृविषयां दृष्टिमन्याम् आकाङ्क्षते । निवर्तते हि द्रष्टृविषयदृष्ट्याकाङ्क्षा तदसंभवादेव ॥ बृ. भा. १-४-१०, पा. ६७३.

इति । अथ, एवंज्ञानमेव वेदान्तजनितापरोक्षज्ञानं नामेति, न तदा कश्चन दोषः ॥

विचारस्तर्कश्च –

२५५. स्थिते शब्दस्य प्रामाण्ये विचारस्य किं प्रयोजनमिति ? अत्रोच्यते विवरणकारैः –

(१) न शब्दसमवायी कश्चिद्दोषोऽस्ति पुरुषेन्द्रियसमवायित्वाद्दोषाणाम् । अतः शब्दो न विपर्यासादिज्ञानहेतुः, किं तु शब्दानां प्रयोगान्तरेषु अन्यथान्यथा शक्तितात्पर्योन्नयनदर्शनात् । इहापि तथातथाविधत्वसाम्रान्यतोदर्शनेन अर्थविरोधबुद्धया च पुरुषदोषेणान्यथाज्ञानान्युत्पद्यन्ते । शब्दाच्च तत्त्वज्ञानमेवोत्पद्यते । ततश्च शब्दात् पुरुषदोषाच्च बहुषु परस्परविरोधिषु ज्ञानेषु जातेषु शब्दशक्तितात्पर्यावधारणं पुरुषदोषापनयनेन प्रतिपक्षज्ञानान्तरमात्रं निवर्तयति । निवृत्ते च प्रतिबन्धे शब्दादेव तत्त्वज्ञानं जायते ; जातं वा निश्चलमवतिष्ठते । तस्मात् न विचारः प्रमाणेतिकर्तव्यतया ब्रह्मविषयः ॥ पं. वि. १८१.

(२) पदानामेव संसर्गप्रतिपादनसामर्थ्यात्, मुख्यलक्षणादिद्वारेण प्रमाणान्तराविरुद्धे संसर्गे प्रतिपन्ने दोषान्तरनिमित्तसंशयविपर्यासाविज्ञाननिराकरणाय तात्पर्यावगमः ॥ पं. वि. १८२.

(३) प्रमाणादेवार्थापरोक्ष्यनिश्चये तत्प्रतिबन्धापगमे तर्कस्योपयोगान्नार्थनिर्णयहेतुतेत्युक्तम् ॥ पं. वि. १०३.

(४) ज्ञानानन्दसर्वज्ञप्रत्यगात्मभूतं ब्रह्म निश्चाययितुमसमर्था अपि युक्तयः शब्दावगते ब्रह्मणि सामान्यद्वारेण संभावनाबुद्धिहेतवो भवन्ति । कथम् ? जगदुपादाने अद्वितीये शब्दावगते मृदादिदृष्टान्तैरुपादानव्यतिरेकेण कार्यस्यानिरूपणात्, अद्वितीयता संभाव्यते ; स्फटिकलौहित्यप्रतिबिम्ब-

रज्जुसर्पघटाकाशदृष्टान्तैरात्मनि कर्तृत्वादेरारोपितत्वम्, जीवब्रह्मैक्यम्, ब्रह्मव्यतिरिक्तप्रपञ्चस्वातन्त्र्याभावः, असङ्गत्वद्वारेण विशुद्धाद्वितीयप्रत्ययगात्मता संभाव्यते ॥ पं. वि. २२१.

['ब्रह्मपरेषु वाक्येषु मृदादिदृष्टान्तैर्युक्तय उपन्यस्यन्ते' इत्यादि 'स्वरूपवाक्यस्य फलपर्यन्तापेक्षितसंभावनार्थवादतां प्रतिपद्यमानास्तत्र श्रुतिसाहाय्ये वर्तन्ते इत्युच्यते' इत्यन्त(पं. पा. ८१)वाक्यस्य विवरणमिदम् ।

एकविज्ञानेन सर्वविज्ञानं कथमिति हृदयमागमयितुमुपन्यस्तेषु मध्ये स्फटिकादिदृष्टान्ता नैव लक्ष्यन्ते, नैव च तेषां तत्र यथोक्ताकर्तृत्वादिस्वरूपनिर्धारणे सहायकत्वमिति स्पष्टमेव । यद्यपि भाष्ये स्फटिकादिदृष्टान्ता दर्शिदृश्यन्ते, तथापि न तेषां प्रतिज्ञासिद्ध्यर्थं विनियुक्तत्वमस्तीति न मृदादिसाम्यम् ॥]

(५) प्रमाणादेवार्थापरोक्ष्यनिश्चये तत्प्रतिबन्धविगमे तर्कस्योपयोगात् । नार्थनिर्णयहेतुता ॥ पं. वि. पा. १०३.

[अस्य वाक्यस्याभिप्रायोऽनुपदमेव ब्रह्मापरोक्ष्यविचारे विमर्शनीयः ॥]

अपरोक्षज्ञानं तत्साधनानि च –

२५६. अत्रापि पञ्चपादिकायामिव शब्दादेव ब्रह्मापरोक्ष्यमित्यनुमन्यते । कल्पान्तरमप्युक्तम् । तद्यथा –

(१) लोके तावद् विषयस्यापरोक्षता संविदभेदाद् वा विषयस्य अव्यवधानतया स्वसंविजनकत्वाद् वा, प्रमाणकारणेन्द्रियसंप्रयुक्तत्वाद् वा, भवति । उक्तकारणत्रयहीने अनुमेयादौ परोक्षतादर्शनात् । तत्र ब्रह्मण एव सर्वसंविदुपादानत्वात्, ब्रह्माकारशब्दप्रमाणजन्यसंवेदनेऽपि तदभिन्नतया वा तज्जनकतया वा ब्रह्मापि प्रथममेव अपरोक्षतया अवभासते । तच्च चित्तस्य अतिसूक्ष्मे अनेकाग्रतादोषात्, विपर्ययसंस्कारदोषाच्च प्रतिबद्धं भ्रान्त्या परोक्षवदवभासते । तत्रापरोक्षज्ञानमुद्दिश्य यज्ञादीनां शमादीनां निदिध्यासनादीनां च विधानसामर्थ्यात् यज्ञादिनिबर्हितकल्मषप्रतिबन्धम्, शमादिनिरुद्धविपरीतप्रवृत्तिदोषम्, मननसंदर्शितप्रमेयादिसंभावनागुणप्रदीपोज्ज्वलितम्, अतिसूक्ष्मतरब्रह्मात्मविषयनिदिध्यासनप्रचयपरिनिर्मिततदेकाग्रवृत्तिगुणं च इन्द्रियं पारोक्ष्यविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेवापरोक्ष्यनिश्चयनिमित्तं भवतीति गम्यते । लोके च अतिसूक्ष्मवस्तुनिर्धारणे

चित्तैकाग्र्यविशेषापेक्षाया दर्शनात् । तर्कशब्देन चात्र एतादृशं सर्वप्रतिबन्ध-निरासिचित्तदर्पणमुच्यते । यौक्तिकासंभावनाविपरीतभावनानिरासितर्काणां प्रथमज्ञाने अन्तर्भूतत्वात् । एवं च 'तं त्वौपनिषदम्' इति तद्धितप्रत्ययेन ब्रह्मावगतिहेतुत्वं शब्दस्य दर्शितम् उपपन्नं भवति । अपरोक्षावगतेरेव सम्यगवगतित्वात् ॥ पं. वि. १०३.

(२) अन्यन्मतम् । न प्रथमोत्पन्नं शाब्दज्ञानमेव प्रतिबन्धविगमा-पेक्षया अपरोक्षावभासं भवति, किं तु शब्द एव प्रथमं ब्रह्मणि परोक्ष-ज्ञानम् उत्पाद्य पुनर्वर्णितचित्तदर्पणसहकारिकारणापेक्षया द्वितीयम् अप-रोक्षज्ञानम् उत्पादयति । शब्दादीनां तद्धितप्रत्ययादिना अपरोक्षज्ञाने विनियोगसामर्थ्यात् । यथा संप्रयोगः, अभिज्ञाम् उत्पाद्य पुनः पूर्वानुभव-संस्कारापेक्षया प्रत्यभिज्ञाम् उत्पादयति, तद्वत् । न च स्वयंप्रकाशे ब्रह्मणि परोक्षज्ञानं विभ्रमः । स्वयंप्रकाशेऽपि पुरुषान्तरसंवेदने परोक्षानुमानदर्शना-दिति । सर्वथापि आपरोक्ष्यस्य प्रयत्नान्तरलभ्यत्वात्, युक्तं पृथक् प्रतिपत्ति-शब्दग्रहणम् ॥ पं. वि. १०४.

'आत्मैकत्वविद्याप्रतिपत्तये' इत्यत्र 'प्रतिपत्ति'शब्दग्रहणस्यास्य-कथनमिदम् । तत्र प्रथमपक्षः पञ्चपादिकास्थ एव विवृतः । तर्कशब्दार्थो यथावर्णितचित्तदर्पणमित्यत्र तु नास्ति श्रुतिः, भाष्यं वा । भाष्ये हि –

(१) वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते ॥ सू. भा. १-१-१.

(२) तथा हि 'श्रोतव्यो मन्तव्यः' इति श्रुतिः । 'पण्डितो मेधावी गन्धारानेवोपसंपद्येतैवमेवेहाचार्यवान् पुरुषो वेद' इति पुरुषबुद्धि-साहाय्यमात्मनो दर्शयति ॥ सू. भा. १-१-२.

(३) (a) प्रकृते तावद् विषये प्रसज्यत एवाप्रतिष्ठितत्वदोषाद्-निर्मोक्षस्तर्कस्य । न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनम् आगम-मन्तरेण उत्प्रेक्षितुमपि शक्यम् । रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षगोचरः । लिङ्गाद्यभावाच्च नानुमानादीनामिति चावोचाम ॥

सू. भा. २-१-११, पा. १९३.

(b) यद्धि केनचित् तार्किकेण इदमेव सम्यग्ज्ञानम् इति प्रतिष्ठापितम्, तद्परेण व्युत्थाप्यते, तेनापि प्रतिष्ठापितं ततोऽपरेण व्युत्थाप्यत इति प्रसिद्धं लोके । कथमेकरूपानवस्थितविषयं तर्कप्रभवं सम्यग्ज्ञानं भवेत् ? ॥ सू. भा. २-१-१२.

(४) यदपि श्रवणव्यतिरेकेण मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयतीत्युक्तम् । नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः संभवति । श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते ॥

सू. भा. २-१-५, पा. १८८.

इति च मीमांसारूपस्तर्कः, श्रुत्यनुगृहीततर्कश्चेति द्वावेव तर्कौ अङ्गीकृतौ । निरागमः पुरुषोत्प्रेक्षामात्रनिबन्धस्तु तर्कोऽप्रतिष्ठितत्वदोषदुष्टत्वेन त्यक्तः । तस्मात्, श्रुतिसहायत्वेन संमतस्तर्कः श्रुत्यनुगृहीत एवानुभवानुसारी अवस्थात्रयविमर्शनादिलक्षणो नान्य इति सिध्यति ॥

यत्तु परोक्षज्ञानविभ्रमनिरासार्थस्तर्क इति । तद्युक्तमेव । 'यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा' इति श्रुतेर्नित्यापरोक्षत्वाद् ब्रह्मणः । यत्तु श्रुतिजन्यो ज्ञानेऽपरोक्षेऽपि परोक्षविभ्रम इति, तदसत् । आत्मरूपेण नित्याव्यवहितस्य ब्रह्मणो ज्ञानं हि नाम तत्राध्यारोपितनिराकरणमात्रम् । अत एव हि गीताभाष्ये (१८-५०, पा. २८२) लिखितम् –

'तस्मात्, ज्ञाने यत्नो न कर्तव्यः, किं तु अनात्मनि आत्मबुद्धिनिवृत्तावेव'

इति । अत एव शाब्दज्ञानं प्रथमोत्पन्नं परोक्षम्, अपरोक्षं तु प्रयत्नान्तरलभ्यम् इत्यप्यसाधु । शब्दस्याप्रामाण्यप्रसङ्गात्, मण्डनादिसंमतज्ञानाभ्यासपक्षोक्तदोषप्रसङ्गाच्चेति भाष्योक्तरीत्यैव शब्दादपरोक्षज्ञानोत्पत्तिरङ्गीकर्तव्येत्यलमतिविस्तरेण ॥

श्रवणादिविचारः –

२५७. प्रतिपत्तिविधिनिराकरणं प्रायशो मण्डनप्रक्रियानुसार्येवात्र । (१) शाब्दज्ञानस्य, (२) तत्स्मृतिसंतानस्य, (३) ब्रह्मध्यानस्य, (४) अपरोक्षज्ञानस्य वा विधानं न संभवति (पं. वि. २४८-२५०) ।

(५) अहं ब्रह्मास्मीत्युपासनाया अपि न मोक्षफलकत्वम्, मोक्षस्यानित्यत्व-प्रसङ्गात्, मिथ्याज्ञाननिवृत्तिफलं तत्त्वज्ञानम् – इति न्यायविरोधाच्च (पा. २५२–२५७)–इत्यादियुक्तिभिः विधिशेषत्वं ब्रह्मणो निराकृत्यापि, अत्र मण्डनप्रस्थानमेवानुसृत्योक्तम् –

(१) शब्दादवगते ब्रह्मणि सुखसंवेदनत्वात् अभ्यासेनापरोक्षीकृते विधि-मन्तरेण यत् साक्षात्का(क?)रणम्, तद् ब्रह्मवेदनमित्युच्यते। तस्मिन्नुत्पन्ने अनन्तरमेवाविद्यादिदोषनिवृत्तेर्युक्तं ब्रह्मसंवेदनेन समानकालत्वं फलस्य ॥
पं. वि. २५६.

इति। इदं तु मण्डनपरीक्षयैव परीक्षितमिति न किञ्चिदधिकं वक्तव्यमस्ति ॥

अत्र च श्रवणादीनामर्थवादमात्रत्वम् (पं. पा. ९३) पञ्चपादिकोक्तं नाङ्गीकृतम् ॥

(२) नित्येनैवाध्ययनविधिना अधीतस्वाध्यायो वेदान्तवाक्येष्वापात-दर्शनेनेदमवगच्छति। 'आत्मनस्तु कामाय सर्वं प्रियम्' इत्युपक्रमात् सर्वतो विरक्तस्य आत्मप्रेप्सोः 'आत्मनि विज्ञाते सर्वमिदं विज्ञातम्', 'एतावदरे खल्वमृतत्वम्' इत्युपसंहारात्, अमृतत्वसाधनम् आत्मदर्शनं 'द्रष्टव्यः' इत्यनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवण नामाङ्गि विधीयत इति। .... तं च जिज्ञासुं पुरुषार्थकामम् उपलभ-मानो भगवान् बादरायणः साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारं विदधतो विधेः, अपेक्षिताधिकारिविषयफलानुबन्धत्रय-मागमिकमपि न्यायेन निर्णेतुं सूत्रयामास 'अथातो ब्रह्मजिज्ञासा' इति ॥
पं. वि. ३–४.

(३) आत्मतत्त्वापरोक्ष्यस्य सर्वादृष्टसाध्यत्वस्य वक्ष्यमाणत्वात् अव-घातादिवत् उभयार्थतया विधानोपपत्तेः ॥ पं. वि. ४.

(४) ननु विधिपरत्वे वेदान्तानां तन्निष्ठतया ब्रह्मस्वरूपस्य असिद्ध्यादि-दोषप्रसङ्गात्, नास्ति श्रवणादिविधानमिति भाष्यकारैरेव दर्शितम्। सत्यम्। ज्ञानविधिस्तत्र निराकृतः, न श्रवणादिविधिः। तत्रोक्तदोषप्रसङ्गाभावात् ॥
पं. वि. ४.

(५) कथमवान्तरवाक्यैः श्रवणादिविधानं कल्प्यत इति? अवान्तर-वाक्यभेदेन विविदिषन्तीति यज्ञादीनां ज्ञानसंयोगविधानवत्। उपरि हि

देवेभ्यः—इत्युपरिधारणविधानवत्, मलवद्वाससो व्रतकलापविधानवच्च – इति ब्रूमः । अथवा 'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य' इत्यादिवाक्यं श्रवणादिविधायकमस्तु । तस्य तत्परत्वात् । सूत्रकारेण च वक्ष्यमाणत्वात् । सर्वथा तावन्मननिदिध्यासनाभ्याम्, अङ्गभूताभ्यां सह श्रवणविधानम् अस्त्येव ॥ पं. वि. ४-५.

(६) ननु सम्यग्दर्शनस्य फलरूपत्वात् प्रमाणाधीनत्वाच्च अविधेयतेति युक्ता तस्यार्थवादता ; श्रवणादयस्तु क्रियारूपत्वात् सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेया एवेति । तदाह 'एतच्च सर्वं प्रथमसूत्रेणैव' इति । .... मननिदिध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वमङ्गीकृत्य प्रथमसूत्रं प्रवृत्तम् इत्यर्थः । विधीनामपि सतां स्तावकत्वमुक्तम् ; इदानीं शब्दस्यार्थान्तरमाह 'अपि च नैवायम्' इति ॥ पं. वि. २७३.

['ईप्सितश्चेत् द्रष्टव्यः श्रोतव्य इत्येषोऽर्थवादः । एतच्च सर्वं प्रथमसूत्रेणैव सूत्रितं विवृतं च भाष्ये । अपि च नैवायं विधौ कृत्यः, किं तर्हि अर्हे कृत्यतृचश्चेत्यर्हकृत्यः' (पं. पा. ९४) इति सोपपादनं 'अर्थवादतया आत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात् सामर्थ्यसिद्धबहिर्मुखतानिरोधाच्च विधिकार्यलेशस्य विद्यमानत्वात् विधय इव लक्ष्यन्ते' (पा. ९३) इति च स्पष्टं निराकृतं विधित्वं तैरेव वाक्यैः पञ्चपादिकाकारसंमतमिव विधित्वं व्याख्यानकौशलेन स्थापितमत्रेति स्फुटम् ॥]

(७) 'विजिज्ञासितव्यः', 'विजिज्ञासस्व' इति चान्तर्णीतो विचारो विधीयते । इष्यमाणज्ञानस्य इच्छायाश्च विधेयत्वायोगात् । 'श्रोतव्यः' इति च स्वयमेव विचारो विहितः । 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति ज्ञानस्य साध्यतावगमात् । गुरूपसदनविधानाच्च तत्साधनश्रवणादिविधिः कल्प्यते । 'आत्मन्येवात्मानं पश्येत्' इति ज्ञानविधानायोगात् तत्साधने विधिरुपादीयत इति सर्वत्र मननिदिध्यासनाभ्यां सह श्रवणं नामाङ्गि विधीयत इति सिद्धम् ॥ पं. वि. १६८.

अत्र श्रवणादीनामदृष्टार्थत्वं किंप्रमाणकमिति न ज्ञायते –

(क) दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति । यथावघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि तद्वत् ॥

सू. भा. ४-१-१, पा. ४६०.

(ख) यानि तावत् सम्यग्दर्शनार्थान्युपासनानि तान्यवघातादिवत् कार्यपर्यवसानानीति ज्ञातमेवैषामावृत्तिपरिमाणम् ॥

सू. भा. ४-१-१२, पा. ४७१.

इत्यादिभाष्योक्त्या दृष्टार्थत्वं तु गम्यते ॥

(ग) यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि ॥

सू. भा. १-४-४, पा. १९.

इत्यत्र तु विधिच्छायानां द्रष्टव्यादिशब्दानां प्रत्यङ्मुखीकरणार्थत्वेन सार्थक्यं स्पष्टमुक्तं भाष्ये। न चेदं ज्ञानमात्रविधाननिषेधकं वचनमिति सांप्रतम्। आदिशब्देन श्रवणादीनामपि ग्रहणात् –

(घ) आत्मस्वरूपान्वाख्यानमात्रेण आत्मविज्ञाने विधिमन्तरेण न प्रवर्तते इति चेन्न। आत्मवादिवाक्यश्रवणेन आत्मविज्ञानस्य जनितत्वात्, किं भोः कृतस्य करणम्? तच्छ्रवणेऽपि न प्रवर्तत इति चेत्। न। अनवस्थाप्रसङ्गात्। यथा आत्मवादिवाक्यार्थश्रवणे विधिमन्तरेण न प्रवर्तते तथा विधिवाक्यार्थश्रवणेऽपि विधिमन्तरेण न प्रवर्तिष्यत इति विध्यन्तरापेक्षा। तथा तदर्थश्रवणेऽपीत्यनवस्था प्रसज्येत ॥ बृ. भा. १-४-७, पा. ६६२.

इति श्रवणविधिकाङ्क्षायाः कण्ठरवेण निरासदर्शनाच्च भाष्यान्तरे ॥

(ङ) तत्रापि प्रवर्तकप्रमाणाभावे प्रवृत्त्यनुपपत्तिरिति चेत्। न। स्वात्मविषयत्वादात्मविज्ञानस्य। न ह्यात्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षता। आत्मत्वादेव। तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य ॥ गी. भा. २-६९.

इति प्रवर्तकप्रमाणाकाङ्क्षानिषेधाच्च ॥

न च श्रवणस्याङ्गित्वं मननादेश्चाङ्गत्वं विधीयत इति युक्तं भवति। श्रवणमात्रेण कस्यचिदपि ज्ञानानुत्पत्तिप्रसङ्गात्। तथा च –

(च) भवेदावृत्त्यानर्थक्यं तं प्रति यस्तत्त्वमसीति सकृदुक्तमेव ब्रह्मात्मत्वमनुभवितुं शक्नुयात् ॥ सू. भा. ४-१-२, पा. ४६१.

इति सकृच्छ्रवणमात्रेणापि ज्ञानोत्पत्तिसंभवोक्तिः कुप्येत ॥

न च पाण्डित्यं निर्विद्येत्यादिश्रुतेः श्रवणविधिसिद्धिः । नापि सूत्रे तद्विधानं सूचितम् ॥

(छ) 'तद्वतो विद्यावतः संन्यासिनः' सू. भा. ३-४-४७, पा. ४५५.

इति भाष्ये विद्यावत एव पाण्डित्यादिविधानमिति स्पष्टोक्तेः । अथ मतम् मौनस्यैवेयं विधित्ववाचोयुक्तिस्तत्राभिहिता न पाण्डित्यस्येति । तथापि बृहदारण्यकभाष्ये पाण्डित्यमात्मविज्ञानं निरवशेषं कृत्वा 'एषणाभ्यो व्युत्थाय' इति व्युत्थानविधिपरत्वेन व्याख्यानदर्शनात् नात्र श्रवण-विधानमिति ब्रूमः ॥

तस्मात्, विनापि विधिं श्रवणादौ प्रवृत्तिसंभवात् पञ्चपादिका-काराद्युक्तमेवाविधित्वं युक्तं श्रवणादीनाम् इत्युत्पश्यामः । ये तु 'सकृदुक्तमेव' इति भाष्याक्षरबाह्यमेव 'श्रुत्वा मत्वा क्षणमवधाय' इत्यधिकावापं कुर्वते तेषां वेदान्तवाक्यमात्रेणात्मज्ञानं नोत्पद्यत इति दुरभिनिवेश एवापराध्यतीत्यलं परस्परविरुद्धव्याख्यानप्रस्थानसूक्ष्मेक्षिकया ॥

निदिध्यासनशब्दस्य अपरायत्तबोधार्थकत्वेनाङ्गीकारो दृश्यते वार्तिके । ज्ञानसाधनभूतश्रवणादीनां विहितत्वाङ्गीकारस्तु परं समान एव वार्तिक-विवरणयोः । मनननिदिध्यासनयोः श्रवणाङ्गत्वकथनं त्वत्र न केवलं वार्तिकप्रस्थानेन, किं तु भामतीप्रस्थानेनापि विरुध्यते । स्वमते उपपत्ति-रित्थं प्रदर्शितं विवरणे –

(५) यस्मिन् पक्षे शक्तितात्पर्यविशिष्टशब्दावधारणं प्रथमं ब्रह्मणि परोक्षं ज्ञानमुत्पाद्य मनननिदिध्यासनसंस्कारविशिष्टान्तःकरणापेक्षया अपरोक्ष-ज्ञानमुत्पादयति, तत्र ब्रह्मणि परोक्षज्ञानस्य निदिध्यासनोपकारितया तदङ्ग-त्वेऽपि, तात्पर्यविशिष्टशब्दावधारणादपरोक्षज्ञानोत्पत्तौ मनननिदिध्यासने श्रवणस्य फलोपकार्यङ्गताम् अश्नुवाते ॥ पं. वि. १०४.

(६) विशिष्टशब्दावधारणं प्रमेयावगमं प्रति अव्यवधानेन कारणं भवति । प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात् । मनननिदिध्यासने तु

चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलं प्रत्यव्यवहितस्य करणस्य विशिष्टशब्दावधारणस्य व्यवहिते मननिदिध्यासने तदङ्गे अङ्गीक्रियेते । यदा तु पुनः शब्दादेव प्रथममपरोक्षानुभवफलं विज्ञानमुत्पन्नं भ्रान्तिविक्षेपसंस्कारखचितान्तःकरणदोषात् अर्थोऽपि परोक्षानुभवफलतया विभ्रान्त्या अवतिष्ठते, तदा मननिदिध्यासने चित्तगतविक्षेपादिदोषप्रतिबन्धनिरासेनापरोक्षफलप्रतिष्ठाहेतुतया प्रमाणस्य फलोपकार्यङ्गमिति न विरुध्यते । न च शब्दकरणमन्तरेण निदिध्यासनादेवापरोक्षानुभवफलजन्म संभवति । तस्य प्रामाण्यासिद्धेः । शब्दावगतब्रह्मात्मविषयत्वादपरोक्षस्य तद्द्वारेण प्रामाण्यनिश्चय इति चेत् । नैवम् । उत्पन्नस्य हि विज्ञानस्य प्रमाणान्तराधीनविषयसद्भावनिश्चयाधीनप्रामाण्यकल्पनाद् वरं स्वस्यैव क्लृप्तप्रमाणजन्यत्वकल्पनम् । अन्यथा परतः प्रामाण्यात्, इतरत्र स्वतः प्रामाण्यात् । तस्मात्, युक्तं फलोपकार्यङ्गता मननिदिध्यासनयोरिति ॥ पं. वि. १०४–१०५.

श्रवणमनननिदिध्यासनानां सर्वत्र समुच्चयापेक्षा नास्तीति प्रागावेदितम् । श्रवणविधानपक्षोऽपि न क्षोदक्षम इति च । येषां श्रवणे प्रवृत्तानां प्रतिबन्धनिमित्तात् पदार्थविवेको नोत्पन्नः, तदर्थमेव तु श्रवणस्य मननसाहित्यमपेक्षितमिति स्थितं भाष्ये –

(क) तत्र येषामेतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां 'तत्त्वमसि' इत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति पदार्थज्ञानपूर्वकत्वाद्, वाक्यार्थस्य, इत्यतस्तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः ॥ सू. भा. ४–१–२, पा. ४६२.

इति । निदिध्यासनं तु, मनोनिग्रहापरपर्यायम्, मध्यमाधिकारिणाम् आत्मनि मनोलयार्थमिति कारिकाभाष्ये उपदिष्टम् –

(ख) मनसो निग्रहायत्तमभयं सर्वयोगिनाम् ।
दुःखक्षयः प्रबोधश्चाप्यक्षया शान्तिरेव च ॥ गौ. का. ३–४०.

भाष्यम् – येषां पुनर्ब्रह्मस्वरूपव्यतिरेकेण रज्जुसर्पवत् कल्पितमेव मनः, इन्द्रियादि च न परमार्थतो विद्यते, तेषां ब्रह्मस्वरूपाणामभयं मोक्षाख्या चाक्षया शान्तिः स्वभावत एव सिद्धा, नान्यायत्ता, 'नोपचारः कथञ्चन'

इत्यवोचाम । ये त्वतो अन्ये योगिनो मार्गगा हीनमध्यमदृष्टयो वा, मनोऽन्यदात्मव्यतिरिक्तमात्मसंबन्धि पश्यन्ति, तेषाम् आत्मसत्यानुबोध-रहितानां मनसो निग्रहायत्तमभयं सर्वेषां योगिनाम् ॥ पा. २२५.

इति । अतो नापरोक्षज्ञानार्थं निदिध्यासनम्, किं तु आत्मनि मनो-विलापनेन प्रतिबन्धभूतमनस्सत्यत्वबुद्धिनिरासपूर्वकम् आत्मन्यवस्थानानु-ग्रहार्थमिति ज्ञेयम् ॥

कर्मणां ज्ञानहेतुत्वम् –

२५८. पञ्चपादिकायां लिखितम् 'यः प्रथमसूत्रे अथशब्दो-पादानसूचितो न्यायः स्वाध्यायस्य अर्थावबोधोपयोगप्रतिपत्तिहेतुता, यदप्यौत्पत्तिकसूत्रे शब्दार्थयोः संबन्धनित्यत्वेन वेदान्तानां चापौरुषेयत्वेन कारणेन अनपेक्षत्वं नाम प्रामाण्यकारणमुक्तम्, तदुभयम् इहाप्युपयुज्यताम् अपेक्षितत्वात्; इतरस्य पुनर्न्यायकलापस्य न ब्रह्मजिज्ञासायाम् उप-योगोऽस्ति; यतो निरस्ताशेषप्रपञ्चं ब्रह्मात्मैकत्वं प्रतिज्ञातम्, तत्र न तत्प्रतिपादने, तत्प्रतिपादनसामर्थ्ये वा शब्दानां कश्चिन्न्यायोऽभिहितः। यत् पुनः प्रथमतन्त्रसिद्धन्यायोपजीवनम्, अस्मिन्नपि तन्त्रे तत् सगुणविद्या-विषयम्। तत्र च मानसी क्रिया उपासना विधेया अनित्यफला धर्मविशेष एव। तदेवं न्यायकलापस्य न ब्रह्मजिज्ञासायाम् उपयोगः' (पं. पा. ५९) इति। तत्र विवरणम् –

(१) नन्विहापि 'शास्त्रयोनित्वात्', 'अत एव च नित्यत्वम्' – इत्यादौ वेदप्रामाण्यापेक्षितो न्यायः सूत्रित एव। कुतः प्रथमपादापेक्षेति? सत्यम्, अङ्गीकृत्यैतदुक्तम् इति न विरोधः ॥ पं. वि. १५५.

[औत्पत्तिकसूत्रोक्तो न्यायः पूर्वतन्त्रगत एवेहोपजीव्यत इति युक्तम्। न हीहोदाहृतसूत्रद्वयेन स पुनः स्वातन्त्र्येण प्रसाध्यते। शास्त्रयोनित्वात् इति हि ब्रह्मणो भूतार्थत्वेऽपि शास्त्रप्रामाण्यं पूर्वत्रानुक्तमिह सूत्रितम् 'समन्वयात्' इति हेत्ववष्टम्भेन, न तु तत्र शब्दार्थसंबन्धनित्यत्वपरामर्शोऽस्ति। 'अत एव

च नित्यत्वम्' इति पूर्वतन्त्रस्थितमेव तु विरोधशङ्कापरिहारेण दृढीकरणार्थम् इति न स्वातन्त्र्येण प्रतिपादितं किञ्चित् ॥]

(२) ननु श्रुतिलिङ्गादिप्रमाणानामिहाप्यपेक्ष्यमाणत्वात् इतरोऽपि न्यायः पूर्ववृत्ततया अपेक्षित इति । नेत्याह – इतरस्य तु पुनरिति । उत्पत्तिविनियोगप्रयोगाधिकारविधिकार्यापेक्षितो हि न्यायस्तत्र प्रतिपादितः । न चानुष्ठेयभूतवस्तुप्रतिपादनेऽसौ उपयुज्यते । कार्यार्थसाम्येऽपि प्रत्यध्यायम् अवान्तरप्रमेयभेदेन न्यायभेदोऽपेक्ष्यते, किमु वक्तव्यम् अकार्यभूतवस्तुप्रमेयभेद इति भावः । श्रुत्यादयस्तु लोकप्रसिद्धा एवोपादीयन्ते ॥
पं. वि. १५५.

[वस्तुप्रतिपादकवाक्यतात्पर्यनिर्णयेऽपि श्रुतिलिङ्गादिन्यायोऽपेक्षिष्यत एव । स च न्यायः पूर्वतन्त्रसिद्धः । यत्तु श्रुत्यादयो लोकप्रसिद्धा एवेति, अत्यल्पमिदमुच्यते ; लोकसिद्धा एव हि पदार्थधर्माः शास्त्रे निर्णीयन्ते । अन्यथा सर्वथाप्यलौकिकत्वे शास्त्रप्रतिपादिता अपि ते न बुद्ध्येरन् इति । इदं तु सत्यम् , यदिह वस्तुस्वरूपनिर्णय एवापूर्वतया प्रस्तुतः, तदपेक्षितो न्यायभेदश्च न पूर्वत्र गत इति ॥]

कर्मानुष्ठानानन्तर्यमथशब्दार्थं गृहीत्वा विचारस्तु पञ्चपादिकानुसारत एव विवरणेऽपि कृतः । कर्मणः किंद्वारेण ज्ञानोपकारकत्वमित्यत्र विवरणम् –

(३) नित्यनैमित्तिककर्मानुष्ठानैः संस्कृतस्यात्मनो यदि श्रवणमननध्यानाभ्यासादीनि ज्ञानसाधनानि संपाद्यन्ते, तदा संस्कारकर्माणि सहकारिविशेषादात्मज्ञानमवतारयन्ति । यदा तु सहकारिकारणविरहः, तदभ्युदयफलम् इति व्यवस्थोपपत्तेर्न श्रुतिस्मृत्योः परस्परविरोधः ॥ पं. वि. १५७.

(४) प्रत्यक्षेण विशुद्धिं प्रत्यक्प्रवणतां च चित्तस्य कर्मफलमवगच्छन् जन्मान्तरानुष्ठितं कर्मानुमाय ज्ञानस्यान्तरङ्गसाधनेषु प्रवर्तिष्यते ॥
पं. वि. १५८–१५९.

(५) अथवा सर्वाण्येव कर्माण्युत्पत्तिविधिविहितानि संयोगभेदेन जीवनकामनाद्यधिकारविध्यन्तरवद् ब्रह्मानुभवकामो यज्ञादीन्यनुतिष्ठेत् – इत्यधिकारान्तरविधिविधेयानि भविष्यन्ति । .... आत्मतत्त्वापरोक्षानुभवस्तावदिष्यमाणतया स्वर्गादिवत् भावनासाध्योऽवगम्यते । पुरुषार्थत्वात् ।

शाब्दज्ञाने तु संजाते तत्कामनायोगात्, असंजाते विषयानवगमादेव तत्र कामनायोगात् शब्दावगते अपरोक्षज्ञानमिष्यत इति युक्तम्। तच्च प्रयत्नान्तरसाध्यमिति पुरस्ताद् दर्शितम्॥ पं. वि. १५९.

[अपरोक्षज्ञानविषये यद्वक्तव्यं तदुक्तं पुरस्तात्॥]

(६) तत्र यज्ञादीनाम् इच्छोपसर्जनतया आख्याताभिहितभावनाकरणतया अवगतानां साध्येनैवान्वयाद् यज्ञादीनि ब्रह्मानुभवसाधनान्यवगतानि। ततश्चात्मानुभवकामो यज्ञादीन्यनुतिष्ठेदिति विधिः परिणम्यते। न चेच्छामात्रेण संयोगः, तस्या असाध्यमानतावगमात्॥ पं. वि. १५९.

[भामतीप्रस्थाने तु, (वा. भा. पा. ६१) विविदिषार्थमेव कर्म॥]

(५) ननु विशुद्धिद्वारेण ज्ञानहेतुत्वे संस्कारविविदिषापक्षयोः को विवेकः? उच्यते। श्रवणमननध्यानाभ्यासादिसहकारिकारणसंपत्तावेव संस्कारो विज्ञानं साधयति, तदभावे सत्यभ्युदयमेव। विविदिषायां तु विज्ञानस्य कर्मफलत्वात् फलपर्यन्तं साधनानि संपाद्यापि विज्ञानं जनयन्तीति विशेषः॥ पं. वि. १६०.

भाष्ये संस्कारविविदिषापक्षौ द्वावपि स्थितौ –

(क) येषां पुनर्नित्यानि निरभिसंधीनि आत्मसंस्कारार्थानि, तेषां ज्ञानोत्पत्त्यर्थानि तानि। 'ब्राह्मीयं क्रियते तनुः' इति स्मरणात्। तेषाम् आरादुपकारकत्वात् मोक्षसाधनान्यपि कर्माणि भवन्तीति न विरुध्यते॥

बृ. भा. ३-३, पा. ८०२.

(ख) तत्राप्येवंविदिति विद्यासंयोगत् प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यम्॥

सू. भा. ३-४-२७, पा. ४४३.

संस्कारविविदिषाक्रमेणैव ज्ञानोत्पत्तिः....विविदिषूणां च कर्माणि ज्ञानसाधनानीत्येतत् स्थलान्तरेऽपि भाष्येऽस्ति –

(ग) ऋतं चेत्यादिधर्मोपन्यासादनन्तरं च वेदानुवचनपाठादेतदवगम्यते – एवं श्रौतस्मार्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य परं ब्रह्मविविदिषोरार्षाणि दर्शनानि प्रादुर्भवन्ति आत्मादिविषयाणीति॥

तै. भा. १-१०, पा. २७२-२७३.

ब्रह्मणो जगत्कारणत्वम् –

२५९. विवरणे समादृता कार्यकारणप्रक्रिया कीदृशीत्येतद् विमर्शमर्हति –

(१) ननु 'अस्येदं लक्षणम्', 'इदं वा अनेन लक्ष्यम्' इति लक्ष्यलक्षणयोः, अव्याप्त्यतिव्याप्तिपरिहारेण अविनाभावः प्रमाणयुक्तिव्यतिरेकेण न सिध्यति; तत्कथं स्वरूपलक्षणपरमेव सूत्रमिति? तत्राह – 'युक्तिरपि लक्षणनिर्णये अर्थात्' इति। अपिशब्दात् प्रमाणमपीत्यर्थः। अत्र च सूत्रितयोर्ब्रह्मणि प्रमाणयुक्त्योरध्यायद्वयेन निर्णयः क्रियते॥

पं. वि. २०४.

[अर्थतो युक्तीनां प्रमाणस्य वा सूत्रितत्वे न किञ्चिद् गमकमस्ति। यतो जन्मादि अस्य संभवति तद् ब्रह्म– इत्येवमर्थकानामेवाक्षराणामत्र दर्शनात्। न च भाष्यमत्र प्रमाणम्। भाष्ये हि प्रधानादेर्जगतो यथोक्तविशेषणस्य जन्मादिर्न संभवतीत्येतावदुक्तम्। न च लक्ष्यलक्षणयोरव्याप्त्यतिव्याप्तिपरिहारेणाविनाभाव इह समुद्दिष्टः। 'वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्' इति हि भाष्यकारवचनमिति॥]

(२) ननु जगज्जन्मस्थितिभङ्गं किंसंबन्धितया लक्षणं भवति? न तावत् काकवल्लक्ष्यसंबन्धितया। जगदाश्रयत्वात् धर्माणामिति। कारणसंबन्धितया इत्याह – 'यत इति कारणनिर्देशः' इति। ननु जन्मादिकारणत्वमपि लक्षणान्तर्गतम्, आहोस्वित् लक्ष्यस्वरूपान्तर्गतम्? – इति वक्तव्यम्। ननु गृहस्य काकाधिकरणत्वं नाम धर्मः कस्मिन् अन्तर्भवति? लक्ष्य इति चेत्। काकाधिकरणत्वं च गृहशब्दार्थः स्यात्, ततश्च काकविगमे गृहैकदेशभङ्गबुद्धिः स्यात्। लक्षणान्तर्गतमिति चेत्, कारणत्वमपि तथा। न हि नानाविधकार्यक्रियावेशात्मकत्वं तत्प्रसवशक्त्यात्मकत्वं वा जिज्ञास्यविशुद्धब्रह्मान्तर्गतं भवितुमर्हति। तस्मात्, जगज्जन्मादिकारणत्वमेवोपलक्षणमिति॥ पं. वि. २०४–२०५.

[जिज्ञास्यब्रह्मान्तर्गतं न चेत् जगज्जन्मादिकारणत्वम्, न तर्हि जिज्ञास्यं लक्षितम्, न च 'किँलक्षणं पुनस्तद्ब्रह्म?' इति प्रश्नोत्तरत्वेन सूत्रावतरणं भाष्यकारस्य समञ्जसं स्यात्। न च जगन्नाम दृष्टान्तोपात्तकाक इव गृहात्, ब्रह्मणोऽत्यन्तं पृथक्त्वेनास्ति, येन तद्वदुपलक्षणत्वमत्र स्यादित्यनुसंधेयम्॥]

(३) महाभूतानि सद्वस्तुप्रकृतिकानि । तत्स्वभावानुरक्तत्वे सति विविधविकारत्वात्, मृदनुस्यूतघटादिवत् । द्रव्यत्वाद्यभेदा अपि प्रकृतिस्वभावा एव सामान्यवदवभासन्ते । सद्वस्तु पुनः सर्वानुगमात् सर्वविकारप्रकृतिः । भौतिकानां च भूतोपादानत्वं दृश्यमानं मूलप्रकृत्यधीनतामेव सर्वस्य गमयति । अतः सर्वकार्योपादानम् एकमेव लाघवात् – इति न्यायानुगृहीतानुमानेन सिद्धम् । तस्यैव च निमित्तकारणत्वम् अनुमानेन कल्प्यते । तथा च इदं जगत् अभिन्ननिमित्तोपादानं भवितुमर्हति । प्रेक्षापूर्वजनितकार्यत्वात्, आत्मगतसुखदुःखरागद्वेषादिवत् । न च घटादिष्वनैकान्तिकता । तत्राप्यभिन्ननिमित्तोपादानत्वकल्पनात् । अदृष्टादिनिमित्तभेदो दृश्यत इति चेत् । न । उपादानाधिष्ठात्रोरेव एकत्वानुमानात् । तस्मात्, अनुमानेनैव प्रसिद्धमेकस्योभयकारणत्वं लक्षणत्वेन निर्दिश्यते । सृष्टिवाक्यप्रसिद्धं चैकस्योभयकारणत्वं लक्षणत्वेन निर्दिश्यते ॥

पं. वि. २०५-२०६.

['नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे । न । वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम् ' (सू. भा. ७) इत्यारभ्य 'तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम् ' इत्यन्तं भाष्यमनाहतमत्र । प्रकृत्यधिकरणगतसूत्रेभ्योऽपि (१-४-२३....२७) श्रुत्यवगाह्यमेवेदं कारणत्वं नानुमानप्रसिद्धमित्यवगम्यते ॥]

(४) सर्वस्य कर्तृत्वादेव वर्तमानस्वकार्यसर्वविषयज्ञता तावत् सिद्धा । एवं तत्तत्कालेऽतीतसर्वविषयावगमादनुभूतविषया असंप्रमोषा स्मृतिः स्वमायापरिणामोपाधिः, अनावरणत्वात् सर्वविषया कल्प्यते । तथा सृष्टेः प्रागपि सृज्यमानपदार्थावधारणस्य कुलालादिषु दृष्टत्वात्, आगामिसर्वविषयज्ञानं स्वमायापरिणामोपाधि कल्प्यत इति युक्ता सर्वज्ञता । यः सर्वज्ञः सर्वविदिति च जगत्कारणे सर्वज्ञपदप्रयोगात् सर्वविषयज्ञानं प्रमीयत इति श्रुतियुक्तिभ्यां युक्ता सर्वज्ञता ॥ पं. वि. २१०.

[मायापरिणामेन ब्रह्म सर्वं जानातीति प्रतिज्ञामात्रमेतत् । न ह्यन्तःकरणवत् मायाया अपि परिणामलक्षणा वृत्तिरस्तीत्यत्र प्रमाणमस्ति । अतो न युक्तं सर्वज्ञत्वानुमानम् । अथ नेदं स्वतन्त्रमनुमानम् । श्रुत्युक्तोपबृंहणायैव तूपन्यस्तमिति; तर्हि 'सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति' यतः, ततः सर्वज्ञः–इति भाष्योक्तम् (सू. भा. १-१-५, पा. २७) इहापि वाक्यशेषेण स्वेनाप्युररीकृतमेवालम् ; किं मायावृत्तिकल्पनया ? कालत्रयेऽपि सर्वं जानातीत्यतः सर्वज्ञत्वम् इत्यव्यापकं लक्षणम् । कालस्यापि ज्ञेयत्वादेव । तैत्तिरीयभाष्यवाक्यमपीह अनुसंधातुं योग्यम् ॥

'यत्तु ब्रह्मणो विज्ञानम् तत् सवितृप्रकाशवत्, अभ्युष्णत्ववच्च ब्रह्मस्वरूपाव्यतिरिक्तं स्वरूपमेव तत्। न तत्कारणान्तरसव्यपेक्षम्। नित्यस्वरूपत्वात्, सर्वभावानां च तेनाविभक्तदेशकालत्वात्, कालाकाशादिकारणत्वाच्च निरतिशयसूक्ष्मत्वाच्च। न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवत् भविष्यद्वा अस्ति। तस्माद् सर्वज्ञं ब्रह्म' (तै. भा. २-१. पा. २८५) इति॥]

(५) त्रैविध्यमत्र संभवति। रज्ज्वाः संयुक्तसूत्रद्वयवत् मायाविशिष्टं ब्रह्म कारणम् इति वा. 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति श्रुतेर्मायाशक्तिमत् कारणमिति वा. जगदुपादानमायाश्रयतया ब्रह्म कारणम् इति वा, तत्र विशिष्टपक्षे तथैव ब्रह्मत्वेनोपलक्षितस्य ज्ञानानन्दादिस्वरूपलक्षणेन मायानिष्कर्षात्, लक्षणद्वयेन विशुद्धब्रह्मसिद्धिः। उत्तरपक्षयोस्तु मायाया ब्रह्मपरतन्त्रत्वात्, तत्कार्यमपि ब्रह्मपरतन्त्रं भवति; यथा अंशुतन्त्रत्वारब्धोऽपि पटः, अंशुतन्त्रः प्रतीयते। ततश्च, उत्पद्यमानकार्यस्य यदाश्रयोपाधिज्ञानानन्दलक्षणं च तद् ब्रह्म- इति शुद्धब्रह्मलाभ इति॥ पं. वि. २१२.

(६) तस्मात्, जन्मादिनिमित्तोपादानकारणं सर्वज्ञं ब्रह्म – इति सिद्धम्। तत्र बिम्बस्थानीयं ब्रह्म मायाशक्तिमत् कारणम्, जीवाश्च प्रत्येकम् अविद्यानुबद्धा इति केचित्, मायाविद्याप्रतिबिम्बितं ब्रह्म जगत्कारणम्, विशुद्धं ब्रह्म अमृतत्वालम्बनम्, जीवाश्चाविद्याबद्धा इत्यन्ये। जीवा एव स्वाविद्यया प्रत्येकं प्रपञ्चाकारेण ब्रह्माविर्भावयन्ति, सादृश्याच्च प्रपञ्चैकतावभासः, अनेकैरवगतद्वितीयचन्द्रवत्; स्वरूपापेक्षया च ब्रह्म सर्वजगत्कारणम् इत्यपरे। ब्रह्मैकमेव स्वाविद्यया जगदाकारेण विवर्तते। स्वप्नादिवत् इति मतान्तरम्। तस्मात्, ब्रह्मैव स्वमायया अविद्यया विवर्तत इति॥ पं. वि. २३२.

[अत्र चरमपक्ष एवेष्टसिद्धिकारानुसारेण स्वाभिमतेति सूचितम्॥]

जगतो मिथ्यासृष्टत्वसाधने स्वयं परिकरं बद्ध्वा (पं. वि. २०८) 'तस्मात् प्रत्यक्षानुमानार्थापत्तिभिः प्रपञ्चस्य मिथ्यत्वावगमात्, प्रशान्तत्वाच्च ब्रह्मणः निष्प्रयोजना च सृष्टिश्रुतिः (?) विवर्त एवेति (पं. वि. २०८) इति चोपसंहरतः अननुरूपमिदं विकल्पनम्, किं ब्रह्मैव कारणम्, किं वा माया; किं ब्रह्मैव जगत्कारणम्, किं वा जीवाः? इति च। 'यतो वा इमानि'

'जन्माद्यस्य यतः' इति च श्रुतिसूत्रयोर्ब्रह्मण एव जगत्कारणत्वेन निर्देशाच्च। क्रियायामिव वस्तुनि विकल्पासंभवाच्चायुक्तमिदं विकल्पनम्। युक्त्यसहत्वाच्च। न हि मायाया परमात्मनि आत्मभूताया इवाविद्याकल्पितायाः नामरूपबीजशक्तिरूपायाः स्वतन्त्रसत्ता समस्ति, येन ब्रह्म वा माया वा जगत्कारणमिति विकल्प्येत। न च जीवानां ब्रह्मणो व्यतिरेकेणास्तिता, 'अनेन जीवेनात्मना' इति श्रुतिविरोधप्रसङ्गात्, 'तत्त्वमसि' इत्युपदेशासांगत्यप्रसङ्गाच्च। शारीरके च 'आभास एव च' इति विशेषणरूपेण ब्रह्माभासत्वोपदेशाच्च जीवस्य 'नेतरो अनुपपत्तेः', 'अनुपपत्तेस्तु न शारीरः', इति पदे पदे सूत्रेषु कण्ठरवेण जीवस्य जगत्कारणत्वप्रतिषेधाच्चेति ॥

तस्मात् जगज्जन्मादिकारणत्ववचनं न कारणत्वविवक्षया, किं तु जगतः सर्वदा ब्रह्मात्मत्वप्रदर्शनविवक्षया, कारणत्वं च ब्रह्मणो न स्वतः, किं तु अविद्याकल्पितरूपभेदेन, सर्वशक्तियोगश्च तस्य तथैव — इत्यवश्यमभ्युपगन्तव्यम्। तथा हि भाष्यम् —

(१) उत्पत्तिस्थितिप्रलयकालेषु यदात्मतां न जहति भूतानि–तदेतद् ब्रह्मणो लक्षणम्। तद्-ब्रह्म विजिज्ञासस्व ॥ तै. भा. ३–१, पा. २१३.

(२) अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्याम् अनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते। पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतम् अवतिष्ठते ॥ सू. भा. २–१–२७, पा. २१३.

(३) प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः संभवतीत्येतदपि अविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव ॥
सू. भा. २–१–३१, पा. २१५.

(४) न चेयं परमार्थविषया सृष्टिश्रुतिः। अविद्याकल्पितनामरूपव्यवहारगोचरत्वात्, ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि नैव विस्मर्तव्यम् ॥ सू. भा. २–१–३३, पा. २१७.

उपसंहारः –

२६०. प्रकाशात्मयतिभिः पञ्चपादिकाविवरणप्रणयनकालात् प्रागेव अद्वैतवेदान्तिषु बहवः प्रस्थानभेदा आविरभूवन्निति तत्र नानामतोदाहरणादेवानुमीयते । अत एव ते बहुत्र मतभेदान् संक्षेपतो निर्दिश्य क्वचिदेव स्वमतं निःसंदिग्धतया आविरकार्षुः । अग्रहणाद्यतिरिक्तानिर्वचनीयभावरूपाविद्यावादम् इष्टसिद्धिकाराभिमतम् आग्रहपूर्वं युक्त्यन्तरैरुपबृंहयामासुरित्यतोऽवगम्यते तत्काले अविद्योपादानकप्रपञ्चवादस्य बहुवेदान्तिमान्यता आसीदिति । जगत्कारणत्वनिष्कर्षप्रकारभेदेषु केचन वाचस्पतिमिश्रानुयायिवादिसंमता इवाभान्ति । इष्टसिद्धिकारपक्षस्तु विशिष्य स्वमतत्वेनोल्लिखितः ॥

यद्यप्यवच्छेदवादं निराकृत्याविद्याप्रतिबिम्ब एव जीव इति स्वपक्षः स्थापितः, मनननिदिध्यासनयोरङ्गत्वं च विहितं श्रवणं प्रति–इति वाचस्पतिमिश्रमतं क्वचिदंशे त्यक्तमिव, तथापि आत्माश्रिता अविद्या व्यवहारे जीवाश्रितैव लक्ष्यते, अविद्यामाययोरैक्यं सर्वैरङ्गीकार्यम्, शब्देन प्रथमं परोक्षज्ञानम्, ततो निदिध्यासनसाहाय्येन तत एवापरोक्षज्ञानं चोद्भवतीत्युररीकारेण प्रतिपत्तिविधिमनपेक्ष्यैवान्वयव्यतिरेकसिद्धस्मृतिसंतानः शक्यकरणः मर्दनसुखवत् प्रत्यक्षफलदर्शनात् (पं. वि. २४८) इत्यनुमन्यते अत्रेति मण्डनप्रस्थानस्यापि स्थानं प्रकल्पितम् । यद्यप्यनेकजीवाश्रितानेकाविद्यावादो नैव परामृष्टोऽत्र तथापि 'जीवा एव स्वाविद्यया प्रपञ्चाकारेण ब्रह्माविर्भावयन्ति' – इति जीवाविद्याकारणत्वं जगत अनुमोदमानानां मतमप्युदाहृतम् । मण्डनवाचस्पत्युभयसंमतोऽविद्यासंस्कारवादः स्वीकृतः प्रकाशात्मभिः, इष्टसिद्धिकारसंमताविद्यालेशवादोऽपि बह्वीभिर्युक्तिभिरुपबृंहितः, भाष्यप्रस्थानेन च वादमिमं संगमयितुं यत्न आस्थितः । वाचस्पतिविमुक्तात्मभ्यां खण्डितावशिष्टं भास्करप्रस्थानवादजालं तत्र तत्र खण्डयित्वा भेदाभेदवादोऽपि न्यक्कृतः ॥

यद्यपि पञ्चपादिकाव्याख्यानमेव प्रतिज्ञातमत्र, तथापि पञ्चपादिकोक्तानुक्तदुरुक्तचिन्तनमपि कृतमेव, प्रबलतरयुक्तिभिश्चाविद्योपादानभेदवाद उपष्टम्भितः । वेदान्तवादेषु श्रुत्यविरोधयुक्तिच्छलेन नैकान्यनुमानानि आनीतानीति वेदान्तविचारसरण्यां तर्कशास्त्रसंमतशैल्यपि प्रवेशिता । एवं वाचस्पतिप्रस्थाने इवात्राप्यद्वैतदर्शनस्यासंप्रज्ञातसमाध्यावश्यकताप्रदर्शनेन योगदर्शनानुयायिभिरपि संधिः कृतः । एवं चात्र दर्शनान्तरवादसरण्यनुसरणेनात्मैकत्वविद्याप्रतिपत्त्यङ्गभूता अध्यारोपापवादप्रक्रिया श्रौती किञ्चिन्मलीमसेवाभूदिति तु निर्विवादम् ॥

सर्वथापि तु शाङ्करप्रस्थानं नाम विवरणप्रस्थानमेव प्रायशः इति इदानींतनानां वेदान्तिनामभिनिवेशः । अत एव यत्र क्वचिदपि शाङ्करविवरणप्रस्थानयोर्वैलक्षण्यं लक्ष्यते चेत्, तत्र सर्वत्र सर्वसाहसैनैकवाक्यताकरणे बद्धादरा संप्रतितना विद्वांसः । अभियुञ्जते च वैलक्षण्यस्थापनपरान् असंप्रदायविक्त्वेनेति महदिदं साक्ष्यं विवरणमहिम्नीत्यस्मदभिप्रायः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

विवरणप्रस्थानपरीक्षा नाम द्वादशः काण्डः

---

१३. न्यायमकरन्दप्रस्थानपरीक्षा

न्यायमकरन्दः–

२६१. विवरणप्रकाशनात् परस्तात् अद्वैतविचारे प्रस्थानान्तरोपस्थापनलालसा वेदान्तिषु नाभूत् । अद्वैतिप्रक्रियाभेदानां प्रयत्नपूर्वकम् एकवाक्यतामङ्गीकृत्य द्वैतखण्डनेन जिज्ञासूनामद्वैते रुच्युत्पादनमेव वरीय इति नूतनग्रन्थकारा मेनिरे । तेषु प्रप्रथमः प्रयत्नः, आनन्दबोधभट्टारकाचार्यस्य ॥

आनन्दबोधानाम् इतिवृत्तमधिकृत्य न किञ्चिद् विज्ञायते । विमुक्तात्मशिष्या एते इत्यभ्यूहः केषाञ्चित् सप्रमाणको न भाति । संभावना त्वस्ति तत्र, बहुश इष्टसिद्ध्यादृतयुक्तीनामेव विशिष्टादरणदर्शनात् । **न्यायमकरन्दः, प्रमाणमाला, न्यायदीपावलिश्च** – इत्येते ग्रन्था आनन्दबोधानां प्राकाश्यं नीता अद्यावधि । अत्र न्यायमकरन्दमेव विशिष्याधारीकृत्य किञ्चिल्लिख्यते ॥

पञ्चपादिकाविवरणे मूलाविद्यावादिसंमतरीत्या भाष्यार्थप्रतिपादनमेव न केवलम्, किं तु प्रस्थानान्तरैः किञ्चित् सन्धिकरणम्, तर्कशास्त्रसंमतवादसरणिश्च दृश्यते–इत्यवोचाम । आनन्दबोधास्तु इमामेव सरणिमनुसृत्य ब्रह्मसिद्धौ, विधिविवेके, भामतीष्टसिद्धिविवरणादिषु च विद्यमानान् विषयान् संगृह्य तत्र तत्रोपबृंहकयुक्तीरुपन्यस्य अद्वैतिसंमतसिद्धान्तं स्थापयितुं प्रयेतिरे ॥

न्यायमकरन्दग्रन्थविभागक्रमः –

२६२. जिज्ञासुजनोपयुक्तन्यायानां संग्रहमात्रं ग्रन्थोद्दिष्टमित्यनेन प्रतिज्ञाश्लोकेन विज्ञायते –

> निबन्धपुष्पजालानि समालोच्य प्रयत्नतः ।
> सन्न्यायमकरन्दानां संग्रहः क्रियते मया ॥

अत्र च (१) क्षेत्रज्ञभेदनिराकरणम्, (२) ज्ञेयभेदनिरासः, (३) भ्रान्तिविचारः, (४) प्रपञ्चमिथ्यात्वस्थापनम्, (५) आत्मनः स्वयंप्रकाशता च, (६) प्रत्यक्षादीनां व्यावहारिकप्रामाण्यम्, (७) सिद्धे संगतिग्रहः, (८) प्रवर्तकनिर्धारणम्, (९) अखण्डार्थः, (१०) मोक्षस्वरूपनिर्णयः, (११) अविद्याश्रयः, (१२) मोक्षसाधनम्, (१३) अविद्यानिवृत्तिश्च – इत्येवं प्रतिपाद्यविषयविभागः कृतः ॥

तत्र सर्वत्रापि प्रथमं पूर्वपक्षमुपन्यस्य युक्तिभिस्तन्निरसनद्वारेण प्रायशः सिद्धान्तः प्रदर्श्यते । श्रुतयस्तु क्वचिदेवानीयन्ते । पूर्वपूर्वविषयविचारसमाप्तौ उत्तरोत्तरविचारस्य समुत्थानं श्लोकेन प्रदर्श्य तद्विचारः प्रदर्श्यते । अनुशाङ्करवेदान्तनिबन्धानामेव प्रायशः प्रमाणीकरणात्, भाष्यप्रस्थानादृता प्रक्रिया अनुभवप्रधानयुक्त्युपस्थापनरूपा क्वचिदेव लक्ष्यतेऽत्र । अनुमानार्थापत्तिरूपस्तर्क एव द्वैतवाद्यनिष्टप्रसञ्जको बाहुल्येन समाश्रीयते । ततश्च वेदान्ताभिमता प्रधानप्रक्रिया अध्यारोपापवादन्यायानुसारिणी नैव दृष्टिपथे समानीयते । अतो दिङ्मात्रमिह न्यायमकरन्दविचारक्रमस्य दर्शयित्वा तत्परीक्षां समापयिष्यामः ॥

भेदनिराकरणम्–

२६३. तत्र मङ्गलश्लोकेन सर्ववेदान्तसिद्धान्त इत्थं संगृहीतः –

यद्भासा निखिलं विभाति विषयो यो न स्वयं ज्योतिषाम् ।
यस्याहुर्भुवनोद्भवस्थितिलयान् लीलामयान् सूरयः ।
यं चागोचरमामनन्ति मनसां वाचां च विश्वात्मने ।
तस्मै शुद्धसुखाद्वितीयवपुषे शश्वन्नमो विष्णवे ॥

[प्रथमेन पादेन परमात्मनः चिदेकरसप्रकाशेन निखिलजगदवभासकत्वं अनितरगोचरस्वयंप्रकाशत्वं चाब्रवीत्; द्वितीयेन निर्व्यापारस्यैव सर्वजगज्जन्मस्थितिलयकारणत्वकथनेन जगतस्तदधीनसत्ताकत्वं तदात्मकत्वं चाभाणीत्; तृतीयेनावाङ्मनसगोचरत्वम्, निखिलात्मत्वं चावाक्षीत्; चतुर्थेन च परिशुद्धाद्वितीयानन्दरूपतामचकथत् ॥]

प्रथमं तावत् सुखदुःखानुभवभेदव्यवस्थान्यथानुपपत्तेः, जननमरणादिव्यवस्थान्यथानुपपत्तेश्चात्मनानात्वमास्थितवतां तर्कं प्रतिक्षिप्य तस्य श्रुतिस्मृत्युदितात्मैक्यविरुद्धता प्रादर्शि ॥

(१) विवादपदानि शरीराणि उभयवाद्यविवादास्पदेनैव आत्मना अधिष्ठितानि जीवच्छरीरत्वात्, यदुक्तसाधनं तदुक्तसाध्यम्, यथोभयवाद्यविवादास्पदं शरीरम्। तथा चेमानि। तस्मादुक्तसाध्यानि ॥ न्या. म. २९[1]

इति प्रयोगश्चोपन्यस्त आत्मैकत्वसाधनाय ॥

(२) आत्मा द्रव्यत्वव्यतिरिक्तापरजात्याधारभेदेन नाना न भवति। नित्यत्वात्, विभुत्वात्, निरवयवद्रव्यत्वाद् वा, गगनवत् ॥ न्या. म. ३०

इति परप्रसिद्धदृष्टान्तेन परेषामनिष्टापत्तिश्चादर्शितः ॥

[प्रथमानुमानेन स्वासीष्टैकत्वस्य संभावनामात्रं सिध्यति। द्वितीयेन च तार्किकसंमतप्रक्रियावलम्बनेनात्मनानात्वं निराकृतम्। आत्मैकत्वे श्रुत्यादिवाक्यानि यद्यप्युदाहृतानि, तथापि तानि कथमु अनुभवमुत्पाद्य प्रमाणं भवन्तीति तु नोक्तम्। मकरन्दकारसमये आकाशोत्पत्तिमङ्गीकृत्याप्यात्मनानात्वं साधयन्तः प्रतिवादिनो नासन्नित्येतेनोन्नीयते ॥]

द्वितीयेन तु वादेन ज्ञेयभेदनिरासः क्रियते। भेदस्य धर्मस्वरूपत्वे तद्धर्मत्वे वा न प्रत्यक्षप्रमाणात् तत्सिद्धिः स्यात्, अत एव न तदुपजीवकेतरप्रमाणेभ्यस्तत्सिद्धिः। 'विवादपदं भेदसंवेदनं न प्रमाणनिबन्धनम्, अनिरूपितप्रमाणकत्वात्, भेदसंवेदनत्वाद् वा, स्वप्नभेदावभासनवत्'—इति प्रयोगसद्भावात् इति (न्या. म. ५५) ॥

वादद्वयेनापि प्रतिवादितर्कनिराकरणमात्रेण न भेदवादसामान्यनिराकरणम् अद्वैतसिद्धिर्वा भवतीति स्पष्टमेव। भाष्यकारोक्तप्रकारेण तु

(१) न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् ॥ सू. भा. १-१-४, पा. २२.

1. अत्र सर्वत्रापि न्या. म. इति संकेतानन्तरं निर्दिष्टा संख्या न्यायमकरन्दग्रन्थपत्रपार्श्वपरामर्शिका ॥

(२) मनसो ह्यमनीभावे निरुद्धे विवेकदर्शनाभ्यासवैराग्याभ्यां रज्ज्वामिव सर्पे, लयं गते वा सुषुप्ते, द्वैतं नैवोपलभ्यत इत्यभावात्, सिद्धं द्वैतस्यासत्त्वम् ॥ गौ. का. भा. ३-३१, पा. २२१.

इत्याद्यनुभवबलात्, द्वैतनिराकरणमद्वैतसिद्धिश्च निरायासं सेत्स्यतीति च ॥

अनिर्वचनीयार्थावभासलक्षणा भ्रान्तिः –

२६४. इन्द्रियकारणतामन्तरेणैव भेदाध्यवसायः स्वप्नध्यानयोरिव विभ्रमादेव संभवतीति भेदनिरासवादसमाप्तौ प्रश्नबीजमुपन्यस्य 'अथ कोऽयं विभ्रमो नाम ?' इति प्रश्न उत्थापितोऽत्र । तदुत्तरत्वेन वादिविकल्पान् उपन्यस्य अख्यात्यन्यथाख्यात्यात्मख्यात्यसत्ख्यातिलक्षण-वादचतुष्टयं व्युदस्य 'आचार्याः पुनरनिर्वचनीयार्थावभासं विभ्रममाचक्षते' (न्या. म. १११) इति स्वमतम् इष्टसिद्धिरीत्यैव प्रायशस्तद्युक्तिभिरेव प्रतिष्ठापितमत्र ॥

केयमनिर्वचनीयता नाम ? – इति प्रश्नो द्वेधा निर्णीतः –

(१) यत्तु 'नापि सदसत्प्रकारविलक्षणता' इत्यादि, तत्र यद्यपि एकैकप्रकारवैलक्षण्योभयप्रकारवैलक्षण्ययोरस्ति व्यभिचारः, तथापि एकैक-प्रकारवैलक्षण्यावच्छिन्नोभयप्रकारवैलक्षण्यस्य लक्षणभावे न कश्चन दोषं पश्यामः ॥ न्या. म. ११५.

(२) अस्त्येव खल्वर्थापत्तिः (प्रमाणत्वे) । तथाहि नात्यन्तासतो नरविषाणस्य प्रतिभासगोचरता, नाप्यत्यन्तसत्श्रिदात्मनो बाधसंभवः । तदिह उभयान्यथानुपपत्त्या उभयविलक्षणता रजतादेराश्रीयत इति ॥
न्या. म. ११६.

(३) यत्त्विदं गदितम्–असद्विलक्षणस्याबाधः, सद्विलक्षणस्य चाप्रति-भासः – इत्युभयविलक्षणत्वेऽपि कस्मान्नानुपपत्तिरिति । तदबुद्धिपूर्वाभि-धानम् । सदसत्त्वे हि बाधाभावाप्रतिभानप्रयोजके न पुनरसत्सद्वैलक्षण्ये । कः पुनर्नियामक इति चेत्, गौरवोपपत्त्यन्तराभावप्रसङ्गौ इति वदामः ॥
न्या. म. ११६.

(४) (a) यश्चायमनुभवविरोधः 'सदिदं रजतम्' इति पूर्वानु-भवः, 'नेदं रजतम्' इत्युत्तरश्चासत्तावलम्बी सदसद्विलक्षणतायां विरुध्येत

इत्यभिहितः, नायमप्यस्ति । तथा हि शुक्तिकेदन्तासंसर्गवत् सत्तासंसर्गस्याप्यनिर्वाच्यस्यैवावभासनात् । अन्यस्याश्च रजतसत्ताया अनुपलम्भात् न विरुद्धः प्राचीनोऽनुभवः ॥ न्या. म. ११७–११८.

(b) केचित्तु .... सत्तात्रैविध्यम् अङ्गीकुर्वाणाः परमार्थसद्वैलक्षण्याभिप्रायेण च अनिर्वाच्यलक्षणम् आश्रयन्तोऽनुभवविरोधं पराकृतवन्तः ॥

न्या. म. ११९.

[द्वितीयः पक्षो विवरणाचार्याणाम् । पं. वि. पा. ३०–३१]

(c) नेदं रजतमित्ययं कालत्रयेऽपि लौकिकपरमार्थरजतप्रतियोगिनीम् अत्रासत्तां प्रतिभासोऽवलम्बते । तत एव प्रतिपन्नं मिथ्यैव रजतम् इति परामृश्यते । न च वाच्यम् लौकिकस्यात्राप्रसक्तस्य प्रतिषेधो रजतस्य न युज्यत इति ; रजताभासप्रसङ्गस्यैव तत्प्रतिषेधनिमित्तत्वात् । न खलु यद् यत्र साक्षाद् विज्ञानप्रसञ्जितम्, तत्र तत्प्रतिषेधो युक्तिमान् ; अतिप्रसङ्गात् ॥ न्या. म. ११९–१२०.

(d) न च पराचीनानुभवविरोधात् प्राचीनस्यानालम्बनता इति युक्तम् । स्वगोचरशूरत्वात् सर्वानुभवानाम् । अपरथा अतिप्रसङ्गात् । .... विभ्रान्तिताप्यसति विषयापहारे अनिर्वाच्यगोचरतयैवोपपन्ना ॥

न्या. म. १२१.

इत्येकः प्रकारो निर्णयस्य ॥

अत्र 'शुक्तिका हि रजतवदवभासते' (अ. भाष्य.) इति लोकानुभवानुवादिभाष्यप्रामाण्यात् शुक्तिकैव विषयो भ्रान्तिज्ञानस्यापि ; अकार्त्स्न्येन ज्ञातत्वात्तु कतिपयानामेव शुक्तिकावयवानां गृहीतानां कथञ्चिद् विशिष्टरीत्या संयोजनेन मनसा विकल्पनमेव रजतावभासो नाम – इत्युपपत्तौ शुक्तिपरमार्थरजतविलक्षणः कश्चित् पदार्थस्तत्काले समुत्पद्यत इत्येषा भ्रान्तिरिति वक्तुं शक्यम् । तस्य च रजतावभासस्य सत्त्वेनासत्त्वेन वा निर्वक्तुमशक्यत्वेनानिर्वचनीयत्वमित्यध्यवसायस्तु प्रमाणरहिततर्कमात्रावष्टम्भन एवेति युक्तम् । ग्रन्थकारोदाहृतार्थापत्तिप्रमाणं तु शुक्तिकाया एव सल्लक्षणाया रजतत्वेन प्रतिभासोपपत्तेरन्यथैवोपक्षीणत्वात्, नात्र रंहितुं

पारयते। नैवात्र रजतमासीत्, भ्रान्त्यैवेत्थं विकल्पितं मया – इत्युत्तरानुभवो रजतप्रसक्तिमेव वारयति। न च स्वगोचरशूरत्वात् सर्वानुभवानाम्, 'रजतमिदम्' इत्यनुभवस्यापि सालम्बनत्वेन भाव्यम्– इति शुष्कतर्केण प्रातिभासिकरजतस्यानिर्वचनीयस्य शुक्त्यतिरिक्तस्यात्रामलाभः सेत्स्यति। शुक्तिकालक्षणालम्बनवत्त्वेनैव सालम्बनत्वोपपत्तौ निष्प्रामाणिकरजतालम्बनत्वावकल्पनानवकल्प्तेः। तदेवं शुक्तिकैव विषयः प्रकारान्तरेण ग्रहणस्य। विपर्ययग्रहणस्य करणदोषादप्युपपत्तेर्विभ्रान्तित्वम् अनिर्वचनीयवस्त्वन्तरकल्पनामन्तरेणैवोपपन्नम्। उक्तं हि बृहदारण्यकभाष्ये –

> (अ) 'यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासाया अग्रहणं विपरीतज्ञानव्यवधानमात्रम्, तथा ग्रहणं ज्ञानमात्रमेव। विपरीतज्ञानव्यवधानापोहार्थत्वाज्ज्ञानस्य' ॥ बृ. भा. १-४-७, पा. ६६६.

इति। एतेन 'शुक्तिकेदन्तासंसर्गवत् तत्रासंसर्गस्याप्यनिर्वाच्यस्यैवावभासनम्' इत्युक्तिः, उक्तिमात्रमित्यापद्यते। अनिर्वाच्यत्वस्यैवासिद्धेः। एवं सत्त्रैविध्याङ्गीकारेण परमार्थसद्वैलक्षण्याभिप्रायेणानिर्वाच्यतोक्तिः -- इत्यपि न साधु, व्यावहारिकप्रातिभासिकसत्तयोः सत्ताविशेषत्वे मानाभावात्। तथा हि भाष्यम् –

> (आ) यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति। एकं च पुनः सत्त्वम्। अतोऽप्यनन्यत्वं कारणात् कार्यस्य ॥ सू. भा. २-१-१६, पा. २०३

इति। तदेतत् पञ्चपादिकादिविवरणान्तेषु प्राचीनप्रस्थानेषु सर्वत्रापि समं प्रत्यवस्थानमिति स्पष्टम् ॥

अभ्युपगम्यापि सदसद्विलक्षणत्वरूपमनिर्वचनीयत्वं प्रतीयमानरजतावभासस्य, नैव प्रपञ्चावभासस्य यथोक्तमनिर्वचनीयत्वं संभावयामः। न हि सद्रूपब्रह्मणोऽतिरिक्तं प्रपञ्चकुक्षिनिक्षेपानर्हम् असद्वस्तु किञ्चन

विद्यते, येन प्रपञ्चस्य सदसद्वैलक्षण्यं संगच्छेतेति । यदा तु शुक्तिकाया अनन्यत्वं प्रतिभासमानरजतस्य, शुक्तिकाया एव तदात्मना प्रतिभासात्—इत्यभ्युपगम्यते, तदा—यथैव प्रतिभासमानस्य रजतस्य स्वेन रूपेण मायामात्रत्वम्, परमार्थतः शुक्तिकात्वमेव, तथैव—प्रतिभासमानस्य जगतः स्वेन भासमानरूपेण मायामात्रत्वं परमार्थतस्तु ब्रह्मत्वमेवेति सेत्स्यति ॥

तथा चाभियुक्तोक्तिः —

(इ) **प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।**
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥

गौ. का. १—१७ पा. १९०

[**भाष्यम्** – न हि रज्ज्वां भ्रान्तिबुद्ध्या कल्पितः सर्पो विद्यमानः सन् विवेकतो निवृत्तः, नैव माया मायाविना प्रयुक्ता तद्दर्शिनां चक्षुर्बन्धापगमे विद्यमाना सती निवृत्ता । तथेदं प्रपञ्चाख्यं मायामात्रं द्वैतम्, रज्जुवन्मायाविवच्चाद्वैतं परमार्थतः । तस्मान्न कश्चित् प्रपञ्चः प्रवृत्तो वा निवृत्तो वास्तीत्यभिप्रायः ॥]

इति प्रथमलक्षणपरीक्षा ॥

(२) **अपरे पुनर्बाधगोचरभावम् अनिर्वाच्यलक्षणमाचक्षते । न चैवमतिव्याप्तिः । निर्वाच्यस्यात्मादेरबाधात् ; नाप्यव्याप्तिः । अनिर्वाच्यरज्जुभुजङ्गादेर्बाध्यत्वनियमात् । कः पुनरयं बाधो नाम ?**

(a) **सविलासाविद्यानिवृत्तिरेव बाध इत्याचार्याः । तथा च तद्गोचरतैवानिर्वाच्यतेति सर्वमवदातम् ॥**

(b) **अपरे तु प्रतिपन्नोपाधौ प्रतिषेधमेव बाधं तद्गोचरभावं च बाधकप्रत्ययप्रवेदनीयमनिर्वाच्यलक्षणम् आचक्षते ॥ न्या. म. १२५-१२६**

[अत्राविद्यानिवृत्तिः पुरस्तात् परीक्षिष्यते । तदिदं बाधलक्षणम् इष्टसिद्धिकाराणाम् । प्रतिपन्नोपाधौ प्रतिषेधलक्षणं तु विवरणाचार्याणाम् । तन्मते तु यद्यपि शुक्तिरजतस्य मिथ्यात्वाविलक्षणमनिर्वचनीयत्वं सिध्यति, रजतस्य शुक्तिकाव्यतिरिक्तसत्त्वं तु न सिध्यति 'शुक्तिका हि रजतवदवभासते' इत्यनुभवविरोधादिति मन्तव्यम् ॥]

अनाद्यनिर्वचनीयाविद्या –

२६५. प्रातिभासिकरजताद्युपादानकारणत्वेनैव अविद्या साधितात्र । तस्माद्यदत्र वक्तव्यम्, तदिष्टसिद्धिपरीक्षणेनैव गतम् । तथापि किञ्चिदिहोच्यते –

(१) यत्त्विदं निगदितम् 'अविद्या हि विद्याभावो मिथ्याज्ञानं वा न चोभयं कस्यचित् समवायिकारणम् अद्रव्यत्वात्' इति, तदप्यसत् । अनाद्यनिर्वाच्याविद्याश्रयणात् । तस्याश्च कार्यानुरूपायाः कारणभावस्याप्रत्यूहमुपपत्तेः । न चास्या अप्रामाणिकतेति युक्तम् । कार्यवशादेव तत्सिद्धेः ॥ न्या. म. १२२.

(२) अत्र प्रयोगः । विवादपदम् अनाद्यनिर्वाच्योपादानम्; विपक्षे बाधकोपपत्तौ सत्यां कार्यत्वात्, यद्यथोक्तसाध्यं न भवति न तद्यथोक्तसाधनम् । यथोभयवाद्यविवादास्पदं वस्तु ॥ न्या. म. १२४.

(३) यत्तदनाद्यनिर्वाच्यं रजताद्युपादानम्, सैवास्माकम् अविद्या सिध्यन्ती रजताद्युपादानतयैव स्वप्रमाणप्रसिद्धा–इति न रजतादेस्तदुपादानतायामपि विवदितव्यम् ॥ न्या. म. १२४.

अत्रानिर्वाच्यतायां कार्यतायां च सिद्धायामेव रजतस्य, तदुपादानकारणत्वेन सिद्धिरविद्यायाः; यथोक्तप्रकारेण रजतावभासस्य विकल्पमात्रत्वे तु शुक्तिकानन्यत्वे च नैवमिति मन्तव्यम् । यत्तु–इष्टसिद्ध्याद्यनुरोधेन कारणनियतत्वं कार्यस्योपगम्य लिखितमत्र –

(४) अनुपपद्यमानायां सदसदुपादानतायां तद्विलक्षणमेव कारणं परिशेषतः कार्यम् अनुमापयेत् सुखादय इव पृथिव्यादिष्वनुपपद्यमाना अष्टद्रव्यविलक्षणमात्मानम् । तस्य च सादितायां तथाविधोपादानान्तरपरिकल्पनप्रसङ्गात्, लाघवतर्कसाहाय्यादनाद्येव तदनुमातव्यम् – न्या. म. १२३

इति । तत्सर्वं तार्किकप्रतिवादिवाक्स्तम्भनक्षमं स्यात् संभवतः, वेदान्तिनये तु भाष्यवार्तिककाराभ्यामङ्गीकृतरीत्या अज्ञातब्रह्मवस्तुन्येव सर्वप्रपञ्चविकल्पनसंभवात्, तत्सार्थक्याय न कार्यकारणभावानुमानावसरोऽस्ति ।

अज्ञानं च भाष्योक्तरीत्या आत्मानात्मनोरितरेतराध्यासलक्षणमेव, सर्वव्यवहारहेतुत्वेन सार्वत्रिकानुभवसिद्धम् । तस्यानादित्वं च कालादिविकल्पनहेतुत्वेन इति सादित्वकल्पनाया एवानवकाशात् । अधिकं त्वत्र पञ्चपादिकादिगतमूलाविद्यावादपरीक्षणेनैवोक्तप्रायमिति तत एवाधिगन्तव्यम् ॥

प्रपञ्चमिथ्यात्वम्, आत्मनः स्वप्रकाशत्वं च –

२६६. विभ्रमसतत्त्ववादमुपजीव्यैव प्रपञ्चमिथ्यात्वमपि साधितमत्र –

(१) तस्मात्, न सत्, नासत्, नापि सदसत्, अपि तु अनाद्यनिर्वाच्याविद्याक्रीडनम् अलीकनिर्भासं विभ्रमालम्बनम् इति सिद्धम् ।

सति चैवं प्रपञ्चोऽपि स्यादविद्याविजृम्भितः ।
जाड्यदृश्यत्वहेतुभ्यां रजतस्वप्नदृश्यवत् ॥ न्या. म. १२७–१२८.

[अत्र सदसद्विलक्षणत्वं प्रपञ्चस्य दुर्भणम्, प्रपञ्चव्यतिरिक्तस्यासतश्चिन्तयितुमप्यशक्यत्वात्–इत्यभाणि प्राक् । तत् स्मर्तव्यम् ॥]

धर्मिग्राहकप्रमाणबाधितमिदमनुमानम् ; यदि पुनरयं न प्रामाणिकः प्रपञ्चः, कथं तर्हि आश्रयसिद्धं न साधनम्, आश्रयहीनश्च दृष्टान्तः ? अनैकान्तश्चात्मना हेतुः ? – इत्याशङ्क्य प्रत्युक्तम्–

(२) यत्तावत् धर्मिग्राहकप्रमाणापबाधितविषयं साधनम् – इति तदतिमन्दम् । भेदप्रपञ्चस्य प्रत्यक्षादिगोचरतायाः प्राक् परास्तत्वात् । .... न चान्तरेण प्रामाणिकभावम् – आश्रयतानुपपत्तिरित्यपि कुलधर्मः । प्रसिद्धिमात्रेण तदुपपत्तेः । .... । तथा चायम् आश्रयहीनो दृष्टान्तः इत्यपोढम् ॥
न्या. म. १२९–१३०.

(३) यदपि आत्मना अनैकान्तो हेतुः – इति, तदप्यप्रेक्षावत्पुरुषभाषितम् । अपराधीनप्रकाशत्वादात्मनः । न चैतन्मनोरथमात्रम् । अनुमानागमाभ्यां तदुपपत्तेः ॥ न्या. म. १३०.

प्रपञ्चमिथ्यात्वस्य शुक्तिरजतदृष्टान्तस्य विभ्रमविषयत्वप्रसाधनमात्रेण तद्बलेनैवानुमानम्, श्रुतिप्रदर्शितयुक्त्यनुभवप्रदर्शने यत्नाभावश्च

किंकृते ? – इति स्यात् पठितॄणां शङ्का । अत्र सर्वत्र ग्रन्थे 'सन्न्यायमकरन्दानां संग्रहः क्रियते मया' इति प्रतिज्ञानुसारेण न्यायानामेव संजिघृक्षितत्वात् अनुमानस्यैव प्राधान्यमिति परिहारो ज्ञेयः । अनुमानस्य सर्वत्र परोक्षस्यैव साधनप्रभुत्वात्, प्रपञ्चमिथ्यात्वात्मस्वयंप्रकाशत्वयोरपि तथैव वादिविप्रतिपत्त्यवकाशप्रदस्य तस्यानुसरणेन कियत्प्रयोजनम् आत्मतत्त्वजिज्ञासूनामिति तु अन्यदेतद् । एतेन–आत्मनो मानसप्रत्यक्षवेदनीयत्वनिरसनम् (न्या. म. १३१), संविदधीनप्रकाशत्वनिरसनं (न्या. म. १३५) चानुमानेनेत्यादिकं परीक्षितप्रायम् ॥

प्रत्यक्षादिप्रमाणानां व्यावहारिकं प्रामाण्यम्, आगमस्य तु तत्त्वावेदकत्वेन –

२६७. प्रपञ्चमायामयत्वमुपजीव्य प्रत्यक्षादिप्रमाणानां प्रामाण्यमधिकृत्य चिन्तनमत्र कृतम् –

(१) मायामयत्वसिद्धौ च प्रपञ्चस्य प्रमाणतः ।
प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकम् ॥
अद्वैतागमवाक्यं तु तत्त्वावेदनलक्षणम् ।
प्रमाणभावं भजते बाधवैधुर्यहेतुतः ॥ न्या. म. १४५.

(२) तत्त्वसाक्षात्कारे तु प्रलीयत एव सकलोऽप्ययं भेदावभासः, तस्य च मायात्मनोऽपि विषयसत्यतया प्रमाणभावः, विपर्यासविरोधिता च युक्ता, स चाविद्यावभासमात्रविरोधितया स्वयमपि प्रलीयते । यथाकतकरजो रजोन्तरसंपर्ककलुषिते सलिले प्रक्षिप्तं रजोन्तराणि विलापयत् स्वयमपि विलीयमानम् अनाविलं सलिलमापादयति, तथा परमात्मतत्त्वसाक्षात्कारोऽपि अविद्यात्मकोऽविद्यावभासान्तराणि संहरन् स्वयमपि संह्रियमाणः परिशुद्धम् आत्मतत्त्वं व्यवस्थापयतीति न किञ्चिदवद्यम् ॥ न्या. म. १५३–१५४.

पित्तोपहतेन्द्रियाणां मधुरेऽपि गुडे तिक्तावभासानुवृत्तिः, कतकरजसः स्वपरविलापकत्वं चेति दृष्टान्तौ मण्डनवाचस्पत्युदाहृतौ, साक्षात्कार-

वादश्च तदीय एवेति तत्र स्थानविमर्शेनैवेदमपि मतं विमृष्टप्रायम् । एवं वेदस्य निर्दोषत्वात् स्वतःसिद्धप्रमाणत्वाच्च बलीयस्त्वं तत्त्वावेदक-प्रामाण्यं च (न्या. म. १५२) इत्यादि सर्वमत्र मिश्रप्रस्थानोपजीवकमेवेति न किञ्चिदधिकमवशिष्यते वक्तव्यम् । भगवत्पादीये प्रस्थाने आत्मानात्मनो-रितरेतराध्यासस्य सार्वत्रिकानुभवानुसारियुक्तिभिः सिद्धस्यैव बलात्, तत्पुर-स्सराणां प्रत्यक्षादीनां यावदध्यासानुवृत्तिस्तावद् व्यावहारिकं प्रामाण्यम्, वेदस्य तु तादृशाध्यासापह्नवेन प्रमाणव्यवहारस्यैव बाधनेन स्वतःसिद्धा-त्मतत्त्वविज्ञापनात् तत्त्वावेदकप्रामाण्यम् । अत्र पुनर्विवादग्रस्तसाक्षा-त्कारस्य कतकादिदृष्टान्तबलेन स्वपरावभाससंहारकत्वोपगमेन कारकविधयैव प्रामाण्यमित्यध्यारोपापवादप्रक्रियानानुगुण्यम्—इति विशेषः ॥

(३) एवं च प्रमाणोपपत्त्यनुपपत्त्योरद्वैतविघात इत्यप्यनवकाशं चोद्यम् । सदद्वैताभ्युपगमात् अलीकाकारेण च प्रमाणादिविभागेन तद्वि-घातात्, अलीकाकारस्य च तत्त्वगोचरतया प्रमाणभावस्योपपादितत्वात् । प्रमाणोपपत्तौ प्रमेयानुपपत्तिरित्यपि न सुभाषितम् ॥ न्या. म. १५५.

प्रमाणस्यालीकत्वात् सदद्वैतवादस्य निरवद्यत्वमित्येतत् अद्वैतस्य प्रमाणसिद्धत्वमुररीकृत्य— इति स्पष्टम् । वस्तुतस्तु वेदान्तानामपि न ब्रह्मणि इदंतया बोधनेन प्रामाण्यम्, किं तु अध्यारोपितापवादविधयैवेति भाष्यकारवचनोदाहरणेनासकृदावेदितम् —

(क) अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत् । न । अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हि शास्त्रम् इदन्तया विषय-भूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि प्रत्यगात्मत्वेन अविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदप्रपञ्चयति ॥

सू. भा. १-१-४, पा. १६.

इत्यादिस्थले तथावगमात् । तस्मात्, भेदापवादित्वेनैव वेदस्य प्रामाण्यं प्राक् प्रबोधात् । जाते तु प्रबोधे न प्रमाणापेक्षा । स्वयंसिद्धात्मरूपत्वादेव प्रबोधस्य ।

(ख) इष्यत एवमस्माभिः श्रुतेरप्यभावः प्रबोधे ॥

सू. भा. ४-१-३, पा. ४६५.

इति भाष्यात् । तस्मात्, 'मायामयत्वेन प्रमाणस्य नाद्वैतविघातः, सदद्वैताभ्युपगमात्' इति प्रतिवादितर्कभिया नाद्वैते संकोच आस्थेयः; सर्वदा सर्वथापि विशुद्धाद्वैतमेव स्वयंसिद्धम्, प्रमाणानामपि सर्वेषां तेनैवात्मवत्त्वादिति निर्भीकैरुद्घोषयितव्यम् ॥

सिद्धे संगतिग्रहसत्त्वात्, वेदान्तानां ब्रह्मणि प्रामाण्यम् –

२६८. प्रमाणानां मायामयत्वेऽप्यद्वैतवाक्यानां ब्रह्मणि मानत्वमित्युपसंहारमुपश्रुत्य पूर्ववादिना –

(१) सिद्धे तत्त्वे मानभावो न युक्तो
वेदान्तानां तत्र सङ्गत्ययोगात् ।
तत्संवित्तिर्वृद्धचैष्टकलिङ्गा
कार्ये सा चेत्याह कश्चिद् विपश्चित् ॥ न्या. म. १५५.

इति शङ्कामुद्भाव्य तत्परिहारत्वेन

(a) विवादपदानि न कार्यान्वितस्वार्थनियतसामर्थ्यानि । पदत्वात् । कार्यपदवत्; (b) यद्वा कार्यं न समस्तपदसामर्थ्यप्रतियोगि । अन्वयातिरिक्तत्वात्, उभयवाद्यविवादास्पदपदार्थान्तरवत् ॥ न्या. म. १६८.

इति प्रयोगद्वयोपन्यासः, आत्मा ज्ञातव्य इति प्रतिपत्तिविधानमाशङ्क्य तन्निराकरणपूर्वकं 'ज्ञातव्य' इत्यादिपदानामर्हार्थतयैव नयनम् (न्या. म. १७२) सिद्धे संगतिग्रहस्थापनप्रयासः, ततः परं

(२) इति विगलितदोषो मानभावः श्रुतीनां
निरतिशयसुखात्मन्यद्वितीये प्रकाशे ।
न तु परमतकार्ये वेदलेशोऽपि मात्वं
भजत इति वदामस्तत्र संगत्ययोगात् ॥ न्या. म. १७९.

इति प्रतिज्ञाय कार्ये संगतियोगविनिवारणम्, पर्यवसाने च

(३) वेदः सिद्ध एकार्थे प्रमाणम् । प्रमाणत्वात् प्रत्यक्षवत् ॥
न्या. म. २५६.

इति प्रयोगोपन्यासः,

(४) इति गलितकलङ्कः सिद्धतत्त्वे प्रसिद्धेः
सविधिकपदराशेर्मानभावः प्रमाणात् ।
प्रतिहतपरयुक्तिवातनीतिप्रपञ्चात्
किमु विगलितभेदे पुंसि वेदान्तवाचः ॥ न्या. म. २५७.

इत्युपसंहारश्च न विस्तरेण परिशीलयितव्यः ॥

अत्र समन्वयाधिकरणे भाष्योदाहृतानां 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' (बृ. २–५–१९) इत्येवञ्जातीयकानां निषेधरूपश्रुतिवाक्यानां ब्रह्मणि कया प्रणाड्या समन्वय इति न प्रामुख्येन विचारितम् । न च केवलं सिद्धे शब्दसंगतिग्रहास्तित्वप्रसाधनेन –तादृशवाक्यसमन्वयः साध्यते, न च तत्साधनेन विना वेदान्तप्रमाणकत्वं ब्रह्मणः सिध्यतीति स्पष्टम् ॥

वेदान्तानामखण्डार्थता –

२६९. 'विज्ञानमानन्दं ब्रह्म', 'तत्त्वमसि'–इत्यादिवाक्यानामद्वैतार्थनिष्ठत्वं न युक्तिमत्, तद्वतशब्दानामैकार्थ्यानुपपत्तेः । तथा हि सति शब्दानां पर्यायतया सहप्रयोगो न स्यात् । न च विज्ञानानन्दसच्छब्दा विवरणोक्तरीत्या (पं. वि. १६१) परापरसामान्यवाचित्वात् सामानाधिकरण्याच्च स्वसामान्यविधानमुखेनैकामानन्दव्यक्तिम् अपरसामान्यव्यञ्जिकां ब्रह्मत्वेन लक्षयन्तीति युक्तम् । यस्मात् एकेनैव पदेन लक्षितार्थस्तस्यैव पदान्तरेण लक्षणायां पदान्तराध्ययनम् अनर्थकमापद्येत – इति पूर्वपक्षमादाय –

(१) लक्ष्यार्थभेदाभावेऽपि व्यवच्छेद्यविभेदतः ।
विज्ञानानन्दपदयोः पर्यायव्यर्थता कुतः ॥ न्या. म. २६०.

इति समाधानमुक्तम् । तत्र दृष्टान्तत्वेन 'प्रकृष्टः प्रकाशश्चन्द्रः' इति वाक्यमुदाहृत्य लिखितम् –

(२) अप्रकृष्टखद्योतादिव्यवच्छेदेन प्रकृष्टपदस्य अप्रकाशसन्तमसादिव्यवच्छेदेन, प्रकाशपदस्य च प्रवर्तमानस्य न वैयर्थ्यम् नाप्यखण्डार्थताभावः। चन्द्रप्रातिपादिकार्थमात्रप्रतिपादनाय पदप्रयोगात् ॥ न्या. म. २६२.

इति । प्रयोगश्चोपन्यस्तः –

(३) विज्ञानानन्दादिवाक्यम् अखण्डार्थपरम् । लक्षणवाक्यत्वात् । यदित्थं तत्तथा प्रकृष्टप्रकाशश्चन्द्र इति वाक्यम्, यथा वा पृथुबुध्नोदराकारः कुम्भ इति ॥ न्या. म. २६३.

इति । आचार्यवाचस्पतिमिश्रानुसारेण च –

अण्मतुबिनिसमासविशेषाणां संनिहितविशेषाभिधायित्वात् 'वैश्वदेव्यामिक्षा', 'दण्डी', 'कमण्डलुमान्' – न्या. म. २६४.

इत्यादीनामप्यखण्डार्थत्वमुक्तम्। तदेतद् व्याख्यानप्रस्थानम् भाष्यप्रस्थानेन (बृ. भा. ३–९–७ ; तै.भा. १–१) सह तुलयितव्यम् । यद्यपि तैत्तिरीये

(क) ज्ञानशब्देन तल्लक्ष्यते न तूच्यते । शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात् । तथा सत्यशब्देनापि । सर्वविशेषप्रत्यस्तमितस्वरूपत्वात् ब्रह्मणो बाह्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते 'सत्यं ब्रह्म' इति, न तु सत्यशब्दवाच्यमेव ब्रह्म ॥ तै. भा. २–१, पा. २८५.

इति, तथापि लक्षणावृत्त्या ब्रह्मणो शब्दबोध्यत्वे न भाष्यस्य निर्भर इति भाति ;

(ख) एवं सत्यादिशब्दा इतरेतरसंनिधानात्, अन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यात् तन्निवर्तकाः, ब्रह्मणो लक्षणार्थाश्च भवन्ति । अतः सिद्धं 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह', 'अनिरुक्तेऽनिलयने' इति, चावाच्यत्वम्, नीलोत्पलवद्वाक्यार्थत्वं च ब्रह्मणः ॥ तै. भा. १–१, पा. २८५.

इति वाक्यशेषाभिप्रायश्च निर्ज्ञातव्यो ब्रह्मणोऽपदार्थत्वमवाक्यार्थत्वं चाङ्गीकुर्वाणैरिति विज्ञप्तिरस्माकम् ॥

(४) एवं च 'तत्त्वमसि' इत्यपि जीवब्रह्मतादात्म्यबोधपरं वाक्यम् अखण्डार्थनिष्ठमेव, 'सोऽयं देवदत्तः' इति वाक्यम्। तत्र हि ... सोऽयम् इत्यवच्छिन्नरूपद्वयोपलक्षितः प्रत्यभिज्ञागोचरभावमाचरति । प्रत्यभिज्ञातं चार्थं परस्मै विशिष्टाभिधायिपदाभ्यां स्वार्थैकदेशपरित्यागेनैकदेशलक्षणया प्रतिपादयति। तथा च तत्त्वमसिवाक्येऽपि तत्त्वंपदार्थयोर्विरुद्धांशपरिहाराय जहदजहल्लक्षणया जीवपरमात्मातादात्म्यपर्यवसायो नानुपपन्नः। तथा च प्रयोगः । तत्त्वमसिवाक्यम् अखण्डार्थनिष्ठम्; अकार्यकारणद्रव्यवर्तित्वे सति समानाधिकरणत्वात्, 'सोऽयं देवदत्त' इति वाक्यवद् इति ॥

न्या. म. २६७–२६९.

अत्र गुणगुणिभाव–कार्यकारणभाव–जातिव्यक्तिलक्षणसामानाधिकरण्यव्यवच्छेदार्थं आत्मा द्रव्यमित्यङ्गीकुर्वाणान् प्रत्येव द्रव्यवर्तित्वविशेषणादानेन प्रयोगोऽयमिति स्पष्टम् । न हि वेदान्तिभिरात्मा द्रव्यत्वेनाभिमतः । एवं च लौकिकेषु प्रकृष्टप्रकाशादिवाक्येषु प्रातिपदिकार्थमात्रनिष्ठपदप्रयोगोऽस्ति, सोऽयम् इत्यादिवाक्येषु लक्षणया एकत्वमप्यभिधीयते इत्येतावन्मात्रोपपादने यदि तात्पर्यम्, तर्हि न कोऽपि दोषः। यदि पुनः सत्यं ज्ञानमित्यादिवाक्येषु तत्त्वमसीति वाक्येष्वप्युक्तलक्षणाखण्डार्थनिष्ठत्वमस्तीत्यत्राभिनिवेशः, तर्हि न युक्तोऽसौ इति ब्रूमः। न हि श्रुतिरपि प्रमातृप्रमाणादिव्यापारम् अभिधानाभिधेयलक्षणवाक्यधर्मं चाङ्गीकृत्य आत्मानं विज्ञापयतीति युक्तिमद्भवेत् । अप्रमेयत्वात्, अपरार्थत्वादवाक्यार्थत्वाच्चात्मनः। 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुतेः – इत्यवधेयम् ॥

मोक्षस्वरूपनिर्णयः –

२७०. अस्मिन् विभागे विज्ञानवादिशून्यवादिजैनवैष्णवकापालिकसांख्यमतेन मोक्षलक्षणमुपन्यस्य तन्निराकरणपूर्वकम् –

(१) नित्यनिरतिशयसुखाभिव्यक्तिर्निःशेषदुःखोच्छेदलक्षणमाचार्याः, स पुनरविद्यास्तमय एवेति ॥ न्या. म. २७१.

इति ब्रह्मसिद्धिमतमेव सिद्धान्तत्वेनाश्रितम्, विशदीकृतश्च तदभिप्रायः –

(२) एकमेव खल्वपराधीनप्रकाशानातिशयानन्दरूपम् अनाद्यविद्यावशेन अद्वितीयमपि सद्वितीयमिव सांसारिकधर्मकलुषितमिव च जीवव्यपदेशं ब्रह्मावभासते । तथा च, अनादिरविद्यैव संसारः, निखिलविकल्पातीतपरिशुद्धपरमात्मविद्योदयाधीनः, तदस्तमय एव मोक्ष इति ॥

न्या· म· २८८·

(३) विद्याविद्ययोर्हि विरोधः सुप्रसिद्धः । शुक्तिशकलादौ चिरनिरूढामपि हि सर्वासनामविद्यां तत्र तत्त्वविद्या उच्छिनत्ति । सर्वस्य चास्य द्वैतावभासस्य अविद्यामयत्वम् अधस्तादापादितम् । अतश्चायमपि तत्त्वविद्याविनिवर्तनीय इति युक्तम् । तत्त्वं च अद्वैतात्मरूपमेव इत्यनेकाभामपर्यालोचनो निरणायि । तथा च अद्वैतात्मविद्यावशादेव अशेषाविद्याविनिवृत्तिर्निःश्रेयसमिति चतुरस्रम् ॥ न्या· म· २८९·

इति च । तत्र चाक्षेपान् विस्तरशोऽनूद्य परिहृत्य च पुनरप्युपसंहृतम् –

(४) तस्मात्, अखिलसंसारमूलाविद्यायास्तत्त्वसाक्षात्कारतो निःशेषविनिवृत्तिर्मुक्तिरिति सकलमपि पुष्कलम् ॥ न्या· म· ३०८·

इति । तत्र प्रायशो मण्डनप्रस्थानस्यैव पृनःपठनं दृश्यत इति न विशेषतो वक्तव्यमस्ति ॥

अविद्याश्रयः –

२७१. अविद्याश्रयविचारे विविधाक्षेपान् आनीय तत्परिहारपूर्वकमुक्तम् –

(१) नाविद्यायाश्चित्प्रकाशाश्रयताविरोधः, नापि तदाश्रयत्वे तस्या अनिवृत्तिः, न च तन्निवर्तकस्य निवर्तकान्तरं चिन्तनीयम्–इत्यशेषमतिसुन्दरम् ॥ न्या· म· ३२२·

(२) यदपि जीवानामविद्याश्रयत्वानुपपत्तिरिति प्रपञ्चितम्, तदिष्टमेव चेष्टितमस्माकम् आयुष्मता – इति परितोषमेव भजामहे । वयं हि ब्रह्मतत्त्वमेवैकम् अविद्याधिकरणमभ्युपगच्छामः । प्रतिषिद्धश्च पक्षेऽस्मिन् प्रागुक्तो दोषः ॥ न्या· म· ३२३·

(३) यत्पुनः 'सर्वज्ञस्य ब्रह्मणः कथमविद्याश्रयत्वम्, अविद्यावान् सर्वज्ञ – इति विप्रतिषेधात्' इति। तत्राविद्यावत्तयैव सर्वज्ञत्वमिति ब्रूमः। सर्वं हि यो जानाति स सर्वज्ञः। तिस्रश्चात्र विधाः संभवन्ति। प्रमाणतो वा सर्वं जानीयात्, भ्रान्त्या वा, स्वभावसिद्धया वा प्रज्ञया। न तावत् प्रामाणिको भेद इत्युक्तम्। न च भ्रान्तिरनविद्यस्य – इत्यपि। स्वरूप-प्रज्ञयापि नान्तरेणाविद्याम् अशेषार्थसंगतिः। असङ्गत्वात्। 'असङ्गो ह्ययं पुरुषः' इति च श्रुतिः। न चान्तरेणाविद्यां अस्ति संबन्धः – इत्युपपादितम्। अतः सर्वज्ञतापि अविद्यावत्ताम् आक्षिपत्येव परमात्मनः, न प्रतिक्षिपति॥

न्या. म. ३२३–३२४.

[सर्वस्याप्यवभासकं ब्रह्म अविद्याया अप्यवभासकमेवेतीति विनापि तां सर्वज्ञत्वं सूपपादम्। अत एवाविद्यामनाश्रित्यैव सर्वज्ञत्वमुपपादितं तैत्तिरीयभाष्ये –

(क) सर्वभावानां च तेनाविभक्तदेशकालत्वात् कालाकाशादिकारणत्वाच्च निरतिशयसूक्ष्मत्वाच्च न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद् भविष्यद् वा अस्ति। तस्मात् सर्वज्ञं तद् ब्रह्म। तै. १–१, पा. २८५ इति॥

सूत्रभाष्ये च –

(ख) यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोऽसर्वज्ञ इति विप्रतिषिद्धम् ...॥ सू. भा. १–१–५, पा. २७.

(ग) यदप्युक्तम्, प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबन्धमन्तरेण ईक्षितृत्व-मनुपपन्नमिति, न तच्चोद्यमवतरति। सवितृप्रकाशवद् ब्रह्मणो ज्ञानस्वरूपनित्यत्वे ज्ञानसाधनापेक्षानुपपत्तेः। अपि चाविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात्। न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य (सू. भा. १–१–५, पा. २७) इति च॥]

(४) यदपि 'ब्रह्मैव च स्वाविद्यया संसरति विद्यया च विमुच्यते' इति ब्रुवाणस्य न बन्धमुक्तिव्यवस्थोपपत्तिरिति। तदसत्। तस्यैव कथञ्चित् तदुपपत्तेः। यावदविद्यं हि सर्वा अपि व्यवस्थाः स्वप्नवदुपपद्यन्ते। विनिवृत्ताविद्ये तु ब्रह्मणि नेष्टैव काचिदपि व्यवस्था, नापि युक्ता॥

न्या. म. ३२४–३२५.

[तदिदम् इष्टसिद्धिवाक्यमेव स्वेष्टसिद्ध्यर्थमुच्चरितम्। तस्मात् तद्विमर्शे-नैवैतदपि विमृष्टम्। अत्रापि 'तदात्मानमेवावेत्' (बृ.) इति बृहदारण्यकभाष्यम् 'कस्य पुनरयमप्रबोधः' इत्यादिसूत्रभाष्यवाक्यं च पुनः पठनीयम्॥]

(५) यत्पुनरुत्पन्नविद्यस्य गुरोर्मायाऽयोगात् शिष्यसंगत्यनुपपत्तिरिति, तदप्यसत्। गुरोरपि शिष्याविद्याविनिर्मितत्वात्। यदपि तस्य कल्पितस्य जडत्वेन विद्यावत्तानुपपत्तौ गुरुत्वानुपपत्तिरिति। तदपि मन्दम्। स्वप्नवद् विद्यावत्तयैव तत्परिकल्पनोपपत्तेः। .... 'यत्तु मदविद्याविनिर्मितस्त्वं किं न स्याः' इति। तत्र त्वदविद्यायास्तव च मद्गुरुवन्मदविद्याविजृम्भितत्वादिति ब्रूमः॥ न्या. म. ३२६-३२७.

[अत्र सिद्धान्त्यपि प्रतिवादिनं त्वदविद्या च, त्वम्, मद्गुरुश्च मदविद्याविजृम्भिताः – इत्याहेत्यहो अविद्याविजृम्भणमहिमा! गुरुशिष्यादिविकल्पस्य संवृतिसत्यत्वमुपदेशार्थत्वात्। अतो 'उपदेशादयं वादः' (गौ. का. १-१८) इति कारिकातद्भाष्यपारायणमेवात्र शरणम्। अविद्याविषयकविवादस्य शान्तये नैष्कर्म्यसिद्धिश्लोकोऽयं पठनीयः –

कुतोऽविद्येति चोद्यं स्यान्नैव प्राग्हेत्वसंभवात्।
कालत्रयापरिच्छिन्नेर्न चोर्ध्वं चोद्यसंभवः॥ नै सि. ३-११६]

(६) (a) यश्चायं पर्यनुयोगः किमनादौ प्रपञ्चपरम्परायाम् आसीत् कस्यचिन्मुक्तिः, नो वा इति निरूपणीयम्। यद्याद्यः कल्पः, कथमधुना नः संसारदर्शनम्? आत्मान्तराभावात्। यद्युत्तरः, कथं तर्हि भविष्यतीत्यप्याशा? इति। तत्तोत्तरपक्षमङ्गीकुर्मो न प्राच्यम्। तेन नाद्यतनसंसारोपलम्भानुपपत्तिः॥ न्या. म. ३३१-३३२.

(b) यत्पुनरुत्तरस्मिन् कल्पे .... कथं तर्हि भविष्यतीत्यप्याशेति तत्र मोक्षशास्त्रप्रामाण्यादेवेति संतोष्टव्यम्॥ न्या. म. ३३४-३३५.

[अहो निराशावादस्य परा काष्ठा, यया 'तद्यो यो देवानाम्'(बृ.) इत्यादिश्रुतिरपि पृष्ठतः क्रियते! 'व्यवस्थाश्रुतयस्तु गवां सत्रासनश्रुतिवत् कथञ्चित् अर्थवादभावेनान्यपरा व्याख्येयाः' (न्या. म. ३३५-३३६) इति दुष्करप्रतिज्ञाप्याश्रीयते। 'स्वप्नवत् सर्वमुपपद्यते' इति स्वोक्तिरपि विस्मर्यते। अलमनया विडम्बनया। इयदेवात्र स्मर्तव्यम् – व्यवहारतो यस्य दृश्यते तस्यैवाविद्या विद्यया च तन्निवृत्तिरिति; परमार्थतस्तु 'न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता' (गौ. का. २-३२) इत्यभियुक्तोक्तिरेव शरणीकरणीया नत्वाधुनिकानां व्याहतस्तर्कसंपर्क इति॥]

मोक्षसाधनविचारः –

२७२. अत्र समुच्चयवादनिरसनपूर्वकं विद्यैव मोक्षसाधनमिति समर्थ्यते –

(१) न खलु शुक्तिशकलादिषु समुत्पन्नस्तत्त्वसाक्षात्कारो न निवर्तयत्यविद्याम्, निवर्तयन् वा सहकारि किञ्चिदपेक्षते । न चान्तरेण तत्त्वसाक्षात्कारं जातु कर्मणा तन्निवृत्तिः । एवं लोकानुसारतो ब्रह्मसाक्षात्कार एव तदविद्याव्यावृत्तिहेतुरिति सांप्रतम् ॥ न्या. म. ३३६–३३७.

[अत्राविद्याविषये साक्षात्कारविषये च यद् वक्तव्यं तत् पुरस्तादेवासकृदुक्तम् । विद्ययैवाविद्यानिवृत्तिरिति सर्वाद्वैतिसंप्रतिपन्नमिति न तत्र वक्तव्यमस्ति ॥]

अविद्यानिवृत्तिः–

२७३. 'अविद्यास्तमयो मोक्षः' इत्यत्र सोऽस्तमयः 'किं सत्यः, मिथ्या वा ?' इति विकल्प्य उभयथापि दोषमुद्भाव्य 'कथमविद्याव्यावृत्तिर्मोक्षः ?' इत्याक्षिप्ते, इष्टसिद्ध्यनुसारेणैव

(१) न सन्नासन्नासदसन्नानिर्वाच्योऽपि तत्क्षयः ।
यक्षानुरूपो हि बलिरित्याचार्या व्यचीचरन् ॥ पा. ३५५.

(२) यथा खलु शुक्तिशकलादेः स्वरूपे प्रसिद्धे प्रकारान्तरानिरूपणाच्च परिशेषतोऽनिर्वाच्यता, तथा अविद्याव्यावृत्तिरपि प्रसिद्धिपरिशेषाभ्यां प्रकारान्तरशालिनीति युक्तम् ॥ न्या. म. ३५५–३५६.

इति पञ्चमप्रकारत्वं व्यावृत्तेरुररीकृतम् ॥

(३) अपरे केचित् परिहरालोचनकातरान्तःकरणाः परमात्मैवाविद्यानिवृत्तिरित्याहुः । उदाहरन्ति च आचार्यवचनम् 'आत्मैवाज्ञानहानिर्वा' इति । न तेषां प्रागुक्तदोषान्निर्मोक्षः । न चात्मैवाज्ञानहानिर्वा – इति वैदिकं वचनम्, येन तन्मात्रादर्थसिद्धिः । अनास्थावादस्तु अयम्; आचार्यस्यापि स्खलितमेव वा, को दोषः ? न्या. म. ३५६–३५७.

['अविद्याया नित्यनिवृत्तिः, आत्मनो वा सादिता' इति प्रागुक्तदोषः इत्यर्थः । एतदसत् । आत्मनो नित्यनिवृत्ताविद्यात्वेऽपि अनिवृत्त्यारोपनिवारणार्थत्वाद् विद्यायाः – इत्याचार्यपक्षावलम्बिनामुत्तरसद्भावात् । विद्याविद्ययोरपि हि अध्यारोपदृष्टयैवाभ्युपगम इति ॥]

(४) अपरे पुनराहुः – अस्तु नामानिर्वाच्यता अविद्यानिवृत्तेः, का नो हानिः ? .... न चानिर्वाच्यायां निवृत्तौ अनिवृत्तिरेव तात्त्विकी स्यात्,

आत्मवदिति सांप्रतम् । आत्मनोऽप्यनिवृत्तेः सत्त्वोपाधिकत्वात् । अत एवोक्तम् – मिथ्याभावेन भूतं किं मिथ्यानाशान्न नङ्क्ष्यति' इति । तदेवं सदसद्वैलक्षण्येऽपि अनिर्वाच्यलक्षणे न काचनानुपपत्तिः । यदा तु बाध्यतैवानिर्वाच्यलक्षणम् इति स्थितिः, तदा अनिर्वाच्यविलक्षणैव । अविद्यानिवृत्तेरबाध्यत्वात्, न चैवमनिर्वाच्यलक्षणमपि अतिव्यापकम् इति सकलमनाविलम् ॥ न्या. म. ३५९.

[अत्रेष्टसिद्धिरीत्यैव केवलतर्कानुसरणेन–अभावस्य नानाप्रकारत्वं विकल्पयतां तार्किकाणां रीतिमेवानुसृत्य–अविद्यानिवृत्तिरपि विविधं विकल्पितेति स्पष्टम् । अविद्यानिवृत्तिः किं सती, किं वा असती, उत सदसती, आहोस्वित् सदसद्विलक्षणा ? – इति विकल्पनं हि लक्षणप्रमाणाभ्यां विना न वस्तुसिद्धिरित्यभ्युगच्छतामेव शोभते । न त्वनुभवानुसारेण वस्तुस्थितिमभिलषतामिति ॥]

उपसंहारः–

२७४. यावता न्यायमकरन्दः प्राणायि, तावता कालेन प्रायशो भामतीष्टसिद्धिविवरणप्रस्थानानुयायिनाम् अद्वैतिनाम् अन्तःकलहौत्सुक्यं शैथिल्यमगमत् । अद्वैतसिद्धान्तप्रदर्शनप्रक्रियानिर्धारणापेक्षयापि परवादिकृताक्षेपपरिहारोऽभ्यर्हित इति कृत्वा द्वैतमिथ्यात्वाविद्यासतत्त्वादीनाम् अनुमानेनैव साधनमावश्यकं प्रथमतस्तर्कप्रधानानां द्वैत्याक्षेपाणां प्रशमनायेति मतिः प्रादुर्बभूव ग्रन्थप्रणेतृषु । पूर्वमीमांसासंमतन्यायानुसारेण वाक्यार्थनिर्णयेनैव केवलं वेदान्तसिद्धान्तः प्रतिष्ठां गच्छेत्, तार्किकविचारसरण्यनुसरणेन लक्षणप्रमाणचिन्तैवालं वस्तुसिद्ध्यै–इत्यभिप्रायोऽपि प्राशस्त्यमलभत । तस्यास्य विचारपरिवर्तनस्य परिणामः कीदृशः कियान् प्रचोदको बभूव वेदान्तप्रधानप्रक्रियाविस्मरणे–इत्येतत् पाठका अचिरादेव द्रष्टार इति प्रकृतानन्दबोधपरीक्षाम् एतावतैव परिसमाप्य विरमामः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

न्यायमकरन्दप्रस्थानपरीक्षा नाम त्रयोदशः काण्डः

---

१४. खण्डनप्रस्थानपरीक्षा

प्रक्रियासंबन्धः–

२७५. उक्तमेतदधस्ताद् यदानन्दबोधाचार्यादारभ्य वेदान्तिनः प्रायशस्तर्करसिका एव संवृत्ता इति । तत्र यद्यपि समानमिदं तर्कशरणत्वम् आनन्दबोधस्य श्रीहर्षस्य च, तथापि वैलक्षण्यमेतत् तयोर्यत् पूर्वस्तावत् तार्किकोत्प्रेक्षितानि कुचोद्यानि भूयशोऽनुमानप्रयोगेणैव परिहर्तुं व्यवसितः; परस्तु तर्कमतखण्डने एव व्यग्रोऽभूत्, तदर्थं च नूत्नामेव काञ्चित् प्रक्रियां स्वोपज्ञामाश्रितवानिति । "श्रुतिप्रामाण्यं सिद्धार्थप्रामाण्यं च **ईश्वराभिसंधौ** साधयिष्यते' (खं. ३६) इति लिखता, आनन्दबोधवदेव अनेनापि ग्रन्थकारेण श्रुतेः सिद्धार्थेऽपि शब्दसंगत्युररीकरणेन श्रुतिप्रामाण्यं प्रसाधितमित्युन्नीयते । नोपलभ्यते तु तद् ग्रन्थान्तरं येन निश्चिनुयाम यदनुभवोऽप्याद्रियते स्म तत्र प्रामाण्यसिद्धये इति ॥

श्रीहर्षसंस्तवः–

२७६. रत्नावल्यादिनाटिकाकर्तुरन्य एवायं श्रीहर्ष इति बहूनां ग्रन्थपुरावृत्तशोधकानां मतम् । नैषधचरितकर्तैव खण्डनखण्डखाद्यनिर्माता इत्यत्र तु न काचन संशीतिः । **नैषधचरिते** 'खण्डनखण्डतोऽपि सहजे' (नै. ६ अन्तिमे श्लोके) इति, खण्डनखण्डखाद्ये च 'यथा च परिहृतचापलम् आत्मतत्त्वामृतसरसि निमज्ज्य रज्यति निरायासमेव मानसम्, तथाहमकथयं नैषधचरितस्य परमपुरुषस्तुतौ सर्गे' (खं. ६०) इति चान्योन्यस्मिन् ग्रन्थे अन्योन्यस्य परामर्शदर्शनात् । यद्यपि नैषधचरितमनेकैः पठितमस्मिन् देशे, तथापि खण्डनग्रन्थे कृतपरिश्रमा विरला एव । एतच्च न केवलं तर्कशास्त्रप्रमेयखण्डनपरत्वात्, शास्त्रान्तरग्रन्थानां नैकेषां परिचयमपेक्षते खण्डनम् इति हेतोः, किं तर्हि, अत्र समाहृतशैल्या अतिक्लिष्टत्वादपि । आह चायं ग्रन्थकृत् स्वयमेव –

(१) 'ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया' (खं. ४१५) ॥

इति । श्रीहर्षजीवनचरितविषये नैषधे इदं लिखितमस्ति स्वयं कविना –

(२) श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमाद्यो गतः ॥ नै.

इति । खण्डने चेदं पद्यं दृश्यते –

(३) ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्
यः साक्षात्कुरुते समाधिषु परब्रह्मप्रमोदार्णवम् ।
यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ॥
खं. ४२०.

इति । अत्र केवलं खण्डनग्रन्थाधारेणैवास्य प्रस्थानं विमृश्यते ॥

ग्रन्थविषयविभागः –

२७७. खण्डखाद्यं नाम वैद्यकग्रन्थेषु प्रसिद्धः कश्चन पाकविशेषः । अयमपि ग्रन्थः परमतखण्डनेन परमानन्दास्वादनयोग्यतासंपादक इत्यभिप्रायेणायं खण्डखाद्यमित्यभिधानेनालङ्कृतोऽस्ति । सदसद्भ्यामनिर्वचनीयाया मायायाः कार्यत्वात् सर्वमप्यनिर्वचनीयम्–इत्येतावतैव कथनेनातृप्यन्नयं श्रीहर्षः 'निर्वचनाशक्यत्वमनिर्वचनीयत्वम्' इत्यभिप्रायमास्थाय ग्रन्थादावेव प्रतिज्ञातवान् –

(१) शब्दार्थनिर्वचनखण्डनया नयन्तः
सर्वत्र निर्वचनभावमखर्वगर्वान् ।
धीरा यथोक्तमपि कीरवदेतदुक्त्वा
लोकेषु दिग्विजयकौतुकमातनुध्वम् ॥ खं. २.

ग्रन्थोऽयं–भूमिका, खण्डनभागश्चेति द्वेधा विभाज्योऽस्ति । अत्र भूमिकैव विशेषतः परिशील्यते । तत्र भूमिकायाम् (१) प्रमाणादिसत्त्व-

मभ्युपगम्यैव वादिप्रतिवादिभ्यां कथा प्रवर्तनीया – इति नियमस्य खण्डनं कृतम् । अनन्तरं स्वप्रकाशत्वं ब्रह्मणः प्रसाध्य, तदनन्तरं प्रत्यक्षमात्रगम्यो भेदो न श्रौताद्वैतबाधक इत्युपपादितम् । द्वितीयसिंस्तु भागे षोडश-पदार्थानामप्यनिर्वचनीयत्वं व्यवस्थापितम् ॥

कथकाभ्यां प्रमाणादिसत्ता प्रथममेवाङ्गीकार्येति नियमो नास्ति –

२७८. प्रप्रथमं कथायां प्रमाणसत्यताङ्गीकारावश्यकता नियम इत्थं खण्डितोऽत्र –

(१) प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन, तत् कस्य हेतोः ? किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाहित्यनियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्यत्वात्, उत कथकाभ्यां प्रवर्तनीयवाग्व्यवहारं प्रतिहेतुत्वात्, उत लोकसिद्धत्वात्, अथवा तदनभ्युपगमस्य तत्त्वनिर्णय-विजयफलातिप्रसङ्गकत्वात् ?

(a) न तावदाद्यः । तदनभ्युपगच्छतोऽपि चार्वाकमाध्यमिकादे-र्वाग्विस्तराणां प्रतीयमानत्वात् । तस्यैव वा अनिष्पत्तौ भवतस्तन्निरास-प्रयासानुपपत्तेः । सोऽयमपूर्वो वाक्स्तम्भनमन्त्रो भवताभ्यूहितः, नूनं यस्य प्रभावाद् भगवता सुरगुरुणा लोकायतकानि सूत्राणि न प्रणीतानि, तथागतेन वा मध्यमागमा नोपदिष्टाः, भगवत्पादेन वा बादरायणीयेषु सूत्रेषु भाष्यं नाभाषि ॥ खं. २–३.

(b) नापि द्वितीयः । तथा हि स्यादप्येवं यदि कथकप्रवर्तनीय-वाग्व्यवहारं प्रति प्रमाणादीनां हेतुता तत्सत्त्वानभ्युपगमे निवर्तेत । न त्वेवं संभवति । तथा सति तत्सत्त्वानभ्युपगन्तॄणां वाग्व्यवहारस्वरूपमेव न निष्पद्येत । हेत्वनुपपत्तेः । उक्तश्चायमर्थो यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपापलापो न शक्यत इति ॥ खं. ६.

(c) नापि तृतीयः । लोकव्यवहारो हि प्रमाणलोकव्यवहारो वा स्यात्, पामरादिसाधारणव्यवहारो वा ? नाद्यः । विचारप्रवृत्तिमन्तरेण तस्य दुर्निरूपत्वात् । तदर्थमेव पूर्वं नियमस्य गवेषणात् । नापि द्वितीयः । शरीरात्मत्वादीनामपि तथा सति भवता स्वीकर्तव्यत्वापातात् । पश्चात्

तद्विचारबाध्यतया नाभ्युपेयत इति चेत्, तर्हि प्रमाणादयोऽपि यदि विचारबाध्या भविष्यन्ति तदानभ्युपेया एव, अन्यथा तूपगन्तव्या इति लोकव्यवहारसिद्धतया सत्त्वमभ्युपगम्यत इति तावन्न भवति ॥ खं. ८.

(d) नापि चतुर्थः। यादृशो भवता प्रमाणादीन्यभ्युपगम्य व्यवहारनियमः कथायाम् आलम्ब्यते, तस्यैव प्रमाणादिसत्त्वासत्त्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात् । तस्य यदि मां प्रति फलातिप्रसञ्जकत्वं, तदा त्वां प्रत्यपि समानः प्रसङ्गः ॥ खं. ८.

यथोक्तप्रकारेण प्रमाणसत्त्वाङ्गीकारनियमं दूषयित्वा अन्ते लिखितम्–

(२) कतिपयप्रतिपत्तृकतिपयकालतथात्वावगमादेव प्रायेण लौकिको व्यवहारः प्रतीयते, तादृशश्चायं सत्त्वावगमः कथाङ्गम् । एतत् तदुच्यते 'व्यावहारिकीं प्रमाणादिसत्ताम् आदाय विचारारम्भः' इति । तस्मात्, यादृग्व्यवहारनियमः कृतः, तन्मर्यादा अनेन नोल्लङ्घिता इति यद्वादिव्यवहारे मध्यस्थावगमः, स विजयते ; यस्य तु वचसि नैवं तत्त्वावगमः, तस्य पराजयः। यत्र वाद्युक्तनिग्रहसत्त्वावगमः स निगृहीतः ; तदितरस्तु न तथा–इत्यादिनियम एव कथारम्भाय ग्राह्यः ॥ खं. १०–११.

इति। नियमानुलङ्घनं तदुल्लङ्घनं वा मध्यस्थेन निर्णीतं जयपराजयनियामकं न तु प्रमाणादिसत्तानभ्युपगमस्तदभ्युपगमो वा – इत्येतावान् यथोक्तस्य सारः। प्रमाणानामेव यत्र कथायां सत्त्वमसत्त्वं च विनिर्णेयत्वेत धृतम्, तत्र तत्सत्त्वासत्त्वाङ्गीकारौदासीन्येनैव कथा प्रवर्तयितव्येति स्पष्टमेव। अत एव शाङ्करभाष्ये सर्वप्रमाणप्रमेयव्यवहाराणामविद्यापुरःसरत्वं प्रतिज्ञाय –

(क) 'कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ? उच्यते – देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः'

इति भाष्ये अर्थापत्तिप्रमाणमुदाहृतमिति मन्यमाना प्रमाणवृत्तानभिज्ञा इति स्पष्टम्। न हि प्रमाणमधिकृत्यैव यत्र विचारः, तत्र प्रमाणोदाहरणं

युक्तिमद् भवेदिति । एवं सर्वप्रमाणानामध्यासपूर्वकत्वमभ्युपगन्तॄणां अध्याससद्भावेऽपि प्रमाणोपन्यसनं नोचितमिति स्पष्टम् । प्रमाणप्रमेयादि-सर्वव्यवहाराणाम् अविद्यापुरःसरत्वोपपादने प्रमाणादिसत्त्वाभ्युपगमपूर्वकं विचारः कर्तव्य इति निर्बन्धो निरर्थक इत्यपि सेत्स्यति । अत्र तु प्रमाणादिनिराकरणस्यैव समुद्दिष्टत्वात् युक्तिभिरेव नियमनिरासे प्रयतित-मिति स्पष्टम् ॥

शून्यवादिनोऽपि कथायां प्रवेशाधिकारः–

२७९. प्रमाणादिसत्ता कथकाभ्यामवश्यमभ्युपेया – इति नियमो नास्ति, चार्वाकमाध्यमिकभगवत्पादीयानां विनापि तन्नियमाभ्युप-गमं स्वस्वमतानुसारेण स्वसिद्धान्तप्रतिपादने निष्पत्यूहं प्रवृत्तिदर्शनात् – इत्युक्तम् । तत्र शून्यवादिमतेन प्रमाणादिसत्तामनभ्युपगम्यैव कथा शक्य-प्रारम्भा इत्येतद्दर्शयितुं शून्यवादिमतं प्रदर्श्यते–

(१) अनेन नियमेन वक्तव्यम् – इत्यस्यायमर्थः । 'अनेन नियमे-नोक्तमनेन' इति मध्यस्थावगमस्य विषयीभवितव्यमिति । न च वाच्यम् अन्ततस्तदवगमस्यापि सत्ता अभ्युपेयेति । तस्यापि सत्ताचिन्तायां तत्सत्ता-वगमान्तरस्यैव शरणत्वात् । न चैवम् अनवस्था । तदनुसरणावश्यंभावा-नङ्गीकारात् । 'एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः' (श्लो·वा· १-६१) इति न्यायात् । न चान्तिमासत्त्वे पूर्वप्रवाहासत्त्वापत्तिः । तथा च, अवगम-मादायापि व्यवहरतो न निस्तार इति वाच्यम् । अस्तु, एवं हि । तथापि त्रिचतुरज्ञानकक्षागवेषणमात्रविश्रान्तेन विचारेण ततः परम् अननुसरण-रमणीयेनैव च समयं बद्ध्वा कथायां मिथः संप्रतिपत्त्या प्रवर्तनात् । अन्यथा प्रमाणादिसत्त्वाभ्युपगमेऽपि ज्ञानानवस्थाया दुष्परिहरत्वात् ॥
खं· ११–१२·

(२) यथा च स्वत्पक्षे स्वरूपसत्त्वाविशेषेऽपि विज्ञानस्वरूपसत्तैव परं व्यवहारोपपादिका न घटादिसत्ता, एवमेव असत्त्वाविशेषेऽपि ज्ञानमेवासत् व्यवहारोपपादकं नान्यत् । 'असच्च उपपादकं च इति व्याहतम्' इति चेत्, न । सत् उपपादकमिति कुतो न व्याहतम् ? न हि सत् उपपाद-कम्, असन्न – इति क्वचिदावयोः सिद्धम् ॥ खं· १२–१३·

असत् कार्यकरं कथम् ?— इत्यत्र खण्डनोत्तरं त्विदम् —

(३) पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ॥ खं. १८.

असतोऽपि संवृतिसत्त्वाङ्गीकारः शून्यवादिनः । तत्राक्षेपपरिहारौ खण्डनकारस्य —

(४) असती सा न विशेषिका, सती सा नेष्टा — इत्यभिसंधानेन संवृतिरपि सती नैव — इति पृच्छन् प्रतिवक्तव्यः । विज्ञानं तावत् व्यवहारोपपादकतया द्वाभ्यामप्यनुमतम् । तस्यापि जिज्ञासायां त्रिचतुरकक्षाविश्रान्तगवेषणस्य यदि सत्ता उपपन्ना भविष्यति, तदा सता तेन इदमुपपादितं भविष्यति ; अथ असत्ता तस्य पर्यवसास्यति, तदा असतैव तेन इदमुपपद्यत इति स्वीकर्तव्यम् । भ्रमविषयेणेव भ्रमे विशिष्टताव्यवहारः ॥
खं. १९–२०.

शून्यवादिनः किं कार्यकारणभावमभ्युपगम्य खण्डनोक्तप्रकारेण तदुपपादनं कुर्वन्ति न वा — इत्येतदन्यत् । शून्यवादिनापि ज्ञानज्ञेययोरुभयोरप्यसत्त्वमभ्युपगच्छता 'प्रमाणादिसत्तामङ्गीकृत्यैव कथा प्रारब्धव्या' इतिनियमः शक्यनिराकरण इत्येवाभिप्रायोऽत्रावसेयः ॥

शून्यवादविचारानन्तरं स्वप्रकाशविज्ञानवादः प्रतानितोऽत्र । ज्ञानस्य स्वयंसिद्धत्वेनैव शून्यवादस्य सुनिराकरणत्वं प्रतिज्ञातं भाष्ये —

(क) न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोऽन्यत् तत्त्वम् अनधिगम्य शक्यतेऽपह्नोतुम् । अपवादाभावे उत्सर्गप्रसिद्धेः ॥
सू. भा. २–२–३१, पा. २५२.

(ख) किञ्चिद् हि परमार्थमालम्ब्य अपरमार्थः प्रतिषिध्यते । यथा रज्ज्वादिषु सर्पादयः । तच्च परिशिष्यमाणे कस्मिंश्चिद् भावे अवकल्पते ॥
सू. भा. ३–२–२२, पा. ३६४.

इति च । अतः शून्यवादस्य वेदान्तविचारणायामत्यन्तानपेक्षणेऽपि तत्र स्वीकृतं वितण्डानुसरणं परवादिमतप्रतिक्षेपणे उपयोक्ष्यत इति स्यात्, शून्यवादिनोऽपि प्रमाणाद्यसत्त्वाभ्युगन्तुः कथायां प्रवेश उपपादितोऽत्र ॥

स्वप्रकाशविज्ञानवादः –

२८०. विज्ञानस्य स्वप्रकाशत्वे सिद्धे एव सर्वो व्यवहारः सिद्ध्यति । नान्यथा । तदेतद् ग्रन्थकारः सर्वप्रथमम् आह –

(१) विज्ञानं तावत् स्वप्रकाशं स्वत एव सिद्धस्वरूपम् । न खलु विज्ञाने सति जिज्ञासोरपि कस्यचित् 'जानामि, न वा' इति संशयः, 'न जानामि' इति वा विपर्ययः, व्यतिरेकप्रमा वा । तेन जिज्ञासितस्य अतत्त्वज्ञानव्यतिरेकप्रमाणानाम् अभावसमुदायः स्वव्यापकं जिज्ञासितस्य प्रमितत्वम् आनयति । अन्यथा हि जिज्ञासितप्रमितत्वव्यतिरेकव्यापकं जिज्ञासितव्यतिरेकोल्लेखिज्ञानम् अविज्ञितजिज्ञासस्य स्यात् । अतः सर्वजन-स्वात्मसंवेदनसिद्धमेव अस्य बोधस्य स्वरूपम् ॥ खं. २१.

प्रमातृप्रमाणप्रमेयविभागसाक्षित्वादेव सिद्धे विज्ञानस्वरूपस्यात्मनः सप्रकाशत्वे जन्यज्ञानस्वरूपपरिशीलनेनापि तत् साधयितुं प्रवृत्तिः परवादि-संतोषाय । अत एव विज्ञानस्वप्रकाशतानङ्गीकर्तृमते विविधान् दोषानुद्भाव्य स्वमते ते नावकाशं लभन्ते इत्याह स ग्रन्थकृत् –

(२) न च तैर्दोषैर्नास्त्येव ज्ञानम् इत्यास्थेयम् । स्वतः सर्वसिद्धस्य दुरपह्नवत्वात् । स्वप्रकाशाङ्गीकारादेव चानुभवस्य सर्वदोषहानेर्वक्ष्यमाण-त्वात् । प्रकाशात्मतामात्रस्यैव स्वतःसिद्धिसंभवे जडात्मनां धर्माणां केषामपि तदन्तर्भावानुपपत्तिः । अत एव धर्मोपग्रहप्रवर्तिष्णुवाग्व्यवहारा-विषयत्वम् कालानवच्छेदमादाय च नित्यत्वोपचारः । देशानवच्छेदमादाय विभुत्वव्यपदेशः । प्रकारावच्छेदविरहनिबन्धनश्च सर्वात्मत्वाद्वैतादि-व्यवहारः ॥ खं. २५.

[इदमेव तु तर्कनिरपेक्षमनुभवात्मकं स्वयंसिद्धतत्त्वमाधारीकृत्य सर्वे प्रमाणप्रमेयादयो तर्काश्च स्वात्मानं लभन्ते । अतोऽत्र तर्केण तत्सिद्धिप्रत्याशा न कर्तव्या । एवं हि भाष्यकाराः –

(क) नासौ नास्ति नाधिगम्यत इति शक्यं वदितुम् 'स एष नेति-नेत्यात्मा' इत्यात्मशब्दात् । आत्मनश्च प्रत्याख्यातुमशक्यत्वात्; य एव निराकर्ता तस्यैवात्मत्वात् (सू. भा. १-१-४, पा. २०) इति ॥]

(३) सौगतप्राभाकरादिवद् भावे, नैयायिकवच्चाभावे, अभावानतिरेकस्वीकारादेव चाद्वैताव्याघातः । भ्रमविषयनिषेधवच्च प्रतियोगिनः सर्वथैवासिद्धत्वापि न काचित् क्षतिः ॥ खं. २५-२६.

[भावाभावादिविभागः प्रपञ्चान्तर्गतपदार्थविषयकः, न तु सर्वाद्वैतविकल्पास्पदे भावत्वमभावत्वं वा, अभावप्रतियोगित्वं तदनुयोगित्वं वा शक्यकल्पनम् । निषेधश्रुतिस्तु सर्वप्रवृत्तिनिमित्तरहितं ब्रह्म अस्पृष्ट्वैव तस्मिन्नध्यारोपितं विकल्पमेव निवर्तयति । विविधविकल्पास्पदत्वं ब्रह्मण इत्ययमपि विकल्प एव, सर्ववाक्प्रत्ययाविषयत्वात्–इति बोध्यम् । पश्यन्तु वार्तिककाराभिप्रायमप्यत्र ॥]

(४) तदेतत्तु श्रुत्या प्रमाणेनोपलक्षणन्यायात् तात्पर्यतः प्रकाश्यते। तेन परमार्थतोऽभिधानाभिधेयभावविरहे तात्पर्यतः श्रुतिलक्ष्यस्मिन् अविद्यादशायां पराभ्युपगमरीत्या प्रमाणम् इत्युच्यते। वस्तुतस्तु स्वात्मसिद्धमेव चिद्रूपम् ॥ खं. २६.

[परमात्मनो निर्विशेषं रूपं नोपलक्षणविधयापि प्रकाशयितुं शक्यम् । लक्षणोपलक्षणप्रमाणानामपि तदधीनतयैव प्रकाशात् । शास्त्रं तु प्रमाणं न नैयायिकाद्यभ्युपगमरीत्या किं तु भगवत्पादोक्तविधया –

(क) शास्त्रं तु, अन्त्यं प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रामाण्यमात्मनः प्रतिपद्यते न त्वज्ञातार्थज्ञापकत्वेन । तथा च श्रुतिः – 'यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः' इति ॥ गी. भा. २–१८, पा. १६.

(ख) प्रमातृत्वं हि आत्मनो निवर्तयत्यन्त्यं प्रमाणम् । निवर्तयदेव च अप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे ॥ गी. भा. २–६९, पा. ३९.]

(५) न चैवं घटतज्ज्ञानयोर्यादृग् विषयविषयिभावः, ततो मात्रयापि स्वप्रकाशे विषयविषयिभावान्यत्वे बाध्यतैकत्र स्यात् । अस्त्येव ह्यविद्याविद्यमाने घटतज्ज्ञाने बाध्यत्वम् । परमार्थसति तु स्वप्रकाशे पारमार्थिकत्वमिति द्वयोरननुगमेऽपि न दोषः ॥ खं २९.

[यथयं विषयविषयिभाव उपगतः प्रौढिवादेन, नित्यविज्ञानैकरसघनत्वान्नज्ञानान्तरमपेक्षते ब्रह्म – इत्यभिप्रायकः, तर्हि सम्यगेव । उक्तं ह्यभियुक्तैः –

(क) अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते ।
ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते ॥ गौ. का. ३–३३.

इति । वस्तुतस्तु नैव विषयित्वं विषयत्वं वा ब्रह्मणि । श्रुतिर्हि विद्यावस्थाया सर्वविषयविषयिभावं निषेधति

(ख) 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' (बृ. २-४-१४) इति । अत एव स्यादत्रारुचेरङ्गीकारं त्यजति ग्रन्थकारोऽप्यनुपदमेव ॥]

(६) अथवा स्वात्मना सह क्रियाकर्मभावो विषयविषयिभावो वा स्वप्रकाशार्थं इति नाभ्युपेयमेव । यथा तु भवतां सत्तासंबन्धादितरत्र सद्व्यवहारव्यवस्था, सत्ता तु स्वयमेव सद्रूपा, न चैतावता स्वात्माश्रयता तस्याः, तथा ज्ञानमपि स्वत एव सिद्धस्वरूपम् ॥ खं. २९-३०.

['यथा परमते तथा स्वमतेऽपीति तुष्यतु दुर्जन इतिन्यायेन । न हि स्वप्रकाशत्वं तर्केण साधनीयं बाधनीयं वा 'अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः' इति भाष्योक्तन्यायेन तस्य तर्कप्रवृत्तेः पूर्वमेव सिद्धत्वात् । अत एव हि तार्किकसंमतायाः सत्ताया वैलक्षण्यमुच्यते छान्दोग्यभाष्ये ब्रह्मणः सद्रूपस्य –

(क) ननु वैशेषिकपक्षेऽपि सत्सामानाधिकरण्यं सर्वस्योपपद्यते । द्रव्यगुणादिषु सच्छब्दबुद्ध्यनुवृत्तेः, 'सद् द्रव्यम्', 'सन् गुणः', 'सत् कर्म' इत्यादिदर्शनात् । सत्यमेवं स्यात् इदानीम्, प्रागुत्पत्तेस्तु नैवेदं कार्यं सदेवासीदित्यभ्युपगम्यते वैशेषिकैः । प्रागुत्पत्तेः कार्यस्यासत्त्वाभ्युपगमात् । न चैकमेव सदद्वितीयं प्रागुत्पत्तेरिच्छन्ति । तस्मात् वैशेषिकपरिकल्पितात् सतोऽन्यत् कारणमिदं सदुच्यते मृदादिदृष्टान्तेभ्यः ॥ छां. भा. ६-२-१, पा. ५०७.

तुल्यन्यायेन विज्ञानरूपत्वमप्यात्मनो विलक्षणमेव तार्किकाभ्युपगतात् ज्ञानात् । न हि तत्संमतं ज्ञानं सुषुप्तादौ समस्ति । आत्मविज्ञानं तु तत्राप्यनुवर्तते सर्वाद्वैतविगमेऽपि ।

(ख) 'यद् वै तन्न विजानाति विजानन् वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद् विभक्तं यद् विजानीयात्' ॥ बृ. ४-३-३०.

– इत्यादिश्रुतिभ्यः ॥]

(७) तदेवं यद् यदन्यत्र दृष्टवैधर्म्यं स्वप्रकाशे पर्यवसास्यति, तत् सर्वम् अन्यथानुपपत्तिरेव स्वप्रकाशसाधकतया प्रदर्शिता स्वीकारयिष्यति । तद् यथा 'अन्यो ज्ञाता, अन्यश्च ज्ञेयः' इत्यन्यत्र दृष्टम् अहमिति व्यवहारान्यथानुपपत्त्या त्याज्यम् । तथा 'अन्यत् ज्ञानम्, अन्यत् ज्ञेयम्' इति जानामीति व्यवहारान्यथानुपपत्त्या त्याज्यम् । सर्वतो बलवती हि

अन्यथानुपपत्तिः, तथादृष्टतामात्रबलम् अवलम्ब्य प्रवृत्तं तर्कशतमपि बाधते। तदिदमाहुः 'प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि' इति ॥ खं. ३०.

[अत्र तत्तद्व्यवहारान्यथानुपपत्त्या तत्तन्नियमस्य त्याज्यत्वं ब्रह्मणो व्यावहारिकत्वम् अर्थापत्तिप्रमाणस्य स्वप्रकाशत्वसाधकत्वं चाभ्युपगम्यैवेति स्फुटम्। सर्वप्रमाणव्यवहारातीतं तु ब्रह्म 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' (बृ.) इति श्रुतेः। सर्वव्यवहाराविषयसुषुप्त्यादिष्वपि स्वयंप्रकाशत्वाच्चात्मनः। अत एव हि प्रमाणमूर्धन्यभूतेनानुभवलक्षणेनैव स्वयंसिद्धत्वमाह ग्रन्थकृदप्युत्तरत्रेति बोध्यम् ॥]

(८) तदित्थं त्वदङ्गीकृतसद्विचारलक्षणोपपन्नैरेवंविधैर्विचारैः स्वप्रकाशता भवता सुप्रतिपदा। अस्माभिस्तु स्वसंवेदनबलादेव स्वतःसिद्धस्वरूपं विज्ञानमास्थीयत इति ॥ खं. ३१.

[स्वप्रकाशविज्ञानवादे दृष्टवैधर्म्यशङ्काकलङ्कापनोदनार्थमेवेयं तर्कसरणिरादृता खण्डने इत्यत्रेदमेव वाक्यं प्रमाणम् ॥]

अनिर्वचनीयत्वं प्रपञ्चस्य–

२८१. शून्यवादाद् वेदान्तवादस्य वैलक्षण्यं द्योतयितुम् इदमुक्तं ग्रन्थकारेण–

(१) आदिमः सर्वमेवानिर्वचनीयं वर्णयति। तदुक्तं भगवता लङ्कावतारे 'बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते। अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः ॥' इति। विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणं ब्रह्मवादिनः संगिरन्ते। तथा हि नेदं सद् भवितुमर्हति, वक्ष्यमाणदूषणग्रस्तत्वात्। नाप्यसदेव। तथा सति लौकिकविचारकाणां सर्वव्यवहारव्याहत्यापत्तेः। यदपि निर्वक्तुम् असामर्थ्ये गुरव उपास्यन्ताम्, येभ्यो निरुक्तयः शिक्ष्यन्ते – इत्युपालम्भवचनम्, तत् तदा शोभेत यदि मेयस्वभावानुगामिनी इयमनिर्वचनीयता – इति न ब्रूयुः, वक्तृदोषादिति च वदेयुः। यस्तु वादी निरुक्त्यभिमानं धत्ते स निर्वक्तुं न तु शक्ष्यति। वक्तव्यदोषात् ॥ खं. ३१–३२.

['अनवधारणीयस्वभावत्वात् सर्वपदार्था निस्स्वभावाः – इति शून्यवादिमतम्' इति तु सम्यक्। 'विज्ञानव्यतिरिक्तं विश्वं सदसद्भ्यां विलक्षणम् – इति ब्रह्मवादः' इति तु चिन्त्यम्। यतो 'वाचारम्भणं विकारो नामधेयम्'

इति कार्यस्य केवलं वागारब्धत्वात् प्रतीतरूपेण मिथ्यात्वं 'मृत्तिकेत्येव सत्यम्' इति च विकारस्य स्वकारणरूपेणैव सत्यत्वं ब्रुवन्ति श्रुतयः। अनुभवारूढं च तत्। अत एव वेदान्ता निश्शङ्कं 'ब्रह्मैवेदं विश्वम्', 'आत्मैवेदं सर्वम्' इति च ब्रह्मात्मत्वमेवावधारयन्ति प्रपञ्चस्य पारमार्थिकेन रूपेण। सदसद्विलक्षणं विश्वम्–इति वादे विश्वविलक्षणस्यासतो नैवावकाशोऽस्ति इत्यावेदितम् असकृत्॥

ब्रह्मातिरिक्तवस्तुनः सदसद्विलक्षणत्वमेवेति चेद् ब्रह्मवादः स एव समर्थनीयः प्रथमतः। न हि केवलं निरुक्त्यभिमानखण्डनेन विश्वस्यानिर्वचनीयत्वं साधितं भवति। न हि वक्तृदोषादनिर्वचनीयत्वं मन्यते ग्रन्थकारोऽपीति॥]

ननु सदसत्पक्षयोर्दोषदर्शनादनिर्वचनीयतेति ब्रुवाणस्य किं सदसत्त्व-संशयः, किं वा सदसत्त्वपक्षबहिर्भावाभ्युपगमः? – इति विकल्प्य उभयथापि दोषमुद्भावयन्तं प्रत्याह खण्डनकारः –

(२) तदेतदनाकलितपराभिसन्धेः प्रत्यवस्थानम्। यो हि सर्वमनि-र्वचनीयसदसत्त्वं ब्रूते, स कथमनिर्वचनीयतासत्त्वव्यवस्थितौ पर्यनुयुज्येत? सापि हि कृत्स्नप्रपञ्चपरसर्वशब्दाभिधेयमध्यनिविष्टैव। परस्यैव व्यवस्थया एवं पर्यवस्यति 'निर्वचनप्रतिक्षेपादनिर्वचनीयत्वम्। विधिनिषेधयोरेकतर-निरासस्येतरपर्यवसायितायास्तेनाभ्युपगमात्। ततः परकीयरीत्या इदमुच्यते अनिर्वचनीयत्वं विश्वस्य पर्यवस्यतीति। वस्तुतस्तु वयं सर्वप्रपञ्चसत्त्वासत्त्व-व्यवस्थापनविनिवृत्ताः स्वतःसिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भरमवलम्ब्य चरितार्थाः सुखमास्महे॥ खं. ३३.

[सत्यमिदं यदनिर्वचनीयसदसत्त्वं सर्वस्यापि प्रतिजानानस्य नास्त्यनिर्वच-नीयतासत्त्वव्यवस्थितौ पर्यनुयोज्यत्वमिति। परं परकीयरीत्यैव चेदनिर्वचनीयत्वं विश्वस्य, स्वमतेन किंतत्त्वकं तत्? – इति तु नोक्तमत्र। न च चिदात्मनः स्वतःसिद्धत्वाभ्युपगममात्रेणाद्वैतसिद्धान्तः सेत्स्यति। न हि तदानीमपि साङ्ख्य-दर्शनाद् विशेषोऽस्य दर्शनस्य दर्शितं स्यात्। अभियुक्तसंमतप्रक्रियया तु

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः॥ गौ. का. १–१७.

इति रज्ज्वां सर्प इव कल्पितत्वादेव न प्रपञ्चो नाम विद्यते निवर्तते वा इति। अतो प्रस्थानवैषम्यम्॥]

(१) अयमत्र संग्रहः—नामरूपे परमात्मन 'आत्मभूते इवाविद्याकल्पिते तत्त्वान्यत्वाभ्यामनिर्वचनीये' (सू. भा. २-१-१४) इति **भाष्यकारसंमत अनिर्वचनीयतावादः** । तयोस्त्वनिर्वचनीयत्वं प्रतीयमानमायारूपेणैव ; वस्तुतस्तु आत्माव्यतिरिक्तैव तयोः सर्वदा —

(क) यद्यपीदानीं स एवैकः, तथाप्यस्ति विशेषः । प्रागुत्पत्तेरव्याकृतनामरूपभेदम्, आत्मभूतम्, आत्मैकशब्दप्रत्ययगोचरं जगत् ; इदानीं व्याकृतनामरूपभेदत्वात्, अनेकशब्दप्रत्ययगोचरम्, आत्मैकशब्दप्रत्ययगोचरं च-इति विशेषः। यथा सलिलात् पृथक् फेननामरूपव्याकरणात् प्राक् सलिलैकशब्दप्रत्ययगोचरमेव फेनम्, यदा सलिलात् पृथङ्नामरूपभेदेन व्याकृतं भवति तदा 'सलिलं फेनं च' – इत्यनेकशब्दप्रत्ययभाक् सलिलमेवेति च एकशब्दप्रत्ययभाक् च फेनं भवति, तद्वत् ॥ ऐ. भा. १-१.

(ख) यदा तु परमार्थदृष्ट्या परमात्मतत्त्वात् श्रुत्यनुसारिभिः अन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवद् वस्त्वन्तरे न स्तः, सलिलफेनघटादिविकारवदेव, तदा तदपेक्ष्य 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन'-इत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते । यदा तु स्वाभाविक्या अविद्यया ब्रह्मस्वरूपं रज्जुशुक्तिकागगनस्वरूपवदेव स्वेन रूपेण वर्तमानं केनचिदस्पृष्टस्वभावमपि सत्, नामरूपकृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते, नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी, तदा सर्वोऽर्थं वस्त्वन्तरास्तित्वव्यवहारः ॥ बृ. भा. ३-५-१, पा. ८१०.

(२) सदसद्विलक्षणत्वमनिर्वचनीयत्वम्, तच्च मायापराभिधानीयकाविद्योपादानकत्वहेतुकम्—इति तु भावरूपानिर्वचनीयाविद्याकृतभेदवादिनः पञ्चपादिकेष्टसिद्धिविवरणाद्यनुयायिनः । तेषां मते रज्जुसर्पशुक्तिरजतादीनामविद्योपादानविकारत्वम् न तु पराध्यारोपितरज्ज्वादिधर्मत्वं भाष्यकारमते इव ॥

(३) बुद्ध्या विविच्यमानानानामनवधार्यस्वभावत्वमेवानिर्वचनीयत्वं भावानां सर्वेषां सौगतमते ; सर्वस्यापि निःस्वभावत्वमेव तत्त्वमिति तद्राद्धान्तः ॥

(५) आत्मव्यतिरिक्तस्य सर्वस्यापि सत्त्वेनासत्त्वेन वा अशक्य-निर्वचनत्वम् अनिर्वचनीयत्वमिति तु खण्डनप्रस्थानम् ॥

तदेवं भाष्यप्रस्थानतोऽन्यत्र सर्वत्राप्यनिर्वचनीयसंपर्कस्तदाभासो वा नियतसहचारी सर्वदाप्यात्मन इति न निर्मृष्टनिखिलविशेषवत्त्वमात्मनः। भाष्यकारीये तु प्रस्थाने स्वाभाविकाविद्याध्यस्तत्वमेव नामरूपयोः सर्वदा, वस्तुगत्या तु तयोरात्मनैवात्मवत्त्वम् – इति वैषम्यम् ॥

एतदेव तु सांप्रदायिकं मतम्, अन्यथा अध्यारोपितत्वानिश्चयात् परमात्मनोऽन्यस्य श्रुत्याप्यपह्नवानुपपत्तेः। न ह्यनध्यारोपितं किञ्चिदपह्नु-वानापि श्रुतिः प्रामाण्यमुपैतीति। अत एव ह्यभियुक्ता विज्ञानस्वरूप-मविद्यया अनात्मरूपेणाभासमानम् आभासरूपत्वेनाचिन्त्यम्-इत्यूरीकृत्यापि परमार्थस्वरूपेण निरूप्यमाणमात्मनोऽन्यन्नास्त्येवेत्याहुः –

(क) **अलाते स्पन्दमाने वै नाभासा अन्यतोभुवः।**
न ततोऽन्यत्र निस्पन्दान्नालातं प्रविशन्ति ते ॥
न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः।
विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ॥
विज्ञाने स्पन्दमाने वै नाभासा अन्यतोभुवः।
न ततोऽन्यत्र निस्पन्दाद्न विज्ञानं विशन्ति ते ॥
न निर्गतास्ते विज्ञानाद् द्रव्यत्वाभावयोगतः।
कार्यकारणताभावाद्यतोऽचिन्त्याः सदैव ते ॥

गौ. का. ४-४९तम कारिकामारभ्य ५३ पर्यन्तम्।

['विज्ञानस्पन्दितम्। स्पन्दितमिव स्पन्दितमविद्यया' इति भाष्यम् ॥]

(ख) **नात्मभावेन नानेदं न स्वेनापि कथञ्चन।**
न पृथङ् नापृथक् किञ्चिदिति तत्त्वविदो विदुः ॥ गौ. का. २-३४.

['न ह्यत्राद्वये परमार्थसत्यात्मनि प्राणादिसंसारजातमिदं जगत्, आत्म-भावेन परमार्थस्वरूपेण निरूप्यमाणं नाना वस्त्वन्तरभूतं भवति। यथा रज्जु-स्वरूपेण प्रकाशेन निरूप्यमाणो न नानाभूतः कल्पितः सर्पोऽस्ति तद्वत्। नापि स्वेन प्राणाद्यात्मनेदं विद्यते कदाचिदपि, रज्जुसर्पवत् कल्पितत्वादेव' इत्यादि भाष्यम् ॥]

अद्वैते किं प्रमाणम् ? –

२८२. अत्र प्रश्नानुपपत्तिमाह खण्डनकृत् –

(१) प्रश्न एव तावत् अद्वैतमनङ्गीकुर्वतो नोपपद्यते । प्रमाणं यन्नाद्वैते पृच्छ्यते, तस्य अप्रतीतौ कथमेवंभूतः प्रश्नः संगच्छते ? न हि प्रमाणमात्रं भवता पृच्छ्यते ; किं नाम, विषयविशेषनियतम् । तच्च तदा उपपद्यते यदि तादृशं ते प्रतीतिमारोहेत् । .... यदि च, अद्वैतं प्रश्नविषयः प्रतीतमुच्यते, तदा तत्प्रतीतिस्ते प्रमा वा स्यात्, अप्रमा वा ? आद्ये यदेव तस्याः प्रमायाः करणम्, तदेव अद्वैते प्रमाणं तवापि संप्रतिपन्नमिति वृथा तस्य प्रश्नः....। यदि च द्वितीयः, तदानीम् अद्वैतप्रतीतिमप्रमां मन्यमानस्य तव 'अप्रमाविषये किं प्रमाणम् ?' इति कथं न प्रश्नो व्याहन्यते ? अथ अप्रमा सा मम मते, त्वन्मते तु प्रमैवेति तत्करणं प्रमाणं पृच्छ्यते-इति ब्रूषे ; नैतदप्युपपद्यते, तवाद्वैते ज्ञानं यदुत्पद्यते तत्करणं मया प्रमाणरूपं वक्तव्यम् इत्यत्र ममानियमात् । यदि नाम मया सदा अद्वैतमभ्युपेयते तावता किं तावकीनस्य तज्ज्ञानस्य करणमवश्यं प्रमाणं स्यात् ? वस्तुतो वह्निमत्यपि पर्वते यदि कश्चिद् बाष्पं धूमं प्रतीत्य ततो वह्निमनुमिनोति, एतावता किं बाष्पविषयं धूमज्ञानं करणं प्रमाणमेष्टव्यम् ? इति ॥

खं. ३५–३६.

[वितण्डालक्षणां कथामाश्रित्य वदतः प्रतिवादिप्रश्नानुपपत्तिरपि दर्शयितव्येत्यत्र न संशीतिः । तवाभिमते अद्वैते प्रमाणमस्ति चेत्, तर्हि तस्य प्रमाणेनैव सद्वितीयत्वम् ; नास्ति चेत्, निष्प्रमाणकं तदिति न श्रद्धेयं भवेत् – इत्याक्षेप्तुः समाधानं तु वक्तव्यम् । प्रमाणमस्ति, न च तेन सद्वितीयत्वम् ; प्रमाणस्य सदसद्भ्यामनिर्वचनीयत्वात् – इति स्यादपि अस्यां प्रक्रियायां समाधानम् । तेन च तत्त्वजिज्ञासूनां न पूर्णा तृप्तिः स्यात्, कथितशङ्कातोऽनिस्तारात् ॥]

खण्डनसरणिमुत्सृज्य ग्रन्थकार एवं प्रश्नमपाकरोति –

(२) अस्तु वा प्रश्नोऽयं यथा तथा, श्रुतिरेवाद्वैते प्रमाणम् इति ब्रूमः । श्रूयते खलु 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इत्यादि ॥ खं. ३६.

'श्रुतिप्रामाण्यं सिद्धार्थसाधनं च ईश्वराभिसंधौ साधयिष्यते' इत्युक्त्वा (खं. ३६), ततः प्रत्यक्षादिबाध्यत्वं श्रुतेराशङ्क्य

(अ) यदद्वैतश्रुतेर्बाधकं प्रत्यक्षादि मन्यसे, तदात्मीये विषये घट-पटादेर्भेदे नियत एवोत्पद्यते, न तु प्रत्यक्षादिकं भूतभाविवर्तमानसकल-व्यक्तिभेदग्राहि जायमानमावयोः संप्रतिपन्नमस्ति ॥ खं. ३७-३८.

इत्यादियुक्त्यवलम्बनेन परिहारः, तदवान्तरसंगत्या स्वरूपभेदान्योऽन्या-भावैवैधर्म्यादिविकल्पासहिष्णुत्वमापाद्य मण्डनादिवद्, भेदखण्डनम्, (खं. ४८–५६) भेदस्यापारमार्थिकत्वात् भेदोपजीवकस्यापि श्रुतिप्रमाण स्याबाध्यत्वम् (खं. ५६–५८) – इत्यादिकमत्र न वितत्य प्रदर्श्यते। केवलतर्कानुपजीवकवेदान्तप्रक्रियानिर्धारणे अनुपयोगात्। उपसंहारवाक्यं त्विदमत्र –

(आ) तदिदमेताभिरात्ममतसिद्धसद्युक्तिलक्षणोपपन्नाभिर्युक्तिभिरुप-नीयमानम् अद्वैतम् अविद्याविलासलालसोऽपि श्रद्दधातु तावत् भवान्। तदनु चानयैवोपनिषदर्थश्रद्धया अध्यात्मं जिज्ञासमानः परमार्थतत्त्वं क्रमाद् वृत्तिव्यावृत्तचेताः स्वप्रकाशसाक्षिकं माक्षिकरसातिशायि स्वात्मनैव साक्षात्क-रिष्यति। यथा च परिहृतचापल्यम् आत्मतत्त्वामृतसरसि निमज्य रज्यति निरायासमेव मानसम्, तथाहमकथयं वैषधचरितस्य परमपुरुषस्तुतौ स्वर्गे इत्येषा दिक् ॥ खं. ६०.

[अत्र कया विधया अद्वैतानुभव इति न प्रदर्शितम्। तर्कपराहतत्वमेव त्वद्वैतबुद्धेर्निराकृतं सर्वत्र। यदि तु समाधावेव तदनुभव इत्यभिनिवेशः, तर्हि, 'तत्त्वमसि' इत्यनवस्थाविशेषनिबन्धनत्वं तस्य ब्रुवत्या श्रुत्या विरोध इति स्पष्टम् ॥]

उपसंहारः –

२८३. तार्किकाभिमतप्रमाप्रमाणादिलक्षणानि विविधैः प्रकारैः खण्डयित्वा ग्रन्थोपसंहारे श्रीहर्षः प्राह –

(१) अत्र चास्माभिर्दूषयितुं शङ्कितेभ्यः परपक्षप्रकारेभ्यो यदि प्रकारान्तरं कोऽपि स्वयम् ऊहति, उक्तानां बाधकानां मध्ये मध्ये क्वचित् प्रज्ञयापि समाधानम् अभिदध्यात्, तत्र खण्डनवादिनः प्रस्तुता प्रतिक्रिया

न स्फुरेत्, तदा परेण प्रयुज्यमाने वाक्ये बहुपदात्मके कस्यचित् पदस्यार्थं खण्डयितुं खण्डनान्तरमवतारणीयम्; एवं तत्रापि परेण प्रज्ञाशोषणे पुनस्तथैव शाखान्तरेषु संक्रमणीयम् – इति प्रकारेण खण्डनमये चक्रे सम्यगवधेयम्। न च शाखान्तरसंक्रान्तौ अर्थान्तरं पतेत्। अप्रकृतत्वाभावात्। न च, एकनिर्णयारम्भे अन्यसंक्रान्तौ अनौचित्यं स्यात्। 'शब्दोऽनित्यः, कृतकत्वात्' इत्यादौ परेणोक्ते कृतकत्वादौ अविप्रतिपत्तव्यत्वापत्तेरन्यतरासिद्ध्याद्युच्छेदापातात्। येन हि तन्निर्वाह्यते तदनिर्वचनीयतयाऽपि निर्वाह्या अनिर्वचनीयतैवेति। तस्मात् –

तत्तुल्योहस्तदीयं च योजनं विषयान्तरे।
शृङ्खला तस्य शेषे च त्रिधा भ्रमति मत्क्रिया॥ खं. ४१९.

इति। एतेन खण्डनकारस्य येयं प्रतिज्ञा ब्रह्मव्यतिरिक्तं सर्वमनिर्वचनीयम् इति, तत्र सदसद्भ्यामनिर्वचनीयत्वं कथम्?– इत्येतन्निर्णयापेक्षया 'यस्तु वादी निरुक्त्यभिमानं धत्ते, स निर्वक्तुं न तु शक्ष्यति, वक्तव्यदोषात्' (खं. ३२) इत्यस्य सोदाहरणं विवरणेनैव सा प्रतिज्ञा समर्थिता मन्यत इति स्पष्टम्। अद्वैतश्रुतिप्रामाण्यं च तदप्रामाण्यशङ्कानिरसनेनैव स्थापितमिति मन्यत इति च॥

अपि च –

(२) तदेतादृशीषु सर्वास्वपि दर्शनस्थितिषु कामम् आस्माकीनाः खण्डनयुक्तयः प्रगल्भन्ते। यासाम् ईश्वरपरवशा विश्वव्यवस्थाम् अनास्थाय निरसनम् अशक्यम्, तासामेवावतारणार्थम् अयं प्रावादुकप्रवादोपन्यासः॥ खं. ६१.

(३) वितण्डाकथाम् आलम्ब्य खण्डनानां वक्तव्यत्वात्, तत्र च व्यावृत्त्य स्वपक्षनिर्वाहं प्रति पर्यनुयोगानवकाशात्॥ खं. ६२.

इति सर्वत्र प्रतिवादिवाक्स्तम्भनोपायप्रदर्शनमात्रेण संतृप्तोऽयं ग्रन्थ इति नानेन वेदान्तप्रक्रियानिर्धारणे किञ्चिदप्युपयोग इति स्फुटम् –

(क) यद्यपीदं वेदान्तवाक्यानाम् ऐदम्पर्यं निरूपयितुं शास्त्रं प्रवृत्तम्, न तर्कशास्त्रवत् केवलाभिर्युक्तिभिः कञ्चित् सिद्धान्तं साधयितुं दूषयितुं वा प्रवृत्तम् .... ॥ सू. भा. २-२-१, पा. २२०.

(ख) श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात् । ... श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम् । अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य ॥ सू. भा. १-१-२, पा. ८.

इति च भाष्यावलोकनात् हीदमवगम्यते यत् केवलतर्कस्य वितण्डादिलक्षणस्य नैवास्ति क्वचिदुपयोगो वेदान्तप्रक्रियायामितीत्यलमतिविस्तृतपरीक्षणेनैतत्प्रस्थानस्य ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

खण्डनप्रस्थानपरीक्षा नाम चतुर्दशः काण्डः

---

१५. चित्सुखाचार्यप्रस्थानपरीक्षा

खण्डनग्रन्थतो प्रदीपिकाया वैलक्षण्यम् –

२८४. श्रीहर्षोत्तरकालीना वेदान्तिनस्तत्कृतखण्डनग्रन्थप्रभाविताः अधिकमधिकं तर्कलालसाः संवृत्ताः । परमतखण्डनमात्रेण वेदान्तप्रक्रिया न परिपूर्णतां भजेदिति स्वप्रक्रियामपि निराक्षेपं तर्कोन्मृहितश्रुतिबलेन वेदान्तिसंमतत्वेन प्रतिष्ठाप्य प्रक्रियाभेदानामेकवाक्यतासंपादने प्रयत्नमाखिषत चित्सुखाचार्याः ॥

चित्सुखाचार्यनिर्मिता ग्रन्थाः –

२८५. चित्सुखाचार्याः ज्ञानसिद्धिन्यायसुधाप्रकरणनिबन्धॄणां ज्ञानोत्तमास्थानां श्रीगौडेश्वराचार्याणां शिष्या इति (त. पा. ३८५, ३८८) विज्ञायते । **तत्त्वप्रदीपिका, न्यायमकरन्दव्याख्या चेति** द्वौ अद्यावधि प्रकाशितौ एतद्ग्रन्थौ । एतैः खण्डनव्याख्यापि व्यरचीति श्रूयते । भाष्यभावप्रकाशिका, विवरणतात्पर्यदीपिका, ब्रह्मसिद्धिव्याख्यानम्, प्रमाणमालाव्याख्यानम्, अधिकरणमञ्जरीसङ्गतिश्च – इत्येतेऽप्येतत्कर्तृका ग्रन्था इति च । प्रकृतविमर्शने तु तत्त्वप्रदीपिकैव केवलं परीक्षिता ॥

खण्डनसंमततर्कमार्गे कृतपरिश्रमा अनिर्वचनीयभावाविद्यावादे परमविश्रस्ताश्चेमे आचार्या इति दीपिकावलोकनाद् गम्यते । अनुशाङ्करवेदान्तशास्त्रार्थेषु व्युत्पित्सूनां न्यायवैशेषिकदर्शनपरिचयमवाप्तुमभिलषतां च जिज्ञासूनामतीवोपकारकोऽप्ययं ग्रन्थः, प्रकृतविचारे नातीव साहाय्यकमाचरितुमीष्टे । यत्कारणं ग्रन्थकृदसौ न्यायमकरन्दखण्डनखण्डखाद्यादृतविचारसरणिमेवानुसरन्, प्रायशस्तद्युक्तीरेव सोपबृंहणं स्वग्रन्थे निवेशयति । अतिविस्तरेण तार्किकप्रस्थानानि खण्डनयुक्त्यैव निरस्य स्वप्रक्रियास्थापने पुनरपि तामेव लक्षणप्रमाणाधिदेवतामुपास्यत्वेन वरयति विषास्यं कराभ्यां

प्रेमभावेन गृह्णन्निव । अतोऽत्र वाचकानां दीपिकाग्रन्थसंस्तवार्थम् अत्रत्यविषयानुक्रमतत्प्रतिपादनरीत्यादीनां दिङ्मात्रप्रदर्शनेनैव परितुष्टाः प्रस्थानान्तरपरीक्षणाय प्रस्थास्यामहे ॥

विषयविभागक्रमः –

२८६. अत्र शारीरकग्रन्थविभजनक्रममनुसृत्य स्वमतस्थापनपरमतदूषणमोक्षसाधनविचारजीवन्मुक्तिरूपफलनिरूपणपराश्चत्वारः परिच्छेदाः प्रकल्पिताः ॥

तत्र **प्रथमपरिच्छेदे** तावत्–प्रत्यगात्मनः स्वप्रकाशचिदात्मत्वम् (१–३२) ; दृश्यप्रपञ्चस्य मिथ्यात्वम् (३२–८४)[1] – वेदान्तवाक्यानां सिद्धवस्तुन्यपि ब्रह्मणि प्रामाण्यम् (८४–१६३) – इति प्रधानविषयाः । अवान्तरसंगत्या त्वविद्याविचार आनीतः । **द्वितीयपरिच्छेदे** श्रुतेर्भेदग्राहिप्रत्यक्षादिविरोधमाशङ्क्य भेदलक्षणानि तार्किकसंमतप्रमाणप्रमेयादिपदार्थलक्षणानि च वादिकल्पितानि सर्वाणि खण्डनयुक्त्यनुसारं विस्तरशः प्रत्याख्यातानि (१६४–३३२) ; **तृतीये** तु साधनपरिच्छेदे शब्दादेवापरोक्षज्ञानमिति युक्तिभिः प्रसाध्य (३३३–३४८) ज्ञानादेव कैवल्यं न तु कर्मणा केवलेन, ज्ञानसमुच्चितेन वा – इति युक्तिभिरुपपादितम् । **चतुर्थे** पुनर्मोक्षलक्षणानि विकल्प्य तत्र दूषणान्युपन्यस्य 'आत्मनोऽविद्यातिरोधानमेव बन्धः, विद्यानिमित्तस्तदस्तमयो मोक्षः' इति सिद्धान्तितम् (३४९–३६१) ; तदनु अविद्याश्रयविषयविचारं प्रस्तुत्य ब्रह्मैव स्वाविद्यया आश्रयो विषयश्चेति साक्षेपपरिहारं तर्केणोपपाद्य जीवेश्वरभेदवादाः श्रुत्यवष्टम्भेन तर्केण च वारिताः (३६१–३७३) । तत ऊर्ध्वं प्रसङ्गसंगत्या साक्षिणि प्रमाणमुपन्यस्य ब्रह्मैवाविद्यया संसरति विद्यया च मुच्यत इत्येकाविद्यापक्ष उपसंहृतः (३७३–३७५) । ततः पश्चाच्च

1. अत्र दत्ताः 'तत्त्वप्रदीपिका'ग्रन्थस्य निर्णयसागरमुद्राशालायां मुद्रापितस्य (1915) पत्रपार्श्वसंख्याः । एवमग्रेऽप्यूह्यम् ॥

नानाजीवनानाविद्यापक्षेऽपि न दोष इति प्रतिपादनेन वाचस्पतिपक्षोऽपि युक्तियुक्त इत्यास्थितम् (३७५-३८०)। अन्ते चाविद्यानिवृत्तिलक्षणं विचिन्त्य 'मायालेशो जीवन्मुक्तस्यानिवृत्तः समाध्यवस्थायां तिरोहितः, अन्यदा देहाभासजगदाभासहेतुतयानुवर्तते, प्रारब्धकर्मफलोपभोगावसाने तु निवर्तते' (३८६) इति जीवन्मुक्तिसमर्थनेन (३८०-३८८) ग्रन्थोपसंहारः कृतः ॥

विषयप्रतिपादनरीतिः –

२८७. प्रतिविषयं लक्षणप्रमाणाभ्यां स्वाभीष्टः पदार्थः साधयितुम् आस्थितोऽस्मिन् प्रकरणे। 'अत्र लक्षणप्रमाणे न स्तः' इति पूर्वपक्षोपन्यासः, निर्दुष्टं लक्षणमस्ति, अविरुद्धं प्रमाणमपि च समस्तीति सिद्धान्तप्रदर्शनं चेति ग्रन्थे सर्वत्रानुसृता रीतिः। आदौ स्वाभिप्रायं श्लोकेन संगृह्य श्लोकार्थः आक्षेपपरिहारप्रपञ्चनेन व्याख्यायते–इति नियमः सामान्येनादृतः प्रतिविषयम्। यद्यपि खण्डनग्रन्थे इव ग्रन्थग्रन्थयो न बाहुल्येन निवेशिता अत्र, तथापि अपरिचितमीमांसादिशास्त्राणां नवीनतार्किकभाषासरण्यामकृतसंचाराणां च नात्र प्रवेशः सुलभः। किं च, विषयप्रतिपादनेऽपि अनेकविकल्पानादौ पूर्वपक्षिमुखेनोपकल्प्य तदनुक्रमेणैव सप्रपञ्चं परिहरणव्यसनं न्यायमकरन्दे एव लब्धोदयम् अत्रातिवेलमभिवर्धितम्, परितःप्रसृतशाखोपशाखाविभूषितमहान्यग्रोधषण्डसमावृतगह्वरप्रविष्टानामिव वाचकानां क्षमावधिपरीक्षास्थानमिवाभूदितीयं नात्युक्तिर्भवेत् ॥

उदाहरणार्थमत्र प्रप्रथममानीतं स्वप्रकाशाधिकरणचिन्ताप्रकारं किञ्चिद् वाचकानां पुरत उपस्थापयिष्यामः –

> 'प्रमाणनखनिर्भिन्नमहामोहामरारये।
> नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने ॥ (३)

इति मङ्गलश्लोकमध्ये निविष्टं स्वप्रकाशत्वमधिकृत्य एता विकल्पाः पूर्वपक्षिणा कृताः–

अथ कोऽयं स्वप्रकाशशब्दार्थः ? (१) किं स्वश्चासौ प्रकाशश्च स्वप्रकाशः ? (२) स्वस्य स्वयमेव प्रकाश इति वा ? (३) सजातीयप्रकाशाप्रकाश्यत्वं वा ? (४) स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वं वा ? (५) स्वव्यवहारहेतुप्रकाशत्वं वा ? (६) ज्ञानाविषयत्वं वा ? (७) ज्ञानाविषयत्वे सत्यपरोक्षत्वं वा ? (८) व्यवहारविषयत्वे सति ज्ञानाविषयत्वं वा ? (९) स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वं वा ? (१०) अवेद्यत्वे सति, अपरोक्षव्यवहारविषयत्वं वा ? (११) तद्योग्यत्वं वा ?

इति । तदनु च तानेतान् विकल्पान् क्रमेण दूषयति । तद्यथा –

" नाद्यः । वेद्यस्यापि ज्ञानस्य स्वप्रकाशत्वाभ्युपगमात् । न द्वितीयः । कर्मकर्तृभावविरोधेन लक्षणस्यासंभवात् । न तृतीयः । प्रदीपादेः सजातीयप्रकाशाप्रकाश्यस्यास्वयंप्रकाश्यत्वेन लक्षणस्यातिव्याप्तेः । घटादेरपि सजातीयप्रकाशाप्रकाशस्य स्वप्रकाशत्वप्रसङ्गाच्च । न हि प्रदीपादौ ज्ञाने वा घटत्वादिजातिरस्ति, येन घटादयः सजातीयप्रकाशप्रकाश्या भवेयुः । सत्तया सजातीयत्वं तत्राप्यस्तीति चेत् । न । विशेषणवैयर्थ्यात्, सत्ताविरहिणः प्रकाशस्यैवासंभवात् ' प्रकाशाप्रकाश्यत्वम् ' इत्येतावतैव चरितार्थत्वात् । नापि चतुर्थः । .... (४)

इत्येवंरीत्या एकादशापि विकल्पान् दूषयित्वा –

' तदेवं न स्वप्रकाशलक्षणं पश्यामः । नापि प्रमाणम् । '

इति प्रतिवादस्य द्वितीयांशं प्रपञ्चयितुमारभते –

अथ – ' अनुभूतिः, अनुभूतिव्यवहारहेतुप्रकाशः । अनुभूतित्वात् । यन्नैवम्, तन्नैवम् । यथा घटः ' इत्यनुमानं प्रमाणम् । न चाप्रसिद्धविशेषणः पक्षः । अनुभूतिव्यवहारस्य हेतुभूतः प्रकाशः परेषामपि हि प्रसिद्धः । ततोऽनुभूतेस्तत्स्वरूपत्वप्रतिज्ञा उपपद्यते । न चानुव्यवसायज्ञाने साध्यस्य सिद्धत्वाद् भागे सिद्धसाधनता । तत्स्वरूपस्यैवासंमतत्वेन तस्य धर्मिभागतानङ्गीकारात् (६)

इति सिद्धान्तिसंमतत्वेनानुमानमुपन्यस्य दूषयति –

' इति चेत् । मैवम् । अनुभूतिव्यवहारस्य हेतुभूतः प्रकाशो यत्र सिद्धः, तत हेतोर्वृत्तौ केवलव्यतिरेकित्वव्याकोपात्, अवृत्तौ सपक्षाप्रवेशिनोऽसाधारणानैकान्तिकत्वापातात् .... ', (६)

इत्यादिना । एवं पूर्वपक्षः प्रपञ्च्यते अष्टौ पत्रपार्श्वाणि यावत् । अथेदानीं सिद्धान्ती समाधानमुपक्रमते । तत्र लक्षणं तावदेकेन श्लोकेन संगृह्णाति –

> अपरोक्षव्यवहृतेर्योग्यस्याधीपदस्य नः ।
> संभवे स्वप्रकाशस्य लक्षणासंभवः कुतः ॥ (९)

तत्र लक्षणं संभावितनानाशङ्कापरिहारपूर्वकं निर्दुष्टमिति प्रतिष्ठाप्य

> तस्मादनाविलं स्वप्रकाशलक्षणम् । प्रमाणमपि । अनुभूतिः स्वयं-प्रकाशा अनुभूतित्वात्, यन्नैवम्, तन्नैवम् । यथा घटः – इत्यनु-मानम् " (११)

इति प्रमाणमप्युपन्यस्य । तत्र शङ्कातत्परिहारपारम्परीम् षड्विंशतितमपत्र-पार्श्वं यावत् वितत्य प्रदर्श्य श्रुतिप्रमाणमुदाहरति–

> ' अत्रायं पुरुषः स्वयंज्योतिः ' इति श्रुतेश्चात्मा स्वयंप्रकाशः '

इति । तत्रापि विविधान् आक्षेपान् आनीय तांश्च निरस्य

> " तस्मात्, निरस्तसमस्तकलङ्कावकाशम् आत्मनः स्वप्रकाशत्वम् । तच्चात्मरूपम्, अविद्यापरिकल्पितप्रपञ्चावभासकत्वात्, अविद्यातमो-निवर्तकत्वाच्च ज्योतिःशब्दाभिधेयम् । यथाभावरूपशार्वरादितमोनिवर्तनेन जगदवभासकम् आदित्यादिज्योतिरिति सिद्धम् ॥ " (२७)

इति भावरूपाविद्यातमोविचारं प्रारिप्सुः, तमसो भावरूपत्वमेव कथमित्ये-तत् प्रदर्शयितुमारभत इति ॥

अधस्तादतिसंग्रहेण प्रदर्शितोऽपि स्वप्रकाशविचारः कियद्विस्तरः संवृत्त इति परिभावयतां वाचकानां अवश्यं हृदयमागच्छेद् यथा ग्रन्थे सर्वत्रापि प्रतिपदं सिद्धान्युपस्थापितविषयेषु विविधान् विकल्पान् उद्भाव्य तेषु प्रत्येकम् अव्याप्त्यतिव्याप्त्यसंभावनात्माश्रयान्योन्याश्रयानवस्थादीन् दोषान् प्रदर्श्य पूर्वपक्षप्रपञ्चनं तदनुक्रमेणैव च तथाजातीययैव भाषया

पुनरपि समाधानविस्तारणं चावलोकयतां कीदृशमतिदुःसहं मनःपरिखेदमावहेदिति। 'श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम्। अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य' इत्यभियुक्तोपदेशमनादृत्य स्वतःसिद्धसाक्षिस्वयंप्रकाशत्वादीनामनुभवैकगम्यानामपि सिद्धये अविद्योपजीविलक्षणानुमानाद्यवलम्बनेन शुष्कतर्कमनुसरतां पन्थाः कीदृशगर्तपङ्ककण्टकपतनादिभयान्वितो भवेदिति च न दुरूहम्॥

चित्सुखाचार्याभ्युपगतानि कतिचिल्लक्षणानि प्रमाणानि च –

२८८. पूर्वपक्षयुक्तीनां सिद्धान्तयुक्तीनां वा प्रदर्शनं परित्यज्य केवलं ग्रन्थकर्त्रभिमतानि कतिचिल्लक्षणानि प्रमाणानि चात्रोदाहरिष्यामो यथैषां ब्रह्मसिद्धिपञ्चपादिकातद्विवरणेष्टसिद्धिभामतीन्यायमकरन्दाभ्युपगततत्तल्लक्षणैस्तुलनं सुकरं भवेत्॥

१. (1) सर्वेषामपि भावानां स्वाश्रयत्वेन संमते।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता॥ (३९)

(2) विमतः पटः, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगि (गी?)। अवयवित्वात् पटान्तरवत्। एवम्, एतद्गुणजात्यादयोऽपि तत्तत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिनः। तत्तद्रूपत्वात्। इतरतत्तद्रूपवत्–इत्येवमादिप्रयोगः सर्वत्रैवोहनीयः॥ (४०-४१).

२. (1) अनादित्वे सति भावरूपं विज्ञाननिरस्यमज्ञानम्॥ (५७)
भ्रमोपादानमज्ञानम् इति लक्षणेऽपि न दोषः॥ (६०)

(2) विगीतं देवदत्तनिष्ठप्रमाणज्ञानं देवदत्तनिष्ठप्रमाभावातिरिक्तानादेर्निवर्तकम्। प्रमाणत्वात्, यज्ञदत्तादिगतप्रमाणज्ञानवत्॥ (५८)

(3) 'न किञ्चिदवेदिषम्' इति परामर्शसिद्धसौषुप्तिकानुभवोऽप्यत्र प्रमाणम्॥ (५८)

(4) त्वदुक्तमर्थं न जानामीति व्यवहारान्यथानुपपत्तिरपि भावरूपाज्ञानसद्भावे प्रमाणम्॥ (५९)

(5) 'तम आसीत्', 'मायां तु प्रकृतिं विद्यात्' इत्यागमोऽपि तत्र प्रमाणम् ॥ (६०)

(6) विगीतो विभ्रमः, एतज्ज्ञानकारणाबाध्यातिरिक्तोपादानः, विभ्रमत्वात् । देवदत्तादिविभ्रमवत् ॥ (६०)

[भावाविद्याविषये विवरणदत्तलक्षणप्रमाणैस्तुलनीयान्येतानि ॥]

३. (1) सत्त्वेनासत्त्वेन च विचारासहत्वे सति सदसत्त्वेन च यद्विचारं न सहते तदनिर्वाच्यम् ॥ (७९)

(2) ज्ञानबाध्यत्वं वा अनिर्वचनीयत्वम् ॥ (७९)

(3) प्रमाणं च तत्र ख्यातत्वे सति बाध्यत्वान्यथानुपपत्तिः ॥ (८१)

(4) विमतमनिर्वचनीयम् । बाध्यत्वात्, यन्नैवं तन्नैवम्, यथात्मा ॥ (८२)

४. (1) अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वमखण्डार्थता ॥ (१०९)

(2) 'यद्वा तत्प्रातिपदिकार्थता' ॥ (१०९)

[तेषामेव शब्दानाम् एकप्रातिपदिकार्थता – इति व्याख्यानकारः ॥]

(3) (a) सत्यादिवाक्यम् एतत्पदार्थसंसर्गातिरिक्ते अर्थे प्रमाणम्, प्रमाणत्वात्, चक्षुरादिवत् ॥ (११४)

(b) प्रातिपदिकमात्रार्थप्रश्नोत्तरत्वानुपपत्तिश्च लौकिकवैदिक-लक्षणवाक्यानाम् एकप्रातिपदिकार्थमात्रपर्यवसायित्वे प्रमाणम् ॥ (११४)

५. अविद्यालेशशब्देन मोहाकारान्तरोक्तितः ।
ज्ञानस्य प्रतिबन्धाच्च प्रबलारब्धकर्मभिः ॥
लेशानुवृत्तौ तज्जन्यकर्मादेरनुवृत्तितः ।
उत्पन्नात्मावबोधस्य जीवन्मुक्तिः प्रसिध्यति ॥ (३८५)

[अत्रःविद्याया एकदेशः, तत्संस्कार एव वा – इति पक्षद्वयनिरासेन, अविद्याकारविशेष एव – अपरोक्षप्रतिभासयोग्यार्थाभासजनक एव – अविद्या-लेशार्थत्वेन स्वीकृतः ॥]

वेदान्तेतिहासे चित्सुखाचार्यस्थानम् –

२८९. तत्त्वप्रदीपिकाग्रन्थस्याविर्भावानन्तरं व्याख्यानप्रस्थानानां परस्परविरुद्धानामपि सर्वेषां कथञ्चित् सामरस्यसंपादनं न दुःशकमिति मतिरुद्बभूव वेदान्तिषु । प्रतिवादिवाक्स्तम्भनाय श्रीहर्षोपज्ञखण्डनयुक्तयः सर्वथा प्रभवन्तीत्येतदालक्ष्य ता एव युक्तीः प्रयुज्य स्वयूथ्यानपि जेतुं प्रवृत्ता वेदान्तिन इतःपरम् । खण्डनयुक्तयः स्वप्रणीतलक्षणानि स्वाभिमतानुमानानि वा कथं खण्डयितुं न शक्नुयुरिति तु प्रस्मृतमेतैर्निर्दुष्टलक्षणानुमानसृष्टिव्यसनिभिः । अत एव 'श्रुतिवचनं सार्वत्रिकानुभवसिद्धार्थस्य ज्ञापकं न तु कारकम्' इति मूलमन्त्रं दूरत एवोत्सृज्य परमतदोषनिष्करणे स्वमतस्थापने च केवलं वाक्यमित्येव श्रुतिवाक्योदाहरणम्, केवलतर्कसाहाय्यं चावलम्ब्य जल्पकथारसिका एव बभूवुर्वेदान्तिन इति वेदान्तप्रक्रियास्मरणं स्वप्नेऽपि सुदुर्लभं जातम् । वेदान्तसिद्धान्तस्तर्कसरण्यापि शक्यावगम इत्युपपादने जयश्रीश्चित्सुखाचार्यानेव तावद् वव्रे – इति तु निर्विवादम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयाचाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

चित्सुखाचार्यप्रस्थानपरीक्षा नाम पञ्चदशः काण्डः

१६. सर्वज्ञात्मप्रक्रियापरीक्षा

कोऽयं सर्वज्ञात्मा नाम ?

२९०. संक्षेपशारीरके प्रत्यध्यायपरिसमाप्तिपुष्पिकायां 'श्रीदेवेश्वरपूज्यपादशिष्यश्रीसर्वज्ञात्ममुनेः कृतौ संक्षेपशारीरके ....' इति सगुरुनामोल्लेखं ग्रन्थकृन्नामोल्लेखनं दृश्यते आनन्दाश्रममुद्राशालाङ्किते पुस्तके। काश्यां मुद्रितपुस्तके तु 'श्रीसुरेश्वराचार्यपूज्यपादशिष्यश्रीसर्वज्ञात्ममुनेः कृतौ शारीरकमीमांसाभाष्यप्रकरणवार्तिके संक्षेपशारीरके' (पा. १–३९८)[1] इत्युपलभ्यते। ग्रन्थकृत्तु स्वयं प्रथमाध्याये मङ्गलार्थमाचरितं गुरुस्मरणं श्लोकेन निबध्नाति –

> यदीयसंपर्कमवाप्य केवलं वयं कृतार्था निरवद्यकीर्तयः।
> जगत्सु ते तारितशिष्यपङ्क्तयो जयन्ति देवेश्वरपादरेणवः ॥ १–८.

इति। अत्र व्याख्याकारो रामतीर्थो लिखति स –

> 'इदानीं साक्षात्स्वगुरुं सुरेश्वराचार्यमभिपूजयति' ॥ सं.(१)[2], पा. १७

इति। **मधुसूदनसरस्वती** च स्वकृतसारसंग्रहव्याख्यायाम् –

> 'इदानीं स्वगुरुं वार्तिककारं पूजयति – यदीयेति । देवेश्वरस्य सुरेश्वराचार्यस्य ते पादरेणवो जयन्ति ॥ सं. (२), पा. १५.

इति। प्रथमाध्यायचतुर्दशश्लोकव्याख्यानप्रसङ्गेन च 'यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्' इत्यादिश्रुतिमूला **ग्रन्थकर्तृदेशप्रसिद्धिः** [सं.(२) पा.२०] इति गन्धारदेशीयं ग्रन्थकारं मन्यते स। **गुरुरत्नमालिकाव्याख्याता** तु सुरेश्वराचार्यं गुरुः सर्वज्ञपीठव्यवस्थागोपने नियुज्य (गु.र. ३४) काञ्चीपीठे सर्वज्ञशंकरार्यं न्यधात् (गु.र. ३८) इति बृहच्छङ्करविजयपुष्पश्लोकमञ्जरीप्रामाण्यमाश्रित्य कथयति स ॥

---

1. तृतीयाध्यायादिषु तु (पा. १४४) केवलं 'संक्षेपशारीरके' इति वर्तते ॥

2. सं.(१) इत्यानन्दाश्रमाङ्कितस्य, सं.(२) इति च काशीमुद्रितसंक्षेपशारीरकपुस्तकस्य संज्ञा ॥

वयं तु सर्वमेवैतदैतिह्यमात्रमवलम्ब्य समुत्प्रेक्षितं देवेश्वररवमात्रमुपश्रुत्य व्याख्याकृद्भिरप्यनुमोदितमिति प्रतीमः । यत्कारणं ग्रन्थकारोऽयम् आदाविवान्तेऽपि स्वगुरून् –

'श्रीदेवेश्वरपादपङ्कजरजःसंपर्कपूताशयः' सं. (२), पा. ३९२.

इति देवेश्वरसंज्ञयैव परामृशति न तु सुप्रसिद्धसुरेश्वराचार्यनाम्ना । गुरुश्चायं केवलं 'देवेश्वर' इति नाम्ना इत्यविभूषिताचार्यवार्तिककारादिविशेषणेन परामृष्ट इति मनसि कुर्वतां तस्य सुरेश्वराचार्यत्वे महान् संशय उपजायते । किञ्च, वार्तिकप्रस्थाने अदृष्टचरमनिर्वचनीयमूलाविद्यावादं सप्रपञ्चं स्वकृतप्रकरणे समुपपादयन् सर्वज्ञात्मा न कथमपि वार्तिककारस्य साक्षादन्तेवासी भवितुमर्हति । न हि गुरुशिष्ययोरीदृशं मतवैलक्षण्यं विनाकारणं संभावनीयमिति । अपि चायं स्वकालमेवमुद्घोषयति –

श्रीदेवेश्वरपादपङ्कजरजःसंपर्कपूताशयः
सर्वज्ञात्मगिराङ्कितो मुनिवरः संक्षेपशारीरकम् ।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंशे नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥ ४-६२.

पुरावृत्ततत्त्वपरिशोधकाश्च **केचित्** अधस्तादुदाहृतमैतिह्यमवलम्ब्यैव देवेश्वरः सुरेश्वर इति मनुकुलादित्यश्च आदित्यचोलापराभिधो नृपः–इति च ब्रेमुः। **अपरे** तु तदमृष्यन्तो मनुकुलादित्यो नाम राजा दक्षिणतिरुवाङ्कूरुराष्ट्राधिपतिर्बभूव दशमशतकान्ते समये इति निश्चिन्वन्ति । सर्वथापि त्वयं सर्वज्ञात्मा वार्तिककारसुरेश्वराचार्यैः समकालवर्तीति दुःसंभावनमेतदित्यलं दुरध्यवसायव्यक्तिसंस्तवान्वेषणेन ॥

ग्रन्थमहत्त्वम् –

२९१. अनिर्वचनीयाविद्योपादानवादप्रास्थानिकदृष्ट्या संक्षेपशारीरकस्यास्ति किञ्चिन्निरतिशयमुन्नतं स्थानम् । उत्तरमीमांसान्यायजात-

समुच्चयभूतेऽस्मिन् प्रकरणे सर्वस्या अपि शारीरकस्य मीमांसाया निर्गुणब्रह्मतत्त्वप्रतिपादनेनैवोपक्षीणत्वोपपादनम्, मृदुमधुरपदगुंफितैर्वाक्यै र्विविधच्छन्दोबद्धश्लोकनिवेशितैर्वाचकचित्ताकर्षकशैल्या विषयप्रतिपादनं च दरीदृश्यते। स्वाभिमतप्रक्रियाविषये च नैकेषां पूर्वाचार्याणामेकवाक्यतासंपादने महान् यत्नः कृतोऽत्रेति वेदान्तप्रक्रियासतत्वजिज्ञासूनाममोघरत्नकरण्डक इवाभिपूज्यो भवत्ययं ग्रन्थः। प्रकृतप्रक्रियाप्रत्यभिज्ञादृष्ट्या तु नैवास्ति किञ्चिदत्र विशेषतो विचारयितव्यमित्यतिसंक्षेपेणैव ग्रन्थोऽयं परीक्षिष्यते॥

अविद्यैवाध्यासहेतुः –

२९२. शारीरकमीमांसानुरोधेन यद्यप्यत्र प्रकरणेऽपि समन्वयाविरोधसाधनफलविषयकाश्चत्वारोऽध्यायाः सन्ति, तथापि शास्त्रकार्यान्तरे स्थितं प्रकरणम् – इति प्रकरणलक्षणवाक्यं सार्थकयन्निव स्वातन्त्र्येणैव विषयविभागं करोति स्मायमाचार्यः। तत्राविद्याविषये तावदिमे तदीयाभिप्रायाः –

(१) 'आनन्दविग्रहम् अपास्तसमस्तदुःखं वस्तुस्वभावेन परिवर्जितसर्वभेदम् आत्मानम्' अधीतवेदान्ता अवगच्छन्ति। तस्मिन् परिच्छिन्नं संसारिरूपम् अध्यस्तम्। तं चाध्यासं चिदचितोरन्योन्यमिथुनीकरणलक्षणं प्रति अबोधमात्रं समर्थं निमित्तम्॥' (१-२६, २७)। अध्यासे सादृश्यं वा विषयकरणगतदोषो वा निमित्ततया नापेक्षितम् (१-२८, २९, ३०)। न च आत्मानात्मनोरुभयोरप्यन्योन्याध्यासे निरास्पदत्वाज्जगतः शून्यता शङ्क्या। यत्कारणम् अधिष्ठानसामान्यांश 'आधारः', विशेषांश एव तु 'अधिष्ठानशब्दवाच्यः' इति विवेकानवधारणादुक्तशङ्का समुद्भवति। न ह्यधिष्ठानं बाध्यते, येन जगतः शून्यता स्यात्। किञ्च सत्यानृतयोर्मिथुनीकरणात्मकमध्यासं रज्जुसर्पशुक्तिरजतमरुमरीचिकादिदृष्टान्तबलेन स्वीकुर्वाणस्य कथमिवोक्तदोषः स्यात् (१-३२ प्रभृति ३६ पर्यन्तम्)। लोके सदृशे सांशे परावियषे एवाध्यासो दृष्ट इति चेत् आत्मन्यपि तत्सकलमुपचारात् संपादयिष्यामः। भाष्यकारोऽपि ह्यब्रवीत् 'न तावदयमेकान्तेनाविषयः' इति। अपरोक्षत्वमात्रेण चान्यध्यासोपपत्तेश्चैतदेवम् (१-३९ प्रभृति ४९)॥

एवं च –

अल्पं रूपं बन्धनं प्रत्यगात्मा । बद्धोऽनेन स्वच्छचैतन्यमूर्तिः ।
स्वात्माज्ञानं कारणं बन्धनेऽस्य । स्वात्मज्ञानात्तन्निवृत्तिश्च मुक्तिः ॥
१–५०.

[अध्यासस्यानादित्वं भाष्योक्तं न परामृष्टमत्र ॥]

२. (1) अज्ञानमप्यविदुषोऽस्य न तु स्वतोऽस्ति
चैतन्यनिर्विकृतिताद्वयताविरोधात् ।
अज्ञाततापयनवबोधनिबन्धनैव
नात्माश्रयत्वमपि चोद्यितव्यमत्र ॥ १–५१.

['अनादि ह्यज्ञानमज्ञानतन्त्रमज्ञातत्वमप्यनादीति क्वात्माश्रयः' इति मधुसूदनः । श्लोके तु नेत्थमुक्तम् । अज्ञानस्य मिथ्यात्वे अध्यस्तत्वमेवायातीति शङ्का न प्रत्युक्तात्र ॥]

(2) दृग्दृश्ययोः संबन्धस्याज्ञानकृतत्वात् दृश्यरूपाज्ञानसंबन्धोऽपि तथैवाज्ञानकृतः स्यात् (१–५२), यथैवात्मा स्ववेद्यजातमिव स्वात्मानमप्यवगतिशक्तियोगात् प्रसाधयति, यथैव च वार्तिकमतेन भेदं भेद्यं च भेदो भिनत्ति (१–५४, ५५) एवमज्ञानस्यापि स्वपरनिर्वाहकत्वमुपपद्यते । अतो नानवस्था[1] ॥

(3) अज्ञानं चेदमतिदुःस्थितवपुराशिं घृतपिण्डमिव निर्विभागं चिन्मात्रमाश्रयते विषयीकरोति च न जीवम्, तस्याप्यज्ञानकल्पितत्वात् । तस्य च 'तिमिरम्', 'तमिस्रम्', 'तामिस्रम्', 'अन्धतमसम्', 'जडिमा', 'तमिस्रा', 'माया', 'जगत्प्रकृतिः', 'अच्युतशक्तिः', 'आन्ध्यम्', 'निद्रा', 'सुषुप्तिः', 'अनृतम्', 'प्रलयः', 'गुणैक्यम्' – इति चाभिधानानि (१–३१७, ३१८, ३१९)

(4) अभावस्यानावरणत्वात् नाज्ञानम् अभावः, गीतायामज्ञानस्यावरणत्वकथनाच्च भावरूपमज्ञानम् (१–३२०) । अस्य च जगद्वृतं जाड्यम्

---

1. संक्षेपशारीरकप्रस्थानपरीक्षायां बहुत्र तत्तदध्यायश्लोकसंख्यापरामर्शपूर्वकं प्रायशस्तदभिप्राय एवानूदितः । मूलश्लोकास्तु क्वचिदेव यथावल्लिखिता इति बोध्यम् ॥

पुरुषगतं मौर्ख्यं चेति स्वभावद्वयम् अनुभवसिद्धम् । एतेनैवापवर्गो विहितः (१-३२०, ३२१, ३२२)

अत्र सर्वत्र प्रायशो विवरणप्रस्थानानुसारी विचारक्रम इति स्पष्टम् ॥

शास्त्रस्य प्रकरणस्य चानुबन्धः –

२९३. तत्र विचारस्य स्थानमधिकृत्योक्तमत्र –

(१) वेदवाक्याज्जातमपि ज्ञानं विपरीतज्ञानप्रतिबद्धं न फलाय भवति । तस्मात् प्रतिबन्धनिवारणार्थं विचारः । न तु स ज्ञानोत्पत्तौ कारणमपि (१-१४ प्रभृति १९ पर्यन्तम्) । तथापि जीवेश्वरादिभेदविनाशक-ज्ञानस्य प्रतिबन्धापनयनेन फलपर्यन्ततामापादयितुं शास्त्रम् (१-५७) ॥

(२) अत्र पुरुषार्थत्वमभिलष्यमाणतया प्रतिपाद्यमानस्य ज्ञानस्य अपुरुषतन्त्रत्वेन अविधेयत्वात्, अविदिते ब्रह्मणि तज्ज्ञानस्य विधेयत्वा-संभवात्, विदिते तु विधेरेवानवकाशात्, द्रष्टव्यादिविधिसरूपवाक्याना-मिहान्यथैव नेतुं शक्यत्वाच्च नेदं शास्त्रम् गतार्थम् (१-५९ प्रभृति ६३)

(२) आत्यन्तिकदुःखनिवृत्तिः निरतिशयसुखं च मोक्षतत्त्वम् । एत-दुभयमपि स्वरसत एव वाञ्छति जनः । अतो यज्ञाद्यनुष्ठानेन विविदिषोत्पत्तौ सत्यां साधनचतुष्टयसंपन्नोऽधिकारी गुरुमुपसृत्य तत्त्वं विजिज्ञासेत् (१-६७ प्रभृति ९२ पर्यन्तम्) ॥

महावाक्यविचारः–

२९४. तत्त्वमस्यादिमहावाक्यानामखण्डार्थबोधकत्वम्, महा-वाक्यज्ञानेन चाधिकारिणो मोक्षप्राप्तिः– इत्येष एव प्राधान्येन मीमांसा-शास्त्रस्य प्रतिपिपादयिषितोऽर्थः–इति ग्रन्थकृदाशयोऽस्ति । अत एवायम् इत्थं वक्ति –

(१) स्वाध्यायधर्मपठितं निजवेदशाखाः
वेदान्तभूमिगतमादरपालितं च ।
संन्यासिनापरदृशा गुरुणोपदिष्टं
साक्षान्महावचनमेव विमुक्तिहेतुः ॥ ३-२९५.

नावेदविद्धि मनुते पुरुषं बृहन्त-
मित्याह वेदवचनं कथमन्यथैतत् ।
वाक्यान्तरं च कथमाह पुमांसमेनं
साटोपमौपनिषदत्वविशेषणेन ॥
उपनिषदिति वेद इत्यपीदं
समभिवदन्ति महावचो महान्तः ।
फलवदवगतिः स्यादन्तरेणैतदेकं
वचनमिति न शक्यं वक्तुमित्यादरोऽस्मिन् ॥

३-२९५ प्रभृति २९७.

[उपनिषद्वेदशब्दयोर्मुख्यवृत्त्या महावाक्ये एव प्रवृत्तिः, तादर्थ्याच्च तदपरवाक्येषु - इत्येतद् त्रिशततमश्लोकमारभ्य ३०२तम श्लोकपर्यन्तम् उपपादितमत्र । महावाक्यशब्दो भाष्ये कुतो न प्रयुक्तः ?-इति शङ्का तु नोद्भावितात्र ॥]

(२) आद्ये सूत्रे त्वंपदस्योदितत्वाद्
वृत्तेरस्मिंस्तत्पदस्योच्यमाना ।
वृत्तिर्ज्ञेया तत्पदार्थेऽद्वितीये
प्रत्यक्षात्रे त्वंपदस्योदितैव ॥ १-५५२.

[प्रथमसूत्रं ब्रह्मजिज्ञासाकर्तव्यतोपदेशपरम्, द्वितीयं ब्रह्मलक्षणपरं चेति सुप्रसिद्धम् । अथापि प्रौढिवादितयात्र महावाक्यगतपदार्थसमन्वयपरत्वेन प्रतिज्ञानं कृतं कथं संगच्छत इत्याशङ्क्य ५५३तम श्लोकम् आरभ्य ५६१तम श्लोकपर्यन्तम् तदुपपादनार्थं यत्नः कृतोऽत्र ॥]

(३) 'सोऽयं पुमान्' इति लौकिकवाक्यस्थेव तत्त्वमसीतिवाक्यस्यापि जहदजहल्लक्षणया अखण्डार्थनिष्ठता (१-१४९ प्रभृति १६६ पर्यन्तम्) । लक्षणा मानान्तरगोचरमेव वस्त्वाकाङ्क्षते स्वविषयतया इति न नियमः । सिद्धवस्तुमात्रसेवालं तत्प्रवृत्तेः (१-१५२) । अहं ब्रह्मास्मीत्यत्र ब्रह्मशब्दस्य साभासाज्ञानवाचित्वम् अहंशब्दस्य चाहंकारवाचित्वं च यदा स्वीक्रियते, तदा जहल्लक्षणास्वीकारेऽपि न विरोधः (१-१६९) अथव ब्रह्माहंशब्दयोः 'अग्निर्माणवकः', 'सिंहो देवदत्तः' इत्यादिस्थलेष्विव गौण्या वृत्त्या ईश्वरजीवबोधकत्वमप्यस्तु मुख्यार्थस्वीकारे विरोधात् (१-१७०) । एवं 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यप्यवान्तरवाक्येष्वप्यखण्डार्थत्वं ज्ञेयम् ॥ १-१७५ प्रभृति १८९ पर्यन्तम् ।

[वार्तिकमते इचात्रापि तत्त्वंपदयोः सामानाधिकरण्यम्, पदार्थयोर्विशेष्यविशेषणभावः, तदनु पदार्थयोः संसर्गस्य विरोधबुद्धौ सत्यां पदद्वयेऽपि लक्षणाश्रयणेनाखण्डात्मकवस्तुनिश्चयश्चेति क्रमोऽनुसृतः (१-१९६-१९७)]

(४) 'तत्तु समन्वयात्' इति सूत्रे अन्वयशब्देन सामानाधिकरण्यम् 'सम्' इति विशेषणेन गौणसामानाधिकरण्यनिवृत्तिं च दर्शयति भगवान् बादरायणः। तत्र संसर्गरूपार्थपर्यवसायि गौणम्, अखण्डार्थनिष्ठं तु मुख्यमिति हि तयोः सामानाधिकरण्ययोर्विवेकः (१-२१७, २१८) इति ॥

शास्त्रयोनित्वं ब्रह्मणः –

२९५. निर्विशेषे (१-२३९) ब्रह्मणि कथं शास्त्रस्य प्रामाण्यम्? न हि तत्र वाङ्मनसगोचरत्वमस्तीत्याशङ्क्य (१-२४२, २४३, २४४) ग्रन्थकर्तुः परिहारः

(१) तदाकारप्रहाणेन वस्तुनि कल्पितस्य जगतो मूलस्याज्ञानस्य दाहमात्रेण वाक्यजनितबुद्धेः प्रमाणत्वोपपत्तिः। यथा भाट्टमते संविदः सर्वथा अविषयत्वेऽपि तद्व्युत्पादकं वाक्यं प्रमाणम्, यथा वा प्राभाकरमते घटादिज्ञानस्य तद्विषयकसंविदन्तराभावेनाविषयत्वेऽपि तद्विषयकं वाक्यं प्रमाणम्, तथैवेहापि चैतन्यस्याविषयत्वेऽपि वाक्यजन्यज्ञानात् तद्विषयकाविद्यानिवर्तनेन प्रामाण्योपपत्तेः (१-२४६) ॥

[ज्ञानमात्माकारवृत्तिरूपमात्मानं विषयीकुर्वदविद्यां नाशयति चैतन्यं तु स्वप्रकाशमिति मूलाविद्यावादिप्रक्रिया ॥]

(२) केचित्तु नेतिनेतीतिवाक्यजनिता प्रतीतिर्जगतो निषेद्धुमपि पश्चात् पूर्णात्मवादसमर्पणे एव पर्यवस्यतीति तत्त्वमस्यादिविधिमुखवाक्येन समप्रधानं निषेधवाक्यम्। अथवा तदेव वाक्यं प्रधानम्, न हि विधिमुखप्रवृत्तं वाक्यं निर्भेदार्थाकारज्ञानं जनयितुं क्षमम्। तस्य शबलार्थगोचरत्वनियमात्। न च लक्षणया ब्रह्मवस्तुसमर्पणम्। न हि ब्रह्मणि निखिलदृश्यरहिते कश्चन संबन्धोऽस्ति येन लक्षणा प्रवर्तेत – इत्याहुः ॥

१-२५० प्रभृति २५२ पर्यन्तम्।

तदेतदयुक्तम् । यत्कारणम् अध्यारोपितभेदविलयमात्रे व्यापृतं निषेधवाक्यं न विधिमुखप्रवृत्तवाक्यवत् साक्षात् स्वरूपं कथयितुं क्षमम् । न चाज्ञातवस्तुनो स्वाकारसंवेदनमन्तरेण तद्विषयभ्रान्तिकारणमज्ञानं विनश्यति । न हि 'न सर्पोऽयम्' इति निषेधमात्रेण रज्जुप्रकाशकाज्ञानं मुक्त्वा रज्ज्वज्ञानप्रशान्तिरस्ति । तस्मात् अस्थूलादिनिषेधवाक्यं वाच्यार्थ-लक्ष्यार्थसंशोधनद्वारेण वाक्यार्थसमन्वये उपकारकं भवति, न तु साक्षा-न्मोक्षसाधनमिति ज्ञेयम् (१-२५३ प्रभृति २५६ पर्यन्तम्) । अथवा विधिवाक्यजनितात्मज्ञानानुवादकमात्रं निषेधवाक्यम्, 'रज्जुरियं नायं सर्पः' इति वाक्यवत् (१-२५७, २५८) ॥

(३) तस्मात् सृष्टिस्थितिप्रलयसंयमनप्रवेशकथनबलेन प्रवृत्तैरनुगृहीतेभ्य एव तत्त्वमस्यादिवाक्येभ्यो विधिमुखप्रवृत्तेभ्यो ब्रह्मावगतिरिति सिद्धम् । एवमेव हि 'तत्तु समन्वयात्' इति सूत्राक्षरसामञ्जस्यं भवेत् । अत एव निषेधवाक्यविचारणावसरे 'ततो ब्रवीति च भूयः' (वे. सू. ३-२-२२) इति निषेधवचनं, विधिवचनशेष एवेति सूत्रकृतापि सूचितमिति ॥

१-२६१, २६२.

[तदिदं निषेधवाक्यव्यापारवर्णनं सूत्रभाष्येण वार्तिकेन च विरुध्यत इति स्पष्टम् । (द्रष्टव्यं प्रकृतग्रन्थे भगवत्पादप्रस्थानम् खं. २८, वार्तिकप्रस्थानं च खं. ११६) । सूत्रभाष्ये तावत् 'ततो ब्रवीति च भूयः' इत्येतदन्यथैव व्याख्यातम् । पश्यन्तु बृहदारण्यकभाष्यवाक्यं सवार्तिकम् 'यदा पुनः स्वरूपमेव निर्दिदिक्षित भवति निरस्तसर्वोपाधिविशेषं तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुम् । तदा अयमेवाभ्युपायो यदुत प्राप्तनिषेधद्वारेण नेतिनेतीति निर्देशः' इति ॥]

शास्त्रप्रामाण्यविषये शङ्कासमाधानानि वितत्य प्रदर्शितानि नात्र विमृश्यन्ते विप्रतिपत्तिस्थानत्वाभावात् ॥

समन्वयाध्यायार्थसंग्रहः –

२९६. आत्मज्ञाने विध्यसंभवात् सर्वाप्युपनिषत् 'विधिशून्यतया परमात्मवस्तुविषया' (१-४६२) इत्युपसंहृत्य सगुणवाक्यमपि निर्गुण-वस्तुनि समन्वितमित्याह ग्रन्थकार-

(१) सगुणवाक्यमपीह समन्वितं । भवति निर्गुणवस्तुनि सर्वशः ॥
१-४६३.

(२) सत्त्यासत्त्यवपुस्तथा हि सगुणं ब्रह्मास्य विद्या तथा
तद्वत् तद्विषयस्य वेदवचसस्तात्पर्यमेवंविधम् ।
तेनावान्तरमस्य वेदवचसस्तात्पर्यमन्यादृशं
चान्यच्चिर्गुणवस्तुतत्त्वविषयं संकीर्त्यते भागशः ॥ १-४६४.

['इदं रजतम्' इति ज्ञानवत् सुगुणवाक्यमपि सत्यमिथ्यावभासं संसृष्टार्थद्वयवदिति वक्ष्यते समनन्तरोत्तरश्लोके ; तदनन्तरश्लोके च तद्बुद्धिमात्र-फलत्वमेव तात्पर्यं नामेति च । एवं च सगुणवाक्यस्य विशेष्ये विशिष्टे च तात्पर्येऽपि न दोष इति ग्रन्थकृन्मतम् ॥]

अत्र यद्यपि 'विद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति वाक्यानि' (सू. भा. १-१-१२), 'परमेव हि ब्रह्म विशुद्धोपाधिसंबन्धं क्वचित् कैश्चिद् विकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानम् अपरम्' (सू. भा. ४-३-९) इति च भगवत्पादैरपि सगुणनिर्गुणब्रह्मणोरेकत्व-मेवोपदिष्टम् – तथापि

(१) 'अतः पार्थक्यमेवोपासनावाक्यानां ब्रह्मवाक्यानां च न्याय्यं नैकवाक्यत्वम् ॥ सू. भा. ३-२-२१, पा. ३६१.

(२) इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि । उपासनाविधिप्रधानानि हि तानि । तेषु असति विरोधे यथाश्रुतमाश्रयि-तव्यम्, सति तु विरोधे तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति ॥
सू. भा. ३-२-१४, पा. ३५७.

इत्युपासनाप्राधान्यावधारणात्, 'सगुणवाक्यं निर्गुणवस्तुनि समन्वितम्' इति वक्तुं न समञ्जसमित्यसन्मतिः ॥

अथ समन्वयाध्यायप्रतिपादितमर्थं संगृह्णच्छ्लोकमेकमत्रोदाहृत्य शास्त्रप्रामाण्यविचारविमर्शनमुपसंहरामः –

शक्नोति सिद्धमवबोधयितुं च वाक्यं
शक्नोति कार्यरहितं वदितुं च वाक्यम् ।
शक्नोत्यखण्डमवबोधयितुं च वाक्यं
शक्नोति मुक्तिफलमर्पयितुं च वाक्यम् ॥ १-५६२.

जगत्कारणत्वं ब्रह्मणः –

५९७. ब्रह्मजगतोः कार्यकारणभाव इत्थं प्रतिपादितोऽत्र –

(१) साभासाज्ञानमुपजीव्य अद्वितीया चिद् भवति जगत्कारणम् । तच्चाज्ञानं केवलं द्वारम्, दश एव तु कारणत्वम् ॥ १-३२३.

(२) अज्ञानशबलमात्मतत्त्वमेव जगत्कारणम् । यथैवान्तःकरण-प्रतिबिम्बितं चैतन्यं सुकृतदुष्कृतकर्तृ भवति ; एवं परमात्मनः तमःप्रति-बिम्बकं जगत्कर्तृत्वं व्रजति – इत्येके (१-३२६, ३२७) । नैतद्युक्तम् । परमचैतन्यमेवात्मशब्देनोच्यते । शाबल्यद्वारा तात्पर्यविषयीभूतशुद्धात्मा-विवेकात्तेषामेवं भ्रमो जायते ॥ १-३२९, ३३०.

(३) प्रधानादिकमपि न जगत्कारणम् । जडत्वात् ॥ १-३२४.

(४) जगज्जन्मादिकारणत्वं तावदुपलक्षणमेवेत्यङ्गीकार्यं यावल्लक्ष्य-भावित्वाभावात् (१-५१९) । तच्च ब्रह्मणस्तदितरव्यावृत्त्यर्थमेव (१-५२६) ; कालस्वभावपरमाण्वसुभृत्प्रधानस्कन्धप्रतीत्यखिलशून्यानां कारणत्वेन प्रसक्तौ तन्निवृत्त्यर्थं हीदं सूत्रम् (१-५२८) ॥

(५) यज्जन्मादिमज्निमित्तमुपादानं च तत् परं ब्रह्म – इति प्रसिद्धं कारणमनुवदद् 'ईदृशं कारणं ब्रह्म' – इति हि श्रुतिवाक्यं ब्रह्म विधत्ते । (१-५३४) । न चानुवादिश्रुतिरेव कारणप्रमितौ प्रमाणमिति वाक्यभेदः शङ्क्यः । अत्र वाक्यान्तरस्यैव प्रमाणतया कल्प्यमानत्वात् – इत्यपि केचिद् वदन्ति (१-५३६) ॥

(६) चेतनस्याप्युपादानकत्वं स्वप्नादिदृष्टान्तैः सिध्यति । बुद्ध्यादि-कार्येषु चेतनोपादानकत्वं तार्किकैरपीष्यते (१-५४५, ५४६) । तस्मान्न चेतनस्योपादानत्वे काचिदप्यनुपपत्तिः । ब्रह्मणो जगज्जन्मादिकारणत्वं तु लक्षणमात्रम्, प्रमाणं तु स्वतःप्रमाणभूताज्ञाय एव ॥ १-५४८.

तदेवं यथोदाहृतसंक्षेपशारीरकवाक्यैरिदं विज्ञायते यद् ब्रह्मणो जगज्जन्मादिकारणत्वं तटस्थलक्षणमात्रं तदानन्त्यसिद्ध्यर्थं वेदान्तैरुपन्यस्त-मिति, तानि च वाक्यानि तत्पदार्थे समन्वितानीति च एते अभ्युपगच्छन्ति प्रकरणकृतः (१-५४९) । ब्रह्मणश्चाज्ञानशब्दितप्रकृतिद्वारेणोपादानत्वम् ।

अभिन्ननिमित्तोपादानत्वं तु श्रुतिप्रमाणात् तर्कोपोद्बलितात् सिध्यतीति च । कार्यकारणभावस्य श्रुत्युक्तस्य कया विधया अद्वितीयब्रह्मसिद्धौ उपयोगः ? – इति तु नैव चिन्तितं तैः । अन्यत्र च दृष्टित्रयाश्रयेण विवर्तवादमध्यतीत्याद्वैतदृष्टिराश्रयितव्येत्युक्तम् –

आरोपदृष्टिरुदिता परिणामदृष्टि-
द्वैतोपशान्तिरपवादकदृष्टिरन्त्या ।
मध्ये विवर्तविषया द्वयमिश्रदृष्टि-
र्व्यामिश्रदृष्टिरधरोत्तरभूमिभावात् ॥
तत्त्वावेदकमानदृष्टिरधमा तत्त्वक्षतिर्मध्यमा
तत्त्वप्रच्युतिविभ्रमक्षतिकरी तत्रान्त्यदृष्टिर्मता ।
जीवैकत्वमुमुक्षुभेदगतितो व्यामिश्रदृष्टिर्द्विधा
भिन्ना तत्र च पूर्वदूर्वैविलयादूर्ध्वोर्ध्वलब्धिर्भवेत् ॥
२-८२, ८३.

इति । तदेवं सर्वत्र प्रतिज्ञामात्रेण केवलतर्कानुसरणेनैव वा कार्यकारणवादः परीक्षितः । श्रीगौडपादानुगृहीताजातिवादो वा, भगवत्पादैः प्रपञ्चितः सत्कार्यवादो वा (सं. ३५) न कुत्रापि परामृष्टः – इति प्रस्थानवैषम्यम् ॥

ब्रह्मण ऐश्वर्यं मृषेति प्रतिपादनप्रसङ्गेन तस्य साक्षित्वं कारणत्वं च तथैवेत्युक्तम् (३-१८६ प्रभृति १९० पर्यन्तम्, १९८) । असत्कार्यवादं सत्कार्यवादं च निरस्य (३-१९९ प्रभृति २१४ पर्यन्तम्), वेदान्तिसमये तु सर्वं कार्यं संव्यवहारमात्रम् इत्यत्र वाक्यकारात्रेयवाक्यम्[1] (३-२१७ प्रभृति २२०) निर्गुणमेव परतत्त्वमित्यत्र भाष्यकारवचनं च' (३-२२१) यद्यपि प्रमाणतयोपात्तम्, तथापि न कापि तत्रानु-

1. अयमात्रेयो ब्रह्मदत्त इति कश्चित् ; ब्रह्मनन्दीति बहवो व्याख्याकाराः । भाष्यकारश्चात्र परामृष्टो द्रविडाचार्य इति वदन्ति । सुरेश्वराचार्यकृतवार्तिकान्ते भगवत्पादा अप्याचार्या 'अत्रिकुलोद्भवत्वेन' समुल्लिखिताः । अतोऽत्र कोऽयमात्रेयः, कश्चायं भाष्यकारः परामृष्ट इति भूयो विचारणीयमस्ति । ततो ह्यद्वैतसंप्रदायनिर्धारणे साधनविशेषलाभः स्यादिति ॥

भवानुसारिणी युक्तिरादर्शिता। सापेक्षत्वात् कारणत्वं न सत्यमित्येतावदेव तु (३-१८९) तत्र कथितम्। किं कुर्वद् कारणम् आहोस्विदकुर्वत्?-इति विकल्प्य तर्कबलाद् दूषणमात्रेण जगत आविद्यकत्वं प्रसाध्य (३-२२४ प्रभृति २२७), ब्रह्मणि चिज्जडात्मकशक्तिद्वयाङ्गीकारं निरस्य जगत्प्रसिद्ध्य-निरूपणादपि तस्य मायामयत्वमित्युक्त्वा (३-२३१), आरम्भवादपरिणाम-वादयोर्दूषणं प्रदर्श्य 'ततो वियन्मुख्यमदो जगज्जडं चिदात्मनोऽस्यैव विवर्त इष्यताम्' (३-२३५) इत्युपसंहृतम्॥

अवस्थात्रयपरीक्षा -

२९८. महावाक्यार्थज्ञानसिद्ध्यर्थमपेक्षितं त्वंपदार्थविवेचन-मारभ्य तत्प्रसङ्गेनावस्थात्रयपरीक्षणमानीतम्॥

(१) कर्त्रादेरवभासकत्वमगमः शुद्धः स्वयं भास्वर-
श्चैतन्येन निजेन तेन भवतः कर्त्रादिबुद्धिभ्रमः॥
कूटस्थस्य चिदात्मनस्तव कुतः कर्तृत्वभोक्तृत्वयोः।
शङ्का जागरितेऽपि कारकगणं कर्त्रादिकं पश्यतः॥ ३-६१.

(२) विविधकार्यकरणान्येव बहुप्रकारभेदभाञ्जि। तेन जलपात्रगत-सूर्यस्येव जीवनानास्वभ्रमो भवति। अध्यात्मम्, अधिभूतम्, अधिदैवं सूत्रं विराजमपि चेत्येतत्सर्वमप्यात्मैवैकः तत्साक्षी सन् पश्यति। तत्र साक्षित्वमपि चिदाभासयुक्ताज्ञानकृतम्॥ ३-६६, ६७.

(३) आत्मनः कर्तृत्वं न स्वाभाविकमित्येतस्य मायामयस्वप्नदर्शन-मुपोद्बलकम्। न हि स्वप्नं सत्यम्। बाध्यं हि तत् प्रसिद्धमायावत्। सा च माया नाविद्यातिरिक्ता। ३-८३ प्रभृति ११२ पर्यन्तम्॥

[अत्र मायाविद्ययोरैक्यं विस्तरेणोपपादितम्॥]

(४) मिथ्याभूतस्वप्नदर्शनं यथा परमार्थवस्तुसूचकम्, एवं मिथ्या-जाग्रद्दर्शनमपि तत्रावगतिहेतुः। स्वप्नभ्रमो वा जाग्रद्भ्रामो वा स्वपरिस्फुरण-हेतोरदृष्टस्य क्षये सममेव सुषुप्ते जगन्निदाने गाढे तमसि लयमेति॥

३-११७, ११९.

[अत्र सारसंग्रहव्याख्या 'गाढे सर्वविशेषप्रकाशशून्ये जगन्निदाने तमसि स्वप्रस्य लयं वदतो ग्रन्थकारस्य मूलाविद्याकार्यत्वं तस्याभिमतम्' इति पा॰ २१९]

(५) सुषुप्तौ सर्वमज्ञाने लीनमित्येतत् पुनरुत्थानलिङ्गतोऽनुमीयते 'न किञ्चिदवेदिषम्' इति सुप्तोत्थितस्मरणादपि निश्चीयते । अहङ्कार-हीनत्वात्तु सुषुप्तेस्तदा नाज्ञानस्य स्पष्टानुभवः । अत एव सुषुप्तौ अज्ञानमपि नास्तीति बुद्धिरुदेति ॥ ३-१२० प्रभृति १२४.

(६) एवम् आचार्यैरपि क्वचित् 'सुषुप्तस्याज्ञानं नास्ति', क्वचित्तु 'सुषुप्तो गाढे तमस्यभूत्' - इति चोच्यमानम्, एवं 'जीवः पर एव तदानीम्', 'स तदा निर्बीजतामुपगतः', 'अज्ञानं कामः कर्म च तदा नास्त्येव' इति 'तत्राहङ्कार आसीत् । स एव जाग्रतो दुःखमानीय दर्शयति' (?) - इति च विरुद्धाभासमुच्यमानं विविच्य सुषुप्तौ स्पष्टतया अनुभवो नास्ति यतस्तत एवमूचुस्ते इत्यङ्गीकर्तव्यम् ॥

३-१२५ प्रभृति १२८ पर्यन्तम् ॥

(७) सुषुप्ते, आत्माज्ञानसाक्षित्वे सत्यपि तत्रान्तःकरणाभावात् प्रमातृत्वं नास्ति । अतोऽज्ञानविषयकस्पष्टाननुभवः । तथापि तु मुक्ति-विलक्षणत्वात् सुषुप्तेः साज्ञानत्वमेष्टव्यम् ॥ ३-१३२, १३३.

(८) एवं चैतन्यवदवस्थात्रयेऽप्यव्यभिचारादज्ञानस्यात्मस्वभावत्वम् इति तु न शङ्कनीयम् । आत्मनः प्रत्यक्त्वेन अज्ञानस्य तु परात्क्वेनेति विविक्तमवगमात् तयोः सुविवेचनत्वात् । एवमवस्था अपि नात्मधर्मभूताः, तेषामपि विषयत्वेनैवावभासात् । आविर्भावतिरोभाववत्त्वाच्च । अहङ्कारस्या-प्यविद्याकल्पितत्वात् तस्यापि चित्प्रकाशविषयत्वेनैवानुभवाच्च नात्मधर्म-त्वम् । एवं च जाग्रत्स्वप्नसुषुप्तिमूर्छामरणावस्थासु व्यभिचारिणीष्वनुगत-मात्मतत्त्वं सत्यम्, तदितरत् सर्वं मिथ्या । व्यभिचारित्वात् । अवस्था-रूपं चित्तमज्ञानतः प्रादुर्भूतं नात्मनो भिन्नम् । अज्ञानं चात्मानुभूतिबलत एव सिद्धमिति मिथ्यैव । अतः प्रत्यक्चैतन्यम् अद्वितीयं पूर्णमेवेति सिद्धम् ॥

३-१३४ प्रभृति १४०.

(९) एतदवस्थात्रयधर्मरहितत्वमात्मनो ज्योतिर्ब्राह्मणप्रमाणतः सिद्ध-मिति सर्वं श्रद्धेयम् ॥ ३-१४१.

अवस्थात्रयविचारे आत्मनो व्यतिरिक्तं सर्वमप्यात्मदृश्यत्वादेव मिथ्या, 'अज्ञानं चानुभूतिबलत एव सिद्धमिति मृषा' इत्युक्तं भवति। जाग्रत्स्वप्नसुषुप्तधर्मकं चित्तमज्ञानप्रादुर्भूतत्वान्नात्मनो भिद्यते (३–१४०)– इति युक्तिबलादेवात्मनोऽद्वितीयत्वं साध्यत इति स्पष्टम्। यद्येवम्, अनात्मनः सर्वस्य मिथ्यात्वमात्मन्यध्यस्तत्वादेव, साक्षिरूपानवबोधादेव तु प्रमातृत्वाध्यासेन अवस्थावत्त्वभ्रमः – इत्येतावदेवालं किमध्यासोपादानभूताविद्याकल्पनप्रयासेन? तस्या अपि ह्यध्यस्तत्वादेव मिथ्यात्वम्। अपि च अवस्थानां त्रिसृणामपि कार्यकारणभावकल्पनम्, सुषुप्तौ कारणभूताविद्याकल्पनम्, स्वप्नजागरयोश्च तत्कार्यभूताविद्याविलासत्वकल्पनम्-इति च मुधैव प्रयासः। युक्तिहीनश्च। एवं हि अवस्थानां कालाधारकत्त्वमापाद्येत। प्रतीयते तु स्वप्नजागरयोस्तत्तदवस्थासमुचितोऽन्योऽन्यः कालः। यथोक्तमभियुक्तैः – 'चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः। कल्पिता एव ते सर्वे विशेषो नान्यहेतुकः॥' (गौ. का. २–१४) इति। सुषुप्ते च कालभानमेव नास्तीति सुप्रसिद्धम्। तथा चात्मन्यध्यासमात्रसिद्धमवस्थात्रयवत्त्वं मायामात्रमित्यायाति। यथोक्तं भाष्यकारैः – 'मायामात्रं ह्येतद् यत् परमात्मनोऽवस्थात्रयात्मना अवभासनम्' (सू. भा. २–१–९) इति। किञ्चान्यत्, केवलं स्वदेहपरिच्छिन्न एवात्मा अवस्थात्रयादिपरीक्षणेन दृष्टः स्याद् यदि माण्डूक्योपनिषद्दृशा समष्ट्यात्मनापि व्यष्ट्यात्मन एकत्वं नावध्रियेत। एतत्तु न चिन्तितमस्मिन् प्रकरणे॥

चिन्मात्रस्यैवाज्ञानाश्रयविषयत्वम् –

२९९. अविद्यामाययोरैक्यमभ्युपगम्य सर्वः संसारो 'गुर्वादिभेदान्वितः' कल्पितोऽस्त्यविद्यया यथा स्वप्ने (२–१२७) इत्युक्त्वा –

> मुक्तामुक्तौ विद्वदज्ञौ त्वदन्या-
> वाकाशादि क्ष्मावसानं च विश्वम्।

स्वाविद्योत्थस्वान्तनिष्पन्दनं त-
द्विज्ञातव्यं मा ग्रहीरन्यथैतत् ॥ २-१२८.
तस्माद् ब्रह्माविद्यया जीवभावं
प्राप्याऽऽसिस्वा तावके तु स्वरूपे ।
स्वच्चित्तेन स्पन्दितं जीवजात-
माकाशादि क्ष्मावसानं च पश्येत् ॥ २-१६२.
स्वीयाविद्याकल्पिताचार्यवेद-
न्यायादिभ्यो जायते तस्य विद्या ।
विद्याजन्मध्वस्तमोहस्य तस्य
स्वीये रूपेऽवस्थितिः स्वप्रकाशे ॥ २-१६३.

इति च ब्रह्माश्रितामेवाविद्यां तद्विषयामाहुः । एवं चेष्टसिद्धिपक्ष एव तैः समादृत इति वक्तव्यम् ॥

कथं तर्हि भाष्यकारैर्जीवाश्रितेयमित्युक्तिः संगमनीया ?–इत्यत्रोत्तरमिदम् –

'अज्ञानं जडशक्तिरूपेण जीवाद् बहिः सिध्यति । परमेश्वराधीनेन तेनाकाशादिकं सृज्यते । तदेव च जीवे 'अहमज्ञः' इति स्फुरतीत्यतो (२–१६५, १६७) जीवस्यैवाज्ञानमिति भाषणमुचितम् । ईश्वरे बाधितवपुरियमविद्या, जीवं प्रति तु चितिशक्तिबाधकवपुः (२–१६८); ईश्वरस्य मायापि दृश्यत्वजाड्यपरतन्त्रत्वचिदाश्रयत्वैर्हेतुभिः स्वप्नरजतभ्रमादिदृष्टान्तैश्च अविद्यास्मिकैव इति. आकाशादिकम् एकाविद्याकल्पितमेव, बाध्यत्वात् स्वप्नवत्–इति चानुमानाभ्यां मायाविद्ययोरैक्यं सिद्धं भवति (२–१६९, १७०)। ईश्वरे प्रतिभासमानाप्यविद्या न तस्य दुःखजनकम्, मोहावृतस्य जीवस्य तु दुःखहेतुः (२–१७३) – इत्येवं भाष्योक्तजीवाश्रयत्ववचनं नेयम्,, न तु मण्डनवचोऽनुसरणीयम् (२–१७४)। किञ्चिज्ज्ञो जीवः, सर्वज्ञ ईश्वरः – इत्यप्यज्ञानावृतत्वानावृतत्वपरम्, न तु तयोरज्ञानभावाभावपरम्; ईश्वरस्य निरहङ्कारत्वात् अज्ञानं वशीकृत्यैव स्वेच्छागृहीतशरीरत्वाच्च 'अहमज्ञः' इति न भवति । अत एवेश्वरः सर्वज्ञः निरावरणज्ञानस्वरूपः, स्वात्मभासा निखिलाज्ञानतत्कार्यभासकः – इति कथ्यते (२–१७७ प्रभृति १८७ पर्यन्तम्) । तस्मात्, चिन्मात्रमेवाविद्याश्रयभूतं जीवेश्वरजगद्विभागनिर्मातृ – इति शुद्धं मतम् (२–१८९), ब्रह्मणि जीवत्वमज्ञानजन्यमित्यतो

जीवस्य नाज्ञानाश्रयत्वं घटते । ब्रह्मण्यज्ञानमिति पक्षे तु तस्मिन्नशुद्धत्वं कल्पितमित्यतो न कोऽपि दोषः (२-१९५, १९७)। न चैवमेकमेव ब्रह्मस्वरूपेण स्फुरति न स्फुरतीति व्याहतोक्तिः, स्वरूपेण स्फुरदेवाबोधवशान्न स्फुरतीत्यभ्युपगमात् (२-२०३, २०४)। 'अपि च न वयमद्वयं नित्यानन्दं ब्रह्म तद्रूपेणाज्ञानाश्रयविषयम् इति ब्रूमः, किं तर्हि प्रत्यग्ज्ञानाश्रयविषयम् अज्ञानमिति । चैतन्यवस्तुविषयाश्रयमेव ह्यज्ञानं प्रतीयते. नाद्वैतवस्तुविषयाश्रयकम् । ब्रह्माश्रयमज्ञानमित्युक्तिस्तु बुद्ध्यादिविशिष्टचैतन्ये नाज्ञतेत्यभिप्रायेणैव ; न हि तस्य केवलब्रह्माश्रयत्वे किञ्चित् प्रमाणमस्ति (३-१३, १४) । तस्माच्चिन्मात्रमेवाज्ञानस्याश्रयो विषयश्चेति सिद्धान्तः (३-१५) ॥

[इष्टसिद्धयूररीकृतस्य ब्रह्माश्रिताविद्यावादस्य परिष्करणमेतत् । अविद्याया एवाध्यासव्यतिरिक्ताया असिद्धौ सर्वमिदमभित्तिचित्रं भवतीति तु न पृथग् वक्तव्यम् ॥]

बद्धमुक्तादिव्यवस्था –

३००. ननु ब्रह्मैवेकं नित्यमुक्तमपि स्वाश्रयविषयाज्ञानवशतः संसरति ज्ञानेन च मुच्यत इति चेत्, कथं बन्धमुक्ताद्यवस्था ? कथं वा तद्बोधकशास्त्रप्रामाण्यम् ? – इत्याशङ्कायां ग्रन्थकृदुत्तरम् –

(१) न तावच्छास्त्रं यथोक्तव्यवस्थाप्रतिपादनाय प्रवृत्तम्, किं तु ब्रह्मात्मैक्यप्रतिपादनपरम् । न च 'मदन्यः कश्चिद्बन्धमोक्षभागस्त्यासीद्वा'– इत्येतदनुभवविरुद्धं भवेदिति शङ्क्यम् । न तावदत्र द्वैतानुभवविरोधोऽस्ति, एतज्ज्ञानबाध्यत्वात् तस्य ; न चान्योऽस्ति बाधकानुभवः (२-२१९) न च गुर्वादेरपि कल्पितत्वे उपदेष्टृत्वाद्यभावः, कल्पितसर्पस्यापि मरणहेतुत्ववत्, वैशेषिकैः श्रोत्रेन्द्रियत्वेन कल्पितस्याप्याकाशस्य शब्दप्रकाशकत्ववच्च तदुपपत्तेः ॥

[व्यावहारिकानुभवापलापेनाप्यभिलषितं साधयतां किं किं न सिध्येत् ?]

ज्ञानसाधनानुष्ठानाज्ज्ञानोत्पत्तिः, मुक्तिश्च –

३०१. ज्ञानोत्पत्तिप्रकारः, मुक्तेर्नित्यत्वं चेत्थमुपपादितमत्र –

अन्तरङ्गसाधनमवश्यं करणीयं मुमुक्षुभिर्यतिभिः, त्रिविदिषोपायत्वेन श्रुतं कारकं बहिरङ्गम्, ब्रह्मावगतिसाधनं व्यञ्जकं श्रवणादि तु अन्तरङ्गम् (३-३२७, ३२९)। श्रवणादीन्यावर्त्यमानानि तावत् अज्ञानसंशयविपर्यय-निवर्तकानि। शब्दशक्तिविषयं युक्तितो निरूपणं श्रवणम्, वस्तुवृत्त-विषयकं मननम्। निदिध्यासनं तु चित्तस्य चिन्मात्रशेषता (३-३४३, ३४४)। श्रवणमननबुद्ध्योर्जातयोस्तत्फलमनुभवरहितनिश्चितिलक्षणमेव निदिध्यासनमित्यपरे (३-३४३, ३४४, ३४५)॥

महावाक्यजनितं ज्ञानं संन्यासिनां प्रायेणेह जन्मनि भवति (३-३४८, ३५९) असंन्यासिभिरनुष्ठितं श्रवणादि जन्मान्तरे फलदं भवेत् (३-३५८)। ज्ञानादेवाज्ञाननिवृत्तिः। न तस्यान्यसाधनापेक्षा तत्र (४-१ प्रभृति ११)। अज्ञाननिवृत्तिश्च 'सदसत्पदसद्विकल्पितप्रतिपक्षैकवपुः (४-१२), सा च चितो न भिन्ना, अभिन्ना, भिन्नाभिन्ना वा. विकल्पितरूपा वा - इति मुक्तिकोविदा वदन्ति (४-१४), अथवा वाक्योत्थबुद्धिलक्षित आत्मैव निवृत्तिः (४-१५)॥

[अत्रेष्टसिद्धिवार्तिककारयोर्मतमनुमतम् ॥]

एवं वाक्योत्थज्ञानम् उद्यन् वा उदयोत्तरक्षणे वा अविद्यातत्कार्य-योर्यथोक्तां निवृत्तिं संपादयतीति न सहायान्तरमपेक्षते। एवं वेदान्तवाक्योत्थं ज्ञानं सकलं संसारं शमयित्वा स्वयं च शाम्यति 'दग्धलोहपीतं यथाम्बु' (४-२८)। तदेवं ज्ञानफलत्वात् मुक्तिः कूटस्थनित्या (४-२९)। अथवा अज्ञाननिवृत्तेरात्मस्वरूपत्वात् तमोमयविश्वविकल्पनाविलयनात्मिकैव मुक्तिरित्यस्तु। निर्दोषत्वादेवमभ्युपगमस्य (४-३७)॥

जीवन्मुक्तिः -

३०२. जीवन्मुक्तिविषये ग्रन्थकृन्मतमित्थम् -

सम्यग्ज्ञानाग्निः सर्वमप्यज्ञानं तत्कार्यं च सद्य एव दग्धवीति निर्लेपेन। ततो विदुषः सद्योविमुक्तिर्ध्रुवा। न च जीवन्मुक्तिज्ञापकं शास्त्रम् अनर्थकम्। तस्य कल्पितजीवन्मुक्ते योजनीयत्वात् (४-३८, ३९)॥

इत्येकं मतम्।

अथवा विदुषोऽविद्यालेशस्यानुवृत्तेः, तस्याश्च निर्निमित्तम् विद्यानिमित्तं वा निवर्तनम् इत्यङ्गीकारात्, जीवन्मुक्तिरपि सप्रमाणैव । अविद्यालेशाविद्यागन्धादिभाषास्तु नाविद्याया नापि तस्या भागस्य, किं तु बाधिताविद्याप्रतीतेः – इति भाष्यकारीयं मतम् (४–४१, ४२)

जीवन्मुक्तिस्तावदस्ति प्रतीतेः
द्वैतच्छाया तत्र चास्ति प्रतीतेः ।
द्वैतच्छायारक्षणायास्ति लेश-
स्तस्मिन्नर्थे स्वानुभूतिः प्रमाणम् ॥ ४-४३.

तस्मात्, जीवन्मुक्तिरूपेण ज्ञानी आरब्धकर्मणां भोगार्थं स्थित्वा, अविद्यागन्धप्रसूतं भोगं भुक्त्वा अत्यन्तं कैवल्यमश्नुते । 'भूयश्चान्ते विश्वमायानिवृत्तिः' इति श्रुतिरत्र मानम् (४-४५, ४६) । न चार्चिरादिमार्गेण गत्वैव मुक्तिः प्राप्या – इति नियन्तुं शक्यते ; ब्रह्मादीनां विनैव तादृशीं गतिं मुक्तेः श्रूयमाणत्वात् । तस्मात्, न निर्गुणविषया गतिः, किं तु सगुणविद्याविषयैवेति ज्ञेयम् ॥ ४-४७, ४८.

सर्वज्ञात्ममुनेः स्थानं वेदान्तेतिहासे –

३०३. अनिर्वचनीयभावाविद्यावादिनां विविधप्रक्रियासु सारं संगृह्य सैवैका भाष्यसंमता, युक्त्यनुभवोपबृंहणेन वेदान्तसिद्धान्तं निराक्षेपं स्थापयितुं समर्था च – इति प्रतिपादने यत्नः कृतः सर्वज्ञात्माचार्यैः । एकमेवाज्ञानं आकाशादिसकलजगतः द्वारकारणं सन्मायेति, जीवस्यान्तःकरणे मौढ्यरूपेण स्फुरदविद्येति च भाति । एकस्यैव जीवस्याज्ञानेन भेदप्रपञ्चः सर्वोऽपि निर्मितः – इति चैकाज्ञानैकजीववाद एव वेदान्ते परमसिद्धान्तः – इति ते व्यवस्थापयांबभूवुः ॥

(१) अज्ञानं व्यक्तिषु जातिवद् व्यापि । तच्च बिम्बोपमे ब्रह्मणि कल्पितानां प्रतिबिम्बकल्पानां जीवानां ज्ञानिनं विहायाज्ञं भजते, नष्टं व्यक्तिं परित्यज्य विद्यमानव्यक्तिभागिनीव जातिः–इति ; (२) अज्ञानानि बहूनि जीवाश्चानन्ताः । प्रतियुगमज्ञानां जीवानां ज्ञानेन निःश्रेयसम् । माया तु ईश्वरसमाश्रया आकाशादिसर्वसाधारणप्रपञ्चस्रष्टी – इति ;

(३) आकाशे यथा पक्षी 'अस्ति, नास्ति च' इत्यविरुद्धम्, एवं स्वच्छेऽपि ब्रह्मणि अविद्या भवेन्न भवेच्च – इति ; (४) शुद्धे चैतन्ये मनोद्वारैवाज्ञानं प्रविशति ; तच्च मनो चैतन्याद् बहिरेव तिष्ठद् ब्रह्मण्यज्ञानसंबन्धस्य नियामकम्- इति ; (५) अज्ञानि ब्रह्म नैका बुद्धीरनुसरति, ततश्च नानाजीवरूपं धृत्वा क्वचिद् बद्धम्, क्वचिच्च अविद्यानाशेन मुक्तं च – इति ; (६) ईश्वरमाया मत्स्यबन्धकजालवत् अविद्यावन्तो जीवान् व्याप्नोति, भगवत इच्छयैव संकुचति च। सा च माया सत्या, मिथ्या वा इत्यत्र न निर्भर इति ; (७) भ्रमतत्संस्कारसन्ततिः प्रतिजीवं भिन्ना, सा च प्रवाहरूपेण अनादिः। ज्ञानकर्मसमुच्चयेन तस्या उच्छेदः –

इति च वादिनां सप्तविधानाम् अविद्यावादानां (२–१३२ प्रभृति १३८) खण्डनं कृतं दृश्यत अस्मिन् प्रकरणे। अत इयं भावाविद्याप्रक्रिया इयता कालेन शाखोपशाखाभिर्भिन्ना आसीत्। सर्वमतसारसंग्रहपूर्वकं अनिर्वचनीयाविद्यावादप्रभेदानामेकवाक्यताकरणेन प्रक्रियारचने यत्नः प्रकरणकृतामत्रेन्युन्नीयते ॥

अत्रापरीक्षितेषु वार्तिकसंमतभेदवादखण्डनादिविचारेषु नाभिनवं किञ्चिद् दृश्यते प्रयतनमिति तद्विमर्शने न यत्नः कृतोऽस्माभिः ॥

तदेवं सङ्क्षेपशारीरकाभिधानकेऽस्मिन् प्रकरणे सकारणाध्यासनिरूपणपूर्वकं शास्त्रारम्भसमर्थनम्, सर्वस्यापि शास्त्रस्य महावाक्यार्थनिर्णयपरत्वेन निर्धारणं चेत्येष असाधारणो धर्मः। महावाक्यस्याखण्डार्थत्वं सोऽयमिति वाक्यस्येवेति निरूपणम्, नेतिनेतीत्यादिनिषेधवाक्यानां 'सत्यं ज्ञानमनन्तम्' इत्यादिविधिमुखवाक्यशेषत्वोपपादनम्, अनिर्वचनीयभावाविद्यामाययोरैक्यकथनपूर्वकमज्ञानद्वारा अद्वितीयचितः प्रपञ्चकारणत्वस्थापनम्, सगुणवाक्यानामपि निर्गुणवस्तुनि समन्वयाश्रयणम्, जगत्कारणविचारे कतिचिद्विकल्पाः, 'जिज्ञासासूत्रे त्वंपदार्थवृत्तिनिरूपणम्, जन्मादिसूत्रे च तत्पदवृत्तिनिरूपणम्, समन्वयसूत्रे तु तत्त्वमस्यादिसमस्तवाक्यानां महातात्पर्यं निरूप्यम्–इति विभागकथनम्, आरम्भवादपरिणामवाद-

विवर्तवादविवेचनपूर्वकं विवर्तवादस्य सिद्धान्तत्वेनाङ्गीकारः, अधिकारिभेदाश्रयेण 'आरोपदृष्टिः, अपवादृष्टिः, मिश्रदृष्टिश्च' इति दृष्टित्रितयमालम्ब्य क्रमेण मुमुक्षुं प्रबोधयितुं सूत्रकृतो प्रयत्नः-इतिकथनम्, बन्धमोक्षादिव्यवस्थार्थमेकजीवैकाविद्यावादाङ्गीकारः, भाष्ये जीवाश्रयाविद्योपदेशे सुषुप्ताववविद्याभावोपदेशे च भगवत्पादाशयनिर्णयः, बन्धमुक्त्यवस्थयोर्विशेषनिरूपणम्, तत्त्वंपदयोर्लक्ष्यार्थनिर्णयः, साधननिरूपणे निदिध्यासनपदार्थकथनम्, नैष्ठिकब्रह्मचारिगृहस्थवानप्रस्थानामपि श्रवणादावधिकारनिर्णयः, ज्ञानस्याज्ञाननिवर्तनपूर्वकं मोक्षकारणत्वकथनप्रसङ्गेनाज्ञाननिवृत्तिस्वरूपनिर्णयः, सद्योमुक्तिजीवन्मुक्तिवादविवेकः, अविद्यालेशसतत्त्वनिर्णयश्च —इत्येते प्रधानविषयाः क्वचित् क्वचित् पूर्वाचार्यसंमतिपूर्वकं स्वोपज्ञरीत्यैवात्र निरूपिताः शारीरकार्थत्वेन, शारीरकभाष्यकृत्संमतत्वेन च। अत्र सूत्रभाष्यप्रकरणानां कियान् संवाद इति वाचकानामेव सकृदवलोकनेन स्फुटं भविष्यतीति नास्माभिरत्र समालोचनप्रयास आदृत इत्यलं पल्लवितेन ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचर्यावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां

सर्वज्ञात्मप्रस्थानपरीक्षा नाम षोडशः काण्डः

---

१७. प्रथमसंपुटोपसंहारः

इदमेव त्वत्र वाचकैः हृदये स्थापयितव्यं यत् सुरेश्वराचार्यवार्तिकरचनादूर्ध्वं वेदान्तप्रक्रिया सर्वथा विस्मृता प्रायशः सर्वैर्वेदान्तिभिः। अद्वैताभिनिवेशयुतैरपि तैः संसारकारणमविद्या तस्याः प्रहाणं च विद्यया केनचिद् द्वारेण–इत्यभ्युपगच्छद्भिरपि 'नित्यशुद्धबुद्धमुक्तस्वरूपे परमात्मनि तत्सत्तामात्रसंबन्धिनी काचिदविद्या अनादिकालात् स्थिता, सा च विद्यया विनाशयितव्या' इति बन्धमुक्तिशास्त्रार्थवत्त्वकरणव्यसनितया निर्युक्तिकमेव कल्पितम्। अविद्या च तत्कार्यं च मिथ्यैवेत्यभ्युपयन्त एव, अविद्याया एकत्वे, नानात्वे, तन्निवृत्तिसतत्त्वे च विविधान् वादान् विकल्पितवन्त इमे। अविद्यावत्त्वेन तन्निवृत्तिमत्त्वेन च तद्वति विशेषं बन्धमुक्तिकृतविशेषं च निर्विशेषवस्तुमात्राभ्युपगमबाधकं पश्यन्तोऽपि तमङ्गीचक्रुः सर्वे वादिनः। ततश्च अविद्याभ्युपगमो वेदान्ते अध्यारोपापवादन्यायेन परिशुद्धमात्मतत्त्वं निवेदयितुमेव केवलम् अविद्यादृष्ट्यैव, न तु वस्तुवृत्तमपेक्ष्य – इत्येतत् सर्वथा प्रस्मृतं सर्वैरित्यहो अविद्यावैभवम्!

इतः परम् अद्वैतिनां न दर्शनान्तरस्थितैर्वादिभिः कथाप्रसङ्गो मुख्यः, अपि तु वेदान्तिमध्यादेव समुत्थितैर्द्वैतिभिः। तत्रापि न केवलम् सर्वसंप्रतिपन्नोपनिषत्प्राधान्येन ब्रह्मजीवजगत्संबन्धमधिकृत्य विवादः, किं तु पौराणिकशैववैष्णवादिभक्तिप्रभेदमतान्यधिकृत्यापीत्यतो वेदान्तविचारेतिहासः पृथगेवावलोकनीयो द्वितीयसंपुटे। तत्र च वेदान्तप्रधानप्रक्रियाया कीदृश्यवस्था संजातेत्यप्यवलोकयितव्यमिति विज्ञाप्य प्रथमसंपुटमिमं परिसमापयामः। अत्राधिकं यद्वक्तव्यं तद्भूमिकातोऽवगन्तव्यमिति सर्वं शिवम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां वेदान्तप्रक्रियाप्रत्यभिज्ञायां
प्रथमः संपुटः

अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्.

प्रधानविषयसूची

अत्र दत्ताः पत्रपाश्वंसङ्ख्याः

[मं. = मण्डनः इ. सि = इष्टसिद्धिः – इत्यादिरीत्या सङ्केताक्षराणि तत्तत्प्रस्थानकर्तृकृतग्रन्थान्यतरसूचकानीति बोध्यम्]

अद्वैतम् – अद्वैतप्रक्रियाभेदाः. ५-६ ; अद्वैतप्रक्रियान्तराणि परामृष्टानि, (मं) २०६-२०८ ; (इ. सि.) ५२९-५३३ ; अद्वैतं वार्तिकसंमतम्, २७४-२७६ ; अद्वैते प्रमाणम्, (खं.) ६३२-६३३.

अध्यारोपापवादप्रक्रिया – एषैव सांप्रदायिकी वेदान्तप्रक्रिया. २७, इतरप्रक्रिया-विशेषाणां मूलरूपम्, २८ ; सर्वाध्यारोपमूलम्. ३०-३१.

अध्यासः – अविद्याशब्दवाच्यः, (भ.) ३०-३१ ; तल्लक्षणम्, (पं.पा.) २८२-२८४ ; अर्थाध्यासस्य प्राधान्यम्, (पं. पा.) २८४-२८५ ; जीवभेदाध्यासे अविद्यादोषो निमित्तम्, (पं.पा.) २८९-२९२ ; अध्यासव्यवहारयोरैक्यम्, (पं.पा.) २९२-२९७; अहमध्यासः, (पं. पा.) २९७-३०० ; साक्ष्यहमोरध्यासः, (पं. पा.) ३०७-३०८ ; अध्यासस्य कारणत्रितयजन्यत्वम्, (पं. वि.) ५४१-५४२ ; अहङ्काराध्यासः, (पं.वि.) ५४७-५४८ ; अध्याससिद्धिः, (पं. वि.) ५६१-५६२ ; अध्यासदृष्टान्तभूतशुक्ति-रजतादिविषये कल्पना, (पं. पा.) ३०९-३१२, (पं. वि.) ५६२-५६५.

अध्यासस्य अनादित्वम् – (भ) ३१, (मं) १८८, (वा.) २२१-२२३, (भा.) ४०८, (पं. पा.) २९२, ३२६, (वा. भा.) ४०७, (पं. वि.) ५४५.

अनिर्वाच्यत्वम् – नामरूपबीजभूतमायायाः, (भ.) १८६ ; अविद्यायाः, (मं.) १८६ ; अज्ञानशब्दवाच्याविद्यायाः, (पं.पा.) २७९ ; (वा.भा.) कार्यकारणलक्षणाविद्याद्वयस्य, ३९७, अविद्याशक्तेर्मायालक्षणस्य, ३९०-३९९, आरोपितस्य रजतादेः, ४००, मिथ्याप्रत्ययानाम्, ४०२, अध्यासलक्षणाविद्यायाः, ४०६-४०८ ; सर्पावच्छेदज्ञानस्य, ४४४ ; (इ. सि.) अविद्यामायायाः, ४६५ ; मायाकार्यस्य जगतः, ४७०-४७१ ; प्रातिभासिकार्थस्य, ४७८-४७९ ; अध्यासोपादानाविद्यायाः, (पं. वि.) ५७२; भ्रान्तेः तत्कारणाविद्यायाश्च, (न्या म.) ६०२-६०५, ६०६ ; प्रपञ्चस्य. (खं.) ६२०-६३१ ; अनिर्वचनीयाज्ञाननिवृत्तेः पञ्चमप्रकारत्वम्, (इ. सि.) ५०९.

अन्तरालावस्था – अपवर्गाख्या, (भर्तृ.) १७३-१७६.

अन्त्यं प्रमाणम् – शास्त्रम्, (भ.) ४२-४४.

अपरोक्षज्ञानम् – साक्षात्कारो वाक्यादपि भवति, (इ. सि.) ५१९; अपरोक्षज्ञानिनोऽपि अविद्यालेशः, (इ सि.) ५२२–५२३; शब्दादपरोक्षज्ञानोत्पत्तिविषये मतद्वयम्, (पं. वि.) ५८२–५८३.

अवस्थात्रयप्रक्रिया – (भ.) ६७–६९, (भर्तृ.) १६३–१७३, (वा.) २४७–२५८, (पं. पा.) ३३१–३३३, (भा.) ३८२–३८६, (वा. भा.) ४३५–४४० (पं. वि) ५३९, ५५१, (स.) ६५५–६५७.

अवस्थात्रयवासनानिरोधविधिवादः – (प्रा.) १३९–१४२.

अविद्या – अज्ञानम्, अविद्याशब्दवाच्योऽध्यासः, (भ.) ३०–३१, (वा.भा.) ३९९–४००; अविद्याप्रक्रियावैलक्षण्यं भाष्यवार्तिकयोः, २२१–२२३; अविद्यावाध्यासहेतुः, (स.) ६४६–६४८; अविद्याहेतुस्वरूपकार्याणि, (भ.) ३२–३४; विद्यया अविद्यात्रयापबाधः, (भ.) ४६–४८; अविद्यास्वरूपम्, (भर्तृ.) १७४–१७५; (मं) १८५, (वा.) २१७–२१८; अविद्यागता चिन्ता, (भा.) ३४१–३४५; अविद्यासिद्धिः, (पं. वि) ५३८–५४०; अविद्याया आश्रयविषयौ, (भर्तृ.) १७४–१७६; (वा.) २२३; (मं.) १८७–१९०; (वा.) २२३–२२५; (वा. भा.) ४०५–४०६; (इ.सि.) ४९३, ५२५–५२६; (पं. वि.) ५४२–५४४; चिन्मात्रस्याविद्याश्रयविषयत्वम्, (स.) ६५७–६५९.

अविद्याद्वयम् – (वा. भा.) ३९७–३९९; अविद्यानानात्वम्, (वा. भा.) ४०६–४०७.

अविद्यामाये – (भ.) ५६–५८, ७६, (पं. पा.) २७९, (इ.सि.) ४७१–४७२, (पं. वि.) ५६९–५७२.

अविद्यालेशः – (इ. सि.) ५२२–५२३, (पं. वि.) ५७४; अविद्याकारविशेषः (चि.) ६४२.

अविद्याशक्तिः – (पं. पा.) २७९–२८०; (वा. भा.) ३९८–३९९, ४२२.

अविद्यासंस्कारः – (भ.) ११२; (मं.) १९९–२००, २०३; (पं.वि.) ५३९–५४०, ५७४–५७५.

अविद्या(सुषुप्ते) – (मं.) १९१, (पं. पा.) २७९, २८१, (वा.भा.) ४३९, (पं. वि.) ५३९–५४०, ५५२–५५६.

अविद्यानिवृत्तिः – (भ.) ४४, ४८, (मं.) १८८–१९०, (पं. पा.) ३२६–३२९, (वा. भा.) ५२४, (इ. सि.) ५०९–५११, (पं. वि.) ५७२–५७४; (न्या. म.) ६१७–६१८.

अव्याकृतम् – अविद्याकल्पितनामरूपलक्षणा जगत्प्रकृतिः, (भ.)५८, ४७२; अविद्याशक्तिः, (पं. पा.) २७९; (वा. भा.) ३९८–३९९, ४२२–४२५; तस्य अविद्यात्वं

नानात्वं च ४०७; तस्य अविद्यात्वम्, एकत्वेन नानात्वेन वा अनिर्वचनीयत्वं च (इ. सि.) ४७१–४७४; तस्याविद्यैक्यम्, (पं. वि.) ५६९–५७०; तस्याज्ञानशब्दवाच्यत्वम्, (स) ६४७.

अहमध्यासः (पं.पा.) २९७–३००; अहमः चित्स्वरूपसत्तामात्रानुबन्ध्यविद्यापरिणामविशेषत्वम्, (पं.पा) ३०३; आत्माहमोरध्यासः, (पं. पा.) ३०७, अहमुल्लेखे निमित्तम्, (वा.) ३०४–३०५; अहमनुभवे नात्मप्रकाशः. (वा.भा.) ४११. ४२५.

[अविद्याया अज्ञानशब्दवाच्यत्वमूरीकृत्य विचारितं तत्र तत्र।
अतस्तादृशस्थलान्यत्र निर्दिश्यन्ते ॥]

अज्ञानम् – ज्ञानाभावादिव्रितयव्यतिरिक्ता अनिर्वचनीया अविद्याशक्तिः (पं. पा.) २७९; भ्रान्त्यादिष्वनुगतम्, (इ. सि.) ४८१–४८४; शुक्त्यज्ञानसतत्त्वम्, (इ. सि.) ४८९–४९६, ४९६–५०२; अज्ञाननिवृत्तिः, (इ.सि.) ५०५–५०९; सा निवृत्तिः किद्वैक्षणा ? (इ. सि.) ५०९–५११; ब्रह्माज्ञानं क्रमेणैव निवर्त्यते, (इ.सि.) ५११–५१८; अज्ञानोपादानकोऽध्यासः, (पं. वि.) ५३६–५३८; अज्ञान-(अविद्याशक्ति)सिद्धिः, (पं. वि.) ५३८–५४०; अज्ञानविषये सप्तविविधविकल्पाः प्रतिषेध्याः, (सं.) ६६१–६६२.

आगमतर्कौ – तयोरनुभवपर्यवसायित्वम्, (भ.) ४९–५१; शास्त्रतर्कयोः कृत्यम्, (पं.पा.) ३२२–३२४; शास्त्रतर्कसंबन्धः, (वा. भा.) ४१५–४१७; विमुक्तात्मनस्तर्कप्रधानत्वम्, (इ. सि.) ४६७; शब्दावगते ब्रह्मणि तर्कस्य कृत्यम्, (पं.वि.) ५८१–५८२.

आत्मनिष्ठा – ज्ञानोत्पत्त्यनन्तरं केवलं ज्ञाननिष्ठैव, (भ.) १०८–१०९.

आत्मपरिणामवादः – शक्तिविक्षेप एव परिणामः, (भा.) ३५९–३६३.

आत्मनोऽस्तित्वप्रत्ययविषयत्वम् – (भ.) ३१; औपचारिकम्, (पं. पा.) ३००–३०२; (वा. भा.) ४२६.

आत्मा – चैतन्यस्वभावः, (भ.) ६९–७१; नित्यनिरवस्थः, (भ.) ७१, ७३, ७७.

आत्मैकत्वस्य स्वतःसिद्धत्वम् – (वा.) २१६.

आविद्यकत्वम् – प्रमातृत्वकर्तृत्वयोः, (भ.) ३५–३८; विधिप्रतिषेधशास्त्रस्य, (भ.) ३८–४०; पाण्डित्यबाल्यादिसाधनानाम्, (भ.) १०६–१०८.

ऋणत्रयापाकरणवादः – (वा.) २११.

कर्मसंस्कारः – लब्धवृत्तिकर्मसंस्कारात्, तद्विपाकसंस्काराद् वा विदुषोऽपि शरीरस्थितिः, (मं.) २०३.

कामविलयवादः – द्वैतैकात्मबुद्धिसमुच्चितकर्मभिः प्राजापत्यं प्राप्य प्रविलीनसर्वकामः परमाद्वैतं प्रतिपद्यत इति वादः, (प्रा.) १३८.

कार्यकारणविवेकप्रक्रिया – कार्यस्य कारणानन्यत्वम्, (भ.) ५२-५४; कार्यकारणयोरुभयोरपि सत्यत्वम्, (भर्तृ.) १४९-१५२; कार्यकारणभावो न वास्तविकः, (वा.) २३५-२३९; जन्मादिधर्मजातस्य उपलक्षणत्वात् जन्मादिपूर्वेण ब्रह्मस्वरूपम् लक्षितम्, (पं.पा.) ३२९-३३१; ब्रह्मपरिणाम एव जगत्, (भा.) ३५१-३५९; अविद्यासहितब्रह्मोपादानं जगत् ब्रह्मण्येवास्ति तत्रैव च लीयते, (वा.भा.) ४१९-४२२; जगत्प्रकृतिर्माया अनिर्वाच्या अज्ञैवैव, (इ.सि.) ४७३-४७८; जगत्कारणवैचित्र्ये विकल्पाः, (पं.वि.) ५९३-५९६; ब्रह्मणो जगत्कारणत्वे आम्नाय एव प्रमाणम्, कालादिव्यावृत्त्यर्थं सूत्रम्, (स.) ६५३-६५५.

ख्यातिबाधविचारः – विपरीतख्यातिः, (मं.) १००-१९१; विपरीतख्यातिः (वा.), 'इदं रजतम्' इत्येवंरूपं वस्तु न कुत्रचित्, (वा.) २२८-२३०; दोषोत्थापितसंस्कारविशेषसहितसामग्रीसमुत्पन्नज्ञानस्य उदितमेव शुक्तिगतमिथ्यारजतम् आलम्बनम् अवभासते, (पं.पा.) २८४-२८७; अनिर्वचनीयम् अध्यस्तमध्यासश्च, (वा.भा.) ४००-४०२; अनिर्वचनीयस्य ख्यातिः, (इ.सि.) ४८५-४८८; अनिर्वचनीयख्यातिः, (पं.वि.) ५६५-५६९

चित्तवृत्तिनिरोधविवादः – श्रवणज्ञानादर्थान्तरं चित्तवृत्तिनिरोधरूपं विधीयतेऽतं वेदान्तेषु – इति वादः, (प्रा.) १४३-१४४.

जीवत्वाध्यासः – (वा.भा.) ४२५-४२६.

जीवन्मुक्तिः – (भ.) ११३-११५, (मं.) २०३, (वा.भा.) ४४२-४४५, (स.) ६६०-६६१.

जीवब्रह्मविभागः, जीवेश्वरविभागः – मायिकः, (भ.) ७५-७७, ८८; (भा.) ३७१-३७५; ब्रह्मणो जीवभावः अनाद्यनिर्वचनीयाविद्योपधानभेदात्, (वा.भा.) ४२७-४३०; आत्मावरणमात्माज्ञानमेव जीवब्रह्मविभागाद्यध्यासोपादानम्, (पं.वि.) ५४५-५४६; अविद्यातन्त्रोऽयं विभागः, नाविद्योपादानकः (पं.वि.) ५५६-५५७; जीवस्य ब्रह्मप्रतिबिम्बत्वम् अवच्छेदवादनिराकरणं च, (पं.वि.) ५४८-५५१.

जीवस्य व्यवहारः – उपाधिकृतः, (भा.) ३७५-३७९.

ज्ञानकर्मसमुच्चयः – विधीयते इति वादः, (प्रा.) १२३-१२६; (भर्तृ.) १७९-१८०; विधिं विना ध्यानाभ्यासकर्मसमुच्चयः तेन मिथ्याज्ञानसंस्कारनिवृत्तिः, (मं.) १९९-२०३; (भा.) ३८६-३८९.

ज्ञानसाधनानि, मुक्तिसाधनं च – कर्मादीनि, (भ.) ९६-१००; तदनुष्ठानावधिः, (भ.) १००-१०२; ज्ञानसाधनविचारः, (पं.पा.) ३३३-३३६; साधनानुक्रमः (वा.) २७०-२७१; ज्ञानवत् कर्म विमुक्तिसाधनम् (भा.) ३८६-३९०; (वा.भा.) ४४५-४४८; (न्या.म.) ६१७.

ज्ञानविधिः – ज्ञानापरामिधानोपासनाविधिशेषत्वं ब्रह्मणः, (प्रा.) १२६-१२८; ज्ञानविधिः, (प्रा.) १२९-१३० ; ज्ञानविधिचिन्ता, (वा.) २५८-२६२.

ज्ञानाभ्यास(प्रसङ्ख्यान)विधिः – ज्ञानाभ्यासावश्यकता, (प्रा.) १३०-१३३.

ज्ञानोपासने – तयोर्वैलक्षण्यम्, (भ.) ९३-९८ ; तयोरैक्यम्, (प्रा.) १२६ ; अभ्यासेन ज्ञानं पक्वं भवति, (भा.) ३९१.

दृग्दृश्यप्रक्रिया – द्रष्टृस्वरूपनिर्धारणम्, (भ.) ६२-६५ ; दृष्टेर्द्रष्टा इत्यस्यार्थः, (भर्तृ.) १५६-१५८ ; दृष्टिश्रुत्यादीनां धर्मत्वं विज्ञानात्मनो धर्मित्वं च, (भर्तृ.) १५९-१६० ; दृष्टेरेकस्या एव भेदावभासः, (वा.) २४४-२४७ ; दृग्दृश्ययोर्न भेदः, नाभेदः, (इ. सि.) ४६८-४६९.

द्वैतम् – तस्य मिथ्यात्वं नाम वस्तुतः परमार्थानन्यत्वमेव, (भ.) ८१-८३ ; अविद्याकल्पितमेव, (वा.) २७३-२७४.

निदिध्यासनम् – उपासनानिदिध्यासनयोर्वैलक्षण्यम्, (भ.) १०३-१०६ ; निदिध्यासनविधिः, (भर्तृ.) १७७ ; निदिध्यासनं नाम अपरायत्तबोधः, (वा.) २६३ ; पातञ्जलोक्तं ध्यानम्, चिन्तासन्ततिः, (वा. भा.) ४५२ ; श्रवणमात्रानपोढाज्ञाननिवर्तकं साधनम्, (इ. सि.) ५१४ ; एकाग्रगुणनिर्मापकं श्रवणस्य फलोपकार्यङ्गम्, (पं. वि.) ५८२, ५८८ ; चित्तस्य चिन्मात्रशेषता, (स.) ६६०.

पञ्चकोशविवेकः – पञ्चकोशानां पूर्वपूर्वस्य उत्तरस्मिन्नुत्तरस्मिन् प्रविलयेन ब्रह्मज्ञानम्, (भ.) ६६ ; कोशानां कारणे प्रविलयपूर्वकं कोशातीतब्रह्मज्ञानम्, (वा.) २४२-२४४ ; भास्करानूदितवृत्तिकारमतं कोशविचारे, (भा.) ३७९-३८१.

प्रक्रिया – वेदान्तप्रक्रियाया दुरूहत्वे निमित्तम्, १-३ ; व्याख्यानादृतविविधप्रक्रियाविषये आक्षेपसमाधानानि, ४-१३ ; प्रक्रियाप्रत्यभिज्ञापनाय यत्न आस्थेयः, १३ ; तन्निर्धारणे अनुसर्तव्या नियमाः, १४-१७ ; स्वातन्त्र्येण प्रस्थानत्रयपरीक्षणम् प्रक्रियानिर्धारणे निष्फलम्, १८-२५ ; भगवत्पादसंमता सांप्रदायिकी प्रक्रिया, २७ ; अध्यारोपापवादप्रक्रियैव मूलप्रक्रिया, २८.

प्रतिपत्तिविधिः – ब्रह्म उपासनारूपप्रतिपत्तिविधिशेषमिति प्राचीनप्रस्थानम् तन्निराकरणं च भाष्यकारेण, १२६-१२९ ; विविधप्रतिपत्तिविधिप्रकाराणां निराकरणम्, (पं.) ३२४-३२६ ; प्रतिपत्तिविधिनिराकरणपूर्वकं विधिं विनैव ध्यानाभ्यासपक्षस्वीकारः, (मं., वा.भा.) ४५२-४५६, तद्विमर्शश्च ४५७-४५८ ; एतदेव पक्षमनुसृत्य 'शब्दादवगते ब्रह्मणि सुखसंवेदनत्वात् अभ्यासेनापरोक्षीकृते विधिमन्तरेण ब्रह्मसाक्षात्करणम् इति (पं. वि.) पक्षः, ५८४-५८५.

प्रत्यक्षादिगतविचारः – प्रत्यक्षादीनाम् आविद्यकत्वम्, (भ.) ४२, ८३ ; प्रत्यक्षाद्यगोचरं ब्रह्म, (भ.) ४९ ; शास्त्रस्य प्रत्यक्षादिविरुद्धत्वाभासपरिहारः (भ.) ८३-८६ ;

प्रत्यक्षादिविरोधे आम्नाय एव बलवान्, (मं.) १९२-१९४; प्रत्यक्षादिफलत्वेन संमता अवगतिरेव वेदान्तप्रमेया, (वा.) २३१; शास्त्रस्य प्रत्यक्षादिविरोधं नानुमन्यन्ते वार्तिककाराः, २३४-२३५; प्रत्यक्षादीनां मिथ्यात्वं नास्ति, (भा.) ३४७; ज्येष्ठमपि प्रत्यक्षप्रमाणं न शास्त्राद् बलवत्, (वा. भा.) ४१२; प्रत्यक्षादीनां स्वप्नव्यवहारवत् प्रामाण्यव्यवहारः, (इ. सि.) ५०२-५०३; प्रत्यक्षादीनां व्यावहारिकं प्रामाण्यम् (न्या. म.) ६०८-६१०.

प्रपञ्चविलयवादः – प्राचीनं प्रस्थानम्, १३३-१३७.

प्रमाणविचारः – प्रमाणव्यवहारस्य आविद्यकत्वम्, (भ.) ३५-४२; तत्सत्यत्वं व्यवहारे, (भा.) ३४७; प्रमाणानां व्यावहारिकं प्रामाण्यं ब्रह्माविषयकत्वं च, (मं.) १९२-१९४; प्रमाणव्यापारः, (वा.) २२५-२२७; प्रमाणव्यवहारस्य मिथ्यात्वं नास्ति, (भा.) ३४६-३४७; प्रमाणानामाविद्यकत्वं कथम्? (पं. पा.) ३१३-३१५; (वा. भा.) ४०८-४१०; प्रत्यक्षादीनां प्रामाण्यं कथम्? (इ.सि.) ५०२-५०३; प्रमातृप्रमाणादिव्यवहारसंभवः, (पं. वि.) ५५८-५६८; प्रमाणसत्ताङ्गीकारे विवादः, (खं. खा.) ६२१-६२२; प्रमेयापरोक्ष्यम्, (पं. पा.) ३१६-३१८.

प्रसङ्ख्यानवादः – ज्ञानाभ्यासविधिवादः, (प्रा.) १३०-१३३.

प्रस्थानानि – वेदान्तार्थसिद्धान्तप्रकारविशेषाः; प्रस्थानत्रये प्रतिष्ठापिता प्रक्रिया विविधभाष्यकारैराकुलीकृता, १; व्याख्यानप्रस्थानोनां द्वैतिवेदान्तिप्रस्थानानां चोदयादपि प्रक्रियाप्रत्यभिज्ञानं कष्टसाध्यं जातम्, २-३; व्याख्यानप्रस्थानानां विरोधपरिहारः, तद्विमर्शश्च, ४-१७; प्रस्थानत्रयग्रन्थशरीरपरीक्षणम्, १८-२५; श्रीशङ्करभगवत्पादभाष्यप्रस्थानम्, २६-११७; प्राचीनप्रस्थानपरीक्षा, ११८-१४७; भर्तृप्रपञ्चप्रस्थानपरीक्षा, १४८-१८२; मण्डनप्रस्थानपरीक्षा, १८३-२०९; वार्तिकप्रस्थानपरीक्षा, २१०-२७६; पञ्चपादिकाप्रस्थानपरीक्षा, २७७-३३६; भास्करप्रस्थानपरीक्षा, ३३७-३९३; भामत्यादिव्याख्यानप्रस्थानानां परीक्षा, ३९४-५९८; न्यायमकरन्दादिप्रकरणप्रस्थानानां परीक्षा, ५९९-६६३; प्रस्थानपरीक्षाफलम्, ६६४.

प्रातिभासिकार्थः – शुक्तिरजतादिज्ञानविषयः, (पं. पा.) २८६-२८७; तस्य कारणमज्ञानम्, (इ. सि.) ४७८-४७९; तद्विषये कल्पना, (पं. वि.) ५६२-५६५; (न्या.म.) ६०३, ६०५.

बद्धमुक्तव्यवस्था – ब्रह्मैवेकं नित्यमुक्तं स्वाश्रयविषयाज्ञानवशतः संसरति, ज्ञानेन च मुच्यत इति व्यवस्था कथम्? (स.) ६५९.

बीजभावावशेषः – बुद्धिसंबन्धस्य सुषुप्तिप्रलयादिषु, (भ.भा.) ३८५-३८६; (वा.भा.) ४३९-४४०.

ब्रह्म – ब्रह्मवाक्यानि निरुपाधिकसोपाधिकब्रह्मविभागेन, (भ.) ८६–८९; परापरब्रह्मणी, (भ.)९१–९२; ब्रह्मण उपासनाविधिशेषता, (प्रा.) १२६–१२८; तस्य अष्टावस्थाः, (भर्तृ.) १५२–१५३.

भागवतमतम् – ध्यानेनैव ईश्वरसायुज्यमिति वादः, (प्रा.) १४४–१४७.

भाष्यकाराः – प्राचीना अर्वाचीनाश्च वेदान्तसिद्धान्ते विप्रतिपन्नाः, १–३.

भेदनिरासः, – (मं. वा.) २११; (इ. सि.) ४६८–४६९; (न्या. म.) ६०१–६०२.

भेदाभेदः – भिन्नाभिन्नं जगत् ब्रह्मणः, (भा.) ३५२–३५३; जीवश्च भिन्नाभिन्नः, ३७१–३७३; भेदाभेदनिरासः, (वा. भा.) ४३०–४३२.

महावाक्यम् – तत्त्वमस्यादिवाक्यानि महावाक्यानि, तेषामखण्डार्थबोधकत्वम्, महावाक्यज्ञानेन च मोक्षः, (स.) ६४८–६५०.

माया– अविद्याध्यस्ता प्रकृतिः, (भ.) ५५; (भा.वा.) ४२४; अविद्या मायाशब्दवाच्या, (मं.) १८६; नामरूपादिरूपेण प्रथमानाया अविद्यायाः सौक्ष्म्यम्, (वा.) २३८; प्रकृतिरेव अविद्या, माया च, (पं.पा.) २७९; मायावादनिरासः, (भा.) ३६३-३६४; लयलक्षणया अविद्यया विक्षेपसंस्कारेण च प्रत्युपस्थापितनामरूपमेव माया, (वा.भा.) ४२४; मायैवाविद्या, (इ. सि.) ४७१–४७३, ४७४–४७८; मायैवाविद्या, (पं.वि.) ५६९–५७२, विक्षेपप्राधान्येन माया आच्छादनप्राधान्येन अविद्या–इति, इच्छाधीनत्वतद्वैपरीत्येन वा व्यपदेशभेदः, ५७१.

मुक्तिः, मोक्षः – आत्मन्यवस्थानम्, (भ.)१०९–११२; जीवन्मुक्तेर्मुख्यत्वम्, (भ). ११३–११४; द्विविधम् साक्षात्कृतब्रह्मत्वम्, शरीरपातोत्तरं ब्रह्मणि लयश्च – इति (भर्तृ.)१७२; मोक्षे वार्तिकमतम्, (वा.)१७३; अन्तरालावस्था अपवर्गाख्या, (भर्तृ.) १७३–१७६; कर्ममात्रसाध्यत्वं मुक्तेः, (प्रा.) ११८–११९; मोक्षप्राप्तिप्रकारः, (मं.) २०३–२०६; अविद्यानाश एव मोक्षः, (वा.) २७१–२७२; द्विधा मुक्तिः, जीवदवस्थायां रागद्वेषमोहैः, तदङ्गैश्च महदादिभिः, पातोत्तरकालमात्यन्तिकीति, (भा.) ३९२; जीवन्मुक्तिनिरासः, (भा.) ३९२; स्वरूपावस्थानम्, (वा. भा.) ४४१–४४२; जीवन्मुक्तिरप्यस्ति, (वा. भा.) ४४२–४४५; अविद्यायास्तत्त्वसाक्षात्कारतो निःशेषविनिवृत्तिर्मुक्तिः, (न्या. म.) ६१४; जीवन्मुक्तिरविद्यालेशात् सिध्यति, (चि.) ६४२; मुक्तिर्ज्ञानफलत्वान्नित्या, अविद्याविलयनात्मिकैव वा मुक्तिः, (स.) ६६०; जीवन्मुक्तिविषये मतद्वयम्, (स.) ६६०–६६१.

योगः – सनकादिशास्त्रविहितो योगो ध्यानधारणसमाधिलक्षण आवश्यकः, (भा.) ३९१.

विज्ञानस्मृतिसंततिवादः – उदिते श्रवणादिज्ञाने तत्स्मृतिसन्ततिर्विधीयते इति वादः, (प्रा.) १४२–१४३.

शमादिविधिः – शमादिसंपन्नो भूत्वा महिम्नः पदविद् भवेत् इति विधिः, (वा.) २६७–२७०.

शास्त्रम् – शास्त्रमन्त्यं प्रमाणम्, (भ.) ४२–४४; शास्त्रप्रामाण्ये आक्षेपसमाधानानि, (मं.) १९४–१९६; ब्रह्मणः शास्त्रप्रमाणकत्वे आक्षेपसमाधानानि, (मं.) १९६–१९९; शास्त्रप्रामाण्यम्, (वा.) २३०–२३४; शास्त्रप्रामाण्ये शङ्कापरिहाराः, (पं. पा.) ३१८–३२१; शास्त्रप्रामाण्यम्, (भा.) ३४५–३४८; शास्त्रप्रामाण्यम्, (वा. भा.) ४१०–४१५; ब्रह्मणः शास्त्रकारणत्वम्, (पं. वि.) ५७५–५७६; तस्य शास्त्रप्रमाणकत्वम्, (पं. वि.) ५७७–५८०.

शून्यवादिनोऽपि कथायां प्रवेशः – प्रमाणासत्ताभ्युपगमनियमाभावात् शून्यवादिनापि कथा शक्यप्रारम्भा, (खं. खा.) ६२३–६२४.

श्रवणादिसाधनानि – श्रवणादीनि साक्षात् ज्ञानसाधनानि, (भ.) ९६; निदिध्यासने श्रवणादिवदेव विधिः – (भर्तृ.) १७७; श्रवणादयो विधीयन्ते, निदिध्यासनं तु विज्ञानरूपत्वात् न विधीयते, (वा.) २६०–२६२; श्रवणादिविषये भाष्यवार्तिकाभिप्रायतुलना, २६२–२६७; श्रवणाद्यावृत्तिरावश्यिकी, (भा.) ३९०; वाक्यश्रवणमात्रान्न साक्षात्कारः, (वा. भा.) ४५८–४६२; श्रवणाद्यपदेश अर्थवादः, (पं. पा.) ३३५; श्रवणं मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां विधीयते, (पं. वि.) ५८५–५८९.

समाधिः – द्रष्टव्य इति समाधेरुपदेशः, (वा. भा.) ४५२; असंप्रज्ञातसमाधौ आत्मैकत्वदर्शनम्, (पं. वि.) ५७३.

साक्षात्कारः – साक्षात्कारोऽप्यपेक्ष्यते अभयप्राप्तेरनन्तरम्, (भर्तृ.) १७२; तत्त्वदर्शने जातेऽपि अभ्यासात् साक्षात्कारः, (मं.) १९९–२००; साक्षात्कारपर्यन्तमेव ज्ञानं संसारनिवृत्तिकृत्, (वा. भा.) ४४६–४४९; अज्ञाननिवृत्तिद्वारा ज्ञानस्य साक्षात्कारहेतुत्वम्, (इ.सि.) ५१८–५१९. (अपरोक्षशब्दोऽप्यत्र द्रष्टव्यः ॥)

साधनसोपानम् – कर्मादिसाधनपरम्परा मुक्तये, (वा.) २७०–२७९; (वा. भा.) ४४५.

स्वप्रकाशविचारः – स्वप्रकाशविज्ञानवादः, (खं. खा.) ६२५–६२८; स्वप्रकाशत्वम्, (चि.) ६३९–६४०.

अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्. १०००, ६-६-१९६४.